Book No. 4-A.

॥ श्रीरस्तु ॥

॥ श्रीहस्तिशैलशिखरोज्ज्वलपारिजाताय नमः ॥

श्रीमद्विशिष्टाद्वैतसिद्धान्तप्रवर्तनधुरंधर-कवितार्किकसिंह
सर्वतन्त्रस्वतन्त्र श्रीमद्वेदान्ताचार्य विरचित

सकलग्रन्थबृन्द प्रकाशनी

॥श्रीमद्वेदान्तदेशिकग्रन्थमाला॥

पर्यवेक्षकः परिष्कारकश्च
श्रीकाञ्ची प्रतिवादिभयङ्करमठाधीश
जगद्गुरु-श्रीकृष्णमाचार्यस्वामी, तथा
श्रीकाञ्ची वेदवेदान्तवैजयन्ती विद्यालयाध्यक्षः
प्रतिवादिभयङ्कर-अण्णङ्गराचार्यः

Srimath Vedantadesika Granthamala

GENERAL EDITOR
SRI KANCHI. P. B. ANNANGARACHARYAR

प्रकाशनादि सर्वाधिकारी
विद्वान्. ति, अ. संपत्कुमाराचार्यः एम्. ए., कञ्जीवरम्.
प्राप्तिस्थानम्-ग्रन्थमाला आफिस्, ३९. सन्निधिवीधी कञ्जीवरम् ।

Address:—
Granthamala Office, 39, Sannidhi Street,
CONJEEVERAM. [S. I. Ry.]
1941.

श्रीः ।

ग्रन्थमालानिर्वाहकसमितिनिविष्टा एते महानुभावाः—

१. श्रीजगन्नाथपुरीवास्तव्य (एमारमठ) श्रीराजगोपालमठाधीश श्रीयुत गदाधर रामानुजमहन्त महोदयः (प्रधानाध्यक्षः)

२. श्रीमानुजबिल्डिङ्गधिपति, सोलापुर श्रीयुत सेठजी " गणेशराममुरलीधर " श्रीनारायणदास-नरसिंहदास-रघुनाथदास-राजगोपालदास श्रेष्ठिनः (उपाध्यक्षाः)

३. कलकत्तानगरनिवासी, श्रीयुत सेठजी किसनलाल बांगडमहोदयस्य पुत्ररत्नम् श्रीमान् रामनिवासबांगड सेठ. (उपाध्यक्षः)

अस्या ग्रन्थमालाया अभिनन्दनकर्तारः—

१. श्रीमत्परमहंसेत्यादि. श्रीमदहोबिलमठाधिपति संयमिसार्वभौमाः (श्रीरङ्गनगरी)
२. श्रीमत्परमहंसेत्यादि. मैसूरु श्रीपरकालमठाधीश संयमिसार्वभौमाः ।
३. श्रीकुम्भघोणनगरीय. महामहोपाध्याय. अभिनवभट्टबाण. रा.च.वि. कृष्णमाचार्याः ।
४. तिरुच्चिनाप्पल्लि. वावदूकाग्रगण्याः ए. वि. गोपालाचार्यमहाशयाः ।
५. मदरासनगरीय. वावदूकचूडामणि. वि. वि. श्रीनिवासय्यङ्गारमहोदयाः ।
६. पुदुक्कोट संस्थान. दानाधिकारि. विद्वद्वरिष्ठ. काली. रङ्गाचार्यमहाभागाः ।
—अन्ये च बहवो लौकिकवैदिक विद्वद्वरेण्याः ।—

॥ श्रीरस्तु ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

[वेदान्तविभागे तृतीयसम्पुटम्]

॥ तत्त्वमुक्ताकलापः—सर्वार्थसिद्धिसमेतः ॥

पर्यवेक्षकः परिष्कारकश्च

॥ श्रीकाञ्ची प्रतिवादिभयङ्करः अण्णंगराचार्यः ॥

प्रकाशनादिसर्वाधिकारी :

विद्वान् अ. संपत्कुमाराचार्यः, M. A.

३९, सन्निधिवीथी, कञ्जीवरम्.

[इदमेव पुस्तकप्राप्तिस्थानम्]

मदरास्—लिबर्टी मुद्रणालये समुद्यत

1941

Price : 4—0—0]   ॥ मूल्यं रूप्यचतुष्टयमात्रम् ॥   [Postage Extra.

॥ श्रीरस्तु ॥

श्रीमत्प्रणतार्तिहरवरदपरब्रह्मणे नमः ।

श्रीमते हयग्रीवाय नमः । श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीमद्वेदान्तदेशिकग्रन्थमाला ॥

[वेदान्तविभागे तृतीयसंपुटम्]

कवितार्किकसिंहसर्वतन्त्रस्वतन्त्रश्रीमद्वेदान्तदेशिकविरचितः

तत्त्वमुक्ताकलापः—सर्वार्थसिद्धिसमेतः ॥

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी । वेदान्ताचार्यवर्यो मे संनिधत्तां सदा हृदि ॥

॥ जडद्रव्यसरः ॥ १ ॥

लक्ष्मीनेत्रोत्पलश्रीसततपरिचयादेष संवर्धमानो
नाभीनालीकरि[ङ्ग]द्बन्मधुकरपटलीदत्तहस्तावलम्बः ।
अस्माकं संपदोघानविरलतुलसीदामसंजातभूमा
कालिन्दीकान्तिहारी कलयतु वपुषः कालिमा कैटभारेः ॥ १ ॥

जयति सकलविद्यावाहिनीजन्मशैलो जनिपथपरिवृत्तिश्रान्तविश्रान्तिशाखी ।
निखिलकुमतिमायाशर्वरीबालसूर्यो निगमजलधिवेलापूर्णचन्द्रो यतीन्द्रः ॥

ताराकल्पे स्फुरति सुधियां तत्त्वमुक्ताकलापे दूराद्वृत्त्या दुरधिगमतां पश्यतां सर्वसिद्ध्यै ।
नातिव्यासव्यतिकरवती नातिसंकोचखेदा वृत्तिस्सेयं विशदरुचिरा कल्प्यतेऽस्माभिरेव ॥

आरिप्सितस्य प्रबन्धस्याविघ्नपरिसमाप्त्यादिसिद्ध्यै मङ्गलमाचरन्नर्थाद्वक्ष्यमाणं द्रव्याद्रव्यविभागं प्रतितन्त्रविशेषांश्च संग्रहेण सूचयति—**लक्ष्मीति** । * यज्ञविद्येत्यादिना सर्वविद्यानां तादधीन्योक्त्या सा ख्याप्येति लक्ष्मीरादौ संकीर्त्यते । नित्ययुक्तत्वसूचनाय सततपरिचयोक्तिः । नाभीत्यादिना पद्मभुवः कार्यत्वकर्मवश्यत्वसूचनात्ततोऽर्वाचामनीश्वरत्वं कैमु[तिक]त्यसिद्धम् । **अस्माकमिति** । जीवानामीश्वरादन्योन्यं च भेदः, प्रत्यक्त्वमहंशब्दार्थत्वं च प्रख्याप्यते । तेन स्थालीपुलाकन्यायेन परमतनिरासमप्युदाहरति—**संपदोघानिति** । तत्त्वज्ञानादिकाः स्वप्राप्तिपर्यन्तास्सिद्धिपरम्पराः । अविरलेत्यादिना सत्त्वाधिकप्रशस्ततमद्रव्यार्चनीयतयाऽन्येभ्यो व्यावर्तनीयत्वमनुवर्ण्यते । कालिन्दीकान्तिहारीत्यनेन तद्गुणानां परगुणतिरस्कारकत्वमुपलक्ष्यते । कैटभारेर्वपुष इति व्यतिरेकविभक्त्या शुद्धसत्त्वमयविग्रहयोगस्त[स्यस्व]स्वरूपादन्यत्त्वं च स्थाप्यते । वपुषः कालिमेति द्रव्याद्रव्यविभागप्रदर्शनार्थम् । एवं जडाजडाद्यपि यथास्थानमूह्यम् ॥ १ ॥

नानासिद्धान्तनीतिश्रमविमलधियोऽनन्तसूरेस्तनूजो
वैश्वामित्रस्य पौत्रो विततमखविधेः पुण्डरीकाक्षसूरेः ।
श्रुत्वा रामानुजार्यात्सदसदपि ततस्तत्त्वमुक्ताकलापं
व्यातानीद्वेङ्कटेशो वरदगुरुकृपालम्भितोद्दामभूमा ॥ २ ॥

चिकीर्षितस्य श्रद्धेयत्वाय वक्तृसंप्रदायवैलक्षण्यं दर्शयति **नानेति** । सत्—प्रामाणिकं मुमुक्षोरुपादेयं च; तदन्यदसत् । सतस्सत्त्वेनासतश्चासत्त्वेन श्रवणमिहेष्टम्, ततः—श्रवणादेव हेतोः ॥ २ ॥

प्रज्ञासूच्याऽनुविद्धः क्षतिमनधिगतः कर्कशात्तर्कशाणा-
च्छुद्धो नानापरीक्षास्वशिथिलविहिते मानसूत्रे निबद्धः ।
आतन्वानः प्रकाशं बहुमुखमखिलत्रासवैधुर्यधुर्यो
धार्यो हेतुर्जयादेः स्वहृदि सहृदयैस्तत्त्वमुक्ताकलापः ॥ ३ ॥

प्रबन्धस्य स्वरूपातिशयादपि सुधीभिस्स्वीकार्यत्वमाह **प्रज्ञेति** । ज्ञातस्यातिशयाधायिनी धीः प्रज्ञा । कलापस्यानुविद्धत्वादि प्रत्येकद्वारा । तत्त्वानां प्रज्ञया अनुविद्धत्वं सम्यङ्निर्धारितत्वम् । रत्नान्तरेषु शाणक्षतिसंभवो न मुक्तासु । प्रमाणतर्कैर्याथात्म्यान्वेषणं परीक्षा । तन्नानात्वं तर्कादिभेदात् । मुक्तासु स्वानुगुणपरिमाणयुक्तं सूत्रं मानसूत्रम् । अन्यत्र प्रमाणमेव सूत्रं तस्याशिथिलविहितिः—निर्बाधत्वेन विशेषतो धीस्थत्वम् । प्रकाशम्—आलोकं बोधं च । बहुमुखम्—सर्वतोदिक्कं सर्वविषयं च । त्रासो मणिदोषः प्रतिपक्षाद्भीतिश्च । जयादेरित्यादिशब्देन क्वचिदैश्वर्यादेरन्यत्र तत्त्वनिर्णयस्य च संग्रहः । हृच्छब्दो वक्षश्चित्तं च वदति । सहृदयैः—सारासारविवेचनार्हहृदयवद्भिः । धार्यः—क्वचिदाभरणतयाऽन्यत्राप्रमोषेण ॥ ३ ॥

शिष्टा जीवेशतत्त्वप्रमितियुतपरोपासनामुक्तिहेतुः
शक्यस्तत्तत्प्रकारावगतिविरहिभिर्नैव याथात्म्यबोधः ।
तेते चार्था विदध्युः कुमतिविरचितास्तत्त्वबोधोपरोधं
तस्मान्निर्धूतसर्वप्रतिमतविमतिं साधये सर्वमर्थम् ॥ ४ ॥

नन्वपवर्गसिद्धौ यदन्तरङ्गं तदेव विशदं तदर्थिभिरवगन्तव्यम्, तावदेव शिष्यादिभ्योऽपि प्रवर्तितव्यम्, किमन्यैरिह कीर्त्यमानैरित्यत्राह **शिष्टेति** । शिष्टा—चोदितेत्यर्थः । जीवेशावेव तत्त्वे जीवेशतत्त्वे; तयोः प्रमितिरिहागमजन्या । परोपास्तेस्तत्त्वज्ञानमितिकर्तव्यता, नतु स्वयं साधनम् । प्रमितियुता—प्रमितिजनितानुस्मृतिपूर्विकेत्यर्थः । तदभिप्रायेणोक्तं जीवपरमात्मयाथात्म्यज्ञानपूर्विकेत्यादि । परोपासनेति सर्वविद्याभिप्रायं, परस्य ब्रह्मण उपासनेति वा । **शक्य** इत्यादि—न हि द्रव्याद्रव्यविभागाभावे शिष्टोपासनमूलकतत्त्वप्रतीतिसिद्धिः । तत्त्वनिरूपणाभावे च तत्त्वनिर्णयोपयुक्तयोस्तर्कानुमानयोर्व्याप्तिः शङ्काकलङ्किता स्यात् । परोक्तानुमानानामन्यतरासिद्ध्यनैकान्तिकत्वाद्युद्भावनं च कथं स्यात्? परो वा कथमस्मत्सिद्धान्तानभिज्ञः कथायामस्माभिरधिकुर्यात्? परकल्पितार्थभञ्जनेन तदहङ्कारखण्डनं च तत्त्वाध्यवसायसंरक्षणार्थम् । तत्तदिति प्रस्तुतौ जीवेशौ गृह्येते । अथवा तत्तत्प्रकृत्यादिप्रकारबोधाभावे तत्तत्प्रतिसंबन्धिकं तयोरपि याथात्म्यं नावगम्येत । ते ते चार्थाः ब्रह्मविवर्तपरिणामभिन्नाभिन्नत्वादयः । कुमतिविरचिताः—कुदृष्टिभिः कल्पिताः, भ्रान्तिविजृम्भिता इति वा ।

अत एव कुमतिभिरर्थ्यन्त इत्यर्थाः न तु परमार्थाः । प्रतिमतैर्विमतिः—विवादः, तत्प्रसूता वा विरुद्धबुद्धिः । सर्वमर्थं—मुमुक्षुभिर्ज्ञातव्यम् । परम्परयेत्यर्थः ॥ ४ ॥

आवापोद्वापतस्स्युः कतिकति कविधीचित्रवत्तत्तदर्थे-
ष्वानन्त्यादस्तिनास्त्योरनवधिकुहनायुक्तिकान्ताः कृतान्ताः ।
तत्त्वालोकस्तु लोप्तुं प्रभवति सहसा निस्समस्तान्समस्तान्
पुंस्त्वे तत्त्वेन दृष्टे पुनरपि न खलु प्राणिता स्थाणुतादिः ॥ ५ ॥

तथाऽपि निर्धूतसर्वप्रतिमतविमतिं सर्वमर्थं साधये इत्यशक्योक्तिः, त्रैकालिकसिद्धान्तभेदानन्त्यादित्याशङ्कोद्धाटन-पूर्वकं प्रयोजकशिक्षया कृत्स्नानिष्टनिरासः, कृत्स्नाभीष्टसाधनं च शक्यमिति स्थापयति—**आवापेति** । एकस्मिन्नेव हि दर्शने व्याख्यातृभेदात्केषांचित्प्रमेयानामावापोद्वापौ दृश्येते, यत एकदेशिव्यपदेशः । कविधीचित्रवत्—कवीनां धीभिः कृतं काव्यादिकं कविधीचित्रम्; तद्वन्मतभेदा अप्यनन्तास्संभवन्ति । तत्तदर्थेष्वस्तिनास्त्योरानन्त्यादित्यन्वयः । अस्तिनास्त्यो-रिति प्रयोगपरम् । कुहना—छद्म । तत्संबन्धिन्यो युक्तयः कुहनायुक्तयो हेत्वाभासच्छलजातिरूपाः ताभिः कान्ताः सम्यक्त्वे-नैव भाताः । तत्त्वालोकः—यथार्थाध्यवसायः । प्र[कृ]स्तुतशङ्कानिरासार्थमपेक्षणीयान्तराभावात्सहसेत्युक्तम् । निस्सम इति निरधिकत्वोपलक्षणम् । प्रतिरोधबाधरहित इत्यर्थः । उक्तस्थापकं त्र्यन्तार्थविशेषव्यञ्जकमप्यर्थान्तरं न्यस्यति—**पुंस्त्व** इति । पुनर्न प्राणिता—संशयविपर्ययसामग्रीलोपान्न भासेतेत्यर्थः ॥ ५ ॥ **इति तत्त्वज्ञानप्रयोजनम्** ॥

द्रव्याद्रव्यप्रभेदान्मितमुभयविधं तद्विदस्तत्त्वमाहु-
र्द्रव्यं द्वेधा विभक्तं जडमजडमिति प्राच्यमव्यक्तकालौ ।
अन्त्यं प्रत्यक् पराक् च प्रथममुभयधा तत्र जीवेशभेदा-
न्नित्या भूतिर्मतिश्चेत्यपरमिह जडामादिमां केचिदाहुः ॥ ६ ॥

अथ निरूप्यमर्थजातं साधर्म्यवैधर्म्यभेदैस्संगृह्य विभज्य च निर्दिशति—**द्रव्येति** । अत्र तत्त्वमिति पदार्थमात्रोक्तिः । मितं—प्रमितम् । तथात्वं च सर्वसाधारणम् । तदपि हि सामान्यतः प्रमितम् । अन्ततस्स्वपरनिर्वाहान्नानवस्था । इदं च सा-धर्म्योक्तिमात्रं व्यवच्छेद्याभावेन लक्षणत्वासिद्धेरित्येके । निर्दिष्टव्यापित्वे सति तदन्यवृत्ति[रहितत्वा]विरहाल्लक्षणमपि स्यादित्यन्ये । बाह्यकुदृष्टिव्यावृत्तास्तद्विदः । अत्र तत्तदन्यरूपेण विभागेषु न नीलपीतादिवत्कोट्यन्तरावकाशः । द्रव्यत्वा-त्यन्ताभाववत्त्वरूपेण तदन्यत्वस्य विवक्षितत्वाद्द्रव्यलक्षणं वक्ष्यति । जडमिह स्वगोचरज्ञानत एव प्रकाशमानम् । अव्यक्त-शब्देन व्यक्तमपि लक्ष्यते तदनन्यद्रव्यत्वज्ञापनार्थम् । प्रत्यक्—स्वस्मै भासमानम् । पराक्—परस्मा एव भासमानम् । भूति-र्विभूतिः, स्वातिशयाधानार्थं नियन्तव्यद्रव्यम् । नित्या भूतिरिति नित्यप्राचुर्यतश्शुद्धसत्त्वमुपलक्ष्यते । इहादिमां—नित्य-भूतिम् । केचिज्जडामाहुरिति सयूथ्यमतभेदोक्तिः ॥ ६ ॥ **इति द्रव्यविभागः** ॥

तत्र द्रव्यं दशावत्प्रकृतिरिह गुणैस्सत्त्वपूर्वैरुपेता
कालोऽब्दाद्याकृतिस्स्यादणुरवगतिमान् जीव ईशोऽन्य आत्मा ।
संप्रोक्ता नित्यभूतिस्त्रिगुणसमधिका सत्त्वयुक्ता तथैव
ज्ञातुर्ज्ञेयावभासो मतिरिति कथितं संग्रहाद् द्रव्यलक्ष्म ॥ ७ ॥

प्रस्तुतस्य द्रव्यस्य तदवान्तरभेदानां च लक्षणमाह—**तत्रेति** ॥ तत्र—द्रव्याद्रव्ययोर्मध्ये । द्रव्यं दशावत्—विकारधर्मवदित्यर्थः । ईश्वरादावपि मूर्तसंयोगा आगन्तुकास्सन्ति । संचरति हि मूर्ते तस्य विभुनश्च संयोगा विद्यन्त एव । प्रकृतिशब्दः प्राग्वद्विकृतीनामप्युपलक्षकः ; त्रिगुणशब्दाभिलप्यद्रव्यमित्यर्थः । तत्स्वगुणैरेव लक्षयति—**गुणैरित्यादिना** । इह—अव्यक्तकालयोर्मध्ये । त्रिगुणस्य रजस्तमसी पृथग् लक्षणे ; सत्त्वं तु बन्धकत्वेन विशेषितम् । **कालोऽब्दाद्याकृतिरिति** । उपाधिकृतविभागैरब्दादिव्यवहारविषय इत्यर्थः । तत्तत्परिणामवान्काल इति पक्षोऽपि वक्ष्यते । ईश्वरादचेतनादणोश्च व्यवच्छेदायाणुरवगतिमानित्युक्तम् । ईशोऽन्य आत्मा—अणुव्यतिरिक्तश्चेतन इत्यर्थः । जीवे विभुत्वोक्तिरीश्वरेऽणुत्वोक्तिश्चान्यपरेति सूत्राद्युक्तम् । संप्रोक्ता, तत्परैश्शास्त्रैरिति शेषः । त्रिगुणसमधिका—त्रिगुणद्रव्यादन्या । सत्त्वयुक्ता—सत्त्वाख्यगुणविशेषवती । त्रिगुणान्यत्वं कालादेरप्यस्तीति तद्व्यवच्छेदोऽनेन कृतः । एतावन्मात्रेण त्रिगुणसाधर्म्यमित्यभिप्रायेण तथैवेत्युक्तम् । रजस्तमस्समानाधिकरणसत्त्वस्यापि तत्र सत्त्वात् ; * सत्त्वं निर्मलत्वात्प्रकाशकमित्यादि समानमिति वा । ज्ञातुर्ज्ञेयावभासो मतिः—अहमिदं जानामीत्यहमर्थाश्रयतया सिध्यन्सकर्मकः प्रकाशो मतिरित्यर्थः । तादृशावस्थयाऽपि तद्विशिष्टं गृह्यते । द्रव्यलक्ष्म—सामान्यतो विशेषतश्चेति शेषः ॥ ७ ॥ **इति द्रव्यतद्विशेषलक्षणम्** ॥

एकार्थप्रत्यभिज्ञा भवति दृढतरा दर्शनस्पर्शनाभ्यां
संघातादेरयोगादवगमयति सा वस्तुरूपादतोऽन्यत् ।
एकस्मिन् दूरतादेरविशदविशदप्रत्यभिज्ञादि तद्वत्
नैकत्वेऽप्यक्षभेदाद्भिदुरमिव मिथस्संश्रयादिप्रसङ्गात् ॥ ८ ॥

ननु द्रव्यमद्रव्यमित्युभयमसिद्धं रूपादेराश्रयाभावात्, रूपादितया विकल्प्यमानस्यैकस्यैव वा सत्त्वादिति पक्षद्वयमेकेनैव प्रतिक्षिपति **एकार्थेति** ॥ एवमाहुर्**वैभाषिकाः**—निराधारा निर्धर्मकाश्च रूपादयश्चत्वारः पदार्थाः । ते चक्षुराद्यैकैकेन्द्रियग्राह्या इति ।

वात्सीपुत्रास्तु शब्दादीन् पञ्च वैभाषिका विदुः । शब्दात्मानश्चतुर्ष्वेव केचिदित्यपरेऽब्रुवन् ॥

तत्र निराधारत्वं तावत्प्रतिसन्धानविशेषेण निरस्यति । अस्ति हि दृष्टमेव स्पृशामीति द्वीन्द्रियग्राह्यवस्तुविषया धीः । सा तावन्न संशयात्मा विरुद्धानियतकोट्य[नवलम्बात्]नुपलम्भात् । न च विपर्ययः स्वारसिकबाधादृष्टेरनन्यथासिद्धेश्च । तदेतदुभयं दृढतरेति संगृहीतम् । ग्रहणमिति वक्तव्ये प्रत्यभिज्ञेत्युक्तिर्ज्ञातृज्ञेयस्थैर्यस्यापि व्यक्त्यर्था । सेयं न रूपमात्रगोचरा, तस्य स्पर्शनविषयत्वाभावात्, अन्यथाऽन्धस्यापि स्पर्शनेन रूपोपलम्भनप्रसङ्गात् । न च स्पर्शमात्रगोचरा, तस्यापि दृग्विषयत्वाभावात् । तथात्वे चास्पृशतोऽपि दृशा स्पर्शधीप्रसङ्गात् । न चोभयविषया, दर्शनस्पर्शनयोः प्रत्येकविषयत्वादेव । अत इयं प्रत्यभिज्ञा रूपाद्यतिरिक्तं तदाश्रयभूतं वस्तु प्रकाशयति, इदं रूपस्पर्शवदिति । ननु रूपस्पर्शयोर्नियताक्षवेद्यत्वेऽप्यवस्थाभेदात् प्रतिसन्धानं स्यात्; न स्यात्, न ह्यस्माकमिव स्थिरमवस्थान्तरभाक्किंचित्त्वन्मते । विभज्यवैभाषिकपक्षस्त्वतिमन्दः । तदिह संहतासंहतस्वलक्षणभेदमात्रं तु स्यात्; तत्र संघातस्वरूपं तस्य प्रतिसन्धानविषयत्वं च न युज्यते इत्याह—**सङ्घातादेरयोगादिति** । सङ्घातोऽपि सङ्घातिस्वरूपस्तदन्यो वा ? पूर्वत्र न प्रतिसन्धानपदम्, द्वितीये सत्योऽसत्यो वा ? आद्ये द्रव्यवाद एव वरं, संसर्गाख्यधर्मस्वीकारो वा ; तेन परस्परविशिष्टस्वरूपमेवेत्यपि निरस्तं विशेषणविशेष्यतत्संबन्धातिरिक्तविशिष्टायोगात् । द्वितीये कथं प्रत्यभिज्ञात्मकार्थक्रियाकारित्वम् ? निरन्तरस्वरूपं सङ्घात इति पक्षोऽपि प्रत्येकपक्षवन्नेन्द्रि-

यान्तरेण प्रतिसन्धिः स्यात् । अन्यथा रसादिष्वपि संहतेषु तत्प्रसङ्गात् । एतेन देशैक्यमेव संघात इत्यपास्तम्; एकदेशान्वयिनां त्रैकालिकानामेकसंघातत्वप्रसङ्गात् । देशोऽपि तदातदा भिन्न एवेति चेन्न, क्षणभङ्गस्य निरसिष्यमाणत्वात् । न च ते देश आकाशादिरूपः, तस्य युष्माभिरावरणाभावादिमात्रत्वज्ञापनात् । न चोपादानरूपः, स्पर्शरूपादीनां भिन्नभिन्नक्षणोपादानत्वाभ्युपगमात् । एकोपादानत्वे तु तदेव द्रव्यं पृथिव्यादिदेशैक्यात्सङ्घातस्यापि संघातान्तरापेक्षायामनवस्था, अन्योन्याश्रयो वा । त्वन्मते पृथिव्यादिः रूपादिसङ्घातातिरिक्तो न; तथा पृथिव्यादेरपि देशैक्यं पृथिव्यादिसङ्घातातिरिक्तं न । अतिरिक्तं चेत्पृथिव्यादेर्देशैक्येऽपि तद्देशसङ्घातातिरिक्तं पृथिव्यादिदेशानां देशान्तरैक्यमेव प्रयोजकं स्यात् । एवं सत्यनवस्थेत्यर्थः । एवं च पृथिव्यादिसङ्घातप्रयोजकैकदेशानपेक्षायां तु रूपादेस्संहतत्वे पृथिव्यादिसंहतत्वमेव प्रयोजकं स्यात्; पृथिव्यादेस्संहतत्वे तु रूपादेस्संहतत्वमेवेत्यन्योन्याश्रय इत्यर्थः ।

अथ स्यात् गृहीतेन रूपेण पूर्वमेव स्पर्शोऽनुमितः, तत्र दृष्टरूपानुमितमेव स्पृशामीत्येव प्रतिसन्धानमिति चेन्न ; द्वयोरेकाश्रयत्वग्रहणमन्तरेण व्याप्तिग्रहणासंभवादनुमानासिद्धेः । दृष्टे रूपे स्पृष्टे च स्पर्शे भेदाग्रहात् । दृष्टमेव स्पृशामीति बुद्धिशब्दाविति चेन्न, भेदेनैव तयोर्गृह्यमाणत्वात्; रसादिष्वपि प्रसङ्गाच्च । ननु निर्विषयैवेयं प्रत्यभिज्ञा वासनावशात्स्यादिति चेन्न; योगाचारनीत्या रूपादेरपि निह्नवप्रसङ्गात् । बाधाबाधाभ्यां विशेष इति चेन्न; स्वारसिकबाधादृष्टेर्यौक्तिकबाधस्य समत्वाच्च । अतो रूपस्पर्शवदिदमिति मिथो भिन्नविशेषणमेकं विशेष्यं सर्वलोकसिद्धं दुरपह्नवम् । यत्तु मतान्तरं स्पर्शमात्रस्वरूपो वायुः स्वलक्षणः, तैजसादयस्तु द्वित्रिचतुस्स्वभावाः, अतस्तेजःप्रभृतीनां द्वीन्द्रियग्राह्यत्वमिति, तदप्यसत्; एकस्यानेकस्वभावत्वायोगात्; तदभ्युपगमे च जैनमतावतारात् । अनेकधर्मत्वे त्वसन्मतसिद्धेः । एकस्मिन्नेव रूपादिस्वभावभेदकल्पनेति चेन्न ; सर्वत्रासिद्धस्य कल्पनायोगात्, क्वचित्सिद्धौ द्रव्यवादसिद्धेश्च । एतेन भेदोपलम्भाभावादभेदसिद्धिरिति प्रत्युक्तम्, विपरिवर्तस्यैव सुवचत्वात् । न हि रूपमिदमिति घटादीन्कश्चित्क्वचित्प्रत्येति! किंतु तद्वदिति । सहोपलम्भनियमादिति हेतुचतुष्टयं च निरसिष्याम[हे] । न च रूपादेर्धर्मिणश्च सहोपलम्भनियमः, पीतशङ्खादिभ्रमे रूपमन्तरेण रूपिणस्तमन्तरेण तस्य चोपलब्धेः । न चात्रान्यश्शङ्खस्तदानीमुत्पन्नः, नापि शङ्खरूपोऽयं पित्तविवर्तः, स्पर्शनेन स एवायं शङ्ख इति गृहीतेः । एवं स्पर्शादावपि । यदि चासौ हेतुरङ्गीक्रियते किमपराद्धं *सहोपलम्भनियमादभेदो नीलतद्धियोरिति वदद्भिः? अतस्सहोपलम्भनियमाद्धर्मधर्मिभेद एव सिध्यति । किंच रूपस्पर्शयोस्सहधीनियमस्त्वयाऽपि दुस्साधः; अतस्तयोरयुगपदुपलम्भादभेदासिद्धावेकस्य प्रत्यभिज्ञाविषयस्य ततोऽन्यत्वं [प्र]स्पष्टम् । यत्तदन्यत्र युष्माभिरुक्तम्—

*अनुपप्लवभूतार्थस्वभावस्य विपर्ययैः । न बाधो यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥

तदिह प्रतिसन्धेयम् । बुद्ध्यन्तराणि च तद्बाधकान्यभिन्नेन्द्रियजन्यान्याह—**एकस्मिन्निति** । आसन्नदेशे दृष्ट्वा दूरं गतस्याविशदा प्रत्यभिज्ञा, दूरे दृष्ट्वा समीपं गतस्य तु विशदा; एवं क्रमात् बहलविरलालोकादिवशादप्युभयधा ग्राह्या । अल्पधर्मविशिष्टतया ग्रहणम् अविशदग्रहणम्; भूयोधर्मविशिष्टतया तु विशदग्रहणम्; नतु न्यूनाधिकदर्शनमात्रम्; तथा सति घटपटदर्शने घटमात्रदर्शने च विशदाविशदव्यवहारप्रसङ्गात् । न चात्र रूपमेवाविशदं विशदं च भाति, पीतशङ्खादिभ्रमे रूपान्तरवत्तया भातस्यापि तथा प्रत्यभिज्ञानात् । नापि परिमाणं, तस्य परमार्थस्य त्वयाऽनभ्युपगमात् । दूरे च परिमाणान्तरवत्तया वस्तुनः स्फुरणात् । अत एव नैकत्वसंख्या; दूरासन्नयोरेकानेकत्वबोधे तदेवेति दर्शनात् । अत्रोत्तरेणादिशब्देन संशयविपर्यय[धि]योर्ग्रहणम् । संशयविपर्ययौ तावदधिष्ठानग्रहे विशेषाग्रहात् समानधर्मग्रहाच्च भवतः । तथादृष्टिनियमश्च नान्यथयितुं शक्यः ।

अधिष्ठानस्य कार्त्स्न्येन भानेऽभाने च न भ्रमः । भाताभाताकृतिभिदा कथं निर्धर्मके भवेत् ॥

बाधकधीश्चाधिष्ठानातिरिक्ततदसाधारणधर्मविषया, तत्स्वरूपग्रहस्यारोपसहत्वात् । जिज्ञासा च नात्यन्तानुपलब्धे, अदर्श नात् । न च निश्शेषविदिते, वेद्याभावात् । अतस्तद्विषये विदिताविदिताकारत्वं सिद्धम् । तदिदं सर्वमभिप्रेत्य भिन्ना भिन्नवादिभिरप्युक्तम् —

* आविर्भावतिरोभावधर्मकेष्वनुयायि यत् । तद्धर्मि यत्र वा ज्ञानं प्राग्धर्मग्रहणाद्भवेत् ॥ इति ।

अत्रागृहीताशेषधर्मधर्मिग्रहणं तु न मृष्यामहे । यत्तु बौद्धैरुक्तम्—

* धर्मोपकारशक्तीनां भेदे तास्तस्य किं यदि । नोपकारस्ततस्तासां तथा स्यादनवस्थितिः ॥

नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे । सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः ॥ इति ॥

तदपि मन्दम्, अन्वयव्यतिरेकसिद्धकारण[ादि]वैचित्र्यनिबन्धनस्वभावभेदवतामुपाधीनां परस्परव्यभिचारिवृत्तिनियत सामग्रीबोध्यत्वेन ग्रहणाग्रहणयोरुपपत्तेरिति । नन्वस्तु प्रतिसन्धानबलात् द्वीन्द्रियाह्यं किञ्चित्; तत्तु रूपरसाद्यात्मकर्मि वा तदाश्रय इति वा न मृष्यामहे । तेषामेवाभावात् एकस्मिन्नेव ग्राहकभेदात्तत्तद्धर्मधीः, यथा मणिकृपाणदर्पणादि व्यञ्जकभेदान्मुखादेरणुत्वपृथुत्वमलिनत्वविमलत्वादिधीः, सव्यदक्षिणविपर्यासश्चेति । तमिमं पक्षं प्रतिक्षिपति—**नैकत्वेऽप्यक्ष भेदाद्भिदुरमिवेति** । इह तावत्सर्वत्रासिद्धस्य कल्पनानुपपत्तिरुक्ता । बाधकान्तरमाह—**मिथ इति** । चक्षुरादिग्राहकवै जात्यं हि ग्राह्याकारभेदात्कल्प्यते । तदसिद्धौ कथं तद्ग्राहकभेदक्लृप्तिः, तदभावे च कथं तत एव ग्राह्याकारभेदक्लृप्ति रिति । इह तु मध्ये बुद्धिभेदप्रवेशे चक्रकम् । अस्तु कारणभेदादिन्द्रियभेदक्लृप्तिरिति चेन्न; इन्द्रियवैजात्यव्यव स्थापकस्य तस्यानुपलम्भात्, तत एव तत्क्लृप्तौ तत्रापि मिथस्संश्रयात् । ननु दर्पणादिग्राहकभेदाद् ग्राह्ये सव्यदक्षिण विपर्यासः, पृथुत्वाणुत्वविमलत्वमलिनत्वकल्पना च दृष्टेति चेत्सत्यम्; दर्पणादेस्तद्धर्माणां च भेदेन दृष्टत्वात्तदधीनाध्यास भेदो यथादर्शनमङ्गीक्रियते। अत्र तु न तथा । अक्षेषु च ते बहिः कल्पनीयानां रूपादीनामसंभवात् । उपाधिज्ञान निरपेक्षेयमौपाधिकभेदधीरस्तु मण्डूकवसाक्तदृष्टेर्वंशेषूरगबुद्धिवदिति चेन्न; तत्तद्दोषशक्त्या तत्तद्भ्रान्तिभेदसिद्धेः कल्प्य कारस्य क्वचित्संभवाच्च। चक्षुरादिस्वभावा एवात्रापि रूपादिभ्रान्तिहेतवो दोषा इति चेन्न; सर्वकल्पनाधारे स्वलक्षणेऽप्य नाश्वासप्रसङ्गात् । ततश्चेन्द्रियस्वभावभेदोऽपि दुर्वचः; अधिष्ठानाकाङ्क्षायामपि बुद्ध्यैव चरितार्थत्वात् । तथा चेन्द्रिय स्वभावभेदोऽपि नावेक्ष्यः; पूर्वपूर्वबुद्धिशक्तिभेदादेवोत्तरोत्तरविचित्रभेदोपपत्तेः । ननु स्पर्शनेन्द्रियस्याज्ञातैर्भागभेदैः कर तलप्रकोष्ठादिवर्तिभिरेकस्यैव दुरालभाः स्पर्शस्योल्लेखभेदा भवन्तीति चेन्न । स्पर्शस्यात्र भेदेनानुल्लेखात् दुरालभावयवा तु वह्निकणवच्छरीरमाविशतां तद्विकृतिजनकत्वमात्रम्; प्रदेशभेदेन विकृतितारतम्यं च वह्न्यादिभिरिव नानुपपन्नम् । न मनुष्यपशुमृगादीन्द्रियभेदाद्भक्ष्यादिष्वानुकूल्यादिवैपरीत्यं तत्तारतम्यं च दृश्यते । न च वस्त्वेवानुकूलप्रतिकूलस्वभावम विरोधात्, सर्वेषामविशेषेण सर्वदोभयविधानुपलम्भात्, अनेकान्तवादानभ्युपगमाच्च । एवं चक्षुरादिभेदाद्रूपादिभेदभ्रम स्यादिति; तदपि न, तत्तत्कर्मशक्तिवैचित्र्यात्तत्तदनुकूलत्वादिव्यवस्थोपपत्तेः । वस्तुषु चानुकूलत्वप्रतिकूलत्वे सुखदुःख जनकत्वे एव; तथाऽपि सुखदुःखे बुद्धिभेदावेव भवद्भिरपि स्वीक्रियेते । ततश्चात्र विषयभेदाद्धीभेदः । तस्मादेव च इति प्रसङ्गः स्यादिति चेन्न; विषयभेदस्य स्वकारणाद्यधीनत्वात्, तदुत्पाद्यबुद्धिभेदस्य तत्कारणत्वाभावात्, द्वयोर परस्परप्रतीतिनिरपेक्षप्रमाणसिद्धत्वाच्च । एवमुपाधिभेदैरेकस्मिन्नेव ह्रस्वत्वदीर्घत्वधीनिदर्शनान्यपि नेतव्यानीति । अत्रापि

शब्देन पूर्ववत् संशयाद्यसंभवो नीलपीतशीतोष्णमधुराम्लादिभेदासंभवश्च गृह्यते । न हि नीलादिभेदेष्विन्द्रियभेदोपाधिकत्वं शक्यं वक्तुं, रूपादिभेदमिथ्यात्वे तदन्तःपातिनीलादिभेदोऽपि मरीचिकावीचिकान्यायेन मिथ्यैव स्यादिति चेन्न ; असिद्धस्यासिद्धेन दुस्साधत्वात् । मिथो निदर्शनेन साधने मिथस्संश्रयात् निदर्शनमात्रेण निश्शेषनिह्नवप्रसङ्गाच्चेति । तथाऽप्येकमनेकस्वभावमिति चेन्न । स्वरूपभेदस्यानभ्युपगमात् धर्मभेदस्याविरुद्धत्वात् ।

वेद्यहेतुफलाकारैर्भिन्नैरेका समेति धीः । तथा बाह्येऽपि दृष्टत्वाद्युगपत्क्रमशोऽपि नः ॥

प्रतिसंबन्ध्यनेकत्वं यथा नैकस्य बाधकम् । तथा संबन्ध्यनेकत्वं स्वाभीष्टे च समत्वतः ॥ ८ ॥

॥ इति द्रव्यसिद्धिद्रव्याद्वैतभङ्गौ ॥

धर्मो निर्धर्मकश्चेत्कथमिव भविता सोऽभिलापादियोग्यो
धर्मेणान्येन योगे स च भवति तथेत्यव्यवस्थेति चेन्न ।
कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वं
तन्निष्कर्षप्रयोगेष्वपि भवति पुनस्तस्य धर्मी विशेषः ॥ ९ ॥

एवमेकाश्रयानेकदृष्टावन्यतरनिह्नवार्थिनौ पुनरपि धर्मधर्मिभावभङ्गमुखेन प्रवृत्तौ प्रतिहन्येते ; अन्यथा * अन्तस्तद्धर्मोपदेशादित्याद्यनिरूढप्रायं स्यात् । नन्वनुमानं प्रमाणमिच्छन्न धर्मधर्मिभावं बाधितुमर्हति, तस्य हेतुसाध्यधर्माश्रयावश्यंभावात् । आह च **धर्मकीर्तिर्हेतुबिन्दौ**—

* पक्षधर्मस्तदंशेन व्याप्तो हेतुस्त्रिधैव सः । अविनाभावनियमाद्धेत्वाभासास्ततोऽपरे ॥ इति ॥

अन्येऽपि * ग्राह्यधर्मस्तदंशेन व्याप्तो हेतुरिति । सत्यं, काल्पनिकहेतुसाध्यधर्मद्वारा अनुमानप्रवृत्तिः, पारम्पर्येण तु स्वलक्षणविश्रान्त्या भाक्तमनुमानप्रामाण्यमिति हि बौद्धानां रहस्यम् । तत्त्वगत्या चतुर्विधानामपि तेषां धर्मधर्मिभावः क्षेप्यः ! अतस्तद्भङ्गमनूद्य प्रत्याह—**धर्म** इत्यादिना । अयमर्थः—यस्त्वया कश्चिद्धर्म इष्यते स निर्धर्मकः सधर्मको वा? आद्ये तस्य शब्दवाच्यत्वं न स्यात्, अविशिष्टस्य व्युत्पत्त्याद्यगोचरत्वात् । सर्वधीशब्दानां विशिष्टविषयत्वं च भवतां भाष्यादिषूक्तम् । द्वितीये तु येन धर्मेण धर्मः सधर्मकः सोऽपि पूर्ववद्धर्मान्तरेण धर्मी स्यादित्यपरापरापेक्षायामनवस्था, द्वित्रादिपर्वमात्रे विश्रम इति व्यवस्थाभावात् । धर्मत्वं च धर्माणां भावः । अतस्तस्यापि धर्मत्वं वाच्यम् । न चैतत्तस्यात्मैव, आत्माश्रयात् ; न चान्यत्, अनवस्थानादेवेति चेत्, तन्न ; सर्वेषां धर्माणां निर्धर्मकत्वानङ्गीकारात् । कश्चिद्धर्मोऽपि धर्मी स्फुटं—स्पष्टम् । स्फुटदृष्टं हि नापह्नोतव्यम् । त्वयाऽपि हेतुसाध्यादिधर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः, अन्यथाऽनुमानासिद्धौ क्षणभङ्गादिसाधनायोगात् । अतिमथने—अत्यन्तचर्चायाम् । यद्वा स्फुटमतिमथने—विशदबुद्ध्या सावधानं विमर्शे सतीत्यर्थः । स्वान्यनिर्वाहकत्वं—स्वपरव्यवहारादिव्यवस्थापकत्वम् । यत्र ह्यनवस्थाभयाद्धर्मान्तरं नेष्यते तत्र निमित्तान्तरनिरपेक्षौ तद्धीव्यवहारौ । यथा गोशब्दस्य व्यक्तिवृत्तावित्थंभावभूतं गोत्वं निमित्तम् ; गोत्वे तु न निमित्तान्तरमपेक्षते, आनन्त्यव्यभिचाररूपानुपपत्त्यभावात् । एवं शुक्लादिशब्देष्वपि । ननु गौः शुक्ल इत्यादिविशेष्यपर्यन्तोक्तौ तथा स्यात् ; क्वचिद्गुणमात्रविषयेषु शुक्लादिशब्देषु भावप्रधानेषु *द्व्येकयोरित्यादिषु त्वतलाद्यन्तेषु जातिर्गुणः क्रियेत्यादिषु च वाच्यानां तत्तद्धर्माणामिदंत्वेन निर्देशादित्थंभावसापेक्षत्वेऽनवस्था । अनपेक्षत्वे तु इदमित्थमिति हि सर्वा प्रतीतिरिति भाष्यादिविरोध इत्यत्राह—**तन्निष्कर्षप्रयोगे**ष्वित्यादि । अयं भावः—उदाहृतेषु नियतानियतनिष्कर्षकशब्देषु जातिगुणादेः

प्रधानतया निर्देशेऽपि सन्ति केचिद्यथाप्रमाणमित्थंभावाः । त्वयाऽपि हेतुसाध्यादि[दीनां]धर्माणां पक्षधर्मत्वादिधर्माः स्वीकार्याः । अनवस्था च कथंचिदुपशमनीया । स्वीकृतं च संवेदनसंवेदने शब्दशब्दादौ स्वपरनिर्वाहकत्वम् । न चात्र कर्मकर्तृविरोधः ; स्वोत्पादकत्वादाविव पौर्वापर्यादिवैगुण्याभावात् । किंच स्वलक्षणादीनां जात्यादीनां च संवृतिसिद्धानां निर्धर्मकत्वेऽपि कथंचिदभिलापार्हत्वं त्वयाऽपि ग्राह्यम्; अन्यथा तत्तत्संव्यवहारेण कथादिप्रवृत्त्ययोगात् । अतो निर्धर्मकं शब्दवाच्यं न भवतीति स्वसिद्धान्तविरोधः, स्ववचनव्याघातश्च । आस्तामेतत्; समानाधिकरणस्येव व्यधिकरणस्यापि व्यावर्तकत्वादित्थंभावत्वं सिध्यति । तथा च नियतनिष्कर्षकप्रयोगेष्वप्येतेषु धर्मो धर्मं विशिनष्टि, यथा पटस्य शौक्ल्यं खण्डस्य गोत्वमित्यादिषु । धर्मिविशेषो धर्मस्य स्वेतरनिष्ठाद्व्यावृत्तिधीहेतुरित्यर्थः । न चात्र मिथःसंश्रयः, विशेषण-विशेष्यधियोस्तद्व्यवहारयोश्च मिथो जन्यत्वाभावात् । निष्कर्षानिष्कर्षव्यवहारयोश्च विवक्षाभेदायत्तत्त्वात्; उभयथा व्यवहारस्य सर्वत्र सर्वैरपि दुरपह्नवत्वात् । यश्चात्र समानाधिकरणप्रयोगे विशिष्टत्वेनावस्थितोऽप्यर्थतः स्वधर्ममन्यनिष्ठाद्व्यवच्छिनत्ति, स एव पटस्य शौक्ल्यमित्यादिप्रयोगे गुणीभवन् कण्ठोक्तेन स्वसंबन्धेन विशिनष्टि । गोत्वं शौक्ल्यमित्यादिपदेष्वपि * तस्य भावस्त्वतलावित्यादिविहिततद्धिताश्रयवाच्यत्वेन धीस्थ एवार्थो निष्कृष्यमाणः स्वविशेषणनिरूपकतयाऽनुशिष्यते । एवं विशेष्यस्यैव द्विधा विशेषणयोग इति व्यञ्जनाय पुनःशब्दः ; निष्कर्षप्रयोगेषु विशेषं वा द्योतयति ॥९॥

तच्छून्ये तस्य वृत्तिः कथमिव घटते तद्विशिष्टे तु वृत्तौ
स्वाधारत्वप्रसङ्गस्तत इह न गुणो नापि धर्मीत्ययुक्तम् ।
तद्वृत्तिर्धर्मिमात्रे न भवति तत एवास्य तच्छून्यताऽतो
नोक्तौ दोषौ स्वधीवाग्विहतिरितरथा तद्वदन्येऽपि जल्पाः ॥ १० ॥

पुनरपि धर्मस्य धर्मिणि वृत्तिं विकल्प्य तदुभयमपह्नुवानं प्रत्याह—**तच्छून्य इति** ॥ योऽयं रूपादिः द्रव्यस्य गुणतयेष्टस्स किं स्वशून्ये वर्तते स्वविशिष्टे वा? नाद्यः; व्याघातात् । अन्यथा सर्वेषां सर्वत्र वृत्तिः किं न स्यात्? खपुष्पादीनामपि कथं निषेधः? योग्यानुपलब्ध्येति चेन्न; तदुपलब्ध्यनुपलब्ध्योरपि विरोधाभावात् । किंचानुपलब्धिरभावोपस्थापनेन भावं विरुन्ध्यात्; तदा कथं तच्छून्ये तस्य वृत्तिः? न द्वितीयः, आत्माश्रयापातात् । शिष्टं विशेषण-विशेष्यतत्संबन्धातिरिक्तं न किंचित्, तस्मिन् प्रमाणाभावात् । न चोक्तेषु त्रिष्वन्यतममात्रम्, तावति विशिष्टधीव्यवहारयोरभावात् । अतः संबन्ध्युभयं विशिष्टशब्दार्थ इति स्यात् । तथा च स्वविशिष्टे वर्तमानो गुणस्स्वविशेष्यमिव स्वात्मानमपि स्वाधारीकुर्यात् । किमत्रानिष्टम्? स्वस्य स्वस्मादन्यत्वम्; अभेदे कथमाधाराधेयभावः? प्रतिसंबन्धिभेदाभावात् । न चात्र भिन्नाभिन्नत्वं दृष्टं युष्मदिष्टं वा । एवं वृत्त्यनुपपत्त्या वा गुणगुणिनोरन्यतरपरिशेषः स्यात्, उभयपरित्यागो वेति परोक्तमयुक्तम् । कथमित्यत्राह—**तद्वृत्तिर्धर्मिमात्र इति** । न वयं तच्छून्ये तद्विशिष्टे वा तस्य वृत्तिं ब्रूमः । अपि तु वस्तुतस्तद्विशिष्टे विशेष्ये तद्विशिष्टप्रवृत्त्यभावे तच्छून्ये वृत्तिस्स्यादेवेति चेत्तत्राह—**न भवति तत एवास्य तच्छून्यतेति** । यत्र यद्वर्तते तस्य कथं तच्छून्यत्वम्? न च तद्वति वर्तमानस्य तस्मिन्नपि वृत्तिरिति नियमः । घटवति भूतले वर्तमानानां गुणादीनां घटेऽपि वृत्तेरदृष्टेः । एवं घटस्यापि । ननु सर्वत्र वृत्तिविकल्पेन विशिष्टं दूषयतः किं नि[दर्श]दानम्? किं क्वचिदपि विशिष्टप्रतीतिरेव नास्ति, सत्यपि वा निष्कारणिका, सकारणाऽपि वा दुर्निरूपितकारणा, निरूपितकारणाऽपि वा निर्विषया, सविषयाऽपि वा बाधितविषयेति । नाद्यः, लौकिकपरीक्षकबहिष्कारप्रसङ्गात् । सर्वशून्य-

वादिनाऽपि हि संवृत्त्या विशिष्टधीरिष्यते । न द्वितीयः; कार्यस्य कारणावश्यंभावात्, तदनभ्युपगमे तु लोकायतावतारात् । इष्यते चाविद्यावासानादिभ्रान्तेरपि निदानं भवद्भिः । अत एव न तृतीयः । नापि चतुर्थः, स्वपरलोकव्यवहारविरोधादेव । कथं किलासौ विशिष्टप्रतीतिः ? कथं च निर्विषया ? न पञ्चमः; अद्यापि बाधस्याशामोदकायमानत्वात् । विकल्पप्रामाण्यं च वक्ष्यते । अतो यथादर्शनं क्वचित्किंचिद्वर्तते न स्वस्मिन्निति व्यवस्थिते त्वदुक्तौ व्याघातात्माश्रयदोषौ न स्त इत्याह—**अतो नोक्तौ दोषाविति** । अन्यथाऽनिष्टमाह—**स्वधीवाग्विहतिरितरथेति** । स्वधीविहतिः स्ववाग्विहतिः स्वधीवाग्विहतिरिति प्रत्येकसमुदायपरं योज्यम् । कथं तवापि विशिष्टधीविरहे तद्विषयव्याहारव्यवहारावुदाहरणोपनयौ च वस्तुतस्तद्धर्मविशिष्टविषयौ ? बुद्धिस्स्वप्रकाशा अभिन्नदेशकालं स्वलक्षणम् कल्पनापोढमभ्रान्तं प्रत्यक्षम् प्रतिवादिवाक्यमसाधकम् विशिष्टं नास्तीत्यपि विशिष्टमात्थ; तच्च विशिष्टविषयस्वधीविरुद्धमिति । ननु सन्त्यन्येऽपि धर्मधर्मिभावभञ्जकाः परेषां प्रसङ्गाः ते कथमुद्धार्या इत्यत्राह—**तद्वदन्येऽपि जल्पा इति** । अन्येऽपि नित्यसमाधिरूपाः शुष्कप्रलापास्तद्वन्निरस्तवाक्यैस्तुल्यं वर्तन्ते । उत्थानपरिहारप्रकारभेदेऽपि स्वव्याघातादिदोषाविशेषादित्यर्थः ।

घटकुड्यवदन्यत्वेऽनन्यत्वे तु स्वरूपवत् । न गुणस्य गुणत्वं स्यादित्यसत्स्वोक्तिबाधतः ॥

दूष्यादन्यदनन्यद्वा दूषणं न तु दूषणम् । गर्दभादिवदन्यत्वेऽनन्यत्वे दूषणीयवत् ॥

एवं संबद्धत्वासंबद्धत्वसमानकालत्वासमानकालत्वयुगपद्ग्राह्यत्वायुगपद्ग्राह्यत्वादिविकल्पस्य बाधास्तदुद्धाराश्च विशुद्धबुद्धिभिरवधातव्याः, दूष्येणापि संबन्धादिविकल्पदोषसाम्यादिति ॥ १० ॥ **इति धर्मधर्मिभावः** ॥

स्वच्छन्देनागमेन प्रकृतिमहदहङ्कारमात्राक्षसिद्धि-
र्नाध्यक्षेणाप्रतीतेर्न पुनरनुमया व्याप्तिलिङ्गाद्यसिद्धेः ।
सत्त्वाद्युन्मेषभिन्नान्महत इह तथा स्यादहङ्कारभेदः
प्राच्यादक्षाणि मात्राः प्रजनयति परो मध्यमस्तूभयार्थः ॥ ११ ॥

एवं द्रव्याद्रव्ये सामान्यतः प्रसाध्य द्रव्येषु प्रथमोद्दिष्टं त्रिगुणमादौ परीक्ष्यते । तत्र कश्चिदाह—धीमन्निदर्शनतया प्रसिद्धस्सुरगुरुर्लोकायतं शास्त्रमारभ्य पृथिव्यादीनि चत्वार्येव तत्त्वान्याह । अधिकानि तु तावन्मात्रविभागोद्देशादपोढानि, अतिरिक्तचेतननिषेधाच्चेति । अत्र किं लोकायतसूत्राणि स्वयंप्रमाणतयोपादीयन्ते ? तदुपस्थापकतया वा ? नाद्यः; असम्मतेः, गुरूक्तेश्च विरोचनोपदेशवदसुरमोहनार्थत्वात् । न द्वितीयः, उक्तेषु विवादाभावादधिकानां निषेधस्य निष्प्रमाणकत्वात् । अनुपलब्ध्या निषेध इति चेन्न; योग्यानुपलब्धेरभावादितरस्य निषेधकत्वायोगात् । उपलब्ध्या चेच्चतुर्णामुपादानमाकाशेन किमपराद्धम् ? अस्ति ह्यासंसारं तदुपलम्भः । न चात्रास्पर्शत्वादिभिर्बाधः; अरूपत्वादिना वाय्वादेरपि निह्नवप्रसङ्गात् । शेषं च वक्ष्यामः । अथोपलम्भबलादस्त्वाकाशमपीति चेत्, तथैव भिन्नाभिन्नभवानुभूतार्थप्रतिसन्धाताऽप्यभ्युपगन्तव्यः । अस्तु तर्हि षड्धातुवादः अध्वर्युभिस्तथाऽध्ययनादिति चेत्तर्ह्युद्गातृभिश्चतुर्णामध्ययनाच्चतुर्धातुवादः स्यात् । अनुक्तमविरुद्धमन्यतो ग्राह्यमिति चेत्समानम्; भूयसां च प्राबल्यादुपबृंहणप्राचुर्याच्च । न चात्र मिथो विरोधान्निरर्थकार्थवादमात्रता, सम्यङ्न्यायानुग्रहमात्रेण बलाबलदृष्ट्या विरोधशान्तेः । केचित्तु प्रकृत्यादिशब्दैरदृष्टादिकं कथ्यत इत्याहुः । यथाऽऽहोदयनः—*इत्येषा सहकारिशक्तिरसमा माया दुरुन्नीतितो मूलत्वात्प्रकृतिरित्यादि, तदेतदपेष्ठु; नियतक्रमानुपूर्वप्रकृतिविकृतिपरम्परोपदेशात्, बाधाभावे भाक्तत्वायोगात्; अन्यथा सर्वत्र श्रुतहान्यश्रुतकल्पनाप्रसङ्गाच्च । तदेतत्सर्वमभिप्रेत्याह—**स्वच्छन्देनेति** ॥

साधकबाधकप्रमाणाभावे विशिष्टार्थबोधनसामर्थ्यमागमस्य स्वाच्छन्द्यम् । आगम इह श्रुतिस्मृतीतिहासादिः । कारणदोषबाधकप्रत्ययविरहादसदाद्यतीन्द्रियविषयं शास्त्रमपि प्रत्यक्षवच्छ्रद्धेयमेव । अत आगमिकानामपि सद्भावनिश्चय इति सिद्धिशब्दाभिप्रायः । ननु प्रत्यक्षसिद्धं पृथिव्यादितत्त्वं, तच्च कार्यावस्थं प्रकृतिद्रव्यमेवेति ब्रूथ, तथा सति कारणावस्थमपि तदेवेति कथं तस्याप्रत्यक्षत्वम्? अश्रुतागमैरप्रतिसंहितव्याप्तिभिश्च बालादिभिरपि चक्षुरादिकरणानि व्यवह्रियन्ते । अतः कथं तेषामागमिकत्वम्? तत्राह—**नाध्यक्षेणेति** । प्रत्यक्षविरुद्धेयं प्रतिज्ञेत्यत्राह—**अप्रतीतेरिति** । नहि प्रकृत्याद्यवस्थस्य प्रत्यक्षतः प्रतीतिरस्ति । अवस्थादिभेदैरेकस्यैव प्रत्यक्षत्वाप्रत्यक्षत्वे बहुलं लोकदृष्टे । चक्षुरादिव्यवहाराश्च लौकिकानां तत्तदधिष्ठानमात्रविषयाः । मनसा जानामीत्युक्तिरपि धीविशेषविषया । अहमिति प्रत्यक्षं तु न महत्तत्त्वविषयमहंकारविषयं वा, प्रत्यगात्मन एवाहमिति भानात् । अध्यवसायादयोऽपि वस्तुत आत्मधर्माः; करणभेदायत्ततया तु त[त्त]द्वृत्तित्वोपचाराः । दृष्टेषु पृथिव्यादिष्वपि शास्त्रैकवेद्याः कतिकति न सन्त्याकाराः? किं पुनरन्येषु? अतो लोकोत्तीर्णाकारेण त्रिगुणस्य शास्त्रवेद्यत्वम् । एषां च तत्त्वानां तदवान्तरभेदानां च यथागमं यथादर्शनं च लक्षणं ग्राह्यम् । केपुचिक्षीरगुडादिरसभेदवद्दुर्वचा अपि भेदास्त्वनुभवादिसिद्धा दुरपह्नवाः । ननु **सांख्योक्तै**रनुमानैः प्रधानादिसिद्धिः स्यादित्यत्राह—**न पुनरनुमयेति** । न त्वनुमानैरित्यर्थः । तत्र हेतुः—व्याप्तिलिङ्गाद्यसिद्धेः—यथासंभवं व्याप्तिलिङ्गपक्षदृष्टान्तानामसिद्धेरित्यर्थः । तथा हि—यत्तावदुक्तं कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धमिति, अयमर्थः—यत्कार्यं तत्कारणगुणात्मकं यथा तन्त्वादिगुणात्मकं पटादि । तथा महदादिकार्यजातमपि सुखदुःखमोहात्मकतया स्वकारणगतसुखदुःखाद्यात्मकं भवति । अतस्तत्कारणं सुखदुःखाद्यात्मकं प्रधानमिति । तत्र पटादेः किमिदं कारणगुणात्मकत्वम्? किं कारणगुणतादात्म्यमुत कारणं प्रति गुणभूतत्वम्? अथाप्रधानत्वम्? कारणगुणैर्गुणित्वं वा? तत्सजातीयगुणवत्त्वं वा? अन्यद्वा किंचित्? नाद्यः, असिद्धेः । न खलु तन्त्वादिगुणैः शौक्ल्यादिभिः पटस्य तादात्म्यं दृष्टं, तथा सति गुणवत्तन्तुनिष्पत्तिमात्रेण पटनिष्पत्तिप्रसङ्गात् । न चायमिष्टः प्रसङ्गः; अभिव्यक्तिवादादेरपाकरिष्यमाणत्वात् । अत एव न द्रव्यस्य गुणतादात्म्यम्; शुक्लः पट इति च न पर्यायः । न द्वितीयः, अदृष्टेरेव । तन्तुसमवेतत्वात्पटस्य तन्तुगुणत्वोक्तिरिति चेन्न; अवयविसमवाययोस्त्वयाऽप्यनभ्युपगमात् । पटस्य तन्तुनिष्ठत्वमुपलब्धमिति चेत्, किमतः? कार्यावस्थानां कारणद्रव्यवर्तित्वमात्रसाधनापत्तेः । तथा च न कारणावस्थस्य सुखाद्यात्मकत्वसिद्धिः । कारणमात्रं तु सिद्धत्वान्न साध्यम् । तृतीयेऽपि किमिदं कार्यस्य कारणं प्रत्यप्रधानत्वम्? तत्कार्यत्वमिति चेन्न; सिद्धसाधनात्, साध्याविशेषाच्च । न ह्यकारणेन किंचित्कार्यमिच्छामः । कारणसहकारित्वादिसाधनेऽपि न विवक्षितसिद्धिः । न चतुर्थः, अवयविवादे तन्तुपटोदाहरणायोगात् । तत्र हि तन्तुगुणैः पटगुणा जन्याः । द्रव्यनित्यत्ववादे सिद्धसाधनात्; कार्यावस्थस्य कारणावस्थानियतगुणसाधने विरोधात् । पञ्चमस्तु विलक्षणमहत्त्वाद्यधिकरणत्वान्निरस्तः । सजातीयगुणसद्भावमात्रे साध्ये सिद्धसाधनात्, सर्वगुणासजातीयत्वसाधने कार्यकारणयोरविशेषप्रसङ्गात् । मृत्सुवर्णादिवत्कार्यविशेषव्यवस्थापककारणस्वभावसाजात्यविवक्षायां गोमयमाक्षिकाद्यारब्धवृश्चिकादिषु व्यभिचारात् । तदभिप्रायं च सूत्रं * दृश्यते त्विति । नापि षष्ठः, तस्य त्वद्बुद्धिमात्रारूढस्यादूष्यत्वात् । लोकदृष्टस्य तु कस्यचिदुक्तोत्तरप्रायत्वात् । अतः कर्मणां स्वविषयस्वरूपफलप्रदत्वानुमानवत्कार्याणां स्वगुणसरूपगुणकारणत्वानुमानमप्यनैकान्त्यदुःस्थमिति । ये च * भेदानां परिमाणादित्यादिना हेतव उक्तास्तत्र तावद्यत्परिमितं तत्सकारणकमित्यत्र न व्याप्तिर्जीवाणुत्वनित्यत्वयोस्साधयिष्यमाणत्वात् । महदादीनां स्वरूपमनुमानसिद्धं वा

पक्षीक्रियते ? आगमसिद्धं वा ? नाद्यः, तल्लिङ्गासिद्धेः । ननु चिच्छक्तेरेव स्वतो विषयप्रवणतायामनिर्मोक्षप्रसङ्गात् अस्ति किंचिद्द्वारम् ; तत्तु न चक्षुरादिमात्रं, तदुपरमेऽपि सङ्कल्पाद्युत्पत्तेः । नापि मनोमात्रविश्रमः, तत्प्रशान्तावपि स्वप्ने मनुष्यस्य स्वात्मनि व्याघ्राद्यभिमानात् । नाप्यहङ्कारे पर्यवसानं, तद्विरामे सुषुप्तौ प्रश्वासनिश्वासहेतुभूतप्रयत्नाधारस्य महतस्सिद्धेः । नच तदवधिस्तत्त्वपङ्क्तिः, तस्यापि परिमितत्वेन कार्यत्वात् ; तत्कारणं त्वव्यक्तं न परिमितमित्यत्र प्रमाणमस्ति । तत्कल्पनायां त्वनवस्थापातः, अतोऽव्यक्तमपरिमितमादिकारणमिति वृत्तिभेदसिद्धैर्महदादिभिरव्यक्तानुमानं स्यात् । तदेतत्कथामात्रम् । स्वतस्सर्वग्रहणयोग्याऽपि हि पुंसां चिच्छक्तिस्संसारावस्थायां कर्मणा संकुचन्ती कर्मोत्पन्नै रेव द्वारैर्यथाकर्म प्रसरतीति तु **त्रय्यन्तवृद्धाः** । नापि सङ्कल्पादिभिर्मनःक्लृप्तिः, संस्कारप्रनाड्याऽपि तदुपपत्तेः । अन्यथा मनसाऽपि तदुत्पादनायोगात् । करणस्य च द्रव्यत्वं नावश्यापेक्षितम् । न च स्वप्ने व्याघ्राद्यभिमानादहङ्कारक्लृप्तिः, मनसैव तादृशसंस्कारसध्रीचा तदुपपत्तेः । निश्वासादिहेतुभूतप्रयत्नाधारतया महत्क्लृप्तिरप्ययुक्ता । अदृष्टवशादेव बाह्यस्येवान्तरस्यापि मरुतः स्पन्दनोपपत्तेः । न चादृष्टस्यापि महत्तत्त्वाश्रयत्वमितःपूर्वं सिद्धम् । यदा चेश्वरप्रयत्नाधीनत्वमुच्छ्वासादेस्सेत्स्यति, तदा क्षेत्रज्ञस्यापि न जीवनपूर्वकः प्रयत्नः कल्प्यः । किमुत कस्यचिदचिद्द्रव्यस्य ? परिमितत्वं तु महतः कुतस्त्यम् ? अन्तर्देहमेव तत्प्रवृत्त्युपलम्भादिति चेन्न ; त्वत्पक्षे विभोरप्यात्मनः शरीरावच्छिन्नप्रदेश एव व्यापारावेशवद्विभोरपि महतस्सहकारिविशेषसामर्थ्यात् क्वाचित्कप्रवृत्तिसंभवात् । न च वृत्तिभेदमात्रादन्तःकरणभेदक्लृप्तिर्युक्ता । * कामस्सङ्कल्प इत्यादिना मनस्येव बहुविधवृत्तिश्रुतेः । कामादीनां मनस्सामानाधिकरण्यम् * आयुर्घृतमितिवद्वाक्तम् ; महतश्च त्वया मिथो विरुद्धभावाष्टकसुखदुःखाद्याश्रयत्वस्वीकारात् । बाह्येन्द्रियमनोहङ्काराणामालोचनादिवृत्तिभेदाश्रयणमप्ययुक्तम् , महत एव सहकारिभेदात् सर्ववृत्त्यविरोधात् । अत एव शास्त्रतो महदादितत्त्वसिद्धावपि तेषां पृथक्करणत्वं वृत्त्याश्रयत्वं वा न कल्प्यम् । एवं चक्षुरादिष्वालोचनोक्तिरपि नेया । न द्वितीयः, महदादीनामागमतस्सिध्यतां साक्षात्परम्परया वा प्रधानजन्यत्वसिद्धेः, अनुमातव्याभावात् ।

एकप्रमाणवेद्यत्वे कार्यकारणयोर्मिथः । बोध्यबोधकते न स्तः सहदृष्टाग्निधूमवत् ॥

विप्रतिपन्नं प्रत्यनुमानं सार्थमिति चेन्न ; महदादीनभ्युपेत्यानभ्युपेत्य वा तेष्वव्यक्तकारणकत्वविप्रतिपत्त्ययोगात् । यदप्याहुः कार्याणां स्वाधिकपरिमाणादुत्पत्तिर्नियतेति, तदप्यसत् ; वस्त्रादिषु वैपरीत्यदृष्टेः । अव्यक्तस्य च परिच्छिन्नत्वं * तमसः परस्तान्मृत्युं भिनत्ति इत्यादिशास्त्रशतसिद्धम् । व्याप्तिवचनं तदनन्तमसंख्यातप्रमाणं चेत्यादिकमपि विभुत्वमन्तरेणापि स्यात् । घटादीनामपि स्वन्यूनपरिमाणैः पिण्डाद्यवयवै रेवोत्पत्तिरिति समन्वयश्च कुत्र ? केषाम् ? कीदृशः ? सुखादिरूपेषु कार्येषु सत्त्वादीनां समनुगतिरिति चेत्, किमतः ? न हि यद्येष्वनुगतं तत्तेषां कारणमिति नियमः, शौक्ल्यगोत्वादेरनेकानुगतस्य तत्कारणत्वाभावात् । अन्यथा व्यक्ताव्यक्तसाधारणधर्माणां तदुभयकारणत्वप्रसङ्गात् । तथा च तत्त्वाधिक्यप्रसङ्गः । एतेन विगीतं स्वानुगतकारणकं कार्यत्वाद्घटशरावादिवदित्यपि निरस्तम् । घटादिष्वनुगतस्य मृत्त्वस्य तत्कारणत्वासिद्धेः, मृद्द्रव्यस्य तु घटाद्यात्मना विभक्तस्याविभक्तस्य वा तेष्वनुगतत्वादृष्टेः । यदप्येकरूपान्वितत्वादेकोपादानत्वमिच्छन्ति, तदपि स्वपरमतनिर्धूतम् , सर्वथा सारूप्ये हेतौ तत्त्वभेदभङ्गप्रसङ्गात् ; यथाकथंचित्सारूप्ये तु व्यभिचारात् , साक्षादेकोपादानत्वसाधने सृष्टिक्रमादिशैथिल्यं स्यात् । मृत्तन्त्वाद्युपादानभेदश्च निह्नूयते । परम्परयेति तु मृद्घटादिनिदर्शनविरुद्धम् । नित्येषु च पुरुषेषु साक्षित्वादयो धर्मास्साधारणा युष्माभिरेव पठ्यन्ते, नतु तेषां हेतव इष्टाः ।

व्यक्ताव्यक्तयोश्च *त्रिगुणमविवेकि इत्यादिसाधर्म्यपाठादेकोपादानत्वप्रसङ्गः। कार्यत्वे सतीति विशेषणेऽपि मृत्पिण्डद्वयारब्धघटादिभिर्गोमयादिनानोपादानवृश्चिकादिभिश्चानैकान्त्यम्। [बह्वा]तन्त्वारब्धपटादिभिश्च तेषामपि पक्षीकरणे दृष्टान्तासिद्धिः। [अविदित]व्यतिरेकिहेतुविवक्षायामपि न दृष्टः कारणभेदोऽपह्नोतुं शक्यः। नापि कारणान्तरमेकं विधातुं, दृष्टैरेव हेतुभिरदृष्टघटितैः कार्याणां चरितार्थत्वात्। न च शास्त्रमन्तरेण जगतस्सत्त्वादिगुणसमन्वयसिद्धिः, येन तन्मयं कारणमुन्नीयेत। ननु सुख्यामि दुःख्यामि मुह्यामीति स्वानुभवसिद्धास्तावत्सुखादयः, ते च कार्यभूताः स्वानुरूपं कारणमाक्षिपन्ति। तथातथा तेषुतेषु विषयेषु कालभेदेन पुरुषभेदेन च प्रीत्यप्रीतिविषादजनकत्वं दृष्टम्, तदपि तत्तद्गतविचित्रगुणविशेषहेतुकं युक्तमिति। तन्न; संप्रतिपन्नदृष्टादृष्टहेतुशक्त्यैव सर्वोपपत्तौ तदतिरिक्तत्रैगुण्यक्लृप्त्ययोगात्। गुणानां कार्यैकनिरूपणीयत्वभाषणमपि शास्त्रोपज्ञम्। अन्यथा त्रैगुण्योन्मेषभेदस्याप्यतिरिक्तनिर्वाहकत्रैविध्यक्लृप्तावनवस्थाप्रसङ्गात्। सामग्र्यनवस्था तु सिद्धा न कापि दोषाय, प्रत्युत गुणायेति सर्वै रेष्टव्या। गुणत्रयात्मकं च कारणमिच्छतस्ते विश्वस्यैकोपादानत्वं दुर्वचम्। ननु साम्यावस्थानां सत्त्वरजस्तमसां सङ्घातः प्रकृतिः; अतः कारणैकत्वं स्यात्। तन्न, चित्रपटारम्भकशुक्लकृष्णरक्ततन्तुसङ्घातन्यायेन सूक्ष्मदृष्टौ कार्याणां यथास्वं कारणभेदस्यैवाङ्गीकारात्। ततश्च भेदानां भिन्नत्वे सति विका[र]रित्वादभिन्नहेतुकत्वक्लृप्तिश्च निरस्ता; सत्त्वादीनां भिन्नत्वाद्विकारित्वाच्च। अथ तत्त्वाभिन्नकारणान्तरक्लृप्तिः, तथा सति स्वाभीष्टतत्त्वसंख्याविरोधः; सत्त्वादिद्रव्यभेदाभ्युपगमाच्च। *शक्तितः प्रवृत्तेश्चेत्येतदपि मन्दम्। यदि कारणशक्तितः कार्यं प्रवर्तते कथमव्यक्तसिद्धिः? ननु कारणशक्तिर्नाम सत्कार्यपक्षे न कार्यस्याव्यक्तत्वादन्या। यथा हि तिले तैलस्य। अतस्सर्वकार्योपादानव्यक्तसिद्धिरिति। मैवम्, यदि तैलाश्रयतिलवदव्यक्तावस्थाश्रयस्वीकारः, तदा पूर्ववत्स्वेष्टतत्त्वसंख्याविरोधः। अथ न, विषमस्तिलदृष्टान्तः। नोदाहरणमादर्तव्यम्; क्षीराद्दधिवत्सूक्ष्मावस्थात्स्वस्मादेव जगदुत्पत्स्यत इति। तथाऽपि संप्रतिपन्नावधिस्तत्त्वपङ्क्तिरस्तु। यद्वा तदपि सूक्ष्मं सूक्ष्मान्तरादिति कथं तत्त्वेयत्ता? एतेन **सांख्यानां** सूक्ष्मशरीरक्लृप्तिश्च निरस्ता। यदाहुः—पूर्वोत्पन्नमव्यक्तमित्यादिना, तन्न; नह्यत्र लिङ्गशब्दोक्तसूक्ष्मशरीरसद्भावे प्रमाणमिति स्थूलवत्प्रत्यक्षम्, कैश्चिदप्यनुपलम्भात्। विभोरात्मनस्स्वर्गादिगत्युपदेशान्यथानुपपत्त्या तत्क्लृप्तिरिति चेन्न; तत्क्लृप्तावपि युष्मन्मते तद्गतेरात्मन्युपचारात्। ततो वरमदृष्टशक्त्या तत्रतत्र देहोत्पत्तिमात्रेण तत्तद्देशगत्युपचारः। ननु स्थूलदेहद्वयान्तरालवर्ती क्षेत्रज्ञस्तत्कालीनदेहवान्, क्षेत्रज्ञत्वात्; यस्तथा स तथा यथा कालान्तरवर्तीत्यनुमीयेत। मैवम्; विपक्षे बाधकाभावात्; गत्युपदेशानुपपत्तेः परिहृतत्वात्। अशरीरत्वे मुक्तत्वप्रसङ्ग इति चेन्न; प्रलयवदविरोधात्। तत्रापि सूक्ष्माचिद्विशिष्ट एव पुरुष इति चेन्न; अत्रापि तावन्मात्रसाधने सिद्धसाधनात्। आगमस्तु गत्यवस्थायां पूर्वशरीराकृष्टसूक्ष्मावयवसङ्घातमात्रेणापि गतार्थः। *सूक्ष्मं प्रमाणतश्च तथोपलब्धेरिति सूत्रमपि तावन्मात्रविषयम्। पुर्यष्टकशरीरोक्तिश्च न शरीरान्तर्वर्तिसूक्ष्मदेहसद्भावपरा। *कारणकार्यविभागादविभागादिति हेतुश्च महदादिपक्षसिद्ध्यसिद्धिविकल्पेन निरस्तः। किंच कार्याणां सतां क्वचित्कारणे विभागाविभागौ नियताविति कृत्वा विचित्रस्य कार्यवर्गस्य विभागाविभागस्थानतया प्रधानं सिषाधयिषितम्। न त्वेवं नियमः; यथा मृदादिषु घटादीनामेतौ दृष्टौ न तथा तन्त्वादिषु पटादीनाम्। न हि तन्त्वेकदेशात्मकः पटः येन घटादिन्यायः स्यात्। एकस्मादनेकोत्पत्तिनियमश्चानेन भग्नः, त्वयाऽपि संहतेस्सत्त्वादिभिर्जगदारम्भोक्तेश्च। यत्र कार्याणां विभागाविभागदृष्टिः न तत्र सर्वत्रोपादानत्वम्, निमित्तेऽपि क्वचित्तद्दृष्टेः अरणेरिवारणेयस्य। न हि काष्ठे पार्थिवांशो वह्नेरुपादानम्। न च वह्न्यंशो

धूमस्य । एवं सति नाव्यक्तस्यैव सिद्धिः । विश्वनिमित्तस्यापि कस्यचिदेवमनुमातुं शक्यत्वात्, तस्य च विजातीयस्यापि संभवात् । किंच यथा मृदवयवसङ्घाते घटादेरविभागादिः, तथा पार्थिवाद्यणुसङ्घाते तत्तद्भूतभौतिकानां स किं न स्यात्? ततश्च का कथा तदतिरिक्ततत्त्वकल्पनायाम् । कृत्स्नैकदेशसंयोगानुपपत्त्याऽणुसङ्घातस्य कारणत्वक्लृप्तिरयुक्तेति चेन्न; सत्त्वादिविभुद्रव्यसङ्घातस्यापि तत्रैव संयोगविकल्पावतारात् । अणूनां मिथः कार्त्स्न्येन संयोगे पृथुकार्यानुपपत्तिस्स्यात्; न तु विभूनामिति चेन्न; तेषामपि मिथः कार्त्स्न्येन संयुक्तानां स्वापेक्षयाऽल्पपरिमाणबहुकार्योत्पत्तौ प्रतिकार्यं कारणस्य कृत्स्नैकदेशवियोगविकल्पे कार्यान्तराणामनुत्पत्तिर्वा कारणस्य सावयवत्वं वा स्यादिति चर्चा स्यात् । श्रौते तूपादाने *श्रुतेस्तु शब्दमूलत्वादिति समाधानं सूत्रितम् । अपि च क्षीरदधिरुचकस्वस्तिकादिन्यायेन स्वस्यैव पूर्वावस्थाविशेषवतस्स्वोपादानत्वे सिद्धे किमन्यत्र कुत्रचिदविभागादिगवेषणया? घटादयोऽपि मृत्पिण्डादिषु तत्तदंशैरेवोपादीयन्ते न तु पिण्डादिभिः । कूर्मावयवदृष्टान्तश्चात्र मन्दः, तत्र ह्याकुञ्चनप्रसारणाभ्यामवयवान्तरावृतानावृतत्वसिद्ध्या भवत्यव्यक्तव्यक्तावस्थाभेदः, न तूपादानोपादेयभावात् । न च तत्र कस्यचिदवयवनाशोत्पत्तिव्यवहारः । अतो न कथंचिदप्यनुमानादव्यक्तादिसिद्धिः ।

आगमेन विना सिद्धिस्तन्मात्राणां च दुर्वचा । उद्भवानुद्भवाद्यैस्तु लोके सूक्ष्मादिकल्पना ॥

अक्षेषु वचनादीनामनुपहतैस्सहकारिमद्भिस्तदवयवविशेषैरेवोपपत्तौ न तावत्कर्मेन्द्रियक्लृप्तिः; रूपादिज्ञानादीनां च तत्तदधिष्ठानभेदैरेव तदनुगुणदशाविशेषितैस्संभवात्; तदतिरिक्तकल्पनेऽपि **काणादा**दिकल्पितन्यायेन स्मृतिविशेषानुगृहीतेन भौतिकत्वोपपत्तेराहङ्कारिकेन्द्रियसिद्धिरनागमतो न भवति ।

कल्पनागौरवभयात्कलाकाष्ठाद्यकल्पयन् । अविशेषात्प्रधानादिकल्पनामप्यपास्य तु ॥
षड्विंशत्तत्त्ववादश्च यदि युक्त्या समर्थ्यते । सांख्यवत्प्रतिवक्तव्यो न विस्रम्भस्तदागमे ॥
तं षड्विंशकमित्याहुस्सप्तविंशमथापरे । इत्यत्र न विरोधस्स्याच्छ्रुतिमात्रानुसारतः ॥

एवमागमिकेषु महदादिषु कालभेदनियतविकारभेदाधीनं विशेषमाह—**सत्त्वादीति** । गुणत्रयाश्रयात्प्रधानात्सत्त्वादिगुणोन्मेषभेदेन सात्त्विको राजसस्तामसश्चेति त्रिधा महानुत्पद्यते । त्रिभ्यश्च महद्भ्यस्तथैव त्रिविधोऽहङ्कारः । तत्र प्राच्यादेकादशेन्द्रियाणि । परस्तु भूतादिसंज्ञस्तन्मात्राः क्रमाज्जनयति । मध्यमस्तैजसाख्यः पूर्वापरयोरनुग्राहकतया तदुभयसाध्यसृष्टिद्वयार्थः । तुशब्दो मतान्तराद्व्यवच्छिनत्ति । कल्पितं हि कैश्चित्तन्त्रान्तरनिष्ठैः कर्मेन्द्रियाणां प्रवृत्तिशीलतया राजसाहङ्कारजन्यत्वम्; तच्चायुक्तं शब्दैकगम्येऽर्थे युक्तिभिरन्यथाकरणायोगात् ॥ ११ ॥ **इति प्रकृतिमहदाद्यागमिकतासृष्टिप्रकारौ ॥**

तत्राहङ्कारजन्यं भजति परिणतैः शब्दमात्रं नभस्त्वं
तद्वत्तन्मात्रपूर्वास्तदुपरि मरुदग्न्यम्बुभूम्यः क्रमात्स्युः ।
सूक्ष्मस्थूलस्वभावस्वगुणसमुदयप्रक्रियातारतम्यात्
तन्मात्राभूतभेदः कललदधिनयात् कल्पितस्तत्त्वविद्भिः ॥ १२ ॥

एवं प्रकृत्यादीनामागमगम्यत्वं सृष्टिप्रकारं च संजगृहे । अथ तेषु तन्मात्रसृष्टौ श्रुतिस्मृतिविप्रतिपत्तेस्संशयं विपर्ययं वा निरस्यति—**तत्रेति** ॥ श्रूयते हि *तन्मात्राणि भूतादौ लीयन्त इति । नच श्रुतिविरुद्धा स्मृतिरुदीयेत; अतः

पञ्चानामपि तन्मात्राणां तामसाहङ्कारादुत्पत्तिः । बहुवचनात् बहुत्वस्य च प्रसिद्धितो नियमः । भूतानां तु यथास्वं तन्मात्रेभ्यः क्रमादुत्पत्तिरिति कश्चिन्मन्यते । तं प्रति ब्रूमः—न ह्यनुपबृंहणा श्रुतिरासतमा । अन्योन्यघटितानेकोपबृंहणविरोधे तदनुगुणं नेतव्या । अतः पाशवद्बहुवचनमनादरणीयम् । अंशभूयस्त्वव्यक्त्यर्थं वा । तस्माच्छब्दतन्मात्रमेकमहङ्कारजन्यम्, तच्च परिणतिविशेषादाकाशत्वं भजते । एतेन सर्वत्र सृष्टौ द्रव्यानुवृत्तिस्सूच्यते । तद्वत्—आकाशवत् । तन्मात्रपूर्वाणि वाय्वादिभूतानि स्युः । ननु यदि शब्दाद्याश्रयतया तत्तद्भूतत्वं तर्हि कथं तत्र पञ्चकद्वयत्क्लृप्तिरित्यत्राह—**सूक्ष्मेति** । स्वगुणा इह शब्दादयः, तेषां समुदय उत्पत्तिः । तत्प्रक्रियातारतम्यं सूक्ष्मस्थूलस्वभावतयैव । तच्च शास्त्रगम्यम् । कललशब्दोऽत्र दुग्धदधिमध्यावस्थाविषयः । तत्र हि निवृत्तभूयिष्ठमाधुर्यमीषदम्लत्वमुपलभ्यते तथा स्यात् ॥ १२ ॥ **इति तन्मात्रभूतसृष्टिप्रकारः** ॥

अद्भ्योऽग्निस्तेजसस्ता इति न हि वचसोर्बाधितुं युक्तमेकं
निर्वाहः कल्पभेदाद्यदि न दृढमिताच्चत्वसृष्टयैकरूप्यात् ।
व्यष्टौ ताभ्यः कदाचित्तदुपजनिरतो व्यत्ययस्तत्समष्टौ
आदावप्सृष्टिवादश्श्रुतिमितमितरन्न प्रतिक्षेप्तुमीष्टे ॥ १३ ॥

एवं तन्मात्रभूतसृष्टिप्रकार उक्तः । तत्र तोयतेजसोः सृष्टौ प्रमाणविप्रतिपत्तिं शमयति—**अद्भ्योऽग्निरिति** ॥ अबाधेन गतिमत्त्वे श्रुतिविरोधप्रतीतावपि स्मृतिस्तद्वदबाध्येति भावः । गत्यन्तरं निवारयति—निर्वाह इति । स्वेष्टां गतिमाह—* **व्यष्टाविति** । निमित्तभूताभ्य इति भाव्यम्, अतश्शब्दो हेतुमवधिं वा ब्रूते । ननु * आपो वा इदमग्रे * अप एव ससर्जादावित्यादिश्रुतिस्मृतिदर्शनादग्न्यादेस्सर्वस्याप्स्वसृष्टिस्स्यादित्यत्राह—**आदाविति** । महदादीनामिवाग्नेरप्यद्भ्यः पूर्वभावित्वं बहुश्रुतिस्मृतिसिद्धमतस्तदविरुद्धं दुर्निवारमित्यर्थः । श्रुतिषु च न्यूननिर्देशेष्वनुक्तमधिकमन्यतो ग्राह्यम्; श्रुतहानायोगात्, अव्यवस्थितन्यूनाधिकसृष्टिकल्पने गौरवाच्च ॥ १३ ॥ **इति अप्तेजसोर्व्यष्टिसृष्टिविशेषः** ॥

पृथ्व्यास्स्पर्शादिभेदो द्रवमृदुकठिनीभावभेदश्च दृष्ट-
स्तद्वत्पृथ्वीजलाग्निश्वसनपरिणतिर्लाघवायेति जैनाः ।
तत्र द्रव्यैक्यमिष्टं क्रमजनिविलयौ त्वागमादप्रकम्प्यौ
तर्कैकालम्बिगोष्ठ्यां भजतु बहुमतिं तादृशी लाघवोक्तिः ॥ १४ ॥

ननु कथमेवं तोयतेजसोर्व्यष्टिसमष्टिसृष्टिव्यवस्था, विचित्रपरिणामशालिनस्त्रिगुणस्य कालभेदेनानियतपरिणामोपपत्तेः । उक्तं च **जैनैः**—पुद्गलाख्यमेकजातीयद्रव्यं तत्तत्सामग्रीभेदैरव्यवस्थितक्रमान् भिन्नाभिन्नस्वभावान् विचित्रपर्यायान् भजत इति यथा **काणादप्रभृतीनामेकैकभूतपरमाणवः**; यथा च सांख्यादीनामेकैकं भूतम् । अतो न शाश्वतभूतभेदक्लृप्तिः । वाय्वादिचातुर्विध्योक्तिरपि पर्यायभेदनिबन्धना; नियतक्रमभूतसृष्टिकल्पना च लाघवयुक्तिविहता; तदेतदनुभाषते—**पृथ्व्या इति** । दूष्यांशव्यक्त्यै शेषमनुमनुते—**तत्र द्रव्यैक्यमिति** । त्रिगुणद्रव्यमेव हि वाय्वाद्यवस्थमिति भावः । नियतक्रमत्वे कल्पनागौरवमागमबलादपनयति—**क्रमेति** । लाघवतर्कस्य का गतिरित्यत्राह—**तर्केति** । गुरुकल्पनाप्रवृत्तं प्रति हि लाघवोक्तिः शोभत इति भावः ॥ १४ ॥ इति **पुद्गलानामनियतपृथिव्यादिपरिणामवादभङ्गः**॥

तत्त्वेष्वाथर्वणेऽष्टौ प्रकृतय उदिताः षोडशान्ये विकारा
निष्कर्षेदंपरेऽस्मिन् वचसि तदितरत्सर्वमावर्जनीयम् ।
दृष्ट्वा सांख्यं पुराणादिकमपि बहुधा निर्वहन्त्येतदेके
चिन्तासाफल्यमान्द्याच्छ्रमबहुलतयाऽप्यत्र तज्ज्ञैरुदासि ॥ १५ ॥

ननु तत्त्वसृष्टौ क्रमनियमो न संभवति * आकाशमिन्द्रियेष्विन्द्रियाणि तन्मात्रेष्विति सुबालोपनिषदाम्नानात् । अव्यवस्थिताश्च सृष्टिव्यवहाराः पृथ्व्यादिषु दृश्यन्ते । अतो यथाश्रुतं कल्पभेदात् सृष्टिभेदः स्यादित्यत्राह—**तत्त्वेष्विति** ॥ अधीयते हि केचिदाथर्वणिकाः * अष्टौ प्रकृतयः षोडश विकारा इति । अत्र तावदव्यक्तमहदहङ्कारतन्मात्राणां प्रकृतित्वमविगीतम् । इन्द्रियेभ्यस्तत्त्वान्तरोत्पत्तिः श्रुत्यन्तरेषु पुराणेषु वा न क्वचिद्दृश्यते । सौबाले च लयानुक्रमे पूर्वापरवाक्यवदिन्द्रियतन्मात्रवाक्ययोर्न लीयत इति पदमावृत्तम् । एवं वाक्यवैरूप्ये सत्यनुषङ्गात् वरमधिकरणविभक्त्याऽपि संसर्गमात्रग्रहणमिति स्थिते प्रकरणान्तरैककण्ठ्यं भवतीति केवलविकृतित्वमिन्द्रियाणां युक्तम् । भूतानां चाकाशादीनां चतुर्णां साक्षात् तन्मात्रद्वारेण वा तत्त्वान्तरोपादानत्वे प्रकृतयो विकृतयश्च पृथग् द्वादश स्युः । ननूपबृंहणविशेषानुसारादिन्द्रियाणि शब्दादिगुणाश्च षोडशविकराः, भूततन्मात्रभेदानादरेण प्रकृतयश्चाष्टावभ्युपगम्यन्ताम् । मैवम्; द्रव्यतत्त्वप्रकरणे गुणपरिगणनानौचित्यात्, गुणशब्देन च क्वचिद्गुणाश्रयविवक्षा स्यात् । गत्यभावे गुणविवक्षायामप्यत्र द्रव्यविवक्षोपपत्तेः । * आकाशाद्वायुरित्यादीन्यपि स्थूलसूक्ष्मभेदानादरेणेति समाधानम् । एवं स्थिते तामसाहङ्कारोत्पन्ने तन्मात्रपञ्चके भूतान्येकद्वित्रिचतुःपञ्चभिस्तन्मात्रैरारभ्यन्त इति **सांख्याः** । पूर्वपूर्वतन्मात्राणि उत्तरोत्तरतन्मात्रमेकैकं भूतं जनयन्ति इति **पौराणिकाः** । तत्राप्युत्तरोत्तरभूतसृष्टौ पूर्वपूर्वेषां तन्मात्राणां भूतानां वा सहकारित्वमिति पक्षभेदः । एवमन्योऽपि यथामति । तदिदमाह—**दृष्ट्वेति** । एतत्—इतरत्सर्ववाक्यजातमित्यर्थः । किमिति पूर्वाचार्यैरत्रोपेक्षितं तत्राह—**चिन्तेति** ।

न प्रधानविरोधः स्यादीदृशानवधारणे । इति शिक्षयितुं शिष्यान्प्राचां क्वचिदनिश्चयः ॥ १५ ॥

इति प्रकृतिविकृतिविभागचिन्ता ॥

निश्शेषं कार्यतत्त्वं जनयति स परो हेतुतत्त्वैश्शरीरी
तत्तत्कार्यान्तरात्मा भवति च तदसौ विश्रुतो विश्वरूपः ।
तेजोबन्नाभिधेये बहुभवनमभिध्यानलिङ्गं च दृष्टं
तस्मादीशाननिघ्नाः प्रकृतिविकृतयस्स्वस्वकार्यप्रसूतौ ॥ १६ ॥

प्रक्रान्तेषु प्रकृत्यादिकारणेषु * पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति वदतस्सांख्यस्यानन्यथासिद्धेः श्रुत्यादिभिर्बाधमाह—**निश्शेषमिति** ॥ * यत्किंचित्सृज्यते येन * जगत्सर्वं शरीरं ते इत्यादिभिरेतत्सिद्धम् । * तत्सृष्ट्वा तदेवानुप्राविशदित्यादेश्चार्थमाह—**तत्तदिति** । **अन्तर्यामिब्राह्मणसुबालोपनिषदादि**प्रसिद्धिमपि संवादयति—**तदसाविति** । विश्रुतः प्रधानपुरुषविलक्षणत्वेन विश्वशरीरकतया प्रत्यक्षश्रुतिसिद्धः, क्वचिद्विश्वरूपशब्देनापि । * तत्तेज ऐक्षत, बहु स्यां * ता आप ऐक्षन्त बह्व्यः स्याम इति वाक्यविशेषाभिप्रेतं तद्व्यनक्ति—**तेज इति** । न ह्यचेतनमात्रस्यानुत्पन्नकरणकलेवरस्य कर्मिणो वा तदानीं बहुभवनसङ्कल्पाश्रयत्वं युक्तम्, गौणत्वं चात्रापि * गौणश्चेन्नात्मशब्दादिति सूत्रन्यायेन निरस्तम् । प्रकृतं हि मुख्यमीक्षणम्; अत्रापि तत्संभवे नान्यथा गतिर्युक्तेति भावः । उक्तनिगमनव्याजेन—

* विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ॥

सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् ॥

* मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरम् । * यत्किंचिद्वर्तते लोके सर्वं तन्मद्विचेष्टितम् ॥

इत्यादिकमपि प्रख्यापयति—**तस्मादिति** ॥ १६ ॥ **इति सर्वतत्त्वानामीश्वराधिष्ठानेन कार्यकरत्वम्** ॥

द्वेधा भूतानि भित्त्वा पुनरपि च भिनत्त्यर्धमेकं चतुर्धा
तैरेकैकस्य भागैः परमनुकलयत्यर्धमर्धं चतुर्भिः ।
इत्थं पञ्चीकृतैस्तैर्जनयति स जगद्धेतुरण्डादिकार्या-
ण्यैदंपर्यं त्रिवृत्त्वश्रुतिरधिकगिरामक्षमैका निरोद्धुम् ॥ १७ ॥

तत्त्वान्तराणामीश्वराधीनत्वं व्यष्टयाद्यारम्भवृत्तान्तैरपि व्यनक्ति—**द्वेधेति** ॥ स खल्वादिकर्ता स्वसृष्टानि पञ्च भूतानि द्विधा कृत्वैकैकं भागं स्थापयित्वाऽर्धान्तराणि चतुर्धा विभज्य तत्तद्भागैश्चतुर्भिर्भूतान्तराणामविभक्तान्यर्धान्तराण्यनुकलयति । यथोक्तम्—

एवं जातेषु भूतानि प्रत्येकं स्युर्द्विधा ततः । चतुर्धा भिन्नमेकैकमर्धमर्धं ततः स्थितम् ॥

व्योम्नोऽर्धभागाश्चत्वारो वायुतेजःपयोभुवाम् । अर्धानि यानि वायोस्तु व्योमतेजःपयोभुवाम् ॥ इति ।

ततः पञ्चधा विभक्तानां भागानां पञ्चस्वर्धान्तरेषु योजनमिति परोक्तं निरस्तम् । एवं पञ्चीकृतानां व्यष्टिकार्येषु विनियोगमाह—**इत्थमिति** । महदादिभिश्चेति भाव्यं *महदाद्या विशेषान्ता इत्याद्युक्तेः । ननु *हन्ताहमिमास्तिस्रो देवता इत्याद्यारभ्य *तासां त्रिवृतंत्रिवृतमेकैकां करवाणि, * त्रिवृतंत्रिवृतमेकैकामकरोत् इति त्रिवृत्करणे श्रुते पञ्चीकरणादिस्मृतिरन्यपरा स्यादित्यत्राह—**ऐदंपर्यमिति** । तात्पर्यमित्यर्थः । अत्रानन्यपराणां भूयसां च बलीयस्त्वमनुक्तानामविरुद्धानामपेक्षितानामन्यतोऽपि ग्राह्यत्वं स्थापितम् । अभाष्यत च त्रिवृत्करणं पञ्चीकरणप्रदर्शनमिति ॥ १७ ॥ **इति पञ्चीकरणप्रक्रिया** ॥

कार्यं नैवारभेरन्समधिकमणवस्सर्वतस्संप्रयुक्ता
दिक्संयोगैकदेश्यान्न घटत इह ते दिक्कृतोऽप्यंशभेदः ।
बुद्धेस्त्वंशानपेक्षा स्फुरति विषयिता विश्रमस्त्वस्तु दृष्टे
नो चेदारम्भकांशप्रभृतिषु नियता दुर्निवाराः प्रसङ्गाः ॥ १८ ॥

ननु पञ्चीकरणाभिधानात्पञ्चसु भूतेषु स्वतस्सभागत्वम्, व्यष्टिसमष्टिभावः, भूतांशानां चात्यन्तभिन्नत्वं समानन्यायतया प्रकृतिपर्यन्तेषु तत्त्वान्तरेष्वपि तत्सर्वं सिद्धम् । भूतभागानां चात्यन्तभेदो वेणुरन्ध्रश्लोकेऽभाष्यत । एवं सत्यणुसमाहार एव प्रकृतिरिति स्थिते * महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यामित्यौलूक्योपालम्भो न युक्त इत्यत्राह—**कार्यमिति** ॥ अयं भावः—अनन्यपरशास्त्रसिद्धेष्वर्थेषु *श्रुतेस्तु शब्दमूलत्वादिति न्यायेन गत्यन्तराभावे काचिद्गमनिका स्वीकार्या । अनुमेयेषु तु यथादृष्टान्तं सिद्धिः, अन्यथाऽतिप्रसङ्गात् । ततश्चावयविवादिनामवयवास्स्वभागैर्मिथस्संयुज्यावयविनमारभन्त इति सिद्धान्तः । एतच्च द्व्यणुकावधि निर्विघातं, द्व्यणुकारम्भे तु निरवयवा अणवोऽवयवा इति कल्पितम् ; तत्रैवं प्रसङ्गावतारः—यदि परमाणवस्स्वांशतस्संयुज्यावयविनमारभेरन्, तदा तदंशोऽवयवरूपस्तदन्यो वा ? आद्ये तस्यापि

तथेत्यनवस्था। अन्यस्तु स्वाभाविकः औपाधिको वा? पूर्वत्र भिन्नाभिन्नता स्यात्। उत्तरत्रोपाधिसंबन्धेऽप्यंशभेदो दुर्वचः। परिशेषात्तन्निरपेक्षसंयोगैरन्योन्यानाघ्रातभागभेदरहितैरणुभिरारम्भः स्यात्। त्यक्तस्तर्हि सप्रतिघत्वविरोधः। सर्वेषु च परमाणुष्वेकपरमाणुप्रदेशमात्रावस्थितेषु स्वाधिकदेशव्यापिकार्यारम्भो न [सिध्येत्] स्यात्, न खल्ववयवास्पृष्टे कुत्रचित् प्रदेशेऽवयवी तिष्ठेत्, अदृष्टेरनिष्टेश्च। अवयवनाशादवयविनाशे क्षणमनाधारोऽवयवीति चेत् तथा कल्पयताऽपि त्वया पूर्वं तन्तुसंघानवच्छिन्नप्रदेशे पटस्य वृत्तिर्न कल्पिता। एवमधिकारम्भानुपपत्तौ मेरुसर्षपादिविचित्रभेदासिद्धिः। सेयमसिद्धं सिषाधयिषतस्सिद्धहानिः; तथा चासिद्धसाधनं निर्मूलम्। ननु परिमितानां सर्वेषां दिग्भेदेन भागभेदे दृष्टे परमाणुष्वपि तथाऽङ्गीकारो दुर्वार इत्यत्राह—**दिक्संयोगेति**। दिक्संयोगायत्तोऽपि हि भागभेदस्सावयवेष्वेव दृष्टः, त्रसरेणोरपि त्वया सावयवत्वक्लृप्तेः। निरवयवेषु तु विश्वव्यापैकदिक्तत्त्ववादिनस्ते तन्निबन्धना भागक्लृप्तिरशक्या। तदुपाधिसंयोगात्तु स्यादपि यदि तत्राप्यंशानंशविकल्पक्षोभोऽतिलङ्घ्येत। अतस्सर्वदिगुपाधिसंयोगानां परमाणुषु पृथक्प्रदेशरहितानां कथमौपाधिकभागभेदापादकत्वम्? यदि चानंशभेदेन संयुक्ता उपाधयः क्वचिद्भागभेदकास्तर्हि परमाणव एव तथा किं न स्युः? वृथा चैवमंशक्लृप्तिरभागेन संयोगावस्थितेरिति। तदिदं सर्वमभिप्रेत्याहुः—

षट्[ट्केन] ट्कोणयुगपद्योगात् परमाणोष्षडंशता। षण्णां समानदेशत्वे पिण्डः स्यादणुमात्रकः॥ इति॥

ननु बुद्धिस्तावत्सर्वतन्त्रसिद्धा। सांवृतीत्यपि हि तां माध्यमिको मन्यते। सा चैकाऽप्यनेकविषया दृष्टेष्टा च। निरंशा च सा प्रत्येकं कार्त्स्न्येनांशतो वा विषयीकुर्यात्? नाद्यः; अन्यानुल्लेखप्रसङ्गात्। न द्वितीयः, निरंशत्वादेव। तत्र चेत् कश्चित्समाधिः अणुष्वपि तथा स्यात्। तत्राह—**बुद्धेस्त्विति**। तुश्शङ्कानिवृत्त्यर्थः। विषयित्वं ह्यंशानपेक्षतयैव दृष्टम्, नह्यन्यतोऽपि तस्यान्यथादृष्टिः, अतो यथोपलम्भमेकवदनेकोऽपि विषय एकस्या बुद्धेः। एवमेकस्य निरंशस्यानेकबुद्धिविषयत्वमपि निरूढम्। अवयव्यारम्भकसंयोगस्तु त्वयाऽपि न क्वचिदंशनिरपेक्ष उक्तः; क्वचिद्विशेषाङ्गीकारे नियामकाभावः। अथ संघातारम्भकसंयोगेऽपि समः प्रसङ्ग इति, न समः; संयोगसाध्यसंघाताभावात्। तत्स्वीकारे ह्यवयविवाद एव वरम्। संयोगस्तर्ह्येकोऽनेकवृत्तिस्सन्नंशानंशविकल्पदौस्थ्यं नातिक्रामेत्। न ह्यसौ नास्त्येव सिद्धयोस्साध्यतया दृष्टेरिति, तदपि न; विषयित्ववन्निस्तारात्। सोऽपि हि द्वयोर्न स्वांशाभ्यां वर्तत इति दृश्यते। एवं स्वामित्वादयोऽपि न प्रतिबन्दिः। अस्तु तर्हि संयुक्तप्रतिबन्दिः। मूर्तैर्विभूनां संयोगोऽस्ति न वा? न चेदन्यतरकर्मजसंयोगलोपः; अविशेषात्। अस्ति चेत् यदि कार्त्स्न्येन विभुद्रव्यमेकेन स्पर्शवता संयुज्यते, कथं स्पर्शवदन्तरेण तस्य संयोगः स्यात्? अंशतश्चेत् सावयवत्वप्रसङ्गः। न हि विभुद्रव्यस्यावयवित्वं संघातत्वं वा सुवचं, पूर्वत्र स्पर्शवत्त्ववृत्तत्वकार्यत्वानित्यत्वादिप्रसङ्गात्। उत्तरत्र नानात्वभेदाभेदयोरन्यतरापातात्। तत्र च विभुद्रव्यांशानां मिथस्संयोगोऽस्ति न वा? अस्ति चेत् तत्रापि स एव प्रसङ्गः; नास्ति चेदसंहतरूपता स्यात्। औपाधिको विभूनामंशभेद इति चेन्न। उपाधिसंयोगेऽपि अंशादिविकल्पानपायात्। निरंशेऽपि संयुज्यमानं स्वरूपेण तद्भेदोपाधिरिति चेन्न। स भेद उपाधिना च्छिन्ने चेदवयवविश्लेषात्मा स्यात्, अच्छिन्ने तु भेदाभेदवाद एव शरणम्। अत एव स्वसमानपरिमाणेषु विभुप्रदेशेषु तत्तदुपाधिसंबन्धव्यवस्थेति निरस्तम्, तत्प्रदेशभेदस्यैव मृग्यमाणत्वात्। विभुद्रव्यमेव तत्तन्मूर्ततुल्यपरिमाणं जायत इति चेन्न; विरोधादुक्तदोषानतिक्रमाच्च। काल्पनिकांशभेदेन मूर्तसंयोग इति चेत्तर्हि वस्तुतस्त्वखण्डेनेत्युक्तं स्यात्। अंशभेदकल्पना च किं विभुद्रव्यस्वरूपमात्रे उत तदंशे एवेति दुस्तरो गर्तः। निरंशानामपि स्वभावत एव विभूनामनेकमूर्तसंयोगक्षमत्वमिति चेदणूनामपि एतदस्तु;

अविशेषात्। एवं त्रसरेणुप्रतिबन्दिश्च भाव्येति। अत्रोच्यते—यदि वयं प्रदेशवर्तिगुणनिह्नवाय प्रवर्त्स्यामस्तदा विभु-प्रतिबन्द्याऽणुष्वपि तत्संभवः प्रदश्येत। किं त्ववयव्यारम्भकाणामवयवैरेव संयोग इति नियमस्य त्वयैवान्येषु सर्वैश्चाङ्गी-कारात् कल्प्येष्वपि तत्प्रसङ्गो दुर्वार इति ब्रूमः। न चान्यत्रैवायं नियम इति स्थाप्यम्; तादृशानामणूनामदृष्टेः, अन-न्यथासिद्धलिङ्गाभावाच्च। यदि विभज्यमानेष्वभावपरिशेषायोगात् परमाणुरपि सत्त्वरजस्तमसां सर्वापकृष्टसंघात इति सांख्यमतस्य निर्मूलत्वात्, महत्परिमाणतारतम्यविश्रान्तिवत् परिमाणतारतम्यत्वादणुपरिमाणतारतम्यविश्रान्तिरपि क्वचि-त्कल्प्येत; तत्राह—**विश्रमस्त्वस्तु दृष्ट इति**। दृष्टे त्रसरेणौ विश्रमसंभवे न मृग्यं ह्यन्यत्। तथा च सिद्धसाध्यता। यदि त्रसरेणुरेव परमाणुस्स्यादप्रत्यक्षस्तर्हि स्यादिति चेत्, हन्त कुत्रैषा व्याप्तिः?

सिद्धो ह्यन्यत्र दृष्टान्तस्साध्ये त्वन्योन्यसंश्रयः। त्रसरेणुः पराणुस्सन् किं नाध्यक्षोऽपराणुवत्॥

चाक्षुषत्वप्रकर्षनिकर्षयोर्महत्त्वप्रकर्षनिकर्षानुविधानात् द्रव्यस्य चाक्षुषत्वं महत्त्वनियतमिति चेत्, चाक्षुषावयवकस्यैव द्रव्यस्य चाक्षुषत्वनियमदर्शनादचाक्षुषावयवकस्य त्रसरेणोरप्यचाक्षुषत्वप्रसङ्गे कस्ते निस्तारः? अगत्येति चेत्, भवतु कुतश्चि-न्महत्त्वाभावेऽपि क्वचिदेवम्। अत एव मूर्तत्वे सति महत्त्वात् त्रसरेणुः कार्यद्रव्यारब्ध इति कल्पनाऽपि निरस्ता। अस्तु बाह्येन्द्रियग्राह्यत्वादेव तत्साध्यमिति चेन्न; विपक्षे बाधकाभावात्। अन्यथा त्रसरेण्वारम्भकस्यापि कार्यद्रव्यारब्धत्व-कल्पनायां निवारकाभावात्। तत्र विपक्षे बाधकं नास्तीति चेदत्रापि तथेत्युक्तमेव। अतो न द्व्यणुकमित्यपि किंचित्। एवमारम्भकपरम्परायास्सावयवत्वं तद्व्यापकतयाऽभिमतमनित्यत्वं कुतश्चिन्महत्त्वं च प्रसज्यमानमनिवारणीयं स्यात्। एत-त्सर्वमभिप्रेत्याह—**नो चेदिति**। अणुषु स्वाभावसमानाधिकरणसंयोगसिद्धेरौपाधिकांशवत्त्वस्वीकारात् इष्टप्रसञ्जनां परिहर्तु-मारम्भकशब्दः॥ १८॥

स्याद्भागानन्त्यसाम्ये परिमितिसमता सर्षपक्ष्माभृतोश्चे-
न्नैवं भागेष्वनन्तेष्वपि समधिकता स्थौल्यहेतुर्गिरेः स्यात्।
व्यक्त्यानन्त्येऽपि जात्योः परतदितरता पक्षमासाद्यनन्तं
श्रौतोपादानसौक्ष्म्यं न भवदभिमतं तत्प्रथिम्नश्श्रुतत्वात्॥ १९॥

नन्वेवं सर्वत्रावयवानन्त्यप्रसङ्गे सर्षपमहीधरादिपरिमाणवैचित्र्यं न स्यादिति शङ्कते—**स्यादिति**॥ प्रसञ्जकस्या-प्रयोजकत्वमित्य[त्वा]भिप्रायेण प्रतिवक्ति—**नैवमिति**। आनन्त्यसाम्येऽप्यवयवानां न्यूनाधिकभावेन परिमाणवैषम्योपपत्ति-माह—**भागेष्विति**। एतच्चोत्तरमनन्तभागाभ्युपगन्तॄणां तत्प्रसञ्जकानां च समानम्।

अण्वंशानामनन्तत्वे गन्तॄणां तदतिक्रमः। कदाऽपि न स्यात्किं न स्याद्वेगातिशयवैभवात्॥
द्युमणेरातपस्सर्पन्नुदयाद्रिशिखामणेः। तत्क्षणं किं न निर्भाति पश्चिमाद्रिशिखण्डकः॥

आनन्त्याविशेषे कथं न्यूनाधिकभाव इत्यत्राह—**व्यक्तीति**। सत्ताप्रभृतिघटत्वादिपर्यन्तानां सर्वासां जातीनां त्रैकालि-कानन्तव्यक्तिवृत्तित्वमविशिष्टं, तथाऽपि न्यूनाधिकवृत्त्यैव परापरभावो युष्माभिः कल्पितः, तद्वदिहापि स्यादिति भावः। निदर्शनान्तराण्यप्याह—**पक्षेति**। अनन्ताः पक्षा मासाश्च, तथाऽपि मासापेक्षया द्वैगुण्यं पक्षाणामेष्टव्यम्। आदिशब्देन क्षणप्रभृति परार्धादिसंग्रहः। अन्यच्च, घटसमुदायाद्घटपटसमुदायोऽधिकः; हिमवद्दक्षिणदेशान्मेरुदक्षिण-देशः; एकात्मदुःखजातादनन्तात्मदुःखजातमित्यादि स्वयमूह्यम्। * नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं

परिपश्यन्ति धीरा इति जगदुपादानं निरतिशयसूक्ष्मं श्रूयते, अतोऽस्मदाद्यग्राह्यो दुस्त्यजः परमाणुरित्यत्राह—**श्रौतेति**। न हि सर्वन्यूनपरिमाणत्वं तत्सूक्ष्मत्वम्, पूर्वोक्तसर्वगतशब्देन श्रुत्यन्तरैश्च विरोधात्। न च जात्यभिप्रायोऽसौ; एकस्य सर्वोपादानत्वोक्तेः, सर्वव्यापिस्वतस्सर्वज्ञजगत्कर्तृविषयत्वाच्च वाक्यस्य। सूक्ष्मशब्दश्च न परिमाणविशेषनियतः। उक्तं च विभ्वीं प्रकृतिं महीयसश्च महदादीन् प्र[कृत्य]क्रम्य **साङ्ख्यैः** *सौक्ष्म्यात्तदनुपलब्धिरिति। ननु त्रसरेणोरष्टमः षष्ठो वा भागः परमाणुरिति सर्वानुमतैश्शिल्पिनां शास्त्रैर्धर्मशास्त्रैस्तन्मूलश्रुत्या च परमाणुसिद्धिः स्यात्। तन्न; शिल्पादिशास्त्राणां परमाणावतत्परत्वात्; मानोन्मानादिविशेषनिर्धारणं हि तत्र विधित्सितम्। ततो हैतुकोक्तानुवादमात्रमिह स्यात्। तत्र च त्रसरेणुतः किंचित्सूक्ष्मं भवतु, मा वा भूत्, दृष्टोपक्रमं विवक्षितसिद्धिरित्यत्राकूतम्। शास्त्रतश्च क्वचिदनन्यथासिद्धात् परमाणुसिद्धावपि तदनुमानभङ्गात्परस्य मानभङ्गः, यथा प्रकृत्याद्यनुमायिनस्साङ्ख्यस्य।

शास्त्रैकविषयत्वे च परमाणोर्न सिध्यति। नित्यस्पर्शादियोगित्वं भूतानां विकृतित्वतः॥
अस्पर्शाण्वंशसंघत्वात्कतिचित्प्रकृतेरतः। एकैकाण्वंशभागेऽपि भागानन्त्यं प्रचक्षते॥
निरंशा प्रकृतिस्सैव परिणामविभागिनी। अनन्तांशात्मिका चेति व्याहतं साङ्ख्यभाषितम्॥
अत्यन्तभिन्नसत्त्वादिद्रव्यसंघात्प्रधानतः। यथांशं विश्वसृष्टौ च न स्यात्त्रिगुणता क्वचित्॥ १९॥

इति परमाणुकारणतावादभङ्गः॥

कार्योपादानभेदे न कथमधिकतो गौरवादेस्स्वकार्यं
नान्यत्वं नामसंख्याव्यवहृतिधिषणाकारकालादिभेदैः।
द्रव्याभेदेऽप्यवस्थान्तरत इह तु ते पत्रताटङ्कवत्स्युः
नोचेदंशांशिनोस्स्यात्प्रतिहतिरुभयोः स्पर्शवत्त्वाविशेषात्॥ २०॥

एवं पृथिव्याद्युपादानं चिन्तितम्। अथोपादानातिरिक्तं कार्यद्रव्यं नास्तीति साध्यते; तत्रावस्थाभेदमात्रं स्वीकृतम्। अयमेव च सत्कार्यवाद **आरम्भणाधिकरण**साध्यः।

विसृष्ट्युल्लासविक्षेपाः कार्याणां कथिताः क्वचित्। कल्पनीया न सर्वत्र परिणामोक्त्यबाधतः॥
आविर्भावतिरोभावजन्मनाशविकल्पवत्। नित्यं जगदिति स्मृत्या व्यवस्थाद्वयमीरितम्॥

तदिह प्रत्यक्षागमबलादेकस्यैव द्रव्यस्यावस्थाभेदादुपादानोपादेयभाव इति स्थिते द्रव्यान्तरं प्रागसदागन्तुकं वदतः प्रतिवक्ति—**कार्येति**॥ कार्यद्रव्यस्य स्वोपादानद्रव्याद्भेदे सति द्विपलकैकपलकन्यायेन तन्तुगुरुत्वम्, समं न्यूनमधिकं वा पटगुरुत्वं च संभूय पतनातिरेकं कथं न कुर्यात्? तदकरणे कश्चिदपि हेतुर्न सिध्येदित्यर्थः—तथा हि—न तावदवयविनि गुरुत्वं न जायते, परमाणुगुरुत्वपरिशेषप्रसङ्गात्। तथा च त्वयाऽनभ्युपगमात्, अयुक्तेश्च। कार्यगुरुत्वादेव द्व्यणुगुरुत्वं कल्पयसि। जातस्य च न स्वाभावतः पतनहेतुत्वाभावः। प्रतिबन्धात्कार्यानतिरेक इति चेत्, किमयं प्रतिबन्धोऽवयविगुरुत्वस्य? उतावयवगुरुत्वस्य? नाद्यः; परमाणुगुरुत्वस्यैव [प्र]पतनहेतुत्वप्रसङ्गात्। तथा सति गुरुत्वात् पतनं द्रवत्वात्स्यन्दनमिति तत्तत्क्रियावन्निष्ठगुरुत्वादिकल्पनभङ्गापाताच्च। अतो वरमवयविनि गुरुत्वाद्यनुत्पत्तिकल्पनम्; तत्र चोक्तो दोषः। न द्वितीयः, कदाचिन्निष्कम्पेऽवयविनि शाखाफलहस्तादिलम्बनाभावप्रसङ्गात्। तथा च कथमवयव्यपि तत्र लम्बेत? संयोगान्तरादर्शनात् लम्बमानोऽवयवी स्वावयवमपि लम्बयतीति चेन्न; सर्वावयवलम्बनप्रसङ्गात्। सङ्घातवादि-

नस्तु यथार्हं प्रतिव[न्यां]द्धांशेऽलम्बनोपपत्तिः । कार्यगुरुत्वोत्पत्तौ कारणगुरुत्वं नश्यतीति चेन्न ; अपसिद्धान्तात्, रूपादिष्वपि तथात्वप्रसङ्गात् । अथ कार्यगुरुत्वस्यातिमन्दत्वात्सूक्ष्मं पतनवैषम्यं दुर्ग्रहमिति, तदपि न ; मान्यकारणादृष्टेः, कल्पकासंभवाच्च । अतस्तन्तुतत्कार्यपटसमुदायोन्माने पटद्वयोन्मान इव गुरुत्वान्तरकार्यं दुस्त्यजम्, आदिशब्देन द्रवत्वगन्धादिसंग्रहः । **स्वकार्य**—त[त्त]दुचितं कार्यमित्यर्थः । तथाऽप्यनन्यथासिद्धभेदकभूम्ना भेदसिद्धौ गुरुत्वान्तरकार्यादर्शनं कथंचिदन्यतरप्रतिबन्धेन नेयमित्यभिप्रायेण शङ्कमानं प्रत्याह—**नान्यत्वमिति** । यद्यपि नामभेदाभेदावर्थभेदाभेदयोरप्रयोजकौ, तथाऽपि पर्यायातिरिक्तो विशेषणविशेष्यभावानर्हो वाचकभेद इह नामभेदः । स च सिंहव्याघ्रशब्दवत् स्ववाच्यं भिन्द्यात् । संख्याभेदोऽप्येकस्यैव द्वितीयादियोगाद्यद्यपि स्यात्, तथाऽपि नैवमत्र; बहवस्तन्तवः, एकः पट इति विभजनात् । व्यवहृतिरिहार्थक्रियासिद्ध्यर्थो व्यापारः । पटाद्यर्थं तन्त्वादय उपादीयन्ते, पटादयस्त्वाच्छादनाद्यर्थम् । न च तन्त्वादिमात्रे पटादिधीः, पटादिषु वा तन्त्वादिधीरिति धिषणाभेदः । आकारभेदश्च व्यवस्थिताश्रयो वृत्तचतुरश्रत्वादिः । पूर्वकालीनास्तन्त्वादयः पटादयस्तु पश्चाद्भाविन इत्येवंविध इह कालभेदः । आदिशब्देन कारणभेदादिसंग्रहः । अंशुप्रभृतयस्तन्त्वादीनां पटादीनां तु तन्त्वादय इति नियतोऽत्र कारणभेदः । कार्यभेदश्च एवं नियत एव । कारणस्यैव च कार्यत्वे कारकव्यापारवैयर्थ्यं स्यादिति भेदहेतवः । एषामन्यथासिद्धिमाह—**द्रव्याभेदेऽपीति** । तुशब्दोऽवधारणे । उपादानोपादेयतयावस्थाद्वयवति द्रव्ये घटपटवद्भेदं साधयितुं न शक्नुवन्तीत्यर्थः । अत्र दुस्तरप्रतिबन्द्यभिप्रायेण निदर्शयति—**पत्रताटङ्कवदिति** । पत्रस्य हि कुण्डलितस्य नियतं नामान्तरं दृष्टम् । सफलश्चावस्थान्तरेण कारकव्यापारः, न ह्यत्रावयव्यन्तरोत्पत्तिः । आकुञ्चनप्रसारणपद्मसंकोचविकासादिष्वपि तत्कल्पनाप्रसङ्गात् । न चैकेनावयवेनावयव्यारम्भः, असमवायिकारणासंभवात् । अवयवावयवसंयोगस्तत्रासमवायिकारणमिति चेन्न; तस्यान्यार्थत्वात् । अन्यथा अंशूनां तन्तुवत् पटाश्रयत्वमपि स्यात् । न च तद्युक्तम्; आरब्धकार्यैरवयवैस्तदैवावयव्यन्तरारम्भानभ्युपगमात् । तत्र हि सप्रतिघत्वविरोधाद्बिभेषि । एवं संप्रतिपन्नावस्थाभेदमात्रानादरेण द्रव्यान्तरकल्पनेऽपि तमेव विरोधं प्रसञ्जयति—**नो चेदिति** । अंशांशिनोः—अवयवावयविनोरित्यर्थः । उक्तप्रसङ्गे तदभिमतमेव हेतुमाह—**उभयोरिति** । द्वयोर्द्रव्ययोरन्यतरस्य वा स्पर्शहीनत्वे मिथः प्रतिरोधो नास्ति । इह तु न तथेत्यभिप्रायेणोभयोरित्युक्तम् । अवयवावयविनोरेकत्र वृत्तिर्नास्तीति चेत्, समवायिदेशैक्याभावेऽपि संयोगिदेशैक्यमङ्गीकरोषि, तत्र कथं तन्त्ववष्टब्धनभःप्रदेशे पटसंयोगः, माभूदिति चेत् मूर्तामूर्तसंयोगविलोपप्रसङ्गः । मेरुमन्दरादीनामप्यविभक्ताकाशप्रदेशवृत्तावविरोधः स्यात्; नीरक्षीरादिमेलने का वार्ता? हन्त! स्वसिद्धान्तं प्रस्मृत्य पृच्छसि । एतेन भूमावुन्मज्जति, निमज्जतीत्यादिसिद्धनिदर्शनमपि निहतम् । तस्मादवयवावयविव्यतिरिक्तविषय एव सप्रतिघत्वविरोधव्यवस्थापनमपि निर्मूलमिति ॥ २० ॥

इत्थं वृत्त्यादिखेदो न भवति न च नः कल्पनागौरवं स्या-
द्वस्त्रे दीर्घैकतन्तुभ्रमणविरचिते वस्त्रधीर्नापि बाध्या ।
देशाधिक्यं समेतेष्वणुषु न हि ततः स्थूलधीबाधशङ्का
संसर्गादेर्विशेषादवयविपरिपद्राशिवन्यादिवादः ॥ २१ ॥

परपक्षे प्रसञ्जितानां दोषाणामभावात् स्वपक्षस्य सम्यक्त्वमाह—**इत्थमिति** ॥ इत्थम्—अवस्थाभेदमात्रेण निर्वाहे सतीत्यर्थः । यद्वा, त्वत्पक्षवदिति । उक्तस्सप्रतिघत्वविरोध इह वृत्तेः खेदः, अवयवेषु वृत्त्यनुपपत्तिर्वा । यदि प्रत्यवयव-

मविभागेनावयवी वर्तते तदैकावयवदर्शनेऽप्यवयव्युपलभ्येत, जातिरिव प्रत्याधारम्। अथ विभज्य, अवयवातिरिक्तांश-भेदेनानवस्थापातः। बलवत्प्रमाणोपनीतेऽर्थे संप्रतिपन्नवद्वृत्त्यनुपपत्तिर्विलीयत इति चेन्न; प्रमाणबलस्यात्र निरस्तत्वात्। आदिशब्देनोत्पत्तिनाशानुपपत्तिस्संगृह्यते। तथाहि—पृथुतरपटनिर्माणप्रक्रमे द्वितन्तुकादिपटपङ्क्तिरुत्पद्यते नवा? न चेत्, बुद्धिशब्दान्तरादिरवस्थाभेदादेवेति सिद्धं स्यात्। उत्पद्यते चेत् त्रितन्तुकाद्यारम्भदशायां पूर्वपूर्वं तिष्ठति न वा? पूर्वत्र तदनारम्भः, आरब्धकार्यैस्तदानीमवयव्यन्तरानारम्भात्। न च द्वितन्तुकादिस्तन्त्वन्तरसहितस्त्रितन्तुकाद्यारम्भक इति युक्तम्। इह तन्तुषु पट इत्यादिस्वाभिमतव्यवहारविरोधात्।

> पूर्वसिद्धपटैस्साधं तन्तुभिः पटसंभवे। पटपङ्क्तिस्समीक्ष्येत क्रमादाधिक्यशालिनी॥
>
> प्राक्सिद्धानां पटादीनामुत्तरोत्तरजन्मनि। अहेतुको विनाशश्च स्थिरपक्षे न युज्यते॥

न चेदुपलम्भविरुद्धनाशसन्ततिकल्पनाप्रसङ्गः। एवमेकद्वित्र्यादितन्त्वपकर्षणदशायामपि खण्डपरम्परोत्पत्तिनाश-परम्पराक्लृप्तिः क्लिष्टतरा। लाघवशालिनि सङ्घातमात्रपक्षे राशिन्यायान्नासौ दोषः। ननु गौरवभयादवयविपरिहारे सौगत-वत्स्वरूपविशेषमालम्ब्य तन्त्वादीनां संयोगोऽपि त्यज्यतामित्यत्राह—**न चेति**। अत्र हि परैरप्यसमवायिकारणतयाऽभिमता दृष्टा च संयुक्तावस्था स्वीकृतेति नास्माकमिह काचित्कल्पना। कुतस्तद्गौरवं संभवेदिति भावः। स्वलक्षणसमुदायवादिना-ऽपि नैरन्तर्यरूपोऽतिशयः कश्चिदिष्यते; अन्यथा दूरस्थवदेकताभ्रान्तिः पुञ्जबुद्धिर्वा न स्यात्। त्वमपि विभूनामणूनां च नित्यानामपि हेतुभेदैरवस्थान्तरापत्तिमङ्गीकरोषि; सर्वद्रव्यस्वरूपनित्यत्वं तदवस्थाभेदं च वदतामपि तथा किं न स्यात्? संयुक्तावस्थाऽपि हि परिणामः। कथं तर्हि नित्यानित्यविभागः? इत्थम्—द्रव्यतदवस्थयोस्तथाभावादेव, द्रव्यविवक्षायां त्ववस्थाविशिष्टवेषेणानित्यत्वव्यवहार इति। ननु तन्तव एव व्यतिषङ्गविशेषविशिष्टाः पट इति भवतां राद्धान्तः * पटव-च्चेति सूत्रे दर्शितः। तथा सति दीर्घैकतन्तुपरिवर्तनविशेषनिष्पादितेऽवयविनि कथं पटबुद्धिः स्यात्? अनेकतन्तुसङ्घाता-सिद्धेरित्यत्राह—**वस्त्र इति**। नहि वयं तन्तुगतमेकत्वं द्वित्वबहुत्वादिकं वा पटधीनिबन्धनं नियच्छामः; यथादृष्टि सर्व-संभवात्। त्वं तु स्वपक्षदोषमस्मत्पक्षस्थं मन्यसे। प्रदर्शितं हि पत्रे तादृङ्निष्पत्तावेकस्यावयवस्यानारम्भकत्वम्; अतस्तवैव तत्र पटधीबाधः। एकस्यारम्भकत्वेऽतिप्रसङ्गोऽपि तवैव। स्यादेतत्, अवयविनमनभ्युपगच्छतामन्ततः पर्वतादयोऽपि परमाणव एव संहताः स्युः। ते न प्रत्यक्षाः; अतः * सर्वाग्रहणमवयव्यसिद्धेरित्यक्षपादोक्तमनतिक्रमणीयं स्यात्, स्थूल-द्रव्याभावे चाणुसंहतौ स्थूलत्वाध्यासोऽपि न सिध्येदिति; तत्राह—**देशाधिक्यमिति**। अयंभावः—स्थूलधीरित्यवयविधीर्वा? परिणामविशेषधीर्वा? प्रत्यक्षयोग्यत्वधीर्वा? प्रत्येकदेशादधिकदेशत्वधीर्वा? नाद्यः, तदभावप्रसक्तेरिष्टप्रसङ्गात्। न द्वि-तीयः, संहतैरेवावयविवत्परिणामान्तरस्य सृष्ट्युपपत्तेः। अणुष्वेव कथं विरुद्धं स्थूलत्वं स्यादिति चेदेकत्वाद्याश्रयेष्वेव कथं द्वित्वादिकमिच्छसि? अपेक्षाबुद्धिसंगृहीतान्यानुबन्धसामर्थ्यादिति चेद्बुद्ध्यनपेक्षसंभेदसामर्थ्यादेव परिमाणान्तरमपि पश्यन्तु भवन्तः। न तृतीयः, एकैकस्याप्रत्यक्षत्वेऽपि समुदायवशाद्दृश्यत्वोपपत्तेः। यथैकैकस्य दवीयसः केशहिमादे-रदर्शनेऽपि संहतानां दृश्यत्वम्; एकैकस्याप्यासत्तौ दर्शनाद्योग्यत्वमस्तीति चेदणूनामपि त्रसरेणुमात्ररूपाणां सामग्रीसंभवे तथैव स्यात्। न चतुर्थः, माषादिराशिषु संहतिभेदैर्देशतारतम्यदृष्टेः। ननु तत्तत्परिमाणावयविद्रव्याभावे तत्प्रयुक्तदेश-न्यूनाधिकत्वं दुर्निरूपं स्यात्। मैवम्; न ह्यवयविनिरूपणेनैव देशाधिक्यादिनिरूपणम्, सुरभित्वगन्धत्वादेरिव संबन्धि-न्यूनाधिकभावेनापि तदुपपत्तेः। द्रव्येषु नैवमिति चेत् न, द्व्यणुकोत्पत्तेः पूर्वक्षणे संयुक्ताणुद्वयस्य प्रत्येकदेशादधिक-

देशत्वावश्यंभावात् । अन्यथा सर्वपरमाणूनां समानदेशत्वे प्रागुक्तदोषप्रसङ्गात् । द्व्यणुकान्तरपरिच्छिन्नमम्ब देश इति चेन्न; सहवृत्त्ययोगात्, अन्यथा परिच्छेदासिद्धेः । समवायिनस्संयोगिनो वा देशस्याभावे कथं तत्र देशाधिक्यमिति चेन्न; आकाशाद्यंशभेदेन तदुपपत्तेः । कथं निरवयवस्यांशभेद इति चेदात्मानं पृच्छ । कर्णशष्कुल्याद्युपाधिपरिच्छिन्नया नभसि नानाश्रोत्राणि कल्पयसि । भेर्यादिशब्देषु श्रूयमाणेषु तरङ्गवृत्त्या तत्तदनन्तरदेशेषु शब्दोत्पत्तिं साधयसि । वेणुरन्ध्रादिविशेषभागाश्च प्रसिद्धाः । आकाशादेरप्रत्यक्षत्वात्तद्देशतारतम्यं दुर्ग्रहमिति चेन्न; प्रत्यक्षाकाशवादिनं प्रति हेत्वसिद्धेः । त्वयाऽपि माषादवयविनो महीधरस्याधिकदेशत्वं गृह्यते । आलोकमण्डलांशभेदैस्तत्र देशाधिक्यमिति चेन्न; आलोकस्यापि नभसि न्यूनाधिकदेशवृत्तित्वदृष्टेः । परिमाणाधिक्यमात्रमेव पर्वतादिषु गृह्यत इति चेदगृह्यमाणमपि देशाधिक्यं तत्रास्ति न वा? अस्ति चेत्सङ्घातेऽपि कश्चोद्यावकाशः? न चेत्तत्तद्देशेषु चक्षुःप्रसरादिनिरोधकत्वं न स्यात् । अन्यथाऽल्पदेशवर्तिनः सर्वत्र निरोधकत्वप्रसङ्गात् । अतः परस्परानाक्रान्तदेशावष्टम्भेन संहन्यमानेषु त्रसरेणुषु सुग्रहमेव देशाधिक्यम्, देशस्त्वालोकाकाशादिर्यः कश्चिद्यथायोग्यमस्तु । अत एव प्रधानाभावादणुषु स्थौल्यारोपोऽपि न स्यादिति चोद्यमपि निस्तीर्णम् । तथाऽपि यदि संसृष्टास्तन्तव एव पटस्ततस्तन्तुराशिमात्रेऽपि पटधीः स्यादित्यत्राह— **संसर्गादेरिति** । न हि त्वयाऽपि तन्तुसंसर्गमात्रं पटस्यासमवायिकारणमिष्यते; तथा सति कुविन्दादिव्यापारनैरपेक्ष्यप्रसङ्गात् । अतो यादृशात्संसर्गविशेषादवयवी तवोत्पद्यते तादृशसंसर्गविशिष्टास्तन्तवः पट इति क्वातिप्रसङ्गः? आदिशब्देन संसर्गिद्रव्याणि देशकालौ च गृह्यन्ते । द्वितीयेन त्वादिशब्देन यूथपङ्क्तिमण्डलसेनाव्यूहपूर्णचतुरश्रादिसंग्रहः । परिषदाद्युपादानं दृष्टान्तार्थम् । मत्वर्थीयमपि शूरवती सेनेतिवत् प्रत्येकसमुदायभेदविवक्षया स्यादिति ।

भिन्नानामेव संश्लेषे संघातैक्यानुसारतः । संयुक्तौ द्वाविति प्रख्या राशिद्वित्वनयाद्भवेत् ॥
महत्त्वैकत्वयुक्तत्वप्रभृतेरपि राशिवत् । संयुक्तद्रव्यनिष्ठत्वान्न संयोगे प्रसञ्जनम् ॥
घनत्वश्यामतादीनां वनैकाधिकरण्यतः । न स्याद्वृक्षबहुत्वादेर्घनत्वाद्यैर्विशेषणम् ॥
तन्तवः सितरक्ताद्याः पटचित्रानुयायिनः । अवयव्यनपेक्षत्वं चूर्णसंहतिचित्रवत् ॥
रूपादीनामचित्रेऽपि वदन् वैषम्यदर्शनम् । अपह्नुवीत वैयात्यात्खपुष्पादेरदर्शनम् ॥
या चासौ धारणाकृष्ट्योरुपपत्तिरसूच्यत । तादृग्भूतावयव्यर्थे संघाते सा भविष्यति ॥
गाढावयवसंश्लेषरहितेऽवयविन्यपि । धारणाकर्षणे न स्तस्तथा चाभ्युपगच्छसि ॥
धारणाकर्षणे चात्र धृताकृष्टानुबन्धतः । दृढावयवसंश्लेषसहितेऽवयविन्यपि ॥
अंशान्तरेषु तेऽस्माकं सिद्धे जतुगृहीतवत् । तृणोपलादिजतुसंगृहीतं यदुदाहृतम् ॥
तत्राप्यवयवी नेष्टः कश्चिज्जतुतृणादिषु । पाशाद्यैरपि पश्वादेर्धारणाकर्षणे क्षमे ॥
किं तत्र पशुपाशादिष्ववयव्यभ्युपेयते । संग्रहप्रभवं चात्र धारणाद्यनुभाष्य तु ॥
पक्षिलस्तन्मतस्थो वा नोत्तरं सम्यगब्रवीत् । आरब्धकार्यैरारम्भो मिथस्सप्रतिघत्वतः ॥
न्यायवार्तिकटीकादौ क्षिप्तस्संमतिरत्र नः । प्रत्यक्षातीन्द्रियोपात्ते प्रत्यक्षत्वं च दुर्भणम् ॥
चाक्षुषाचाक्षुषद्रव्यसंयोगे चाक्षुषत्ववत् । मुधा चोदाहृतं कैश्चिद्विमवत्परमाणुकम् ॥
टीकाकारस्तु तत्राह सूक्ष्मद्रव्योपलक्षणम् । विशेषानुपलम्भेऽपि राश्येकत्वमतिर्यथा ॥
वृक्षादिष्वपि तद्वत्स्याद्यथादृष्टि व्यवस्थितेः । एकदेशे समस्ते च वृक्षलक्षणसंभवे ॥

वृक्षधीरुपपद्येत संग्रहाच्चापृथङ्मतिः । * सर्वाग्रहणमवयव्यसिद्धेरिति सूत्रयन् ॥
प्रत्यक्षव्यतिरिक्तान्तक्लृप्तिदौस्थ्यपराहतः । * सेनावनवदित्यादावप्रत्यक्षाणुसूत्रणम् ॥
त्रसरेण्ववधिस्थाणुस्थापकेषु न शोभते ॥ २१ ॥

द्रव्यैक्यं प्रत्यभिज्ञा प्रथयति परिमित्यन्तरेऽन्याप्रतीते-
रंशूत्कर्षक्षयादिक्षममपि च ततो राशिवत्स्थूलमेकम् ।
नो चेदश्रान्तचण्डानिलजलधिधुनीदन्तिदावानलाद्यैः
क्षोणीयं क्षुद्यमाना क्षणमपि चरमामण्ववस्थां न जह्यात् ॥ २२ ॥

एवं तन्तुपटादीनां भेदे बाधकं तत्साधकानामन्यथासिद्धत्वं चोक्तम् । तथाऽप्यभेदे किं प्रमाणमिति वदन्तं प्रति स्थिरत्वे प्रमाणमेवात्र प्रमाणमित्याह—**द्रव्यैक्यमिति** ॥ परिमित्यन्तरे, सत्यपीति शेषः । इदं च भेदसाधकानामुपलक्षणम्, यथा प्रसारितस्याकुञ्चितस्य दीर्घत्वह्रस्वत्वे, यथा च घनीकृतस्य विरलीकृतस्य च तूलपिण्डस्याल्पत्वविपुलत्वे दृश्येते, एवं वृत्तचतुरश्रत्वादिविशेषे दृष्टेऽपि स्यात् । कुतः? अन्याप्रतीतेः, द्रव्यान्तरस्यादर्शनादित्यर्थः । अन्यथा सर्वत्र यत्किंचिदवस्थाभेदमात्रेऽपि द्रव्यभेदो दृश्यत इति धृष्टवादे का प्रत्युक्तिः? पद्मसंकोचविकासादिषु च द्रव्यान्तराभावो **न्यायवार्तिकटीकाया**मुक्तः । किंचान्त्यावयवित्वं पटादीनामिष्यते । तैरनेकैरच्छिन्नावयवैरेकपटादिनिर्माणेऽवयव्यन्तरमुत्पद्यते नवा? पूर्वत्र तेषामन्त्यावयवित्वव्याघातः । उत्तरत्र तन्त्वादिभिरपि तथा स्यात्, अविशेषात् । अन्यस्तर्ह्यन्त्यावयवी भवत्विति चेन्न । सर्वत्रैवं कस्यचित्कार्यस्य सहकारिभेदैः संभवात् । सन्ति चास्मदाद्यशक्यस्रष्टारः केचित्, अन्तत ईश्वरश्च । किं च योऽसौ गोपुरादिरन्त्यावयवी तत्र यदि कश्चित्सुधाभिरवयवान्तरं संघटयेत् तदा तत्पूर्वं गोपुरं तिष्ठति नश्यति वा? पूर्वत्र कथमन्त्यः? उत्तरत्रानन्यथासिद्धोपलम्भविरोधः । नाशकारणाभावे नाशानुपपत्तिः । अपि च तूलपिण्डमध्यस्थमंशुं यदि कश्चित्सूच्याऽपकर्षेत्, तदा तस्य परिमाणह्रासो न दृश्यते; न च तस्य नाशः । अथापि तत्र ते नाशः कल्प्यः, असमवायिविनाशात् समवायिविगमाच्च । संघातवादे त्ववयवोत्कर्षापकर्षवादमात्रान्न किंचिद् द्रव्यमुत्पद्यते, नश्यति वा; केवलमाषादिराशिष्विवोपचयापचयमात्रमेव । अतो यथोपलम्भं संघातपक्ष एव साधीयानित्याह—**अंशूत्कर्षेति** । आदिशब्देनांशविदारणसन्धाने गृह्येते । यदि क्वाचित्कावयवभेदमात्रात्पूर्वद्रव्यनिवृत्तिरवयव्यन्तरोत्पत्तिः स्यात्, तत्रानिष्टमाह—**नो चेदिति** । अव्यवस्थितेषु प्रदेशभेदेषु तैस्तैर्भेदकैरणुद्वयविघटने द्व्यणुकविनाशादिक्रमेण महापृथिवीपर्यन्तनाशे सति अवस्थितसंयोगैरपि पुनस्तदारम्भावसरो न सेत्स्यति । तदेतत्समुद्रादिषु कैमुत्यसिद्धम् । यदप्येवं कल्प्यते—द्वाभ्यामेवाणुभ्यामाद्यं कार्यद्रव्यमारभ्यते, एकस्यानारम्भकत्वादसमवायिविरहात् । संयोगो हि न स्वेन; स्वस्य बहुभिरारब्धत्वे महत्त्वप्रसङ्गेन प्रत्यक्षत्वापातात् । बह्वारब्धस्याप्यणुत्वेऽतिप्रसङ्गः; तत्परिमाणं चावयवसंख्याविशेषेणावयवमहत्त्वप्रचययोरसंभवात्, नित्यपरिमाणस्यानारम्भकत्वात्, स्वातिशयपरिमाणारम्भकत्वनियमेनाणुतरपरिमाणारम्भकत्वप्रसङ्गाच्च । सा च द्वित्वसंख्या सर्वज्ञापेक्षाबुद्धिजन्या तद्विनाशकाभावेऽपि कार्यत्वादनित्या । एवं त्रिभिरेव द्व्यणुकैस्त्रसरेण्वारम्भः, तावतैव महत्त्वलाभात्; द्वाभ्यामारम्भे त्ववयवप्रचयमहत्त्वरूपकारणान्तराभावेन महत्त्वानुत्पत्तावदृश्यत्वप्रसङ्गात् । स च त्रसरेणुः अप्रत्यक्षावयवकतद्रूपोऽपि स्वयं प्रत्यक्षः प्रत्यक्षरूपश्च । यद्वा अन्यरूपारोपेणालोच्यते; यथाऽऽहोदयनः—* दृश्यमेव ह्यालोकरूपमारोप्य पिञ्जरस्त्रसरेणुश्चालोच्यत इति । उत्तरावयविनां त्वनियतसंख्यैरारम्भः । भावरूपस्य सर्वस्य समवाय्य-

समवायिनिमित्तसापेक्षत्वेऽपि प्रध्वंसस्तु निमित्तमात्रजन्य इत्यादि । एतादृशं कल्पनाजातं न विद्यावृद्धा बहुमन्यन्ते । तथा च सूत्रम्—* अपरिग्रहाच्चात्यन्तमनपेक्षेति ॥ २२ ॥ इत्यवयविवादभङ्गः ॥

संघातोऽनेकभूतैरपि भवति यथा ह्येकभूतस्य भागै-
र्देहादिः पञ्चभूतात्मक इति निगमाद्युक्तिभिश्च प्रसिद्धम् ।
न त्वेवं संकरः स्याद्व्यवहृतिनियमस्सूत्रितस्तारतम्या-
देहादौ येन भूतान्तरयुजि भवतो भौमतादिव्यवस्था ॥ २३ ॥

या चान्या कल्पना शरीरादिषु पृथिव्याद्यनेकभूतसद्भावेऽप्येकमेव भूतमुपादानमन्यत्संसर्गिमात्रमिति, तामपि निरस्यति—**संघात इति** ॥ अवयविसद्भावे ह्येकप्रकृतित्वं नियन्तव्यं न वा त्वया? संघातवादे तु यथादर्शनं सर्वमुपादानम् । न च विजातीयानां संहतिर्नास्ति दृष्टविरोधात् युष्मत्सिद्धान्तविरोधाच्च । अन्यथा कथं तैजसत्वाभिमते काञ्चनादौ गुरुत्वादिक्लृप्तिः? किंच *त्रिवृत्करणं नामरूपव्याकरणार्थं चतुर्विधाहारमयं शरीरमिति च **गर्भोपनिषत्** । *पञ्चभूतात्मकं वपुरित्यादि च स्मर्यते । तदिदमाह—**देहादिरिति** । यथा विजातीयवृक्षपोतव्यतिषक्तोपचये वृक्षैकत्वधीः, एवमेकस्मिन्ननेकभूतारब्धे विरुद्धजातिसमावेशगन्धोऽपि न स्यादित्याह—**न त्विति** । एवंशब्द उक्तहेतुपरो वा; अपूर्वद्रव्यानुत्पादादित्यर्थः । तदुत्पादेऽपि न जातिसङ्कर इत्याशयः । नरसिंहादिन्यायेनोभयविलक्षणावयव्युत्पत्तिसंभवात् । कल्प्यते च युष्माभिश्चित्रं रूपान्तरम् । एतेन तज्जातीयोपात्तं कथमतज्जातीयमित्यपि प्रत्युक्तम्, तन्त्वादिजातीयैरतन्त्वादिजातीयोत्पत्त्यभ्युपगमाच्च । भवतु वा पृथिवीत्वतोयत्वादीनामेकत्र समावेशः, तथाऽपि का हानिः? परस्परपरिहार्युपाधिद्वयसमावेशन्यायेन दर्शनादर्शनाभ्यामेव सर्वातिप्रसङ्गशान्तेः । ननु पाञ्चभौतिकेषु कथमेकभूतशब्दस्तत्तदर्थक्रियानियमश्च? वर्णितो हि भवद्भिरेव भूतान्तरोपष्टब्धेष्वपि देहादिषु पार्थिवाप्यादिविभागः । कथं च मन्त्रार्थवादेषु * पृथिवी शरीरमित्यादिविशेषव्यपदेश इत्यत्राह—**व्यवहृतीति** । सूत्रितो ह्यसौ * वैशेष्यात्तु तद्वादस्तद्वाद इति * त्र्यात्मकत्वात्तु भूयस्त्वादिति च । अत्र प्रतिबन्दीं प्रथयति—**देहादाविति** । येनेति तारतम्यपरामर्शः । तवाप्यनारब्धावयविकेषु विजातीयराशिषु भूयसा व्यवहारो लोकसिद्धस्संमन्तव्यः । विजातीयदारुशिलाद्यारब्धेषु च खट्वागोपुरादिषु किंचिज्जातीयत्वनियमः, तत्रावयव्यनारम्भे सर्वत्रैवमस्मन्मतसिद्धिः ।

विभागादविभागाच्च भूतभौतिकभेदधीः । सत्येव यदि वा द्रव्ये सिद्धसाध्यदशाद्वयात् ॥
एकत्वं च बहुत्वं च मृत्पिण्डकरकादिवत् । समष्टिव्यष्टिनीत्यैव त्रिगुणे वदति श्रुतिः ॥
ईदृक्सत्कार्यवादश्च वैदिकैः परिगृह्यते । द्रव्यस्य पूर्वसिद्धस्य साध्यावस्थाविशेषतः ॥

ननु यदि पूर्वं नित्यं सत् द्रव्यं, तत्कथं सांख्यमतमुज्झतः कार्यं स्यात्? या त्वागन्तुकव्यवस्था सा न प्राक्सती । अतः कथं सत्कार्यवादं ब्रूथ? इत्थम्—प्राक्सदेव द्रव्यमवस्थान्तरविशिष्टवेषेण कार्यम्; तथैव लोकवेदव्यवहारस्थितिरिति ॥ २३ ॥ इति **देहादेः पाञ्चभौतिकत्वम्** ॥

सन्ति प्रागप्यवस्थास्सदितरकरणाप्राप्तनिष्पत्त्यदृष्टेः
शक्ताशक्तप्रभेदादिभिरपि यदि न स्योचितात्कार्यदृष्टेः ।

तस्मिन्सत्येव तस्माज्जनिरपि नियता तन्निमित्तादिनीते-
र्व्यक्तिर्व्यक्ताऽनवस्थां भजति न च कृतामात्थ नैवं कृतौ नः ॥ २४ ॥

ईदृशसत्कार्यवादमसहमानस्य **सांख्यस्य** नित्यैकान्तवादनियतान् प्रयोगानन्वाह—**सन्तीति** ॥ द्रव्यपक्षीकारेऽस्मान् प्रति सिद्धसाध्यता; अतोऽवस्थेत्युक्तम् । यदाहुस्**सांख्याः**—

* असदकरणादुपादानग्रहणात्सर्वसंभवाभावात् । शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यम् ॥ इति ॥

तत्रायं सदितरकरणादृष्टेरित्येको हेतुः । अप्राप्तनिष्पत्त्यदृष्टेरिति द्वितीयः । सदितरशब्देन प्रागसत्त्वमिह विवक्षितम्, न ह्यसत्खपुष्पादि क्रियेत; मा भून्नित्यासतः करणम् । अत्र प्रागसत्त्वमात्रमिति चेन्न; तद्वदेव कदाचिदसतस्सर्वदैवासत्त्वापातात् । न चासतः कदाचित्सत्त्वापत्तिः; विरोधात् । न हि चिच्छक्तेः कदाचिदपि जडत्वम्, जडस्य वा चित्त्वम् । एवं यद्यतोऽन्यत् न तत्सर्वं कदाचिदपि तत्स्यात्; प्रमाणादेरपि कदाचिदप्रमाणत्वप्रसङ्गात् । न चातीतादेर्वर्तमानतादिरीश्वरेणापि सुनिष्पादः । असत्त्वं सत्त्वं च वस्तुनोऽवस्थेति चेत्, वस्तुनस्तद्वन्नादितैव । नच सन्निवासन्घटः प्रागुपलभ्यते; अस्माकं त्वव्यक्तावस्थयाऽनुपलब्धिरप्युक्ता । न ह्यसन् घटादिर्न घटादिरिति तु कस्यचिद्वचनं बालप्रतारणम्, अभावप्रतियोगिवचने विवक्षितविरुद्धोक्तेः, अभावमात्रविवक्षायां विरोधादिति । उपादानग्रहणादित्यनेन विवक्षितं हेतुं व्यतिरेकेण व्यनक्ति—**अप्राप्तनिष्पत्त्यदृष्टेरिति** । न हि घटादिकार्यमप्राप्तैरन्यत्र दण्डचक्रादिभिस्तस्योत्पत्तिः, तन्त्वादिभिर्वा पटादेः । अतोऽवगम्यते स्वकार्यं प्राप्तैरेव निमित्तैरुपादानैश्च स्वसाध्यसाधनमिति । प्राप्तिश्च द्विनिष्ठेति साध्यस्यापि साधनवत्पूर्वभावित्वात्, सदेव साध्यमिति । शक्तस्य शक्यकरणादित्युक्तहेत्वभिप्रायेण शक्ताशक्तप्रभेदवचनम् । असतोऽप्यप्राप्तस्यापि सृष्टिः, हेतुशक्तिनियमात्स्यादित्यस्योत्तरमेतत् । अयं भावः—यदि कारणेष्वसत्तदप्राप्तं च कार्यमुत्पद्येत, तदा तिलेभ्य एव तैलं किमुत्पद्यते, न सिकतादिभ्यः? शक्ताशक्तभेदादिति चेत्, सिद्धं नस्समीहितम् । तिलानां तैलोत्पादनशक्तिर्हि तद्गर्भत्वमेव, अन्यादर्शनात्; तदशक्तिश्च सिकतानां तदभावः । तथा सति तद्गतस्तन्निष्पत्तेः प्रागपि तत्सिद्धिरनिवार्येति । आदिशब्देन कारणभावात्, सर्वसंभवाभावादिति हेतुद्वयग्रहणम् । कारणभावात्—कार्यस्य कारणात्मकत्वादित्यर्थः । प्रागेव सति कारणे कथं तदा तदभिन्नं कार्यमसद्भवेत्? नन्वस्तु प्रागसदेव कार्यं मा च भूवन् हेतुप्राप्तितद्वृत्तितदैक्यानि, तथाऽपि कस्यचिदेव किंचित्कार्यमित्यत्र सर्वसंभवाभावादिति प्रसङ्गतद्विपर्ययाभ्यां प्रत्युक्तिः । तथा हि—यदि प्रागसत् हेतुभिरप्राप्तं हेतुवृत्तितादात्म्यरहितं च तत उत्पद्यते, सर्वस्मात्सर्वसंभवः स्यात्, नचासावस्तीति । पञ्चानामप्याभासत्वाभिप्रायेण प्रतिवक्ति—**नेति** । तत्र प्रथमस्य प्रतिक्षेपे हेतुः—**कार्यदृष्टेरिति** । शेषाणां तु स एव स्वोचितादिति विशेषितः । न तावत्कार्यमिति किमपि न दृष्टम्, सर्वलोकवेदविरोधात्; व्यक्तिसाधनस्यापि निराश्रयत्वप्रसङ्गाच्च । न च दृष्टमपि न सत्यं, **माध्यमिकादि**मतानां निराकरिष्यमाणत्वात् । न च सत्यमपि न कारणाद्व्यतिरेकेण गृह्यते; उक्तोत्तरत्वात्, प्रकृतिविकृतीत्यादिविभागभङ्गप्रसङ्गाच्च । अतः कारणाद्भिन्नत्वेन दृष्टं कार्यं तेनाकारेण पूर्वं नासीदिति त्वयैवाकामेनापि स्वीकर्तव्यम् । न हि घटाकारेण निष्पन्नस्य पुनरपि दण्डादिव्यापारनिष्पाद्यत्वमस्ति । किंच कार्यव्यङ्ग्यशब्दौ च व्यवस्थितविषयौ लोके दृष्टौ । कारकव्यञ्जकभेदश्च । कारकं समग्रमप्येकमुत्पादयति । व्यञ्जकं तु सहकारिसंपन्नं समानेन्द्रियग्राह्याणि समानदेशस्थानि तादृशानि सर्वाण्यपि व्यनक्ति । तदत्र घटादिव्यक्तिसामग्र्यैव तद्वन्मृत्पिण्डगतानां करकादीनामपि व्यक्तिः स्यात् । व्यञ्जकत्वे सिद्धे ह्यवान्तरव्यङ्ग्यभेदप्रतिनियतव्यञ्जकभेदव्यवस्था-

क्लृप्तिः । न चेह तथा ; आगन्तुकाभावे च पुरुषवत्प्रकृतिरपि ते निर्व्यापारैव स्यात् । तथा च गतं सृष्टिप्रलयादिवादैः सिद्धान्तसृष्ट्यादिभिश्च । किंच सत्कार्यमिति कार्यस्य सत्त्वमात्रे साध्ये सिद्धसाध्यता ; कारकव्यापारात्प्रागपि सदिति साध्ये कार्यस्य कारकव्यापारस्य प्रागसत्त्वमङ्गीकृतं स्यात् । असदकरणात्, शक्तस्य शक्यकरणादिति हेत्वोश्च करणशब्देना-पूर्वोत्पादने विवक्षिते स्ववचनव्याघातः । व्यक्तिविवक्षायां तु व्यज्यमानत्वात्प्रागपि सदिति स्यात् ; तदा अन्यतरासिद्धो हेतुः । ननु सतोऽभिव्यक्तौ घटतैलतण्डुलादिनिदर्शनमस्ति, असत उत्पत्तौ न किंचिदिति चेत्, किमतः ? न हि निदर्शनमेव प्रमाणं, हेतुनैष्फल्यप्रसङ्गात् । न च निदर्शनाभावो बाधकः, सर्वत्र प्रतिनियतस्वभावलोपप्रसङ्गात् । अपि च असदकरणादित्यत्र कार्यस्य प्राक्सत्त्वे क्रियमाणत्वादित्येव हेतुः स्यात्, तथा च प्रतिज्ञाहेतुविरोधः । विपक्षात् ख-पुष्पादेः सपक्षाच्च सर्वस्मात् व्यावृत्तत्वेन हेतोरसाधारणत्वप्रसङ्गश्च । भावत्वेन तु प्राक्सत्त्वं साधयाम इति चेत्, तथाऽपि प्रत्यक्षविरोधः । अन्यथा नित्यासतोऽपि कुतश्चिन्नित्यसत्त्वसाधने निवारकाभावात् । असतः सत्त्वापादनमशक्यमित्युक्त-मिति चेन्न ; अत्यन्तासत्त्वे विवक्षिते कार्येषु तदभावात् ; प्रागसत्त्वे तु सृष्ट्यनुगुणस्यैव तद्विरुद्धत्वोपन्यासात् ।

प्रागसत्तुच्छमेव स्यात् सच्च नित्यं सदित्यसत् । अयथादृष्टि निर्णेतुरशेषाभीष्टविप्लवात् ॥

अन्योऽपि घटवान्कालः कालत्वादिति वादिनः । पक्षदृष्टान्तबाधादिप्रसङ्गः प्रणिधीयताम् ॥

यच्च कारकाणां कार्यं प्राप्तानामेव तदुत्पादकत्वमिति ; व्याहतमेतत् । किंच किं दृष्टत्वादेवमङ्गीक्रियते ? अन्यथानुप-पत्तिः? नाद्यः ; अनन्यथासिद्धनियतपूर्वभावित्वादतिरिक्तायाः कार्यप्राप्तेः कारणानां मिथः प्राप्तिवत् त्वयाऽप्यदृष्ट-त्वात् । तदिहानङ्गाङ्गीकारो युक्ताङ्गहानिश्च, प्रागसत्त्वस्य युक्तस्योपेक्षणात् । अविषयवृत्तित्वं वा, कारकाणां संबन्धस्य विरुद्धस्थले संचरणात् । समश्च प्राप्तावप्यतिप्रसङ्गः । न हि प्राप्तयोरपि रज्जुघटयोर्जन्यजनकता । तत्र नित्यप्राप्ति-र्नास्तीति विशेष इति चेत्, निमित्तानामपि घटादिभिर्नित्यप्राप्त्यसंभवात् । उपादाने तु स्यादिति चेन्न ; निमित्तवदेव नित्यप्राप्तिनैरपेक्ष्यात् । त्वत्पक्षेण च यद्येन नित्यप्राप्तं न तत्तस्योपादेयम्; यथा पटस्य तन्तुः, तथा च पटः, तस्मान्न तन्तूपादेय इति प्रसङ्गात् । प्रकृतिपुरुषयोर्नित्यप्राप्तयोर्नोपादानोपादेयभावः । अतो यद्येन नित्यप्राप्तं न तत्तस्योपादेयं यथा प्रकृतिपुरुषयोरन्योन्यमिति, पटादिकमपि येन नित्यप्राप्तं कथं तस्योपादेयं स्यात् ; तयोरन्योन्यप्राप्तिर्नास्तीति चेन्न ; *पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्ग इति स्वसमयविरोधात् । अजसंयोगपक्षे विभूनामपि नित्यप्राप्तेः । *व्याप्तिरूपेण संबन्धस्तस्याश्च पुरुषस्य च । दारुण्यग्निर्यथा—इत्यागमविरोधाच्च । *जहात्येनां भुक्तभोगामिति श्रुत्या मुक्तस्य प्रकृतिप्राप्तिर्निवर्त्स्यतीति चेन्न ; तदाऽपि परस्परधर्माध्यासाधिकारभूतदर्शनमात्रनिवृत्तेः त्वदिष्टत्वात् ; यद् ब्रूथ—* या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्येति । अतः कार्यप्राप्तिः कारणानङ्गम् । उक्तं **चाक्षपादेन** *घटादिनिष्पत्तिदर्शनात्-पीडने च व्यभिचारादप्रतिषेध इति । अत्र कार्यमप्राप्तैः इत्युपस्कार्यम् । एतेन—

*असत्त्वान्नास्ति संबन्धः कार[कै]णैः सत्त्वसङ्गिभिः । असंबद्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः ॥

इति साङ्ख्यवृद्धगाथाऽपि प्रत्युक्ता । इह तु स्वोचितात्कारकचक्रात् तत्संबन्धतश्च कार्यदृष्टेरित्यव्यवस्थामूलघातः । एतेन विमतं पूर्वापरकालयोरपि सत् प्रमेयत्वात् सत्त्वाद्वा, आत्मवत् ; विगीतः काल एतद्घटादिमान्, कालत्वात्, एतत्काल-वदित्यादिर्निरस्तः ; सर्वलोकप्रत्यक्षादिबाधात् ।

कारकव्यञ्जकानां च व्यवहारव्यवस्थितिः । किंनिमित्तेति वक्तव्यं सर्वनित्यत्ववादिना ॥

न हि व्यक्तौ विशेषोऽस्ति न चावरणवारणम् । तयोरपि भवत्पक्षे नित्यत्वात्साध्यता कथम् ॥
आवारकं च नित्यं चेन्नित्यमावरणं भवेत् । अन्यथा त्वपसिद्धान्तस्तत्तिरोधिश्च दुर्वचः ॥
तिरोधिं तन्निवृत्तिं च नानित्यौ तस्य मन्यसे । मिथश्चाभिभवाद्युक्तिर्गुणेष्वेवमनर्थिका ॥
समानदेशकालत्वमभावप्रतियोगिनोः । सहन्ते क्वाप्यगत्यैव न तथाऽत्रान्यथा गतेः ॥
अपि चाशेषनित्यत्वे पौर्वापर्यं न कुत्र चित् । व्यक्तिभोगापवर्गादिसाध्यतोक्तिरतो मुधा ॥
स्वप्रवृत्त्यादिनैष्फल्यं शास्त्रादेरप्यनुत्थितिः । **सांख्यचार्वाकयो**स्स्यातां साध्यसाधनबाधनात् ॥
अयोग्यत्वं तिरोधानं योग्यत्त्वं व्यक्तिरित्यपि । तन्नित्यानित्यताभ्यां ते विवक्षितविघातकृत् ॥
इन्द्रियप्रतिघातेन भागैर्भागान्तरावृतिः । यथाऽन्यत्र तथा नात्र कादाचित्कदशात्यजः ॥
असंभवनिरस्तं च ग्रसनोद्गसनादिकम् । मृत्पिण्डादिषु दुस्साधं शास्त्रमप्यनिदम्परम् ॥
अप्राप्तावव्यवस्थोक्ता प्राप्तावपि तवापतेत् । व्यक्तिवादोऽत एवेत्यप्ययुक्तं तन्निरासतः ॥
सत्त्वादिगुणभूयिष्ठभागभेदाव्यवस्थितेः । त्रिगुणद्रव्यसंबन्धः प्रवाहानादिरात्मनाम् ॥
सार्वज्ञ्यप्रागभावात्मा तिरोधिरपि कर्मिणाम् । संविद्विकाससङ्कोचप्रवाहान्नातिरिच्यते ॥
तत्तत्कर्मप्रवाहेण तयोरेवं व्यवस्थितेः । न हि स्वरूपतोऽनादेर्हेतुरस्माभिरिष्यते ॥

यत्तु कारकशक्तिर्नाम तद्गतं सूक्ष्मं कार्यमिति कल्प्यते तत्प्रतिबन्द्या प्रतिरुणद्धि–**तस्मिन्निति** । तस्मादित्यत्रापि स्वोचितादिति विशेषणीयम्, यथा सर्वेषु द्रव्येषु तिला एव तैलगर्भाः स्वकारणशक्त्या सृज्यन्ते, तथा तत्तत्कार्य-नियतपूर्वभावितया तत्तदुत्पादकस्वभावास्ते ते भावास्तथैवेति स्वीकार्यम्; अन्यथा दृष्टहानमदृष्टकल्पनं च । प्रतिबन्द्य-न्तराणि स्वव्याघातं चाभिप्रेत्याह–**तन्निमित्तेति** । निमित्तादीनां कार्योत्पादनशक्तिरस्ति वा न वा? न चेत्कथं तन्नि-मित्तत्वम्? अन्येषां वा कथमतन्निमित्तत्त्वम्? । अस्ति चेत्सा किं कार्यस्य सूक्ष्मावस्था? अन्या वा? न पूर्वः; अप-सिद्धान्तात् । उपादाने हि तत्सत्त्वमङ्गीकरोषि, अन्यथा प्रकृतेरिवात्मनोऽपि प्रपञ्चगर्भत्वेन प्रकृतित्वप्रसङ्गात् । आत्मा खल्वयस्कान्तवन्निर्व्यापारोऽपि सन्निधिमात्रेण निमित्तमिष्यते, तथा सति निमित्तोपादानवैषम्यविलयाच्च । नाशकेषु च नाश्यवृत्तिरस्ति वा न वा? अस्ति चेद्वह्नौ तूलवद्विरोधः । न चेत्कथं तदेव तस्य नाशकम्? न ह्यतद्वृत्तिस्तेन नाश्यते, शुक्तावविद्यमानस्य रूप्यस्य तया नाशप्रसङ्गात्, सर्वत्र वाऽतिप्रसङ्गात् । दूषणेषु च दूष्यं वर्तते न वा? पूर्वत्र दूषण-त्वादेरिव तद्वृत्तेस्तेन दूषणायोगः । उत्तरत्र तद्वृत्तिरहितस्य घटादेरिव तद्दूष्यत्वं न स्यात् । अथैतेषु यथादर्शनं व्यवस्थे-प्यते । प्रकृतेऽपि तथा स्यात् । एवं निमित्तादिप्रतिबन्द्यैव कार्यस्य कारणभावः सर्वत्र सर्वसंभवप्रसङ्गश्च निरस्तः । यानि च सांख्यानामवस्थातद्वतोरभेदसाधकानि, तेषु यदेतत् पटस्तन्तुभ्यो न भिद्यते तद्धर्मत्वादिति; अत्र तावत्प्रति-ज्ञाहेतुविरोधः स्पष्टः । दृष्टान्ताभावेन व्याप्तिश्च नास्ति । यद्यतो भिद्यते न तत्तस्य धर्म इति व्यतिरेकव्याप्तिरस्तीति चेन्न; सपक्षेभ्यस्तन्तुभ्योऽपि व्यावृत्तत्वेन केवलव्यतिरेकित्वायोगात् । यदपि तदुपादेयत्वात्तदभिन्न इति, एतदपि पूर्ववदेव । तदुपादेयत्वं च तज्जन्यत्वमात्रं वा, तद्विकारत्वं वा, तत्संबन्धित्वं वा, तद्धर्मत्वं वा, तदभिन्नत्वं वा, अन्यद्वा यत्किंचिदिति । नाद्यः; निमित्तैरप्यभेदप्रसङ्गात् । न द्वितीयः, तद्धर्मत्वहेतूक्तदोषादेव । उभयत्र पटावस्था तन्त्वात्मा न भवति तन्तुभ्यो भिन्नत्त्वात् घटवदिति प्रतिप्रयोगस्य शक्यत्वाच्च । इष्टो हि त्वयाऽपि तत्र भेदोऽपि । न

तृतीयः, कारणेषु परस्परसंबन्धिषु व्यभिचारात्, त्वत्पक्षेणासिद्धेश्च । न हि धर्मधर्मिणोस्तादात्म्यवादिनः तत्संबन्धित्वसंभवः, समवायस्यानभ्युपगमात् अन्यतरस्याद्रव्यत्वे तु संयोगायोगाच्च । न चतुर्थः, प्रागेव दूषितत्वात् । न पञ्चमः, तस्यैव साध्यत्वात् । न षष्ठः, अभेदव्याप्यस्य कस्यचिदन्यस्य त्वयाऽप्यदर्शनात् इति । यच्चैतत्पटस्तन्त्वात्मकः तत्संयोगतदप्राप्तिरहितत्वात्, तादात्म्याभावे हि कुण्डबदरयोरिव संयोगो वा स्यात्, हिमवद्विन्ध्ययोरिवाप्राप्तिर्वा; तदुभयमिह निवर्तमानं तादात्म्यविरहमपि निवर्तयति इति । तदपि मन्दम्; तादात्म्यविरहेऽप्यन्यतरस्याद्रव्यत्वात् संयोगाभावः; तद्धर्मस्वभावत्वादेवाप्राप्तिपरिहार इत्यन्यथासिद्धस्यासाधकत्वात् । अन्यथा तादात्म्यभाव इव भेदसद्भावेऽपि घटपटयोरिव धर्मधर्मिभावो न स्यादिति प्रसज्येत । गुरुत्वान्तरकार्यादर्शनं तु द्रव्यान्तरोत्पत्तिं प्रतिरुन्ध्यात्; न त्ववस्थातद्वतोरभेदं विदधीत । ननु जनिरपि व्यक्तिरेव, * जनी प्रादुर्भावे इति धात्वर्थपाठात् । न; जनिव्यक्तिशब्दयोरर्थभेदेनैव निरूढेः । प्रादुर्भावपाठोऽप्युत्पत्तिपरस्स्यात् निर्वर्त्यप्राप्यभेदसिद्धेश्च । जन्यं हि निर्वर्त्यम्, व्यङ्ग्यं तु प्राप्यम् । अभूततद्भावादिषु प्रागसतस्सत्त्वमनुस्मृतमेव । भवतु वा जनिशब्दो व्यक्तिपरः ।

न व्यक्तिरुपलब्धिस्ते दृष्टादृष्टदशान्वयात् । अथोपलब्धियोग्यत्वं न तदव्यापकत्वतः ॥
सत्स्वलक्षणपूर्तिश्चेदभिव्यक्तिस्तदप्यसत् । साऽपि वः प्राक्तनी नो चेन्न सिध्येद्धेतुरप्यसन् ॥

किं च व्यक्तिरपि नित्या कार्या वा? पूर्वत्र कारकाणामिव व्यञ्जकानामपि नैष्फल्यम् । उत्तरत्रार्धजरतीयः सत्कार्यवादः । व्यक्तेरपि व्यक्त्यर्थं कारकापेक्षेति चेत् तत्रानवस्थाप्रसङ्गमाह—**व्यक्तिरिति** । व्यक्तेः कार्यत्वपक्षे अपसिद्धान्तमसदकरणादित्यादिहेतुविरोधं चाभिप्रेत्याह—**न चेति** । ननु कार्यस्य कृतिस्तावन्न कार्यस्वरूपमेव; कार्यं क्रियते घटः क्रियत इति सामान्यतो विशेषतश्च सहप्रयोगात् । अतिरिक्ता च सा। तथा सति कार्यव्यक्तौ कः प्रद्वेषः? कृतिरपि कृता वा व्यक्ता वा? पूर्वत्रानवस्था; उत्तरत्र कारकनैष्फल्यापसिद्धान्तौ । व्यक्तिरपि कृता व्यक्ता वेत्युभयथाऽप्यनवस्था । तत्राह—**नैवमिति** । कृतिर्हि कारकाणां व्यापारः, स चागन्तुस्वकारणव्यापारेण जन्यते । सोऽपि तथेति सिद्धाऽनवस्थैषा । सा च सर्वसंमता न दोषः । त्वयाऽप्यभिव्यञ्जकव्यापारो व्यञ्जकान्तरव्यापारव्यङ्ग्य इति वाच्यम् । ननु व्यक्तिर्न व्यज्यते न क्रियते च, अव्यक्तैव नित्यं स्वयं व्यक्तैव वा कार्याणां व्यक्तिः स्यात् । न स्यात्, तदर्थकारकव्यापारवैयर्थ्यप्रसङ्गात्, कार्याणां नित्यव्यक्तिप्रसङ्गाच्च । ननूत्पत्तिर्नाम सत्तासमवायो वा, स्वकारकसमवायो वा? स च नित्यः न तदर्थश्च कारकव्यापारः कृतिरिति समा नश्चर्चा । न; समवायस्यास्माभिरनभ्युपगमात् । तदेतदसच्छब्दान्वादेशेन सूचितम् । का तर्ह्युत्पत्तिः? कृतिरेव । अन्यधर्मः कथमन्यस्योत्पत्तिरिति चेत्तादर्थ्येन तद्धर्मतोपचारात् । यदा हि तन्त्वादयो व्याप्रियन्ते तदा पट उत्पद्यत इति व्यवहरन्ति, आद्यक्षणावच्छिन्नपटत्वावस्थैव वा पटोत्पत्तिरुच्यते । * सैव तदवस्थस्योत्पत्तिरिति **भाष्य**मपि तदभिप्रायमेव स्यात् । अत एव हि सहप्रयोगोपपत्तिः । न चेदृश्या उत्पत्तेरीदृशमुत्पत्त्यन्तरमस्ति । तथाऽपि प्रागसिद्धस्वरूपलाभादुत्पत्तिशब्द उपचाराद्भवतु वा मा वा । तदा कार्योत्पत्त्यर्थः कारकव्यापार इति सिध्यति । स एव यदोत्पत्तिर्विवक्षिता, तदा कार्यार्थः कारकव्यापार इत्येव वक्तव्यम्, अन्यथा तूपचारः ।

क्रियैव कारकाणां स्यात् प्रतिसंबन्धिनीत्यसत् । प्राक्सत्त्वासत्त्वसंक्षोभस्तस्यामपि हि दुस्तरः ॥
क्रियावद्भिः पटादेश्च कारकैस्तादृशोऽन्वयः । प्रधाने भागनिष्पत्त्या भागैरैक्याच्च भागिनः ॥
प्राक्सत्त्वं सर्वभावानां मिथश्चैक्यमिति त्वसत् । भिन्नांशपूर्वसत्त्वे हि नाभिन्नाद्भेदसंभवः ॥

भिन्नाभिन्नाद्यदि व्यक्तिर्भेदानां प्राक्तनी भवेत् । एकस्य प्रागसन् भेदो यदि स्यादस्मदिष्टवत् ॥
प्राक्सतोऽस्याप्यवस्था चेत्तथाऽप्यसदभीष्टवत् ॥ २४ ॥ इति **सांख्यसत्कार्यवादभङ्गः** ॥

वस्तुस्थैर्यं विरुद्धानुपहितविषया साधयेत् प्रत्यभिज्ञा
नैकस्मिञ् शक्त्यशक्ती कृतितदितरयोः सा ह्यभेदेन सिद्धेः ।
एकस्मिन् कालभेदाद्भवति च सहकार्यन्वयानन्वयादि-
र्नोचेन्नो देशभेदादपि सुपरिहरस्तेन नैकं क्वचित्स्यात् ॥ २५ ॥

अर्धवैनाशिकनिरासाय सत्कार्यवादे साधिते तुल्यन्यायतया सर्वनित्यत्ववादेन समुत्थितः **सांख्यो** निरस्तः । अथ पक्षत्रयप्रतिपक्षं **वैनाशिक**मतं निरस्यति—**वस्तुस्थैर्यमिति** ॥ वस्तुशब्देन सत्त्वानुमानसूचनम् । यथाऽऽहुः—* यत्सत् तत्क्षणिकं यथा जलधरः सन्तश्च भावा इति । यदक्षणिकं तदवस्तु यथा खसूनम् । अक्षणिकत्वे चामीषां तद्वदसत्त्वप्रसङ्ग इति भावः । **विरुद्धानुपहितविषयेति**—विरुद्धधर्मासंसृष्टविषयेत्यर्थः । दीपस्रोतःप्रभृतिषु अनन्यथासिद्धभेदकबलात् बाधः । विप्रतिपन्नैकत्वधीः प्रमा विरुद्धधर्मासंसृष्टविषयत्वात् संमतैकत्वधीवत् । न हि स्वलक्षणानां प्रत्येकमेकत्वं नास्ति; तथा सत्येकानेकसर्वविकल्पलोपेन माध्यमिकविजयप्रसङ्गात् । रूपादिधीवदित्येव वोदाहर्तव्यम् । तदियं प्रमितिः सती प्रत्यभिज्ञा पूर्वापरकालवर्तिविषयं साधयति । दीपनदीप्रवाहकृत्तपुनःप्ररूढकेशादिषु तु संप्रतिपन्नसामग्रीभेदादिबाधकबलात् तस्या न साधकत्वम् । ननु स इति धीः स्मृतिः, अयमित्यनुभवः, निरन्तरोत्पत्तेः ज्वालाक्षणेष्विव तयोर्भेदाग्रह इति, तन्न; समानाधिकरणबोधात् । यद्यपि सोऽयमिति व्यवहारे तादृशधीभेदेन वैयधिकरण्यशङ्का; तथाऽपि तमिमं पश्यामीत्यादिषु उभयाकारविशिष्टस्यैकस्य दृशिकर्मत्वदृष्टेर्बुद्ध्यैक्यं दुरपह्नवम् । अत एव ग्रहणस्मरणात्मकमिदं ज्ञानमिति वदन्तः प्रत्युक्ताः । ननु कथमिन्द्रियासंबद्धः तदंश इदानीमिन्द्रियेण गृह्येत? मनोसंबद्धोऽनुभूतविषयः कथं मनसा? तदनुभवजन्यसंस्कारसहकारादिति चेत्, समानमत्रापि । दृष्टत्वात् तथैव तत्रेति चेत्, अत्राऽपि तथैव । वेद्याकारैकदेशादुत्पन्नस्य प्रत्यक्षत्त्वे शुक्तिरजतधीरपि मानं स्यादिति चेन्न; आरोपानारोपाभ्यां विशेषात् । किं च संस्कारोपनीतरजताद्यारोपे च इदं रजतमिति चाक्षुषबुद्धिरेका । न हि तत्र रजताद्बुद्ध्युत्पत्तिः, तस्यासन्निहितत्वात्; अर्थजत्वेन त्वदुक्ताविसंवादित्वप्रसङ्गाच्च । इन्द्रियजन्यतया प्रत्यक्षत्ववत् संस्कारजन्यतया स्मृतित्वमपि दुर्निवारमिति चेन्न, तमेतमनुभवामि पश्यामीत्यादिप्रत्यक्षविरोधादेव । अत एव संस्कारप्राधान्यमुत्प्रेक्ष्य केवलस्मृतित्वशङ्काऽपि निरस्ता । भवतु वा स्मृतित्वमपि; तथाऽपि स्मृत्यनुभवात्मकमेकं ज्ञानं स्वविषयस्य स्थिरत्वं साधयत्येव । कथमप्रमा स्मृतिरर्थं व्यवस्थापयेदिति चेत्; किमत्राप्रमात्वं ज्ञानव्यतिरिक्तत्वं वा? अनुभवव्यतिरिक्तत्वं वा? अयथार्थत्वं वा? नाद्यः, असिद्धेः । न द्वितीयः, त्रितयप्रकाशवादिभिः स्मृतेरप्यात्मस्वात्मविषयेऽनुभवत्वस्वीकारात्, त्वया च स्वसंवेदनांशेऽपि । विषयांशेऽनुभवव्यतिरिक्तत्वं स्मृतेरिति चेत्, तथाभूताऽपि स्वकारणानुभवात् स्वविषयमबाधितं व्यवस्थापयेत् । अस्वातन्त्र्यादिविचारस्त्वत्र प्रकृतानुपयुक्तः । न तृतीयः, यथार्थस्मृतौ विरोधाभावात् । सर्वाऽपि स्मृतिरयथार्था अतीतस्य वर्तमानतया अवभासादिति चेन्न; अतीततयाऽपि प्रायशः स्मृतिभिरर्थोल्लेखात् । प्रच्युततदाकारस्य तद्वत्तया भासनादयाथार्थ्यमिति चेन्न; स्मृतिप्रमोषे तदभावात्, अतीतादिविषयानुमानानामपि तत्प्रसङ्गाच्च । तर्हि पाकरक्तेऽपि श्यामत्वधीर्यथार्था स्यादिति च मन्दम्; प्राचीनश्यामताबुद्धौ विरोधाभावात् । एतेन स्मृतिर्न बाह्यविषया नष्टेऽप्यर्थे स्मृतिदर्शनादिति

वदन्तोऽपि निरस्ताः । एवं प्रत्यभिज्ञा स्थिरविषयेति सिद्धे सोऽहमिति धीश्चात्मनः स्थिरत्वमुल्लेदि । तदहं स्मरामीति स्मृतिमात्रेण चैतत्सिद्धम् । ननु विरुद्धानुपहितविषयेत्यसिद्धम्, कुर्वदकुर्वल्लक्षणयोः शक्त्यशक्तिभ्यां वैजात्यादित्यत्राह—**नैकस्मिन्निति** । कुर्वतोऽकुर्वतश्चैकत्वेऽङ्गीक्रियमाणेऽपि शक्त्यशक्तिरूपविरुद्धधर्माध्यासो न स्यादित्यर्थः । शक्तश्चेत्कुर्यादेव, न करोति चेदं कुसूलनिहितं बीजमिति प्रसङ्गतद्विपर्ययाभ्यां शक्त्यशक्तिसिद्धिरिति चेन्न; शक्तस्यापि करणाकरणयोः सहकारिसन्निध्यसन्निधिप्रयुक्तत्वात् । तदाह—**कृतितदितरयोरिति** । साह्यं—सहभावः । कदाचित्पुष्कलैः सहकारिभिः साह्यं कदाचिद्विकलैरिति प्रयोजकभेदेनेत्यर्थः । अकुर्वत्स्वभावस्य कथं सहकारिभिरपि कुर्वत्ता, कुर्वत्स्वभावस्य वा कथम्? तद्विरहात्तदभाव इति चेन्न; सहकारिसन्निधौ कुर्वत्तया तदभावे चाकुर्वत्तया स्वभावव्यवस्थासिद्धेः । परसापेक्षः कथं स्वभाव इति चेन्न; स्वहेतुसापेक्षत्ववदुपपत्तेः, अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाश्चत्वारो विज्ञानोत्पत्तौ कारणमिति युष्मदुक्तिविरोधात् । अर्थजत्वं च प्रामाण्यं ब्रूपे । उपच्छन्दनार्थमुत्तानवाक्यमिति चेन्न; अतिप्रसक्त्या सिद्धान्तस्थितेर्दुर्निरूपत्वप्रसङ्गात् । शक्तं चेदन्त्यतन्तुसंयोगादिवदवश्यसिद्धसहकारिचक्रं स्वकार्यं कुर्यादिति चेन्न; स्वकारणादापततां सहकारिणामेतदधीनत्वाभावात् । पराधीनत्वेऽप्यवर्जनीयं तत्सन्निधानमिति चेन्न; अन्यथाऽपि दृष्टेः । अस्तु सहकारिसंबन्धासंबन्धादिकमेव विरुद्धत्वाद्भेदकमित्यत्राह—**एकस्मिन्निति** । आदिशब्देन प्रस्तुतकरणाकरणादिसंग्रहः । कालभेदाद्विरुद्धस्वीकारे किम्, कुत्र, नासीत्, न स्याद्वेति सर्वत्राव्यवस्थितिरिति चेन्न; दर्शनादर्शननियमाभ्यामेव संभवासंभवस्थितेः । एवमनभ्युपगममनुवदन्प्रतिबन्दिमाह—**नो चेदिति** । अत्रास्ति करोति च, अन्यत्र नास्ति न करोति चेत्यादिनिर्देशभेदेन सत्त्वासत्त्वादिसमुच्चयः सुदुष्परिहरः स्यात् । अपिर्विषयभेदाद्यनुक्तसमुच्चये । विषयादिभेदादपि हि विरोधः परिह्रियते । क्वचिच्छक्तं क्वचिदशक्तं केनचिज्जन्यते व्यज्यते बाध्यते वा नान्येन, कस्यचित् प्रतियोगी व्याप्यः व्यापकः पूर्वः परो वा नान्यस्येत्यादि । एवं विषयभेदादिभिरपि विरोधस्ते दुष्परिहरः । ततः किमित्यत्राह—**तेनेति** । विरुद्धानां देशकालाद्यसमाहितविरोधत्वेन स्वलक्षणस्यापि विरुद्धशतक्षुण्णतया नानात्वे तत्क्षोदानां च तथातथा क्षोदे किंचिदप्येकं न सिध्येत्, तदभावे च कुतोऽनेकमिति **माध्यमिक**मतापातः । सैव तर्हि सुगतमतकाष्ठेति तत्र तिष्ठाम इति चेत्; तन्निष्ठेन त्वयाऽस्मन्मतबाधकानुपन्यासे विवादाभावः । तदुपन्यासे तु तत्रतत्र तद्बाधाबाधविकल्पदौस्थ्यं दुष्परिहरमिति भावः ॥ २५ ॥

> **तत्त्वेदंत्वे हि कालान्तरघटनमये नैककाले घटेतां**
> **कालद्वैतेऽनवस्थाद्यत इह न मितिः प्रत्यभिज्ञेति चेन्न ।**
> **स्वस्य स्वाभावकाले विहतिनियमनात्स्वेन चात्रैककाल्यात्**
> **काले कालानपेक्षे कथमपि सुवचौ नानवस्थाविरोधौ ॥ २६ ॥**

पुनरपि प्रकारान्तरेण प्रत्यभिज्ञाबाधकं विरुद्धधर्माध्यासं प्रतिबन्दिविशेषमप्याशङ्कते—**तत्त्वेदंत्वे हीति** ॥ अतीतकालसंबन्धस्तत्त्वम्, वर्तमानकालसंबन्ध इदंत्वम्, न ह्यतीतं वर्तत इति संभवति सर्वेषां नित्यत्वप्रसङ्गात्; वर्तमानं च यद्यतीतं कथमस्मदादिप्रत्यक्षेण गृह्येत? किं च कालद्वयान्वयरूपयोः तत्त्वेदन्त्वयोरेकवस्तुसंबन्ध एकस्मिन्काले भिन्ने वा? पूर्वत्र विरोधः; तस्मिन्नेतस्मिंस्तदुभयपूर्वापरे वा क्वचिदपि काले कालान्तरसंभेदायोगात्, अन्यथा त्रैकाल्ययौगपद्यप्रसङ्गात् । एतेन विरुद्धानुपहितविषयेति विशेषणं चासिद्धम् । उत्तरत्र कालद्वयनिर्वाहककालभेदाश्रयणे तयोरपि तथेत्य-

नवस्थापातः; न चैवं दृष्टमिष्टं वा। न च देशद्वयप्रतिबन्दिः, अस्माभिस्तदनभ्युपगमात्। तस्मात्कालद्वयविशिष्टे वस्तुनि प्रवृत्ता कृत्स्ना प्रत्यभिज्ञा न प्रमितिः विरुद्धविषयत्वात् शुक्तिरूप्यधीवत्, प्रत्यभिज्ञात्वादेव वा दीपादिप्रत्यभिज्ञावदिति चेत्, अत्र न कालद्वयमात्रं वस्तुनि विरुद्धं, विरुद्धकालान्वयस्तु नास्तीत्यभिप्रायेण प्रतिवक्ति—**नेति**।

अतत्तामनिदन्तां च तत्त्वेदन्त्वे निरस्यतः। अन्योन्यप्रतिषेधस्तु न ततः सेद्धुमर्हति॥
एकस्य भिन्नकालाभ्यां वैशिष्ट्यं विहतं यदि। तथा स्याद्भिन्नदेशाभ्यां पुञ्जबुद्धिस्तत्र न ते॥

तर्हि कालद्वयविरोधः कुत्रेत्यत्राह—**स्वस्येति**। नियमनात्—यथाप्रमाणं व्यवस्थापनादित्यर्थः। अत एवातीतस्य वर्तमानत्वं वर्तमानस्य वाऽतीतत्वमिह न प्रवर्तनीयम्। ननु तत्त्वेदन्त्वे तद्वत् विरुद्धे, अन्यथा यौगपद्ये विरोधाभावप्रसङ्गात्, तत एव कालद्वयमप्येकस्य विरुद्धमिति तत्राह—**स्वेनेति**। पूर्वापरकालयोगो हि विरुद्धः। स्वेनोपाधिनाऽवच्छिन्नस्यैकस्य कालस्यावान्तरोपाधिभिर्नानात्वेऽपि तत्तदुपाधीनामेव तत्तदवान्तरकालद्वयान्वयविरोधः। अन्यापेक्षया पूर्वापरकालयोरन्यस्य विरुद्धत्वे क्षणकालस्याप्यन्यापेक्षया पौर्वापर्यात्तत्कालवर्तित्वमपि वस्तुनो विरुध्येत। क्षणकालसंबन्धो वस्तुनः काल्पनिक इति चेत्, ततोऽपि माध्यमिकोत्थानम्। ननु स्वरूपसत्यता क्षणसंबन्धित्वं च साध्यते न केवलं क्षणकालमात्रसंबन्धित्वम्। अतस्तुर्यबौद्धात् त्रयाणां विशेष इति। तर्हि सिद्धसाधनम्। अतः क्षणिकपक्षे स्थिरपक्षे वा स्वाभावकाले वृत्तिर्विरोधाद्वारणीया न तु स्वकालवृत्तिरिति भावः। अत्र च विरोधानवस्थयोः शङ्काऽपि नास्तीत्याह—**काल इति**। न ह्ययमपि काल एतस्मिन्काले किमुत कालान्तरम्? तत्कालोऽपि न तस्मिन्काले किमुतायम्? अत एतत्कालतत्कालौ वा कालान्तरं वाऽनपेक्ष्य एकस्मिन्वस्तुनि कालद्वयं संबध्यत इति स्थिते कथंचिदप्यनवस्थाविरोधयोर्नावकाशः। तथाऽपि कालद्वयं परस्पराभावनान्तरीयकं तदात्मकं वा कथमेकत्र स्यादिति चेन्न; कालद्वयस्यान्योन्यस्मिन्नभावेऽपि तदुभयसंबन्धिनि वस्तुन्यभावाभावात्। यस्तु तस्मिन्वस्तुन्यसंबद्धः कालः तस्य तत्र सद्भावं न ब्रूमः। न हि वयं नित्यानित्यविभागं निराकुर्मः॥ २६॥

प्रत्यक्षं वर्तमानं प्रथयति यदिहावर्तमानाद्विभक्तं
तस्मात्तेनैव सिद्धं क्षणिकमिति न सत्तावदित्यप्रतीतेः।
तत्कालसत्त्वमेव ह्यपनयति सतो वर्तमानत्वबोधः
कालेऽन्यत्रापि सत्त्वं प्रमितमिति कथं तद्विरोधप्रसङ्गः॥ २७॥

अथ प्रत्यक्षेणैव प्रत्यभिज्ञाप्रत्यक्षस्य विरोधं भावानां क्षणिकत्वसिद्धिं च शङ्कते—**प्रत्यक्षमिति**॥ अस्मदादिप्रत्यक्षं तावद्वर्तमानमात्रविषयमिति सर्वसंमतम्। अन्यथा दृश्यमानानां पदार्थानां तत्क्षणापेक्षया पूर्वापरविशेषाणामपि प्रत्यक्षत्वप्रसङ्गात्। तस्मादगृहीतपूर्वापरविशेषं वर्तमानग्राहि प्रत्यक्षमवर्तमानाद्व्यावृत्तमेव स्वविषयं गृह्णाति। एतदेव च क्षणिकत्वं वस्तूनां यदपूर्वोत्तरत्वम्। अतस्संस्कारनिरपेक्षप्रत्यक्षबाधिता प्रत्यभिज्ञा देशान्तरस्थग्राहिशुक्तिरूप्यधीवत् संस्कारोपनीतकालान्तरस्थभेदसंवृत्त्या तस्मिन्निदन्त्वमस्मिन्वा तत्त्वमारोप्य कल्पितैक्यविषयेति। अत्र प्रत्यक्षवृत्तान्तानभिज्ञोक्तिरियमित्यभिप्रायेण प्रतिवक्ति—**न सदिति**। प्रत्यक्षस्य कालान्तरसंबन्धप्रतिक्षेपकत्वाभावमाह—**तावदिति**। वर्तमानत्वविधिरेवावर्तमानत्वनिषेधात्मा तावन्मात्रकालवर्तित्वं नियच्छेदित्यत्राह—**तत्कालेति**। तत्कालसत्त्वविधिर्हि तदानीमसत्तां निरुन्ध्यात्, न तु कालान्तरसत्तामित्यर्थः। तथाऽपि इदंकारवता प्रत्यक्षेण कालान्तरसत्त्वस्यानालम्बनात् तत्प्रतिक्षेप

इति चेत्तत्राह—**कालेऽन्यत्रापीति** । अयं भावः—यथेदमिति तत्कालसत्ता गृह्यते, तथा तदिदमिति कालद्वयसत्त्वमपि प्रत्यक्षेणैव गृहीतम् । एवं सति न्यूनाधिकविषयतामात्रमिह प्रत्यक्षयोर्न विरुद्धविषयत्वम्; अन्यथाऽतिप्रसङ्गादिति । अल्पविषयस्य प्राबल्यमालम्भविधौ दृष्टमिति चेन्न; विरोधे सत्येव बलाबलविमर्शात् । इह तु विरोध एव न समस्ति । अपि च प्रत्यक्षं किं वर्तमानत्वेन स्वविषयं गृह्णाति, उत वस्तुवृत्त्या वर्तमानम्? नाद्यः; त्वन्मते प्रत्यक्षतयाऽभिमतस्य निर्विकल्पकस्य वि[कल्प]शिष्टबोधनाशक्तेः, सविकल्पकस्य तु प्रत्यक्षत्वानभ्युपगमात् । न द्वितीयः, इन्द्रियसंयुक्तक्षणस्य तज्जन्यज्ञानकालेऽतीतत्वात्, तदुत्तरक्षणस्य स्वपूर्वक्षणेन्द्रियसंप्रयोगायोगेन तज्जन्यधीविषयत्वासंभवात्; तदातनाक्षिसं-प्रयोगस्य तु तात्कालिकबुद्धिहेतुत्वासिद्धेः । अतस्ते कथं प्रत्यक्षं वर्तमानग्राहि? अस्मन्मते त्विन्द्रियसंप्रयोगस्य तद्विशिष्ट-वस्तुनस्तदुपहितकालांशस्य च स्थायित्वेन धीक्षणानुवृत्तौ तद्विषयतया प्रत्यक्षोदयात् । संप्रयोगानन्तरक्षणे धीरपि निर्वर्त्यते । अतो नासंप्रयुक्तं नास्थिरं नावर्तमानं वा प्रत्यक्षमिति ।

पूर्वापरबहुव्यक्तिव्याप्तिग्रहणसंभवा । न काचिदपि युक्तिः स्यात् सर्वक्षणिकवादिनः ॥ २७ ॥

उत्पन्नानां विनाशे ध्रुवभवितृतया हेत्वपेक्षाविहीने
जन्मन्येवोपरोधात्क्षणिकमिह जगत्सर्वमित्यप्यसारम् ।
लिङ्गं ह्येष्यत्त्वमात्रं जननविधुरता तत्क्षणानुक्षणत्वे
तत्त्वं तज्जन्यता वा तदिदमनियमासिद्धिबाधादिदूष्यम् ॥ २८ ॥

ननु *जातस्य हि ध्रुवो मृत्युरिति प्रसिद्धम् । अतस्सतां सत्तानुबन्धी विनाशः स्वरूपवन्न हेतुसापेक्षः झटित्ये-वापतेत् । तस्मात् सर्वं क्षणिकमित्यनूद्य परिहरति—**उत्पन्नानामिति** ॥ असारं—न्याय्यादन्यदित्यर्थः । तत्र हेतुं विक-ल्पयति—**लिङ्गमिति** । एवं विकल्पिते यथासंभवं दोषानाह—**तदिदमिति** । तथा हि । तत्राद्ये तावद्यत् यस्य ध्रुवं भवि-ष्यति न तत्तस्य हेतुसापेक्षं, नाशश्च जातानां ध्रुवभावीत्युक्तं स्यात् । तदा कस्यचिदङ्कुरस्य सामग्रीप्रवाहवशात् ध्रुवं भविष्यद्भिः पत्रपुष्पादिभिर्घटादीनां कपालादिभिरप्यनैकान्त्यम्, सर्वत्र चैकसन्तानोत्तरक्षणैः । नहि ते तन्निरपेक्षाः; तथा सति प्रागेवोपनिपाते कथं तत्र सन्तानत्वमपि? पूर्वक्षणानामर्थक्रियाविरहात् असत्त्वं च स्यात् **चार्वाकवादः** । द्वितीये तु यद्यस्यानुत्पन्नमनुबन्धि न तद्धेत्वपेक्षम्, यथा गोरश्वापोह इति स्यात् । तथा च हेत्वसिद्धिः प्रतियोगिवत्स्वोचितहेतु-जन्यत्वात् । मुद्गरादयोऽपि सभागसन्तानमात्रारम्भकाः, नतु नाशजनका इति चेन्न; दीपादिसन्ताना[नाम]न्तिमध्वंसकेषु तदसिद्धेः । न हि तत्र विभक्तसूक्ष्मावस्थान्तरापत्तिमिच्छसि; अन्वयव्यतिरेकाविशेषे व्यवस्थापकाभावात् । निस्स्व-भावतया तुच्छस्य हेत्वपेक्षाविरहो व्यवस्थापक इति चेन्न; प्रतियोगिवदेव नियतकालतया प्रमितस्यात्यन्ततुच्छत्वायोगात्, खपुष्पवच्चानादित्वप्रसङ्गेन सर्वभावासिद्धिप्रसङ्गात् । ध्वंसस्य च तुच्छत्वे तत्कालेऽपि स्वकाल इव भावानां सत्त्वप्रसङ्गाच्च । तथा च क्षणभङ्गं प्रतिज्ञाय स्थिरवादं साधयसि । कीदृशं च ध्वंसस्य निस्स्वभावत्वम्? यदि यत्किंचित्स्वभावविरहः, तत्स्वलक्षणेऽपि समानम् । सर्वस्वभावविरहस्तु ध्वंसेऽप्यसिद्धः । अन्यथा कथमस्य पक्षीकारः? ध्वंसरूपतया सिद्धस्येति चेत्, तर्हि तत्स्वभावस्य कथं सर्वस्वभावविरहः? अपि चास्य प्रागसत्त्वे हेत्वपेक्षा दुर्वारा; प्राक्सत्त्वे तु भावापह्नवः । तत एवाभावस्याप्यभाव इति सर्वाभावः स्यात् । तृतीये च स एव क्षणो यस्य स तत्क्षणः तस्य भावस्तत्क्षणत्वं तदा ध्रुवभावि सहभावीत्यर्थः । अयमपि हेतुरसिद्ध एव । न च प्रध्वंसप्रतियोगिनोर्यौगपद्यसंभवः, संभवे वा भावः पश्चादपि

किं न स्यात्? अनुक्षणशब्दोपचरितस्तु हेतुरनन्तरक्षणवर्तित्वम्, तत्रापि भावोत्पत्त्यपेक्षयाऽऽनन्तर्यविवक्षायामसिद्धिः। भावस्वरूपापेक्षया त्वानन्तर्यनियमे भाव एव हेतुः स्यादिति कथं हेतुनैरपेक्ष्यम्? तदतिरिक्तनैरपेक्ष्यं विवक्षितमिति चेन्न; तद्वदेव सहकारिणामप्यवर्जनीयत्वादिति। पञ्चमे त्वसिद्धिर्व्याघातश्च। ननु कथं ध्रुवभाविशब्देन तत्त्वविवक्षा शङ्क्यते? इत्थम्—यद्यतो भिद्यते न तत्तस्य ध्वंसः, यथा रूपस्य रसः। ध्वंसस्तु कस्यचिदेव भवतीति तदात्मकः। अतः स्वोत्पत्तावेव स्वात्मनि ध्वंसे सन्निहिते कथं क्षणान्तरं प्राप्नुयादिति। तत्रेदं ब्रूमः—ततो भिन्नस्यापि तत्प्रध्वंसत्वं यथादर्शनं स्यात्। अन्यथा भिन्नस्य भिन्नकालस्य च कारणत्वादिकमपि हीयेत; अविशेषात्। स्वात्मन एव स्वनाशात्मकत्वे पश्चादिव स्वकालेऽपि स्वाभावसिद्धेः। स एव सर्वापह्नवस्स्यादिति। तज्जन्यत्वे हेतौ प्रतिज्ञाविरोधः। तज्जन्यत्वं हि तद्धेतुकत्वम्; तेन कथं हेतुनैरपेक्ष्यसाधनम्? हेत्वन्तरनैरपेक्ष्यमपि च दुर्वचमित्युक्तम्। अतः क्रमभाविसहकारिविशेषात् कार्यान्तरमिव स्वनाशमपि स्वयमुत्पादयतु नाम। न ततः क्षणिकत्वं सिध्येदिति। बाधश्चामीषां प्रागुक्तप्रत्यभिज्ञया स्पष्टः। आदि-शब्दः प्रदर्शितयोरपसिद्धान्तप्रतिज्ञाविरोधयोः संग्रहार्थः॥ २८॥

कालानन्तर्यसाम्ये क्षणिकवपुषि ते देशकालाद्युपाधौ
सर्वे पूर्वे भवेयुस्तदुपरि भवतां कारणानि क्षणानाम्।
सन्तानैक्यव्यवस्था निजफलनियतिर्वासनानां च न स्यात्
कार्पासे रक्ततादिक्रमविपरिणमत्संस्कृतद्रव्यतस्स्यात्॥ २९॥

प्रतिकूलतर्कप्रतिहतिमप्याह—**कालानन्तर्येति**॥ आदिशब्देन दिक्संग्रहः। अयमर्थः—सर्वं क्षणिकमिति वद-तस्ते कस्यचित्किञ्चित्प्रति कार्यत्वं किमनन्तरकालभावित्वमात्रात्? उत तद्विशेषात्? आद्ये त्रैलोक्योदरवर्तिनः पूर्वक्षणा-स्सर्वे तदनन्तरभाविनां सर्वेषां क्षणानां कारणानि स्युः। द्वितीयेऽप्यसौ विशेषः किं देशाद्युपाधिनिरपेक्षः? तत्सापेक्षो वा? नाद्यः, अतीन्द्रियस्य तु तस्यादर्शनात्, दृश्यस्य तु वह्निधूमत्वादेरतिप्रसञ्जित्वात्। न द्वितीयः; यस्मिन्देशादौ यद्वर्तते तस्मिन् जायमानस्य तत्कारणमिति नियमो न संभवति। कार्यक्षणस्य कारणदेशादिवर्तित्वे कारणदेशादेः क्षण-द्वयापत्तेः; तथा चानन्तरक्षणयोगेऽपि को बाधः? अतः स्थिरदेशादिकमनभ्युपगच्छतस्तत्प्रयुक्तनियमायोगात् अति-प्रसङ्गस्तदवस्थ एव। ननु यद्देशादिक्षणवर्ती कारणक्षणः तत्कार्यदेशादिक्षणे स्वकार्यमारभत इति नियम इति चेन्न; देशादिक्षणद्वयेऽपि कार्यकारणव्यवस्थाया दुः[स्थ]साधत्वात्। तदेतदभिप्रेत्याह—**सन्तानैक्यव्यवस्था न स्यादिति**। यदप्याहुः—*यस्मिन्नेव हि सन्तान आहिता कर्मवासना। फलं तत्रैव बध्नाति कार्पासे रक्तता यथा॥ इति। कर्मवासनेत्यनुभववासनाया उपलक्षणम्। तदपि दूषयति—**निजफलनियतिर्वासनानां च न स्यादिति**। सन्तानैक्ये सिद्धे हि यस्मिन् तस्मिन्निति निर्देशः स्यादिति भावः। दृष्टान्तस्तर्हि कथमित्यत्राह—**कार्पास इति**। रञ्जकद्रव्यविशेष-संस्कृतबीजावयवानुवृत्त्या कार्यस्रोतोविशेषनियमे यथादर्शनं तत्र तादृशफलसिद्धिर्युक्ता। त्वन्मते तु तदेतत् संततिव्यव-स्थापकाभावात्, तत्रैव फलं बध्नातीति दुश्शको नियम इति भावः॥ २९॥

मेयत्वाद्यैर्विगीतं क्षणिकमिह जगत्स्यात्क्षणोपाधिवच्चेद्
बाधो दृष्टान्तहानिः स्थिर इति विदितो यत्क्षणस्याप्युपाधिः॥

सामग्री कार्यशून्या क्षण इयमपि तद्धेतुसंघो न चासौ
हेतुर्नान्यः स्थिरास्ते क्रमवदुपधिवत्स्यात्क्षणत्वं स्थिरेऽपि ॥ ३० ॥

क्षणभङ्गसाधनान्तरं दूषयितुमनुवक्ति—**मेयत्वाद्यैरिति** ॥ इह—पक्षदृष्टान्तविकल्पाहें वस्तुजाते; विगीतं क्षणिकं मेयत्वात् सत्त्वात् भासमानत्वाद्वा । अत्र स्यादित्यनेनाक्षणिकतायामसत्त्वप्रसङ्गः सूच्यते । अर्थक्रियाकारित्वं हि सत्त्वम्; तच्च कुर्वत्क्षणस्यैवास्ति । अकुर्वत्क्षणस्य तु तदभावादसत्त्वं प्राप्तमिति, घटजलधरादौ दृष्टान्तिते साध्यवैकल्यं क्रमेण कथंचित्परिहर्तव्यम् । इह तु न तथेत्यभिप्रायेण क्षणोपाधिवचनम् । इति रौचित्यादाकृष्टव्यः । अत्र बाधोक्तिस्साध्य-विकल्पेन बहुधा भाव्या । तथा हि—क्षणिकत्वं नाम क्षणसंभवत्त्वं वा, क्षणकालसंबन्धित्वं वा, क्षणमात्रवर्तित्वं वा, क्षणद्वयसंबन्धशून्यत्वं वा, क्षणकालत्वं वा, तदुपाधित्वं वा? नाद्यः, सिद्धसाधनात्, स्थिरमपि नस्सामग्र्या क्षणे संभवतीति । न द्वितीयः, तत एव । कालमेवानिच्छतस्ते कोऽसौ क्षणकालः? कश्च तत्संबन्धः? तदभ्युपगमे सिद्धान्तबाधः । अत एव न तृतीयोऽपि; प्रत्यभिज्ञया च बाधः प्रागुक्तः । न चतुर्थः, उक्तबाधादेव; क्षणेतरस्य तथात्वे खपुष्पवदसत्त्वप्रसङ्गस्य दुर्वारत्वात् । त्वन्मते च खपुष्पनिदर्शनेन प्रसञ्जनं युक्तम् । एवमपि हि ब्रूथ—

*तस्माद्वैधर्म्यदृष्टान्ते नेष्टोऽवश्यमिहाश्रयः । तदभावे च तन्नेति वचनादेव तद्गतेः ॥ इति ।

अन्येऽपि केचिदाहुः—*यस्मिन्ननित्यता नास्ति कार्यताऽपि न विद्यते । तस्मिन्यथा खपुष्पादाविति शक्यं हि भाषितुम् ॥ इति । न पञ्चमः, तद्देशतद्वर्तिनोरिव कालतद्वर्तिनोरैक्यस्य प्रत्यक्षेण बाधात् । तत एव न षष्ठः; यदा हि घटादयः स्वरूपेण क्षणोपाधयः स्युः कालतारतम्यधीः कुत्रापि न भवेत् । तथा च स्थिरशङ्काया एवानुदयात् निर्विषयमनुमानं स्यात् । सर्वस्य च त्रिलोकस्य स्वप्रयोजनेच्छया हि प्रवृत्तिः । सा फलार्थिनः फलिनश्च भेदे बाध्यते ।

न च त्वमपि कृत्येषु निरन्वयविनाशवत् । मत्सन्तानसमृद्ध्यर्थमिति मत्वा प्रवर्तसे ॥

तदिह स्वाभिप्रायादिबाधश्च । आत्मदृष्टान्तेन च प्रत्यनुमानबाधः । तत्र साध्यवैकल्यं च घटादीन्निदर्शयद्भिः युष्माभि-रिव क्रमात्प्रशमनीयम् । अस्ति च सोऽहमिति प्रत्यभिज्ञयाऽस्माकं तत्सिद्धिः । आलयविज्ञानसन्ततिविषयेयमिति चेत्, इदमपि परिभाषामात्रम्, प्रमाणाभावात् । *नान्यदृष्टं स्मरत्यन्य इति परिभाषाया निर्बाधत्वाच्च । निरर्थकं चेद-मालयविज्ञानसन्ततिकल्पनम्; तस्य प्रवृत्तिविज्ञानेन सह सर्वप्रकारसंबन्धायोगादिति । अथ क्षणोपाधिवदित्युक्तं प्रति-वक्ति—**दृष्टान्तहानिरिति** । अक्षणिकत्वे कथं क्षणोपाधिरित्यत्र गूढाभिप्राय आह—**सामग्रीति** । कार्यशून्या—कार्य-प्रागभावसमन्वितेत्यर्थः । क्षणः—क्षणोपाधिरिति यावत् । तथाऽपि तस्य क्षणिकत्वं न प्रतिक्षिप्तमित्यत्राह—**इयमपीति** । ननु हेतूनां संघोऽपि हेत्वनतिरिक्तश्चेत् तेषां भवत्पक्षे स्थिरत्वान्न क्षणोपाधित्वम् । अतिरिक्तोऽप्यक्षणिकः क्षणोपाधिर्न स्यादित्यत्राह—**न चेति** । अयं भावः—संघशब्दो न संबन्धमात्रवाचकः, संबन्धशब्दपर्यायत्वाप्रसिद्धेः । न च तत्तत्सं-बन्धिस्वरूपवाचकः, प्रत्येकमप्रयोगात् । अतः केनचिदुपाधिना संगृहीतास्त एव संघशब्दार्थः । तत्र यदि त एव क्षणोपाधितया दृष्टान्तीक्रियन्ते तथा सति स्थिरास्त इति । ननु तत्संहतिहेतुरुपाधिदृष्टान्तः स्यात् । मैवम्; न हि नः केवलनित्यात् केवलानित्याद्वा कस्यचिदपि कार्यस्योत्पत्तिः; किंतु तत्समुदायात् । तत्र नित्यांशे तावत्क्षणिकशङ्काऽपि नास्ति, अनित्येऽपि यतश्चिरोत्पन्नाद्धेतोस्संघभावः सोऽपि स्थिरतरः । यस्तु चरमस्सहकारी स च स्थिर एव सन् स्वकार्यप्रागभावोपहितरूपः कालमवच्छिन्दन् क्षणोपाधिरित्युच्यते, तदुपधानं च तस्य प्रत्यक्षादिसिद्धम् । न चात्र क्षणिकं किंचित्सिध्यति अनवच्छिन्नस्य कालतत्त्वस्य कालपरिच्छेदलक्षणानित्यताभावात् ।

क्रियादिश्च स्थिरोऽप्येवं क्षणोपाधिर्विशेषकैः । तत्प्रकर्षनिकर्षैस्तु तत्तत्कालप्रकल्पना ॥

इयं तावत्सर्वलोकसाक्षिकी, क्षणकालावच्छेदकयोः प्रागूर्ध्वव्यापिनोरक्षणिकत्वात्, तदवच्छिन्नस्य कालस्य तु क्षणत्वादेव न क्षणिकत्वमिति वस्तुस्थितिः । त्वत्पक्षे तु क्षणकालावच्छेदः क्षणोपाधिरसिद्धः कालस्यैवाभावात् । न चासिद्धोऽपि साध्यः स्वमतविरोधात् । यथाऽऽहुः—

*योऽपि तावत्परासिद्धः स्वयं सिद्धोऽभिधीयते । भवेत्तत्र प्रतीकारः स्वतोऽसिद्धे तु का क्रिया ॥ इति ।

अनन्यावच्छेदार्थेन स्वरूपेणैव कश्चित्क्षणशब्दवाच्य इति चेत्, तर्हि क्षणभङ्गसाधनात्पूर्वमसिद्धः कथं दृष्टान्तः स्यात्?

उत्तरप्रागभावाप्तपूर्वध्वंसैककालतः । मध्यमक्षणतादृक्त्वं व्यवस्थाप्यं त्वयाऽप्यतः ॥

ननु क्षणक्षरणस्वभावा प्रकृतिरिति हि भवत्सिद्धान्तः । अत्र प्रतिक्षणमुदयविलयिनो विकाराः क्षणिका एवेति तद्दृष्टान्तेनान्येषां युष्माभिः किं नानुमीयत इति चेत्, अशक्यत्वादयं सुहृदुपदेशस्त्यज्यते । सर्वक्षणिकत्वं साधयितुमुपक्रम्य स्थिरद्रव्यवृत्तिक्षणिकविकारवदिति कथं दृष्टान्तयेम? तेषु च न त्वदभिमतं क्षणिकत्वम्, प्रदीपादिवदाशुतरवह्निनाशित्वमात्रेण क्षणिकतोक्तेः । तदेतदभिप्रेत्याह—**क्रमवदिति** । क्षणत्वं—क्षणोपाधित्वमित्यर्थः ।

द्वयोरयुगपद्दृष्टिर्युगपच्च यथायथम् । अशक्यापह्नवा तस्मादसदुक्तैव पद्धतिः ॥ ३० ॥

दीपादीनां कदाचित्सदृशविसदृशाशेषसन्तत्यपेते
ध्वंसे दृष्टेऽप्यशक्या तदितरविषयेऽनन्वयध्वंसक्लृप्तिः ।
बाधादेर्दर्शितत्वादपि च दृढमिते सान्वयेऽस्मिन्घटादौ
दुर्दर्शावस्थया स्युः पयसि लवणवल्लीनदीपादिभागाः ॥ ३१ ॥

इह च प्रतिसंख्याप्रतिसंख्यानिरोधयोः निरन्वयविनाशत्वे परोक्तं निदर्शनं दूषयति—**दीपादीनामिति** ॥ आदिशब्देन क्षणरुचिबुद्बुदादिसंग्रहः ।

स निरन्वयनाशस्स्याद्धर्मो धर्म्यपि वा पुनः । पूर्वसंघातभागो वा यद्भावेनानुवर्तते ॥

उत्पत्तिश्च तथाभूता निरन्वयसमुद्भवा । तावुभौ सर्वभावानां नियताविति सौगताः ॥

यो विनाशस्स निरन्वयः, यथाऽन्त्यदीपस्य, अस्ति च विनाशो जातानाम्; अतस्सोऽपि निरन्वय इति निरन्वयध्वंसक्लृप्तिर्न शक्या । तदुपपादयति—**बाधादेरिति** । प्रत्यभिज्ञाबाधस्य प्रवृत्त्याद्यनुपपत्तीनां च दर्शितत्वात् । विपरिवर्तश्च युक्त इत्याह—**अपि चेति** । अन्त्यदीपविनाशस्सान्वयः विनाशत्वात् पटादिविनाशवत् । साध्यविकलो दृष्टान्त इति चेन्न; सङ्घातांशानां वा गन्धादिधर्माणां वा श्यामरक्तादिधर्मिणां वा यथासंभवमनुवृत्तेर्दृढोपलब्धत्वात् । प्रत्यक्षबाधपरिहाराय दुर्दर्शावस्थत्वोक्तिः । स्युरित्यनेन दृश्यावस्थानिवृत्तावपि स्वरूपसत्त्वं सूच्यते । ननु पयसि लवणवदित्ययुक्तं, तत्रापि निरन्वयविनाशात् । तन्न; रसेन सूक्ष्मावयवानुमानात् । दीपावयवेषु लिङ्गमपि नास्तीति चेन्न; दीपोर्ध्वदेशिनां किञ्चिदौष्ण्योपलब्ध्या दीपावयवसंक्रान्तेस्सुगमत्वात् । प्रभूतदीपपार्श्ववर्तिनां च तापस्वेदादिस्तत एव । एवमन्त्यदीपनाशेऽप्यदृश्यावयवविसर्पस्सिद्धः । अतो विनष्टदीपभागानुपलब्धेरदृश्यावस्थानिबन्धनत्वादनन्यथासिद्धप्रत्यक्षसिद्धः सान्वयविनाशदृष्टान्त एव साधीयान् । अन्त्यदीपादेश्च यदि न किञ्चिदुपादेयं ततोऽर्थक्रियाविरहादसत्त्वं स्यात् । बुद्ध्यादिरर्थ-

क्रियाऽस्त्विति चेन्न, तस्यानियतत्वात् । विनाशमन्तर्थक्रियाऽस्त्विति चेन्न, तस्य ते तुच्छत्वात् ध्रुवभावित्वेन अहेतुकत्वाभ्युपगमाच्च । एवमन्त्यदीपासत्त्वे च तत्कारणपरम्पराया अपि तथात्वं स्यादिति ॥ ३१ ॥ इति क्षणभङ्गनिरासः ॥

सत्त्वेऽसत्त्वेऽपि पूर्वं किमपि गगनतत्पुष्पवन्नैव साध्यं
हेतुप्राप्तिर्न पश्चाद्भवितुरघटितोत्पादनेऽतिप्रसङ्गः ।
जन्यं जन्मान्यथा वा द्वयमसदनवस्थानकार्यक्षतिभ्या-
मित्याद्यैर्हेतुसाध्यं न किमपि यदि न स्वक्रियादेर्विरोधात् ॥ ३२ ॥

ननु साध्यसाधनभावे सिद्धे हि प्रस्तुतं पक्षचतुष्टयं सिध्येत्; स एव नास्तीति **चार्वाक** उत्तिष्ठते—**सत्त्वेऽसत्त्व इति** ॥ यदि कार्यं कारकव्यापारात्पूर्वमस्ति तदा पूर्वसिद्धगगनादिवत्किमपि न कार्यं स्यात् । अथ तदा नास्ति, तदाऽपि खपुष्पवन्न कार्यम्; न चासतः सत्त्वापादानसंभवः । न हि नीलं शिल्पिसहस्रेणापि सितीकर्तुं शक्यमिति । कार्यं च कारणेन सह पूर्वं पश्चाद्वा जायते? आद्ये किं कस्य कारणं कार्यं वा स्यात्? द्वितीयेऽपि ततः पूर्वस्य कथं तज्जन्यत्वम्? वैपरीत्यापातश्च लोकव्यवहारानुरोधात् । तृतीये हेतुः स्वेन प्राप्तं साधयेत् अप्राप्तं वा? आद्ये प्राप्तत्वादेव पूर्वसिद्धेर्न साध्यत्वम्, न चोत्तरकालीनस्य पूर्वकालीनेन प्राप्तिः, उभयस्वरूपसिद्ध्यपेक्षत्वात्तस्याः । तदिदमाह—**हेतुप्राप्तिरिति** । द्वितीयमपि दूषयति—**अघटितेति** । अप्राप्तोत्पादने सर्वस्मात् सर्वमुत्पद्येत; प्रकाश्यमप्राप्य वा दीपः प्रकाशयेत्; दाह्यमप्राप्य वा दहनो दहेत् । पुनर्विकल्पान्तरेण विहतिमाह—**जन्यमिति** । घटो जायत इत्येतौ तावन्न पर्यायौ, सहप्रयोगात्, यावद्विनाशं जायत इति प्रयोगप्रसङ्गाच्च । पटो जायत इति प्रयोगश्च न स्यात्; घटपटशब्दयोरपार्यायत्वात् । अतः कार्यस्वरूपातिरिक्तं जन्म । तच्च जन्यमजन्यं वेति विकल्प्य द्वयमप्ययुक्तमित्याह—**द्वयमसदिति** । क्रमात् बाधकमाह—**अनवस्थानकार्यक्षतिभ्यामिति** । जन्मनो जन्यत्वं हि जननकर्मतया; अतस्तस्यापि जन्म स्वीकर्तव्यम्, एवं तस्यापीत्यनवस्था । अजन्यत्वे तज्जन्मनोऽनादित्वात् तद्वतो घटादेरपि तथात्वं स्यात् । तथा च कार्यत्वक्षतिः स्यादिति । आदिशब्देन भिन्नाभिन्नत्वादिविकल्पक्षोभसंग्रहः । हेतुश्च साध्यं च हेतुसाध्यं, हेतुना साध्यं वा । ईदृशानां तर्काणां युक्ताङ्गहान्यादिकमभिप्रेत्याह—**नेति** । साधारणदुष्टत्वमाह—**स्वक्रियादेरिति** । इह तावदनिष्टकोटिभङ्गो न प्रत्याख्येयः । अन्यत्रैवमुत्तरगतिः—यदत्र पूर्वमसत्त्वे कार्यत्वं न स्यादिति तद्विरुद्धभाषितं, प्रागसत्त्वविशेषितं सत्त्वमेव हि कार्यत्वम् । तत्र च प्रागसत्त्वे प्रागसत्त्वमेव न स्यादिति वा, तद्विशिष्टं न स्यादिति वा, सत्त्वमात्रं न स्यादिति वा प्रसङ्गार्थस्स्यात्? तत्र न प्रथमः, कस्यापि स्वाभावेन व्याप्त्यभावात् । अन्यथा शून्यवाद एव स्यात्; अनेकान्तवादो वा । न द्वितीयः तदसत्त्व एव तद्विशिष्टसिद्धेः; न हि विशेषणसत्त्वं विशिष्टविरोधि । न तृतीयः, असत्त्वस्य स्वकालसत्त्वेन विरोधग्रहणात्, अन्यथा देशान्तरसत्त्वेऽपि विरोधप्रसङ्गेन स एवान्त्यबौद्धपक्षस्स्यात् । यत्तु पश्चाद्भाविनः कारणप्राप्तिर्नास्तीति, तत्र पौर्वापर्यनियमलक्षणा प्राप्तिर्दृष्टत्वादनिवार्या । संयोगादिलक्षणा तु मा भूदनङ्गत्वात् । ततश्च नातिप्रसङ्गः, नियामकस्य सिद्धत्वात् । प्रकाश्यदाह्यादिषु च यथादर्शनं कार[काणां]णानां मिथः प्राप्तिरेवाङ्गम्, न तु कार्येण ज्ञानेन सह, भस्मादिना वा । यस्तु जन्मनो जन्यत्वाजन्यत्वविकल्पेनातिप्रसङ्ग उक्तः, नासावस्मत्पक्षे युक्तदोषः । न हि वयमभिव्यक्तिं वा कारणसमवायादिकं वा जन्मेति ब्रूमः, किन्तूपादानावस्थाविशेषम् । तस्य कार्यावस्थासामानाधिकरण्यव्यपदेशः तादात्म्येन तदाश्रयवृत्तेः; एवं ध्वंसादिसामानाधिकरण्यमपि यथायथमूह्यम् । ईदृशस्य जन्मन उपादाना-

वस्थान्तरसाध्यत्वे कारणानवस्थामात्रमापतति; सा च न दोष इति सर्वाविगीतम्। यच्च भिन्नत्वे गवाश्वयोरिव कार्यकारणता न स्यात्, अभिन्नत्वे च कथं सिद्धस्य साध्यत्वमिति, तन्न; कारणात्कार्यस्य भिन्नस्यैवोत्पत्तिदर्शनात्।

अन्यथा बुद्धिबोध्यादौ भिन्नत्वादिविकल्पतः। बोध्यत्वादिक्षतेर्न स्यात् स्वमतस्थापनाऽपि वः॥

अथ किंचित्कारेणाकिंचित्कारेण वा कारणत्वम्, पूर्वत्र हेतूनां किंचित्कारजननेऽपि किंचित्कारान्तरापेक्षयाऽनवस्था, किंचित्कारस्यापि किंचित्कारजननापेक्षया उत्तरत्रातिप्रसङ्ग इति। अत्रापि ब्रूमः—यत्र किंचित्कारेण हेतुत्वं दृष्टम्, यथा काष्ठादेर्ज्वालादिना, तत्र तथा। न चानवस्था हेतुसंपत्तिपरम्पराया दोषत्वाभावात्; अतिरिक्तस्यात्रानिरूपणात्। यत्र तु द्वारनिरपेक्षं हेतुत्वं तत्रापि दर्शनबलात् किंचित्कारान्तरं न जनयितव्यम्, यतोऽनवस्था स्यात्। न चातिप्रसङ्गः, नियतपूर्वत्वग्राहिणा प्रत्यक्षेणैव तन्निवारणात्। अन्यथा तदपि ते प्रमाणं न स्यादिति विश्वापह्नवः। यच्च कार्यं कुर्वतोऽकुर्वतो वा कारणत्वम्, आद्ये कार्यस्यापि पूर्वसिद्धिप्रसक्त्या कार्यत्वाभावः। द्वितीये विरोधातिप्रसङ्गाविति; तदप्यपेशलम्, भाविकार्यानुगुणव्यापारवत्त्वमेव कारणस्य कुर्वत्त्वम्। तत्र कथं कार्यस्य स्वस्मात् पूर्वसिद्धिः? कुर्वत्त्वनिरूपणं तु भाविनाऽपि कार्येण बुद्ध्यारोहिणा सिध्येत्। एतेन निर्व्यापारस्सव्यापारो वा हेतुरित्याद्यपि दत्तोत्तरम्। कार्यकारणत्वयोः स्वभावत्वे पटत्वनीलत्वादिवत् सर्वं प्रत्यपि स्याताम्; अस्वभावत्वे कस्यचिदपि न स्यातामित्यपि नियतप्रतिसंबन्धिकस्वभावत एव तदुभयसिद्धेर्निरस्तम्। दण्डादिकार्यत्वं घटादिकारणत्वं वा नीलादिवदेव पुरुषभेदेऽप्यविपर्यस्तमेव। अथ स्यात्, कार्यकारणभावस्य द्विष्ठत्वे द्वयोरपि द्वैरूप्यादविशेषविरोधभेदापत्तयस्स्युः, एकस्थत्वेऽपि यत्रैकस्मिंस्तत्रैवमिति; तत्र ब्रूमः—कार्ये कार्यत्वं कारणे कारणत्वं च वर्तते; तथाऽप्यन्योन्यनिरूप्यतया संबन्धव्यवहारादिसिद्धिरिति। स्यादेतत्, न तावद्दण्डादयो मृदाद्यवयवाश्च प्रत्येकं घटाद्युत्पादनशक्ताः; अदर्शनात्। अत एव न समुदिता अपि, न हि नद्यस्समेत्यापि दहेयुः। न च सिकतास्संभूय तैलं जनयेयुः। शक्तानामेव संभूय करणे सर्वे कृतकरास्स्युः। शक्तस्य कुर्वतोऽप्यन्याकाङ्क्षायां सर्वैरपि स्यात्। तथा च देशादिव्यवहितानामसन्निधेः कथं कार्यारम्भः? न हि कार्ये कारणानां साध्यांशभेदः; विभक्तदशायां समुदाये वा तस्यादृष्टेः; निरंशे गुणादौ च दुर्वचमेतदिति। अत्रोच्यते—समुदितानां कार्यकरत्वमेव हि प्रत्येकमपि[हि]शक्तिः; कथमत्र वियुक्तैः कार्यकरणं कथं च समेतेषु कृतकरता? अतश्शक्तस्यापि सहकार्याकाङ्क्षायामतिप्रसङ्गश्च निरस्तः, यावत्कार्यसिद्धिनियतविषयत्वात्तस्या इति। ननु पूर्वं कारणमित्युक्ते नष्टं कारणमित्युक्तं स्यात्। दृष्टा च मृदिते मृत्पिण्डे घटोत्पत्तिः, तथा च स्वात्मानमलभमानस्य कथं परसाधकत्वम्? अन्यथा चिरातिक्रान्तस्य च स्यादेव कारणत्वम्। तुच्छस्य च कारणत्वे कार्यमपि तुच्छं स्यात्, नित्यं वेति; तदपि न, पूर्वक्षणसत्त्वमेव हि कारणस्य कार्योपयोगि; न च तत्तदा नास्ति। कार्यक्षणे तु कस्यचिदसत्त्वं न कारणत्वविरोधि। पूर्वं नष्टमित्यप्यसाधु; स्थिरवादे तदयोगात्। पिण्डस्य तु न साक्षात्कारणत्वम्। न च पिण्डस्तत्प्रध्वंसो वाऽत्यन्ततुच्छः, स्वकाले सद्भावात्। कालान्तरासत्त्वेन तुच्छत्वे प्रत्यक्षविषयोऽपि तथा स्यात्। तथा चेयं माध्यमिकगतिः। अथ ब्रूषे पूर्वत्वमेव कारणस्य दुर्निरूपम्, पूर्वकालवृत्तित्वं हि तत्; काले च पूर्वत्वमुपाधिकृतम्; स चोपाधिर्द्वयमेव, तदा तदधीनं कालस्य पूर्वत्वं कालाधीनं चोपाधेरित्यन्योन्याश्रयः; अन्यापेक्षायां चक्रकम्, अनवस्थाऽपि। कालस्य क्रमवदुपाधिसंबन्धभेदाद्भिदश्च कृत्स्नैकदेशविकल्पदुःस्थ इति। एवं ब्रुवता किं पौर्वापर्यमेव न दृष्टम्? दृष्टमपि वा बाधितम्? नाद्यः, स्वाभ्युपेतलोकव्यवहारविरोधात्। न द्वितीयः, सर्वेषां नित्यत्वतुच्छत्वयोरन्यतरप्रसङ्गात्। अतः काले सत्यसति वा क्रमस्तावद् दुरपह्नवः।

क्रमेणोपाधिभिर्योगस्साकल्येनांशतोऽपि वा । कालस्य न घटेतेति स्थिरवादी कथं वदेत् ॥
प्रत्यक्षप्रतिरुद्धश्च क्षणभङ्गपरिग्रहः । अपसिद्धान्तमाद्ध्यान्मानमन्यदनिच्छतः ॥
अथ लोकायतान्तस्त्वमनुमानं च मन्यसे । आगमोऽप्यविसंवादी तदन्तस्स्थातुमर्हति ॥
यत्र प्रवृत्तिसामर्थ्यं न लोकादुपलभ्यते । अनुमोयेत तत्रापि प्रामाण्यमविशेषतः ॥

अस्त्वेवम्; तस्य नियमो न शक्यः अस्मादेवेदमनन्तरमिति । तदेतन्नियतपूर्वत्वं हि न जातेर्जातिमपेक्ष्य, द्वयोरपि त्रैकालिकत्वात् । न च जातेर्व्यक्तिमपेक्ष्य, सर्वासां जातीनां पूर्वत्वेन कारणनियमासिद्धेः । जात्यन्तरापेक्षया कार्यत्वं न दृष्टमिति चेत्; किमतः पूर्वमेतज्जातिकार्यत्वमपि दृष्टम्? एकव्यक्तेश्च नियमो दुर्ग्रहः, अननुवृत्तेः; कृत्तिकारोहिण्योरपि ह्युदयभेदेष्वेव व्याप्तिर्गृह्यते । एतेन व्यक्तेर्जात्यपेक्षया वा व्यक्त्यपेक्षया वा पूर्वत्वनियमोऽपि प्रत्युक्त इति । अयमप्यनुक्तोपालम्भः; एतद्धर्मकादेतद्धर्मकमुपजातमिति जात्युपाधिकोडीकृतरूपेण व्यक्तिषु नियमसिद्धेः । यथादर्शनं चेयत्तानियमरहितनिरुपाधिनिर्व्यभिचारभूयोदर्शनबलेन व्याप्तिसिद्धिश्चानुमाने वक्ष्यते । न च सर्वस्मात्तादृशात्तादृशं सर्वमनियतं वा स्यादिति शङ्कनीयम् । तथा व्याप्तेरग्रहणात्, तद्विरुद्धा च ते प्रार्थना मोघैव । तृणारणिमण्यादिषु च वह्न्युत्पत्तौ सामान्यतो विशेषतश्च हेतुकार्यभावो मन्तव्यः । तत्र कार्यवैजात्यं न दृश्यत इति चेन्न; अनुपलब्धवैषम्याणामप्यायुर्वेदादिषु शक्तिभेदसिद्धेरवान्तरवैजात्यस्य स्वीकार्यत्वादिति ।

सांख्यसौगतचार्वाकैरन्येऽप्येवमुपप्लवाः । प्रयुक्ताः प्रतिवक्तव्याः प्रतिष्ठितनयस्थितैः ॥

यदत्र माध्यमिकमतस्थैरुच्यते—

*पूर्वसंबन्धनियमे हेतुत्वे तुल्य एव नौ । हेतुतत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा ॥ इति,

तत्रोच्यते—प्राक्कालनियतत्वेन कारणं प्रमितं न वा । आद्ये तदेव तत्सत्त्वमन्यथा नियमोऽपि न ॥

अन्यदपि यदुक्तम्—

*अन्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः । नान्तर्भावितसत्त्वं चेत्कारणं तदसत्ततः ॥ इति,

अत्र तदसत्तत इत्यत्र स्थाने सदिदं तत इति पाठ्यम् । विशेषणतयोपलक्षणतया वा सत्तासंबन्धिनि नासत्त्वारोपश्शक्यत इति ।

सत्त्वं च सदसद्वेति विकल्प्यानिष्टकल्पने । असत्त्वं सदसद्वेति विकल्प्योत्तरमूह्यताम् ॥
स्वक्रियादिविरोधश्च सूत्रप्रभृतिदुस्तरः । गुरुशिष्यादिवाक्यानां परबोधार्थता यतः ॥
तेभ्यश्चैतन्यमित्यादि वदता गुरुणा स्वयम् । किण्वादिभ्यः प्रसिध्यन्तो मदशक्तिर्निदर्शिता ॥
प्रत्यक्षाल्लोकशब्दोक्तादधिकं च तदायतम् । अभाष्यत भवत्पूर्वैः प्रत्यक्षं चार्थसाधकम् ॥
अर्थकामौ पुमर्थौ च दृष्टोपायैरुदीरितौ । प्रीयसे दूयसे च त्वं बिभेषि च ततस्ततः ॥
इष्टं प्राप्तुमनिष्टं च निवर्तयितुमुद्यतः । तत्सिद्धौ चरितार्थस्त्वं लोकवत्किं न मन्यसे ॥
बुभुक्षुरन्नमादत्से श्वभक्ष्यादि जहासि च । परोक्त्या प्रतिपद्यार्थं प्रतिब्रूषे जिगीषया ॥
तत्त्वावधारणार्थं वा वादे किं न प्रवर्तसे । स्वयं वा मानतर्काभ्यां किं न किञ्चित्परीक्षसे ॥ ३२ ॥

कादाचित्कस्य कालावधिनियतिकरं पूर्वसत्कारणं स्यात्
भावोपष्टम्भशून्यो न खलु तदवधि प्रागभावोऽपि कुर्यात् ।

कार्यं निर्हेतुकं चेत्कथमिव न भवेन्नित्यता तुच्छता वा
कादाचित्कस्वभावाद्यदि न नियमनादन्यथाऽतिप्रसङ्गात् ॥ ३३ ॥

ननु परिवेषादिषु नियतपूर्वसत्किञ्चिन्न दृश्यते । न च घटादिदृष्टान्तेन तदनुमेयम्, विपरिवर्तस्य दुर्वारत्वात् । अतो दृश्यमाना अप्यवधयः केषुचिद्रसोत्पत्तौ रूपादिवद्यदृच्छासिद्धा इत्यत्राह—**कादाचित्कस्येति** ॥ अयं भावः—यदि परिवेषादीनामपि कादाचित्कत्वं दृष्टं तत्र निपुणं निरूपयतां देशकालादृष्टविशेषादातपादिकारणविशेषस्सिद्धः । तदनुपलम्भेऽपि सन्दिग्धपरिवेषादिदृष्टान्तेन नान्यत्र हेत्वभावश्शक्योऽनुमातुम्, अनिश्चितसाध्यस्य दृष्टान्तत्वायोगात्, निश्चितसाध्यविपर्ययस्य पक्षत्वाद्यतिपातात्, निश्चितनिदर्शनादनिश्चितानुमानं युक्तमेव । न च त्वद्विवादमात्रेण घटादिषु सर्वलोकसंमतः कारणसद्भावस्सन्दिह्यते । एतेनाहेतुतो भावोत्पत्तिः कण्टकतैक्ष्ण्यादिदर्शनात् इत्यादि च प्रत्युक्तम् । अस्तु हेतुनिरपेक्षो नियतकालः प्रागभाव एव कार्यस्य पूर्वावधिः । स हि स्वभावविरुद्धतया कार्यकालमननुवानस्तत्पूर्व एवेति सिद्धम् । अतः किमन्यैरित्यत्राह—**भावोपष्टम्भेति** । भावान्तरमभाव इति स्थापयिष्यते । इह त्वपिना पक्षान्तरान्वारोहस्सूच्यते । अयं भावः—यदि कार्येण प्रागभाव एव केवलोऽपेक्षणीयस्तद्वदेतेनाप्यनादिना भाव्यम् । अतः प्रागवधिः सन्नप्यभावस्तत्तद्भावशेखरित एव स्वात्मानमवधित्वेन नियच्छेदिति । नित्यस्वभाववत् कादाचित्कस्वभावस्यापि हेतुनैरपेक्ष्यं स्यादित्यत्राह—**कार्यं निर्हेतुकं चेदिति** । विषमं निदर्शनमित्याकूतम् । तदेवानिष्टप्रसङ्गेन व्यनक्ति—**कथमिति** । निरवधित्वे गत्यन्तरं न संभवतीति भावः । कार्यस्य निर्हेतुकत्वं सतोऽसतो वेति विकल्पे पूर्वत्र नित्यता, अन्यत्र तुच्छता स्यादिति विभा[ज्य]व्यम्, पूर्वावधिवदुत्तरावधेरप्यसत्कल्पत्वान्नित्यत्वम् । न हीतःपरं न भवितव्यमनेनेत्यपि नियमोऽस्ति । ननु कादाचित्कत्वं स्वभावो न वा? आद्ये नित्यस्वभाववन्निरपेक्ष एव स्यात् । द्वितीये कथमतत्स्वभावः कारणसहस्रेणापि तत्स्वभावतां नेतुं शक्यः? स्वभावस्य च हेतुमत्त्वे निर्हेतुकमिति किंचिन्न स्यात् । अतो नित्यस्वभाववन्नियतकालस्वभावता स्यादिति शङ्कते—**कादाचित्केति** । कादाचित्कस्वभावत्वेऽपि हेत्वधीनतां तत एव नित्यस्वभाववैषम्यं चाभिप्रेत्याह—**न नियमनादिति** । न हि यतः कुतश्चिदनन्तरमनेन भवितव्यमिति कादाचित्कत्वम्, अनियमादृष्टेः ; अस्मादनन्तरमेवेदमिति कालविशेषव्यवस्थादृष्टेरित्यर्थः । उक्तनियमानभ्युपगमे सर्वत्र सर्वदा सर्वतः कार्यं स्यादिति तर्कबाधं व्यनक्ति—**अन्यथेति** । न हि धूमादिना यदा कदाचिद्भवितव्यमित्यस्य कादाचित्कत्वं नियम्यते ; तथा सति गर्दभादेरनन्तरं तदुपलब्धिर्वा सामग्र्यनन्तरमनुपलब्धिर्वा स्यादिति ॥ ३३ ॥ **इति कार्यकारणभावादिसमर्थनम् ॥**

नेत्रादेर्दीपिकादेरिव नियमयुतं तैजसत्वादिसाध्ये
रूपादिग्राहकत्वं यदि करणतया स्यादसाधारणत्वम् ।
तत्साहाय्यं त्वसिद्धं भवति गमकतामात्रमप्यञ्जनादा-
वक्षाहङ्कारिकत्वं श्रुतिपथनिपुणैर्घोषितं नैव बाध्यम् ॥ ३४ ॥

प्रकृतस्य प्रकृत्यादिकारणवादस्य प्रतिपक्षा निरस्ताः । तत्र देहादिवदिन्द्रियाणामपि भौतिकत्वं वदतः प्रतिवक्ति—**नेत्रादेरिति** ॥ नियमयुतं सावधारणम्, रूपादिषु मध्ये रसाद्यग्राहकत्वेन विशेषितमित्यर्थः । चक्षुस्तैजसं रसाद्यग्राहकत्वे सति रूपग्राहकद्रव्यत्वात् दीपवदिति । एवं त्वगिन्द्रियं वायवीयं स्पर्शादिषु मध्ये स्पर्शस्यैव ग्राहकद्रव्यत्वात् अङ्गसङ्गि-

सलिलशैत्याभिव्यञ्जकवायुवत्। रसनस्याप्यत्वे रसस्यैवेति दन्तान्तस्तोयदृष्टान्तः। घ्राणस्य पार्थिवत्वे गन्धस्यैवेति चन्दनकुङ्कुमादिगन्धाभिव्यञ्जकनिम्बत्वगादिनिदर्शनम्। श्रोत्रस्य तु नभस्त्वे श्रोत्रं गुणावान्तरजात्या स्वगुणसजातीयगुणग्राहकम्, बाह्येन्द्रियत्वात् चक्षुरादिवदिति। शब्दो गुणावान्तरजात्या सजातीयगुणवतेन्द्रियेण गृह्यते बहिरिन्द्रियव्यवस्थापकगुणत्वाद्रूपादिवत्। शब्दो भूतेन्द्रियग्राह्य इति वा। बहिरिन्द्रियव्यवस्थापकत्वादित्येव हेतुः। तथा श्रोत्रं भौतिकम्, बाह्येन्द्रियत्वात् चक्षुरादिवत्। आकाश इन्द्रियारम्भकः, भूतत्वात् भूतान्तरवदिति। शब्दोपलब्धिर्वा भूतेन्द्रियकरणिका बाह्येन्द्रियव्यवस्थापकोपलब्धित्वात्, रूपोपलब्धिवत्। तत्राद्येषु चतुर्ष्वनुमानेषु हेतुविकल्पमनूद्य दूषयति—**यदि करणतयेत्यादिभिः**। यस्मिन्सति कार्यं भवत्येव तत्करणम्; तच्च सन्निकर्षविशेषविशिष्टतयेन्द्रियाणाम्। ननु—

उद्विग्नो ह्यन्धकारेण कश्चिदेवं ब्रवीत्यपि। किं चक्षुषा ममैतेन दृष्टं दीपेन यन्मया॥

इति दीपादिषु साधकतमत्वं कश्चिद् ब्रूयात्, अतस्सपक्षवृत्तेर्हेतोः कथमसाधारणत्वम्? इत्थम्—आलोकेन विनाऽपि जन्तुभेदेषु चक्षुषो रूपादिग्राहकत्वं सिद्धम्। अन्धकारे च मनुष्यादीनां तत्त्वतोऽन्यथा वा। अत ईदृशं प्राधान्यमपेक्ष्य इन्द्रियेषु करणत्वं दीपादिषु सहकारित्वं च प्रख्यातमनुरुध्य विकल्पप्रवृत्तेरविरोधः। कोट्यन्तरं दूषयति—**तत्साहाय्यं त्वसिद्धमिति**। करणभूतेन्द्रियापेक्षया तेषामेव दीपादिवत्सहकारित्वमनुपपन्नमित्यर्थः। दीपादीन्प्रति सहकारित्वान्नासिद्धिरिति चेत्तर्हि प्रमातृप्रमेययोरपि तथात्वात्तत्सिद्धिः स्यात्। तयोः सतोरपि कदाचित्कार्यं नास्तीति चेत्तावता करणत्वं माभूत् तत्सहकारित्वं तु सिद्धमेव। दीपे च सति भाव एवेति नियमो नास्ति। संप्रयोगविशेषसाहित्यात्स्यादिति चेत्तर्हि तयोरपि ततस्स्यादेवेत्यनैकान्त्यम्। एतेन करणत्वादिविकल्पानादरेण रूपादिबोधकद्रव्यत्वमात्रं हेतुरित्यपि निरस्तम्। तद्व्यनक्ति—**भवतीत्यादिना**। आदिशब्देन प्रमात्रादिसंग्रहः। अञ्जनस्य शक्ये प्रतिबन्धकनिवर्तकत्वमात्रमिति चेन्न; अशक्ये गूढनिदर्शनादौ शक्त्याधानेन सहकारित्वदृष्टेः। शक्त्याधानं हि सहकारीति चेन्न; दीपादावपि तथा क्लृप्तिप्रसङ्गात्। सत्तयैव हेतुत्वं तत्र दृष्टमिति चेदत्रापि तथाऽस्तु; अविशेषात्। ये च तत्तदिन्द्रियदोषैरपि रूपादिधीरस्तीति मत्वा * शरीरयोगे सत्येव साक्षात्प्रमितिसाधनमिति लक्षयन्ति; तन्मते तत्तद्दोषैरप्यनैकान्त्यम्। तेषां तैजसत्वानभ्युपगमात्। दन्तान्तस्तोयदृष्टान्तश्चायुक्तः; विषयसंस्कारकस्य व्यञ्जकत्वायोगात्। न हि ग्रस्यमानं किंचिदसंस्कृत्य दन्तान्तस्तोयस्योपकारकत्वम्; तावता च रसव्यञ्जकत्वे रसगन्धाद्युद्भवहेतोरग्न्यादेरपि किं तन्न स्यात्? वायुश्च वेगेनाभिघ्नन् सूक्ष्मान्सलिलकणानन्तश्शरीरं प्रवेशयति। शैत्यं तु तेषां त्वगिन्द्रियप्रवेशवैषम्याद्विशदमनुभूयते। तावता स्पर्शव्यञ्जकत्वे गन्धोपकारकस्य तस्य तद्व्यञ्जकत्वमपि किं नेष्यते? तथा च घ्राणपार्थिवत्वानुमानं दुःस्थमिति। एवं चतुर्णां भौतिकत्वासिद्धौ तद्दृष्टान्तेन श्रोत्रभौतिकत्वानुमानान्यपि च्छिन्नमूलानि। आकाश इन्द्रियारम्भक इति चायुक्तम्। श्रोत्रस्य त्वन्मते तदारब्धत्वाभावात्। भूतत्वादिति च घटादिभिरनैकान्तिकम्। किंचात्र लोकसिद्धनयनबुद्बुदादिपक्षीकारे रूपादिविशेषैस्तेषां पार्थिवत्वसिद्धेः कालात्ययापदेशः। अनुमानतस्त्विन्द्रियसिद्धिरशक्येति वक्ष्यते। सामान्यतो दृष्टादधिष्ठानातिरिक्तेन्द्रियसिद्धावपि तदाहङ्कारिकत्वं श्रौतमबाध्यम्। इन्द्रियाण्यहङ्कारविशेषा इति हैरण्यगर्भोक्तिरपि तदाहङ्कारिकत्वानुगुणा; अतः श्रुतिसिद्धपक्षीकारेऽपि बाध एव। प्रतिप्रयोगाश्च—बाह्येन्द्रियाण्यभौतिकानि इन्द्रियत्वात्, मनोवत्। प्रत्येकपक्षीकारेण वा चक्षुरतैजसमित्यादि; तावेव हेतुदृष्टान्तौ; परस्परं वा घ्राणादयो दृष्टान्ताः। विपक्षे बाधकसदसद्भावश्च समः, यत्किंचिद्दृष्टान्तमात्रानुसारेण प्रसङ्गस्य सुलभत्वादिति। परोक्तानुमानानामागमबाधमभिप्रेत्याह—**अक्षा-**

हङ्कारिकत्वमिति । श्रुतिपथनिपुणैः—मनुपराशरपाराशर्यादिभिः । घोषितं—बहुषु प्रदेशेषु स्पष्टोक्तं नैव बाध्यम्—अशक्तैरनुमानैरन्यपरैश्च वाक्यैरिति शेषः ॥ ३४ ॥

तन्मात्रेष्विन्द्रियाणां श्रुतिरिह न लयं वक्ति किंतु प्रवेशं
नो चेत्पृथ्व्यादिवाक्येष्विव हि लयपदं व्योम्नि चाक्षेषु च स्यात् ।
भूतैराप्यायितत्वात्क्वचिदुपचरिता भौतिकत्वोक्तिरेषा-
मन्नाप्तेजोमयत्वं श्रुतिरपि हि मनःप्राणवाचामुवाच ॥ ३५ ॥

ननु *इन्द्रियाणि तन्मात्रेष्विति श्रुत्या भौतिकत्वममीषां भातीत्यत्राह—**तन्मात्रेष्विति** ॥ पूर्वापरपर्यायेष्विव आकाशेन्द्रियादिपर्याययोर्लयो न पठ्यते । न चात्रानुषङ्गः कार्यः; सति गत्यन्तरेऽध्याहारवत्तस्याप्ययोगात् । अन्यथा द्वितीयादिषु सर्वेषु पर्यायेष्वप्यनुषङ्गेण भाव्यम्; वैरूप्यायोगात् । इन्द्रियाणामाकाशप्रकृतित्वं च सर्वोपबृंहणविरुद्धम् । अस्यां चोपनिषदि भूतादेराकाश आकाशाद्वायुरित्यादिः सृष्टिक्रम उक्तः । *षोडश विकारा इति श्रुतेश्चासामञ्जस्यं स्यात् । अतो वरमधिकरणत्वोक्तिमात्रानुसारादाकाशस्येन्द्रियेषु, तेषां चाकाशारम्भकतन्मात्रेषु प्रवेशविशेषाभिधानमित्यभिप्रायेणाह—**किंतु प्रवेशमिति** । अयं भावः—यद्यप्याकाशस्येन्द्रियैः प्रागपि संबन्धः, तथाऽपि तत्तदिन्द्रियाप्यायकभूतांशानां स्वकारणलयक्रमात् आकाशदशापन्नत्वात्तदानीमिन्द्रियेष्वाकाशस्यैव संसर्गः । अनन्तरमाकाशे च शब्दतन्मात्रावस्थे तानीन्द्रियाणि शब्दतन्मात्रसंसर्गीणि भवन्ति । अतस्तन्मात्रान्तराणामपि तदवस्थापत्त्या तत्तदंशभेदविवक्षया बहुवचनोपपत्तिः । अतः *तन्मात्राणि भूतादौ लीयन्त इत्यपि बहुवचनं गतार्थम् । [अत्रैवं व्याख्यातम्—इन्द्रियाप्यायकभूतांशानां सर्वेषामाकाशतापन्नत्वादाकाशस्यैव इन्द्रियसंसर्ग आसीत्; पञ्चानामपि भूतानां शब्दतन्मात्रापन्नत्वादिन्द्रियाणि शब्दतन्मात्रांशभेदेषु संसृष्टान्यासन्निति ।] एवमनभ्युपगमे वाक्यवैरूप्यदोषं व्यनक्ति—**नो चेदिति** । ननु *श्रोत्रं नभो घ्राणमुक्तं पृथिव्या इत्यारभ्य *वाय्वात्मकं स्पर्शनमामनन्ति इत्युच्यते; *नभः श्रोत्रं च तन्मयम् इत्यादि च । अत आहङ्कारिकत्ववाक्यं परम्परया नेयमित्यत्राह—**भूतैरिति** । तदिदं व्यवस्थापितं **वेदार्थसंग्रहे**—*भूतैस्त्वाप्यायनं महाभारत उच्यते इति । इममेव न्यायम् *अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक् इत्यादिष्वपि योजयितुमाह—**अन्नाप्तेजोमयत्वमिति** । न खलु हैतुकैरपि मनसः पार्थिवत्वं कल्प्यते; वायुरूपस्य प्राणस्याप्यत्वम्; तस्मादाप्यायनपरत्वमेव तत्र वाच्यम्, एवमन्यत्रापि । *अग्निर्वाग्भूत्वा मुखं प्राविशत्, आदित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशदित्यादिषु तत्तद्देवताधिष्ठाने तात्पर्यम्; *अग्निं वागप्येति इत्यप्ययश्रुतिश्चाधिष्ठातृदेवतांशापक्रमणपरेत्यभाष्यत । *ओषधीर्लोमानीत्यादिना अनपियद्भिर्लोमादिभिस्सह पाठात् ॥ ३५ ॥ **इतीन्द्रियाणामभौतिकत्वाहङ्कारिकत्वे** ॥

रूपादिज्ञानसिद्धौ यदि करणतया कल्पनं धीन्द्रियाणां
तद्वद्वत्यादिकर्मस्वपि करणतया सन्तु कर्मेन्द्रियाणि ।
कर्मज्ञानाक्षहेत्वोस्समपरिहरणा ह्यन्यथासिद्धिशङ्का
तस्मादेकादशाक्षाण्यपि निगमविदो मन्वते न्यायपूर्वम् ॥ ३६ ॥

अथ मनष्षष्ठान्येवेन्द्रियाणि, वागादिष्विन्द्रियशब्दो भाक्त इति वदतः प्रतिबन्दिपूर्वकेण प्रमाणेन प्रतिक्षिपति—**रूपादीनि** ॥ अयं भावः—यद्यागमः प्रधानीक्रियेत तदा *इन्द्रियाणि दशैकं चेति व्यवतिष्ठेत । यदा तु क्रिया करण-

पूर्विकेति व्याप्त्या रूपादेः सुखादेश्चोपलब्धिः, स्मृतिश्च क्रियात्वात्करणपूर्विकेति कल्प्येत; तदा वचनादानादिक्रियाऽपि तत्पूर्विका कल्प्या स्यात्। अथ तावताऽधिष्ठानातिरिक्तं न सिध्यतीति मन्यसे, ज्ञानेन्द्रियेष्वपि तथैवाल्लकादिभिरधिष्ठानैश्च सिद्धसाध्यता। गोलकादिसद्भावेऽपि कदाचित् कार्यं न जायते इत्यतिरिक्तसिद्धिरिति चेत्; समं वागादावपि। सामग्रीवैकल्यात् प्रतिबन्धकाच्च तत्र तथेति चेत्; चक्षुरादावपि तथैव। सत्यप्यालोकादौ दोषादर्शनेऽपि गोलकादितः कदाचित्कार्यं न जायत इति चेत्, तदपि समम्। दोषस्सूक्ष्मस्तत्रेति चेत्; अत्राप्येवमस्तु। ज्वालाव्रातबीजन्यायेन विशेषादर्शनेऽपि दोषस्य कल्प्यत्वात्, कल्पितेऽपि ह्यतीन्द्रिये तदानीं तद्भ्रंशहेतुस्सूक्ष्मो दोषस्त्वयाऽप्यङ्गीकार्यः। अन्यथा कथं कर्मेन्द्रियक्लृप्तेरन्यथासिद्धिः? ननु च यदि चक्षुर्गोलक एवेन्द्रियम्, कथं तर्हि दूरस्थं व्यवहितं वा न प्रकाशयति? इत्थम्—यथाऽयस्कान्तादेरव्यवहितानतिविप्रकृष्टाकर्षकत्वं, तथेह प्रकाशकत्वम्। आभिमुख्यविशेष एव च बाह्यैरुक्तस्संबन्धोऽस्तु। नन्वयस्कान्तादिवदाभिमुख्याभावेऽपि दर्पणादिभिः स्वमुखादेः पश्चाद्भागवर्तिनां च दर्शनं कथं स्यात्? भवतो वा कथम्? चाक्षुषस्य तेजसः प्रतिलोमवृत्त्येति चेत्; सा कुड्यपाषाणादौ कथं न जायते? मणिसलिलदर्पणादिषु च कथं भवति? अपर्यनुयोज्यतत्तद्वस्तुस्वभावविशेषादिति चेत्; अस्तु तर्हि स एव सन्निधिविशेषसामर्थ्यादनभिमुखवस्तुनिदर्शनस्य हेतुः। द्रव्यान्तरकल्पनाद्वरं सिद्धद्रव्यसामर्थ्यविशेषस्य प्रतिफलनादौ संमन्तव्यस्य कार्यान्तरयोजनामात्रम्। अतो धीन्द्रियाणां कल्प्यत्वे कर्मेन्द्रियाणामपि क्लृप्तिरनिवार्या; अन्यथासिद्धिशङ्कापरिहारौ च समाविति। तदेतत्सर्वमभिप्रेत्याह—**कर्मेति**। त्यज्यतां तर्हि वर्गद्वयमिति **चार्वाको**त्थानं प्रतिरुणद्धि—**तस्मादिति**। अतीन्द्रियेन्द्रियकल्प्यत्वासंभवादप्राप्ते च शास्त्रस्यार्थवत्त्वादिति भावः। निगमविद इत्यनेन श्रुतिस्मृत्यनुविधानसूचनम्। *एका कन्या दशेन्द्रियाणि इत्यादेर्न हि कश्चिद्बाधो दृश्यते। नच **कणभक्षाक्षपादाद्य**नुसारेण षट्कावच्छिन्नेन्द्रियलक्षणक्लृप्तिर्युक्ता। यथाऽऽहुः—

सिद्धानुगममात्रं हि कर्तुं युक्तं परीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्तनम् ॥ इति ॥

वक्ष्यते चानुवृत्तं तल्लक्षणं सात्त्विकाहङ्कारोपात्तत्वम्। न च कर्मेन्द्रियाणां तन्त्रान्तरसिद्धं राजसत्वमनुमन्तव्यम्; शब्दप्रमाणके यथाशब्दं व्यवस्थापनात्। **साङ्ख्यै**रप्यत्र शास्त्रमेवानुसृतम्—* सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारादिति। साधितं च **सप्तगत्यधिकरण**सिद्धान्ते हस्तादीनामपि तादृशमिन्द्रियत्वं न्यायपूर्वम्। * क्रिया करणपूर्विकेति व्याप्त्यनुसारेण तत्तत्करणमात्रानुमानेऽपि अलौकिकविशेषप्रतिपत्तिश्शास्त्रत एवेति भावः। एवं च शास्त्रयोन्यधिकरणे **भाष्यम्**—* अतीन्द्रियेऽर्थे शास्त्रमेव प्रमाणमिति। चन्द्रबिम्बपरभागादिषु व्यवधानविप्रकर्षादिभिरस्मदादीन्द्रियग्रहणानर्हेषु नानुमानम्; तस्य पक्षाश्रयहेतुधर्मव्यापकान्वयमात्रातिरिक्तेषु प्रवृत्त्ययोगात्, साध्यसामान्यस्य तु विवक्षितविशेषविरुद्धव्याप्तत्वेन तदाकर्षकत्वायोगात्। अतोऽतीन्द्रियध[र्मि]र्मकल्पनाद्वरं दृष्टेषु केषुचिद्वैषम्यमात्रस्वीकार इति तात्पर्यम् ॥ ३६ ॥ **इत्येकादशेन्द्रियसिद्धिः ॥**

सांख्यैस्त्रेधोक्तमन्तःकरणमिह मनोबुद्ध्यहङ्कारभेदा-
चित्तं चान्ये चतुर्थं विदुरुभयमसत्तादृशश्रुत्यभावात्।
तत्तत्त्वोक्तिमात्रं न हि करणभिदामाह क्लृप्तिस्तु गुर्वी
बुद्ध्याद्याख्या निरूढा क्वचिदिह मनसो वृत्तिवैचित्र्य[मात्रा] योगात् ॥ ३७ ॥

उक्तेष्विन्द्रियेषु एकमेवान्तःकरणमिति तत्त्वम् । सांख्यास्त्वाहुः—* करणं त्रयोदशविधम् ; * अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् इति । अन्ये तु चित्ताख्यमप्यन्तःकरणमन्यदाहुः । तदनुभाषते—**सांख्यैरिति** ॥ तदिदं मतद्वयं निष्प्रमाणकमित्याह—**उभयमसदिति** । कथमित्यत्र श्रुत्या कल्पनया वा तत्सिद्धिरिति विकल्पे प्रथमस्यासिद्धिमाह—**तादृशेति** । ननु तान्यपि त्रीणि **सुबालोपनिषदि** पृथिव्यादितत्त्वपङ्क्तौ मनसोऽनन्तरं पठ्यन्त इत्यत्राह—**तत्तदिति** । अयं—भावः—न हि तत्त्वपङ्क्तिपाठमात्रान्मनस्सहपाठमात्राद्वा करणत्वं सिध्येत् ; तथा सत्यव्यक्तादीनामपि तत्प्रसङ्गात् इति । द्वितीयं दूषयति—**क्लृप्तिरिति** । एकस्यैव हि मनसः स्मृत्यनुभवभेदेन वा संकल्पविकल्पभेदेन वा वृत्तिभेदमन्येऽप्याहुः । श्रूयते च * कामस्संकल्प इत्यादौ * एतत्सर्वं मन एवेति । अत्र * आयुर्घृतमित्यादिवत्सामानाधिकरण्यम् । पुरुषधर्मा एव हि वस्तुतः कामादयोऽध्यवसायादयश्च । तदिह पुरुषबुद्धिभेदनियतसामग्रीभेदव्यवस्थितं वृत्तिभेदमात्रं न करणभेदकल्पकमिति भावः । ननु * चक्षुश्च द्रष्टव्यं च नारायण इत्यादिना पञ्चज्ञानेन्द्रियाण्युक्त्वा * मनश्च मन्तव्यं च नारायणः, बुद्धिश्च बोद्धव्यं च नारायणः, अहङ्कारोऽहङ्कर्तव्यं च नारायणः, चित्तं च चेतव्यं च नारायण इत्याम्नातम् । अनन्तरं चैवं कर्मेन्द्रियाण्यधीतानि । अतः करणगणमध्यपाठादग्रप्रायनयेन बुद्ध्यादीन्यपि करणानि स्युरित्यत्राह—**बुद्ध्याद्याख्येति** । तथा च **भाष्यम्**—*अध्यवसायाभिमानचिन्तावृत्तिभेदान्मन एव बुद्ध्यहङ्कारचित्तशब्दैर्व्यपदिश्यते इति । अतस्तत्त्ववर्गमध्ये मनोनन्तरं बुद्ध्यादिचित्तान्तपाठोऽपि मनस एव हि वृत्तिभेदविशिष्टस्येति नेतुं शक्यम् । न च चित्तं नाम तत्त्वान्तरं सृष्टिप्रलयप्रकरणेषु पठ्यते । *अयमेव त्वहङ्कार उत्कृष्टजनावमानहेतुरित्यादि**प्रथमसूत्रभाष्य**महमर्थहेयत्वनिरासपरतयाऽन्यार्थम् ; अन्वारुह्याप्युपपत्तेः । अनुग्राहकत्वमात्रेण परम्परया वा गर्वहेतुत्वोक्तेरविरोधादिति ॥ ३७ ॥ **इत्यन्तःकरणवैविध्यभङ्गः** ॥

एकं तत्तत्प्रदेशप्रतिनियततया शक्तिभेदं प्रपन्नं
देहव्यापीन्द्रियं चेत्प्रथममिह भवेदागमेनैव बाधः ॥
नो चेत्स्यादेहभेदप्रतिनियततया सर्वजन्तोस्तदेकं
भेदाम्नानादक्लृप्तेरपि न च भजते देह एवेन्द्रियत्वम् ॥ ३८ ॥

नन्वेवं बाह्यकरणभेदोऽप्यपोहितुं शक्यः, मनोवदेकस्य वृत्तिभेदात्पृथक्कार्यव्यपदेशोपपत्तेः । आहुश्च बाह्यैकदेशिनः—*एकैकदेहेष्वेकमेवेन्द्रियम् । प्रदेशभेदैस्तु रूपादिप्रकाशनशक्तिनियमः । षडायतनागमोऽपि तथैव व्यवस्थाप्यः, स्वरूपभेदप्रयोजनाभावात् । * कल्प्यते शक्तिभेदश्चेच्छक्तिरेवेन्द्रियं भवेत् इति चायुक्तम्, धर्मिकल्पनातो वरं हि धर्मकल्पनम् । प्रदेशानामेव तत्तत्करणत्वोपपत्तौ प्रदेशिक्लृप्तिरनर्थिकेति चेन्न ; देहव्यापिनः स्पर्शस्योभयसंमतेः, तस्य च करतलप्रकोष्ठास्यनेत्रादिषु स्पर्शग्रहणशक्तिवैषम्यदृष्टेः । अतश्चैकस्यैव सर्वत्र देहे स्पर्शनत्वम्, तत्रतत्र चक्षुरादित्वं चेति । तदेतदाह—**एकमिति** ॥ किमेकेन्द्रियस्य श्रुतस्य कल्पितस्य वा शक्तिभेदव्यवस्थापनमिति विकल्पमभिप्रेत्याद्यं दूषयति—**प्रथममिति** । बाधस्य दूषणान्तरादौर्द्धल्यसूचनाय प्राथम्योक्तिः । आगमेनैव-धर्मिग्राहकेणैवेत्यर्थः । गौरवदोषश्च क्लृप्तिपक्षे वक्तव्यः, नासत्पक्ष इति चाभिप्रेतम् । इन्द्रियक्लृप्तिः प्रागेव निरस्ता । अत्र तदेकत्वक्लृप्तावतिप्रसङ्गमाह—**नो चेदिति** । यथैकमेवाकाशं तत्तत्पुरुषादृष्टोपार्जितकर्णशष्कुल्यवच्छेदभेदैः प्रतिपुरुषं व्यवस्थितोपकारकमिति **वैशेषिकादिभिः** कल्प्यते, तथा त्वयाऽप्येकमेवेन्द्रियं तत्तद्भोगायतनभेदनियतशक्तिकं सर्वोपकारकं कल्प्यमिति

भावः । न चैवमस्त्विति वाच्यम् ; अपसिद्धान्तात् । ननु च नानादेहमध्येषु वसतः कथमेकत्वमिति चेत्; चक्षुर्गोलका-द्यवच्छिन्नानामिन्द्रियप्रदेशभेदानां कथम्? न कथञ्चिदिति चेत्तर्ह्यनेकेन्द्रियवादः । पुञ्जैकत्वमस्त्विति चेत् किमतः? ग्राह्य-कांशानां मिथो[भिन्न]विभक्तत्वात् । न च तता तदन्यस्य न च तस्य ततोऽन्यता । सत्ताद्यैर्जैनवद्वाच्या सर्वमानविरोधतः ॥ स्पर्शनस्य पुञ्जस्य भागाश्चक्षुरादय इत्यप्यसत्; नियामकाभावात् । अत्रावयविसामान्यसादृश्यापोहादिभिरैक्यकल्पने अपसिद्धान्तातिप्रसङ्गौ, देहातिरिक्तेन्द्रियकल्पनं चास्मिन्पक्षे अपार्थम् । न ह्यत्र दृष्टहानिरदृष्टकल्पना वा; कुतस्तद्गौरवम्? अतिरिक्तेन्द्रियकल्पनेऽपि देहावयवानां नियतोपकारकत्वमिष्यते । अस्तु तर्ह्ययमेव पक्ष इत्यत्राह—**भेदाम्नानादिति** । अयं भावः—भौतिकाद्देहात् इन्द्रियाणां सात्त्विकाहङ्कारोपादानकत्वेन भेदाम्नानात्—क्लृप्तिप्रसङ्गाभावात् बाधाच्च मुधाऽत्र लघुपक्षोक्तिरिति ॥ ३८ ॥ **इत्यैकेन्द्रियवादभङ्गः** ॥

सूक्ष्माण्येकादशाक्षाण्यपि न यदि कथं देहतो निष्क्रमादि-
श्चित्ताणुत्वे तु सर्वेन्द्रियसमुदयने धीक्रमोऽप्यस्तु मानम् ।
वृत्त्याऽक्ष्यादेर्द्वीयः प्रमितिजनकता वृत्तिराप्यायनार्थैः
भूतैर्जातः प्रसर्पः श्रुतिमितमपि चानन्त्यमेषां स्वकार्यैः ॥ ३९ ॥

यदेतेष्विन्द्रियेषु मनसः कैश्चिन्नित्यत्वमुक्तम्, तदिन्द्रियोत्पत्तिश्रुत्यैव निरस्तम् । प्रकृत्येकदेशपरिणतिर्मन इति सिद्धे विभुत्वानुमानानि च बाधितानि । यत्तु मनो विभु सर्वदा स्पर्शरहितद्रव्यत्वात्, ज्ञानासमवायिसंयोगाधारत्वात्, नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादात्मादिवदित्यादि ; तदेतत्सर्वमात्माणुत्ववादिनं प्रति न शोभते । ज्ञानासमवायिसंयो-गाधारत्वं चात्ममनसोरसिद्धम्; ज्ञाननित्यत्वस्य साधयिष्यमाणत्वात् । नित्यत्वे सति द्रव्यानारम्भकद्रव्यत्वादित्येतच्चोत्पत्ति-श्रुत्याऽपहृतविशेषणम् । द्रव्यानारम्भकत्वं च भवतामवयव्यनारम्भकत्वम्, तच्चास्माकमणुष्वपि विद्यते । यदपि सर्वदा विशेषगुणशून्यद्रव्यत्वात्, कालवदिति; असिद्धमिदमौपनिषदानाम्, त्रिगुणद्रव्ये मनसि सत्त्वादिविशेषगुणसंमतेः । दूर-स्थस्मृत्या मनोविभुत्वं कल्प्यमिति चेन्न; अनुभवसंस्कारप्रत्यासत्त्यैव तदुपपत्तेः । एवमन्यदपि । तदिहैकादशानाम् *अणव-श्चेति सूत्राभिप्रेतमविभुत्वमातिष्ठते—**सूक्ष्माणीति** ॥ विपक्षे बाधकं वदन्नेवात्र प्रमाणमाह—**न यदीति** । परोक्तानुमानानां च विपक्षे दण्डश्च नास्ति; सर्वत्र कार्योपलब्धेरिन्द्रियान्तराणामिव मनसोऽपि संचारादप्युपपत्तेः । *तमुत्क्रामन्तम्, *शरीरं यदवाप्नोति इति श्रुतिस्मृतिसंवादाच्च; आदिशब्देन देहान्तरावाप्तिगत्यागतिसंग्रहः । न चैतेषां जीववदणुत्वं विशेषतो दृश्यते; तथा सति श्रोत्रादीनामनेकाधिष्ठानवर्तित्वम्, स्पर्शनरसनयोश्च पृथुप्रदेशव्यापित्वं न स्यात्; सिद्धेऽपि ह्यणुत्वे विकासशक्त्या वृत्तिविशेषद्वाराऽऽप्यायकप्रचयाद्वा पृथुत्वमङ्गीकार्यम् । अन्यथा पिपीलिकादिशरीरस्थस्य स्पर्श-नस्य गजादिशरीरप्रवेशे तादृशपृथुत्वासिद्धिप्रसङ्गात्; गजादिभ्यः कीटादिशरीरप्रवेशे तु तादृशस्सङ्कोचः । मनसस्तु परमाणुत्वेऽपि सद्वारकविषयसंबन्धसिद्धेरविरोधः । तत्र *युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति परोक्तं मनोविभुत्ववाद-प्रतिषेधोपयोगादनुमन्यते—**चित्ताणुत्वे त्विति** । अयं भावः—व्यासङ्गदशायां समग्रैरपि बाह्येन्द्रियैर्युगपज्ज्ञानानि नोत्प-द्यन्ते । दीर्घशष्कुलीभक्षणादिषु च व्यासङ्गदृष्टान्तेन धीक्रमोऽनुमेयः । क्रमभाविकारणान्तरसापेक्षो ह्यसौ; न चादृष्ट-भेदोऽपेक्ष्यः, तस्य दृष्टोपहारेण चरितार्थत्वात्; अन्यथाऽतिप्रसङ्गात् । प्रतिबन्धकाभावे ह्यदृष्टोपनीतदृष्टसामग्र्यैव कार्य-सिद्धिर्नियता । तदिह कारणान्तरं यदि विभु स्यात् युगपदनेकेन्द्रियसंबन्धितया युगपत्पञ्चविषयज्ञानोत्पत्तिप्रसङ्गः; एवं

देहपरिमाणत्वेऽपि । न च मनसस्ततोऽपि सूक्ष्ममध्यमपरिमाणत्वे प्रमाणमस्ति । विभुनोऽपि मनसः केनचिच्छरीरावयवेनावच्छिन्नतयैव कार्यकरत्वमिति चेन्न; तस्य निष्कम्पत्वेऽन्यत्र कार्याभावप्रसङ्गात् । सञ्चारित्वे तु तादृशवेगवतस्तस्य देहातिरिक्तत्वमणुत्वं च साधीयः ; किमन्तर्गडुना व्यापकेन मनसा? यस्तु सर्वेषां देहावयवानां यथासंभवमवच्छेदकत्वं ब्रूयात्; तस्य प्रागुक्तप्रसङ्गानतिवृत्तिः, अतिगौरवं च । यद्येवमिन्द्रियाणि देहान्तःस्थानि त[दा]था कथं चक्षुश्श्रोत्रयोर्दूरस्थग्राहकत्वमित्यत्राह—**वृत्त्येति** । वृत्तिद्वारा संबन्धादित्यर्थः । ननु वृत्तिर्यदि स्वरूपं देहपरिच्छिन्नत्वान्न दूरस्थे वृत्तिः, धर्मोऽपि न धर्मिणमतिवर्तेतेत्यत्राह—**वृत्तिरिति** । भूतैः सहेति वा चारैः पश्यन्तीतिवद्वा योज्यम् । यद्यप्यप्राप्यकारित्वं हैतुकगत्या हठात्कारेण वक्तुं शक्यम्; तथाऽपि * दिवीव चक्षुराततमित्याद्यागमिकव्यवहारस्वारस्यबाधाभावाद्वृत्तिद्वारा प्राप्त्युक्तिः । नयनरश्मिगतितत्प्रतिघातादिकं च भाष्योक्तम् । ननु प्राणशब्दनिर्दिष्टानीन्द्रियाणि प्रक्रम्य * सर्व एवानन्ता इति श्रुत्या सर्वेषामिन्द्रियाणां विभुत्वं ग्राह्यमित्यत्राह—**श्रुतिमितमिति** । यथोक्तं **भाष्ये**—* हृदयस्थानां चेन्द्रियाणां तत्तन्नाडीभेदैस्तत्तत्प्रदेशविशेषप्रसर्पात् तत्रतत्र कार्यकरत्वं चावधातव्यम् । अत्र * सर्वे प्राणा अनूत्क्रामन्तीति श्रुतेस्सङ्कोचकाभावात् * मनषष्ठानीत्यादेश्च न्यूनसंख्याव्यवच्छेदमात्रेणाप्युपपत्तेः, कर्मेन्द्रियाणां प्रतिशरीरमुत्पत्तिविनाशं व्यष्टिसमष्टिभावराहित्यं च वदन्तः प्रत्युक्ताः ॥ ३९ ॥ **इतीन्द्रियाणां सूक्ष्मत्वम्** ॥

प्राप्यग्राहीन्द्रियत्वाद्विमतमितरवत्प्राप्तिरुक्तप्रकारा
वृत्तिं दृष्टेर्निरुन्धे विरलपटनयादम्बुकाचादिरच्छः ।
नो चेद्दृश्येत योग्यं सममिह निखिलं निष्फले छादकादौ
स्थैर्ये तद्योग्यभावो न हि गलति समा सन्ततिस्त्वन्मतेऽपि ॥ ४० ॥

यदुक्तं * वृत्त्याऽक्ष्यादेर्दवीयःप्रमितिजनकतेति, तत्र बाह्यैरेवमुच्यते—वृत्तिप्रसरणे क्रमयौगपद्यविकल्पायोगाद्दूरस्थविषया प्राप्तिर्न भवतीति ; अतो यद्रूपग्राहकं यच्छब्दग्राहकमिन्द्रियं तदप्राप्यग्राहि यथा मन इति; तत्र तावत् प्रत्यनुमानमाह—**प्राप्येति** ॥ ननु गृह्यमाणस्य वर्तमानक्षणस्य पूर्वक्षणवर्तीन्द्रियसंबन्धायोगादिन्द्रियान्तराणामप्यसंबन्धग्राहकतया साध्यविकलो दृष्टान्तः । मैवम्; क्षणभङ्गकुसृतेः प्रागेव निरासात् ॥

अतिप्रसङ्गोऽसंबन्धग्रहणे स्यात्समं त्विदम् । संबन्धग्रहणेऽपीति न सद्योग्यान्वितग्रहात् ॥
गृहीतस्येष्यते कश्चित्संबन्धो व्यभिचारतः । न संबन्धस्य सर्वस्य ग्रहणं व्यभिचारतः ॥

नात्र कर्मेन्द्रियैरनैकान्त्यम्, यथास्वं व्यापारेण स्पृष्टग्राहिशब्देन विवक्षितत्वात्; तस्य च सर्वत्र प्राप्तविषयत्वात् । न च मनसा, तस्यापि बाह्येन्द्रियद्वारा बहिर्विषयप्राप्तेः ; यद्वा बाह्यज्ञानेन्द्रियत्वादिति मनःकर्मेन्द्रियव्यवच्छेदः । ननु उन्मिषितमात्रं चक्षुश्चन्द्रं गमयति । न चैकस्मिन्क्षणे तावान्देशो वृत्त्या लङ्घयितुं क्षमः । क्रमे तु प्रतिपरमाण्ववच्छेदं विलम्ब्य गमनात् प्रतीतिरपि विलम्बेत, दूरासन्नग्रहणकालतारतम्यं च स्यात् । मैवम् ; उदयत्येव सवितरि सकलदिग्व्यापिन्यां प्रभायामिव इन्द्रियवृत्तेस्तादृशवेगातिशयस्याविस्मयनीयतया पद्मपत्रशतवेधनीत्या यौगपद्याभिमानोपपत्तेः । ननु सिद्धे गमने यौगपद्याभिमानक्लृप्तिः, नात्र तत्सिध्यतीति चेन्न ; स्वाभ्युपगतसाम्यात् । बुद्धिसन्ततेश्शरीरान्तरगमनं दीपालोकादिगमनं च दृष्टं कल्प्यं वा? नाद्यः, त्वयाऽप्यनभ्युपगमात् । द्वितीये तु तथेहापि किं न स्यात्? न देहान्तरादौ गतिः प्राप्तिर्वा । किंतु तत्रतत्र देशकालनैरन्तर्येणोत्पत्तिमात्रमिति चेत्तथेहापि त्वया कल्प्यताम्; अविशेषात् । ननु प्राप्तिः कल्प्या,

तदभावस्त्वनुपलम्भमात्रेण सिध्यतीति चेन्न ; योग्यानुपलब्धेरभावात् । अतीन्द्रियस्य हि प्राप्तिरपि तथैव । अतो नात्र बाधशङ्का । ननु दूरस्थत्वाद्विषयेन्द्रिययोः प्राप्तिर्बाधितेत्यत्राह—**प्राप्तिरिति** । वृत्तिद्वारेति शेषः । उक्तप्रकारेति पुनरनुवचनं वाद्यन्तरोक्तप्राप्तिप्रकारनिरासार्थम् । अथापि क्वचिद्व्यवहितग्रहणदर्शनात्प्रमाणतस्तर्कतश्च बाधः स्यादित्यत्राह—**स्वच्छमिति** । अच्छः—आलोकाद्यनुप्रवेशानुगुणसन्निवेशवानित्यर्थः । दृश्यते ह्यनाविलसलिलतलप्रविष्टस्सूर्यालोकः ; तत्रत्यं च तत्प्रतिफलनदीप्तं शिलाविशेषादि । यथावत्प्रसरमत्यन्तनिरोधं च परिहर्तुं विरलपटनिदर्शनम् । अत एव हि तत्राविशदप्रतिभासः । सरन्ध्रत्वे स्फटिकादिषु सलिलगलनादिप्रसक्तिः स्यादिति चेन्न ; आलोकप्र[वे]काशवत्सु सर्वेषु सलिलप्रवेशस्य त्वया दुर्वचत्वात् । अच्छिद्रपरुवकसंपुटस्थगितकर्पूरकस्तूरिकादिगन्धनिस्सरणन्यायाच्च द्रव्यविशेषप्रवेशानुगुणसन्निवेशवत्त्वं काचादेरङ्गीकार्यम् । अप्राप्यग्रहणेऽपि हि कुड्यादिव्यवहितं न ग्राह्यम् ; काचादिव्यवहितं तु ग्राह्यमिति वस्तुस्वभाववैचित्र्यं त्वयाऽपि स्वीकृतम् ।

नीरन्ध्रेऽप्यम्बुकाचादौ दृक्प्रभादेः प्रवेशनम् । वस्तुस्वभाववैचित्र्यादिति केचित्प्रचक्षते ॥

सर्वत्र स्वरूपयोग्यत्वायोग्यत्वाभ्यामेव ग्रहणाग्रहणे । तत्र छादकतदभावौ निरर्थकाविति वदतां बाधकं स्वोक्तानुमानस्य विपक्षे बाधकम् । अयस्कान्तनिदर्शनेऽपि छादकनैष्फल्येऽतिप्रसङ्गमभिप्रेत्याह—**नो चेदिति** । इह योग्यं निखिलं सर्वस्मिन् जगति स्वरूपयोग्यं सर्वं समं गृह्येत—अविशेषाद्युगपदेवेत्यर्थः । आदिशब्देन अतिदूरत्वकालविप्रकर्षादिकं दृष्टान्ततया गृह्णाति । छादकाभावः स्वरूपतस्सहकारी, न तु प्राप्तिविरोधिप्रत्यनीकतयेति चेन्न ; आलोकादिप्राप्तिविरोधिच्छत्रादिन्यायस्यात्रानपायात् । न च यत्रक्वचिच्छादकाभावः सहकुर्यात् ; अतिप्रसङ्गात् । किंतु नयनार्जवदेशे । अयं च नियमः प्राप्तिविरोधिनिवृत्तिरूपतयेति युक्तमुत्पश्य । रूपग्रहणसामग्र्यामेव प्रदीपादिछादकं प्रभाप्रतिघातार्थं दृष्टम् । उन्मीलितनिमीलितचक्षुषः पिठरकावृतदीपप्रभान्यायेन पूर्वप्रसृतनयनप्रभाया विनाशादतिक्रमाद्वा ग्राह्यग्रहणाभावः । अत्र गृहीतच्छन्नमपि गृह्येतेति प्रसङ्गारूढम् । तदा सममिति पूर्वमिवेत्यर्थः । तच्च क्षणभङ्गेन योग्यायोग्यभेदकल्पनया परिजिहीर्षतः सर्वलोकप्रसिद्ध्यनुसारिणा स्वमतेनोत्तरमाह—**स्थैर्ये इति** । अयं भावः—छादनदशायां पूर्वगृहीतस्य स्वरूपयोग्यत्वं स्थितं नष्टं वा ? आद्ये कथं न गृह्येत ? प्राप्तेरप्रयोजकत्वात् । द्वितीये नाशकं न दृष्टम् । छादकमेव स्वरूपयोग्यतानाशकमिति चेन्न ; अव्यवहितदेशस्थैरप्यग्रहप्रसङ्गात् । यं प्रति व्यवधिस्तं प्रति योग्यता नष्टेति चेत्, छादकापगमेऽप्यग्रहप्रसङ्गात् । तदपगमात्पुनरुत्पद्यत इति चेत् ; हन्त ! अदृश्यमानानन्तोत्पत्तिनाशकल्पनात् प्रतिपुरुषनियतानन्तयोग्यताभेदकल्पनाच्च वरं प्रदीपप्रभान्यायेन प्राप्तिविघातकतया छादकसाफल्यस्वीकारः । परपक्षेणाऽपि प्रसङ्गस्थैर्यमाह—**समेति** । अपिरन्वारोहद्योतकः । क्षणभङ्गपक्षेऽपि योग्यक्षणादयोग्यक्षणोत्पत्तौ कारणक्षणस्य सर्वैरदृष्टस्तत्तत्स्वरूपातिरिक्तश्शक्तिभेदो वा सहकारिभेदो वा कल्प्यः । उभयमपि स्वमतबाधकं दृष्टम् । छादकमेवायोग्यक्षणोत्पादनसहकारीति चेन्न ; अपसिद्धान्तात्, छादकस्य किञ्चित्करत्वानपायात् तोयादिव्यवहितेऽप्यग्रहप्रसङ्गात् छन्नस्य च सर्वादृश्यत्वप्रसङ्गात् नेत्रसन्निकृष्टेन पक्ष्मकरतलादिना दवीयस्तरदिवाकरे क्षणोत्पत्तेरत्यद्भुतत्वाच्च । तस्मादस्मदुक्तमेव छादकसाफल्यम् । उक्तातिप्रसङ्गस्सांख्यादिपक्षेऽपि समः । यदि ह्यहङ्कारविकारयोश्चक्षुश्श्रोत्रयोर्यावद्देशस्थविषयग्राहित्वं दृष्टं तावत्पृथुत्वं तत्तच्छरीरोत्पत्तिसमयसिद्धम्, तत्राधिष्ठानाद्बहिरवस्थितांशो वृत्तिरित्युच्यत इति, तदा निमीलनाद्यवस्थायामपि ग्राहकत्वप्रसङ्गः, प्राप्तेरनपायात् । अथ पृथ्वग्रा संतताऽपि बहिर्वृत्तिर्दीपप्रभान्यायेन विनश्यति ; अत एव

छन्नग्रहणाभाव इति ; तथात्वेऽप्येकस्यादृश्यमानपृथुत्वाणुत्वाद्यनन्तावस्था, स्वतो भिन्नाभिन्नवृत्त्यंशनाशः, तन्नाशेऽपि स्वरूपावस्थानमित्यादिबहुविधकल्पनापात इति । यत्तु कैश्चिदुच्यते—निष्क्रान्तमात्रमेव चाक्षुषं तेजो बाह्येन बहुदेशव्यापिना चन्द्रसूर्यादिज्योतिषा संवलितं तावत्प्रथिमानमवयविनमारभते, तेन च संबन्धादुन्मिषितस्य दूरस्थग्रहणं दूरासन्नयोर्युगपद्ग्रहणं च सिध्येदिति । तदयुक्तम्, निष्क्रमणकल्पनस्य गुरुत्वात् । अनिष्क्रान्तमेव किं नावयविनमारभेत, आन्तरनिष्क्रमणवद्बाह्यप्रवेशोपपत्तेः ? अपि चास्मिन्पक्षे त्रिभुवनविवरव्यापिना तेजसा सह चाक्षुषतेजस्संवलनात्तेन संबद्धं सर्वं युगपद्भासेत पश्चाद्भागादिस्थितं च । अथार्जवावस्थानमपेक्षणीयमित्युच्येत, तदाऽस्मद्व्याप्तेस्सिद्धत्वात् ; अन्यथा दर्पणतरङ्गादिसन्निधाने स्वमुखादिग्रहणं न स्याम् । किं च निमीलिताक्षस्यापि प्राङ्निष्ठ्यूतनयनमहस्संभवबाह्यालोकानुवृत्त्या दृश्यदर्शनानुवृत्तिः स्यात् । अतः प्रागुक्तप्रकारैव प्राप्तिरिति ॥ ४० ॥ **इति चक्षुरादेः प्राप्यकारित्वम् ॥**

शब्दं गृह्णाति दूराभ्युदितमपि बहिस्सन्तता श्रोत्रवृत्ति-
र्दिग्भेदासन्नतादिग्रहणमपि तदा तत्र तत्सन्निधानात् ।
इत्येकेऽन्ये तु दूरान्तिकगतजनताशब्दधीकालभेदात्
श्रोत्रायातस्य तस्य ग्रहमनुमितिमप्याहुरसिन्दिगादेः ॥ ४१ ॥

भवतु चक्षुषस्तेजसाऽऽप्यायितत्वान्मणिप्रभान्यायेन काचिद्वृत्तिः, श्रोत्रस्य त्वाकाशाप्यायितस्य सा कथमित्यत्राह—**शब्दमिति ॥** विकारिद्रव्यस्य तावत्स्वरूपत आप्यायकद्वारा वा तत्रतत्र वृत्तिरविरुद्धा । न चानुपलम्भविरोधः ; योग्यत्वाभावात् । अन्यथा स्वेष्टमपि भज्येत । तवापि हि बुद्धिसन्ततेः शरीरान्तरगमनमालोकादिगमनं च दृष्टं कल्प्यं वा ? नाद्यः, अशक्यत्वादनभ्युपगमाच्च । न द्वितीयः, तद्वदत्रापि कल्पनोपपत्तेः । न हि तत्र गतिः प्राप्तिर्वा कल्प्यते । किंतु तत्रतत्रोत्पत्तिमात्रमिति चेत्तथाऽत्रापि त्वया कल्प्यम् ; अविशेषात् । न च शब्दात्मकाः पुद्गलाः श्रवणदेशमायाता दृश्यन्त इति युक्तम् ; शब्दस्य रूपादिवद्गुणत्वोपपत्तेः पुद्गलत्वायोगात् । नापि शब्दस्यैवागमनम्, बाह्यैकेन्द्रियग्राह्यतया श्रुत्यादिभिश्च रूपादेरिवाद्रव्यस्य क्रियानुपपत्तेः । न च शब्दस्य तद्व्यञ्जकस्य वा वीचीतरङ्गकल्पना ; अत्यन्तगौरवात् । न च व्याप्तं श्रोत्रम्, युगपत्सार्वत्रिकशब्दोपलम्भप्रसङ्गात् । न च प्रतिनियतैः प्रदेशैश्शक्तम् ; नियामकाभावात् । श्रोत्रसमवायेन शब्दो गृह्यत इति पक्षस्तु इन्द्रियाणामभौतिकत्वस्थापनयाऽपास्तः । अतो यथोपलम्भं तत्तज्जन्तुषु स्ववृत्त्या तावद्देशव्याप्तं श्रोत्रं तत्तद्देशे शब्दं गृह्णातीति । एवमनभ्युपगमे दोषमभिप्रेत्याह—**दिग्भेदेति** । यदि श्रोत्रवृत्तिस्तत्रतत्र न स्यात् कथं तद्विशिष्टः शब्दो गृह्येत ? न ह्यत्र प्राच्यादिप्रतिनियतं लिङ्गं दृश्यते ; नापि दूरासन्नत्वनियतम् । अतश्शब्दस्वरूप इव तदुत्पत्तिदेशविशेषेष्वपि श्रोत्रवृत्तेः शक्तिः कार्यकल्प्या । आसत्तितारतम्यानुरोधेन विशदाविशदावभासश्च चक्षुर्वृत्तिनयेन नेतव्यः । अत्र पक्षान्तरं स्थापयितुं सांख्यानुसारिणां पक्षोऽयमिति निगमयति—**इत्येक इति** । बुद्ध्यन्तरानुगुणमतान्तरमाह—**अन्ये त्विति** । दूरस्थस्ताड्यमानभेर्या दशकोणाभिघातात्पश्चाद्विलम्बेन शब्दं शृणोति, वादकास्तदासन्नाश्चाविलम्बितम्, तदेतद्गन्धाश्रयद्रव्यविसर्पन्यायमन्तरेण कथं स्यात् ? अत एवानुवातप्रतिवातयोरतिदूरानतिदूरं च शब्दो गृह्यते ; बहिरन्तर्गृहगतानां च दूरस्थशब्दग्रहणे स्फुटास्फुटधीश्च । अतः *श्रोत्रप्रदेशायातभूतधर्मस्य शब्दस्य ग्रहणम्, तस्यायातत्वमाश्रयद्वारकम् । *शब्दगन्धसूर्यालोकरत्नप्रभादयो धर्म्यतिवर्तिनो गतिमन्तश्च इत्यात्मसिद्धिवाक्ये शब्दशब्दो गन्धशब्दवदाश्रयलक्षकः ।

गुहासौधादिसंक्षोभः प्रतिशब्दश्च जृम्भते । निस्साणादिप्रणादेन तदेतत्पक्षमञ्जनम् ॥

नन्वेवं दिगादिविशिष्टोपलम्भः कथमित्यत्राह—**अनुमितिमिति** । आदिशब्देन दूरासन्नत्वग्रहः दृष्टान्तप्रदर्शनं च ।

यथा मयूरवीणादेः शब्दोऽयमिति गृह्यते । तथा प्राच्यादिजातोऽयमिति लिङ्गात्तथाविधात् ॥

तत्र यद्यपि शब्दस्य विशेषः कोऽपि दुर्वचः । तथाऽपि विदितस्तैस्तैर्लिङ्गं स्यात्सम्मतेष्विव ॥

नन्विमौ द्वावपि पक्षौ हाठिकौ, पूर्वत्र दिगादिषु श्रोत्रस्य शक्तिकल्पनागौरवात्, उत्तरत्र दुर्वचलिङ्गदर्शनक्लेशैरिति । हन्त ! एवं वदन् किं शब्दग्रहे दिगादिग्रहणमेव नास्तीति मन्यते? सदपि वा निष्कारणकम्? सकारणमपि वा कारणान्तरसिद्धमिति? नाद्यः, सर्वलोक[धी]विरोधात्; सामग्रीवैकल्यात्तु कदाचिद्दिगादिरहितधीः । न द्वितीयः, आगन्तोरहेतुकत्वविरोधात् । न तृतीयः, आगमादेरत्रासंभवात् । भ्रान्त्याऽत्र दिगादिधीरिति चेन्न; प्रतिपुरुषनियतदिगध्यासहेतुभूतधर्मविशेषग्रहाभावात्, भावे वा तत एव तत्तदनुमानोपपत्तेः । तद्वदेव च दिगादेरप्युपलम्भोपपत्तेः । न चाबाधितांशे भ्रान्तिक्लृप्तिर्युक्ता । अतः प्रत्यक्षतोऽनुमानतो वाऽत्र दिगादिग्रह इत्यन्यतरपक्षोऽनतिक्रमणीयः । शब्दस्य नित्यविभुत्वात्तदाश्रितत्वाद्वा श्रोत्रेण नित्यसंबन्ध इति वादस्त्वद्रव्यसरे निरसिष्यते [इति] ॥४१॥ **इति श्रोत्रवृत्तिशब्दाश्रयागमनपक्षौ ॥**

प्रत्यक्षं व्योम नीलं नभ इति हि मतिश्चक्षुषैवास्मदादेः
कूपोऽसौ रन्ध्रमेतत्पतति खग इहेत्यादिधीश्चात्र मानम् ।
आधारोऽत्रातपादिर्यदि भवति कथं तस्य चेहेति बोध-
स्तस्यांशैश्चेत् त्र्यणौ तच्छिथिलगति न च व्योमवागातपादौ ॥ ४२ ॥

इन्द्रियचिन्तानन्तरं भूतचिन्ताप्राप्तौ प्रथममाकाशे चार्वाकैरपि संमन्तव्यं प्रमाणविशेषं पुरस्करोति—**प्रत्यक्षमिति ॥** कथमित्यत्राह—**नीलमिति ।** धूम्रादेरुपलक्षणमेतत् । आरोपितं नभसि तलत्वादिवन्मलिनत्वादिकमिति चेत्; असावारोपश्चाक्षुषोऽन्यो वा? आद्येऽधिष्ठानमपि चाक्षुषमेष्टव्यम्, अन्यथाऽतिप्रसङ्गात् । द्वितीयस्त्वसंभवी, निमीलिताक्षस्य तादृशारोपादृष्टेः । अत एव अनुमिते नभसि नैल्यारोप इत्यपि निरस्तम् । न च नीलं नभ इति धीरेव नास्ति; विश्वविसंवादात् । नाप्यसावचाक्षुषः, अस्मदादिचक्षुर्व्यापारानुविधानात् । नभसि विततानां पार्थिवावयवानां कृष्णगुणमात्रं चक्षुषा गृह्यत इति चेन्न, नीलं नभ इति धर्मिपर्यन्तबुद्धेः, गुणिलिङ्गत्वाच्चात्र नीलादिशब्दनाम्; एतेन नीलरूपस्मृतिप्रमोषोऽयमिति पक्षोऽपि निरस्तः । ननु नभसि स्वतो नैल्याभावात् पञ्चीकृतेऽप्यस्मिन्नैल्यस्य पार्थिवांशमात्रनिष्ठत्वात् तस्मिन्नेवांशे स्यादसौ चाक्षुषधीः । मैवम्; तस्य नभश्शब्दार्थत्वायोगात् । नीलपटन्यायस्य चात्र ग्राह्यत्वात्, बालातपसन्निधावरुणं नभ इत्यादिबुद्धेः । तत्राप्यरुणातपग्रहणमात्रमिति चेत्; कस्तर्हि तत्र नभश्शब्दार्थः? न ह्यनेकार्थोऽयं शब्दः, अनुवृत्तमनतिप्रसङ्गि च निमित्तं दुर्लभम्; पृथिव्यूर्ध्वत्वादेस्तथात्वाभावात् । चन्द्रिकादिविशेषानादरेण विरलावस्थितद्रव्यमात्रं नभ इति चेन्न; वियति विरला चन्द्रिकेत्यादिपृथग्व्यपदेशात् । वैरल्यदर्शनमपि नभःप्रत्यक्षतामन्तरेण न घटते । तत्तन्मध्यप्रदेशानां तैस्तैरस्पृष्टता हि विरलता; तथा च मध्यदेशभूतं नभः प्रत्यक्षम्; परस्परासंयोगमात्रं वैरल्यमिति चेन्न; भिन्नकालेषु गुणादिषु च विरलधीप्रसङ्गात् । वर्तमानानामासन्नदेशस्थानां द्रव्याणामसंयोगो विरलतेति चेन्न । चन्द्रिकादिष्वसंयुक्ततेजःकणानामासन्नदेशतया नभस एव ग्राह्यत्वात् । विरलविरलतरादिबुद्धौ

असंयोगाविशेषे मध्यदेशाल्पत्वभूयस्त्वग्रहणमन्तरेण का गतिः? दूरदूरतरादिस्थितिरिति चेत् तथाऽपि दूरासन्नदेशतया नभः प्रत्यक्षमेव। दिशस्तत्र देशत्वं स्यादिति चेत्, न, उपाध्यतिरेकिण्यामपि तस्यां प्रत्यक्षत्वस्य नभस्समानचर्चत्वात्। दीर्घेण ह्रस्वेन च स्प्रष्टुं योग्यत्वमेव दूरत्वमासन्नत्वं च। अतो नात्र प्रदेशबुद्ध्यपेक्षेति चेन्न; तयोस्तत्तत्स्वरूपत्वेऽतिप्रसङ्गात्। अतिरेके तु देशविशेषस्थित्युपलम्भमन्तरेण तदसिद्धेः। अत्र चाक्षुषमेवोपलम्भान्तरमप्युदाहरति—**कूपोऽसाविति**। कूपरन्ध्रादयो हि तत्तद्देशविशेषतया सर्वलोकप्रत्यक्षसिद्धाः। आवरणाभावमात्रं तु निरसिष्यते। पत्रिणश्च पतनदेशतया नभः प्रत्यक्षयामः; तत्र इहप्रत्ययस्यान्यथासिद्धिमाशङ्कते—**आधार इति**। इहेति प्रतीयमानत्वमात्रमिहाधारत्वम्। परिहरति—**कथमिति**। इह नभस्यातपादिरिति व्यतिरेकनिर्देशान्नातपादिरिहशब्दार्थः स्यादिति भावः। अत्रोदयनाद्युक्तमाशङ्कते—**तस्यांशैरिति**। आतपाद्यंशांस्तदाधारीकृत्येत्यर्थः। दूषयति—**त्र्यणाविति**। परैस्त्र्यणुकानामप्रत्यक्षद्व्यणुकाश्रितत्वस्वीकारादंशैरिह प्रतीतिनिर्वाहस्तत्र कुण्ठित इत्यर्थः। माभूत्स्वांशैः त्र्यणुकानामिहेति धीः, त्र्यणुकसमुदायमिहेति निर्दिश्य प्रत्येकं तदाधेयतयोपचर्यतामित्यत्र क्लिष्टगतौ लोकव्यवहारं प्रतिपक्षयति—**न चेति**। इह नभसि त्र्यणुकम्, इह व्योम्न्यातपः इत्यादिव्यवहारे त्र्यणुकतत्समुदायादिव्यतिरिक्ते कुत्रचिन्नभःपर्यायाणां प्रयोगः प्रसिद्धः। सर्वलोकप्रतीतिव्यवहारोल्लङ्घनं तु सर्वसंक्षोभकं साहसमिति भावः। चश्शङ्काद्योतकोऽवधारणार्थो वा॥ ४२॥

रूपस्पर्शोज्झितत्वान्न भवति गगनं दर्शनस्पर्शनार्हं
घ्राणश्रोत्रे रसज्ञाऽप्यवगमयति न द्रव्यमन्यत्त्वबाह्यम्।
तस्मान्नाध्यक्षवेद्यं वियदिति यदि न प्रत्ययस्यापरोक्ष्यात्
पञ्चीकारेण नैल्यं पटमलिनिमवद्भाषितं वोपकुर्यात्॥ ४३॥

आकाशस्य प्रत्यक्षत्वे परोक्तं बाधकं शङ्कते—**रूपेति**॥ नभो न चाक्षुषम्, रूपशून्यद्रव्यत्वात्; नापि स्पार्शनं स्पर्शशून्यद्रव्यत्वादिति हेतुद्वयविभागः। अन्येषां तु बाह्येन्द्रियाणामत्रासंभवमाह—**घ्राणेति**। घ्राणादीनि हि स्ववेद्यगुणाश्रयमपि नावगमयन्ति, किं पुनर्द्रव्यान्तरमिति भावः। मानसप्रत्यक्षमिह दूरनिरस्तमित्याह—**अन्यदिति**। तुशब्दोऽत्रात्यन्तासंभवपरः। अबाह्यम्—आत्मतद्धर्मव्यतिरिक्तेषु न स्वातन्त्र्येण प्रवर्तत इत्यर्थः। संकलितमाह—**तस्मादिति**। अस्मदादीति विशेषणीयम्। चोद्यस्य दत्तोत्तरत्वाभिप्रायेण प्रतिवक्ति—**नेति**। अभिप्रेतं व्यनक्ति—**प्रत्ययस्येति**। अयं भावः—न रूपादिविरहाच्चाक्षुषत्वादिहानिः, रूपादिप्रत्यक्ष[त्व]वद्यथादर्शनं व्यवस्थोपपत्तेः। प्रतिप्रयोगश्च—विगीतमस्मदादिबाह्येन्द्रियग्राह्यं बाह्यत्वे सत्यस्मदाद्यपरोक्षधीविषयत्वात्, अविगीतवत्। नात्र हेतुरसिद्धः, परिशेषप्राप्तेः। न तावदत्रागमिकी नभःप्रतीतिः, तदनभिज्ञानामपि संभवात्। नाप्यानुमानिकी, सिद्धेऽपि तदनुमाने अनधिगततादृशानुमानानां नभःप्रतीतेः। तदेवमाकाशस्यात्रानुमानादिविषयत्वायोगात् आबालपण्डितमनुभूयमानत्वाच्च तद्बुद्धिरपरोक्षेति सिद्धम्। नन्वसिद्धस्य सिद्धस्य वा नभसः प्रत्यक्षत्वसाधनम्? नाद्यः, अनुमानकथाबाह्यत्वात्। न द्वितीयः, अनुमानतस्तत्सिद्धेस्त्वदनभ्युपगमात्, प्रत्यक्षतस्तत्सिद्धेरस्मदनभ्युपगमादिति। मैवम्; उभयसंमतादागमतोऽपि तत्सिद्धेः। आस्तामागमः, पृथिव्याद्यतिरिक्तस्य नभःप्रतीतिविषयस्य कस्यचिदुभयसंमत्या पक्षीकारोपपत्तेः। अन्यथा कथम[न्य]त्र त्वदुक्तमप्रत्यक्षत्वानुमानं जीवेत्? सर्वलोकप्रत्यक्षविरुद्धं च तत्। तथाऽपि तत्स्वीकारे बुद्धिव्यतिरिक्ततया बाह्यार्थस्सर्वोऽप्यप्रत्यक्ष इति वदन् **सौत्रान्तिक** एव समर्थः स्यात्। तदेवं नीरूपस्यापि नभसश्चाक्षुषत्वं निर्व्याघातम्। **भाष्ये** त्वस्य पञ्चीकरणेन रूपवत्तया चाक्षुषत्वाविरोध-

वचनं वैभवात्स्यात् । यथा रूपरूपिरूपसमवेतरूपैकार्थसमवेतानां चाक्षुषत्वमविशिष्टमङ्गीक्रियते, तथा रूपिद्रव्यसंवलित-स्यापि क्वचित्स्यात् । न चातिप्रसङ्गः, समचर्चत्वात् । न हि रूपिद्रव्यं रूपैकार्थसमवेतं वा सर्वं चक्षुर्ग्राह्यम्, योग्यता-नियमस्य दुर्लङ्घत्वादिति । तदेतदभिप्रेत्याह--**पश्चीकारेणेति** ॥ ४३ ॥ **इत्याकाशस्यास्मदादिप्रत्यक्षत्वम्** ॥

शब्दस्याधारभूतं कथमपि गगनं शक्यते नानुमातुं
स्वेच्छातः पारिशेष्यक्रम इह कथितोऽतिप्रसङ्गादिदुःस्थः ।
निष्क्रान्त्यादेर्न तद्धीस्सति नभसि यतो नास्ति कुड्यादिकेऽसौ
रोधस्स्त्वावारकैश्चेत्तदभवनवशान्निष्क्रमादिश्च सिध्येत् ॥ ४४ ॥

अथाकाशस्यानुमानतस्सिद्धिं निराकरोति—**शब्दस्येति** ॥ शब्दः क्वचिदाश्रितो गुणत्वादित्येतावता तावन्न पृथि-व्याद्यतिरिक्तशब्दाश्रयसिद्धिः ; सर्वस्य किंचिद्भावात् परिशेषहेतूनां तु विपक्षे बाधकाभावात् । न हि शब्दस्य पृथिव्या-द्याश्रितत्वे किंचिदनिष्टं स्यात्; पुष्पादिगन्ध इतिवद्भेर्यादिशब्द इति सर्वलोकबुद्ध्यनुविधाने कल्पना च लघ्वी । शब्दो विभुगुणो न भवति ; बाह्येन्द्रियग्राह्यगुणत्वादिति विपरीतपरिशेषस्यापि सुशकत्वात् । स्पर्शो न पृथिव्यादिधर्मः, नीरूपे-न्द्रियग्राह्यत्वादित्यादिभिः पृथिव्याद्यतिरिक्तस्पर्शाधारकल्पनप्रसङ्गाच्च । तदेतदभिप्रेत्याह—**स्वेच्छात इति** । आदि-शब्देन विपरीतप्रसङ्गसंग्रहः । निष्क्रमणं प्रवेशनमित्याकाशलिङ्गमिति परोक्तं प्रतिवक्ति--**निष्क्रान्त्यादेरिति** । उपपाद-यति—**सतीति** । यत्राकाशस्तत्र सर्वत्र निष्क्रमणादिकं न सिध्यति, आकाशव्याप्ते कुड्यादौ निष्क्रमणादेरशक्य-त्वात् । न च कुड्यादिष्वाकाशो नास्तीति वाच्यम् ; तस्य सच्छिद्र[त्वाभाव]त्वप्रसङ्गादिति भावः । सहकारिवैकल्या-त्कुड्यादिषु निष्क्रमणादिकार्यप्रतिरोध इति शङ्कते—**रोध इति** । तुशब्दः केवलाकाशाद्विशेषद्योतकः । एवं सति निष्क्रमणादेरन्यथासिद्ध्या निर्मूलं नभःकल्पनमित्यभिप्रायेणाह—**तदभवनेति** । न हि निष्क्रमणादेराकाशं समवायि ; देहादिक्रियाया नभोनिष्ठत्वाभावात् । नाप्यसमवायि ; द्रव्यस्य तथात्वानभ्युपगमात्, समवायिकारणप्रत्यासन्नत्वायोगाच्च । निमित्तं तु ईश्वराद्यतिरिक्तमपूर्वमिह नापेक्ष्यमिति भावः ॥ ४४ ॥ **इत्याकाशानुमेयत्वभङ्गः** ॥

यत्त्वाकाशोऽवकाशप्रद इति कथितं शास्त्रतस्तत्र याऽसा-
वन्योन्यं स्पर्शभाजां विहतिरिह न सा प्राच्यतत्त्वेष्विव स्यात् ।
इत्यैदंपर्यमूह्यं न यदि कथमिवान्येषु लभ्योऽवकाशः
सिद्धादेः स्वप्रभावाज्जल इव कथितो युज्यते मज्जनादिः ॥ ४५ ॥

ननु शरीरादिष्वाकाशोऽवकाशदानेनोपकरोतीति तत्तच्छास्त्रसिद्धम् ; अतोऽस्य निष्क्रमणादिलिङ्गत्वं ग्राह्यम् । तदिदमनुभाषते **यत्त्विति** ॥ शास्त्राभिप्रेतमस्योपकारकत्वं शिक्षयति—**तत्रेति** । पृथिव्यादिचतुष्कस्येव स्पर्शवत्प्रतिघाति त्वमाकाशस्य नास्ति ; तत्पूर्वेषामिवाहङ्कारादितत्त्वानाम् । अतः प्राणिसञ्चारादिप्रतिघातकत्वाभावादस्योपकारकत्वकथन-मिति तात्पर्यं निपुणनिरूपणीयम् । न ह्याकाशेन देयमवकाशाख्यं द्रव्यान्तरमस्तीति भावः । आकाश एव तर्ह्यवकाशः स्यादित्यत्राह—**न यदीति** । अस्पर्शत्वाविशेषान्महदादिप्रदेशानामप्यवकाशत्वं ग्राह्यम् । ननु स्पर्शवतां मिथःप्रतिघात-कत्वनियमो नास्ति, भूमावुन्मज्जति निमज्जतीत्यादिसिद्धप्रतिपादनादित्यत्राह--**सिद्धादेरिति** । अनेन जन्मौषधिमन्त्रतप-

स्समाधिभूतसिद्धिमतां तत्तदुपष्टब्धानां च संग्रहः । जलदृष्टान्तेन विभज्य प्रवेशनं पुनश्शाग्रसंभेदश्च सूच्यते । केचित्तु सिद्धादीनां प्रभावविशेषेण भूम्यादिषु प्रवेशप्रतिघात एव नास्तीति मन्यन्ते काचादिषु नीरन्ध्रेषु नयनप्रभादेरिवेति ॥

॥ इत्यवकाशनिरूपणम् ॥

सद्रूपेणैव भानान्न भवति वरणाभावमात्रं विहायः
संसर्गाभावमात्रं न च भवति यतो नास्ति संसर्गिबोधः ।
अत्यन्ताभावनाशावजननिरपि वा सत्सु तेष्वेव न स्यु-
स्तादात्म्याभावसिद्धिः कथ[मिव]मपि च भवेत्तंतमर्थं विहाय ॥ ४६ ॥

अत्र केचिच्चार्वाकास्सौगताश्च प्राहुः—* चत्वार्येव भूतानि । आकाशस्त्वावरणाभाव एव । स च निस्स्वभावः । तुच्छतयैवोपलम्भात् । यत्र चावरणं न तत्राकाशः । अभित्त्वा दुर्दर्शत्वात्, भेदे त्वावरणाभावस्यैव सिद्धेः । यदि तत्राकाशः स्यात् निरवकाशं न किंचित्स्यात् । अतो घटतदभावन्यायादावरणेष्वसत्त्वादयमावरणाभावः । तदिह शून्यधातुसंज्ञिते च निस्तत्त्वेऽप्यावरणाभावे खपुष्पादिषु तत्तच्छब्द[ादि]वन्मिथ्याजले मृगतृष्णिकादिशब्दवच्च व्यामोहैकनिबन्धना व्योमादिशब्दाः । अत्र नञुपश्लेषाभावादसद्रूपतातिरस्कारः । अत्र च तलत्वविपुलत्वमलिनत्वादिकमध्यासमन्तरेण न कथंचिदप्युपपद्यते । प्रतियोगिगतानां च स्मर्यमाणानां गृह्यमाणेऽस्मिन्नध्यासः । अस्ति चासौ सिद्धः ; दुःखाभावे सुखाभिमानात्, आलोकाभावे च नीलत्वबहलत्वाद्यध्यासस्य वैशेषिकादिभिरङ्गीकारात्, शशशृङ्गं तीक्ष्णमित्यादिशब्दजन्याध्यासदृष्टेश्च । वदन्ति च शब्दज्ञानानुपातो वस्तुशून्यो विकल्प इति; एष वन्ध्यासुतो यातीत्यादिषु । अतो नास्त्येव नभ इति । तत्राह—**सद्रूपेणेति** ॥ अयं भावः—सर्वं हि वस्तुजातं संविद्यवस्थाप्यम्, संविद्यते च भावरूपतयैव नभः, भावान्तरमेवाभाव इति स्थापयिष्यते । अन्यथाऽपि ब्रूमः—नाभावस्य निस्स्वभावता, अभावस्वभावतयैव तत्सिद्धेः । स्वान्यस्वभावतया सिद्धिस्तु न कस्यापि । न च स्वेन स्वभावेन सिद्धस्य परस्वभावविरहादसत्त्वम्, अतिप्रसङ्गात् । उक्तं च **न्यायभाष्ये**—* असच्चासदिति गृह्यमाणं तथाभूतं विद्यमानमविपरीतं च तत्त्वमिति । तुच्छतयैवोपलब्ध्याऽपि निरस्तं निस्स्वभावत्वम् । तुच्छता ह्यभावप्रतियोगित्वम्, अभावत्वम्, वस्त्वन्तरशून्यत्वम्, अन्यद्वा किंचित् ? न प्रथमः, स्वकालादिषु सतामभावप्रतियोगिनां यथाप्रमाणं तत्तत्स्वभावविशिष्टत्वात् । न द्वितीयः, दत्तोत्तरत्वात् । न तृतीयः, ईदृशतुच्छत्वस्य स्वरूपाविरोधिनस्सर्वत्र सुलभत्वात् । न चतुर्थः, अस्मन्मतविरोधिनस्त्वदिष्टस्य कस्यचित्कुतश्चिदत्रासिद्धेरिति । यत्त्वावरणेष्वाकाशो नास्तीति, तदसत्, त्वदुक्तयुक्त्यैव तत्सिद्धेः । अभित्त्वा दुर्दर्शत्वं हि व्यवहितत्वात् । अत एव तत्र नास्तीति न निश्चाय्यम् । भित्त्वा तु प्रेक्षणे नभस्तत्र दृश्यत एव । न चात्रावरणाभावमात्रोपलम्भः, इहावरणं नास्तीति साधिकरणस्य तस्योपलम्भात् ; इहाकाश इतिवत्स्वात्मन्येव भेदोपचारात्स्यादिति चेन्न ; बाधकाभावात् । अधिकरणानवस्थाप्रसङ्गो बाधक इति चेन्न ; आकाशादेस्साधिकरणतयैवोपलम्भ इत्यनभ्युपगमात् । इहाकाश इतिवदित्यत्र चाकाशशब्देनावरणाभावविवक्षायां पक्षदृष्टान्तभेदाभावः, त्वदनभ्युपगतस्य परमतसिद्धस्य त्वया दृष्टान्तीकर्तुमयुक्तत्वात् । प्रतिवन्दिग्रहणमात्रमिदमिति चेन्न ; इह मूर्ते वस्तुनि आकाशसंबन्ध इति प्रतीतौ विरोधाभावात् । आवरणाभावधीरपि तथैव स्यादिति चेत्, अस्त्वेवम् ; तथाऽपि कदाचिदिह तारकेत्यादिवन्निरधिकरणतया गगनोपलम्भे तदतिरिक्तनभःसिद्धिनिषेधः । आवरणेषु निरवकाशत्वं च विशेषणराहित्यात्, आवरणरहितमेव ह्याकाशमन्यद्वा किंचिदवकाशः, न त्वा-

काशमात्रम्। आवरणेष्वविद्यमानतया तदभाव आकाश इति चायुक्तम्; सर्वेषां स्वस्मिन्नविद्यमानतया स्वाभावत्वप्रसङ्गात्। यत्तु व्योमादिशब्दा व्यामोहैकनिबन्धना इति, तदसत्; प्रमाणसिद्धे क्वचिद्वस्तुन्येव सर्वशब्दानां व्युत्पत्तेः, तद्विषयतयैव च व्यवहारात्; खपुष्पादिषु त्वयोग्यसमभिव्याहारादन्यथाधीः। मृगतृष्णादिशब्दा अपि जलाध्यासादिकरणार्हमरीचिव्यूहादिविषयाः। यद्यपि तलत्वादिकमाकाशेऽध्यस्तम्, अल्पत्वविपुलत्वादिकं त्ववच्छेदकभेदायत्तम्, तथाऽपि सत्येवारोपः। यत्त्वसति दुःखाभावे सुखाध्यासो दृष्ट इति, तदर्भकवाक्यम्; सत्येव दुःखाभावे सुखारोपात्। अभावस्य भावान्यत्वमात्रमेव ह्यसत्त्वं सिद्धम्; तेन च स्वरूपसन्नेवासौ। आलोकाभावे नीलत्वाध्यासस्त्वस्मान् प्रति नोदाहर्तव्यः। अत एवाध्यस्तनैल्यमालोकाभावमात्रमेव नीलं नभ इति भातीति निरस्तम्; आलोकदेशे च नभःप्रतीत्यनुवृत्तेः। नन्वस्मदिष्टक्षणिकत्वादिकं क्वचित्ते सिद्धमसिद्धं वा? उभयथाऽपि कथं तत्प्रतिक्षेपः? कथं वा तस्मिन् केषां चित्सत्यताभ्रमं निर्वक्ष्यसि? इत्थम्—एतदुत्तरक्षणवृत्तित्वाभावो हि यत्र क्वचिदन्यत्र सिद्धः, स सर्वस्मिन् कुतश्चिदारोप्यते प्रतिक्षिप्यते चेति सुस्थमेतत्। एवमन्यत्सर्वमपि चिन्त्यम्। शशशृङ्गं तीक्ष्णमित्यादिषु च प्रमिते शशादौ शृङ्गवत्त्वारोपः, शृङ्गादौ च प्रमिते सत्याऽसत्या वा तीक्ष्णधीः इत्येतावत्सहृदयहृदयारूढम्; नात्रासति किंचिदारोप्यते। एवमनभ्युपगमे वर्णक्रमनिर्देशवत्स्यात्। एतेन शशस्तीक्ष्णशृङ्गवानित्यपि निरूढम्। भूतेषु भाविषु च कथं भ्रम इति चेत् कथं वर्तमानेषु? तेषां सत्त्वादिति चेन्न; स्वकालसत्त्वस्य कालान्तरासत्त्वस्य च साधारणत्वात् इति। आवरणाभावश्च सत्योऽसत्यो वा संसर्गाभावादिविभागं नातिक्रामेदिति मत्वा तत्रतत्र दूषणमाह—**संसर्गेत्यादिना** पद्यशेषेण। संसर्गाभावस्तावन्निरूप्यमाणः संसर्गिनिरूप्यसंसर्गप्रतियोगिकतयाऽधिकरणप्रतियोगिभूतसंसर्गिबोधाभावे कथं बुध्येत? अत्यन्ताभावोऽपि संसर्गाभावभेद एव। यथा अश्वे गोत्वस्य शशे वा शृङ्गस्य। तथा च अत्रावरणं नास्तीति साधिकरणभूताभावधीरनिवार्या। खपुष्पवदावरणानामत्यन्तासत्त्वे तु शून्यवादश्शरणम्। वर्तमानेषु चावरणेषु तत्प्रध्वंसप्रागभावौ दुर्वचौ। तौ हि किमन्यत्र विद्यमानानाम्? उताविद्यमानानाम्? नाद्यः, तेषां तदुभयायोगात्। न द्वितीयः, तत एव; न हि शशे शृङ्गस्य नाशप्रागभावौ। तदिह सर्वावरणनाशादिकं दुर्वचम्; असंभवात्। कतिपयावरणनाशादिकं चावरणदेशेऽप्यस्तीति तत्रापि निष्क्रमणादिप्रसङ्गः। ननु संसर्गे तु विधिरेकेनापि, तन्निषेधस्तु सर्वप्रतियोगिकः। तद्वदत्रापि सर्वावरणाभावे व्योमधीः स्यात्। न, असंभवस्योक्तत्वात्। एवं सति च संसर्गाभाव एव नामान्तरेणोच्यते; तत्र च दत्तमेवोत्तरम्। अस्तु तर्ह्यावरणतादात्म्याभावोऽसौ स्यात्। स ह्यसिद्धप्रतियोगिकतया स्वयमप्यसिद्धः। तदात्मनश्चाकाशस्य तुच्छत्वं युक्तमिति। तत्राह—**तादात्म्येति**। चो दूष्यसमुच्चये; श्रुत्यादिविरोधरूपदूषणसमुच्चये वा। असिद्धप्रतियोगिकत्वमस्य क्वचिदपि तादात्म्यपदार्थाभावाद्वा? आवरणद्वयस्य तदभावाद्वा? नाद्यः, अभावप्रतियोगित्वेन तत्कल्पनस्यासिद्धिप्रसङ्गात्। न हि क्वचित्सिद्धिमनपे[क्ष्य]क्षकस्य क्वचिदपि कल्पना, **माध्यमिक**मतोत्थानप्रसङ्गात्। नोत्तरः, संसर्गाभावस्याप्यसिद्धप्रतियोगिकत्वापातात्; न ह्येतत्कालीनैतद्भूतलघटसंसर्गो निषिध्यमान इहान्यत्र च सिद्धः। घटसंसर्गमात्रं यत्रक्वचित्सिद्धमिति चेत्, घटतादात्म्यमपि तथैव। अस्तु तर्ह्युभयत्राप्यसिद्धप्रतियोगिकत्वम्; किं नश्छिन्नमिति चेन्न; अतिप्रसङ्गस्योक्तत्वात्। अत्यन्ताभावोऽप्यसिद्धप्रतियोगिक इति पक्षश्च निरस्तः।

तत्रतत्र स्वतादात्म्यं सिद्धमन्यत्र कल्प्यते। बाधकैः क्षिप्यते चेति नास्माकमिह विप्लवः॥

सर्वत्र तादात्म्याभावस्तत्तद्वस्तुनिष्ठतयैव सिध्येत्; न तु तन्मध्यादिदेशतया। यथा मिथस्संयुक्ते वियुक्ते वा सिंहे गजान्यत्वं गजे च सिंहान्यत्वमिति। इदमावरणं न भवतीति तादात्म्यनिषेधश्च कस्यचिदावरणस्य वा? अनावरणस्य वा? आद्ये विरोधः। आवरणान्तरं न भवतीति विवक्षायामविरोध इति चेत्; सत्यम्, तथाऽपि न तत्राकाशप्रतीतिविषयावरणाभावसिद्धिः। द्वितीये त्वावरणान्यद्रव्यमिदङ्कारास्पदं सिध्यत्येव। नन्वावरणाभाव एवेदंकारगृहीतः आवरणतादात्म्याभावाधिकरणतया बुध्यताम्, न हि तत्तदभावयोस्तादात्म्यमिति। मैवम्; न ह्यावरणतादात्म्याभावस्यावरणान्यत्वं बुध्वा कश्चित्तत्र नभःपर्यायान्प्रयुङ्क्ते, निष्क्रमणादौ वा प्रयतत इत्यलमतिविस्तरेण। * आकाशे चाविशेषादिति **सूत्रभाष्ये** चैतत्सर्वमनुसन्धेयमिति ॥ ४६ ॥ **इत्याकाशस्यावरणाभावमात्रत्वभङ्गः ॥**

नित्यत्वाद्यम्बरादेर्यदि निरवयवद्रव्यताद्यैः प्रसाध्यं
कः स्याद्बाधो विपक्षे कथमिव निगमे बाधकेऽत्रानुमा स्यात्।
बाधस्सामान्यदृष्ट्या श्रुतिसमधिगते नैव कुत्रापि शक्य-
स्तेनामूर्तत्वलिङ्गान्न सृजति विमतो मूर्तमित्याद्यपास्तम् ॥ ४७ ॥

सोऽयमाकाशस्सर्वव्यापी नित्यश्चेति **वैशेषिकादयः। जैनास्तु** तत्र लोकाकाशः अलोकाकाशश्चेति विभागमप्याहुः। मूलप्रकृतिर्विभ्वीति **सांख्याः।** मनो विभ्विति **भाट्टाः।** तेषां पक्षं सहेतुकमनुभाषते—**नित्यत्वादीति ॥** नित्यत्वं व्यापित्वं च पृथक्साध्यम्। प्रत्येकं तयोरेते हेतवः—विगीतं नित्यं विभु च निरवयवत्वे सति महत्त्वात्, सर्वदा निष्पन्दत्वे सति महत्त्वात्, सर्वदा स्पर्शरहितद्रव्यत्वात् इत्यादयः; निरवयवेन्द्रियग्राह्यगुणत्वादित्याकाशस्यैव; ज्ञानासमवायिसंयोगाधारत्वात् इति मनस एव। एतेषां साधारणमप्रयोजकत्वमभिप्रेत्याह—**कः स्यादिति।** न ह्येतेषामनित्यत्वादौ किञ्चिदनिष्टं स्यात्; स्वाच्छन्द्येनानिष्टकल्पने विपरीतकल्पनस्यापि शक्यत्वात्। अक्षोभ्यं दूषणान्तरमाह—**कथमिवेति।** येष्वनित्यत्वम् अविभुत्वं च सृष्ट्यादिवा[क्यै]दैस्तत्त्वान्तरावृतत्वादिवाक्यैश्च सिद्धं, तेषु तद्विरुद्धसाधनमागमबाधितमित्यर्थः। उक्तेषु च हेतुषु निरवयवत्वादिकं पञ्चीकरणवादिशास्त्रविरुद्धम्। सर्वदा स्पर्शरहितद्रव्यत्वादिति विभुत्वसाधने अणुत्वेन श्रुतिसिद्धैर्जीवैरनैकान्त्यम्, ज्ञानासमवायिसंयोगाधारत्वम् आत्ममनसोरसिद्धं च। ज्ञानद्रव्यत्वादेर्वक्ष्यमाणत्वात् ज्ञानावस्थानां चात्ममनस्संयोगासमवायिकारणकत्वाभावात्। किं चात्र नित्यत्वसाधनमाकाशदिद्रव्यपक्षीकारेण वा? आकाशत्वाद्यवस्थापक्षीकारेण वा? आद्ये सिद्धसाध्यता; द्वितीये तु स्वानभ्युपगतपक्षीकारो न युक्तः। श्रुत्यैव तदङ्गीकारे तयैव बाधः। अनुमानेन श्रुतिबाधे तु हैतुकप्रलपैश्श्रुतिप्रमाणस्य निश्शेषोच्छेदप्रसङ्गमभिप्रेत्याह—**बाध इति।** प्रत्यक्षविरोधरहितानन्यपरश्रुत्या यथावदधिगतेऽर्थे येनकेनचित्सामान्यतोदृष्टेन बाधशङ्कायां श्रौतहिंसा न धर्मः हिंसात्वात् संमतवत्, विगीतमस्थि पवित्रम् अस्थित्वात् शङ्खवत् इत्यादेरपि प्रसङ्गः स्यादिति भावः। उक्तं दूषणं प्रस्तुते पक्षे साध्यान्तरविषयहेत्वन्तरेष्वपि दर्शयति—**तेनेति।** आकाशो न स्पर्शवदुपादानम्; स्पर्शशून्यत्वात्। एवं वाय्वादिकमपि न तेजःप्रभृत्युपादानम् रूपशून्यत्वात् रसशून्यत्वात् इत्यनुमानजातं श्रुत्यादिविरोधादपास्तमित्यर्थः ॥ ४७ ॥ **इत्याकाशादेरनित्यत्वाव्यापित्वादि ॥**

प्राक्प्रत्यक्त्वादिभेदं भजतु वियदिदं भानुयोगादिभेदा-
दस्यैवोपाधिभेदादधिकदिश इव स्तां परत्वापरत्वे।

व्योमोत्तीर्णेऽपि देशे प्रभवतु तदुपाध्यन्वितैस्तत्तदर्थै-
र्दूरत्वादिव्यवस्था स्वयमुत विभुना ब्रह्मणा किं परैर्नः ॥ ४८ ॥

अथ पराभिमतां विश्वव्यापिनीं दिशमनभ्युपगच्छंस्तत्कल्पकानामन्यथासिद्धिमाह—**प्रागिति** ॥ यदि प्रागादिधी-व्यवहारसिद्ध्यै दिक्तत्त्वं कल्प्यते तत्संप्रतिपन्नं व्योमैव भवतु । सूर्योदयाद्युपाधिभेदेन तद्विभागात् पूर्वदक्षिणपश्चिमा-द्युपाधिक्लृप्तिश्चाधिकेऽनधिकेऽपि समाना । अप्रत्यक्षायां च दिशि प्रत्यक्षैरुपाधिभिरवच्छेदधीर्दुर्लभा । सूर्योदयादि-विशेषितातपादिभिरेव प्रागादिधीव्यवहारसिद्धौ किं तदन्यकल्पनया ? शाखाचन्द्रनयाच्चातपादेस्सूर्योदयादेश्च संबन्धधी-र्युज्येत । उपहितस्य शब्दार्थत्वान्न दिक्छब्दस्य व्योमातपादिपर्यायता स्यात् । ननु साक्षात्संबन्धरहितसंयुक्तसंयोगभूय-स्त्वाल्पत्वनिबन्धने दूरासन्नपरत्वापरत्वे तत्तत्संबन्धोपनायकव्यापकद्रव्ययोगमन्तरेण कथं स्यातामित्यत्राह—**अस्यैवेति** । न हि त्वया कल्प्यमानमपि दिक्तत्त्वं तदुपाधियोगमन्तरेण परत्वापरत्वे जनयेत् । तथा सति तैरेवोपाधिभिरुपहितं व्योमाद्येव परत्वादिसिद्धौ पर्याप्तम् । अधिकशब्देन कल्पनागौरवं सूच्यते । नन्वाकाशः परिच्छिन्न इति भवत्सिद्धान्तः ; तथा च कथमाकाशरहितप्रदेशे दूरत्वादिक्लृप्तिरित्यत्राह—**व्योमेति** । दूरत्वादिसिद्ध्यनुगुणोपाधिमद्भिर्महदादिभि-स्तत्सिद्धिः स्यात् । व्योमोत्तीर्ण इत्युपलक्षणम् , व्योमसंपृक्तद्रव्यादिभिरपि तदुपपत्तेः । अनियमेन बहूनां दिक्त्वकल्पने गौरवं स्यादिति चेन्न, असिद्धकल्पनादनेकैरपि सिद्धैरेव निर्वाहस्य लघुत्वात् । यद्येकमेव सर्वत्र दिग्व्यवहारकारणमिष्यते, तदा सर्वव्यापिना सर्वहेतुभूतेन परमात्मनैव सर्वं सिध्येत् ; तस्यैव सन्तु उपाधिभेदास्सहकारिणः । अथवा तत्तदुपाधय-स्तावत्प्रत्यक्षाः । तत्संबन्धोऽपि साक्षात्परंपरया वा दूरासन्नादेर्दृष्ट एव । तद्दृष्ट्या च परत्वादिसिद्धौ किं तदुपहितगवेष-णया ? कार्यविशेषाणामन्यतस्संभवे च न क्वचित्तदतिरिक्तं कल्प्यमित्यभिप्रायेणाह—**किं परैर्न इति** । परैः—व्यापकेश्वर-व्यतिरिक्तैः उपाधिमात्रव्यतिरिक्तैर्वेत्यर्थः । नः—ईश्वरमिच्छतां गौरवभीतानां चेति यावत् ॥ ४८ ॥

अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः
सिध्यत्कार्योपयुक्तोपनयननियमोपेततच्छक्तिक्लृप्तेः ।
एवं ह्येवाधिकायामपि दिशि भवतोऽतिप्रसङ्गो निषेध्यो
धर्मी धर्मश्च कल्प्यौ तव तदितरता स्याच्च काले समानात् ॥ ४९ ॥

ननु यद्याकाशादयः परधर्मं परत्र घटयेयुः, ततः पाण्ड्यदेशस्थितेन जपाकुसुमेन पाटलीपुत्रस्थितं स्फटिकमणि-मुपरञ्जयेयुः ; विश्वमपि व्यामिश्रसर्वस्वभावं स्यादिति प्रसक्तिमुद्भाव्य परिहरति—**अन्यस्मिन्निति** ॥ हेतुमाह—**सिध्यदिति**। यथा कलमबीजस्याङ्कुरजननशक्तिकल्पनेऽपि न कोद्रवाङ्कुरजनकत्वं दृश्यमानकार्यानुगुणकारणशक्तिकल्पनात् , तथा विय-दादिष्वपि परत्वादिसिद्ध्युपयुक्तोपनायकतयैव तच्छक्तिक्लृप्तेरित्यर्थः । अत्र प्रतिबन्दिमभिप्रेत्याह—**एवं हीति** । नन्वधि-काया दिशस्तावदर्थत[यैव]या धर्मिग्राहकेण सिद्धिः ; न तथा वियदादेः, तत्स्वरूपस्यान्यतस्सिद्धत्वादिति चोद्यं विपरीतफल-मित्यभिप्रायेणाह—**धर्मीति** । नावश्यं धर्मिग्राहकेणैव सर्वत्र शक्तिसिद्धिः । गृहीतेष्वपि धर्मिषु तत्तत्कार्यदर्शनेन तन्नियत-शक्तिक्लृप्तेः । अत एव नातिप्रसङ्गः, अयस्कान्तादिवत्तन्नियमात् । यन्निबन्धनस्त्वतिप्रसङ्गः, स सिद्धे कल्प्येऽपि समः समाधिः । एवं स्थिते वरमुभयकल्पनादेककल्पनम् । ननु शक्तिरपि कल्प्यमाना न निराधारा कल्प्यते । तस्मात्साधार-शक्तिकल्पने शक्तिविशिष्टाधारकल्पने वा समं गौरवम् । तन्न ; यद्यपि शक्तितद्वन्तौ मिथोऽवच्छिन्नौ, तथाऽपि सिद्धांशस्य

कल्प्यत्वायोगादसिद्धांशनियतैव क्लृप्तिरिति विशेषसिद्धिः स्यादिति भावः। नन्वेवं वियदादेरेव सूर्यपरिस्पन्दाद्युपनायकत्वसंभवात्तदन्यः कालो न सिध्येदित्यत्राह—**तदितरतेति**। न हि वयं परत्वादिलिङ्गैराकाशाद्यतिरिक्तं कल्पयामः, किंत्वागमिकमभ्युपेमः। अतो न तस्यासिद्धिरिति भावः ॥ ४९ ॥

संख्यानं तत्त्वपङ्क्तौ क्वचिदपि न दिशः कालवद्वा न भेदः
कण्ठोक्तौ व्याक्रियादिव्यवहरणमपि ह्यन्यथैवोपपन्नम्।
श्रोत्रादुक्तस्तु लोकप्रभृतिवदुदयस्तस्य तत्राप्ययो वा
नैतावत्तत्त्वभेदं गमयति न च तच्छ्रौत्रतामान्यपर्यात् ॥ ५० ॥

यदि पृथक्त्वेन लोकवेदप्रसिद्धा दिगपह्नूयेत तथा वायुरपि। अस्य ह्युपलभ्यमानः स्पर्श उष्णश्शीतोऽनुष्णाशीतोवा? त्रेधाऽपि न छान्दोग्याधीततेजोबन्नातिरेकस्सिध्येत्। तिर्यक्पवनमप्यदृष्टवशात्तेषामेव स्यात्; शब्दधृतिकम्पैरपि नातिरिक्तमनुमातव्यम्; तैरेव तत्संभवात्। वातोपनीततत्तद्भूतान्तरावयवन्यायादनुद्भूतरूपतया दुर्दर्शत्वं स्यादित्यत्राह—**संख्यानमिति** ॥ अयं भावः—न हि वयमप्रत्यक्षस्य वायोः स्पर्शशब्दधृतिकम्पलिङ्गैस्सिद्धिरिति वदामः, येन तेषामन्यथासिद्धिरुच्येत। किंतु तेषुतेषु शास्त्रेषु तत्त्वपङ्क्तौ परिगणनात्; नैवं दिक्तत्त्वं गण्यत इति। तत्र कालप्रतिबन्दिं निस्तरति—**कालवद्वेति**। अस्ति हि * रूपान्तरं तद्विज कालसंज्ञम् इत्यादि। ननु * दिग्देशकालेष्वस्तातिः इत्यादिषु देशाद्भिन्ना दिक् कालवच्छास्त्रेषु व्यवह्रियत इत्यत्राह—**व्याक्रियेति**। प्रमाणसिद्धदिक्तत्त्वानुसारेण तत्कार्यविशेषविधायिनां शास्त्राणां तत्स्वरूपनिष्कर्षे तात्पर्याभावान्न ततस्त्वदिष्टसिद्धिरित्याशयः। अथ स्यात् * प्राणाद्वायुरजायत इत्यादौ वाय्वादितत्त्वैस्सह दिशः पृथक्सृष्टिरुच्यते; अतस्तद्वद्दिशोऽपि तत्त्वान्तरत्वं स्यात्; एवं * दिशः श्रोत्रम् इति; तद्वदप्ययोऽपि श्रूयत इत्यत्राह—**श्रोत्रादिति**। लोकप्रभृतिवदिति प्रतिबन्दिवचनम्। अत्र हि *नाभ्या आसीदन्तरिक्षम् इत्यादिभिर्न तत्त्वसृष्टिश्श्रूयते। किंतु ब्राह्मणक्षत्रियचन्द्रसूर्यादिव्यष्टिसृष्टिप्रकरणे अन्तरिक्षस्वर्गादिकल्पनम्। अतो दिक्सृष्टिरपि व्यष्टिविषया न तत्त्वान्तरं कल्पयितुं शक्नुयादित्याह—**नैतावदिति**। अथापि दिशः श्रोत्रोपात्तस्य व्यष्टिविशेषत्वं स्यादित्यत्राह—**न चेति**। श्रौत्रतां—श्रोत्रोपादानतामित्यर्थः। न हीन्द्रियाणि कस्यचिदुपादानानीति प्रागेवोक्तम्। गत्यभावादत्र विशेषः कल्प्यतामित्यत्राह—**आन्यपर्यादिति**। अत्र हि दिगुपाधीनां तद्देवतानां वा भगवतः श्रोत्रात् चन्द्रादेरिव सृष्टिः स्यात्। अतस्तत्त्वान्तरकल्पनं निर्मूलमित्यर्थः ॥ ५० ॥ **इति दिश आकाशादावन्तर्भावः ॥**

वातो वातीति साक्षान्मतिरितरसमा स्पर्शतो नानुमाऽसा-
वन्धेऽन्येषु प्रसङ्गान्न पुनरगमकं स्पर्शनं रूपशून्ये।
अन्याक्षग्राह्यतादृग्विधगुणविरहो ह्यन्यदक्षं न रुन्धे
निर्गन्धो नीरसोऽपि स्फुरति यदनलो दर्शनस्पर्शनाभ्याम् ॥ ५१ ॥

आकाशे चिन्तिते प्रसङ्गाद्दिगन्तर्भाव उक्तः। अथाकाशानन्तरभाविनि वायौ स्वरूपतस्संप्रतिपन्ने प्रमाणविप्रतिपत्तिं निरस्यति—**वातो वातीति** ॥ त्वगिन्द्रियपवनसंयोगे सति सावधानस्य वातो वातीति धीस्तावद् दुरपलपा। सा साक्षात्काररूपा क्षित्यादिधीसमत्वादित्यर्थः। यदत्र गुणेन गुण्यनुमानमाहुः तत्प्रतिषेधति—**स्पर्शत इति**। न हि गन्धादिवदिह गुणमात्रोपलम्भ इति भावः। अन्यथाऽतिप्रसङ्गमाह—**अन्ध इति**। अन्धे—पुरुषे, अन्येषु—पृथिव्यादिषु

मूर्तेषु त्वगिन्द्रियेण या स्पर्शधीस्सा स्पर्शमात्रविषया तत्तद्रूव्यानुमितिहेतुस्स्यात् । अन्धोक्तिश्चक्षुषा द्रव्यग्रहणनिवृत्त्यर्था। उपलक्षणमेतदन्यतमसमध्यस्थस्य ; सालोकेऽपि निमीलितचक्षुषश्च । न चैतद्युक्तम्, दर्शनस्पर्शनाभ्यामेकार्थग्रहणाभ्युपगमात् अन्यथा द्रव्यापह्नवप्रसङ्गाच्च । ननु नीरूपं कथं प्रत्यक्षम्? आत्मादीन् पश्य । कथं बाह्याक्षग्राह्यम्? रूपादीन्निरूपय । कथं स्पर्शनवेद्यम्? स्पर्शमेव परामृश, इत्यभिप्रायेणाह—**न पुनरिति** । तथाऽपि नीरूपद्रव्यं कथं बाह्येन्द्रियग्राह्यं त्वगिन्द्रयग्राह्यं वेत्यत्राह—**अन्याक्षेति** । इन्द्रियाणां स्वग्राह्यविशेषगुणोपधानेन हि द्रव्यग्राहकत्वमिति वः कल्पना । ततश्चेन्द्रियान्तरग्राह्यविशेषगुणविरहेऽपि वायोस्त्वगिन्द्रियग्राह्यत्वमविरुद्धमित्यर्थः । यदि रूपशून्यद्रव्यत्वाद्वायुरप्रत्यक्ष इत्युच्येत तदा रसशून्यद्रव्यत्वात्तेजोऽपि किं तथा गन्धशून्यद्रव्यत्वाद्वा । अतोऽवादि इन्द्रियान्तरग्राह्यविशेषगुणविरहो नेन्द्रियान्तरवेद्यत्वविरोधीति । अत्राविगीतमुदाहरणमाह—**निर्गन्ध इति** ॥ ५१ ॥

संख्याद्यास्स्पर्शनास्स्युस्तदधिकरणकास्स्पर्शने गन्धवाहे
तेषां द्रव्योपलम्भप्रतिनियतनिजाध्यक्षयोग्यत्वतश्चेत् ।
इ[ष्टंत्वं]ष्टस्त्वंशेन चात्मप्रभृतिषु सहते तैः प्रसिद्ध्यन्ति सर्वे
तद्बाह्ये व्याप्तिरिष्टा यदि सततगतेरप्यसावस्तु बाह्ये ॥ ५२ ॥

वायुप्रत्यक्षतायां परोक्तमनिष्टं शङ्कते—**संख्येति** ॥ वायौ त्वगिन्द्रियग्राह्ये तन्निष्ठसंख्यापरिमाणादिद्वीन्द्रियग्राह्यवर्गोऽपि तेन सह त्वचा गृह्येत । तेषां संख्यादीनां स्वाधारद्रव्योपलब्धियोग्यतासमानयोग्यताकत्वादित्यर्थः । अत्रांशत इष्टप्रसङ्गतामाह—**इष्टमिति** । उपलभ्यते ह्येका वह्निशिखा, एका वारिधारेत्यादिवत् एकोऽयं वायुरिति । रन्ध्रभेदनिष्क्रान्तेषु च वायुषु सावधानं स्पृशतो द्वित्वद्विपृथक्त्वादयो भान्ति । यावता च त्वगिन्द्रियभागेन वायुस्संबध्यते, तावदवच्छिन्नं तत्परिमाणं च गृह्यत एव । न हि घटादावपि त्वगिन्द्रियसंबद्धप्रदेशाभ्यधिकवर्ति परिमाणं तेन गृह्यते । स्पृष्टापसृते वायौ संयोगविभागौ स्फुटौ । एकस्मिन् शरीरे अनेकैर्वंशरन्ध्रादिभिरनेकेषु वायुस्रोतस्सु प्रवर्तितेषु तत्तदपेक्षया परत्वापरत्वे अपि सुलभे ; कर्म च, वातीति प्रत्ययात् । अन्यथा सरित्प्रवाहे स्पन्दनं च त्वचा न गृह्येत । यस्तु वायोः संमूर्च्छनाद्यवस्थासु संख्यादेरग्रहः स तोयादावपि समः । प्रसङ्गस्य व्याप्तिभङ्गमप्याह—**न चेति** । आत्मनि तावद्यद्यप्यहमेक इति धीस्स्यात्, तथाऽपि तत्परिमाणं न गृह्यते । अत एव ह्यणुत्वविभुत्वदेहपरिमाणत्वसन्देहः । एवमन्यदपि । तथा बाह्येष्वपि द्रव्योपलम्भेऽपि द्वित्वत्रित्वाद्यग्रहो दृष्टः । उक्तव्यतिरिक्तेष्वयं नियम इति शङ्कते—**तद्बाह्य इति** । सान्तर्हासमाह—**सततगतेरिति** । यथादर्शनं व्यवस्था त्वयाऽपि दुस्त्यजेति भावः ॥ ५२ ॥ **इति वायुप्रत्यक्षत्वम् ॥**

न प्राणो वायुमात्रं सह परिपठनान्न क्रिया द्रव्यतोक्ते-
स्तेजोवद्वा न तत्त्वान्तरमगणनतो वायुतानुज्झनाच्च ।
तस्माद्वातो विशेषं घनजलकरकान्यायतः प्राप्य कंचि-
देहान्तर्दाशविध्यं भजति बहुविधोपक्रियो वृत्तिभेदैः ॥ ५३ ॥

अथ राजसमहान् प्राण इति वदतः प्रतिवक्तुं प्राणस्य वायुविशेषतां विवक्षुस्तत्र विशेषापह्नवं प्रतिषेधति—**न प्राण इति** ॥ वायुत्वप्रसिद्ध्याऽसौ वायुमात्रमिति चेन्न ; सर्वत्र सामान्यप्रसिद्ध्या विशेषत्यागप्रसङ्गात् । अयोग्ये च

नानुपलम्भबाधः। श्रुतिप्राप्तं हेतुमाह—**सहेति**। *एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च, खं वायुर्ज्योतिराप इति सृष्टिवाक्ये वायुप्राणयोस्सहपाठात्। न चात्र प्राणशब्दोऽन्यार्थः; अबाधे प्रसिद्धत्यागायोगात्। न च वायुसामान्ये प्राणशब्दप्रसिद्धिः। जगत्प्राण इति समाख्या तु न तदंशस्य शक्तिं गमयेत्। देहावच्छेदमात्रेण विशेषात्पृथगुक्तिरिति चेन्न; तत्सृष्ट्युक्तेः प्रयोजनमान्द्यात्। अस्तु तर्हि वायोः क्रियाविशेषः प्राणः स्तिमितवायौ प्राणशब्दप्रयोगाभावात्, उच्छ्वासादौ प्रयोगाच्चेत्यत्राह—**न क्रियेति**। हेतुमाह—**द्रव्यतोक्तेरिति**। वायुर्द्रव्यमिति तावत्सिद्धम्। प्राणे च तदुक्तिस्सार्वत्रिकी; प्राणस्स्पन्दत इति च पृथग्व्यपदिशन्ति। उक्तश्च सहपाठो न तत्क्रियायाः, अग्रग्रप्रायनयविरोधात्। नच मनःप्रभृतीनां क्रिया तैस्सहात्र पठ्यत इति भावः। यद्यसौ वायुविकारविशेषः वह्निरिव तत्त्वान्तरं स्यादित्यत्राह—**तेजोवदिति**। यदि तत्त्वपङ्क्तौ निविष्टः प्राणो भूतान्तरवत् पृथक्संख्यायेत; न ह्येवमसावित्याह—**अगणनत इति**। तत्त्वपरिगणनं च पूर्वपूर्वनियतस्वभावपरित्यागेन विकारान्तरसृष्टौ; नतु विकारमात्रे *पृथिव्या ओषधयः इत्यादिषु तत्प्रसङ्गात्; प्राणे च वायुत्वं न निवृत्तम्। अतश्च न तत्त्वान्तरमित्याह—**वायुतानुज्झनाच्चेति**। तथाऽपि देहोपादानत्वावस्थापन्नो वायुः प्राणस्स्यात् किमधिककल्पनयेत्यत्राह—**तस्मादिति**। अयं भावः—*यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुः, * अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः। प्राणापानसमायुक्तः पचामीत्यादिषु देहात्पृथक्त्वेन प्राणवायुः प्रसिद्धः। अतो न देहोपादानवायुरसौ। किंतु योगाद्युपयुक्तशास्त्रवेद्यविशेषवान् कश्चिद्वायुरयमिति वायुत्वानुवृत्तिव्यक्त्यै जलमयकरकानिदर्शनम्। दाशविध्यं—प्राणापानादिभेदैर्नागकूर्मादिभेदैश्च दशविधत्वम्। तत्तद्वृत्तिभिरुपकारप्रपञ्चस्तत्तदागमेषु ग्राह्यः। अयं चार्थः *न वायुक्रिये पृथगुपदेशादित्यधिकरणसिद्धः। *आपोमयः प्राण इति तु, *अन्नमयं हि सौम्य मनः, *तेजोमयो वागितिवदाप्यायनपरम्; अन्यथाऽनेकशास्त्रविरोधात्॥ ५३॥ **इति प्राणस्य वायुविशेषत्वम्॥**

प्राणोऽक्षं प्राणशब्दादुपकरणतया क्षेत्रिणश्चेत्ययुक्तं
शब्दैक्यं ह्यैकजात्यं व्यभिचरति न च प्राणताऽक्षेषु मुख्या।
देहस्यानक्षभावेऽप्युपकृतिरधिका तत्समाक्षोक्त्यदृष्टि-
र्न प्राणे सात्त्विकाहंकरणविकृतितालक्षणं तद्धि तेषाम्॥ ५४॥

अत्र कश्चिदाह प्राणसंवादादिष्विन्द्रियैस्सह प्राणः पठितः; प्राणशब्दश्च साधारणः प्रयुक्तः; क्षेत्रज्ञोपकरणत्वं च समानम्; अतः प्राण इन्द्रियमिति। एतदनूद्य परिहरति—**प्राण इति॥** सहपाठमात्रं न तज्जातीयत्वसाधकमित्यभिप्रायः। प्राणशब्दवाच्यत्वं नेन्द्रियत्वसाधकमित्याह—**शब्दैक्यमिति**। अन्यथा अनेकार्थशब्दलोपप्रसङ्ग इति भावः। अत्र च प्राणशब्दः कचिन्मुख्यः कचिद्भाक्तः। एवमप्येकशब्दप्रयोगमात्रात्साजात्ये वैजात्यमेव जगति लुप्येतेत्यभिप्रायेणाह—**न चेति**। क्षेत्रज्ञोपकरणत्वस्य व्यभिचारमाह—**देहस्येति**। क्षेत्रज्ञोपकारकत्वं देहे [भूयसा] संदृश्यते; न तत्रेन्द्रियत्वमिष्यते। इन्द्रियशब्दप्रयोगाभावात्तत्रानिन्द्रियत्वमित्यत्राह—**तत्समेति**। इन्द्रियत्वोक्तेरदर्शनं देहे प्राणेऽपि समम्। अतः प्राणोऽपि नेन्द्रियमित्यर्थः। इन्द्रियलक्षणनिवृत्त्या च प्राणे तच्छब्दवाच्यत्वनिवृत्तिरित्यभिप्रायेणाह—**न प्राण इति**। सात्त्विकाहङ्कारोपादानकत्वमेवेन्द्रियलक्षणम्, परोक्तलक्षणानुपपत्तेरित्यभिप्रायेणाह—**लक्षणमिति**। यत्तु शरीरयोगे सत्येव साक्षात्प्रमितिसाधनमिन्द्रियमिति, अत्र कर्मेन्द्रियेष्वव्याप्तिस्तावदास्ताम्; स्वेदादिशैत्याभिव्यञ्जकव्यजनवातादेरुक्तलक्षणयोगादतिव्याप्तिर्दुर्वारा। शरीरसंयुक्तमतीन्द्रियमिति विशेषणेऽपि चाक्षुषतेजःकणानां चूर्णविक्षेपवद्विसर्पे

मूलस्कन्धस्य प्रमितिसाधनत्वाभावात्, अग्रस्कन्धस्य शरीरसंयुक्तत्वायोगात्, नोभयत्राप्येतद्विशिष्टमिन्द्रियलक्षणमस्ति। परंपरया संबन्धस्त्वतिप्रसञ्जकः। आद्रष्टुराचन्द्रमसश्च कश्चिच्चक्षुरिन्द्रियावयवी तदानीमेव निष्पन्न इत्यत्र न किंचित्प्रमाणमन्यत्र संप्रदायात्। इन्द्रियदोषवदिन्द्रियगुणाश्च शरीरसंयुक्तास्साक्षात्प्रमितिसाधकास्सन्ति; तैश्चानैकान्त्यं सुवचम्। शुद्धेष्वपि परोक्तलक्षणेषु न प्रस्तुते तत्सिद्धिरिति॥ ५४॥ इति **प्राणस्यानिन्द्रियत्वम्**॥

प्राणापानाख्यभस्त्रारभसविसृमरः प्राप्य वैश्वानराख्यां
मध्येदेहं हुताशो वसति जलनिधावौर्ववत्सर्वभक्षः।
तत्तद्विद्यासु वे[द्यस्त्वन]धं त्वन इव हि परज्योतिषः सोऽपि रूपं
नात्मानौ तौ जडत्वाज्ञनिविलयमुखैर्भेदकण्ठोक्तिभिश्च॥ ५५॥

वायोरनन्तरं वह्निनिरूपणे प्राप्ते प्राणसङ्गत्या वैश्वानरं तावच्छिक्षयति—**प्राणेति**॥ *तस्य मध्ये महानग्निरित्यादिकमिहानुसन्धेयम्। वारिनिर्वाप्यत्वनिवृत्त्यै बाडवनिदर्शनम्। प्राणवैश्वानरविचारस्य प्रधानशास्त्रार्थोपयोगमभिप्रेत्याह—**तत्तदिति**। अनः—प्राणः। *अथ यदतः परो दिवो ज्योतिर्दीप्यत इत्यारभ्य *इदं वाव तत् यदिदमस्मिन्नन्तः पुरुषे ज्योतिरित्याद्यामनन्ति छन्दोगाः। प्रसङ्गान्नास्तिकयोगिजननिरासाय द्वियीयसरवक्तव्यमुपक्षिपति—**नात्मानाविति**। अजडो नित्यो भूतभौतिकविलक्षणश्चात्मा स्थापयिष्यते॥ ५५॥ इति **प्राणवैश्वानराग्न्योस्साङ्गत्यमनात्मत्वं च**॥

धर्मो भाति प्रभैका बहलविरलताद्यत्र दृष्टानुसारात्
सा दीपांशा विशीर्णा इति यदि बहुधा कल्पनागौरवादिः।
रत्नादीनां स्थिराणां विशरणविहतेर्निष्प्रभत्वादि च स्यात्
तेजस्तत्सप्रभाकं तिमिरहरतया साऽपि तेजोविशेषः॥ ५६॥

अथात्र धर्मधर्मिणोः सजातीयत्वे निदर्शनार्थं लोकबुद्ध्यनुगुणं भाष्यस्थं प्रभानिरूपणं प्रदर्शयति—**धर्म इति**॥ प्रदीपादिधर्मभूता तद्वत्स्वयमप्येका विष्वक्प्रसृता सूक्ष्मांशुकन्यायेन सुघटितसङ्घातलक्षणा प्रभा सर्वेषां भाति। तत्र मूलाग्रयोर्बहलत्वविरलत्वोष्णत्वोनुष्णत्वाद्युपलम्भस्तत्तद्वस्त्वन्तरेष्विव नैक्यबाधक इत्यभिप्रायेणाह—**बहलेति**। अन्यथा स्थूलमूलत्वादिना दीपादिष्वपि नैक्यं सिध्येदिति भावः। अवयवविशरणवादमनूद्य प्रतिवक्ति—**सेति**। विशरणक्रिया, तत्स्वभावानां वेगवतां तेजोवयवानामनुपशान्तवेगानामेव संभूय किञ्चिदुद्गमनेन दीपाद्यवयव्यारम्भणम्, घनीभूतानामनन्तरक्षणे विशरणम्, ऊर्ध्वगमनशीलानां च तेषां तत्तदंशतश्च तिर्यगूर्ध्वमधश्च प्रसरणम्, तादृशप्रसरणहेतुवैचित्र्यं बहलविरलत्वादिसिद्ध्यै केषांचिद्वेगातिशयः इत्याद्यनुपलब्धविविधार्थकल्पनागौरवं प्रसज्यते। आदिशब्देन सर्वलोकोपलम्भशास्त्रविरोधसंग्रहः। बाधकान्तरमाह—**रत्नादीनामिति**। प्रत्यभिज्ञाविषयप्रधानोदाहरणतया प्रसिद्धेषु स्थिरतरेषु रत्नादिषु प्रतिक्षणविनाशोऽवयवविशरणं च न कल्पयितुं शक्यम्। अतस्तेषु त्वदुक्तप्रकारेण प्रभोत्पत्तिकल्पनायोगान्निष्प्रभत्वप्रसङ्ग इत्यर्थः। परिशेषतः स्वाभिमतमाह—**तेज इति**। उक्तानुपपत्त्या दीपादितेजः प्रभाविशिष्टमेवोत्पद्यते इत्यर्थः। ननु प्रभाद्रव्यं न तत्त्वपङ्क्तौ गण्यते, तद्बहिर्भावश्चापसिद्धान्तः। अन्तर्भावश्च न वायुपर्यन्तेषु, रूपवत्त्वात्। न तोयपृथिव्योः, रसगन्धादिरहितत्वात्। न तेजसि, तद्धर्मतयाऽभ्युपगमात्। अतो विशीर्णतेजोतिरिक्ता प्रभा नास्तीत्यत्राह—**तिमिर-**

हरतयेति। तिमिरहरत्वं तेजस्त्वमात्रे हेतुः। विशेषशब्दस्तु प्रतीतिसिद्धावान्तरवैषम्यव्यक्त्यर्थः। तिमिरहरत्वं चात्र भास्वररूपविशिष्टतया, न तेजस्त्वमात्रेण। अतो न साध्याविशेषशङ्का। एवं नीरसत्वे सति रूपवत्त्वादित्यपि हेतुः॥ ५६॥ **इति प्रभायाः प्रभावदवयवातिरेकतेजस्त्वे॥**

भाष्ये भास्वत्प्रभादौ प्रतिहतिबहलीभावपूर्वं यदुक्तं
तेन स्रोतस्समाधिं परमतनयतः प्राहुरेके प्रभायाम्।
वस्तुन्यस्ते विकल्पे स्फुटविघटनयोर्वक्तुराप्तस्य वाचो-
स्तात्पर्यं तर्कमानानुगुणमधिगुणैश्चिन्त्यमन्तेवसद्भिः॥ ५७॥

अत्र ग्रन्थान्तरसिद्धमतान्तरमाह—**भाष्य इति**॥ करतलेनाहिमकररश्मीनां गतिप्रतिहतिः। तथैव तत्र बहलतया स्फुटोपलम्भश्चाभाष्यत। प्रतिबिम्बनिरूपणे च नयनरश्मीनां दर्पणे प्रतिहतिरुक्ता। तदेतत्प्रभाप्रभावतां सहोत्पत्तिनाशपक्षे नोपपद्यते। दृश्यते च रत्नप्रभादेरपि प्रतिघातकसन्निधौ सङ्कोचस्तदपगमे विकासश्च। अतः पाञ्चभौतिकस्य रत्नादेः पार्थिवाद्यंशेन दृढावस्थितस्यापि तेजोंऽशेन गन्धादिन्यायवता विशरणप्रसरणादिकं युज्यते। आतपवारणादिवृत्तान्तश्च वर्षवारणादिन्यायात्किरणगतितत्प्रतिघातावनुमापयति। निवृत्ते चातपे क्षितिजलयोरौष्ण्योपलम्भात्तेजोंशविशरणसंक्रमणे गम्येते। प्रभातद्वतोराश्रयाश्रयित्वादिभाषणं तु परसम्मत्यैव तन्मतनिदर्शनम्। प्रभा हि प्रदीपादिना सह जनिध्वंसिनीति केचित्। तथा हि **साङ्ख्या** इन्द्रियवृत्तिनिदर्शनतया आहुः—

*दीपप्रभा यथा तस्मिन्विनश्यति विनश्यति। तथा बहिर्गताऽप्येषा मूलच्छेदाद्विनश्यति॥ इति॥

ननु विरुद्धभाषणादुभयं त्यक्त्वा सौगतगतिरिह संग्राह्येत्यत्राह—**वस्तुनीति**। न तावदिह सिद्धे वस्तुनि विकल्पः। नच वाक्ययोरैकार्थ्यं क्लिष्टगत्या कल्प्यम्, विरोधस्फौट्यात्। आप्तवाक्ये च नोभयत्यागः; सहजक्षणिकपुञ्जद्वयपक्षस्य क्षणभङ्गनिरासेनैव निरस्तत्वाच्च। अतोऽन्यतरवाक्यस्य अन्यपरत्वे प्राप्ते प्रमाणतर्कानुगुणं परमार्थतात्पर्यं प्रज्ञाशालिभिश्छात्रैः प्रतिबोद्धव्यमिति॥ ५७॥ **इति प्रभाविषयग्रन्थद्वयगमनिका॥**

प्राच्ये स्नेहादिनाशे चरम इव दृढोऽनन्तरं दीपनाशः
सामग्र्यन्यान्यकार्यं जनयति च न चानेकदीपप्रतीतिः।
साम्यादेः स्यात्तु तद्धीः प्रवहणभिदुरास्सप्रभास्तत्प्रदीपा
निर्बाधा भास्करादौ प्रथयति नियतं प्रत्यभिज्ञा स्थिरत्वम्॥ ५८॥

ननु दीपादीनां स्थिरतया गृहीतानामपि क्षिप्रविनाशित्वमभ्युपगतम्। तच्चावयवविशरणपक्ष एवोपपद्यते। तथाऽऽहुः—*अवयवविशरणलिङ्गजबोधसहायेन चक्षुषा भेदम्। ज्वालासु निर्णयामः—इति। पक्षान्तरेषु तु प्रत्यभिज्ञा दुर्बाधेत्यत्राह—**प्राच्य इति**॥ दाह्यविनाशानन्तरं वह्निनाश इति चरमदीपादिषु दृष्टम्; इष्टं च सर्वेषाम्। प्रतिक्षणं च दीपदशादिप्रक्षयो दीपादिषु प्रत्यक्षः। प्रयोगश्च—प्राच्यस्नेहदशादिनाशः स्वानन्तरभाविस्वजनकदीपनाशवान् दीपारम्भकस्नेहादिनाशत्वात्, अन्त्यवत् इति। सावधानं प्रपश्यद्भिश्च प्रवाहवद्दीपो दृश्यते; दशाग्रमारभ्य तन्मूलपर्यन्तं प्रतिकलमन्योऽन्यो दीपः प्रवर्तमानो निवर्तमानश्च दृष्टः। प्रयोगान्तरमभिप्रेत्याह—**सामग्रीति**। द्वितीयादिस्नेहादिसामग्री दीपजनिका; अविकलदीपजनकजातीयसमुदायत्वात्, आद्यवत्। अन्यथा प्रथमाऽपि नोत्पादयेत्। तथा च जितं **चार्वाकैः**।

नन्वस्तु प्रतिक्षणदीपारम्भः, प्रतिक्षणविनाशस्तु कुतस्त्य इत्यत्र पूर्वानुमानसिद्धेऽपि युक्त्यन्तरबाधमाह—**न चेति** । यदि द्वितीयादिक्षणे पूर्वपूर्वदीपनाशो न स्यात्, अनेकघटाद्युत्पत्तिनयाद्युगपदनेकदीपोपलब्धिः स्यात्; न चैवमस्ति । निगमयति—**साम्यादेरिति** । प्रभया सहोत्पत्तिपक्षेऽप्येवं दीपादेराशुतरविनाशित्वं सिद्धम् । यत्र तु सामग्र्यनुवृत्त्यादिहेतुविरहः तत्र स्थिरत्वप्रसङ्गो न दोष इत्यभिप्रायेणाह—**निर्बाधेति** ॥ ५८ ॥ **इति स्थिरास्थिरतेजोविभागः ॥**

वर्णानां तादृशत्वादतिकठिनतया गौरवस्यापि भूम्ना
धात्रीभागैः प्रभूतैस्स्फुटमिह घटिता धातवो हाटकाद्याः ।
तादृक्त्वेऽपि स्फुरत्ताद्यनितरसुलभं किंचिदन्वीक्ष्य तज्ज्ञैः
व्याख्यातं तैजसत्वं विधितदितरयोस्तन्त्रसौकर्यसिद्ध्यै ॥ ५९ ॥

यत्तु हेमादेस्तैजसत्वमाहुः *त्रपुसीसलोहरजतसुवर्णानां तैजसानामग्निसंयोगाद्द्रवत्वमद्भिस्सामान्यमिति, तत्प्रागेव पाञ्चभौतिकत्वसाधनात्प्रत्युक्तम् । विशेषतश्च परोक्तेर्भङ्गाय ब्रूमः—**वर्णानामिति** ॥ हेमरूप्यादिवर्णाः पार्थिवत्वाभिमताभ्रकशुक्त्यादिसमा दृश्यन्ते । अन्यथा कथं तत्तद्भ्रमः काठिन्यं च तेष्वधिकम्? तच्च स्वतः पृथिव्या एव, *काठिन्यवान् यो बिभर्ति इत्यादिदर्शनात् । गुरुत्वं च तेषुतेषु भूयिष्ठम् । तेजोमात्रे तु न तत्प्रसङ्गः । जले तु सदप्येतन्नैवं क्वचिदतिशयितम् । नचाप्त्वं तेषामिच्छसि । तदिह पञ्चीकृतारब्धव्यष्टिप्रपञ्चे हेमादिषु पार्थिवांशः प्रभूत इति निश्चीयते । कथमन्यथा *निष्के तु सत्यवचनमित्यादि निरुध्येत; तथात्वे तैजसत्वस्मरणं कथमित्यत्राह—**तादृक्त्वेऽपीति** । स्फुरत्तादि—तेजस्समानं वर्णविशेषं स्वतश्शुद्धत्वं चेत्यर्थः । तज्ज्ञैः—तथाभूतवेदिभिः । व्याख्यातं—विशेषतः प्रकथितम् । किमर्थमित्यत्र तैजससमाख्यातेषु विधिनिषेधसाधारण्यसौकर्यार्थमित्याह—**विधीति** । ननु सर्पिर्जतुमधूच्छिष्टानां पार्थिवानामत्यन्ततापलुप्तद्रवत्वं दृष्टम्, न तथा हेमादौ ततस्तेषामपार्थिवत्वम् । मैवम्; एवमपि तोयान्यत्वस्य दुस्साधत्वात् । द्रवत्वविशेषात्तैजसत्वसाधने च न कश्चिद् दृष्टान्तः । पाकजद्रवत्वेन पार्थिवत्वसाधने तु सर्पिराद्यस्ति; अलुप्तद्रवत्वं च हेमादेस्तदुपष्टम्भकपार्थिवांशेऽप्यस्ति । अन्यथा तत्र तदानीं काठिन्यानुवृत्तिप्रसङ्गात् । अतः पक्षविपक्षमात्रवृत्तित्वाद्विरुद्धता ॥ अवान्तरविशेषाच्च नातज्जातीयता भवेत् । अतिप्रसङ्गसाम्राज्यादशेषापह्नवेन वा ॥
न च हेमादिशब्दानां युक्तं दृष्टप्रमाणतः । अलोकव्यवहारार्हे कुत्रचिद्वृत्तिकल्पनम् ॥ ५९ ॥

इति हेमादेस्तैजसत्वोक्तितात्पर्यम् ॥

नैल्याद्भौमं तमिस्रं चटुलबहलताद्यन्वयात्तन्न नैल्यं
छायावत्पारतन्त्र्यं त्वयस इव मणौ दृष्टिसिद्धात्स्वभावात् ।
स्पर्शाख्यातिर्न रूपं हरति हरिशिलालोकवत्तत्र चाक्ष्णो-
र्नालोकोऽर्थ्यस्ससिद्धाञ्जननयनदिवाभीतदृष्ट्यादिनीतेः ॥ ६० ॥

तेजोऽनन्तरे तोये विप्रतिपन्नार्थाभावात्तदुल्लङ्घनेन तमसः पृथिव्यामन्तर्भावमाह—**नैल्यादिति** ॥
*तमः खलु चलं नीलं परा[व]परविभागवत् । प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति ॥
इति य एवं वदन्ति तान्प्रत्युभयसम्मतेन नीलत्वेन पार्थिवत्वं साध्यते, द्रव्यान्तरकल्पने गौरवात् । अवान्तरविशेषश्च न

वैजात्यहेतुरित्युक्तम्। प्रभातुल्यत्वपक्षे पित्तवद्दृक्प्रभापसर्पपक्षेऽपि नीलत्वाद्धौमत्वं सिद्धमेव। ये त्वाहुः—*वियति विततानां सूक्ष्माणां पृथिव्यवयवानां कृष्णो गुणस्तम इति तेषां निराधारनैल्योपलम्भोऽशक्यसाधन इत्यभिप्रायेणाह—**तन्न नैल्यमिति**। हेत्वन्तरमाह—**चटुलेति**। चटुलत्वबहलत्वविरलत्वादिकं हि द्रव्यधर्म एव। न च तदुपलम्भो नास्ति, नीलोपलम्भो वा, विश्वविरोधात्। न चात्रालोकापसर्पणादिहेतुभेदैश्चटुलत्वमारोपितम्; प्रत्यक्षभ्रमेषु गुणमात्राधिष्ठानत्वादृष्टेः। गन्धो वातीत्यादिष्वपि द्रव्याभिप्रायेण प्रयोगः। यदि स्वतन्त्रद्रव्यं तमः तदा तत्तद्गत्यागत्यनुविधानं कथमित्यत्राह—**छायावदिति**। यथाऽयस्कान्तस्थितिगत्यनुविधानं पृथग्द्रव्यस्याप्ययसो दृश्यते तथाऽत्रापि स्यात्; यथादृष्टि स्वभावव्यवस्थापनात्। ननु पार्थिवत्वरूपवत्त्वे स्पर्शवत्त्वव्याप्ते; न च ध्वान्ते स्पर्श उपलभ्यते; अतस्ते उभे तस्य न स्त इत्यत्राह—**स्पर्शाख्यातिरिति**। तमःस्पर्शस्यायोग्यत्वादित्यभिप्रायेण नीलत्वसाम्याच्च हरिशिलालोकदृष्टान्तः। यन्नीलं तदालोकसहकृतचक्षुर्ग्राह्यम्; तमश्च न तथा; ततश्चाक्षुषप्रत्ययाभावे नीलत्वाभिमान इत्यत्राह—**तत्र चेति**। आलोकोपलब्धावालोकान्तरं न सहकारि, तथाऽत्र स्यात्; विषयस्य सतस्तत्र सहकारित्वमिति चेत्; अथापि वस्तुभेदे वैरूप्यं सिद्धम्? एवं ध्वान्तेऽप्यालोकनैरपेक्ष्यं स्यात्। अलङ्घनीयनिदर्शनान्तरमाह—**सुसिद्धाञ्जनेति**। अञ्जनविशेषसहकृतं हि चक्षुरन्धतमसेऽपि पदार्थान्दर्शयति, तथेहापि स्यात्। तत्र सहकार्यन्तरप्रभावादिति चेत्; अत्राप्यालोकाभावस्य सहकारिणः प्रभावादित्यङ्गीकुरुष्व। यथा च किंचिद्बहलालोकग्राह्यं किंचिन्मन्दालोकेनापि, तथा किंचिदालोकग्राह्यं किंचिन्न तथेति यथादर्शनं नियमः। दृक्स्वभावाच्च; यथा दिवाभीतादिदृष्टेरालोकनैरपेक्ष्यम्, तथा दृश्यस्वभावादिहापीति किं नेष्यते? अस्त्वेवम्, तथाऽप्यालोकमध्ये किं नोपलभ्यत इति चेत्; आलोकनाश्यत्वादिति केचित्; उत्सारितत्वादित्यन्ये; मध्यन्दिनोल्काप्रकाशादिवदभिभवादित्यपरे।

अद्रव्यत्वादिपक्षाणामत्रासंभवसिद्धये। आद्यमेव तमो ध्वान्तमिति केचिदुपाचरन्॥

किंच तेजस इव तमसोऽपि शरीरत्वाम्नानादालोकमध्ये तमस्सृष्टिवचनादेकस्मिन् काले तमस्तेजःप्रलयपाठाच्चास्य द्रव्यत्वप्राकृतत्वसिद्धौ रूपवत्त्वेन वायुपर्यन्तव्यपोहः। कृष्णरूपवत्त्वाच्च वह्निजलव्यावृत्तिः सिध्येत्; *यत्कृष्णं तदन्नस्येति श्रुत्यनुसाराच्च। तदिदं तमः परब्रह्माच्छादकाविद्यानिदर्शनतया विषयावारकं कैश्चिदुक्तम्। तदसत्;

तमोव्यवहितालोकस्थितनानार्थदर्शनात्। दृग्गतेरविरुद्धस्य दृश्यच्छादकता कथम्॥

अतो मर्त्यादिदृष्टीनां दृश्यसंबन्धमात्रतः। दर्शनप्रतिघातित्वं स्वभावात्तमसि स्थितम्॥ ६०॥

इति तमसः पार्थिवत्वम्॥

नालोकाभावमात्रं तिमिरमविरतं नीलमित्येव दृष्टे-
नैल्यं त्वारोपितं चेत्कथमिव न भवेत्क्वापि कस्यापि बाधः।
आरोपे चात्र नैल्यं न भवति नियतं भास्वरान्यत्वसाम्या-
न्नात्रादृष्टं नियन्तृप्रतिनियतगुणारोपक्लृप्तेर्गुरुत्वात्॥ ६१॥

ये त्वाहुः—आलोकाभाव एवालोकविरोधित्वलक्षणसमानधर्मस्मारितनैल्योपरक्तो नीलं तम इति गृह्यते; नञुपश्लेषरहितशब्दवाच्यत्वं तु प्रलयादिशब्दन्यायेन स्यादिति; तान्प्रतिवक्ति—**नालोकेति**॥ अबाधितं नीलोपलम्भं हेतुमाह—**अविरतमिति**। आरोपितं नीलरूपत्वं नाभावत्वविरोधीत्यभिप्रायेणाशङ्कते—**नैल्यं त्विति**। आरोपस्य कालभेदेन

पुरुषभेदेन वा बाधव्याप्तिमभिप्रेत्याह—**कथमिवेति** । अविरतमिति सूचितमेतेन व्यञ्जितम् । ननु तमो न नीलम् असत्यालोके चक्षुषा प्रतीयमानत्वादिति बाध इति चेन्न; दृष्टान्तासिद्धेः । आलोकाभाव एव दृष्टान्त इति चेन्न; त्वत्पक्षे पक्षदृष्टान्तभेदाभावात्, अस्मन्मते तु भावातिरिक्ताभावासिद्धेः, आलोकाभावे दिवाभीतादिचक्षुर्ग्राह्यैर्नैल्यैर्व्यभिचाराच्च । दृग्वैषम्यवद्दृश्यवैषम्यं च व्यवस्थापकं स्यादित्युक्तम् । अतोऽस्मदादिविशेषणेऽप्यनिस्तारः; तमोधर्मभूतनैल्यादिदृष्टान्तस्तु तदभावसाधने विरुद्धः । आरोपितनैल्यादिदृष्टान्तस्तु शुक्तिरूप्यशशशृङ्गादिवदनादेयः । अनारोपितं तु सत्येवालोके चक्षुषा गृह्यते; तथाऽपि भ्रान्तिदशायां गृह्यमाणारोपाभावेऽपि चाक्षुषभ्रान्तिविषयत्वादेवायं हेतुस्सिद्ध इति चेन्न; तमसि नैल्यारोपसिद्धिमन्तरेणास्य हेतोरनुत्थानात् । भवति हि बाधादृष्टान्तलाभः; तेन च स इति मिथस्संश्रयः । अस्पर्शत्वादिबाधकान्तरं तु निरस्तम् । अत्र नीलमित्येवेत्यवधारणतात्पर्यभेदसिद्धं दूषणान्तरमाह—**आरोपे चेति** । अयं भावः—आरोप एवात्र न संभवति । अभावस्य हि स्वरूपमेव हि भेद इति मन्यसे; अतस्तद्ग्रहे तदग्रहे वा कथमारोपः? एवं च ब्रूषे । आलोको हि भास्वरः, तद्विरोधी च तदभावः, कृष्णद्रव्यमपि भास्वरान्यत्वात्तथैव । अत आलोकविरोधित्वसाधर्म्यादकृष्णे कृष्णधर्माध्यास इति । एवं सति रक्तपीतादीनामपि तथात्वाविशेषात्तत्र तदारोपः किं न स्यादिति । अत्र यदुक्तं **काणादैः**—आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति, तदयुक्तम् । आरोपे सतीत्यसिद्धेः निमित्तस्य चातिप्रसङ्गिनोऽनुसरणायोगात् । यथा च रज्जौ सर्पाध्यासः तथा कदाचिदम्बुधाराद्यध्यासोऽपि किं न भवति? सत्यां च सामग्र्यां कार्यानुत्पत्तिरिति न लौकिकमेतत्, नच यौक्तिकम् । यच्चोक्तमदृष्टादिकं चात्र नियामकमवसेयमिति; तद्दूषयति—**नात्रेति** । विचित्रादृष्टभेदविषमिते जगति सर्वजन्तुसाधारणस्य दुरुपशमतावन्मात्रभ्रमहेतोरदृष्टविशेषस्य कल्पनेऽतिगौरवं स्यादित्यभिप्रायेणाह—**प्रतिनियतेति** ॥ ६१ ॥

ध्वान्तं तेजश्च नासीदिति मुनिभिरुपाख्यायि संवर्तवार्ता
भावाभावौ निषेद्धुं तदुभयविधिवद्व्याहतत्वादशक्यम् ।
अन्तर्यन्तुश्च तेजःसहपठिततमो देह इत्यामनन्ति
स्याच्चाभावोऽपि भावान्तरमतिमथने वक्ष्यमाणक्रमेण ॥ ६२ ॥

आलोकाभावपक्षस्यागमवैगुण्यमाह—**ध्वान्तमिति** ॥ अर्थोपादानमेतत्—शब्दस्तु *नासीत्तमो ज्योतिरभून्न चान्यदिति । कथमस्य प्रकृतविरोधित्वमित्यत्राह—**भावाभावाविति** । न हि कस्यचिदेकदैकत्र भावाभावविधिश्शक्यते; तद्वदुभयनिषेधोऽप्यशक्यः । अन्तत उभयनिषेधस्य उभयविधिविश्रमणेन व्याघातादिति भावः ॥ ६२ ॥

इति तमस आलोकाभावमात्रत्वभङ्गः ॥

तिष्ठत्युर्वीभचक्रं पवनरयवशाद्भ्राम्यतीत्युक्तमाप्तै-
र्भ्रान्तैः क्लृप्तं त्रिलोकीभ्रमणमिह तथा मेदिनीभ्रान्तिपातौ ।
तद्भ्रान्तौ प्राक्प्रतीचोः प्रसजति पतने पत्रिणोस्तारतम्यं
पाते गुर्व्यास्तु तस्याः प्रलघु दिवि समुत्क्षिप्तमेनां न यायात् ॥ ६३ ॥

भूप्रसङ्गात्तद्भ्रमणादिपक्षं निराकर्तुं स्वपक्षं तावदाह—**तिष्ठतीति** ॥ आप्तैः—पुराणादिकर्तृभिस्तदनुसारिभिश्च । आप्तिश्च तेषां *हिरण्मयेन सविता रथेनेत्यादिश्रुत्यनुसारात् । अस्मिन् पक्षे सर्वलोकोपलम्भस्वारस्यमस्ति । न च

गणितादिविरोधः । कक्षीकृतश्चायं पक्षः कार्तान्तिकैरपि । यथाऽऽह **आर्यभटः**—

* उदयास्तमयनिमित्तं नित्यप्रवहेण वायुनाऽऽक्षिप्तः । लङ्कासमपश्चिमगो भपञ्जरस्सग्रहो भ्रमति ॥ इति ।

कैश्चित् * उत्ताना ह वै देवगवा वहन्ति इत्यादिनिर्वहणाय त्रैलोक्यभ्रमणं स्वीकृतम्, तदुपालभ्यते—**भ्रान्तैरिति** । यथा स्वयं भ्राम्यन्तो बालिशा भुवं भ्राम्यन्तीमभिमन्यन्ते तथेदमिति भावः । यदि स्थिरतयैव दृष्टानां ग्रहनक्षत्राणां भ्रमणं कल्प्यते तदविशेषाद्भुवोऽपि कल्प्यतामिति चेन्न; अपेक्षितस्यान्यथैव सिद्धेः । अत्र * अनुलोमगतिर्नौस्थ इत्यादिषु स्थापितस्य भूभ्रमणवादस्य **जैनोक्त**स्य च भूपतनस्य भ्रान्तिकल्पितत्वमतिदिशति—**तथेति** । इषीकाप्रोतपत्रिकादिवत्स्वदेशं मुञ्चन्ती द्रुततरमधरोत्तरवृत्त्या भूः भ्रमतीति हि तद्भ्रान्तिपक्षः । अत्रोत्क्षिताश्शरशिलादयः स्वदेशे तदासन्ने वा कथं निपतेयुः, नित्यं च स्वदेशपश्चिमभाग एव तेषां निपातस्स्यात् । उड्डीनाश्च पक्षिणो न कुलायमासीदेयुः, प्रत्यङ्मुखं पततां च तेषां गन्तव्यानि स्वयमपि तूर्णं प्रतिगच्छेयुः । प्राङ्मुखं गच्छतां तु दुःखेनापि न सन्निकृष्येरन् । एकदेशस्थिते च वर्षति वलाहके मुहूर्तमात्रान्मही शतयोजना सिच्येत । अतिकुशलानामपि धन्विनां दक्षिणोत्तरदिग्देशावस्थितस्थिरलक्ष्यवेधो न स्यात् । शरविहङ्गादीनामपि धरणीसममेव वायुना नोदनान्नोक्तप्रसङ्ग इति चेन्न; तथाविधस्य प्रबलमारुतस्यानुपलम्भनिरस्तत्वात्, सर्वेषां प्रत्यङ्मुखगतिप्रतिरोधप्रसङ्गाच्च । यो हि महापृथिवीं प्रभञ्जनः प्रसभमार्तयति तं कथं लघीयांसो विहङ्गादयः प्रतिसरेयुः? किंतु पृथिव्याः पूर्वमेव प्राङ्मुखं दूरमपनीयेरन्? किंच ज्योतिर्गणभ्रमणहेतुर्मारुतश्शास्त्राभ्यनुज्ञानात् प्रत्यक्षविरोधाभावाच्च संगृह्यते, भूभ्रमणहेतुस्त्वसौ शास्त्रोपलम्भविरोधान्न कल्प्यः; भुव एव वायुवददृष्टवशात्तादृशभ्रमणोपपत्तेः । स्यादेवं किं नश्छिन्नमिति चेन्न; उपलम्भानुसारस्य छिन्नत्वात् । अत एव अनन्तताराग्रहभ्रमणकल्पनादेकभ्रमणकल्पनं वरमित्ययुक्तम्; ताराभ्रमणादेरागमिकस्याकल्प्यत्वाच्च । तदेतत्सर्वमभिप्रेत्याह—**तद्भ्रान्ताविति** । भूपतने दोषमाह—**पात** इति । अयं भावः—पातो हि भुवो न तावदुपलम्भागमाभ्याम्, तयोरिह तद्विपरीतत्वात् । नाप्यनुमानतः, गुरुत्वात्पतनस्य प्रतिबन्धके निरोधोपपत्तेः । निरालम्बने निरवधौ नभसि नित्यं निपतन्तीमलब्धप्रतिष्ठां भुवं कः प्रतिरुन्ध्यादिति चेन्न; * वासुदेवस्य वीर्येण विधृतानीत्यादिना तत्सिद्धेः । भूपतने चोत्क्षिप्ताश्शिलादयो न कदाचिद्भुवं प्राप्नुयुः । गौरवप्रकर्षकाष्ठाभूताद्भूमण्डलादतिलघीयसां रजःप्रभृतीनामधिकपतनकल्पनं चोपहास्यम्; पोतवालुकादिन्यायस्त्विह दुर्वचः, उपष्टम्भकादिविशेषस्यानभ्युपगमात्, तत्कल्पने च तस्याप्यन्यत्कल्प्यम् इत्यनवस्थानात्, वायुविशेषस्योपष्टम्भकत्वकल्पने तेनैव नित्यमपतनमिति किं न रोचते? तदिह युक्तिमात्रशरणानां निराधाराऽपि स्वभावादेव तिष्ठति भूमिः । आगमानुविधायिनां तु सर्वाधारेण ब्रह्मणा सोपधानं निरुपधानं च विधृतेति । अत एव पृथिव्याधारस्थिरतरकर्परक्लृप्तिर्निरस्ता । कर्परस्यापि निराधारस्य स्थित्यनुपपत्तेः, चतुरुदधिसंक्षोभसहत्वस्य पृथिव्यामेव कल्पयितव्यत्वात् । ये च पतनोत्पतनस्वभावभूतचतुष्टयमयत्वान्न पतति नोत्पतति च भूपिण्ड इत्याहुः, तेषामन्यूनानतिरिक्ततादृशावस्थानोचितपरिमाणैर्भूतैरारब्धः परिदृश्यमानमृच्छिलादिविलक्षणश्चागत्याऽन्य एव भूपिण्ड इत्यादिकल्पना केवलमूहमात्रसिद्धा । अन्ये—दक्षिणोत्तरध्रुवयोरयस्कान्तसमाधिं भूगोले चायस्समाधिमारोपयन्ति, ; तेऽपि कल्पनागौरवोपहताः ; भूगोलस्यैव हि तादृशशक्तिकल्पनं युक्तम्; न तु दवीयसोरात्मस्थितिनिर्वाहसापेक्षयोः ध्रुवयोः । केचिद्भूगोलघनमध्यदेश एव सर्वेषामधोधोदेशः, तदभिमुखदत्तचरण एव स्थलजलचरः सर्वो जन्तुवर्गः । भूमिस्तु तदाश्रिता नानाकेसरपरिवृतकदम्बकुसुमग्रन्थिवन्मक्षिकावृतमधुगोलवच्च तिष्ठति । अमरा

नराश्च परस्परमधःस्थितानमन्यन्ते । पतनं च सर्वेषां भूगोलमध्यदेशाभिमुखमेव । पृथिव्यंशास्त्ववकाशालाभात्र तत्र प्रविशन्ति । अतो महापृथिव्या न कदाचित्पतनम्, तामपेक्ष्य कस्यचिदधोदेशस्याभावात् इति । तदेतद्भवोऽधस्तादुपरि च लोकानुपदिशद्भिश्शास्त्रैरुपरुध्येत । यत्तु—* पातालदेशाः क्षितिगोलमध्ये सप्तोपदिष्टास्तलपूर्वकास्ते इति, यदपि * मेरुर्योजनमात्रः प्रभाकरो हिमवता परिक्षितः । नन्दनवनस्य मध्ये रत्नमयस्सर्वतोवृत्तः ॥ इत्यादि, तदिदं गणितविसंवादाभावेऽपि शास्त्रान्तरविरुद्धं न कल्प्यं न चोपदिष्टमिति श्रद्धातव्यम् ॥ ६३ ॥ **इति भूभ्रमणादिवादभङ्गः ॥**

ज्योतिश्शास्त्रं पुराणाद्यपि न हि निगमग्राह्यमन्योन्यबाध्यं
विद्यास्थानं तु सर्वं प्रतिनियतनिजोपक्रियांशे प्रमाणम् ।
तात्पर्यं तर्कणीयं तदिह बहुविदा भूपरिध्यादिभे[दे]दैः
दुर्ज्ञानं सर्वथा यन्मुनिभिरपि परैस्तत्र तूदासितव्यम् ॥ ६४ ॥

भूपरिधिकल्पनादिषु वैदिकशास्त्रद्वयविरोधं परिहर्तुमाह—**ज्योतिरिति** ॥ निगमग्राह्यमिति हेतुगर्भम्; यद्युभयबाधोऽन्यतरबाधो वा, न तत्र बाधितस्य वेदोपकारकत्वं स्यादिति भावः । कथं वा विरुद्धयोस्साकल्येन प्रामाण्यमित्यत्राह—**विद्यास्थानमिति** । येनयेनोपकारेण दशविद्यास्थानानि वेदैरुपजीव्यन्ते, तत्रांशे विरोधाभावात्प्रामाण्यं प्रतिष्ठितमित्यर्थः । अंशान्तरे कथमित्यत्राह—**तात्पर्यमिति** । न ह्यन्यपरवाक्यैरापातप्रतीतार्थस्थापनम्; यत्र च तात्पर्यं तत्र च न विरोध इति भावः । ननु ज्योतिरागमे पञ्च सिद्धान्ताः प्रवृत्ताः, पुराणेष्वप्येवं मतभेदा दृढाः । तत्रान्यतमप्रतिक्षेपे मुनयोऽपि यदि मुह्यन्ति किं कर्तव्यमित्यत्राह—**दुर्ज्ञानमिति** । परैः—ऋषिव्यतिरिक्तैरस्मदादिभिरित्यर्थः ॥ ६४ ॥
इति भूपरिमाणादिवाक्येषु परस्परविरोधपरिहारः ॥

सूर्यावृत्त्याद्युपाधिव्यतिकरवशतः कालताऽस्त्वम्बरादे-
रन्यस्मिन्नन्यधर्मोपनयननियमः प्राग्वदत्रेति चेन्न ।
कल्पान्तेऽप्येककालः प्रकृतिपुरुषवद्ब्रह्मणोरूपमन्य-
न्निर्दिष्टोऽनाद्यनन्तो मुनिभिरिति ततः कार्यता चास्य भग्ना ॥ ६५ ॥

उद्दिष्टलक्षितेषु त्रिगुणानन्तरं कालः परीक्ष्यते । तत्र * अपरस्मिन्परं युगपदयुगपच्चिरं क्षिप्रमिति काललिङ्गानि इति परोक्तेरानुमानिकः काल इति मन्वानः साङ्ख्यसौगतचार्वाकवञ्चितः कश्चित्कालं निह्नुते—**सूर्येति** ॥ आदिशब्देन विभुद्रव्यान्तरम् उपाधिबुद्धिविशेषाश्च संगृह्यन्ते । स्थविरयुवादिषु परत्वापरत्वनिर्वाहाय तत्कारणभूतबुद्धिविशेषविषयसूर्यपरिस्पन्दप्रकर्षनिकर्षादिघटकतया कालः कल्प्यते । तत्र संप्रतिपन्नैराकाशादिभिरेव तत्तदुपाधिव्यतिकरितैः, उपाधिभिरेव वा, बुद्धिसन्निकर्षघटितैः, तादृशोपाधिबुद्धिभिरेव वा, अपेक्षितसिद्धौ किमिह तदतिरिक्तकल्पनया? यद्यतिप्रसङ्गभयाद् बुद्धिविशेषसंबन्धानादरेण कालोऽन्यः कल्प्यते, तथाऽप्यतिप्रसङ्गस्तदवस्थः; यथादर्शनं व्यवस्था च समानेति भावः । कालता—परत्वादिनिर्वाहकतेत्यर्थः । अत्र दिङ्निरूपणे दर्शितमतिप्रसङ्गं तद्वदेव परिहरति—**अन्यस्मिन्निति** । शास्त्रोक्तं न लाघवतर्कबाध्यमित्यभिप्रायेणाह—**नेति** । कथं शास्त्रे तदुक्तिरित्यत्राह—**कल्पान्तेऽपीति** । उक्तं हि वैष्णवे पुराणे—* विष्णोः स्वरूपात्परतोदिते द्वे इत्यारभ्य * रूपान्तरं तद्द्विज कालसंज्ञम् इति । कार्यभूताकाशाद्यन्तर्भावश्चानेन भग्न

इति व्यनक्ति—**तत** इति । एतेन त्रिविधा प्रकृतिः, कालः परमाकाशोऽव्यक्तमिति केषांचित्कल्पनाऽपि निरस्ता । ननु जैननिराकरणे *कालस्य त्वित्यादिना **भाष्येण** कालो निराकृत इव भाति । मैवम्, सर्वप्रतिपत्तिषु तत्तत्पदार्थविशेषणतया सर्वलोकानुभूतस्य न बौद्धादिभिर्नास्तित्वं वक्तुं शक्यम् । न त्वया पृथक् तदस्तित्वं साध्यम् । कालोऽस्तीत्यादिपृथग्व्यवहारस्तु अपृथक्सिद्धविशेषणानां निष्कृष्य व्यवहारवदिति तन्निर्धारणे तात्पर्यात् ; अन्यथा शास्त्रैः स्वग्रन्थान्तरैस्संप्रदायैश्च विरोधस्स्यादिति ॥ ६५ ॥ **इत्याकाशाद्यतिरिक्तकालसिद्धिः ॥**

> **कालोऽसीति स्वगीता कथयति भगवान्काल इत्याप्तवर्यो**
> **हेतुः सर्वस्य नित्यो विभुरपि च परः किं परेणेति चेन्न ।**
> **कालान्तर्यामितादेः स खलु समुदितः संप्रतीते तु भेदे**
> **साधर्म्ये नैक्यहेतुः स हि तदितरवद्घोषितस्तद्विभूतिः ॥ ६६ ॥**

एवमपि कालस्य परमात्मव्यतिरिक्तत्वं न सिध्यति, रूपान्तरमिति स्वरूपविवक्षोपपत्तेः, तत्स्वरूपैक्ये प्रमाणसद्भावाच्चेत्यभिप्रायेणाह—**काल** इति ॥ स्वशब्दोऽत्र परमात्मविषयः । गीयते हि—*कालोऽस्मि लोकक्षयकृत्प्रवृद्धः इत्यादि । तद्वत् *अनादिर्भगवान्काल इति **पराशरेणोक्त**मपि ख्यापयति—**कथयती**ति । आप्तवर्यत्वमस्य *देवतापारमार्थ्यं च इत्यादिभिस्सिद्धम् । नित्यविभुना परमात्मनैव त्रैकालिकसार्वत्रिकसर्वव्यवहारसिद्धिमभिप्रेत्याह—**हेतु**रिति । तदतिरिक्तकालकल्पनस्य निरर्थकत्वमाह—**किं परेणे**ति । रूपान्तरमित्यत्र क्लिष्टा गतिरयुक्तेत्यभिप्रायेण प्रतिवक्ति—**नेति** । कालेऽपि सामानाधिकरण्यं तत्तत्पदार्थान्तरेष्विव निर्वहतीत्याह—**कालान्तर्यामितादे**रिति । आदिशब्देन कालाभिमानिरूपसंग्रहः । सन्ति हि जीवमनोहङ्काराभिमाननियतानुबन्धानि सङ्कर्षणादिरूपाणि, तद्वदिहापि स्यात्; *को भवानुग्ररूप इति प्रश्नसंघटनाच्च । सर्वकार्यहेतुत्वनित्यत्वविभुत्वैस्तदैक्यसाधनं निरस्यति—**संप्रतीते त्वि**ति । वस्त्वन्तर इव भेदकण्ठोक्तिं व्यनक्ति—**स ही**ति । *ब्रह्मा दक्षादयः काल इत्यादिभिरिति शेषः । *विष्णुमन्वादयः काल इत्यत्र तु विष्णुशब्दोऽवतारपरः; तस्य तद्विभूतित्वं च तादृशरूपेण ॥ ६६ ॥ **इति कालस्येश्वरैक्यशङ्कापरिहारः ॥**

> **कालस्योत्पत्तितः प्राक् परमपि च लयात् कालनास्तित्ववादी**
> **स्वोक्तिव्याघातभग्नो न वदति यदि तत्को वदेत्कालसृष्टिम् ।**
> **आप्तस्तत्सृष्टिवादस्तदुपधिपरिणत्यादिभिस्सार्थकस्स्यान्-**
> **नोचेत्तत्रापि पूर्वापरवचनहतिर्दुर्निवारप्रसङ्गा ॥ ६७ ॥**

ये तु महदादिवत्कालतत्त्वमुत्पत्तिनाशवदिति तन्त्रा[न्तरा]नुसारिणो वदन्ति, तान्प्रतिक्षिपति—**कालस्ये**ति ॥ उत्पत्तेः पूर्वं नाशतः पश्चाच्च कालो नास्तीति वदन् किं तत्र पूर्वशब्दस्य पश्चाच्छब्दस्य च निरर्थकत्वं मन्यते ? सार्थकत्वं वा ? पूर्वत्र निरर्थकनिग्रहस्थानापत्तिः । उत्तरत्र कालस्यैव तदर्थत्वात्तत्र कालनिषेधे स्ववचनविरोधः । अथ काले कालो नास्तीत्यविरोधं मन्येत, तर्हि सृष्टिप्रलयमध्यकालेऽपि कालाभावात्तत्रापि कालनास्तितां ब्रूयादिति कथं कालसिद्धिः ? गत्यभावान्मौनमाश्रित्य यः पूर्वं पश्चाच्च नास्तीति न ब्रूयात् तदाऽस्मन्मतं न निषेधतीति नास्माभिरुत्तरं देयम् । अथ पार्श्वस्थो यदि कश्चिद् ब्रवीति तस्याप्युक्तदोषस्सम इत्यभिप्रायेणाह—**तत्को वदे**दिति । *सदेव सोम्येदमग्र आसीत्,

* नासदासीन्नो सदासीत्तदानीम् इत्यादिश्रुतिविरोधश्चात्राभिप्रेतः । * विद्याकालौ भवत्कृतौ इत्यादिषु कालोत्पत्तिवचनं कथमित्यत्राह—**आप्त** इति । आप्तवाक्यस्थ इत्यर्थः । यथा निमेषादिसंवत्सरान्तजनिश्रुतिः पक्षमासादिष्वागमापायितप्रख्यातिश्च उपाधीनां तत्संयोगादिपरिणतीनां तदभिमानिदेवतानां वा सृष्ट्या अर्थवती, तथाऽसावित्यर्थः । अन्यथा तत्रापि विरोधमाह—**नो चे**दिति । पूर्वापरवचनहतिः—पूर्वं परं च कालो नास्तीति वचनस्य बाध इत्यर्थः । अथवा पूर्वापरग्रन्थविरोधः, प्रलयादिकालमनूद्य हि प्रकृतिविकारास्सर्वे सृष्टिवाक्येषु प्रतिपाद्यन्ते । **श्लो.** कालोपाश्लिष्टवेषेण ह्यभूदस्तिभविष्यतीन् । प्रयुञ्जतेऽर्थभेदेषु सदा चास्तिमनेहसः ॥ ६७ ॥ **इति कालोत्पत्तिवादपरिहारः ॥**

कालोऽध्यक्षावसेयः क्षणलवदिवसाद्यंशतोऽर्थान्विशिंषन्
साक्षाद्धीस्तत्तदर्थेष्विव भवति हि नः क्वापि कालान्वयेऽपि ।
तत्संयोगाः परत्वादय इति च ततोऽप्येष नैवानुमेयो
नो चेन्न क्वापि लोकव्यवहृतिविषयोऽव्यक्तवत्स्यादनेहा ॥ ६८ ॥

नीरूपद्रव्यस्यापि प्रत्यक्षत्वसंभवः प्रागेव साधित इति कृत्वा कालप्रत्यक्षत्वं लोकोपलब्ध्या नियमयति—**काल** इति ॥ अवसीयमानप्रकारमाह—**क्षणे**ति । क्षणमयं तिष्ठतीत्यादिप्रकारेण तत्तदर्थविशेषणतयाऽवसीयत इति यावत्, अभिज्ञायां क्षणरूपेण प्रत्यभिज्ञायां दिवसादिरूपेण चेति विभागः । अनुमीयमानो विशिंष्यादित्यत्राह—**साक्षा**दिति । प्रत्यक्षप्रतीतौ विशेषणतया दृश्यमानस्य कालस्यानुमेयत्वे तत्तत्पदार्थानामपि सौत्रान्तिकोक्तनयादानुमानिकत्वं प्रसज्यत इति भावः । न चासावनुमातुं शक्य इत्याह—**तत्संयोगा** इति । कालमनभ्युपगच्छतां बुद्धिविशेषसंघटितसूर्यावृत्त्याद्युपाधिभिरेव वैशिष्ट्यं वस्तूनां परत्वादि । अभ्युपगच्छतां तु तत्तदुपहितकालसंयोगाः । न च तदतिरिक्तं दृष्टं कल्प्यं वा इत्य**द्रव्यसरे** स्थापयिष्यते । कालस्यानुमेयत्वेऽनिष्टं प्रसञ्जयति—**नो चे**दिति । न हि परत्वापरत्वादिभिः कश्चित्कालोऽस्तीत्यनुमाय तद्विशिष्टतया पदार्थान् व्यवहरन्ति लौकिकाः । अतः कालोऽप्यव्यक्तवच्छास्त्रैकवेद्य इति; तद्वदेव लोकव्यवहारविषयो न स्यादित्यर्थः । नन्वस्मदादिप्रत्यक्षमप्रत्यभिज्ञारूपं वर्तमानमात्रविषयमिति सर्वसंमतम् । अतोऽस्य पूर्वापरकालविशिष्टविषयत्वमसंभवि, पूर्वापरव्यतिरिक्तं तु वर्तमानं न पश्यामः; अतः कथं कालप्रत्यक्षत्वम्? इत्थम्–किं भवान् वर्तमानधियमेव नानुभवति? सतीमपि वा निर्विषयाम्? सविषयामपि वा कल्पितविषयाम्? न प्रथमः, इदं पश्यामीत्यादिव्यवहारोच्छेदप्रसङ्गात् । अतएव न द्वितीयः, अस्वविषयधियां त्वनभ्युपगमाच्च । न तृतीयः; क्वचित्सिद्धस्यैवान्यत्र कल्प्यत्वात्; तथा च तत्सिध्येत् । रूपादिषु दृष्टं वर्तमानत्वं काले कल्प्यतामिति चेन्न; क्षणिकरूपादिसन्ततावपि पूर्वापरातिरिक्तवर्तमानत्वस्य त्वया दुर्वचत्वात्, अन्यथा कालेऽपि तदुपपत्तेः । कालमनिच्छतश्च ते काले कथं कल्पना? निरधिष्ठानाऽसौ कल्पनेति चेन्न; ईदृशकल्पनाभ्युपगमे माध्यमिकागमप्रवेशप्रसङ्गात् । स्थिरवादे तु रूपादिष्विव केनचिद्रूपेण कालेऽपि वर्तमानत्वं सिद्धम् । ननु रूपादीनां वर्तमानकालसंबन्धो वर्तमानत्वम्, नाऽसौ कालस्य स्यात् । मैवम्; त्वयैव कालस्य वर्तमानत्वेन रूपादिवर्तमानत्वनिर्वाहात् ॥

वर्तमाननिषेधे च भवित्री विश्वनिह्नुतिः । न ह्यतीतं भविष्यद्वा प्रत्यक्षविषयोऽस्ति नः ॥
वर्तमानभ्रमश्चात्र तत एव न सिध्यति । पौर्वापर्यातिरिक्ता तु दुस्त्यजा वर्तमानता ॥
अतीतागामिधीरेव वर्तमानमतिर्यदि । भूतभाविसमस्तासया न शोकादिसमुद्भवः ॥

पूर्वापरत्वसंभेदे वर्तमानमतिर्यदि । त्रिकालस्थेऽपि तत्सिद्धेः क्वातीतागामिता भवेत् ॥
प्रारब्धश्चासमाप्तश्च वर्तमानो य उच्यते । व्यापारसमुदायोऽसौ विवक्षितफलावधिः ॥
तत्रापि क्षणभेदेन नष्टत्वादिविकल्पतः । वैवक्षिकमिहान्यच्च वर्तमानत्वमक्षतम् ॥

ननु सतो विनाशप्रागभाव एव वर्तमानत्वम् । तद्विशिष्टेषु पदार्थेषु दृश्यमानेषु किं सतो वाऽसतो वा कालस्य दृश्यमानतया? मैवम्; कालासत्त्वपक्षस्य निरस्तत्वात्, तत्सत्त्वे तु तत्साध्यानां पूर्वापरयुगपत्त्वादिव्यवहारविशेषाणां तत्प्रतीतिपूर्वकत्वस्य स्वरसप्राप्तत्वात् । किंचात्र सत इति वर्तमानत्वविवक्षायां किं विनाशप्रागभावोपश्लेषेण? वर्तमानत्वमेव च वर्तमानत्वमित्युक्तं स्यात् । अथ प्रमाणसिद्धत्वादिरूपं सत्त्वम्; तदाऽपि विनाशस्य प्रागभावः प्रतियोगिस्वरूपमेवेति तेन रूपेण योगिभिर्गृह्यमाणं त्रैकालिकमपि वर्तमानं स्यात् । अतोऽन्यदेव वर्तमानत्वम्; तच्च कालोपश्लेषेणैव गृह्यते । वर्तमानकालोपाधिसंबन्ध एव वस्तूनां वर्तमानत्वमित्यपि न वाच्यम्; उपाधौ तदभावादवर्तमानत्वप्रसङ्गात्; उपाधिभिरेव सर्वव्यवहारनिर्णये किमप्रत्यक्षकालकल्पनया? ॥ ६८ ॥ **इति कालप्रत्यक्षत्वम्** ॥

कालस्योपाधिभेदात्कतिचिदभिदधत्यब्दमासादिभेदं
तत्तद्रूपेण कालः परिणमत इति प्राहुरेके तदा तु ।
ये तत्रोपाधयः स्युस्त इह परिणतिं प्राप्नुयुस्सानुबन्धाः
नित्यो व्यापी च तादृक्परिणतिभिरसौ सर्वकार्ये निमित्तम् ॥ ६९ ॥

यदि नित्य एकः कालः, तस्य कथं परिच्छिन्नानेकस्वरूपत्वमित्यत्र प्रसिद्धं पक्षमाह—**कालस्येति** ॥ आदिशब्देन भूतभविष्यत्त्वादेरपि संग्रहः । नित्यस्यापि कालस्य द्रव्यान्तराणामिवावस्थाभेदैस्सर्वमिदं स्यात् । अवस्थाश्चात्रोपाधिसंबन्धमात्ररूपा इति लघीयान्पक्षः । पक्षान्तरमाह—**तत्तद्रूपेणेति** । **यादवप्रकाशै**रप्यभ्युपगतोऽयं पक्षः—* कालोऽनाद्यनन्तोऽजस्रक्षणपरिणामी मुहूर्ताहोरात्रादिविभागयुक्सर्वेषां परिणामस्पन्दहेतुः इति वचनात् । अयं भावः—क्षणरूप एव कालस्य सर्वदा परिणामः; तत्संख्याप्रकर्षतारतम्यान्मुहूर्तादिविभागः; तत एव चाब्दादीनामाद्यन्तमध्यमाद्युत्पत्तिक्षणविकल्पचोद्यं निस्तीर्णम् । प्रतिपुरुषमिष्टक्षणारम्भेणाब्दादिगणनाऽपि युक्तैव । अत्र च स्वतः क्षणादिभेदानभ्युपगमे कथमुपाधिभिरपि भेदः स्यात्? तेषां कालमात्रेण संबन्धे तद्विशेषकत्वायोगात्, तदंशेन संबन्धे तु स्वत एव कालांशभेदसिद्धेः । ननु कालविकारेष्वपि कृत्स्नैकदेशसंबन्धविकल्पदोषस्समानः; विकारान्तरेण भेदेऽनवस्थाप्रसङ्गश्चेति चेन्न; आश्रयैकदेशवृत्तिगुणादिन्यायेन निर्वाहादिति । अयं परिहार उपाधिसंबन्धमात्रपक्षेऽप्यविशिष्ट इत्यन्ये मन्यन्ते ।

स्पन्दसन्ततिसिद्ध्यर्थं कालस्याणुत्वकल्पनम् । आशावसानतोकानां दुराशामात्रजृम्भितम् ॥
क्रियासन्ततिवत्काले परिणामपरम्परा । किं न स्यात्स्वप्रकर्षाद्यैः परत्वादिप्रसाधिका ॥
एकाश्रयक्रियासंख्या काल इत्याप्तभाषितम् । कालोपाधिविशेषाणां सर्वेषामुपलक्षणम् ॥

अत्र परिणतिपक्षमनूद्य तत्राप्युपाधिव्याप्तिमाह—**तदा त्विति** । अनुबन्धाः—ऋतुलिङ्गादयः । आनन्तर्यनियमादुत्तरोत्तरकार्याणामुपाधिमूलत्वं च सिद्धम् । ऋतुलिङ्गादीनां तु न कालकार्यहेतुनियमः । ये तु शैवादयः कालमनित्यमव्यापिनं परिमितकार्यहेतुं च प्राहुः, तान्प्रत्याह—**नित्य** इति । क्षणाद्यंशस्यागन्तुकत्वेऽपि स्वरूपतो नित्यः । नित्यत्वं चात्र प्रध्वंसविरहमात्रम्; न तु सर्वदा सत्ता, कालान्तराभावात् । व्यापित्वं तु क्षणतोऽपि स्यात्; सार्वत्रिकाणामपि केषांचिद्योग-

पद्यसिद्धेः । नित्यत्वे प्रागेव प्रमाणं दर्शितम् । व्याप्तिश्च--* कालं स पचते तत्र न कालस्तत्र वै प्रभुः इत्यादिभिस्सिद्धा । त्रिगुणविभूतिवत्कालप्रतिनियतविकारास्तत्र न सन्तीत्यर्थः । स्वविकाराणामुपादानतयाऽन्येषां निमित्ततया वाऽस्य सर्वहेतुत्वं * कालः पचति भूतानीत्यादिभिर्गम्यते । तदपि सर्वत्र सन्निहितस्य । ननु * अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, * सर्वव्यापी सर्वभूतान्तरात्मा इत्यादिषु एकस्य सर्वव्यापकत्वं श्रूयते ; अतस्तद्व्याप्यस्य कालस्य कथं विभुत्वम् ? इत्थम्—न हि न्यूनदेशवर्तित्वमेव व्याप्यत्वम् ; तथा सति समव्याप्तिभङ्गप्रसङ्गात् । तर्हि तद्वदन्योन्यव्याप्यत्वमिह स्यादिति चेत्, किमत्रानिष्टं परस्परप्रवेश्यत्वाद्यनभ्युपगमात् । द्वयोरपि सर्वसंयोगित्वे वि[वादा]रोधाभावात् । अतो यत्र कालस्तत्र सर्वत्र परमात्माऽस्तीति तस्य कालव्यापकत्वम् । इदं च तस्य धर्मभूतज्ञानेऽपि द्रष्टव्यम् । परमात्म[नः]स्वरूपैकदेशे विश्वं व्यवस्थितमित्येतदपि तादृशव्यतिरिक्तविषयम् । अन्यथा तस्य ज्ञानानन्दत्वादेरपि एकदेशित्वप्रसङ्गात् । न चैवं सति सर्वजीवानां व्यापित्वेऽप्यविरोधः स्यादिति वाच्यम् ; अणुत्वश्रुत्या तत्प्रतिषेधात् इति । ननु कालतो देशतो व्यतिरेकग्रहणस्याशक्यत्वान्नित्यविभूनां कारणत्वमेव न सिध्यति, कुतस्सर्वकारणत्वमित्यनुयोगश्च धर्मिग्राहकेणैव निरस्तः । अस्ति हि लोकेऽप्युपदेशतोऽपि तत्तद्वस्तुषु कारणत्वग्रहणम् । अथ स्यात्—नियतपूर्वसत्त्वं कारणत्वम्, नियमश्चास्मिन्सत्येवेदं भवतीत्येवंरूपः ; तत्रावधारणसिद्धोऽन्यदा नास्तीत्ययमर्थो नित्येषु च विभुष्वग्रहण इति । मैवम् ; प्रसङ्गतोऽपि नियमसिद्धेः ; तथा हि । इदं सर्वकारणमिति बोधयतामयमाशयः—यद्येतन्न स्यात् सर्वं नोत्पद्येत । अतस्सर्वोत्पत्तिप्रयोजकमेतदिति ; न पुनर्यदा यत्रेदं नास्ति तदा तत्र सर्वं नास्तीति । अतस्सुष्ठूक्तं नित्यव्यापिनः कालस्य सर्वकार्यहेतुत्वम् ॥ ६९ ॥ **इति कालस्यावच्छेदकप्रकारविभुत्वसर्वकार्यहेतुत्वानि ॥**

वायुर्दोधूयते यद्यदयमुडुगणो बम्भ्रमीति द्रुतं खे
तेजो जाज्वल्यते यद्यदपि [जलनिधि]न जलधिर्माधवीं दोधवीति ।
भूर्यद्वा बोभवीति स्थिरचरधृतये तच्च तादृक्च सर्वं
स्वायत्ताशेषसत्तास्थितियतनपरब्रह्मलीलोर्मिचक्रम् ॥ ७० ॥

प्रकृतचिन्तावर्गस्य परब्रह्मवैभवव्यञ्जकतया सार्थकत्वं प्रथयति—**वायुरिति** ॥ माधवीं—पृथिवीम् । * मेघोदयस्सागरसन्निवृत्तिरित्यादिसूक्तं स्मारयति—**तच्च तादृक्चेति** । यतनं—व्यापारः । सुग्रहमन्यत् ॥ ७० ॥ **इति सर्वतत्त्वस्थितिप्रवृत्तीनामीश्वरेच्छायत्तत्वम् ॥**

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे जडद्रव्यसरः प्रथमः ॥ १ ॥

॥ जीवसरः द्वितीयः ॥ २ ॥

यो मे हस्तादिवर्ष्मेत्यवयवनिवहाद्भाति भिन्नस्स एकः
प्रत्येकं चेतनत्वे बहुरिह कलहो वीतरागो न जातः ।
तत्सङ्घातातिरिक्तेऽप्यवयविनि कथं तेष्वसिद्धा मतिस्स्यात्
सङ्घातत्वादिभिर्वा घट इव तदचित्स्यान्ममात्मेत्यगत्या ॥ १ ॥

अथ प्रत्यगर्थे जीवस्तावन्निरूप्यते । तत्र **चार्वाके**णापि दुरपह्नवं प्रमाणमाह—**य इति** ॥ हस्तादिवर्ष्म—हस्तादिरूपं शरीरमित्यर्थः । मम हस्तादि मम वर्ष्मेति वा पृथगुदाहर्तव्यम् । अस्ति तावदयं व्यतिरेकप्रत्ययः ; तत्र न तावदेकोऽवयवोऽवयवान्तराणि ममेत्यभिमन्यते ; तथाऽनुपलम्भात्, व्यवस्थापकाभावाच्च । सर्वावयवविषयश्चासौ ममकारः । न चावयविनोऽयं स्वावयवाभिमानः, तन्निरासात् । नापि सङ्घातस्सङ्घातिनोऽभिमन्यते, संसर्गस्य तदयोगात्, संसर्गिणां तु दत्तोत्तरत्वात् । एवमवयवेषु बहुष्वभिमन्तव्येष्वबाधितैकप्रत्ययविषयोऽभिमन्ता हस्तादिभ्यस्तत्सङ्घाताच्चान्य इत्यभिप्रायेणाह—**स एक** इति । स्मर्यते च *पिण्डः पृथग्यतः पुंसश्शिरःपाण्यादिलक्षण इत्यादि । अवयवोपचयापचयविनाशादिकालेष्वपि स एवाहमिति प्रत्यभिज्ञाविषयः कालभेदेऽप्यभिन्न इति चात्र भाव्यम् । अन्यथा पाण्याद्यवयवच्छेदे हि तदनुभूतस्मरणं न स्यात्; अन्यदृष्टस्यान्येन स्मरणायोगात् । न च तदनुभववासनासंक्रमादन्योऽपि स्मरति, मात्राद्यनुभूतस्य गर्भादिभिः स्मरणप्रसङ्गात् । न च संसर्गे वैषम्यं कल्प्यम्, नियामकाभावात् । वासनासंक्रमश्च पटादिषु मृगमदादेर्द्रव्यस्य संक्रमः । न चेह तथा, त्वयैवानभ्युपगमात् । गुणसंक्रमो न क्वचिदपि । न चात्र रुमाक्षिप्तकाष्ठन्यायः, दुःखादेरपि तथोत्पत्तिप्रसङ्गात् । कल्प्येषु च नियामकादृष्टेः ।

सर्वबोधैश्च हृत्कोशे संस्काराधानमित्यपि । न दृष्टं न च तत्क्लृप्तौ लिङ्गं किमपि दृश्यते ॥
स च संस्कारकोशस्ते सङ्घातात्मा प्रतिक्षणम् । प्रचयापचयाभ्यां स्याद्भिन्नः स्मर्ताऽत्र को भवेत् ॥

प्रत्येकचैतन्यपक्षे दूषणान्तरमाह—**प्रत्येक**मिति । अयं भावः—बहूनां हि चेतनानां कार्यवशात्संहतानामपि परस्परमीर्ष्यासूयादयो दृश्यन्ते । नात्र कदाचिदपि तथा । मिथश्चैते किमर्थमुपकुर्युः ? न तावददृष्टार्थम् ; त्वया तदनभ्युपगमात् । न चैकग्रामवर्तिनामिव कार्यतोऽन्योन्यमुपकारः ; क्वचिदपि देहे तादृगभिसन्धेरदर्शनात् । एक एवाहं सर्वैरवयवैर्यथार्हमधिष्ठितैः स्वात्मन उपकरोमीति सर्वेषां स्वसंवेदनसिद्धमिति । ननु स्वोपकारनिरपेक्षपरोपकर्तारः पराभ्यसूयारहिताः स्वपाण्यादयः स्वहेतुशक्त्या यदृच्छातो वा सिद्धा इत्यत्राह—**वीतरागा** इत्यादि । जातः कश्चिच्चेतनः, स च रागद्वेषादिरहितः, तदा सर्वप्रवृत्तिनिवृत्तिभङ्ग इति भावः । आवृत्त्याऽन्योऽप्यर्थः । जातमात्रो हि जन्तुः स्तन्यादिवाञ्छायुक्तस्तदर्थप्रवृत्त्या निश्चीयते । तदवस्थस्य च रागादयो भवान्तरीयसंस्कारोद्बोधमन्तरेण न युज्यन्ते । ततश्च देहतदंशव्यतिरिक्त आत्मेति । एवं मनुष्यादिशरीरप्राप्तिदशायामदृष्टविशेषात्पूर्वजन्मानुभवसंस्कारभेदैरेव मतिरुचिभेदाश्च युज्यन्ते । अवयविवादमन्वारुह्याप्याह—**तत्सङ्घाते**ति । अयं भावः—अवयवगतविशेषगुणपूर्वका एव ह्यवयविनि विशेषगुणास्तद्वादिभिरिष्यन्ते । प्रत्यवयवचैतन्यं च निरस्तमेव । नन्ववयवनिष्ठं चैतन्यं सूक्ष्मवर्तित्वात्सूक्ष्मम् । अवयविनिष्ठं तु स्थूलवर्तित्वात्स्थूलम् ; तदेव व्यवहारयति । मैवम् ; त्रसरेणुकल्पानामपि जन्तूनां प्रवृत्तिदर्शनात्, अतोऽपि स्थूलतमानां मनुष्यमातङ्गाद्यवयवानां पृथक् स्वधीपूर्वप्रवृत्तिप्रसङ्गात् । न च मनुष्याद्यवयवेषु चैतन्यमनुद्भूतमिति

वाच्यम्, अनुद्भूतैरुद्भूतारम्भायोगात्। यत्तु सूत्रितं सुरगुरुणा *पृथिव्यापस्तेजो वायुरिति तत्त्वानि, तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति; इदमपि प्रत्येकसमुदायादिविकल्पदोषोक्त्या दत्तोत्तरम्। अस्ति हि प्रत्यवयवं किण्वादीनां संसर्गविशेषे मदशक्तिः, अम्लकर्पूरादिषु विषशक्तिश्च। एतेन चूर्णहरिद्रासंसर्गजरागादयोऽपि निरूढाः। ननु चैतन्यमिति न कश्चिद्गुणः यस्याधारोऽपेक्ष्यः; किंतु याऽसौ युष्माकं चैतन्यसामग्री सैव चैतन्यपदार्थस्स्यात्; व्याहारव्यवहारयोस्तयैवोपपत्तौ मध्ये गुणविशेषकल्पने गौरवादिति; तन्न, तस्याः प्रत्यक्षत्वायोगात्। प्रत्यक्षाप्रत्यक्षसमुदायो हि सर्वत्र सामग्री। प्रत्यक्षश्च जानामीति बोधः। न च तद्धीरानुमानिकी, त्वया कथमप्यतीन्द्रियानुमानानभ्युपगमात्; प्रवृत्तिरहितदशायामपि जानामीति धीसद्भावाच्च।

देहधातुविशेषो वा विकासो वाऽस्य कश्चन। ज्ञानमित्यपि वक्तुं ते न युक्तं तददर्शनात्॥

हृदयस्थः पित्तविशेषः प्रकाशक इति वैद्यागमस्त्वन्यपरः। ये तु लोकायतमित्यत्रायतशब्दविवक्षितमनुमानमपि प्रत्यक्षान्तर्भावेण तत्फलतया वा गृह्णन्ति, तान्प्रत्यनुमानान्यप्याह—**सङ्घातत्वादिभि**रिति। तदिति वर्ष्मपरामर्शः। अचित्—न चैतन्याश्रय इत्यर्थः। विमतमचेतनं सङ्घातत्वाद्घटवत्। आदिशब्देन बाह्येन्द्रियग्राह्यत्वाच्चाक्षुषत्वाद्भूतत्वाद्रूपवत्त्वादित्यादीनां ग्रहणम्; तथा विगीता धीश्चैत्रव्यतिरिक्तविषया, धीत्वात्, मैत्रधीवत् इति। नचैषां प्रत्यक्षबाधः शङ्क्यः; देहात्मबोधस्यान्यथासिद्धिसंभवात् व्यतिरेकधीप्राबल्याच्च। ननु भेदधीबलादेषां प्रत्यक्षविरोधः परिजिहीर्षितः; सा तु न भेदसाधिका; ममात्मेत्यभेदेऽपि तद्दृष्टेरित्यत्राह—**स्या**दिति। अयं भावः—मम हस्तः, शरीरमित्यादिप्रत्ययाः मम गृहमित्यादिवद्व्यक्तव्यतिरेकाः। ममात्मेति धीस्तु घटस्य स्वरूपमितिवदभेदेऽपि निर्दिष्टविशिष्टांशनिष्कर्षगोचरतया तन्मात्रभेदस्थापिकाऽगत्या स्वीकृता, नान्यत्रापि, अतिप्रसङ्गादिति॥ १॥

स्याद्वाऽसौ चर्मदृष्टेरयमहमिति धीर्देह एवात्मजुष्टे
निष्टप्ते लोहपिण्डे हुतवहमतिवद्भेदकाख्यातिमूला।
श्रुत्यर्थापत्तिभिश्च श्रुतिभिरपि च नस्सर्वदोषोज्झिताभिः
देही देहान्तरासिक्षम इह विदितस्संविदानन्दरूपः॥ २॥

अथ स्यात्—अस्ति तावत् स्थूलोऽहं जानामीत्यादिधीः। तत्र स्थौल्यं शरीरस्थं ज्ञानादिकं तदन्यनिष्ठमिति दुर्विवेचम्। ममेति भेदधीश्च नाभेदधियं बाधितुमर्हति, अविशेषात्। अनुमानानि च वह्न्यनुष्णत्वानुमानवत्स्युः। तत्र निषेध्यं ह्युष्णत्वं वह्नावेव सिद्धमिति चे[द]त्तत्रापि निषेध्यं चेतनत्वं देह एव ग्राह्यम्। नच प्रत्यक्षप्रतिपन्ने वादिविमतिमात्राद्बाधकानुमानावकाशः, अतिप्रसङ्गात्। विप्रतिपत्त्या सन्देहः, सन्देहे न्यायप्रवृत्तिस्स्यादिति चेन्न; दृष्टे कस्मिंश्चिद्विगायति वह्नावनुष्णत्वानुमानप्रसङ्गात्। एतेन शास्त्रतोऽतिरिक्तबोधात्सन्देहः, ततश्चानुमानमिति निरस्तम्। तत्प्रामाण्यव्यवसायाव्यवसाययोरत्र सन्देहानुदयात्, सन्दिग्धशास्त्राद्दृढप्रत्यक्षं हि बलीयः। अन्यथा अग्निरनुष्ण इति कस्यचिद्वाक्येनापि सन्देहेऽनुष्णत्वानुमानस्य निर्बाधत्वप्रसङ्गात्। ऐक्यभेदधीभ्यामेव सन्देह इति चेन्न; अग्नेर्ज्वालेति भेदधियाऽग्नेरुष्णत्वेऽपि केनचिद्धेतुना ज्वालानुष्णत्वानुमानप्रसङ्गात्। साङ्ख्योक्तान्यनुमानानि त्वसाधकतमानि। पठन्ति हि *सङ्घातपरार्थत्वादिति। अत्राद्ये पत्यादिशरीरार्थैर्भार्यादिशरीरैस्सिद्धसाधनता। न च तावदतिरिक्तं खट्वादिदृष्टान्तेऽपि दृष्टम्। स्वाभिमतात्मपारार्थ्यसाधने त्वप्रसिद्धविशेषणः पक्षः। दृष्टान्तश्च साध्यविकलः। खट्वादौ च

संहतपरार्थत्वनियमदृष्ट्या तत्रापि संहतः परः प्रसज्येत । अनवस्थाभयात्तस्यासंहतत्वकल्पनाद्वरं शरीरस्यानन्यार्थत्वकल्पनम् । एवमधिष्ठेयत्वभोग्यत्वाभ्यामधिष्ठातृभोक्तृकल्पनं चायुक्तम्; स्वाभिमतात्माधिष्ठेयत्वभोग्यत्वयोस्सर्वत्रासिद्धेः, साध्याविशेषाच्च । अधिष्ठेयत्वादिमात्रे हेतावाकारभेदेन स्वेनैव स्वस्य तदुभयसंभवात् । अधिष्ठेयत्वं हि कस्यचिद्व्यापारेण व्यापार्यत्वम् । तच्च स्वस्य परस्य चेति न विशेषः । भोग्यत्वमप्यनुकूलबुद्धिविषयत्वम् । तच्च स्वेनैव स्वस्य देहातिरिक्तत्वेऽप्यनुमतम् । यच्चाहुः—* नेदमनात्मकं जीवच्छरीरम्, अप्राणादिमत्त्वप्रसङ्गादिति; तत्र जीवच्छरीरं सात्मकं प्राणादिमत्त्वादिति प्रसङ्गानुग्राह्यः प्रयोगः । तस्मिन्नप्रसिद्धविशेषणः पक्षः, त्वदिष्टस्यात्मनः क्वचिदप्यसिद्धेः । आत्मशब्दवाच्ययत्किंचिद्योगविवक्षायां स्वभावयत्नादियोगात्सिद्धसाधनता । किंचानेनैव हेतुना जीवच्छरीरं खपुष्पवदित्यपि साधयन्नपि दुर्वारः स्यात् । अप्रसिद्धसाधनस्याभ्युपगमात् । अस्ति किंचित्खपुष्प[ादि] शब्देनोपस्थाप्यं तदेवात्मेति चेन्न; असत आत्मत्वसाधनायोगात् । यत्किंचिन्मात्रस्य साधने च सिद्धसाधनता, विवक्षितविशेषस्य दुस्साधत्वात् । अपि च सर्वेषु वस्तुषु तत्तदसाधारणधर्मेण सात्मकत्वं साध्यं स्यात्, विपक्षे तत्तदसाधारणधर्मविरहप्रसङ्ग इत्यनुग्राहकसिद्धेश्च । अनुपलम्भबाधादिकं तु समानम् । अतोऽनन्याधिष्ठितस्वयंवाहकयन्त्रन्यायाद्विचित्रभूतपरिणतिविशेषसंभवोऽयं देहयन्त्र इति । अत्र प्रत्येकसमुदायादिविकल्पदौःस्थ्यादिप्रागुक्तप्रबलबाधकप्रतिक्षिप्तेऽपि पक्षे गाढाभिनिवेशस्य सोपपत्तिकं भेदबुद्धेरनुमानानां च बलीयस्त्वं पुनरनुद्धाटयन्निष्कम्पामैक्यधियमन्वारुह्य मानान्तरेण बिबाधयिषुः परेष्टं तद्बलमन्वाह—**स्याद्वेति** ॥ अन्यथासिद्धिसूचनाय चर्मदृष्टेरिति मौढ्यपरम् । अयमिति गुणक्रियादिविशेषविशिष्टपिण्डावमर्शः । संसर्गविशेषादयं भ्रम इति बोधयितुमात्मजुष्टत्वोक्तिः । तन्निदर्शनेन शोधयति—**निष्टप्त** इति । संसर्गजत्वात्संभावितान्यथासिद्धिकमैक्यप्रत्यक्षं शास्त्रेण बाधितुं शक्यमित्याशयः । संसृष्टेष्वपि सर्वत्र कथं न भ्रम इत्यत्राह—**भेदकेति** । यत्र हि सामग्री तत्र कार्यं स्यादिति भावः । नन्वैक्यधीरिह दृष्टा, तदन्यथासिद्धिस्तु शङ्किता; नैतावता विवक्षितसिद्धिरित्यत्राह—**श्रुतीति** । श्रुत्या भाविता अर्थापत्तयः श्रुत्यर्थापत्तयः, ताभिः; श्रुतार्थापत्तिभिरिति यावत् । सन्ति हि देहान्तरानुभाव्यस्वर्गस्वाराज्यादिसाधनविधायिन्यो यमनरकादिप्रापकश्रुतयश्च । न च तत्रानाश्वासः, श्रुतिप्रामाण्यस्थापनात् । अतोऽर्थादापद्यते देहान्तरानुयायी भोक्ताऽस्तीति । पश्वादिदृष्टफलसाधनविधयश्च तत्तत्फलोपायदशानुवृत्तभोक्तृसापेक्षाः । नचात्र सङ्घातस्य भोक्तृत्वम्; उपायसाधकसङ्घातस्योपचयादिना भिदुरस्यानुवृत्त्यसंभवात् । अहमुपायानुष्ठाता तत्फलं भुञ्ज इति च स्वरूपतः कालतश्चाभिन्न एकः प्रतिसन्धीयते । मुक्त्युपायविधयश्च सर्वबन्धनिवृत्तिवदात्मस्थित्याक्षेपकाः । देहात्मभेदं कण्ठोक्त्याऽप्याह—**श्रुतिभिरपीति** । **चः** श्रुतिवदनन्ताः स्मृतीस्समुच्चिनोति । स्वतःप्रामाण्ये प्राप्ते बाधकासंभवार्थं सर्वदोषोज्झितत्वोक्तिः । * देही नित्यमवध्योऽयम्, * वासांसि जीर्णानि इत्यादिस्मारणाय **देही**त्यादिकथनम् । व्यावर्तकधर्मवर्गप्रदर्शनार्थं संविदानन्दरूपतोक्तिः । रूपशब्दः स्वरूपपरः, निरूपकधर्मपरो वा ॥ २ ॥

इत्यात्मनो देहातिरेकः ॥

> बाह्याक्षेभ्योऽन्य आत्मा तदखिलविषयप्रत्यभिज्ञातुरैक्यात्
> कर्तुः स्मृत्यादिकार्ये करणमिति मनो मानसिद्धं ततोऽन्यत् ।
> प्राणास्सङ्घातरूपा वपुरुदितनयान्न ध्रुवं चेतयन्ते
> ज्ञानं च ज्ञातृधर्मः क्षणिकमपि च वस्तेन नास्यात्मभावः ॥ ३ ॥

ये पुनरेवमाहुः—चक्षुराद्यन्वयव्यतिरेकानुविधायिरूपादिज्ञानं तन्निष्ठमेवोचितम् । व्यपदिशन्ति च चक्षुः पश्यतीत्यादि ; तथा स्पर्शनसुखो वायुः, श्रवणकटुश्शब्द इति । इन्द्रियेषु च विकलेषु विकलोऽहमिति धीर्जायते, सकलेष्वन्यथा ; परस्परानुभूतार्थप्रतिसन्धानमपि संस्कारवैचित्र्यात् ; तच्चैकशरीरानुप्रवेशायत्तम् । अतो हेत्वादिप्रतिसन्धानमपि सिद्धम् । अहं पश्याम्यहं शृणोमीत्याद्यपि सर्वेषामिन्द्रियाणामहमर्थत्वात्सिद्धम् । पञ्चानामपि व्यवहारहेतुभूतं मुख्यं प्रवृत्तिकारणं शरीरं च साधारणम् । तेनैक एवायं व्यवहरतीति लौकिकावगमः । अनुमानमपि—चक्षू रूपग्रहणाधिकरणम्, चक्षुष्ट्वात्, यन्नैवं तन्नैवं यथाऽन्यदिति । एवं श्रोत्रादिष्वपीति । तान्प्रत्याचष्टे—**बाह्याक्षेभ्य** इति ॥ पाण्यादिषूक्तां प्रतिसन्धानानुपपत्तिमिन्द्रियेष्वपि दर्शयितुमाह—**तदखिलेति** । तेषां चक्षुरादीनां प्रतिनियता विषया रूपादयः । अखिलानां तेषां प्रतिसन्धाता त्वेकः, योऽहं द्रष्टा स एव शृणोमीति । भ्रान्त्या यत्तच्छब्दाभ्यां द्वयोरेकीकार इति चेन्न ; द्वयोरप्येकवदेकत्वमोहायोगात् ; अन्यस्य मुह्यतोऽनभ्युपगमात् । एकश्चाहं बहुभिरिन्द्रियैरनुभवामीति भेदेन चेति । न च कस्यचिदहं चक्षुरित्यादिधीः, स्थूलोऽहमित्यादिदेहात्मबुद्धेश्चेन्द्रियात्मवादेऽपि दुस्त्यजत्वाद्वरमिह देहात्मवादः । रूपादिज्ञानस्य चक्षुराद्यन्वयव्यतिरेकानुविधानं तत्करणतयाऽपि स्यात् । तथा चाभिमानः चक्षुषा पश्यामि श्रोत्रेण शृणोमीति । अतएव चक्षुः पश्यतीत्यादिकं भाक्तम् । वैकल्यादिधीश्च चक्षुषा विकलोऽहमित्यादिरूपा ; नतु चक्षुरहं नास्मीति, विरोधात् । नहि नष्टमिन्द्रियं स्ववैकल्यमनुसन्धत्ते, असत्त्वात् । नाप्यन्यत्, तस्यावैकल्यात् । अन्यथा तत्रापि विरोधात् । यदि परमिन्द्रियान्तरविरहमिन्द्रियान्तराण्यनुसन्दधीरन् ; तथाऽपि गतस्येन्द्रियस्य नाहमर्थत्वसिद्धिः । अन्यथा पाण्यादिविकलोऽहमिति बोधेऽपि पाण्यादीनामात्मत्वप्रसङ्गात् । न चेन्द्रियमिन्द्रियान्तरसदसद्बोधक्षमम् ; तस्य तदप्रत्यक्षत्वात् । अनुमानतोऽपि बोद्धुस्तस्य रूपाद्यनुपलम्भात्तद्बोधककरणाभाव एवानुमेयः । ततश्चैक एव तत्तत्करणाधीनरूपादिग्रहणोऽहमर्थस्सिद्धः । मिथोऽनुभूतप्रतिसन्धानार्थं च संस्कारवैचित्र्यं किमिति चिन्त्यम् । यद्यात्मान्तरेषु स्मृत्युत्पादनशक्तिः, तन्न ; सर्वेषु तत्प्रसङ्गात् । तच्छरीरवर्तिष्विति चेन्न, औदरक्रिम्यादिष्वपि तत्प्रसङ्गात् । शरीरान्तरवर्तित्वात्तत्र न प्रसङ्ग इति चेन्न ; भिन्नावयवस्थित्याऽपि प्रतिसन्धानाभावप्रसङ्गात् ; सन्निधानस्य चाविशेषात् । संस्काराणां सर्वेन्द्रियसाधारणहृत्कोशवर्तितया शरीरैक्याच्च विशेष इति चेन्न ; त्वदिष्टसंस्कारकोशे मानाभावात्, अनेकेषामहमर्थानामेकशरीरयोगे च । ततश्च वरं यथोपलम्भमेकस्मिन्नहमर्थे सर्वैस्संस्काराधानम् । न चोपदेशचेष्टाभिर्मिथो बोधनेनान्योन्यसंस्कारार्पणम्, अदर्शनात् । अविचारितरमणीयोऽयं पञ्चानां परस्परसंस्कारादिलाभ इति, तत्त्वादर्शेष्वेव वक्तव्यम् । यदपि शरीराद्यैक्यादेकत्वावगम इति ; स किं तत्रत्यानामेव ? अन्येषां वा ? नाद्यः, परस्परानभिज्ञत्वात् ; अनुमानतस्तु भिन्नतयैव सिद्धेः ; चक्षुःश्रोत्रादिरूपोऽहमिति भ्रमादर्शनाच्च । न द्वितीयः, स्वशरीरसिद्धप्रकारेण परशरीरेऽपि बहुत्वानुमानात् । केवलव्यतिरेकिभिरिन्द्रियाणां ज्ञातृत्वाद्यनुमानमतिप्रसङ्गाद्यनेकदोषोपहतम् । ततश्चैकस्यैव सर्वग्रहणाधिकरणत्वे त्वसन्मते कः प्रद्वेषः ? अन्धबधिराद्यभावश्च स्यात् ; ज्ञातुर्ज्ञानकरणतयैव चक्षुरादीनां सिद्धेस्तद्विपरीतानुमानानां धर्मिग्राहकबाधश्चेति । अस्तु देहाच्चक्षुरादिभ्यश्चात्माऽन्यः । स तु मन एव स्यात्, देहादेरन्यत्वात् एकत्वेन प्रतिसन्धानोपपत्तेः ; असङ्घातरूपत्वेन प्रत्येकादिविकल्पानवकाशाच्च । तदतिरिक्तात्मक्लृप्तौ तु गौरवम् । अतो मम मन इति भेदोक्तिः क्लिष्टगत्येति । तत्राह—**कर्तुरिति** । अयं भावः—किमत्र स्मृत्यादिकरणस्य मनसस्तत्कर्त्रा तादात्म्यं साध्यते ? तेन वा कर्तुः ? न तावदाद्यः, ततोऽन्यतयैवानुमानतश्शास्त्रतो वा तत्सिद्धेर्धर्मिग्राहकबाधात् । अत एव न द्वितीयः, स्वस्य स्वयमेव स्मृत्यादिकरणमित्यत्र

मानाभावाच्च। करणमङ्गीकृत्य कर्तृनिरासः क्रियत इति चेन्न; ज्ञातृमात्रापह्नवे मनसोऽपि ज्ञातृत्वाभावप्रसङ्गात्; तदन्यज्ञातृनिरासे कल्प्येन क्लृप्तत्यागायोगात्। अथ कर्तारमङ्गीकृत्य करणत्यागः, तदा मनस आत्मत्वं न साधितं स्यात्। किंतु तस्यासत्त्वम्; तच्च तद्ग्राहकमाने सति न शक्यमिति। अन्यस्त्वाह—प्राणाधीना देहेन्द्रियमनसां प्रवृत्तिः। आत्मशब्दश्च प्राणे दृष्टः, प्राणशब्दश्चात्मनि। प्राणस्थितिगमनाभ्यां च जीवति म्रियत इति व्यवहारः। सुषुप्तावुच्छ्वासनिश्श्वासप्रवृत्तौ सत्यामपि सामग्र्यभावाद्बोधाभावः। मम प्राणा इत्येतदपि कथंचिन्नेतव्यमिति। अत्र देहात्मवादे निदर्शितान् दोषानतिदिशति—**प्राणा** इति। अधिकाशङ्का तु, * प्राणोऽस्मि प्रज्ञात्मा इति श्रुतिस्वारस्यात्। परिहारदार्ढ्याभिप्रायेण ध्रुवशब्दः। देहादिव्यापारहेतुत्वमनैकान्तिकम्। आत्मप्राणशब्दयोर्व्यतिहारोऽनेकार्थतया स्यात्। प्राणस्थित्यादौ जीवतीत्यादिव्यवहार आत्मान्यत्वेऽप्यविरुद्धः। प्राणोऽस्मीति तद्वैशिष्ट्यपरम्। एवमन्यपरवाक्यान्तरैरपि वायुस्वरूपत्वमात्मनो न शङ्क्यम्। **सांख्ययोगि**मतं तु बहिष्कार्यमेव। अन्ये तु मन्यन्ते—न देहेन्द्रियादिकं भोक्तृ, न च नित्यः कश्चिदन्यः, सुषुप्त्यादौ तेषां भोक्तृत्वादृष्टेः। सति ज्ञाने भोक्तृत्वमिति चेत्तर्हि तस्यैव तदस्तु, किमन्तर्गडुभिरन्यैः? तस्य च भोक्तृत्वमनुकूलप्रतिकूलविषयावगाहित्वम्। तच्च यदृच्छावैचित्र्यादिति नादृष्टाद्यपेक्षा। नच सुषुप्त्यादौ निर्विषयधीसन्ततिसद्भावे किंचिन्मानम्, प्रबोधारम्भसामग्रीवैचित्र्याद्यदृच्छयैव वा जागराद्यज्ञानोपपत्तेरिति। **बौद्धा**स्तु ग्राहकाभिमानारूढोऽनादिधीसन्तान एवात्मा, अहं जानामीत्यादिबोधस्त्वालयविज्ञानवशादाश्रयकल्पनया वा स्यात्; अतिरिक्तस्तु बाधितत्वादनादेय इत्याहुः। तदेतन्मतद्वयं तन्त्रेण निरस्यति—**ज्ञान**मिति। संविदधीना हि सर्ववस्तुव्यवस्था। ज्ञानं च ज्ञातृधर्मतयैव वेद्यते। नच ज्ञानस्य भोक्तृत्वम्। अनुकूलप्रतिकूलविषयावगाहेऽपि तस्य भोगात्मकत्वं सिध्येत्। मम भोग इति मन्यमानस्तु ज्ञातैव भोक्ता। आनुकूल्यादिकं हि तदपेक्षयैव, उपलम्भविरुद्धकल्पनायोगात्। आलयविज्ञानक्लृप्तिश्च निष्प्रमाणिका। उपलब्धस्य च बोद्धुः कुतो बाधः? धर्मधर्मिभावायोगादिति चेन्न; आदावेव तत्साधनात्। प्रत्यभिज्ञातुरेकस्यासंभवादित्यप्ययुक्तम्; क्षणभङ्गादेरपि निरस्तत्वात्; ज्ञानेतरमिथ्यात्वं च निरसिष्यते। अनुपलम्भस्तु बाधकः स्वस्य चेदसिद्धः, परस्य त्वबाधकः, अन्यथा धीसन्ततिभेदादेरप्यसिद्धिप्रसङ्गात्। बुद्धेस्त्वात्मत्वानुमानमिन्द्रियादेरिवायुक्तम्। ननु वर्तमानक्षणमात्रविशिष्टतयाऽऽत्मोपलभ्यते, पूर्वापरकालतदुपाध्यादीनामप्रत्यक्षतया तद्विशिष्टवस्तुप्रत्यक्षत्वायोगात्, अन्यथा परभागस्थितवह्निनाऽपि पर्वतस्य विशिष्टोपलम्भप्रसङ्गेऽनुमानादिप्रमाणभङ्गः स्यादिति; तदप्यसत्। प्रत्यभिज्ञायाः प्राक्कालविशिष्टग्रहणस्य दर्शितत्वात्, नित्यत्वादीनामपि तत्तत्प्रमाणैरुपस्थापनात्। नच नित्योऽहमित्युपलम्भे सर्वकालोपाधिप्रत्यक्षत्वप्रसङ्गः; प्रमाणसिद्धिमात्रेण तथा व्यवहारात्, इष्टं चैतदन्यत्रापीति ॥ ३ ॥ **इत्यात्मन इन्द्रियाद्यतिरेकः** ॥

धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सैवेन्द्रियाद्यै-
स्तेनात्माऽजागलस्थस्तन इव किमिह स्वीक्रियेतेति चेन्न।
कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या
नित्या सा यस्य तद्वानपि निगममितो गौरवं नास्य भारः ॥ ४ ॥

मा भूदस्थिरज्ञानानां प्रतिसन्धानाद्यनर्हत्वादात्मत्वम्। यस्यात्मवत्तद्धर्मभूता धीर्नित्या, सा प्रसरणभेदैस्तत्तदर्थान्प्रकाशयतीति पक्षः; तस्य किं तदाश्रयभूतेन नित्यात्मनेति चोद्यमनूद्य प्रत्याह—**धीरि**ति ॥ धीतद्वन्तौ तावत्पृथगु-

दृष्टौ। तत्र *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते, *तथा हेयगुणध्वंसात् इत्यादिभिर्द्वयोरपि नित्यत्वं यस्य सिद्धं तस्य कल्पनागौरवरूपो भारो नास्तीत्यर्थः ॥ ४ ॥ **इति नित्यबुद्ध्यतिरिक्तात्मसिद्धिः ॥**

ज्ञानत्वं वक्ति पुंसः श्रुतिरिह न पुनर्बुद्धिमात्रस्य पुंस्त्वं
प्रत्यक्षादेः प्रकोपादनुगतकथने ज्ञानमर्थप्रकाशः ।
स्वस्यैवात्मा तु सिद्धिं मतिरनुभवति स्वान्ययोस्सिद्धिभावं
ज्ञातुर्जाड्यप्रसङ्गव्युदसनविषया ज्ञानमात्रोक्तयोऽपि ॥ ५ ॥

ननु *द्रष्टा श्रोता इत्यारभ्य *विज्ञानात्मा पुरुष इत्यादिषु जीवस्य ज्ञानस्वरूपत्वं श्रूयते; अतस्तस्य ज्ञानादतिरेको दुस्साध इत्यत्राह—**ज्ञानत्व**मिति ॥ न ह्यत्र स्वधर्मतादात्म्यं विधीयते, अशक्यत्वात्। किंतु धर्मवद्धर्मिणोऽपि विज्ञानात्मत्वं नाम धर्मान्तरमुपदिश्यते। ज्ञानानुवादेनात्मत्वस्य विधिः स्यादित्यत्राह—**न पुन**रिति। अन्यथा बाधकमाह—**प्रत्यक्षादे**रिति। आदिशब्देनानुमानशास्त्रयोस्संग्रहः। ज्ञानत्वविधानेऽपि तद्विरोधस्स्यादित्यत्राह—**अनुगते**ति। कस्यचिदर्थस्य प्रकाशरूपत्वमुभयत्रानुवृत्तं ज्ञानशब्दनिमित्तं तद्विधौ न विरोध इत्यर्थः। अर्थप्रकाश इत्युक्तं विषयतो विभजते—**स्वस्ये**ति। स्वासाधारणेन केनचित्स्वभावेन विशिष्ट इह स्वशब्दार्थः। धर्मभूतज्ञाने तु तावदतिरिक्तग्राहित्वं विशेषमाह—**मति**रिति। *विज्ञानघन एवेत्यादिभिर्ज्ञानमात्रत्वोक्त्या ज्ञातृत्वनिषेधात्कथमुभयत्रानुवृत्तधर्मक्लृप्तिरित्यत्राह—**ज्ञातु**रिति। नात्रावधारणमन्ययोगव्यवच्छेदार्थम्; किंतु *विज्ञानघन इत्यादिपूर्ववाक्यपरामर्शादंशतोऽपि ज्ञानत्वायोगव्यवच्छेदपरमिति भावः ॥ ५ ॥ **इत्यात्मनो ज्ञानमात्रत्वोक्तिनिर्वाहः ॥**

आत्मा स्वेनैव सिध्यत्यहमिति निगमैर्यत्स्वयंज्योतिरुक्तः
स्वापेऽप्यस्य स्वसिद्धावशयिषि सुखमित्यक्षता प्रत्यभिज्ञा ।
चेतश्चान्यानपेक्षं मतिषु न हि भवेत्किं च वेदान्तदृष्ट्या
ज्ञानत्वादेष धीवत् स्वविषयधिषणानिर्व्यपेक्षस्वसिद्धिः ॥ ६ ॥

सिध्यतु देहादिभ्योऽन्य आत्मा; स कथमनन्यसाधनः? स्वानुभवबलादिति चेन्न; धर्मतोऽपि तदुपपत्तेः। आत्मत्वादित्यनुमानादिति चेन्न; युष्माभिः केवलव्यतिरेक्यनभ्युपगमात्, ज्ञानस्य च सपक्षस्याभ्युपगमात्। स्वयंज्योतिष्ट्वश्रुतेरिति चेन्न; ज्योतिश्शब्दस्यात्र भाक्तत्वात्। चक्षुस्सहकारिणि तेजोविशेषे हि तन्मुख्यता। *स्वेन रूपेणाभिनिष्पद्यते इति त्वौपाधिकरूपनिवृत्तिपरम्। इष्टं च भवतामपि स्वधर्मेणात्मनो भानम्—तावतैवान्यत्रादृष्टेन स्वयंप्रकाशत्ववादोऽस्त्विति। एतत्प्रत्याह—**आत्मे**ति। एवकारोऽत्र परप्रकाश्यत्वनियमनिवृत्तिपरः। यद्यहंत्वादिरहितः स्वयं प्रकाशते, तदा परमतं स्यादित्यत्राह—**अह**मिति। अहमर्थ आत्मेति सेत्स्यति; अतस्तत्प्रकाशे कथं परेष्टावकाश इति भावः। प्रतिज्ञाते मानमाह—**निगमै**रिति। बहुवचनेन ज्ञानत्ववादिनोऽपि निगमास्तत्परा इति व्यज्यन्ते। यद्यपि *हृद्यन्तर्ज्योतिः पुरुष इत्यत्रापि ज्योतिश्शब्दो भाक्तः; तथाऽपि स्वप्रकाशे प्रदीपादिवल्लोकदृष्ट्याऽन्यनिरपेक्षत्वं स्वरसावगतं न बाध्यम्। स्वधर्मेणान्यप्रकाशकत्वमुपचारनिमित्तं स्यादिति चेन्न; बाह्यज्योतिषि स्वधर्मनिरपेक्षप्रकाशस्यापि स्वतःप्रतीतेः। स्वधर्मेण भासमानत्वमेव ज्योतिश्शब्दोपचारनिमित्तमिति चेन्न; बाह्ये तदभावात्। स्वधर्मेन:

प्रकाशकत्वं च, *योऽयं विज्ञानमयः प्राणेषु इति पदान्तरसिद्धतया पुनरुक्तं स्यात्। उपचारनिमित्तव्यञ्जनमात्रं पदान्तरकृत्यमिति तु मन्दम्। स्वयंप्रकाशत्वे सुषुप्त्यादावपि प्रकाशेतेत्यत्राह—**स्वापेऽपीति**। अयंभावः—प्रत्यभिज्ञाबलात्सुषुप्तावप्यहमर्थोऽस्तीति सिद्धम्। श्रुतिस्वारस्याच्च प्रकाशमानत्वमपि ग्राह्यम्। तथा च सुखमहमस्वाप्समिति प्रबुद्धपरामर्शस्वारस्यं च न बाध्यमिति। ननु यदि सुषुप्तावात्मा प्रकाशते तन्मनसैवास्तु कृतं स्वप्रकाशत्वेनेत्यत्राह—**चेत इति**। अयं भावः—बाह्यविषयेषु तावच्चक्षुरादीन्यनुमानागमसंस्कारान् वा संगृह्य प्रवर्तते, आत्मनि च तत्तदुपहितं जनितं वा किंचिदुपधायैव; स्वापे तु दृष्टविरुद्धमनोवृत्तिकल्पनाद्वरं श्रुतिस्वारस्यानुरोध इति। अनुमानरुचीनां तदप्यस्तीत्याह—**किं चेति**। **वेदान्तदृष्टेति** ज्ञानत्वहेतोरसिद्धिपरिहारः। ज्ञानस्य स्वप्रकाशत्वं साधयिष्यत इति तद्दृष्टान्तोक्तिः॥ ६॥ **इत्यात्मनः स्वयंप्रकाशत्वम्**॥

प्रत्यक्त्वं पुंसि केचित् स्वविषयधिषणाधारतामात्रमाहुः
स्वस्मै स्वेनैव भानं तदिति समुचितं तत्स्वतस्सिद्धिसिद्धेः।
प्रत्यङ् स्वापेक्षयाऽसौ त्वमयमिति मितः स्वेतरैः स्वस्य बुद्ध्या
भातं नित्यं परस्मै जडमजडमपि स्यात्परागर्थ एव॥ ७॥

*कश्चिद्धीरः प्रत्यगात्मानमैक्षत् इत्यादावात्मनः प्रत्यक्त्वं गम्यते। तत्किमिति विमर्शे प्रत्येतुः प्रत्येतव्यादव्यतिरेक इति कैश्चिदुक्तं तावदाह—**प्रत्यक्त्वमिति**। स्वप्रकाशपक्षे तु प्रत्यक्त्वद्वैविध्यमाह—**स्वस्मा इति**। यदि प्रत्यक्त्वमात्मनः स्वभावः, तदा परेणापि गृह्यमाणोऽहमिति गृह्येतेत्यत्राह—**प्रत्यङ्ङिति**। स्वेतरबुद्ध्या गृह्यमाणत्वं न स्वस्मै भासमानत्वम्। अतस्तद्बुध्या गृह्यमाण आभिमुख्ये त्वमिति, अन्यदा अयमिति च गृह्येत। स्वापेक्षया तु स्वबुद्ध्या स्वरूपेण वा भासमानतया प्रत्यङ्ङित्युच्यते। तेन रूपेणाहमर्थ इति दृशा अहंत्वं च सर्वात्मानुवृत्तम्। त्वंभावादिना तु न तस्य बाधः। तर्हि तत्र पराक्छब्दोऽपि किं न प्रवर्तेत इत्यत्राह—**भातमिति**। जडमजडं वा यन्नित्यं परस्मै भासते तत्परागर्थ एव। न तस्य स्वस्मै भासमानत्वप्रसङ्गः। व्यपदेशनियमश्च तत एवेति॥ **इति प्रत्यक्त्वादिप्रकारः**॥

बोद्धा कर्ता च भोक्ता दृढमवगमितः प्रत्यगर्थः प्रमाणैः
कर्तृत्वाभाववादे स्वयमिह भगवानान्यपर्यं त्वगायत्।
कर्ता शास्त्रार्थवत्त्वात्कृतिषु च स पराधीन आभाषि सूत्रै-
श्चित्रैः कर्मप्रवाहैर्यतनविषमता सर्वतन्त्राविगीता॥ ८॥

अत्र केचिदाहुः—ज्ञातृत्वादिकमन्तःकरणस्यैव; आत्मनस्तु साक्षितामात्रम्। यद्वा प्रकृतेः कर्तृत्वम्, आत्मनो भोक्तृत्वमात्रम्; गीतं चैतत् *कार्यकारण इत्यादिनेति। तान्प्रत्याह—**बोद्धेति**॥ त्रिभिरपि प्रमाणैर्ज्ञातृत्वादिप्रकारत्रयवानात्मा निस्संशयं बोधितः; अतो न तत्रैकमपि निह्नोतुं शक्यम्, किं पुनस्त्रितयम्। कुतर्कैस्तु किं नाम दुरपलपमिति भावः। शास्त्रैरात्मनः कर्तृत्वनिषेधे का गतिरित्यत्राह—**कर्तृत्वेति**। **स्वयमिति**—कर्तृत्वनिषेधक एव स्ववाक्यतात्पर्यमाहेति भावः। भगवानित्याप्ततमत्वव्यञ्जनम्। अगायत्—*पश्यैतानीत्यारभ्य, *न स पश्यति दुर्मतिरित्यन्तेनेति शेषः। **शारीरके** च कर्तृत्वं प्रसाध्य तस्य पराधीनतामात्रं स्थापितमित्यत्राह—**कर्तेति**। यदि कर्तृत्वमात्मधर्मः, स

चेतनपराधीनः, तस्य तद्धर्मत्ववदेकरूपः किं न स्यादित्यत्राह—**चित्रैरिति** । नात्र केनापि चोदनीयमिति भावः ॥ ८ ॥
इत्यात्मनः कर्तृत्वादि ॥

यद्भव्यं तन्न न स्याद्यदभवितृ न तद्यत्नकोट्यापि सिद्ध्येद्
द्वेधाऽपि व्यर्थयत्ना नर इति यदि न स्वोक्तियत्नादिबाधात् ॥
यद्यत्नेनैव भव्यं भवति यतनतस्तत्स्वहेतूपनीता-
दुस्साधा यत्नलभ्ये प्रति यदि यतते तत्र नैष्फल्यमिष्टम् ॥ ९ ॥

अथ * यदभावि न तद्भावि यद्भावि न तदन्यथा, इति मन्यमानैरुक्तं यत्ननैष्फल्यम् । तदिदमनूद्य परिहरति—**यद्भव्यमिति** ॥ नर इति बहुवचनम् । हेतुमाह—**स्वोक्तीति** । सर्वयत्ननैष्फल्यं वदन्किमिति साफल्यवादिनं क्षेप्तुमीहते ? नैष्फल्यवाक्यं च किमर्थं प्रयुङ्क्ते ? किमर्थं च स्वयं भीतो बुभुक्षुर्वा धावति ? अतोऽन्वयव्यतिरेकाध्यवसितं यत्नफलमप्रणोद्यम् । आदिशब्देन प्रमाणत्रयसंग्रहः । बाधं सिद्धसाध्यतां च वक्तुं सकलनिष्फलयत्नौ विभजते—**यद्यत्नेनेति** । यतनमयत्नतस्सिद्धमिति शङ्कां परिहर्तुं स्वहेतूपनीतादित्युक्तम् । प्राचीनयत्नजनितादृष्टतो हि तत्सिद्धेरिति भावः । **दुस्साधेत्यादिना** दुष्कर्ममूलनिष्फलयत्नानुवादः । तत्र नैष्फल्यमिष्टं—तस्मिन्नंशे नैष्फल्यं त्वया न साध्यम्, साध्यमपि तद्विषयमिति भावः ॥ ९ ॥ **इति यत्नसाफल्यम् ॥**

भिन्ना जीवाः स्वतस्स्युः प्रतिनियततया धीस्मृतीच्छासुखादेः
चेतोभेदाद्व्यवस्था न तु भवति यथा देहबाह्याक्षभेदात् ।
नित्यान् भिन्नांश्च जीवान्कथयति निगमस्तद्धि नोपाधितस्स्यात्
आत्माद्वैतश्रुतीनामितरहृदयता तत्रतत्रैव सिद्धा ॥ १० ॥

जीवः परस्य ब्रह्मणः औपाधिकांशः । घटाकाशमहाकाशवत्तयोर्भेदः । जीवानां मिथो भेदस्तु घटकरकाद्याकाशवदिति पक्षं दूषयति—**भिन्ना** इति ॥ स्वतः—न तूपाधितः । हेतुमाह—**प्रतिनियततयेति** । ननु कोऽयं प्रतिनियमः ? न तावद्बुद्ध्यादीनां स्वरूपभेदः, एकस्मिन्नप्यात्मनि तदुपगमात् । नापि भिन्नाधारत्वम्, तस्यैव साध्यत्वात् । अत एव नासाधारण्यम्, तत्खल्वाश्रयभेदसापेक्षम् । नापि परस्परप्रतिसन्धानाभावः, परस्परभावस्यैवासिद्धेरिति । अत्र ब्रूमः—यथैकशरीरावच्छिन्नबुद्ध्यादीनामेकाश्रयतयैव प्रतिसन्धानं न तथा शरीरान्तरजानाम् । अन्यथा गुरुशिष्यभावादयोऽपि न स्युः । तदेवं गम्यते—चैत्रात्मा मैत्रतादात्म्यरहितः, तदनुभवजन्मस्मृत्यनाधारत्वात्, कदाचिदपि तद्गतसुखादिप्रतिसन्धानरहितत्वादित्यादि । अत्र परोक्तामन्यथासिद्धिं परिहरति—**चेतोभेदादिति** । तुरवधारणे । अस्ति हि कल्पभेदेन चेतोभेदः । सन्ति च कल्पादौ जातिस्मराः, *स्वयमागतविज्ञाना इत्यादेः । तत्र प्रतिबन्द्यभिप्रायेणाह—**यथेति** । न हि देहभेदे प्रतिसन्धानाभावः, पूर्वजन्माभ्यस्तप्रतिसन्धानदृष्टेः । न च बाह्येन्द्रियभेदे, सर्वधीविरोधात् । तद्वच्चेतोभेदोऽपि न व्यवस्थाहेतुरिति । ईश्वरान्मिथश्च जीवानां निरुपाधिकभेदः, * पृथगात्मानं प्रेरितारं च मत्वा, * जुष्टं यदा पश्यत्यन्यमीशम्, *नित्यो नित्यानाम् इत्यादिश्रुतिस्वारस्यसिद्ध इत्याह—**नित्यानिति** । मुक्तावपि भेदश्रुतिमभिप्रेत्याह—**तद्धीति** । ननु * अयमात्मा ब्रह्म * तत्त्वमसि इत्यादिभिर्जीवब्रह्मतादात्म्ये सिद्धे भेदस्यौपाधिकत्वं ग्राह्यमित्यत्राह—**आत्माद्वैतेति** । अयं भावः—शरीरशरीरिभावेन सामानाधिकरण्यं स्थापयिष्यते । आस्तामेतत् । यथा यूपादित्यसामा-

नाधिकरण्यं प्रत्यक्षविरोधादन्यपरं, तथेहापि स्वरूपैक्यविधानं तावदशक्यमिति । तत्रतत्रेति वीप्सायाः क्वचिद्विशिष्ट-वृत्तिः क्वचित्तूपचार इत्यादितात्पर्यभेदस्सूच्यते ॥ १० ॥ इत्यौपाधिकभेदवादभङ्गः ॥

जीवाः पृथ्व्यादिभूतेष्वणव इव मिथो भेदवन्तः स्वतोऽमी
सन्मात्रब्रह्मभागास्तदिह नियतयस्सुस्थिता इत्ययुक्तम् ।
ऐक्यस्याप्यक्षतत्वादनवधि च सति ब्रह्मणि स्यादवधं
सत्यं तच्चेत्यभिज्ञैर्बहिरगणि मृषावादतोऽप्येष पक्षः ॥ ११ ॥

अथ स्वाभाविकजीवांशभेदाभेदं दूषयति—जीवा इति ॥ उक्तं विरोधमेव बाधहेतुमाह—ऐक्यस्यापीति । पक्ष-द्वयसाधारणं दूषणान्तरमाह—अनवधीति । सति ब्रह्मणि—सर्वात्मकसद्रूपे ब्रह्मणीत्यर्थः । अस्मिन्पक्षे निरवद्यत्वादिश्रुति-र्निर्विषया स्यात्, ईश्वरस्यापि सर्वतादात्म्यप्रतिसन्धायिनः क्लेशादिनिषेधायोगादिति भावः । एतत्पक्षद्वयादविद्याकृत-दुःखादिभेदवादो वरमित्यभिप्रायेण सत्यं तच्चेत्याद्युक्तम् ॥ ११ ॥ इति ब्रह्मस्वरूपस्वाभाविकांशजीवभेदभङ्गः ॥

देहत्वाद्यैर्विगीतं निखिलमपि मया ह्यात्मवत्किं च पुंस्त्वात्
सर्वे जीवा अहं स्युर्न यदि भवति ते गौरवादीत्यसारम् ।
श्रुत्यध्यक्षादिबाधात्प्रसजति च तदा तत्तदैक्यं घटादेः
पक्षादेर्वादिनोश्चेत्यलमिह कलहैस्तज्जिगीषादिमूलैः ॥ १२ ॥

अन्ये त्वाहुः—अविद्याशबलं ब्रह्मैव जीवः, स च सर्वशरीरेष्वेकः; अप्रतिसन्धानमविद्यावैचित्र्यात्; प्रतिबुद्धास्तु *सोऽहं स च त्वमिति प्रतिसन्दधते; प्रमाणं चात्र श्रुतिस्मृतय इति । एतदपि पूर्वोक्तनीत्या दत्तोत्तरम् । अविद्या-स्वरूपादिकं दूषयिष्यते । अत्र चैको व्रीहिरित्यादिवज्जीवैक्यवादास्साजात्यात्स्युः; *पण्डितास्समदर्शिन इत्यादिभि-स्तथात्वावगमात् । *मित्रामित्रकथा कुतः इत्यादिकं रागादिपरिहारपरम् । *यद्यन्योऽस्ति इत्यादिकं स्वरूपेऽन्या-इक्त्वनिषेधार्थम् । *एको देवस्सर्वभूतेषु गूढ इतीश्वरविषयम् । *आकाशमेकं हि यथा, *एक एव हि भूतात्मा इत्यादिनिदर्शनमपि तत्तत्संसर्गशङ्कितवृद्धिह्रासादिनिषेधार्थम् । *घटध्वंसे घटाकाशो न भिन्नो नभसा यथा इत्यादिक-मौपाधिकवैषम्यनिवृत्तावत्यन्तसाम्यं व्यनक्ति । नहि घटध्वंसे घटावच्छिन्नः आकाशांशोंऽशान्तरेणैकीभवति । आकाशता-मात्रं तु घटस्थितावपि सिद्धमित्येषा दिक् । तदिह प्रतिसन्धानादिप्रसङ्गे शास्त्रतात्पर्ये च वक्तव्यशेषाभावात्तदुक्तमनु-मानादिकमनूद्य दूषयति—देहत्वाद्यैरिति ॥ निखिलं—सर्वज्ञदेहप्रभृति पिपीलिकादिदेहपर्यन्तम् । सर्वे जीवाः—ब्रह्मादि-स्थावरान्ताः । **न यदि** इत्यादिना विपक्षे बाधकोक्तिः । असारत्वे हेतुमाह—श्रुतीति । सर्वैर्हि प्रमाणैर्जीवानां मिथ-स्तादात्म्यप्रसङ्गः प्रतिक्षिप्तः । उक्तानुमानवर्गस्याभाससमानत्वमाह—प्रसजतीति । देशान्तराणि एतद्घटेन घटवन्ति देशत्वात् एतद्देशवत्; अन्येऽपि घटा एतद्घटात्मानः घटत्वात् एतद्घटवत्, इत्यादौ किं वाच्यम्? अध्यक्षादिविरोध इति चेत् समम् । अविद्ययाऽऽत्मनि भेदधीः, ऐक्यं तु स्वभावस्स्यादिति चेत्, घटादावपि तथाऽस्तु । न चायमिष्ट-प्रसङ्गः, विवर्तद्वयस्य तादात्म्यानभ्युपगमात् । अन्यथा व्यावहारिकव्यवस्थाविलोपात् । प्रयुक्तानुमानावयवेष्वपि वाक्य-त्वादिना तादात्म्यसंभवेऽन्यतमपरिशेषः स्यादित्यभिप्रायेण पक्षादेरित्युक्तम् । वादिनोरिति । अत्रेष्टप्रसङ्गत्वसंभवेऽपि विवादोच्छेदादौ तात्पर्याच्च वैयर्थ्यम् । तद्विवृणोति—इत्यलमिति ॥ १२ ॥ इति सर्वशरीरैकजीववादभङ्गः ॥

सावियं ब्रह्म जीवस्स च न बहुतनुर्नेतरे सन्ति जीवाः
स्वप्नादेकस्य लोके बहुविधपुरुषाध्यासवद्विश्वक्लृप्तिः ।
नेतः प्राक्कोऽपि मुक्तो न परमपि स तु प्राप्स्यति श्रेय एको
मायोत्थौ बन्धमोक्षाविति च मतमसत्सर्वमानोपरोधात् ॥ १३ ॥

अथैकशरीरैकजीववादमनुभाषते—**सावियमिति** ॥ सावियं ब्रह्म जीव इति पूर्वस्यास्य च साधारणम् ; स चेत्यादिविशेषोक्तिः । वक्ष्यमाणपक्षाद्वैषम्यं व्यनक्ति—**नेतर इति** । विचित्रजीवोपलम्भं निर्वहति—**स्वप्नादिति** । एकमेव शरीरं जीववत्, स्वप्नदृष्टशरीरन्यायादन्यानि निर्जीवानीत्यर्थः । *शुको मुक्त इत्यादिवैघट्यं परिहरति—**नेतः प्रागिति** । पूर्वं मुक्ता न सन्ति चेत्पश्चादप्यद्वैतविदो न मुच्येरन्नित्यत्रेष्टप्रसङ्गतामाह—**न परमपीति** । तर्हि मोक्षशास्त्रं व्यर्थं स्यादित्यत्राह—**स इति** । नित्यमुक्तस्यैकशरीरे बन्धमोक्षभ्रमं साधयति—**मायोत्थाविति** । उक्तं प्रागुक्तहेतुना दूषयति—**इति चेति** । आत्मभेदो हि सर्वप्रमाणैस्सिद्धः । तत्र यदि देहान्तरं निर्जीवम्, एकमपि तथैव ; भ्रान्तिसिद्धजीवत्वस्याविशेषात् । एकत्रात्माऽस्ति जीवत्वं तु नास्ति, अत्र तूभयं नेति चेन्न ; तेष्वप्यध्यासाधिष्ठानतया आत्मसत्त्वस्य त्वया दुस्त्यजत्वात् । अन्यथा निरधिष्ठानभ्रमप्रसङ्गात् । स्वप्ननीत्या लाघवमिच्छतस्तदेव लभ्यम्, स्वप्नस्य तद्द्रष्टुश्च सत्यत्वात् । इह तु तन्मिथ्यात्वस्य त्वयैवोक्तेरिति ॥ १३ ॥

स्वस्य स्वेनोपदेशो न भवति न परब्रह्मणा निष्कलत्वा-
न्नाविद्या चेतयित्री स्वतनुसमधिकं वर्ष्म निर्जीवमात्थ ।
कश्चित्तत्त्वं ब्रवीतीत्ययमुपनिपतद्भ्रान्तिरुन्मुच्यते चेत्
तादृग्भ्रान्तिः पुराऽपि ह्यभवदिति न ते किं तदैवैष मुक्तः ॥ १४ ॥

एकस्य जीवस्योपदेष्टृत्वासंभवादनिर्मोक्षप्रसङ्गमाह—**स्वस्येति** ॥ अत्र स्वात्मैव वा स्वस्योपदेष्टा ? अशरीरं वा परं ब्रह्म ? विश्वाध्यासहेतुरविद्यैव वा ? देहान्तरप्रतीतो जीवो वा ? इति विकल्पमनुस्मृत्य पूर्वार्धेन क्रमाद्दूषणम् । ननु * अनादिमायया सुप्तो यदा जीवः प्रबुध्यते इति वचनादुपदेशनिरपेक्ष एव कदाचिद्बोधोऽस्तु । मैवम्, नैरपेक्ष्यानुक्तेः । जीव इत्येकत्वोक्त्या जीवान्तरासंभवान्नैरपेक्ष्यं सिद्धमिति चेन्न ; एकवचनस्य जात्यैक्यपरत्वात् । नैरपेक्ष्येऽपि निस्तारं शङ्कते—**कश्चिदिति** । शुकादिषु मुक्तिहेतुतया पूर्वमपि तादृशभ्रमजननात्तदानीमेवास्य मोक्षः स्यादित्याह—**तादृगिति** । परस्मै ब्रवीतीति तदा भ्रान्तिरिति चेत् ; तथाऽप्यद्वैतं ब्रवीतीत्यवगतेरर्थतः स्वार्थोपदेशभ्रमफलसिद्धेः । तदेवं हेत्वनुपपत्त्या नित्यमनिर्मोक्षः ; अहेतुकमोक्षे नित्यमुक्तौ च शास्त्रनैष्फल्यमिति । तदभ्युपगमे सिद्धान्तत्यागात्कृतं वादेनेति ॥ १४ ॥ **इत्येकशरीरैकजीववादभङ्गः** ॥

तोयाधारेषु दोषाकर इव बहुधोपाधिषु ब्रह्म शुद्धं
छायापन्नं विशेषान् भजति तनुभृतस्तत्प्रतिच्छन्दभूताः ।
इत्यप्यत्यन्तदुःस्थं प्रसजति च तदा जीवनाशोपवर्ग-
श्छायाच्छायावदैक्यं न भजति न च तद्दर्शनं ब्रह्मणस्ते ॥ १५ ॥

अथ बहुजीवक्लृप्तिपक्षं शङ्कते—तोयेति ॥ नित्यशुद्धस्य ब्रह्मणो न भ्रान्तिः । यथा नित्यशुद्धेऽपि चन्द्रमसि तत्प्रतिबिम्बेष्वाधारभेदानुगुणा विशेषाः काल्पनिकाः, एवमविद्याविवर्तेषु पृथगभिव्यक्तं ब्रह्म तत्तदनुगुणविचित्रविशेषवदिव भाति । ईदृशभेदक्लृप्त्या मुक्तादिसमस्तव्यवस्थोपपत्तिः । इमं पक्षं दूषयति—इत्यपीति । अयं भावः—यदि ते बद्ध-मुक्तबद्धमोचकादिव्यवस्था भ्रान्तिसिद्धा सा तर्ह्येकजीववादेऽप्यविशिष्टेति किं बहुजीवबह्वविद्याकल्पनेन? ब्रह्मणो जीव-भावानुपपत्त्या पृथग्जीवाः कल्प्या इति चेन्न; मिथ्याभूतजीवत्वस्य विरोधाभावात्; अन्यथा अध्यासाधिष्ठानत्वस्य विरोध-प्रसङ्गात् । न च निरधिष्ठानं भ्रममिच्छसि । *दुर्घटत्वमविद्याया भूषणमिति च पश्यन् ब्रह्माज्ञानं किं नानुमन्यस इति । अस्मिन्पक्षे दूषणान्तरमाह—प्रसजतीति । यथा प्रतिबिम्बाधारनिवृत्तौ तत्रोत्पन्नस्यानिर्वचनीयस्य प्रतिबिम्बस्य नाशः, तथा तत्तदविद्यानिवृत्तौ तेते जीवा नश्येयुः । मुक्तौ जीवानां ब्रह्मणैकीभावमात्रं नतु नाश इत्यत्राह—छायेति । छायावत्कल्पिता जीवा इति मन्यसे । तत्र हि बाधदशायामाधारनिवृत्तिदशायां वा छायायां छायावता सहैक्यापत्तिर्न दृश्यते, तद्वदिहापि । तैमिरिकचन्द्रभेदन्यायेनाप्यत्र न भवति, तत्रापि बाधदशायां द्वितीयादिचन्द्राणां प्रथमचन्द्रै-क्यापत्तेरनभ्युपगमात् । दूषणान्तरमाह—न चेति । बिम्बप्रतिबिम्बयोर्द्वितीयादिचन्द्राणां चन्द्रद्रष्टा कश्चिदन्यस्सिद्धः; इह तु न कश्चित्; ब्रह्मणो दृङ्मात्ररूपत्वाङ्गीकारात्, अविद्यायास्तु द्रष्टृत्वप्रसङ्गाभावात्, प्रतिबिम्बस्थानीयानां जीवानां स्वाध्यासहेतुत्वायोगात् । अनादिरध्यासो हेतुनिरपेक्ष इति चेन्न; स्वरूपानादेरविद्ययाऽपि नैरपेक्ष्यप्रसङ्गात्; प्रवा-हानादित्वे जीवानां भङ्गुरत्वप्रसङ्गात् । तथा च धीसन्ततिवादसमत्वम्, अकृताभ्यागमादिप्रसङ्गः, श्रुत्यादिविरोधश्च स्यात् । ईदृशभ्रमनिरासाय सूत्रितं च स्वप्नोत्थितं प्रति *स एव तु कर्मानुस्मृतिशब्दविधिभ्य इति ॥ १५ ॥ इति ब्रह्मप्रतिच्छन्दजीववादभङ्गः ॥

एकं ब्रह्मैव नित्यं तदितरदखिलं तत्र जन्मादिभागि-
त्याम्नातं तेन जीवोऽप्यचिदिव जनिमानित्यनध्येतृचोद्यम् ॥
तन्नित्यत्वं हि साङ्गश्रुतिशतपठितं सृष्टिवादः पुनः स्यात्
देहादिद्वारतोऽस्येत्यवहितमनसामाविरस्त्यैकरस्यम् ॥ १६ ॥

ब्रह्मदत्तादिभिरुक्तं जीवानां स्वरूपतस्सृष्टिसंहृतिविषयत्वमनूद्य दूषयति—एकमिति ॥ जनिमानिति लयोप-लक्षणम् । अनध्येतृचोद्यम्—कतिपयाध्येतुस्तात्पर्यानभिज्ञस्य वा चोद्यम् । साङ्गशब्दः सोपबृंहणपरः, *अजो नित्यः शाश्वतोऽयं पुराणः, *प्रकृतिं पुरुषं चैव इत्यादिश्रुतिस्मृतिशतमिह भाव्यम् । सृष्टिवादः—*तोयेन जीवान्व्यससर्ज इत्यादिः । *पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि इत्यादिलयवाद उपलक्ष्यते । ब्राह्मणो जायते, क्षत्रियो जायते इत्यद्यतनजन्मादौ दृष्टम् । तद्वत् प्राकृतिकनैमित्तिकसृष्ट्यादावप्यचिदुपष्टम्भेन निर्वाह इहादिशब्दग्राह्यः । अवहित-मनसां—श्रुतितात्पर्यैकाग्रमनसामित्यर्थः ॥ १६ ॥ इति जीवनित्यत्वम् ॥

स्थैर्यं चेन्नाभ्युपेतं भवभृति न भवेदैहिकार्थप्रवृत्तिः
देहान्तत्वे तु धर्म्ये पथि निरुपधिका विश्ववृत्तिर्न सिध्येत् ।
आकल्पस्थायिपक्षे कृतमफलतया मुक्तिमार्गोपदेशैः
आमोक्षस्थायितायां श्रुतिरनभिमुखी पूरुषार्थे चतुर्थे ॥ १७ ॥

आत्मानित्यत्ववादिनश्चतुर्विधाः । तेषु ज्ञानात्मवादिनश्शरीरस्थितावप्यात्मनो भिदुरत्वमाहुः । प्राणेन्द्रियात्मवादिन आत्मानमाशरीरस्थायिनम् । पौराणिकैकदेशिनस्तु प्रलयान्तम् । औपनिषदाभासास्तु मोक्षावधिकम् । एतेषु दूषणवर्गः किंचिदुद्गृहणेनोपलक्ष्यते--**स्थैर्यमिति** ॥ तत्र स्थैर्यं चेन्नाभ्युपेतमित्याशुतरविनाशित्वानुवादः । बाधकमाह--**न भवेदिति** । आत्मानमुत्तरकालानवस्थायिनं मन्यमानो न किंचिदुद्दिश्य प्रवर्तेत । तत्खल्वायत्यां सुखं दुःखनिवृत्तिं वाऽभिसन्धाय । तत्कथं घटेत? फलकाले स्वाभावात्, स्वकाले फलाभावात् । सन्तानैक्यादिकुसृतयस्तु प्रागेव निरस्ताः । द्वितीयपक्षे दूषणं **देहान्तत्व** इति । यदि देहावधिरात्मा, तदा देहात्मवाद इव प्रेक्षावतो महाजनस्य धर्मादनपेते मार्गेऽनादिस्सार्वत्रिकी दृष्टफलाद्युपाधिरहिता प्रवृत्तिर्न घटेत; तदाहुः—

* विफला विश्ववृत्तिर्नो न दुःखैकफलाऽपि च । दृष्टलाभफला नापि विप्रलम्भोऽपि नेदृशः ॥ इति ।

तृतीयं दूषयति--**आकल्पेति** । अयं भावः--यदि सर्वदुःखनिवृत्तियुक्त आत्मनाश एव मोक्षः, स तर्हि वः कल्पान्ते स्वयमेवैष्यति । नचासौ पूर्वं साध्यः । त्वरया मध्ये स्वनाशार्थमुपायग्रह इति चेन्न; स्वनाशस्य सर्वप्रमाणैरपि पुमर्थत्वासिद्धेः । एवं च भाषितम्—* अहमर्थविनाशश्चेन्मोक्ष इत्यध्यवस्यति । अपसर्पेदसौ मोक्षकथाप्रस्तावगन्धतः ॥ इति । चतुर्थे बाधकमाह--**आमोक्षेति** । अनभिमुखीति--स्वनाशरूपं चतुर्थपुरुषार्थं न वक्ति । स्वेन रूपेणाभिनिष्पन्नस्य भोगादीनप्याह । ननु * विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यतीति जीवविनाशः श्रूयते; मैवम्; लोकधीरूढानुवादमात्रत्वात्, अदर्शनमात्रपरत्वाद्वा । स्मर्यते च--* अदर्शनादिहायातः पुनश्चादर्शनं गत इति । अन्यथा कथम् * अविनाशी वा अरे अयमात्माऽनुच्छित्तिधर्मा इति तन्नित्यत्वसाधनम्? ननु * न प्रेत्य संज्ञाऽस्तीति मुक्तस्य निस्संबोधत्वश्रुत्या नाशस्सिध्येत्; न; देहादिभिरेकीकृत्य बुद्धेः तन्निबन्धनाख्याभेदस्य वा निवृत्तौ तात्पर्यात् । ब्रह्मण्यात्यन्तिकलयः कथम्? अनात्यन्तिकवत्, स्वविशिष्टे ब्रह्मण्यौपाधिकरूपेण विशेषत्यागेन श्लेषस्य विवक्षितत्वात् । अन्यथा मुक्तिदशायां भेदोक्तिभिर्विरोधात् । * यथा नद्यस्स्यन्दमानास्समुद्रे अस्तं गच्छन्ति नामरूपे विहाय इति निदर्शनान्मुक्तोऽप्यस्तमेष्यतीति चेन्न, प्रविष्टजलस्य स्वरूपनाशाभावात्; अन्यथा पयःप्रस्थद्वयसंभेदे प्रस्थशेषत्वप्रसङ्गात्, * यथोदकम् इत्यारभ्य, * तादृगेव भवतीति श्रुत्यन्तरविरोधाच्च । घटध्वंसे घटाकाशोऽपि न नश्यत्येव; घटसंयोगनाशात् नश्यतीत्युपचरन्ति । मुक्तिदशायां भेदनिवृत्तिवादाश्च कर्मकृतवैषम्यनिवृत्तिपराः । साधर्म्यवादिभिरप्येतदेव व्यवस्थाप्यते । * ब्रह्मैव भवतीत्यवधारणाज्जीवनिवृत्तिर्गम्यत इति चेन्न; अत्यन्तसाम्ये तात्पर्यात् । यथा * वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयतीति, तदेतत् * नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इति सूत्राभिप्रेतमिति ॥ १७ ॥ **इत्यात्मानित्यत्वादिवादानामध्यक्षादिविरोधः** ॥

व्याप्तास्सर्वत्र जीवास्सुखतदितरयोस्तत्रतत्रोपलम्भा-
न्निर्बाधे देहगत्यागतिरिह वितथा तद्वतोऽपीति चेन्न ।
वक्त्री पञ्चाग्निविद्याप्रभृतिषु भविनां स्वस्वरूपेण सिद्धं
यातायातप्रकारं श्रुतिरगतिरिमां लाघवोक्तिं शृणोतु ॥ १८ ॥

* नित्यस्सर्वगत इति श्रुत्या आत्मनां नित्यत्वे तत्सहचरितं सर्वगतत्वमपि स्यादिति शङ्कते--**व्याप्ता** इति ॥ आगमस्यानुग्राहकमाह--**सुखेति** । तदितरशब्दोऽत्र दुःखवत् धीच्छादीनामपि संग्राहकः । अविभुत्वे सर्वत्र दुःखा-

द्युपलम्भो न स्यादित्यर्थः। आत्मगत्या सर्वत्र सुखादीति शङ्कां गौरवप्रसक्त्या वारयति—**निर्वाह्य** इति। अत्र श्रुतेरन्यपरत्वाभिप्रायेण प्रतिवक्ति—**नेति**। सर्वगतत्वोक्तिस्तावत् *अग्निर्यथैको भुवनं प्रविष्टः, *वायुस्सर्वगतो महान् इत्यादिवदेकजातीयानां सर्वत्रानुप्रवेशान्नेतुं शक्या। गतेश्च श्रुतत्वान्न कल्पनागौरवमित्याह—**वक्त्रीति**। प्रभृतिशब्देन *तेन प्रद्योतेनैष आत्मा निष्क्रामति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति इत्यादयस्संगृह्यन्ते। न च तासां श्रुतीनां प्राणानूत्क्रमणादिभिरन्यथासिद्धिरास्थेया इत्यगतिशब्दाभिप्रायः॥ १८॥

अव्यापित्वेऽपि पुंसोऽभिमतबहुवपुःप्रेरणे यौगपद्यं
ज्ञानव्याप्त्योपपन्नं बहुषु च वपुषोंऽशेषु निर्वाह एषः।
यच्चादृष्टं क्रियां स्वाश्रययुजि तनुतेऽन्यत्र तत्कृद्गुणत्वा-
दित्येतत्सिद्धसाध्यं विभुन इह हि तद्ब्रह्मणः प्रीतिकोपौ॥ १९॥

अविभुत्वे सिद्धैश्वर्याणां युगपदनेकशरीराधिष्ठातृत्वं न स्यादित्यत्राह—**अव्यापित्वेऽपीति**॥ बहुवपुःप्रेरणं किं द्रव्यान्तरद्वारकम्? उत कर्मनिमित्तम्? आद्ये यथा पाणिपादादिद्वारनियतं युगपत्खड्गपादुकाद्यधिष्ठानम्, न तथाऽत्रेति भावः। द्वितीये स्वकर्मनियतमनेकशरीराधिष्ठानं कर्मिणः स्वसन्निधिविरहे कथं स्यादिति। ज्ञानव्याप्त्या—स्वरूपसन्निधानाभावेऽपि ज्ञानस्य युगपदनेकदेहाधिष्ठानानुगुणवृत्त्येति भावः। स्वरूपव्याप्तिर्ज्ञानतोऽधिष्ठानाभावेऽनर्थिका। तर्हि तत एव कुड्यादीनामप्यधिष्ठानं स्यात्। न स्यात्, तदधिष्ठानानुगुणकर्मातिशयविशेषाभावात्। ये तु तादृशातिशयवन्तः, ते कुड्यादीन्यप्यधितिष्ठेयुर्यथा परकायादीन्। देहैकदेशवर्तिन आत्मनो युगपदनेकावयवाधिष्ठानं कथमित्यत्रापि प्रत्येतव्यमेतदेवेत्याह—**बहुष्विति**। धर्माधर्मौ स्वाश्रयसंयुक्त एवाश्रयान्तरे क्रियां जनयतः क्रियाहेतुगुणत्वाद्गुरुत्ववदिति परोक्तमनुवदति—**यच्चेति**। तत्र सिद्धसाधनतामाह—**इत्येतदिति**। तद्व्यनक्ति—**विभुन** इति॥ इह हि धर्माधर्मशब्दः कर्मनिमित्तेश्वरप्रीतिकोपरूपबुद्धिद्योतकः। अस्ति हि *शुभे त्वसौ तुष्यति दुष्कृतेतु न तुष्यतेऽसौ परमश्शरीरी इति॥

न च प्रीतेरपूर्णत्वं न च कोपात्सदुःखता। फलप्रदित्सारूपत्वादुभयोरपि कर्मणोः॥ अतो न दोषः॥ १९॥

इष्टं प्रादेशिकत्वं विभुषु जनिमतां बुद्धिशब्दादिकानां
तेनादृष्टं च तादृङ्न यदि तव सुखाद्याश्रयव्यापकं स्यात्।
तस्मात्तत्स्वप्रदेशान्वयवति जनयेत्स्वं फलं यत्ननीत्या
भ्रातृव्यादौ च पीडां न घटयितुमलं किं विभुत्वेन भोक्तुः॥ २०॥

उक्तानुमानस्य दूषणान्तरमाह—**इष्टमिति**॥ विभुष्वात्माकाशादिषु जायमानानां बुद्धिशब्दादिकानां स्वाश्रयैकदेशवर्तित्वं युष्माभिरिष्यते, सार्वत्रिकत्वे प्रत्यक्षादिबहुप्रमाणविरोधात्। अदृष्टं च तादृशमिष्टम्। तच्च स्वाश्रयसंयोगिनि क्रियां जनयत् स्वावच्छिन्नप्रदेशसंयुक्त एव जनयेत्; अन्यथा प्रयत्नेनापि दूरस्थप्रेरणप्रसङ्गात्। न चादृष्टं तत्र तत्र गच्छति, अमूर्तत्वात्। अतोऽदृष्टकारितदूरस्थकार्याणामनुत्पत्तिप्रसङ्गः। ननु प्रत्यात्मनियतान्यनन्तान्यदृष्टानि विप्रकीर्णवृत्तीनि विद्यन्ते; अतस्सर्वक्रियोपपत्तिरित्यत्राह—**भ्रातृव्यादाविति**। अयं भावः—अद्यतनाभिचारक्रियानिष्पाद्यमानमदृष्टं कर्तुरात्ममनस्संयोगावच्छिन्ने प्रदेशे स्यात्। तच्च भ्रातृव्यदेहभेदादीन्करोति। एवं देशान्तरानुभाव्यस्वर्गादिफलसाधनेऽपि भाव्यम्। न च दूर एवेदमदृष्टमुत्पद्यते, असमवायिदेशावच्छेदेन तदुत्पत्तेः स्थापनात्। अतः कथं

देशान्तरस्थे भ्रातृव्यशरीरादौ पीडां जनयेत्? तस्मादात्मनस्सर्वत्रावस्थानं निरर्थकमिति निगमयति—**किं विभुत्वे-नेति** ॥ २० ॥ इति जीवविभुत्वभङ्गः ॥

स्वादृष्टोपार्जितत्वाद्विभुषु यदवदन्विग्रहादेर्व्यवस्थां
तच्चैवं निर्निमित्तं तत इह न कथं सर्वतस्सर्वभोगः ।
आराध्ये विश्वसाक्षिण्यनुगुणफलदे त्वस्ति राजादिनीति-
स्तत्साम्ये भोगसाम्यं न हि भवति यथाकर्म भोगप्रदानात् ॥ २१ ॥

यदि सर्वे जीवास्सर्वशरीरव्यापिनः, सर्वे देहास्सर्वेषां भोगायतनानि स्युः, इति प्रसङ्गे परोक्तं परिहारमनुवदति—**स्वादृष्टेति** । दूषयति—**तच्चेति** ॥ अयं भावः—यद्यदृष्टं स्वावच्छिन्नप्रदेशे देहादिसृष्ट्या फलं जनयेत्, तदा यष्टुः स्वर्गादिकमिहैव स्यात्; प्रदेशान्तरे तु प्रयत्ननीत्या जनयितुं नालमिति । अतस्त्वत्पक्षे प्रतिनियतादृष्टजन्यत्वस्यैवासंभवा-द्व्यवस्थाभङ्गो दुर्वार इत्याह—**तत** इति । नन्वणुपक्षेऽपि फलानां जीवगतादृष्टाजन्यत्वात् परगतस्य व्यवस्थापकत्वानभ्यु-पगमादनियमस्तदवस्थ इत्यत्राह—**आराध्य** इति । परगतत्वेऽपि राजादिषु दृष्टेन न्यायेन तत्तदाराधकादिप्रतिनियतानु-ग्रहादिवैचित्र्यात्तत्तदुचितफलसमर्पणे यथाप्रमाणं व्यवस्था सिध्येदिति भावः । सर्वफलप्रदानानुगुण्यार्थं विश्वसाक्षितोक्तिः । सहाधीते च कर्माध्यक्षत्वसाक्षित्वे । ननु *समोऽहं सर्वभूतेषु इति वदतः कथं विषमफलप्रदत्वमित्यत्राह—**तत्साम्य** इति । भोगसाम्यं क्षेत्रज्ञानामन्योन्यमिति शेषः । सूत्रादिसिद्धं हेतुमाह—**यथाकर्मेति** ॥ २१ ॥

देहान्तर्मात्रदृष्टेः पृथगिह विषयिप्राणजीवोत्क्रमोक्ते-
र्भूयोवाक्यानुसारादणुरिति वचने तादृशोपाध्यनुक्तेः ।
ईशादाराग्रमात्रो ह्यवर इति भिदावर्णनात्स्पन्दवाक्या-
द्व्याप्त्युक्तिर्जातिधर्मप्रतिहतिविनिवृत्त्यादिमात्रेण जीवे ॥ २२ ॥

अथाप्यणुत्वे किं प्रमाणमित्यत्राह—**देहान्तरिति** । अयं भावः—यद्यात्मा विभुः स्वयंप्रकाशश्च, किमिति सर्वत्र सर्वदा न प्रकाशते? अहमिति सार्वत्रिकः प्रकाशत एवेति चेन्न; अस्मिन्देहेऽहं वर्त इतिवत्सर्वत्र प्रतीतिप्रसङ्गात् । सार्वत्रिकस्याविशदप्रकाशोऽस्तीति च न प्रमाणम् । व्यञ्जकान्तरसापेक्षत्वाद्व्यञ्जकदेशे व्यक्तिरिति नियमहेतुरिति चेन्न; स्वप्रकाशत्वविरोधात् । अथ मानसप्रत्यक्षः, तथाऽपि कथं क्वाचित्कोपलब्धिः? यद्यपि सामग्रीदेशानुविधानेन ज्ञानो-त्पत्तिः; तथाऽपि विषयत्वं न तन्निघ्नम्, तथा अदृष्टेः । अगृहीतपरिमाणस्य स्वरूपतो ग्रहणे देहात्मभ्रमात् क्वाचि-त्कत्वोपलम्भ इति चेन्न; भ्रमव्यतिरिक्तमानसप्रत्यक्षेष्वपि तद्दृष्टेः । विवेकतस्समाहितानामपि परिच्छिन्नतया तदुप-लब्धेः; *हृदि ह्ययमात्मा इत्यादिदृष्टेश्च । हेत्वन्तरमाह—**पृथगिति** । इन्द्रियादीनां पृथगुत्क्रमणोक्तेरात्मोत्क्रमणं न भाक्तमिति भावः । सर्वगतत्वोक्तिसद्भावेऽप्यणुत्वोक्तीनां बलीयस्त्वं व्यनक्ति—**भूय** इति । सन्ति हि *एषोऽणुरात्मा चेतसा वेदितव्यः, *वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयः इत्यादिका बह्व्यः । ननु विभोरपि परमात्मनोऽणुत्वं श्रूयते, तथेह स्यात्; तन्न; तत्र हि *एष आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा इत्यादिष्वौपाधिकाणुत्व-व्यक्तेः । जीवाणुत्वश्रुतौ तादृशोपाध्यनुक्तेः; प्रत्युत स्वरूपनिर्देशेनैव बालाग्रसूक्ष्मभागसमत्वं ख्याप्यते । यद्यौपाधिकं जीवस्याणुत्वम्, तस्य जीवेश्वरसाधारणत्वात् *आराग्रमात्रो ह्यवरोऽपि दृष्टः इति परव्यावर्तकपरिमाणोक्तिर्विहन्येतेत्यभि-

प्रायेणाह—**ईशादि**ति ॥ स्वप्नसुषुप्तयादिवाक्येषु *आसु तदा नाडीषु सृप्तो भवति, *ताभिः प्रत्यवसृप्य पुरीतति शेते इत्यादिभिर्जीवस्य तत्रतत्र स्वरूपेण संचरणं श्रूयत इत्याह—**स्पन्दवाक्या**दिति ॥ एतैर्बलीयोभिर्जीवव्याप्तिवचनानामन्यपरत्वमाह—**व्याप्त्युक्ति**रिति ॥ *तस्यात्मपरदेहेषु सतः इत्यादौ जातितः, *स चानन्त्याय कल्पते इत्यत्र धर्मतः। तथा च सूत्रं *प्रदीपवदावेशस्तथा हि दर्शयति इति। सर्वगत इत्यत्र क्रमेण सर्वविधाचेतने प्रवेशाद्वा, शिलादिष्वपि प्रतिहत्यनर्हतया वा; तथा च भाषितम् *अतिसूक्ष्मतया सर्वाचेतनान्तःप्रवेशस्वभावः इति। आत्मनोऽणुत्वे पृथिव्याद्यणुवत्प्रत्यक्षत्वं न स्यादिति चेन्न, विभुत्वेऽपि ते विभ्वन्तरवदप्रत्यक्षत्वप्रसङ्गात्। यथादृष्टि व्यावृत्तिरस्तीति चेत् अणुत्वेऽपि समम्। न चास्माकं पृथिव्याद्यणूनामप्रत्यक्षत्वनियमः। एवमणुत्वे मानसप्रत्यक्षत्वं न स्यादिति प्रसङ्गोऽपि श्रुतिविरोधादिभिः प्रत्याख्येयः ॥ २२ ॥ **इति जीवाणुत्वम्** ॥

नात्मा देहानुरूपं विविधपरिणतिर्निर्विकारोक्तिबाधात्
स्थूलोऽहं मूर्ध्नि जातं सुखमिति च मतिस्तस्य देहात्ममोहात्।
नानादेहश्च योगी प्रसजति भिदुरः पुंसि देहप्रमाणे
मुक्तौ देहात्ययात्स्यात्परिमितिविरहस्तत्प्रयुक्तेऽस्य माने ॥ २३ ॥

जैनास्त्वाहुः—सर्वाणि द्रव्याणि पर्यायवन्ति, आत्माऽपि द्रव्यम्, अतस्सोऽपि तत्तद्भोगायतनानुगुणाणुत्वमहत्त्वादिपर्यायवानिति; तान्प्रतिक्षिपति—**नात्मे**ति ॥ यो यद्भोगायतनवर्ती स तत्समपरिमाण इति नियमस्तावन्न दृष्टः; नच कल्प्यः, कल्पकासिद्धेरिति भावः। नैगमिकाभीष्टं हेतुमाह—**निर्विकारे**ति ॥ वृद्धिह्रासौ देहस्यावेवोच्येते; आत्मनि तु न क्वचित्, प्रत्युतान्यथा। ननु स्थूलोऽहं कृशोऽहमिति सामानाधिकरण्यात्, मूर्ध्नि मे सुखमित्यादिना सर्वावयवेष्वहमर्थवृत्तिदर्शनाच्च परिमितिभेदः कल्प्य इत्यत्राह—**स्थूल** इति ॥ सामानधिकरण्यं तावद्गौरोऽहमित्यादिष्वप्यस्तीत्यनेकान्तम्। देहद्वारैवात्मनि गौरत्वादिवादः, भ्रमाद्वा; तथेहापि। देहावयवेषु सुखाद्युत्पत्तिधियश्च देहात्मभ्रमेण। सर्वत्र सन्निधानारोपात् सत्सन्निधानेऽपि भ्रमाङ्गीकारः। ननु *एकां शाखां जीवो जहातीत्यादिना छान्दोग्ये जीवस्य वृद्धिसङ्कोचौ श्रूयेते; तन्न, क्षेत्रादिष्विवाभिमानत्यागेनापि तदुपपत्तेः। तत्रतत्राभिमानसदसद्भावौ च कर्मनियतौ। खण्डितारोपितशाखाप्ररोहस्तु तादात्विकजीवान्तराभिमानात्। छिन्नजन्त्ववयवविकम्पः प्राणांशक्षोभमात्रात्, न हि तत्र वेदनायां प्रमाणमस्ति। बाधान्तरमाह—**नानादेह** इति ॥ एकस्मिन्नेव काले योगिनां विरुद्धधर्माध्यासेन स्वरूपभेदः प्रसज्येत। प्रसङ्गान्तरमाह—**मुक्ता**विति ॥ देहप्रयुक्ते पुंसः परिमाणे मुक्तिदशायां देहाभावादात्मनः परिमाणविरहः स्यात्, तथा च गुणवद्द्रव्यत्वमेव हीयेत। अपरिमितस्यापि द्रव्यत्वं केचिदिच्छन्तीति चेन्न; विभुत्वप्रसङ्गादिति ॥ २३ ॥

निर्मुक्तस्त्वन्मते स्यात्कथमपरिमितो नित्यमूर्ध्वं प्रधावन्
देहः कश्चित्तदानीमपि यदि नियतस्स्यात्तु तन्निम्नताऽस्य।
इच्छातो देहमेकं विशति स परिमित्यर्थमेवेति हास्यं
तस्मादास्माकनीत्या परिमितिरिह सा स्थायिनी या विमुक्तौ ॥ २४ ॥

भवतु विमुर्मुक्तः, को दोष इत्यत्राह—**निर्मुक्त** इति ॥ मुक्तस्य हि पृथिव्या नित्यपतनवन्नित्योर्ध्वगमनं युष्माभिरुच्यते, आलोकाकाशावधि वा? उभयथाऽप्यपरिमितस्य गमनं न सिध्येत्। देहविशेषपरिमित एवोत्पततीति शङ्कते—

देह इति । नियतः—अवश्यंभावी, स्वकर्मनियत इति वा । तत्र बाधकमाह—**स्यादिति** । कर्मनियतदेहत्वे परतन्त्रस्य कथं मुक्तत्वमिति भावः । अस्तु घातिकर्मचतुष्टयरहितस्याघातिकर्मचतुष्टयप्रभावात् गत्यर्थो देहः, तत्परित्यागक्षणे झटिति परिमाणसिद्ध्यर्थं सकललोकमस्तकस्थायिनं कंचिद्दिगम्बरं देहं सर्वे मुक्ताः प्रविशन्ति, पृथग्वा शरीराणि परिगृह्णत इति वदन्तमुपालभते—**इच्छात** इति । न हि मुक्तस्येच्छाभोगौ युष्माभिरिष्येते, न च स्वच्छन्दव्यापाराः । अतः परिमाणमात्रसिद्ध्यर्थं देहं परिगृह्णातीति निर्मूलकल्पनं निपुणैर्हास्यम् । तर्हि का गतिरित्यत्राह—**तस्मादिति** । मुक्तौ काचित्स्वाभाविकी स्वीकार्या; सैव बद्धदशायामपि स्थिरेति नित्याणुर्जीवः । तथा च सूत्रम् * अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः इति । उभयमिह जीवस्वरूपं परिमाणं च ॥ २४ ॥ **इत्यात्मनो देहपरिमाणत्वभङ्गः ॥**

कर्माविद्यादिचक्रे प्रतिपुरुषमिहानादिचित्रप्रवाहे
तत्तत्काले विपक्तिर्भवति हि विविधा सर्वसिद्धान्तसिद्धा ।
तल्लब्धस्वावकाशप्रथमगुरुकृपागृह्यमाणः कदाचित्
मुक्त्यैश्वर्यान्तसम्पन्निधिरपि भविता कश्चिदित्थं विपश्चित् ॥ २५ ॥

यदि यथाकर्म फलप्रद ईश्वरः, कर्माणि चानन्तान्यपरिमितकालभोग्यानि, तदा प्रागिव पश्चादपि कथं मोक्षोपायादिसिद्धिरित्यत्राह—**कर्मेति** ॥ चित्रप्रवाहत्वानूक्तिः परिहारकाकुगर्भा । तत्तदित्यादिना कस्यचित्कर्मणः प्रागलब्धप्रजापतिप्रभृतिपदनिदर्शनम् । विपक्तिः—कर्मणां सहकारिलाभः, फलविशेषोद्गतिर्वा । तथा च **पातञ्जलम्**—* जात्यायुर्भोगा विपाका इति । चार्वाकव्यतिरिक्तास्सर्वे सामग्रीप्रवाहवैचित्र्यात्संसरतां मुक्तिहेतूपनिपातमिच्छन्ति । अतो नात्रानादिसंसारवादिना केनापि विमन्तव्यमित्यभिप्रायेण सर्वसिद्धान्तसिद्धत्वोक्तिः । तच्छब्देनानुकूलविपक्तिविशेषः परामृश्यते । स्वशब्दः कृपाविषयः । सम्पदिह विवेकवैराग्यादिरूपा । अपिस्संभावनार्थस्समुच्चयार्थो वा । **इत्थमिति**—प्रकृतिपुरुषादितत्त्वचिन्ताप्रकारेण । यद्वा हिरण्यगर्भादिविपाकवदित्यर्थः । ननु हिरण्यगर्भादिपदविपक्तिः स्वस्य प्रागसिद्धाऽपि पुरुषान्तरसिद्धजातीयेति चेत्; तत्त्वज्ञानवैराग्यादिसम्पदपि तथैव । दृष्टं चैतद् गुरुशिष्यक्रमे । आद्यमुक्तस्य ततः पूर्वमदृष्टजातीयेति चेन्न; आद्यमुक्तानिरुक्तेः । यद्यसौ पूर्वमुक्त एव, उक्तोत्तरमेतत् । अथ मुक्तेष्वादिः, स कथं त्वया विदितः ? ततः पूर्वं मुक्ताभावादिति चेत्, तमपि कथं वेत्थ ? अनादिमुक्तौ व्याघातादिति चेन्न; मुक्तप्रवाहे व्याघाताभावात् । न ह्यनादिमुक्तः कश्चिद्बध्यते, साध्यमोक्षो वा भवेत्, येन व्याघातस्स्यात्; किंतु, अनादिबद्धास्सर्वेऽपि लब्धोपायाः क्रमेण मुच्यन्ते । तत एव मोक्षशास्त्रप्रामाण्यं निर्बाधमिति ॥ २५ ॥ **इति संसरतां प्रत्यापत्तिहेतुविशेषः ॥**

कृच्छ्रात्संवर्तकष्टाद्यपगमजनितस्थूलदेहस्य जन्तो-
र्जाग्रत्स्वप्नस्सुषुप्तिर्मरणमथ मृतेरर्धसंपद्दशास्स्युः ।
सर्वं दुःखान्धकारस्थगितमिह सुखं त्वत्र खद्योतकल्पं
त्यक्त्वा शुद्धाशयास्तन्निरवधिकसुखां निर्विविक्षन्ति मुक्तिम् ॥ २६ ॥

निर्वेदं सन्धुक्षयन् मुमुक्षोत्पत्तिप्रकारमाह—**कृच्छ्रादिति** ॥ मृतेरर्धसंपत्—मूर्च्छा । तथा च सूत्रे *मुग्धेऽर्धसंपत्तिः परिशेषादिति । सर्वम्—अनुकूलतया भाव्यमानमपि । ननु स्वर्गस्वाराज्यादिप्रभूतसुखमप्यस्तीत्यत्राह—**सुखं त्विति** ।

अल्पास्थिरत्वव्यक्त्यै खद्योतदृष्टान्तः । तत्—विषमधुकल्पं वैषयिकसुखम् । निरवधिकत्वोक्त्या निर्दुःखत्वमपि लक्ष्यते। निर्विविक्षन्ति—भोक्तुमिच्छन्ति ॥ २६ ॥ **इति मुमुक्षोत्पत्तिप्रकारः ॥**

कश्चिच्चेन्नित्यबद्धः किमयमहमिति स्यान्मुमुक्षोरुपेक्षा
मैवं युक्तस्य मुक्तिर्भवति दृढमिति प्रत्ययात्तत्प्रवृत्तेः ।
नो चेत्स्यामन्त्यमुक्तः किमहमिति न केऽप्यद्य मुक्तौ यतेरन्
सर्गस्थित्यादिसन्तत्यविरतिरत इत्येवमेकेऽन्यथाऽन्ये ॥ २७ ॥

इह सयूथ्याः परे च केचिदाहुः—इतः पूर्वमिव कारणाभावात् केचित्पश्चादपि न मोक्ष्यन्ते । *एकं पादं नोद्धरति स्वलीलार्थं समुद्धरंस्तं चेत्, *सततं च मृत्युजन्मनाऽमृतं भवेत्, *क्षिपाम्यजस्रमशुभान्....मामप्राप्यैव इत्यादिभिरेतत्सिद्धम् । तस्मिन्पक्षे बाधकं शङ्कते—**कश्चि**दिति ॥ सन्देहेऽपि प्रवृत्तिस्संभवतीत्यभिप्रायेण प्रतिवक्ति—**मैवमि**ति । अयं भावः—स्वरूपे योग्यभावेऽपि सहकार्यव्यवस्थितेः । विमुक्तिर्मम सिध्येद्वा न वेति विचिकित्सते ॥

अनिर्धार्यापि यः कश्चित्तथ्यमात्ममनोरथः । पाक्षिके फलभूयस्त्वे सांयात्रिकवदीहते ॥
यथाकथंचिदारब्धेऽप्यापवर्गिकवर्त्मनि । प्रसीदन्नीश्वरो बुद्धिं प्रयच्छेन्निश्चलामिति ॥

उपायविधानशास्त्रार्थनिश्चयात्स्वस्य च तदानुगुण्यदर्शनान्निस्संशयोऽपि कश्चित्प्रवर्तेतेत्याह—**युक्तस्ये**ति । अन्यथा कथंचिन्निष्फलप्रयत्नोऽप्यस्तीति निश्चयात्स किमहमिति कृष्यादावपि न प्रवर्तेतेति भावः । नोचेदित्यादिनाऽपि प्रतिबन्धन्तरोक्तिः । स्वात्मन्यमुक्तत्वशङ्कायामपि कृतांशः फलिष्यत्येवेति शास्त्रतोऽवगमात्प्रवर्तेतेति चेत्; एवं नित्यबद्धसद्भावनिश्चयेऽपि स्वयं निवृत्तिधर्मयोग्यतया दृष्टः कृतमपि फलिष्यतीति किं न प्रवर्तेत? एवं नित्यबद्धे संभवति *अव्युच्छिन्नास्ततस्त्वेते सर्गस्थित्यन्तसंयमा इत्यादिशास्त्रस्यार्थवत्त्वसिद्धिरित्याह—**सर्गे**ति । अयमेव सिद्धान्त इति निश्चयव्युदासायाह—**इत्येवमेक** इति । पक्षान्तरमाह—**अन्यथाऽन्य** इति । स्वरूपयोग्यानां शुकादिवत्कदाचित्सहकार्यागमान्मुक्तिस्स्यादेव, *तदा संसारपान्थस्य याति मोहश्रमः शममित्यादेस्सङ्कोचकाभावादिति भावः ॥ २७ ॥ **इति नित्यसंसारिसदसद्भावपक्षौ ॥**

निःशेषात्मापवर्गे विरतविहरणो विश्वकर्ता तदा स्यात्
नित्यं चेत्कोऽपि दुःख्येन्निरुपधिकदयाहानिरस्येति चेन्न ।
पक्षः पूर्वो यदि स्याद्विहरणविरतिः स्वेच्छया नैव दोषः
शिष्टे पक्षे निरुद्धा निरुपधिकदया कुत्रचिन्नित्यमस्तु ॥ २८ ॥

द्वयोरपि पक्षयोर्दोषमाशङ्क्य प्रत्याह—**निश्शेषे**ति ॥ उत्तरार्धं पक्षद्वयदोषपरिहारार्थम् । पुरुषान्तरप्रतिरोधादिना लीलाविरतौ हि दोषः, नतु स्वेच्छया, प्रवृत्तिवन्निवृत्तेरप्यैच्छत्वात् । क्वचिन्नित्यं दयारोधोऽपि, तत्तज्जीवकर्मवशात् । अतः प्रतिबन्धरहितेषु सावकाशा कृपा, अल्पव्याजेनानन्तापराधसहनाच्च ॥ २८ ॥ **इति पक्षद्वयोक्तप्रसङ्गपरिहारः ॥**

भक्तिर्मुक्तेरुपायः श्रुतिशतविहितस्सा च धीः प्रीतिरूपा
तन्निष्पत्त्यै फलेच्छाद्युपधिविरहितं कर्म वर्णाश्रमादेः ।

ज्ञानध्यानादिवाचां समफलविषया सैव युक्ता प्रतिष्ठा
सामान्योक्तिस्समानप्रकरणपठिता पर्यवस्येद्विशेषे ॥ २९ ॥

धर्मस्य तत्त्वं निहितं गुहायाम्; किंपुनर्निवृत्तिधर्मस्य? अतः कथं कश्चिदपि मोक्ष्यत इत्यत्र मोक्षोपायस्वरूपं निष्कर्षति—**भक्तिरिति** ॥ श्रुतिशतविहितो मुक्तेरुपायो भक्तिरित्यन्वयः। ननु ब्रह्मविद्ययैव मुक्तिरिति सिद्धान्तः। भक्तिशब्दस्त्वष्टविधत्वादिवचनैरन्यार्थः। *भज सेवायामिति च सामान्यतः पठ्यते। कचित्तु रूढिक्लृप्तौ गौरवमित्यत्राह—**सा चेति**। धीरित्यनेन ब्रह्मविद्यात्वाविरोधस्थापनम्। प्रीतिरूपेति रूढिनिमित्तसूचनम्। महनीयविषये प्रीतिर्भक्तिः; प्रीत्यादयश्च ज्ञानविशेषा इति वक्ष्यते। *स्नेहपूर्वमनुध्यानं भक्तिः इति चोपायो विशेष्यते। *अपाम सोमममृता अभूम इत्यादिदर्शनात्कर्मभिरेव मुक्तिः किं न स्यादित्यत्राह—**तदिति**। केवलधर्माणां क्षयिफलत्वनिश्चया-त्तत्रामृतत्वादिवचनमन्यपरम्। विद्याङ्गेषु तु मुक्तिसाधनत्वश्रुतिः स्तुत्यर्था। अतः *तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति इत्यादिभिरभिप्रेतं संनिपत्योपकारकत्वमिह युक्तमिति भावः। फलशब्दोऽत्र स्वर्गादिविषयः। फलसङ्गकर्तृत्वाभिमानत्यागे हि स्वरूपानुरूपफलसाधनाङ्गत्वमित्यभिप्रायेणोपाधिरहितत्वोक्तिः। उत्तरेणादिशब्देन गुणनिमित्तादिसंग्रहः। ननु वेदनध्यानोपासनादिशब्दैर्मुक्त्युपायोक्तौ यथार्हं विकल्पः स्यादित्यत्राह—**ज्ञानेति**। समफलविषयेति एकत्र विश्रमौचित्यप्रदर्शनम्। संभवति गत्यन्तरेऽष्टदोषविकल्पो न न्याय्यः। न चैकस्मिन्नधिकारिणि गुरुलघुविधिः स्यात्। नापि ज्योतिष्टोमाग्निहोत्रादिवदिह फलतारतम्यसंभव इति भावः। प्रतिष्ठा तत्तत्सामान्याकारैः प्रतिपाद्येत्यर्थः।

ननु—*यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥
इति **कठवल्ली**वाक्याद्भक्तेर्ज्ञानहेतुताऽवगम्यते। गीयते च *भक्त्या मामभिजानाति इत्यादि। संजयश्चाह *शुद्धभावं गतो भक्त्या शास्त्राद्वेद्मि जनार्दनम् इति। अतो भक्तिसाध्यज्ञानविशेषान्मुक्तिः स्यादित्यत्राह—**सामान्येति**। अयं भावः—भक्तेर्ज्ञानसाधनत्वश्रुतिः पर्वभेदेनानेकफलतया स्यात्। अत एव हि *भक्त्या त्वनन्यया शक्यः इत्यादिना ज्ञानदर्शनप्राप्तिसाधनत्वोक्तिः। *भक्त्या लभ्यस्त्वनन्यया इति च नियम्यते। भक्तिसाध्यं प्रापकज्ञानमपि भक्तिलक्षणोपेतम्। अतो वेदनादिसामान्यशब्दानामिह पश्वादिन्यायात् संनिहितविशेषपर्यवसानं सिद्धम् ॥ २९ ॥

ध्यानाद्युक्त्या ध्रुवानुस्मृतिरिह विहिता ग्रन्थिमोक्षाय सैव
स्पष्टा दृष्टिस्तथैव श्रुतफलविषया सेवनत्वादुपास्तिः।
क्वाऽप्यैक्यं विद्युपास्त्योर्व्यतिकरितगिरा भक्तिमेवाह गीता
सर्वं तद्वित्तिमात्रे फलवति विफलं तेन सैवं विशिष्टा ॥ ३० ॥

ये तु मन्यन्ते *तमेवं विद्वान्, *ब्रह्मविदाप्नोति परम् इत्यादिषु यथाश्रुति वित्तिमात्रस्य मुक्तिसाधनत्वविधिः कल्प्यः; सङ्कोचकृतश्च शास्त्रार्थः; अतो न विशेषपर्यवसानं युक्तमिति। तान्प्रति सफलत्वाद्युक्त्या सूचितं व्यनक्ति—**ध्यानादीति** ॥ अत्र हि मुक्तिसाधनवित्तेः प्रत्ययावृत्तिरूपचिन्तावाचिध्यानशब्दशक्त्याऽनावृत्तिरूपत्वं निरस्तम्। न्यायस्तु न वचनविरोधे। आदिशब्देन ज्ञानवेदनादिशब्दसंग्रहः। ध्रुवानुस्मृतिशब्दस्तु चिन्ताया निरन्तरस्मृतिरूपत्वमाह। ग्रन्थिमोक्षायेति फलैक्यव्यञ्जनम्। तत्फलार्थे वाक्ये दृष्टिशब्दस्तु स्मृतिमेव वैशद्येन विशिनष्टि। ननु चाक्षुषज्ञानं प्रत्यक्षमात्रं वा ब्रूयादित्यत्राह—**तथैवेति**। विशदध्रुवानुस्मृतौ उपास्तिशब्दनिमित्तमाह—**सेवनत्वादिति**। *यस्त-

द्वेद इत्यादिषु केषुचिद्वाक्येषु एकस्मिन्नेव विषये वेदनोपासनशब्दयोर्व्यतिकरेणोपक्रमोपसंहारदर्शनाच्च वेदनमेवोपासनतया विशेष्यत इत्याह—**क्वापीति**। एतेषु क्वचिदपि वाक्ये भक्तिशब्दो न मोक्षोपायविषयः श्रूयत इत्यत्र * यमेवैष वृणुते तेन लभ्य इति श्रुत्यभिप्रेतं गीयत इत्याह—**भक्तिमेवेति**। फलितमनिष्टप्रसङ्गमाह—**सर्वं तदिति**। निगमयति—**तेनेति**। सा मुक्तिसाधनतयोक्ता हि वित्तिः भक्तिरूपत्वपर्यन्तविशेषणविशिष्टेत्यर्थः ॥ ३० ॥ **इति भक्तिस्वरूपमोक्षोपायत्वे ॥**

विद्याः पञ्चाग्निवैश्वानरदहरमधुन्याससत्पूर्वसंज्ञाः
नाना शब्दादिभेदात्तुलितफलतया तद्विकल्पश्च शिष्टः ।
कर्मज्ञानाख्ययोगौ त्विह परभजनाधिक्रियार्थौ स्वदृष्ट्या
धर्मैर्वर्णाश्रमाणां त्रयमिदमवदन् सेतिकर्तव्यताकम् ॥ ३१ ॥

यदि भक्तिरेका मुक्त्युपायः, कथं परविद्याभेदक्लृप्तिरित्यत्राह—**विद्या** इति ॥ नाना—मिथो भिन्ना इत्यर्थः। शब्दादिभेदात्—द्वैतीयाद्भेदकवर्गात्। किमेतासां ज्योतिष्टोमाग्निहोत्रादिवत्फलभूयस्त्वार्थमेकस्मिन्नधिकारिणि संभव इत्यत्राह—**तुलितेति**। परिच्छिन्नेषु स्वर्गादिफलेषु तारतम्यवत्सु तद्भूयस्त्वापेक्षयोपायसमुच्चयसंभवः। इह तु न तथा, अविशिष्टफलत्वात्। स्वात्मप्राप्तौ सालोक्यादिमात्रे च मुक्तिशब्दो भाक्तः। मुक्तितारतम्यं वदद्भिस्तु मुक्तिरेव शिक्षणीया। सर्वकर्मनिवृत्तौ स्वतःप्राप्तब्रह्मानुभवतारतम्यायोगात्, कतिपयकर्मनिवृत्तेः स्वर्गादावपि समत्वात्। शिष्टः—* विकल्पोऽविशिष्टफलत्वात् इति सूत्रे। ननु कर्मज्ञानयोगयोरपि मुक्तिसाधनत्वं शिष्यते; गरिष्ठस्य च भक्तियोगस्य। अतो मुक्तितारतम्यं युज्यत इत्यत्राह—**कर्मेति**। स्वदृष्ट्या—स्वात्मावलोकनद्वारेणेत्यर्थः। तदुक्तमात्मसिद्धौ * उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्यः इति। यदि कर्मयोगोऽधिकारार्थः, तर्हि लब्धाधिकारस्य कर्मनैरपेक्ष्यं स्यादित्यत्राह—**धर्मैरिति**। अयं भावः—कर्मयोगो नाम नियमयुक्तः कर्मविशेषः। तन्निवृत्तिदशायामपि न वर्णाश्रमधर्मनिवृत्तिः। कर्मनिषेधोऽप्यन्यविषयः। अतस्त्रयोऽपि योगा वर्णाश्रमधर्माङ्गका इति। तथा च संगृहीतम्—* त्रयाणामपि योगानां मात्रयाऽन्योन्यसङ्गमः। नित्यनैमित्तिकानां च पराराधनरूपिणाम् ॥ इति ॥ ३१ ॥ **इति विद्याभेदतद्विकल्पादिः ॥**

विश्वान्तर्यामि तत्त्वं स्वयमिह चिदचिद्विग्रहैर्वा विशिष्टं
यस्यामालम्बनं सा भवभयशमनी वीतरागस्य विद्या ।
यस्तूपास्ते यथोक्तं तदितरदखिलं ब्रह्मदृष्ट्या स्वतो वा
नैतस्य ब्रह्मनाड्योद्गतिरपि न पदव्यर्चिरादिर्न मोक्षः ॥ ३२ ॥

ननु मुमुक्षुमधिकृत्योपनिषदामुत्थानम्; अतस्तत्रत्यानां सर्वासां विद्यानां विकल्पः स्यादित्यत्र मुक्तिसाधिकास्तदन्याश्च विषयतोऽधिकारतश्च विभजते—**विश्वेति** ॥ स्वयं—स्वरूपनिरूपकैर्निरूपितस्वरूपविशेषकैश्च धर्मैर्विशिष्टम्; स्वासाधारणदिव्यविग्रहैर्वा, चिदचिद्विग्रहैः—इन्द्रप्राणादिचिदचिद्रूपैः शरीरैः। वीतरागस्येति विशेषणात् परभजनमपि रागिणः परिमितफलसाधनमिति सूच्यते। संजगृहे च * भक्तियोगस्तदर्थी चेत्समग्रैश्वर्यसाधनम् इति। यथोक्तं—चिदचिद्रूपेण विभक्तम्; यद्वा तत्तद्विद्याविहितप्रकारेणेत्यर्थः। स्वतः—ब्रह्मपर्यन्ततां ब्रह्मदृष्टिं च विहाय। **नैतस्येत्यादि**। नाडीभेदो हि * तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्तीति विभज्यते। स्मर्यते च * ऊर्ध्व-

मेकः स्थितस्तेषाम् इत्यादिना । अर्चिरादिगतिश्च ब्रह्मविद एवाधिकृत्य तत्रतत्र श्रूयते । तथा च सूत्रम् * अप्रतीकालम्बनान्नयति इत्यादि । मोक्षश्च * तमेव विदित्वाऽतिमृत्युमेति इत्यवधारितः ॥ ३२ ॥ **इति त्रिवर्गापवर्गार्थविद्याविभागः ॥**

स्वान्तध्वान्तप्रसूतं दुरितमपनुदन् योगिनस्सत्त्वशुद्ध्यै
सर्वो वर्णादिधर्मश्शमदममुखवत्सन्निपत्योपकारी ।
विद्यां चेत्यादिवाक्येऽप्यनुकथितमिदं नैकवाक्यानुरोधात्
कर्मापेक्षाभिसन्धिं क्वचन विवृणुते तत्समुचित्यवादः ॥ ३३ ॥

अथ कर्मणां * सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् इति सूत्रसिद्धं विद्यार्थत्वं द्वारप्रदर्शनेन प्रापयन् समुच्चयवादं च निरस्यति—**स्वान्तेति** ॥ ध्वान्तशब्द इह तमोगुणे भाक्तः । सत्त्वस्य शुद्धिः गुणान्तरसंभेदाभावः, शमदमादीनां चित्तैकाग्र्यहेतुत्वस्य दुरपह्नवत्वात्तन्निदर्शनम् । सन्निपत्योपकारी—करणशरीरनिष्पादक इत्यर्थः । वाद्यन्तरयोजनाव्यावृत्त्यै श्रुत्यन्तरस्याप्युक्तार्थपरत्वमाह—**विद्यां चेति** । * अविद्यया मृत्युं तीर्त्वा इति सत्कर्मणा विद्योत्पत्तिविरोधिकर्मतरणं विवक्षितम्; * धर्मेण पापमपनुदति, * कषायपक्तिः कर्माणि इत्याद्यनेकवाक्यानुरोधात् । मृत्युं प्राप्य स्थित इति तु क्लिष्टगतिः, मृत्युतरणममृतप्राप्तिरिति साध्यद्वित्वाभावात् । अत्र साधनद्वित्वादिश्चायुक्तः । * ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्यया इत्युपबृंहणेन चैतत्सर्वं व्यक्तम् । * हतं ज्ञानं क्रियाहीनं हता चाज्ञानिनां क्रिया इत्यादिषु द्वयोस्समुचितवद्वादः कुदृष्टिमतनिवृत्त्यै कर्मसापेक्षत्वाभिसन्धिं व्यनक्ति । निषिद्धकाम्यत्यागेन नित्यनैमित्तिकग्रहः । अधिकाराङ्गताज्ञासुयथार्हमवतिष्ठते ॥ ३३ ॥ **इति कर्मणां विद्योपकारकत्वप्रकारः ॥**

संस्कारः कर्मकर्तुर्न भवति विहितं मुक्तये ज्ञानमन्य-
न्नाप्येतत्कर्मणोऽङ्गं न च सकृदसकृत्त्वाप्रयाणानुवृत्तम् ।
अङ्गं तस्यासनाद्यं प्रणिधिसमुचितौ देशकालप्रभेदा-
वित्याद्यं साङ्ख्ययोगप्रकरणविततं सूत्रभाष्यादिषूक्तम् ॥ ३४ ॥

एवं केचिदूचुः—कर्मानुष्ठाता जीवः स्वाध्यायसाध्येन स्वविषयज्ञानेन संस्क्रियते ; त एव ज्ञानज्ञेये वेदान्तेषु प्रशस्येते इति ; तन्निरस्यति—**संस्कार** इति । विहितं मुक्तयेऽन्यदिति हेतुत्रयपरम् ; नहि वाक्यजन्यं ज्ञानं विधीयते ; तस्य विधानमन्तरेण रागप्राप्तविचारसिद्धत्वात् । न च वाक्यजन्यज्ञानान्मोक्षः, निरसिष्यमाणत्वात् । अन्यदेव हि वाक्यार्थज्ञानाद्विहितमुपासनाद्यात्मकं ज्ञानम्; जीवातिरिक्तविषयतया चान्यत्वं भाव्यमिति । तथाऽपि * तत्प्राप्तिहेतुर्ज्ञानं च कर्म च इति सहपाठाविशेषे कर्म चेत् ज्ञानाङ्गं विपरीतं किं न स्यादित्यत्राह—**नापीति** । न हि सहोक्तिमात्रात्तादर्थ्यं शिष्मः ; किं तु अनन्यथासिद्धैर्विनियोजकैरिति भावः । कर्तृसंस्कारत्वविरोधव्यक्त्यर्थमन्यविध्यर्थं च पूर्वोक्तमेवाह—**न च सकृदिति** । असकृदावृत्तमपि ज्ञानमेकदिनेऽशक्यमित्यत्राह—**असकृदिति** । * प्रायणान्तमोङ्कारमभिध्यायीत, * स खल्वेवं वर्तयन् यावदायुषम् इत्यादिश्रुतिसिद्धमाप्रयाणत्वम् । सदा चिन्तनविधानाद्गमनादावपि स्यादित्यत्राह—**अङ्गमिति** । निरन्तरस्मृतिरासीनस्यैव स्यात्, गमनादौ तु तद्विधिस्सान्तरविषयः । आदिशब्देन समकायशिरोग्रीवत्वादिसंग्रहः । प्रणिधिः—चित्तैकाग्र्यम् । आद्यशब्देन प्रशान्तात्मकत्वविगतभीतित्वादि गृह्यते । सूत्राण्यत्र * आवृत्तिरसकृदुपदेशादित्यादीनि ॥ इति **विद्यायाः कर्मकर्तृसंस्कारत्वभङ्गः ॥**

ब्रह्मण्यैकान्त्यभाजां मुहुरनुकथितो मोक्षधर्मेऽपवर्ग-
स्तस्मान्नानाऽमरेज्या न भवति परभक्त्यङ्गमित्यप्ययुक्तम् ।
ऐन्द्रीप्रातर्दनादिप्रथितनयविदामन्तरात्मैकलक्ष्ये-
ष्वग्नीन्द्रादिप्रयोगेष्वखिलमपि विभुः कर्म भुङ्क्ते स एकः ॥ ३५ ॥

वर्णाश्रमधर्माणामङ्गित्वाभिमतविद्याविरुद्धत्वमाशङ्क्य परिहरति—**ब्रह्मणी**ति ॥ ऐकान्त्यभाजाम्—अनन्यदेवताकाना-मित्यर्थः । * तेषामेकान्तिनः श्रेष्ठास्ते चैवानन्यदेवताः इति स्थापनात् । तत्रैव च *प्रतिबुद्धस्तु मोक्षभाक् इति निय-म्यते । * ब्रह्माणम् इत्यारभ्य, * प्रतिबुद्धा न सेवन्ते इत्यन्तेन चैतत्सिद्धम् । यागादयस्त्वग्नीन्द्रादिनानादेवताकाः । अङ्गाङ्गिविरोधे च न्याय्योऽङ्गत्याग इति, एतदपि न युक्तम्, कुत इत्यत्राग्न्यादिशब्दानां ब्रह्मणि वृत्तिद्वयेन विरोधं परि-हरति—**ऐन्द्रीति** । यथा *ऐन्द्या गार्हपत्यमुपतिष्ठते इति विनियोगादिन्द्रशब्दः कयाचिद्वृत्त्या गार्हपत्यार्थः । एवं *स्व-कर्मणा तमभ्यर्च्य इत्यादिभिस्तत्तद्देवताशब्दानां क्वचिदवयवशक्त्या ब्रह्मणि वृत्तिः, क्वचित्तु प्रतर्दनविद्योक्तन्यायेन प्रसिद्ध-चिदचिल्लिङ्गानन्यथासिद्धौ तत्तद्विशिष्टविश्रान्तिरिति अग्न्यादिशब्दानामन्तरात्मविषयतया प्रतिबुद्धैः प्रयोगादेक एव सर्व-कर्मसमाराध्यः । ऐकान्त्यं च तेषामक्षतम् । अव्यवहितार्चने लभ्ये किं व्यवहितेनेति चेन्न—अधिकारव्यवस्थितेरक्षोभ्य-त्वादिति ॥ ३५ ॥ **इति वर्णाश्रमधर्माणामैकान्त्यविरोधपरिहारः ॥**

त्यागत्रैविध्यमुक्त्वा स्वमतमिह जगौ सात्त्विकं त्यागमीश-
स्तस्माद्वर्णाश्रमादित्यजनमपदशां तामसं मोहमूलम् ।
योगारूढस्य कर्मच्यवनमपि तदा सह्यमङ्गयर्थवाक्यै-
र्योगं त्वत्याश्रमिभ्यः परममिति वचो वक्ति मोक्षाश्रमेण ॥ ३६ ॥

परेष्टभङ्गाय त्यागविशेषं निष्कर्षति—**त्यागत्रैविध्य**मिति ॥ स्वमतम्—*एतान्यपि च कर्माणि इति श्लोकोक्तम् । *कार्यमेव इति श्लोकोऽपि तदर्थः । तत्फलितमाह—**तस्मा**दिति । *मोहात्तस्य परित्यागस्तामस इत्यस्यार्थोऽपदशामित्या-दिना दर्शितः । ननु योगदशायां कालादिकमजानतः कर्तव्यलोपः स्यादेव, अतः कर्मत्यागोऽत्र न तामस इति; तत्राह—**योगारूढस्ये**ति । योगदशायां बहिरप्रवृत्तमनसो न धीपूर्वकर्मत्यागः । अबुद्धिपूर्वकं तूत्थानकालेऽपि न लिम्पतीति नियमितम्, किमुत समाधौ । अङ्गयर्थवाक्यैः—कर्मणां समाधिरूपाङ्गिशेषत्ववाक्यैरित्यर्थः । ततश्चाङ्गप्रधानविरोधो-ऽङ्गिनाऽङ्गोपमर्दो न दोषाय । * अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच इत्यत्रातिशयिताश्रमियोगो विवक्षित इत्यत्राह—**योगं त्वि**ति । अन्यथा मत्वर्थीयवैयर्थ्यादिति भावः ॥ ३६ ॥ **इति वर्णाश्रमादिधर्मस्वरूपत्यागभङ्गः ॥**

तुर्यो निष्कृष्य मोक्षाश्रम इति कथितस्तेन नान्येषु विद्या
शान्त्यादिव्याहतेश्चेत्यसदिह गुणिनां सर्वतो मुक्त्यधीतेः ।
यावज्जीवं द्वितीयाश्रमवति पुनरावृत्त्यभावोऽप्यधीतः
स्मृत्याद्यैश्चैवमुक्तं भवति तु चरमे योग्यताधिक्यमात्रम् ॥ ३७ ॥

प्रव्राजिनामेव मुक्तिस्तत्साधनी विद्या चेति पक्षमनूद्य प्रतिक्षिपति—**तुर्य** इति ॥ विशेषविधौ परिसङ्ख्यया शेष-

निषेधः सिध्येदिति भावः । अतस्तदन्येषु त्रिषु तत्साधनी विद्या नेत्याह—तेनेति । अधिकारिविरोधादप्याह- शान्त्यादीति । प्रवृत्तिरूपा वेदानुवचनयज्ञादयः, शमादयस्तु निवृत्तिरूपाः, ते कथमेकत्र स्युरिति भावः । अत्र बाधकमाह—गुणिनामिति । * दया सर्वभूतेषु क्षान्तिरित्याद्युक्तगुणवतामित्यर्थः । * त्रयो धर्मस्कन्धाः इत्यत्र चह्वाश्रमप्रस्तावे * ब्रह्मसंस्थोऽमृतत्वमेति इत्युच्यते । संभवति चाधीतवेदेषु सर्वेषु ब्रह्मनिष्ठा ; सा च गृहस्थानामेवोषस्तियाज्ञवल्क्य-प्रभृतीनामुपनिषत्सु प्राचुर्येण दृश्यते । न च प्रवृत्तिनिवृत्त्योर्विरोधः, भिन्नविषयत्वात्, नित्यनैमित्तिकेषु प्रवृत्तिः निषिद्धकाम्यनिरर्थकेषु निवृत्तिरिति । अन्यथा प्रव्राजिनां स्वाश्रमधर्मेणापि विरोधः स्यात् । अपि च छान्दोग्यान्ते * कुटुम्बे शुचौ देशे इत्यादिना गृहस्थं प्रक्रम्य, * स खल्वेवं वर्तयन्यावदायुषं ब्रह्मलोकमभिसंपद्यत इत्युक्त्वा * नच पुनरावर्तते इति चोक्तम् । तदाह—यावज्जीवमिति । अत्रोपबृंहणभूयस्त्वमाह—स्मृत्याद्यैरिति । * गृहस्थोऽपि हि मुच्यते इति स्मर्यते । जनकदिलीपादयश्च गृहस्था एव मुक्ता इतीतिहासादिषूक्ताः । अत एव न सोपानवत्क्रम-निर्बन्धः । कस्यचिन्मोक्षाश्रमत्वोक्तिः किंनिमित्तेत्यत्राह—भवतीति ॥ ३७ ॥ **इति सर्वाश्रमिणां ब्रह्मविद्याधिकारः ॥**

यन्नित्यं तन्न कार्यं तदपि न तदिति स्थापिते कर्मभेदे-
ऽप्येकं विद्याश्रमाङ्गं भवति हि विनियुक्त्यन्तरेणोपपत्तेः ।
तत्रानुष्ठानतन्त्रं विदुषि तु घटते कर्तृकालाद्यभेदात्
प्राजापत्यादिलोकार्थिनि च तदितरोऽनर्थरोदाय तद्वान् ॥ ३८ ॥

कथं नित्यकर्मणां विद्याङ्गत्वम् ? नित्यत्वे ह्यकरणे दोषः, काम्याङ्गत्वेऽसौ न स्यात् । अतो नित्यकाम्ययोर-भेदायोगात्प्रकृतं विरुद्धमित्येतदनूद्य परिहरति—यन्नित्यमिति ॥ हिशब्दः संभवप्रसिद्धिपरः । **श्लो.** ज्योतिष्टोमाग्नि-होत्रादौ विनियोगपृथक्त्वतः । नित्यकाम्यस्वरूपत्वं दृष्टं तद्वदिहास्तु नः ॥ विध्यैक्येऽपि क्वचिद्दृष्टा काम्यनैमित्तिकात्मता । विधिभेदे तु किं न स्यादत्र कैमुतिकी गतिः ॥ एवं त्रिरूपत्वमपि क्वचित् ग्राह्यम् । तर्हि विद्यार्थमाश्रमार्थं च द्विरनुष्ठानं प्रसज्यत इत्यत्राह—तत्रेति । तन्त्रम्—उभयार्थं सकृत्करणम्, तच्चैकादशे स्थापितम् । नित्यस्य विद्यानङ्गतया-ऽपि काम्यत्वे तन्त्रमुदाहरति—प्राजापत्यादीति । उक्तव्यतिरिक्तेषु निष्फलतया नित्यकर्मनिवृत्तिप्रसङ्ग इत्यत्राह—तदितर इति ॥ ३८ ॥ **इति नित्यकर्मणां विद्याङ्गत्वाश्रमाङ्गत्वादि ॥**

मन्दस्यापि प्रवृत्तिः किमपि फलमनुद्दिश्य कस्यापि न स्यात्
नित्येऽनर्थोपरोधप्रभृति फलमतः काम्यतैवेति चेन्न ।
नित्येष्टोऽनर्थरोधस्तदितरदतथा किंच शिष्टो विधीना-
माज्ञानुज्ञाविभागस्सुगम इह निरुक्त्यैव नैमित्तिकांशः ॥ ३९ ॥

सर्वचेतनप्रवृत्तीनां यत्किंचित्प्रयोजनान्वयान्नित्यादिविभागो न स्यादित्याशङ्क्य परिहरति—मन्दस्येति ॥ प्रभृति-शब्देन * पापेभ्यो रक्षन्ताम् इत्यादिप्राप्तदुरितक्षयसंग्रहः । अतः—कर्त्रभीष्टफलवत्त्वादित्यर्थः । काम्यतैव, नित्यनैमित्तिकयोरिति शेषः । सफलत्वाविशेषेऽपि नित्ये तावत्फलविशेषापेक्षया विभागाभिप्रायमाह—नित्येष्ट इति । अनर्थ-परिहारस्य सर्वेषां सर्वदाऽभीष्टत्वात्तदर्थे कर्मणि अकरणानर्हतया नित्यत्वेन विभागः । तदितरत्—सुखम् । अतथा—सर्वदाऽभीष्टं न भवति ; सुखरहितायास्सुषुप्तेराकाङ्क्षणात् । अतस्सुखार्थे काम्यतोक्तिः । उक्तमेव विभागं मुखभेदेन

द्रढयति—**किं चे**ति । राजादिनयादीश्वराज्ञानुज्ञारूपविधिभेदाद्विधेयविभागस्सिद्ध इत्यर्थः । ननु द्विविधं नैमित्तिकम् ; तत्र प्रायश्चित्तमुपात्तानर्थहेतुनिरासार्थम् ; अन्यदप्यकरणनिमित्तानर्थपरिहाराय ; अतस्तयोरपि नित्यराशिप्रवेशप्रसङ्ग इत्यत्राह—**सुगम** इति ॥ ३९ ॥ **इति नित्यकाम्यादिविभागः** ॥

कर्तव्यं यन्निमित्ते सति तदुभयधा पापशान्त्यर्थमेकं
तत्स्यात्काम्येन तुल्यं परमकरणतो दोषकृन्नित्यतुल्यम् ।
सत्यां कामश्रुतौ संवलितमपि भवेत्तद्बलादेतदेव
त्यागे च प्रत्यवायस्त्वनधिकृतिमुखस्तत्रतत्रावसेयः ॥ ४० ॥

काऽत्र निरुक्तिः कीदृशश्च नैमित्तिकांश इत्यत्राह—**कर्तव्य**मिति ॥ एकं—प्रायश्चित्तरूपम्, तस्याकरणनिमित्तप्रत्यवायाभावात्काम्यतुल्यत्वम् । परं—केवलनैमित्तिकम्, तस्याकरणे दोषान्नित्यतुल्यत्वम् । जातेष्टैनैमित्तिकत्वेऽपि पुत्रगतपूतत्वादिसाधनतया संवलिताधिकारत्वमुक्तम् । तदाह—**सत्या**मिति । नित्ये केवलनैमित्तिके चाकरणे दोषोऽधिकारभ्रंशादिरूपस्तत्तत्प्रकरणेषु ग्राह्य इत्याह—**त्यागे चे**ति ॥ ४० ॥ **इति नैमित्तिकावान्तरविभागः** ॥

निष्कामं चेन्निवृत्तं तदिह न घटते मुक्तिकामाधिकारात्
स्वप्रीतिस्पर्शहीना न च भवति परप्रीतिरिष्टेति चेन्न ।
युक्ता यस्मान्निवृत्तिर्बहुभयशबलात्तन्निवृत्तं निवृत्तं
सूते यत्र प्रवृत्तिस्त्वभिमतमहितं तत्प्रवृत्तं प्रवृत्तम् ॥ ४१ ॥

यस्तु मन्वादिभिरुक्तो विभागः—इह वाऽमुत्र वा काम्यं प्रवृत्तम्, निष्कामस्य ज्ञानपूर्वं तु निवृत्तमिति, स कथं घटते ? सर्वेषामपि धर्माणां यत्किंचित्फलकाममधिकृत्यैव विधेः । यद्यपि निराशीःकर्मकारिणां परमात्मप्रीतिरेवोद्देश्या, तथाऽपि तत्कामत्वं सिद्धम् । परप्रीतेरुद्देश्यत्वं च तस्याः स्वप्रीतिपर्यन्तत्वमभिसन्धातृणामेव । अतस्तेषामपि स्वप्रीतिकामत्वं दुस्त्यजमित्याक्षेपमनूद्य प्रत्याचष्टे—**निष्काम**मिति ॥ नात्र निष्कामशब्दः इच्छामात्रनिवृत्त्यर्थ इति निषेधाभिप्रायः । कुतस्तर्हि विभाग इत्यत्राह—**युक्ते**ति । अनर्थाविनाभूतसुखकामनातो निवृत्तं कर्म निष्कामं निवृत्तमिति चाहुः, अनेवंविधं तु काम्यं प्रवृत्तमिति च इति भावः ॥ ४१ ॥ **इति प्रवृत्तिनिवृत्तिविभागः** ॥

पुंभिः सिद्धाधिकारैः ऋतव इव निराकाङ्क्षभावं भजन्त्यः
प्रोक्तास्त्रैवर्णिकार्हाश्श्रुतिनयवशतो यद्यपि ब्रह्मविद्याः ।
अस्तेयाद्यैः प्रपत्त्या परिचरणमुखैरप्यधीतैः स्वजातैः
सर्वेऽपि प्रापुयुस्तां परगतिमिति तु ब्राह्मगीतादिसिद्धम् ॥ ४२ ॥

यदि यज्ञादिभिरेव विद्योपकारः, तर्ह्याश्रमान्तराणां सा न स्यात् । अथ यथार्हं स्ववर्णादिधर्मैः, तदा शूद्रस्यापि स्यात् ; ततश्च काण्डद्वयोक्तापशूद्रनयविरोधः ; तत एवानधिकारे * मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः । स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् ॥ इति शरण्योक्तिविरोध इत्यत्राह—**पुंभि**रिति ॥ सिद्धाधिकारैः—अधीतवेदतयाऽनुष्ठानोपयुक्तज्ञानवद्भिरपेक्षितमन्त्रविद्भिश्चेत्यर्थः । श्रुतिनयवशतः—अध्ययनविधिसिद्धन्यायसामर्थ्यात् ।

तथा हि—अग्निविद्यासापेक्षाः क्रतुविधयो यथार्थानवेदैरग्न्याधानार्हैर्निराकाङ्क्षाः स्वसिद्धये नान्येष्वन्यतोऽधिकारं प्रयुञ्जते। एवं विद्याविधयोऽपि *शुगस्य इत्यधिकरणे यद्यपि प्रोक्ताः, तथाऽपि *शरणं त्वां प्रपन्ना ये ध्यानयोगविवर्जिताः। तेऽपि मृत्युमतिक्रम्य यान्ति तद्वैष्णवं पदम् ॥ इति ब्राह्मवचनात्। *स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः इति चातुर्वर्ण्यविषयभगवदुक्त्या च शूद्रस्यापि शास्त्रसिद्धैः फलसङ्गत्यागवद्भिर्निवृत्तिधर्मैर्योगो न विरुद्धः। स च मुक्तिपर्यन्त एव स्यादिति भावः ॥ ४२ ॥ इति **त्रैवर्णिकाधिकारसर्वाधिकारविभागः** ॥

ध्यानादृष्टेन साक्षात्कृतिरुपजनिता बाधते चेत्प्रपञ्चं
तत्तुल्यार्थैव शाब्दी प्रमितिरपि न किं बाधते पूर्वमेव।
ज्वालैक्यादौ परोक्षादपि हि निजगदुर्बाधमध्यक्षबुद्धे-
र्नाप्यत्रादृष्टरूपामहितविमथनीं शक्तिमङ्गीकरोषि ॥ ४३ ॥

अद्वैतिनः केचिदाहुः—*तत्त्वमस्याद्युपदेशलब्धब्रह्मात्मभावावबोधस्य तदेकध्यानसाध्यादृष्टजन्यसाक्षात्कारेण विश्वभ्रमबाध इति; तदनूद्य दूषयति—**ध्याने**ति ॥ अयं भावः—ध्यानजनकं वाक्यजन्यं ज्ञानं ध्यानादृष्टजन्यं च समानविषयं न वा? आद्ये किमन्येन, वाक्यजन्यज्ञानादेव मुक्तिस्स्यात्? उत्तरत्र ब्रह्मणि सविशेषत्वं स्यात्, वेद्याकारवैषम्यात्। आकारभेदः कल्पित इति चेन्न; तयोर्भ्रान्तित्वप्रसङ्गात्, *तत्त्वज्ञानान्मोक्ष इति चाङ्गीकारात्, अन्यथा त्रय्यन्तवैयर्थ्यात्। अस्तु प्रागेव बाधः, बाधितानुवृत्तिपरिहाराय तु साक्षात्कार इति चेन्न; साक्षात्क्रियमाणेऽपि तत्त्वे दोषानुवृत्तौ बाधितानुवृत्तेर्लोके बहुलमुपलम्भात्। दोषनिवृत्तौ तु बाधितानुवृत्तेरेवाभावात्। सदेहानां च यावज्जीवं सा दुर्वारा। देहनिवृत्तौ चक्रभ्रमन्यायात्स्वयमेव निवर्त्स्यतीति किं तद्बाधकेन? ननु प्रत्यक्षभ्रमस्य परोक्षं कथं बाधकमित्यत्राह—**ज्वालैक्यादा**विति। अनुमातोऽप्यत्र ज्वालैक्यप्रत्यक्षं बाध्यते, देहात्मभ्रमश्चानुमानतश्शास्त्रतो वा, तथेहापि स्यात्; अन्यथा कथमद्वैतवाक्यार्थविस्रम्भपूर्वकध्यानादिसिद्धिः? ध्याननियोगजन्यज्ञानस्य गरुडादिदृष्टिन्यायादनिष्टनिवर्तकत्वमिति चेत्, तत्राह—**ना**पीति। विरुद्धविषयावगाहनशक्त्या बाधितस्य हि मिथ्यात्वसिद्धिः, विषहरणधीन्याये तु विषादिवदेव निवर्त्यसत्यत्वप्रसङ्गादिति भावः ॥ ४३ ॥ इति **ध्याननियोगवादभङ्गः** ॥

निर्दिष्टो निष्प्रपञ्चीकरणविधिरसौ गौडमीमांसकास्तै-
र्दृष्टो न क्वापि दुर्निर्वहमपि करणाद्यत्र साध्याविशेषात्।
मुक्तिर्नैयोगिकी चेज्जगदपि न मृषा नश्वरी सापि ते स्या-
द्ध्वंसात्मत्वेऽपि तस्या न च वदसि भिदां ब्रह्मणस्तच्च नित्यम् ॥ ४४ ॥

अन्ये तु वर्णयन्ति—नित्यशुद्धमप्यद्वितीयं ब्रह्म गगनमिव गन्धर्वनगरवत्तया सप्रपञ्चतया प्रतीयमानं निष्प्रपञ्चीकुर्यादिति विधिविषयानुष्ठानजनितनियोगविशेषेण विश्वाविद्यानिवृत्तिरिति; तान्प्रत्याचष्टे—**निर्दिष्ट** इति ॥ अनधीतमधीतविरुद्धं च कल्पयन्तीति व्यक्त्यै **गौडमीमांसकास्त्वो**क्तिः। क्वापि—श्रुतिषु स्मृतिषु चेत्यर्थः। न क्वापि दृष्ट इत्युक्तं *न दृष्टेर्द्रष्टारं पश्येः इत्यादिदर्शनादिति चेत्, न ह्यत्र वाक्ये द्रष्ट्रादिप्रध्वंसं कुर्वीतेति विधीयते, किंतु जीवस्यौपाधिकं रूपं नानुसन्धत्स्वेति वा, करणायत्तज्ञानं जीवं परत्वेनापश्यन् स्वतस्सर्वज्ञं पश्येरिति वा, प्रकारान्तरेण वा नेतुं

शक्यत्वात्। निषेधश्रुतयश्चान्यपराः न च विधिप्रसङ्गवत्यः। दूषणान्तरमाह—**दुर्निग्रह**मिति। नियोगस्य हि करणेतिकर्तव्यतादि वक्तव्यम्। यदि प्रपञ्चध्वंसेन नियोगं भावयेदिति करणक्लृप्तिः, तदा नियोगसाध्यसाधनयोरविशेष इत्यन्योन्याश्रयः। अथ नियोगमजागलस्तनीकृत्य निष्प्रपञ्चभावनयैव निष्प्रपञ्चीकरणं, तदाऽऽत्माश्रयः। इतिकर्तव्यता च करणानुपपत्त्यैव निरस्ता। प्रयोक्ता चासौ द्रष्टा न स्वावसानाय नियोगकृत्यामुत्पादयेत्, तदा च *शास्त्रफलं प्रयोक्तरीति न स्यात्। अथ शुद्धस्य ब्रह्मणः फलम्। तन्न, तस्य भ्रमाध्यासशून्यत्वाङ्गीकारात्, तदर्थित्वाभावाच्छास्त्रार्थप्रयोक्तृत्वायोगाच्च। अस्मिन्पक्षेऽपसिद्धान्तापत्तिमाह—**मुक्ति**रिति। यस्मादृष्टसाध्यो नाशस्तस्य ज्ञानबाध्यत्वाभावात् प्रपञ्चमृषात्वं न स्यात्। नियोगसाध्यं च सर्वं कालानिकत्वादनित्यमिति मन्यसे, अतो मुक्तिरपि नश्वरीति बन्धोन्मज्जनप्रसङ्गः; अभावाभावस्य भावत्वात्। ध्वंसस्य च ध्वंसप्रवाहापत्तिः। न च ते तत्क्लृप्तौ हेतुरस्ति। ननु ध्वंसो ह्युत्तरावधिरहितः, प्रायश्चित्तनियोगात्पापध्वंसवत् मुक्तेरनश्वरत्वं स्यादित्यत्राह—**ध्वंसात्मत्वेऽपी**ति। ध्वंसरूपा मुक्तिर्ब्रह्मणोऽन्याऽनन्या वा? नाद्यः, कार्यस्य सर्वस्य घटतद्ध्वंसादेः स्वप्नप्रपञ्चतद्ध्वंसादेरिव बाध्यत्वाभ्युपगमात्। अबाधे च मुक्तावपि भेदसिद्धिप्रसङ्गात्। भावाद्वैतपक्षश्च न युक्तः, क्वचिन्निर्बाधितभेदसद्भावेऽन्यत्रापि तदविरोधात्। तत्र चोक्तानां बाधकानां त्वदिष्टेऽपि संचारयितुं शक्यत्वात्; न द्वितीयः, ध्वंसस्य साध्यत्वात् ब्रह्मणस्तु नित्यत्वात्, तयोस्तादात्म्यायोगात्; तदिदमभिप्रेत्याह—**तच्च नित्य**मिति ॥ ४४ ॥ इति **निष्प्रपञ्चीकरणनियोगवादभङ्गः** ॥

वाक्यार्थज्ञानमात्रादमृतमिति वदन्मुच्यते किं श्रुतेऽस्मिन्
बाढं चेन्मानबाधस्स यदनुभवति प्रागिवाद्यापि दुःखम्।
ध्यानादीनां विधानं भवति च वितथं तन्न युक्तं न चेष्टं
ध्यानाद्यङ्गाढ्यशब्दोदितचरममतेर्नाधिकं वः प्रकाश्यम् ॥ ४५ ॥

यस्त्वाह किं ध्याननियोगेन नियोगान्तरेण वा, तत्त्वावेदकवाक्यजन्यज्ञानादेव कल्पितबाधोपपत्तेः; दृष्टश्च दृढप्रतीतस्यापि वाक्यतो बाधः। ज्ञानमात्रादेव च मुक्तिश्श्रूयते, भवति च वाक्यादद्वैतधीः; अतस्सैव द्वैतनिवर्तिकेति, सोऽयमनुयोक्तव्यः—किं श्रवणजन्यज्ञानमात्रात्प्रतिष्ठापितान्मुक्तिः? उताद्वैतज्ञानजनितविकल्पवैमुख्यस्य तेनैव वाक्येन जनिताद्विशदज्ञानादिति। तत्राद्यं निरस्यति—**वाक्यार्थे**ति॥ बाधकज्ञाने सति बाधः कथं न स्यादिति शङ्कते—**बाढं चे**दिति। अत्र प्रमाणत्रयविरोधमाह—**मानबाध** इति। स्वात्मनि प्रत्यक्षेण स्वस्मिन् परत्रानुमानागमाभ्याम्। ब्रह्मविदोऽप्यमुक्ताश्चिरजीविनः श्रुतिस्मृतिसिद्धाः। बुद्धे क्षेमप्रापणं तच्छास्त्रैर्विप्रतिषिद्धम् *बुद्धे चेत् क्षेमप्रापणमिहैव न दुःखमुपलभेत इत्यापस्तम्बोक्तं प्रसङ्गमभिप्रेत्याह—**स** इति। प्रसङ्गान्तरमाह—**ध्यानादीना**मिति। बहुवचनम् उपासनात्मकत्वदर्शनरूपत्वादिविशेषणभेदात्। अत्र वेदोदितत्वान्न वैतथ्यं मोक्षार्थविद्यानां नान्यार्थत्वमित्यभिप्रायेणाह—**तन्न युक्त**मिति। अपसिद्धान्तत्वमप्याह—**न चेष्ट**मिति। ध्यानस्य भेदवासनानिरासार्थत्वं हि ब्रूथ। द्वितीयं दूषयति—**ध्याने**ति। अयं भावः—पश्चात्तनं वाक्यार्थज्ञानं पूर्वाविशिष्टविषयम्? अधिकविषयं वा? उभयत्र प्रागेव दूषणमुक्तमिति ॥ ४५ ॥ इति **वाक्यार्थज्ञानस्य मोक्षोपायत्वभङ्गः** ॥

उद्देश्यांशं त्वमाद्यं स्फुटमनुभवतां सम्यगध्यक्षवित्त्या
प्रत्यक्षत्वभ्रमोऽयं त्वमसि दशम इत्यादिवाक्यार्थबोधे।

शब्दात्प्रत्यक्षबोधे प्रसजति शिथिला तद्व्यवस्था ततोऽर्थे
साक्षात्कारं न शब्दो जनयति विमतस्सिद्धवच्छब्दभावात् ॥ ४६ ॥

प्रत्यक्षभ्रमस्य प्रत्यक्ष एव बाधक इति निर्बन्धो नेत्युक्तं, तत्सद्भावेऽपि शब्दः प्रत्यक्षरूपबाधकधीजनक इति न शक्यं कल्पयितुम्; अन्यथा क्वचिदनुमानेऽपि तत्क्लृप्तिः । न च कोद्रवबीजस्य स्वाभीष्टकलमाङ्कुरजनकत्वक्लृप्त्या तत्सिद्धिः । ननु दग्धवेत्रबीजस्य रम्भाङ्कुरारम्भकत्वं दृश्यते । यदि दृश्यते कस्तन्निषेधेत्? अथ नेदं निदर्शनं, वाक्येष्वपि दशमस्त्वमसि, संवित् स्वप्रकाशा इत्यादिषु प्रत्यक्षधीजनकत्वं दृष्टमिति चेत् कथमेतत्? दशमोऽहमस्मि, मम संवित् स्वप्रकाशा इति श्रोतुरपरोक्षा धीरिति चेन्न; सेयं वाक्यश्रवणानन्तरजन्या? तन्मूलस्वयंपरीक्षणजन्या वा? आद्ये धर्मिप्रत्यक्षत्वेऽपि दशमत्वविशिष्टवेषो न प्रत्यक्षः, अन्यथा धर्मवांस्त्वमसीति केनचिद्दैवज्ञेनोक्ते तादृशोऽहमिति बुद्धेरप्यापरोक्ष्यं स्यात्; धर्मस्यातीन्द्रियत्वान्न तथेति चेन्न; अयं पर्वतः परभागे वह्निमानित्याद्युपदेशे प्रसङ्गात् । स्वतोऽपरोक्षार्थविषयतयाऽत्र तादृशो विशेष इति चेन्न, नियामकाभावात् दशमत्वादिविशिष्टाकारेण स्वतोऽपरोक्षत्वासिद्धेश्च । तदिह वाक्यतो दशमत्वादिबोधे त्वमर्थस्य स्फुटप्रत्यक्षगृह्यमाणतया केषांचिद्दशमत्वादिविशिष्टाकारग्रहेऽपि प्रत्यक्षत्वभ्रान्तिमात्रमित्याह—**उद्देश्यांश**मिति ॥ एतेन विगीतं वाक्यं स्वार्थापरोक्षधीजनकं स्वतोऽपरोक्षार्थविषयत्वात् दशमस्त्वमसीत्यादिवाक्यवदित्यनुमानमपि निरस्तम्, दृष्टान्ताद्ययोगात् । ननु घटं पश्यतोऽयं घट इति वाक्यप्रयोगेऽपि प्रत्यक्षधीर्जायत इति चेन्न, युगपत्प्रमाणद्वयेन प्रमितिद्वयोत्पत्त्ययोगात्; संभूयैकप्रमाणीभावस्यातिप्रसङ्गित्वादनभ्युपगमाच्च । क्रमे तु प्रत्यक्षज्ञानसमनन्तरभाविनि शाब्दज्ञाने प्रत्यक्षशिरस्के माषराशिप्रविष्टमषीन्यायेन तज्जातीयताभ्रमः । दशमस्त्वमित्यादावपि कदाचिदेवमेव । प्रतिकूलतर्कमप्याह—**शब्दा**दिति । ज्ञातकरणानां हि परोक्षधीजनकत्वव्यवस्था शब्दप्रमाणस्याप्यन्यत्र व्याप्ताऽङ्गीकृता; तस्याः शैथिल्यं स्यात् । इष्टप्रसङ्गोऽयमिति चेन्न, तुल्यन्यायतयाऽन्यत्रापि तत्तन्नियतिविरुद्धकार्यानुमानप्रसङ्गस्यानिष्टत्वात् । विपक्षे बाधकाद्विशेष इति चेन्न, शब्दजन्यप्रत्यक्षाभावेऽपि विरोधप्रसङ्गाभावात् । *तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान्सनत्कुमारः इति उपदेशादपरोक्षधीः श्रूयत इति चेन्न, दृशेः प्रत्यक्षविशेषरूढत्वात् । अनुपपत्त्या साक्षात्कारसामान्यपरत्वं कल्प्यमिति चेत्, तर्हि विरुद्धक्लृप्तित्यागेन वैशद्यार्थत्वक्लृप्तिर्युक्ता । प्रतिप्रयोगमप्याह—**तत** इति । व्याप्तिबलादित्यर्थः । अर्थे—स्वप्रतिपाद्ये । एतेन स्वविषयसाक्षात्कारजनकतया बाधप्रसङ्गोऽपास्तः । अत्र तु विपक्षे बाधकः प्रदर्शित एवातिप्रसङ्गः । **श्लो.** प्रत्यक्षज्ञानहेतुत्वं यत्त्वयाऽत्र प्रसाध्यते । निषेध्यमिदमस्माकं न नस्तच्छोधनं भरः ॥ ४६ ॥ **इति शाब्दप्रत्यक्षभङ्गः ॥**

शिष्यो जीवस्त्वसिद्धः किमु तव यदि वा भ्रान्तिसिद्धो मितो वा
नासिद्धायोपदेशो भ्रमविषयमितो नोपदेशार्हताऽस्य ।
भेदेनैक्येन वाऽन्त्यः कथमुपदिशतु ज्ञातभेदोऽप्यभेदं
तादात्म्ये जागरूके सति किमुपदिशेत्स्वात्मने तद्विदे सः ॥ ४७ ॥

उपदेशो न प्रत्यक्षधीजनक इत्युक्तम्, स एव परस्य न घटत इति वक्तुं विकल्पयति—**शिष्य** इति ॥ त्वन्मते वक्तुः श्रोता किमप्रतीतः, प्रतीतो वा भ्रान्तिसिद्धः, प्रमितिसिद्धो वेति विकल्पः । अत्राद्यं निरस्यति—**नासिद्धाये**ति । अप्रतीत्य शिष्यं कस्मै उपदिशेत्? द्वितीयं दूषयति—**भ्रमे**ति । यदि शिष्यं भ्रान्तिसिद्धत्वेन न जानाति, स्वयमतत्त्व-

वित्कथं तत्त्वोपदेष्टा ? अथ तथा प्रमिणोति, तथाऽपि तस्मै कथमुपदिशेत् ? न ह्यसावुपदेशग्रहणार्हः, स्वयमपि नोपदेष्टृत्वार्हः । अस्येत्युभयार्थम् । एतेन प्रतिबिम्बवद्बाधितानुवृत्त्या प्रतीयमानेभ्य उपदेश इत्यपि निरस्तम् ; तद्वदेवोपदेशानर्हत्वात् । न चानुन्मत्तः प्रतिबिम्बाय प्रब्रूते । तृतीयं विकल्पयति—**भेदेने**ति । आद्ये विरोधमाह—**कथमि**ति । भेदप्रमितावभेदमुपदिशन् कुहकः स्यात् । द्वितीयेऽपि प्राग्वदसंभवमाह—**तादात्म्य** इति । अद्वैतप्रमितिदशायां स्वभ्रान्तिसिद्धशिष्यो हि बाधितः, स्वतादात्म्येन वा भातः ; तस्मै चेदुपदिशेत् स्वात्मानं प्रति नित्यमुपदिशेत् ; शिष्यस्य हि स्वतादात्म्यं पश्यन् तस्यापि तत्त्ववित्त्वं पश्यति ; तथा च तस्य किमुपदिशेदिति भावः ॥ ४७ ॥ **इत्यात्माद्वैतिन उपदेशानुपपत्तिः ॥**

> **नैवालं भ्रान्तिबाधे परमपि तदिदं तत्त्वमस्यादिवाक्यं**
> **भ्रान्तोक्तिर्यद्वदादौ श्रुतिकृतनिखिलभ्रान्तिमूलत्वबोधात् ।**
> **रज्जौ सर्पभ्रमे किं जनयति विदितभ्रान्तवाक्सर्पबाधं**
> **स्वप्नेऽहिः स्वप्नबुद्ध्या किमु गलति यदा तत्र च स्वाप्नताधीः ॥ ४८ ॥**

यदपि वर्ण्यते—अद्वैतवाक्यजन्यधीरेवाविद्यातत्कार्यकृत्स्नाध्यासबाधिका, प्रत्यक्षादेर्भेदवासनामूलतया भेदस्वरूपमात्रबोधकत्वात् ; *तत्त्वमस्यादीनां तु तत्त्वावेदकत्वात् । पूर्वा च भेदबुद्धिः परा त्वद्वैतबुद्धिः, अतः अपच्छेदनयात्पूर्वबाधः ; आहुश्च *पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यति इति । एवं तत्त्वज्ञानादज्ञानबाध एव मुक्तिरिति । तन्निरस्यति—**नैवे**ति ॥ **तदिद**मित्यविद्यामूलत्वाभिप्रायम् । न हि भवति पौर्वापर्यमात्राद्बाध्यबाधकभावः ; अतिप्रसङ्गात्, उपक्रमनये च वैपरीत्यात्, अद्वैतवाक्यानामपि माध्यमिकवाक्येन बाधप्रसङ्गात् । करणदोषतदभावाभ्यां विशेष इति चेन्न, प्रत्यक्षादिष्वपि तदभावात् । प्राचुर्येण दोषमूलत्वदर्शनादन्येष्वप्यनाश्वास इति चेन्न, वाक्येऽपि समत्वात्, अविद्याभेदवासनामूलत्वस्य चाविशेषात् । समानदोषेष्वपि भ्रमेषु परं बाधकं दृष्टमिति चेन्न ; तथात्ववेदने तदयोगात्तत्र सन्देह एव स्यात् । नित्ये वेदवाक्ये कारणदोष एव नेति चेन्न ; वक्तृदोषाभावेऽप्यविद्यादोषमूलत्वस्य त्वयैवोक्तेः । अत्र प्रसङ्गे दृष्टान्तमाह—**भ्रान्ते**ति । भ्रान्तोक्तेरबाधकत्वं भ्रान्तिमूलत्वेन ज्ञातत्वादिति चेन्न, अविशेषात् । तदाह—**आदावि**ति । प्रथममेव प्रयोजकशिक्षया ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति श्रवणात् । ततश्च प्रत्यक्षधीजननार्थः प्रयासः ; तज्जनने कुहकशक्तिजनितप्रत्यक्षबुद्धाविव विश्वासश्च न स्यात् । भ्रान्तिसिद्धवाक्यादपि पूर्वभ्रान्तिनिवृत्तिस्तत्फलनिवृत्तिश्च दृष्टेत्यत्र तदुभयमिह न संभवतीत्याह—**रज्जा**वित्यादिना पादद्वयेन । भ्रान्तोऽयमिति विदितेन नायं सर्प इत्युक्तेऽपि न विस्रम्भः ; स्वप्नसर्पभ्रमजनितं साध्वसं नायं सर्प इति स्वप्नभ्रमेण न शाम्यति यदा स्वप्नसर्पनिषेधेऽपि स्वाप्नबुद्धिर्जायेत, अतो न वाक्याद् भ्रमनिवृत्तिः ; तत्फलनिवृत्तिश्चात्र वक्तुं न शक्यत इति । **श्लो.** भ्रान्तिसिद्धं च धूमादिस्वरूपासिद्धिदोषतः । यदृच्छयाऽर्थसद्भावेऽप्यमानमनुमन्यसे ॥ ४८ ॥ **इति तत्त्वमस्यादेःप्रपञ्चबाधभङ्गः ॥**

> **छायादिर्न त्वसत्यस्सदवगतिकरस्तत्र हेतुर्हि तद्धी-**
> **स्साध्यज्ञप्त्यादिवत्सा स्वयमिह न मृषा नास्ति धीरित्यबाधात् ।**
> **सत्येनैव प्रसूता घट इव विमता शेमुषी कार्यभावा-**
> **द्धेतुत्वालीकभावौ कथमिव विहतावेकमेवाश्रयेताम् ॥ ४९ ॥**

ननु व्यावहारिकमर्यादातिक्रमालिङ्गविभ्रमे प्रामाण्यानादरः, इह तु न तथा; प्रागद्वैतबोधाच्छास्त्रे सत्यत्वाध्यवसायात्। असत्याच्च सत्यधीर्दृष्टा यथा दर्पणादिस्थया छायया मुखादेस्सिद्धिः, भूतलस्थया च गृध्रादेः। सन्ति चैव बहून्युदाहरणानि। असत्यादपि भयविस्मयादि सत्यं कार्यं दृश्यते। अतो मिथ्याभूतादपि * तत्त्वमस्यादिवाक्यात्तत्त्वप्रतीतिर्मुक्तिश्च युज्यत इति। तत्राह—**छायादि**रिति॥ न हि मिथ्याभूतं प्रतिबिम्बादि मुखादिधीजनकम्, दर्पणे मुखप्रतीतेर्दोषमूलत्वात्। परमार्थमुखप्रतीतेस्तु मुकुरविहितमिहिरकिरणन्यायेन प्रतिफलितनायनकिरणजन्यत्वात्। स्वरूपच्छायया गृध्राद्यनुमानेऽपि नासत्यात्सत्यधीः। छायास्वरूपस्य सादृश्यस्य च निर्बाधत्वात्। मिथ्याभूतस्य च छायागृध्रस्य कार्यकरत्वे शुक्तिरूप्यादेरपि रजतादिकार्यं किं न स्यात्? युष्मद्दृष्ट्या च विमृशामः—किं प्रतिबिम्बादिस्वरूपमेव सत्यधीहेतुः? उत तद्धीः? नाद्यः, प्रातिभासिकसतोऽर्थक्रियाहेतुत्वानभ्युपगमात्। न द्वितीयः, तद्बुद्धेस्सत्यत्वेन सत्यादेव सत्यसिद्धेः। तदिदमभिप्रेत्याह—**तत्रे**ति। एतेनासत्यात्सत्योत्पत्तिरपि निरस्ता। कस्तर्हि भयादिहेतुरिति? तत्राप्येतदेवोत्तरम्—**तत्रे**ति—यत्रासत्यात्सत्योत्पत्तिं वदसि तत्रेत्यर्थः। ननु यदि धीः स्वरूपमात्रेण कार्यविशेषहेतुस्स्यात् बुद्ध्यन्तरेऽपि तत्प्रसङ्गः, अविशेषात्। अथ विषयविशिष्टो हेतुस्तदा विषयस्यापि हेतुत्वं दुस्त्यजम्; तत्राह—**साध्ये**ति। यथा साध्यघटादिबुद्ध्या तन्निर्माणे बुद्धेरेव कारणत्वं न तद्विषयस्य, सिद्धत्वे साध्यत्वस्य असिद्धत्वे हेतुत्वस्यायोगात्, अन्यथाऽऽत्माश्रयोच्छेदप्रसङ्गात्, तद्वदिहापि विषयस्यासिद्धत्वान्न हेतुत्वम्। आदिशब्देनातीतज्ञप्तिः कामना च गृह्यते। नष्टधीरपि यथार्हं तत्तत्कारणम्, न तु नष्टम्; पूर्वत्वेऽप्यनन्तरपूर्वत्वाभावात्। स्वर्गादिकामनाऽपि तदुपायनिष्पत्तिहेतुः न तु काम्यम्, चक्रकापत्तेः। तद्वदिह भ्रान्तिसिद्धस्याहेतुत्वेऽपि तद्धियस्तदुत्पत्तिः। अथ स्यात् सविषया हि बुद्धिरघ्यस्यते; अतः कथं विषयस्य मिथ्यात्वे विषयिणस्सत्यत्वमिति? तदेतत्स्वाभीष्टं विश्वसाक्षिणं पृच्छ। अथ सोऽपि मिथ्याभूतः; तन्न, स्वतस्सिद्धौ तदयोगात्; अन्यथा तत्साक्ष्यन्तरापेक्षणेऽनवस्थादिप्रसङ्गात्। विषयमिथ्यात्वे च व्यवहारसत्यत्ववद्धीसत्यत्वं चाविरुद्धम्। एतदभिप्रेत्याह—**से**ति। इह—अन्यस्मिन्नन्यथा बुध्यमाने। सा—धीः स्वयं न मृषा—विषयतस्तु कदाचित्तथात्वोपचारः। तदेतद्बाधकवृत्तान्तेन व्यनक्ति—**नास्ती**ति। धीर्नास्तीत्येवंरूपस्य बाधस्याभावादित्यर्थः। आरोपितं हि नञाऽन्वेति, न त्वारोपः। नास्तिधीविषयत्वाभावे ह्यसद्व्यवच्छित्तिस्स्यात्, न त्वनिर्वचनीयत्वहानिरिति चेन्न; ब्रह्मण्येवं प्रसङ्गात्। अथास्तिधिया तत्सत्त्वं, प्रकृतेऽपि समम्। माभूदसत्यात्सत्यसिद्धेः साधनम्, त्वदिष्टस्य किं साधकमित्यत्राह—**सत्येने**ति। अन्तःकरणादिभिस्सिद्धसाधनत्वमवधारणेन व्युदस्यते। अत्र व्यवच्छेद्यसिद्ध्यसिद्ध्योर्विरोध इति चेन्न; स्वोत्पादकतयाऽवधृतसामर्थ्यसंप्रतिपन्नसत्यवर्गातिरिक्तजन्यत्वनिषेधे प्रतियोगिसिद्धेः। तथाऽप्यसदिष्टं शृङ्गग्राहिकया न निषिद्धमिति चेत्, त्वयाऽपि वा किं तथा विहितम्? तथा हि—असत्यात्सत्यसिद्धिं वदद्भिरप्यसत्यमिथ्यालीकादिशब्दाः किं क्वचिद्व्युत्पन्नाः प्रयुज्यन्ते? अव्युत्पन्ना वा? पूर्वत्र स्वदेशादिषु सतामेवान्यत्रारोप्यमाणतया बाध्यमानतया चासत्यादिशब्दवाच्यत्वमिति नासत्यात्सत्यसिद्धिः। उत्तरत्र परानभीष्टं न किंचित्कारणमुक्तं स्यात्। यद्वा प्रतीतप्रतियोगिकनिषेधस्य त्वदिष्टत्वात् त्वद्वाक्यप्रतीतं व्यवच्छेद्यं त्वया चैवमनुमातुं शक्यमिति प्रसङ्गे तात्पर्यम्; यक्षानुरूपो बलिः, पिशाचानां पिशाचभाषयैवोत्तरं देयमिति न्यायाच्च। प्रातिभासिकसतश्च हेतुत्वाभ्युपगमे कथमसतोऽपि न हेतुत्वम्? तदपि हि कुतश्चित्प्रतिभासते। न ह्यस्ति खपुष्पं दर्पणमुखमित्यनयोर्विशेषः। अत्र व्याघातं च विपक्षे बाधकमाह—**हेतुत्वे**ति। अनर्थक्रियाकारित्वात् प्रातिभासिकानामसत्यत्वम्। तानि चेद्धीरूपामर्थक्रियां

कुर्युः, कथं तेषामलीकत्वम्? ननु सर्वस्यापि सत्यानृतमिथुनादुत्पत्तौ साध्यविकलो दृष्टान्तः। मैवम्, घटाद्युत्पादक-मृदादेर्व्यावहारिकसत्यत्वाभ्युपगमात्। तदपेक्षया च *मृत्तिकेत्येव सत्यम् इत्यादिश्रुतिनिर्वाहाच्च। अनुमानमप्यत्र तावता निष्प्रतिघमिति। श्लो. सत्यधीर्मम सत्येन तवासत्यादसत्यधीः। सत्यादसत्यधीर्वेति क्वासत्यात्सत्यधीर्भवेत्॥ **इत्यसत्यात्सत्यसिद्धिभङ्गः॥**

> **ज्ञानस्याशेषभेदोदयविहतिकृतो न स्वनाश्यत्वयुक्ति-**
> **र्वाताद्यैरेव सद्यश्शममधिकुरुते दग्धदाह्योऽपि वह्निः।**
> **तस्मात्तस्यान्यदेव प्रशमकमपरं तस्य चेत्यव्यवस्था**
> **तच्चेच्छान्तिं न गच्छेत्कथमिव भविता सर्वभेदोपमर्दः॥ ५०॥**

विश्वबाधकमद्वैतज्ञानं कारणानुपपत्त्या दूषितम्। अथ स्वप्रध्वंसकारणाभावाच्च दूष्यते। यत्तदविद्याध्वंसकमन्तिमं ज्ञानम्, तत्केन विनाश्यम्? न तावत्तद्विषयेण ब्रह्मणा, शुद्धस्य तस्य किंचित्प्रति हेतुत्वानभ्युपगमात्, अशुद्धेश्च निःशेषध्वंसात्। अत एव नानिर्वचनीयान्तरेण। एवं तत्प्रध्वंसेनेत्यपि दुःस्थम्, तस्य सदन्यत्वानन्यत्वसत्यमिथ्यात्वादि-विकल्पक्षोभात्। ज्ञानध्वंसस्याहेतुकत्वे च कादाचित्कत्वव्याघातः। अनादित्वापाताच्च कथं प्रतियोगिसंभवः? परि-शेषात्स्वेनैव स्वस्य नाश इत्यायातम्। तच्चायुक्तम्, न हि प्रतियोगिमात्रात्प्रध्वंसः क्वचिदपि दृष्टः। एतत्सर्वमभिप्रेत्याह—**ज्ञानस्येति**॥ वह्नेर्दाह्यं विनाश्यानुविनाशवत्तद्विनाश इति चेन्न, तत्रापि हेत्वन्तरादेव विनाशदृष्टेः। निर्वाप्यते हि कदाचिद्वातेन दीपः, कदाचिच्छलभादिभिः। यदाऽस्य स्वयं विनाश इति मन्यसे, तदाऽप्यदृष्टप्रेरितवेगवदवयवकर्मणा मिथोविभागात्सञ्जातशैथिल्यमात्रम्। न तु क्वचिदपि द्रव्यनाशः। अवस्थान्तरापत्त्या चादर्शनम्। कतकरजोनिदर्शनं च बालप्रलोभनम्। न हि पयसि पङ्कः कतकरजसा नाश्यते, विश्लेषमात्रदृष्टेः। न च स्वयं तन्नश्यति, असंश्लेषमात्रसिद्धेः। अस्तु तर्हि ज्ञानान्तरेण तन्निवृत्तिरित्यत्राह—**तस्मादिति**। ज्ञाननिवर्तकस्यापि ज्ञानस्य तुल्यतया ज्ञानान्तरेण निवृत्ता-वुपर्युपरि तथेत्यनवस्था। उक्तदोषपरिहाराय निवर्तकज्ञानस्य स्वतोऽन्यतश्च नाश्यत्वं नेति शङ्कते—**तच्चेदिति**। परि-हरति—**कथमिवेति**। ज्ञानं तावत्तिष्ठति, तदनुबन्धादहङ्कारदेहानुबन्धश्च दुर्वार इति भावः॥ ५०॥ **इति निवर्तक-ज्ञाननिवर्तकानुपपत्तिः॥**

> **बोधस्यान्त्यस्य वेद्यं किमु तव विशदं ब्रह्म मायान्वितं वा**
> **किं वा भेदप्रपञ्चः किमु तदनृतता किन्नु वेद्यं न किञ्चित्।**
> **आद्ये स्याद्ब्रह्म दृश्यं तदुपरि युगले मोहसत्ताऽथ तुर्ये**
> **सूते द्वैतं सती सा स्वविहतिमनृता पञ्चमे स्यान्न धीत्वम्॥ ५१॥**

अथ निवर्तकज्ञानं सविषयं निर्विषयं वा? सविषयत्वे ब्रह्मविषयं तदन्यविषयं वा? ब्रह्मविषयत्वेऽपि शुद्धब्रह्म-विषयं वा मायान्वितब्रह्मविषयं वा? अन्यविषयत्वे प्रपञ्चविषयं तन्मिथ्यात्वविषयं वेति विकल्पयति—**बोधस्येति**॥ आद्यं दूषयति—**आद्य इति**। ब्रह्म दृश्यं स्यात्। शुद्धस्य दृग्विषयत्वेऽपसिद्धान्तः; त्वदुक्ता च दृग्दृश्यसंबन्धानुपपत्तिः; दृश्यत्वानुमानस्यानैकान्त्यम्, ब्रह्मणोऽपि वा मिथ्यात्वाभ्युपगमप्रसङ्गश्चेति भावः। द्वितीयतृतीयौ दूषयति—**तदुपरीति**। मायान्वितब्रह्मप्रतिभासः प्रपञ्चप्रतिभासश्च मोह एवेति भावः। चतुर्थे प्रपञ्चस्यानृतता सत्याऽसत्या वेति विकल्पे

पूर्वत्राद्वैतभङ्गप्रसङ्गमाह—स्यात इति । उत्तरत्र स्वव्याघातमाह—स्वविहतिमिति । श्लो. मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत् । सत्यत्वस्य तु सत्यत्वे सत्यत्वं साधितं भवेत् ॥ निर्विषयत्वे दोषमाह—पश्चम इति । वृत्तिज्ञानं सर्वं सविषयमित्यभ्युपगच्छतां कथमस्य निर्विषयत्वम्? तथात्वे वा कथं वृत्तिधीत्वमिति भावः ॥ ५१ ॥ **इति निवर्तकज्ञानवेद्यानुपपत्तिः ॥**

साध्या वस्सर्वमायाविरतिरपि परं ब्रह्म तस्मात्परा वा
पूर्वत्र प्रागपि स्यात्परमपि न भवेदुत्तरत्राभ्युपेते ।
साऽपि स्याच्चेन्निवर्त्या पुनरपि विलगेत्पूर्व एव प्रपञ्चो
नो चेत्सत्यैव सा स्यात्प्रसजति च ततो ब्रह्म तत्सद्वितीयम् ॥ ५२ ॥

बाधकज्ञानसाध्यं विकल्पयति—**साध्येति** ॥ ब्रह्मस्वरूपत्वेऽनादित्वान्न साध्यत्वमित्याह—**पूर्वत्रेति** । स्वरूपादन्यत्वे सर्वभेदनिवृत्त्यसंभवमाह—**परमपीति** । निवृत्तिरपि निवर्त्यैत्यविरोधं शङ्कते—**साऽपीति** । परिहरति—**पुनरिति** । लब्धस्वरूपस्य भावस्य ध्वंसो यदि न स्यात्, स्वरूपं तदवस्थमेव स्यात् । प्रागभावस्य तु प्रध्वंसः भावश्च तत्प्रध्वंसश्च, उत्तरत्वे सति विरोधित्वाविशेषात् । प्रध्वंसस्य च प्रागभावः भावश्च तत्प्रागभावश्च, पूर्वत्वे सति विरोधित्वाविशेषात् । इहापि प्रध्वंसस्तन्निवृत्तिश्च भावस्य प्रध्वंसः स्यातामिति चेत्, तर्ह्यनवस्थितप्रध्वंसपरम्पराक्लृप्तिप्रसङ्गः तत्प्रध्वंसकज्ञानक्लृप्तिश्च । असन्मते त्ववस्थापरम्परा प्रमाणसिद्धाऽङ्गीक्रियत इति न विरोधः । निवृत्तेरनिवृत्तौ सत्यत्वप्रसङ्गः; ततश्चाद्वैतभङ्गमाह—**नो चेदिति** । सत्याभावसाहित्यमदोष इत्येतच्च दूषितमेव ॥ ५२ ॥ **इति प्रपञ्चनिवृत्त्यनुपपत्तिः ॥**

अन्त्यज्ञानस्य जीवः स्थितिपदमथवा केवलं ब्रह्म ते स्या-
दाद्ये तेनैव बाध्यो न तदुपजनयेद्धीस्थितौ किं ततोऽस्य ।
अन्त्ये सत्याऽनृता वा तदधिकरणता नाद्य इष्टः परस्मि-
स्तत्क्लृप्त्यादेरयोगस्तदिह विमृशतां किं न दुष्टं त्वदिष्टम् ॥ ५३ ॥

विश्वबाधकबुद्धेराधारं विकल्पयति—**अन्त्यज्ञानस्येति** ॥ न हि बाह्यवद्देहेन्द्रियमनसां ज्ञातृत्वं युष्माभिरिष्यते । तुल्यन्यायतयाऽहङ्कारस्य महतो वा ज्ञातृत्वं निरस्तमेव । परिशेषादहङ्कारोपहितो जीव एव ज्ञातेति कोटिः प्रथममिहोद्धाटिता । केवलं—सर्वोपाधिरहितमित्यर्थः । बाधकज्ञानस्य बाध्यजीवाधिकरणत्वे बाधकमाह—**आद्य** इति । अयं भावः—बाधकेन जीवो नश्यति न वा? आद्ये स्वनाशकधीसिद्ध्यै भेदवासनानिरासादौ न प्रयस्येदिति, न ह्यात्मनाशः परमः पुमर्थ इत्यौपनिषदपक्षः । उत्तरत्राहमर्थविनाशे कथं जीवस्थितिः? स्थापितं चाहमर्थस्यैवात्मत्वम् । जीवत्वे नष्टेऽपि ज्ञप्त्यात्मा तिष्ठेदित्यत्राह—**धीति** । न हि अहं विनङ्क्ष्यामि मदन्या धीर्मद्विधुरा तिष्ठत्विति मत्वा मुमुक्षुः प्रवर्तते । तथा च भाषितं—* मयि नष्टेऽपि मत्तोऽन्या काचिज्ज्ञप्तिरवस्थिता । इति तत्प्राप्तये यत्नः कस्यापि न भविष्यति ॥ इति । शुद्धस्य निवर्तकज्ञानाधारता सत्याऽसत्या वेति विकल्पयति—**अन्त्य** इति । सत्यत्वेऽपसिद्धान्तमाह—**नाद्य** इति । मिथ्यात्वेऽनुपपत्तिमाह—**परस्मिन्निति** । असत्यस्य ज्ञानाधिकरणत्वस्य क्लृप्तिर्हि कल्पकाविद्याहङ्कारादिसापेक्षा । अतो निवर्तकज्ञानतदाधारत्वतत्प्रतिभासा यावत्स्युः, तावदविद्याऽनुवृत्तेति न ततस्तन्निवृत्तिः । अविद्यायाः तत्कल्पितस्य ज्ञानस्य च सुन्दोपसुन्दविषनाशकविषन्यायेन युगपद्ध्वंसादविरोध इति चेत्, तदिदमन्योन्य-

ध्वंसकत्वं दृष्टं कल्प्यं वा? नाद्यः, असिद्धेः। न द्वितीयः, कल्पकाभावात्। गतिशून्यत्वं कल्पकमिति चेत्, अस्ति सतां गतिः, तामेवानुवर्तस्व। एवं परपक्षे दूष्यान्तराणि दूषणान्तराणि च सूचयन्निगमयति—तदिति। बहुश्लोकोक्तबहुविधदोषप्रस्थानादित्यर्थः॥ ५३॥ **इति निवर्तकज्ञानाधारानुपपत्तिः॥**

नाभुक्तं कल्पकोट्याऽप्युपशमनमियात्कर्म निष्कृत्यभावे
विद्यातस्तद्विनाशश्रुतिरिह तदसौ तत्प्रशंसेति चेन्न।
तादृग्विधैव तन्निष्कृतिरिति हि विदांचक्रुराम्नायवृद्धा
नान्यद्ब्रह्मानुभूतिप्रतिभटदुरितध्वंसतस्साध्यमत्र॥ ५४॥

श्लो. यथा मृषावादिमते न बोधान्मुक्तिसंभवः॥ त्वन्मतेऽपि तथेत्येवमपन्यायेन शङ्कते॥ **नाभुक्त**मिति। स्मर्यते हि * अवश्यमनुभोक्तव्यं कृतं कर्म शुभाशुभम्। नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि॥ इति। तर्हि प्रायश्चित्तशास्त्रवैयर्थ्यं स्यादित्यत्रोक्तम्—**निष्कृत्यभाव** इति। ननु * तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति श्रूयते। * तदा विद्वान्पुण्यपापे विधूय * तत्सुकृतदुष्कृते धूनुते इत्यादि च। * न कर्मणां क्षयो भूप जन्मनामयुतैरपि। ऋते योगात्कर्मकक्षं योगाग्निः क्षपयेत्परम्॥ * यथाऽग्निरुद्धतशिखः इत्यादि च स्मर्यते। अतः फलभोगाभावेऽपि ज्ञानात्कर्मनिवृत्तिः स्यादित्यत्राह—**विद्यात** इति। न च * तत्त्वज्ञानान्निःश्रेयसाधिगम इत्याद्यसूत्रविरोधः, * दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायात् इति द्वितीयसूत्रे ज्ञानस्य मिथ्याज्ञाननिवृत्तिद्वारा कर्मानारम्भार्थत्वस्य स्थापितत्वात्। कृतं तु कर्म स्वफलत एव नश्यतीत्यविरोधः। अत्र कर्मणामवश्यभोक्तव्यत्ववचनमकृतप्रायश्चित्तविषयमित्यभिप्रायेण प्रत्याह—**नेति**। अत्रापि तर्ह्यकृतप्रायश्चित्तत्वाद्भोक्तव्यत्वमित्यत्राह—**तादृगि**ति। त्रय्यन्तविहितपरब्रह्मध्यानरूपेत्यर्थः। आम्नायवृद्धाः—स्मर्तारः; ते चेश्वरदर्शनं सर्वप्रायश्चित्तमित्याहुः। *इज्याचारदमाहिंसाः, * प्रायश्चित्तान्यशेषाणि, * प्रायश्चित्तं तु तस्यैकम् इत्यादि च। ब्रह्मप्राप्तिहेतुतया विहितस्य योगस्य कथं नैमित्तिकत्वमित्यत्राह—**नान्यदि**ति। स्वतःप्राप्ता हि संसरतामपि ब्रह्मानुभूतिस्सूरिवत्, तत्प्रतिबन्धकनिवृत्त्यै योग इति निष्कृतिरूपत्वं तस्य युज्यत इति भावः। अत्र दुरितशब्देन बन्धकं पुण्यमपि संगृहीतम्, प्रतिबुद्धं प्रत्यनिष्टफलप्रदत्वाविशेषात्। * एते वै निरयास्तात स्थानस्य परमात्मन इति स्वर्गादीनां निरयत्वस्मृत्या तत्साधनस्य पापत्वोपपत्तेः। * न सुकृतम् इत्यारभ्य, * सर्वे पाप्मानोऽतो निवर्तन्ते इति सुकृतस्यापि पापत्वेन सङ्कल्प्याम्नानाच्च। तदेवं धीसङ्कोचककर्मध्वंसे धीविकास एव ब्रह्मानुभूतिरिति तत्कामनाव्यपदेशोऽपि न विरुद्धः। अन्यत्र च प्रतिबन्धकनिरासवृत्तान्ते एवं प्रतिसन्धेयम्॥ ५४॥ **इति विद्यायाः पापनाशकत्वोपपत्तिः॥**

प्रायश्चित्तं न पुण्ये न च सुकृतमनुश्रूयते धर्मबाध्यं
नाधर्मत्वं विधानान्न यदि सुचरितं त्वङ्गमस्याश्च न स्यात्।
मैवं धर्मोऽप्यधर्मो भवति हि बहुधाऽधिक्रियादेर्विशेषात्
धर्मं त्रैवर्गिकं तु स्वयमिह निगमः पाप्मकोटौ पपाठ॥ ५५॥

ननु पुण्यस्य दुरितशब्देन संग्रहो न युक्तः, विरुद्धत्वात्; क्वचित्प्रयोगश्छत्रिन्यायादित्यभिप्रायेण शङ्कते—**प्रायश्चित्त**मिति॥ न हि पुण्योद्देशेन क्वचिन्निष्कृतिविधिः, * धर्मेण पापमपनुदति इति च श्रूयते, न तु धर्ममिति।

काम्यमपि अधर्मत्वाद्धर्मेणापनुद्यत इति चेन्न, फलोद्देशेन विहितत्वात् । न चात्र श्येनादिनयः, स्वरूपतः फलतो वा निषेधानाघ्रातत्वात् । धर्मेष्वपि च यद्यधर्मत्वं तदा तदङ्गत्वं विद्याया न घटते । एषां चतुर्णां हेतूनामन्यथासिद्धिमभिप्रेत्य प्रत्याचष्टे—**मैवमिति** । अधिकारिभेदेन पापत्वापत्तौ तं प्रति निष्कृतिविधिर्युक्तः, *धर्मेण पापम् इत्यत्र च यथार्हं पापशब्द उभयग्राही । विहितत्वं च कंचित्प्रति धर्मत्वं साधयेत्, नान्यं प्रत्यधर्मत्वं निरुन्ध्यात् । तेषामेव च कर्मणां फलसङ्गादित्यागवतां निवृत्तिधर्मतापत्त्या विद्याङ्गत्वोपपत्तिः । एतत्सर्वं व्यनक्ति—**धर्मोऽपीति** । स्मर्यते हि—*स एव धर्मस्सोऽधर्मस्तंतं प्रति नरं भवेत् । पात्रकर्मविशेषेण देशकालावपेक्ष्य च ॥ इति ॥ एवं सति, *न सुकृतम् इत्यादौ सुकृते पाप्मशब्दो न भाक्त इत्यभिप्रायेणाह—**धर्ममिति** । अत एव हि *त्रैवर्गिकांस्त्यजेद्धर्मानिति मुमुक्षुं प्रत्यनुशिष्यते ॥ ५५ ॥ **इति त्रैवर्गिकसुकृतस्यापि विद्यानाश्यत्वम्** ॥

अश्लेषः पाप्मभिश्चेत्प्रसजति वितथा दुश्चरित्रान्निवृत्ति-
स्तेषु प्रामादिकेष्वप्यमतिकनिपतद्बीजवत्स्यात्प्ररोहः ।
मैवं शास्त्रैकवेद्ये फलफलिविषये युक्तयो ह्यस्वतन्त्राः
शास्त्राद्बाधस्तु तिष्ठेन्मतिकृतविषये शब्दशक्त्यादिभिर्नः ॥ ५६ ॥

अस्तु विद्याऽपि प्रायश्चित्तान्तरवदुपात्तदुरितनाशिका ; उत्पत्स्यमाननिष्कृतिर्न स्यात्, निमित्तानुदयेऽपि नैमित्तिकप्रवृत्तावतिप्रसङ्गात् । उदितत्वशङ्कयाऽपि क्वचिन्निष्कृतिः, पाक्षिकोऽपि दोषः परिहार्य इति न्यायात् । न तूत्पत्स्यमानत्वशङ्कया, तदवस्थस्य निमित्तत्वेन प्रायश्चित्तशास्त्रैरनुद्देशात् । *एवंविदि पापं कर्म न श्लिष्यते *तस्यैवात्मा पदवित्तं विदित्वा, न कर्मणा लिप्यते पापकेन इत्यादयस्तु विद्यां प्रशंसन्ति ; अर्थायोगात् । ब्रह्मविदाम्, *बाल्येन तिष्ठासेत् इति विधौ कृत्स्नबालकृत्योपादाने कामचारप्रसङ्गाच्च । अस्त्विति धाष्ट्यें *नाविरतो दुश्चरितात् इति श्रुतिरुपरुन्धे । *सर्वान्नानुमतिश्च प्राणात्यये हि तद्दर्शनात् इति च सूत्रम् ; जडवद्भावयतामपि योगिनां *सतां वर्त्म न दूषयन् इति प्रवृत्तिनियम उक्त इति ; एतत्सर्वमभिसन्धायाह—**अश्लेष** इति ॥ प्रामादिकैरश्लेषे श्रुत्यादिविरोधो नेत्यत्राह—**तेष्विति** । प्ररोहः—यथार्हकार्यारम्भः ; अन्यथा कथमकामकृतेषु प्रायश्चित्तविधिरिति ? अत्र श्रुतस्याश्लेषस्य किं न्यायतो बाध उत वचनत इति विकल्पमभिप्रयन्प्रत्याह—**मैवमिति** । आद्यं दूषयति—**शास्त्रैकवेद्य** इति । फलफलिविषये—साध्यसाधनभावेन मिथस्संबध्यमानेऽर्थे इति यावत् । अस्वतन्त्राः—न हि वचनविरोधे न्यायः प्रभवति, तथा सत्यतिप्रसङ्गादिति भावः । द्वितीये विषयभेदाद्विरोधं परिहरति—**शास्त्रादिति** । शब्दशक्त्यादिभिः *नाविरतो दुश्चरितात् इत्यत्र ह्यविरतिः बुद्धिपूर्वचर्यानुवर्तनम् ; तत्प्रसक्तस्य प्रतिषेधः । **उषस्तिश्च** प्राणधारणार्थमिभ्योच्छिष्टं चखाद । अनुपानप्रतिग्रह**मिभ्येना**भ्यर्थितस्सन्नाह—*न वा अजीविष्यमिमानखादन् कामो म उपादानम् इति । ब्रह्मविदोऽपि मे कामतो निषिद्धकरणं परिहार्यमित्यर्थः । *अपि चेत्पातकं किंचिद्योगी कुर्यात्प्रमादतः । योगमेव निषेवेत नान्यं यज्ञं समाचरेत् ॥ इति च स्मर्यते । अश्लिष्टस्य पातकस्य किं योगरूपेणापि प्रायश्चित्तेनेति चेन्न ; तत्र तद्विधौ तात्पर्याभावात् । अन्यप्रायश्चित्तप्रसक्त्या योगं न विच्छिन्द्यात् इत्येव हि तात्पर्यम् । यद्यपि *जीवितात्ययमापन्नः, *प्राणसंशयमापन्नः इत्यादिवचनानि विद्वदविद्वत्साधारणानि, तथाऽप्यत्रानापद्दशायां प्रामादिकेष्वपि विद्यामाहात्म्यादश्लेष उच्यत इति सार्थत्वम् । अतः पापानां विनाशवदश्लेषोऽपि विद्यासाध्यं फलमिति ॥ ५६ ॥ **इति प्रामादिकोत्तराघाश्लेषोपपत्तिः** ॥

श्लिष्टं विद्याङ्गपुण्यं स्वफलवितरणान्नेतरार्थं विरागे
रागादारभ्यमाणं फलवदमतिकं संभवेन्नैव पुण्यम् ।
पुण्याश्लेषस्ततोऽस्मिन्न घटत इति चेन्नोपयुक्तातिरिक्तै-
र्विद्याङ्गैस्तस्य योगादमतिकृतमपि ह्यामनन्त्येव पुण्यम् ॥ ५७ ॥

यद्यपि पापस्याश्लेषः, तथाऽपि कथम् * इतरस्याप्येवमसंश्लेषः पाते तु इति सूत्रोक्तः पुण्याश्लेष इति विकल्पानुपपत्त्या शङ्कते—**श्लिष्टमिति** ॥ अत्र हि पुण्यस्याश्लेषः किं बुद्धिपूर्वस्य, तदन्यस्य वा ? आद्ये विद्याङ्गस्य तदनङ्गस्य वा ? अनङ्गत्वे विरक्तकृतस्य अन्यकृतस्य वेति विकल्पः । तत्र विद्याङ्गस्याश्लेषो न संभवति, स्वफलभूतविद्याप्रदानात् । वीतरागस्य न फलान्तरार्थप्रवृत्तिः, यतस्तदश्लेषोक्तिः स्यात् । सरागकृतं तु स्वफलं दद्यादेव धीपूर्वस्याश्लेषायोगात् । अधीपूर्वं तु सुकृतं न संभवत्येव, चोदितानुष्ठानरूपत्वात्; निषिद्धे त्वधीपूर्वत्वसंभवः ; चोदनानपेक्षानुष्ठानत्वात् । अतो ब्रह्मविदि पुण्याश्लेष उक्तो न संभवतीत्याक्षेपः । एवमाक्षिप्तेषु कंचिदंशं विशेषयिष्यन्नाह—**नेति** । हेतुमाह—**उपयुक्तेति** । उपायविरोधिशमनेषु कर्मसु कानिचिदधिकानि संभवन्ति, अन्यैर्विद्यापूर्तेः ; न च निष्फलत्वं युक्तम् ; अतस्स्वानुगुणं फलान्तरं दातुमर्हन्तीति शङ्कायामश्लेषस्सूत्र्यते । निष्कामानुष्ठितानां ह्येतेषां न फलान्तरसंभव इति । यच्चाधीपूर्वकाम्यं न संभवतीति तदपि न, विष्ण्वायतनदीपाद्युपाख्याने तद्दृष्टेः । स्वप्ने च विद्वानपि वासनाविशेषान्निषिद्धमिव काम्यमप्यनुतिष्ठेत् । पित्रादयश्च निरपेक्षं प्रति हितबुद्ध्या काम्यमाचरेयुः, तच्च प्रामादिकप्रायं सर्वं विदुषि न संश्लिष्यत इत्यभिप्रायेणाह—**अमतिकृतमिति** ॥ ५७ ॥ **इति पुण्याश्लेषः** ॥

कर्माश्लेषप्रणाशौ तदुपधिभगवन्निग्रहादेर्निवृत्ति-
र्नष्टाश्लिष्टातिरिक्तं न च किमपि ततः संक्रमः कस्य मैवम् ।
तत्तत्कर्मप्रसूतौ स्वभजनशमितौ निग्रहानुग्रहौ यौ
तत्तुल्यावेव देवः प्रयति विदुषि तच्छत्रुमित्रेषु धत्ते ॥ ५८ ॥

अत्र कश्चिच्चोदयति—**कर्मेति** ॥ द्विविधं हि कर्म बन्धकं, विद्योत्पत्तेः पूर्वमुत्तरं च । पूर्वं च द्विविधम् आरब्धकार्यमन्यच्च । तत्राद्यं चरमदेहावधिभोगनाश्यम् , * भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते इति सूत्रोक्तेः । द्वितीयं विद्यया नाशितम् । उत्तरं च द्वेधा—प्रामादिकराशिप्रविष्टमन्यच्च । प्रथममिहाश्लिष्टम् । अन्यच्च निष्कृत्या भोगेन वा निश्शेषितम् । अत्र मुक्तिविलम्बमनिच्छतां निश्शेषकर्मनिर्वेशार्थं युगपद्बहुदेहसंग्रहोपयोगः । एवं स्थिते विदुषश्चरमदेहादुत्क्रान्तिकाले, * तस्य पुत्रा दायमुपयन्ति सुहृदस्साधुकृत्यां द्विषन्तः पापकृत्याम् * अस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतं तत्सुकृतदुष्कृते धूनुते *प्रियेषु स्वेषु सुकृतमप्रियेषु च दुष्कृतम् । विसृज्य ध्यानयोगेन ब्रह्माप्येति सनातनम्॥ इत्यादेः को विषय इति ? तदेतत्संक्रमश्रुतितात्पर्यानभिज्ञतामूलमित्यभिप्रायेण प्रतिवक्ति—**मैवमिति** । श्रुतितात्पर्यं विवृणोति—**तत्तदिति** । अयं भावः—न ह्यत्र मुख्यकर्मणां संक्रान्तिः, असंभवात् । अतः—* आदाय सुकृतं सर्वं तस्य गच्छेदरक्षितः । शपता यत्कृतं पुण्यं शप्यमानमुपैति तत् ॥ शप्यमानस्य यत्पापं शपन्तमधिगच्छति ॥ इत्यादिन्यायात् अक्षिरोगादिसंक्रमणवादवच्छत्रावपि तादृशफलोत्पादने तात्पर्यमिति ॥ ५८ ॥ **इति प्रियाप्रियसंक्रमः** ॥

अन्यश्चेदन्यकर्मप्रजनितफलभुक् शास्त्रवैयाकुली स्या-
द्ब्रह्मज्ञैरुज्झितानां क्वचिदपि न ततः कर्मणां संक्रमः स्यात् ।

उद्वेलस्स्याच्च धातेत्यसदविषमताद्यन्वितेनैव धात्रा
विद्यानिष्ठोपकाराद्युचितफलमिदं दीयते वर्गयुग्मे ॥ ५९ ॥

पुनरनिर्धारितश्रुतितात्पर्यश्चोदयति—**अन्य** इति ॥ अन्यस्यान्यकृतकर्मफलभोगे * शास्त्रफलं प्रयोक्तरीति व्यवस्था-भङ्गाच्छास्त्रस्य व्याकुलता स्यात्; ऋत्विक्कृतं हितैषिकृतं चान्यार्थमेव करणात्परत्र फलतीति युक्तम्; अभिचारकर्म च भ्रातृव्यस्य पूर्वदुष्कृतोत्थापितत्वात्तत्पीडाहेतुः। अभिचरिता च स्वकृतफलं भ्रातृव्यमरणं स्वयं भुङ्क्ते। इह तु नैवं संभवः। अतः परवित्कर्मणामश्लेषविनाशसंभवेऽपि नान्यत्र स्वरूपत इव फलतोऽपि संक्रमस्संभवतीति ईश्वरस्य च स्वमर्यादातिक्रमः स्यादित्याह—**उद्वेल** इति। उक्तं चोद्यद्वयं स्वकर्मफलभोगव्यवस्थयैव परिहृतमित्यभिप्रायेण प्रत्याह—**इत्यसदि**ति। हार्दं विवृणोति—**अविषमते**ति। एतेन ब्रह्मविदुपकारापकारयोरपरिमितफलत्वं च सिद्धं भवति ॥ ५९ ॥
इति प्रियाप्रिययोर्विद्वत्कर्मफलसमानसृष्टेः स्वकर्मफलत्वम् ॥

अर्चिर्घस्रोऽथ पक्षस्सित उदगयनं वत्सरो मातरिश्वा
मार्तण्डस्तारकेशस्तडिदपि वरुणामर्त्यनाथप्रजेशैः।
आदिष्टो विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानां
यः प्रोक्तोऽमानवाख्यस्स तटिदधिपतिर्विश्रुतो मानसोऽपि ॥ ६० ॥

अथ विधूतपुण्यपापस्य विदुषः स्थूलशरीरान्मूर्धन्यनाड्या निष्क्रान्तस्यार्चिरादिपादोक्तमातिवाहिकक्रममाह—**अर्चिरि**ति ॥ * तत्पुरुषोऽमानवः, स एनान्ब्रह्म गमयति इत्यव्यवहितब्रह्मगमयितृत्वेन निर्दिष्टस्य प्राधान्यसूचनार्थं वरुणादिषु तृतीया। अमानवः किमिह नोक्त इत्यत्राह—**य** इति। वैद्युतपुरुष इह तटित्पतित्वात्तटिच्छब्दोक्त इति भावः। तथाऽपि * वैद्युतात्पुरुषो मानस एत्य ब्रह्मलोकान्गमयति इत्युक्तस्येह नोपादानमित्यत्राह—**विश्रुत** इति। शेषं **भाष्यादौ**। अत्रैवं **तत्त्वसारे** संगृहीतम्—* अर्चिरहस्सितपक्षानुदगयनाब्दमरुदर्केन्दून्। अपि वैद्युतवरुणेन्द्रप्रजापती-नातिवाहिकानाहुः ॥ इति। अन्ये त्वाहुः—* अर्चिर्वासरशुक्लपक्षषडुदङ्मासांश्च संवत्सरं वायुं भास्करचन्द्रविद्युदुदपान् सेन्द्रं प्रजानां पतिम्। गत्वाऽथो विरजां विमुच्य च तनुं सूक्ष्मां ततोऽमानवस्पर्शात्क्षालितवासनास्सुकृतिनो गच्छन्ति विष्णोः पदम् ॥ इति ॥ अत्र वासनाशब्देन फलप्रदानरहितनष्टाक्लिष्टकर्मराशेरनुप्रवृत्तौ धीसङ्कोचकश्शक्त्यंशस्त-न्नियतसूक्ष्मप्रकृत्यंशो वा विवक्षितः। अपरे तु ब्रुवते—* भूलोकेशाग्नयोऽह्नो प्रथममहरतः पूर्वपक्षस्सितात्मा मासा-ष्षड्वत्सरोऽथो दशतनुपवनस्सैक आदित्यवर्गः। चन्द्रो विद्युज्जलेशस्समरुदधिपतिस्सप्रजानामधीशस्ते मार्गस्यार्चि-रादेरतिवहनविधौ विश्वनेत्रा नियुक्ताः ॥ इति ॥ अत्र सैक इति पवनविशेषणम्, * अथ वायोरेकादश पुरुषस्य इत्यादिश्रुतेः ॥ ६० ॥ **इत्यातिवाहिकक्रमक्लृप्तिः।**

बुद्धेर्योऽसौ विकासः कबलितनिखिलोपस्कृतब्रह्मतत्त्वः
स प्राक्चेन्नित्यमुक्तिर्न यदि कथमसौ नश्वरत्वं न गच्छेत्।
मैवं प्रध्वंसवत्त्वे स खलु मम तथा शौनकाद्युक्तनीत्या
शान्ताशेषापराधे न च भवति पुनस्तत्र सङ्कोचहेतुः ॥ ६१ ॥

एवं देवयानेन गतस्य यस्सर्वविशिष्टब्रह्मानुभवलक्षणो धीविकासः, तत्र विकल्पतः पराभीष्टमाक्षेपमनुवक्ति—**बुद्धे-रिति** ॥ स प्राक् चेत्—स धीविकासः प्रागप्यस्ति चेत्, अनादिश्चेदित्यर्थः। तत्र बाधकमाह—**नित्यमुक्तिरिति**। बद्ध एव न स्यादित्यर्थः। आगन्तुकत्वकोटिमनुभाषते—**न यदी**ति। तत्रापि जातानां विनाशध्रौव्यात् बाधक इत्याह—**कथ-मिति**। स्वपरसिद्धान्तविवेकविवलबोऽसीत्यभिप्रायेण प्रत्याह—**मैवमिति**। तद्विवृणोति—**प्रध्वंसव**दिति। पूर्वावधि-मानपि प्रध्वंस उत्तरावधिरहित इति मन्यसे। एवं भावोऽपि कश्चित्तथा स्यात्। अनुपपत्त्या तत्र तथात्वमिति चेत्, अत्राप्यस्ति श्रुतिभङ्गानुपपत्तिः। भावान्तरमेव च वयमभावं ब्रूमः। निश्शेषविरोधिनिवृत्तौ हि ज्ञानस्य परसङ्कल्पसिद्ध-सर्वगोचरविकासवत्तया सदाऽभिव्यक्तिः स्मर्यत इत्याह—**शौनकादी**ति। मुक्तविषयश्रुतिषु च * परात्परं पुरुषमीक्षते, * सर्वं हि पश्यः पश्यतीत्यादिनिर्देशस्य सङ्कोचकादर्शनात्। ईक्षणस्य सदानुवृत्तिर्हि स्वतः प्राप्तेति भावः। ननु यदि मुक्तोऽपि चेतयते, पुनरपि सङ्कोचकमारभेतेत्यत्राह—**शान्ते**ति। सङ्कोचहेतुकरणमपि हि कर्ममूलं, निश्शेषितकर्मणः कथं तत्स्यादिति ॥ ६१ ॥ **इति मुक्तधीविकासस्य नित्यत्वम्।**

मुक्तौ देहाद्यभावे मुकुलितविषयो जक्षदादिप्रवाद-
स्तत्सत्त्वे चाशरीरश्रुतिविहतिरतः का चिकित्सेति चेन्न।
इच्छातस्स्यादवस्थाद्वयमुभयविधश्रुत्यबाधाद्विमुक्तौ
कर्मायत्तैर्वियोगः परमिह कथितस्तस्य देवोपमस्य ॥ ६२ ॥

मुक्तस्य ज्ञानं चिन्तितम्। अथ तस्य चिकीर्षाप्रयत्नशक्तिविषया चिन्ता। तत्र मुक्तो देहप्राणतद्व्यापारैर्मुक्तो न वेति विकल्पं भावयन् क्रमादाक्षिपति—**मुक्तावि**ति ॥ आद्ये मुक्तमधिकृत्य प्रवृत्तः * जक्षत्क्रीडन् इत्यादिप्रवादो निर्वि-षयः स्यात्। द्वितीये *धृत्वा शरीरम् *अशरीरं वाव सन्तम् इत्यादिश्रुतिविरोधः स्यादिति। अत्र *द्वादशाहवदुभय-विधं बादरायणोऽतः इति सूत्रोक्तप्रकारेण स्वेच्छाकर्मकृतदेहादियोगायोगाभ्यामवस्थाद्वयवानिति मन्वानः प्रत्याह—**नेति**। प्रथमचोद्यपरिहारतयाऽभिप्रेतं प्रथयति—**इच्छात** इति। श्रुतिविरोधं तु विषयव्यवस्थातश्शमयति—**कर्मायत्तै**रिति। यत्र विषयभेदसंभवः, तत्र क्वचिद्बाधेऽतिप्रसङ्ग इति भावः। देवोपमस्य—ईश्वरेण साम्यं प्राप्तस्येत्यर्थः। एतेन परविषय-शरीरविधिनिषेधश्रुत्योरिवात्रापि व्यवस्थोपपत्तिर्व्यज्यते ॥ ६२ ॥ **इति मुक्तस्यैच्छिकशरीरयोगानियमः ॥**

स्यान्मुक्तो विश्वदेही यदि भवति जगद्व्यापृतौ तस्य शक्तिः
स्वातन्त्र्यं क्वाप्यशक्तौ विगलति स च नः स स्वराडित्यधीतः।
धत्तेऽनुच्छेद्यसारा तदियमुभयतःपाशतां तर्करज्जु-
र्मैवं देवस्तदिच्छां क्वचिदपि न विहन्त्येवमस्तु स्वराट् सः ॥ ६३ ॥

इच्छागृहीतदेहत्वं देवोपमत्वं च मुक्तस्य प्रसक्तम्, तस्य च **शारीरकान्ते** जगद्व्यापारवर्जमैश्वर्यं साधितम्। स किं शक्तोऽप्यनिच्छया जगत्सृष्ट्यादौ न व्याप्रियते, उताशक्त एवेति विकल्पे पूर्वं यदीत्यादिनाऽनूद्य तत्र बाधकमाह—**स्यान्मुक्त** इति ॥ विश्वदेही स्यात् अन्यथा कथं * बहु स्यामिति सङ्कल्पार्हत्वम्? विश्वदेहत्वं चानेकेषां निष्प्रमाणकं प्रमाणतर्कप्रत्यूढं च। अत एव शक्तोऽपि प्राप्त्यभावान्न व्याप्रियत इति पक्षोऽपि प्रत्यादिष्टः। उत्तरस्योत्तरमाह—**स्वातन्त्र्यमि**ति। क्वचिदशक्तौ *पारतन्त्र्यं परे पुंसि प्राप्य निर्गतबन्धनः। स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदते ॥

इत्यादिप्रसिद्धं निस्सीमस्वातन्त्र्यं विगलेत् । श्रुतिविरोधमप्याह—**स चेति** । * स स्वराड्भवति इति ह्याम्नायते । द्वयो-रपि दुरतिक्रमतया संशयडोलाकेलिसान्तत्यमित्यभिप्रायेणाह—**धत्त** इति । उत्तरकोटिपरिग्रहाभिप्रायेण प्रत्याह—**मैव-मिति** । श्रुतिविरोधमुपशमयति—**देव** इति । अकर्मवश्यस्याप्रतिहतेच्छत्वमिह स्वातन्त्र्यम् । ईश्वरो हि बद्धानां यथाकर्म क्वचित्क्वचिदिच्छां विहन्ति, मुक्तस्य तु न क्वचिदपि परिमिते पराधीनस्वदेहसृष्ट्यादावित्यर्थः ॥ ६३ ॥ **इति पराधीन-स्यापि मुक्तस्येच्छाविहतिराहित्यम् ॥**

आविर्भूतस्वरूपा निरवधिकसुखब्रह्मभुक्तिस्तु मुक्तिः
सेवात्वाद्दुःखकृत्सा भवति यदि न तद्धर्मिमानेन बाधात् ।
पाप्मा चास्मिन्नुपाधिस्स च न खलु तदा पुण्यपापव्यपाया-
दात्मानो विष्णुशेषा इति च सुखमयी सा स्वरूपानुरूप्यात् ॥ ६४ ॥

अत्र कश्चित्सिद्धान्त्यभिमतायां मुक्तौ दोषं विवक्षुस्तामनुभाषते—**आविर्भूतेति** ॥ परशेषतैकरसस्वरूपाविर्भावयुक्ते-त्यर्थः । बाढमित्यत्र बाधकं शङ्कते—**सेवात्वादिति** । अयमाशयः ; स्वामिभृत्यभावबुद्ध्यनुवृत्तिस्सेवात्मा प्रसिद्धा । सा च दुःखात्मतया तद्धेतुतया वा व्याप्ता । तदत्राऽपि तथा स्यादिति । अत्र धर्मिण्यप्रसिद्धे हेतोराश्रयासिद्धिमभिप्रेत्याह—**न तदिति** । प्रमिते तद्ग्राहकेण बाधमाह—**धर्मीति** । श्रूयते हि * रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति इति । आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति । स्मर्यते च * तदस्य त्रिविधस्यापि इत्यारभ्य * निरस्ता-तिशयाह्लादसुखभावैकलक्षणा । भेषजं भगवत्प्राप्तिरेकान्तात्यन्तिकी मता ॥ इति । सोपाधिकत्वमप्याह—**पाप्मेति** । नित्यानामनित्यानां वा दुःखकृत्त्वं हि सहकारिणि पापे सत्येव ; अनित्यानां तु पापजन्यतयाऽपि । एवं साध्य-व्यापकत्वं सिद्धम् । साधनाव्यापकत्वमप्याह—**स चेति** । पुण्यपापव्यपायादित्यनेन श्रुतिस्मृतिसूचनम् । अस्तु तर्हि सुखरूपत्वाभावे सेवात्वं हेतुः इत्यत्रापि धर्मिसिद्ध्यसिद्धिविकल्पदौःस्थ्यस्य तदवस्थत्वादव्यक्तमप्रयोजकत्वं व्यनक्ति—**आत्मान** इति । अयं भावः—कर्मोपाधिकसेवा हि कर्मवैचित्र्यात्प्रतिकूला उदासीना किञ्चिदनुकूला च स्यात् । इयं तु निरुपाधिकस्वामिसेवा यथागमं निरवधिकसुखरूपेति । एतेन प्रसङ्गोत्थानमपि निरस्तम् । श्रुतिविरोधे व्याप्तिशैथिल्ये च तस्याप्ययोगात् । ये च मुक्ते ज्ञानचिकीर्षाप्रयत्नसुखदेहादियोगा दुःखादिसाधकाः प्रयोगाः, तेऽपि यथोक्तप्रकारेण प्रतिषेध्याः, ब्रह्मणा चानैकान्ता इति । अथापि यदि मुक्तौ सुखम्, तदा सुखरागान्मुमुक्षुः प्रवर्तेत इति कथं वीतरागा-धिकारः । रागाच्च प्रवृत्तः प्रागिव बध्येत । हन्त यदि रागस्सर्वो बन्धहेतुरिति मन्यसे ? तद्विशेषो वा ? आद्ये सर्वा-भीष्टस्संसारनिवृत्तिरागोऽपि तथा स्यात् । द्वितीये कोऽसौ विशेषः ? सुखविषयत्वमेवेति चेन्न ; तादृशस्यापि पापानारब्ध-त्वादेव दुःखहेतुत्वायोगात् । अथ तदप्यत्र शङ्क्येत, तदा आगमबाध इति । एवं मुक्तस्य स्वदेहसृष्ट्यादिरागोऽपि व्याख्यात इति ॥ ६४ ॥

सर्वस्याप्यानुकूल्यं स्वत इह जगतो वासुदेवात्मकस्य
व्यक्तिं तन्मुक्तिकाले भजति भवकृतज्ञानसङ्कोचहानेः ।
प्राचीनप्रातिकूल्यक्रमविषयधिया नैष दुःख्येत्तदानीं
प्रागप्येतत्स्वकर्मोपधिकृतभगवन्निग्रहैकप्रयुक्तम् ॥ ६५ ॥

ननु यदि मुक्तस्सर्वज्ञः, स कथं न दुःख्येत्? विषयविशेषसंदर्शनं हि बद्धस्यापि दुःखहेतुः, अबुद्धिपूर्वकदुःखोत्पत्त्यसंभवात्। न चानुकूलमात्रविषया मुक्तधीः, *सर्वं हि पश्यः पश्यति इति श्रुतेस्सङ्कोचानभ्युपगमात्। *न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम् इति पूर्वोक्त्या सोढव्यस्सङ्कोच इति चेन्न; सङ्कोचकानां निश्शेषक्षीणत्वात्। न चात्र, *काणतां जनयेद्दोषो निम्बवृन्दाकरेणुमान् इतिवत्किञ्चिन्निमित्तमन्तरेण स्वतःप्राप्तप्रकाशैकदेशभङ्गः स्यात्; *मण्डूकवसयाऽक्ताक्षा वंशानुरगबुद्धिभिः इतिवद्वा केनचिद्धेतुना प्रागनुकूलेषु प्रतिकूलबुद्धिर्युक्ता। इदानीं तु प्रतिकूलेष्वनुकूलधीर्यदि तादृशोपाधितस्स्यात्, तथा सति भ्रान्त्यनुवृत्त्या कर्माद्यनुवृत्तिरपि दुर्वारा। एतेन नित्यानां मुक्तानां च क्वचिदस्थानभयशङ्कावादोऽप्यन्यपरतया नेतव्यः। एवं मुक्तबुद्धेस्सङ्कोचासङ्कोचविकल्पासहतयाऽत्र पाषाणकल्पपक्ष एव ज्यायानिति। तत्राह—**सर्वस्ये**ति। यदि स्वतोऽनुकूलस्वामिभूतितया दृश्यमानं हि सर्वमपि स्वतोऽनुकूलमेव भायात्, तर्हि बद्धदशायामपि तथा भासेतेत्यत्राह—**व्यक्त**मिति। तादृक्त्वं प्रतिबन्धकविगमे हि प्रकाशेत; अनुकूलस्वभावं ब्रह्मवत्तदात्मकं सर्वं कथमिदानीं कैश्चित्प्रतिकूलतया गृह्यत इति चेत्, इत्थं—कर्मसंवृतधियां यथाकर्म भानभेदोपपत्तेः। यथाऽऽहुः—वस्त्वेकमेव दुःखाय सुखायेर्ष्यागमाय च। कोपाय च यतस्तस्माद्वस्तु वस्त्वात्मकं कुतः॥ इति। *तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय यतः प्रसादाय च जायते॥ इति च। अत उपाधिविगमे स्वतःप्राप्ताभिव्यक्तिर्युक्ता। ननु संसृत्यवस्थासिद्धं निरयाणां प्रातिकूल्यं स्वानुभूतं च दुःखं मुक्तः पश्यति वा? न वा? आद्ये, *गन्धाश्मरजसा स्पृष्टो नष्टो दीपः पुनर्ज्वलेत् इति न्यायेन पुनरपि दुःखसन्ततिरुदियात्। उत्तरत्र धीसङ्कोचाभ्युपगमप्रसङ्गः, तथाऽपि दुःखित्वं स्यात्तस्य तद्व्याप्तयङ्गीकारादित्यत्राह—**प्राचीने**ति। क्रमशब्दः तदातनसन्तानसूचनार्थः, कर्मानन्तर्यपरो वा। तदानीं—मुक्तिकाले। न हि प्राप्ताभिषेकं प्राचीनकारागृहवासधीर्दुःखाकरोति। स्वाधारवर्तमानसुखादिसाक्षात्कारं च भोगमाहुः। प्रसिद्धं च—*प्राप्तानि दुःखान्यपि दण्डकेषु संचिन्त्यमानानि सुखीबभूवुरिति। पूर्वमपि प्रातिकूल्यं यत्प्रयुक्तम्, तन्निवृत्तौ कथं तत्स्यादित्यभिप्रायेणाह—**प्रागपी**ति॥ ६५॥ **इति निरुपाधिकब्रह्मानुभवस्य दुःखरहितनिरतिशयानन्दत्वम्॥**

अन्ये चानादिशुद्धाः श्रुतिसमधिगतास्सूरयस्सन्त्यसङ्ख्याः
कर्माभावादनादेर्न तु भवति कदाऽप्येषु संसारबन्धः।
शेषाणां शेषिणश्च स्फुरति सुखतया सर्वदा सर्वतत्त्वे
नित्यानां मुक्तिभाजामपि भुवनकृता भोगमात्रं समानम्॥ ६६॥

यत्तु तन्त्रान्तरस्थैरुच्यते—*मुक्तात्मानोऽपि शिवाः किं त्वेते यत्प्रसादतो मुक्ताः। सोऽनादिमुक्त एको विज्ञेयः पञ्चमन्त्रतनुः॥ इति, तत्र श्रुतिविरोधमभिप्रेत्याह—**अन्य** इति॥ श्रुतिसमधिगताः—*सदा पश्यन्ति इति श्रुत्या निर्बाधमधिगता इत्यर्थः। नह्यसौ श्रुतिर्मुक्तविषया, मुक्तानामेकैकशस्सदा दर्शनाभावात्। इयं हि दर्शनं सदेति विशिंषत्यपि सदादर्शनविशिष्टान् सर्वान् स्वरसतोऽवगमयति। न त्वादिमद्दर्शनप्रवाहसातत्यम्, तत्र बहुवचनस्य सङ्कोचकादृष्टेः। उपबृंहणतश्च कपिञ्जलन्यायानवतारादसंख्या इत्युक्तम्। ननु परतन्त्रचेतनानामस्मदादिवत्संसृतिरवर्जनीया। अथ कथमनादिसिद्धत्वमित्यत्राह—**कर्माभावा**दिति। उक्तहेतुना कर्माप्यवर्जनीयमिति चेन्न, सदादर्शनश्रुत्यैव मिथ्याज्ञानादिपूर्वकस्य कर्मणः प्रत्यासेधात्। अन्यथा कथमीश्वरोऽप्यङ्गीक्रियते? मा भूदिति चेत्, श्रुतिबाध इति शेषं पठ। सर्वप्रशा-

सिनुश्शास्त्रवश्यत्वाभावान्न कर्मवश्यत्वमिति चेन्न, पारतन्त्र्येऽप्यनादिसर्वज्ञानामपि तदभावं पश्य । अथापि कर्माभावो न तावदन्योन्याभावः, संसृत्यभावं प्रत्यप्रयोजकत्वात् । न प्रागभावः, तस्य भावशिरस्कत्वात् । न प्रध्वंसः, भावपूर्वकत्वात् । न संसर्गाभावः तस्यापि प्रागभावादिविकल्पदौःस्थ्यादिति चेत्; तन्न, कर्मात्यन्ताभावस्य विवक्षितत्वात्, अन्यथा ईश्वरेऽप्येवं विकल्पप्रसङ्गात् । नित्येषु च नाशकारणाभावान्नाशाभाव इत्यभ्युपगमस्य भङ्गप्रसङ्गात् । कस्यचिदनादिसिद्धत्वे को हेतुरिति पृच्छन्तस्त्वहेतुविद्भिरनुग्राह्याः । अत एव कथमीश्वरस्य क्वचिदिच्छा नित्या क्वचिदनित्येति वैषम्यानुयोगश्च विधूतः । न चाधिकारवैचित्र्यादनन्तादिष्वक्षेत्रिष्विन्द्रादिवत् क्षेत्रित्वानुमितिश्शक्या, स्वच्छन्दैशावतारवत् । यदपि मुक्तानां शिवत्वमुक्तम्, तत्किमीश्वरतादात्म्यं तज्जातीयत्वं वा तद्गुणसाम्यं वा? नाद्यः, हेतुमुक्तस्यानादिमुक्ततादात्म्यासंभवात् । न द्वितीयः, * न तत्समश्चाभ्यधिकश्च, * न त्वत्समोऽस्तीत्यादिविरोधात् । न तृतीयः, पारतन्त्र्येऽपि शुद्धिमाङ्गल्यसार्वज्ञ्यादिमात्रेण तत्सिद्धेः । अथ नित्यानां मुक्तानामनीश्वरत्वे तद्भोगसाम्यं न स्यादिति मन्वीथाः, तत्र ब्रूमः—**शेषाणा**मिति । स्वतन्त्रपरतन्त्रयोर्यथादृष्टि भोग्यसाम्याद्भोगसाम्यं युज्यते । सूत्रितं चैतत्—*भोगमात्रसाम्यलिङ्गाच्चेति ॥ ६६ ॥ **इति नित्यसूरिसिद्धिः, नित्यमुक्तेश्वराणामपि भोगसाम्यं च ॥**

सालोक्याद्याः प्रभेदा ननु परिपठिताः क्वापि मोक्षस्य मैवं
सायुज्यस्यैव तत्त्वात्तदितरविषये मुक्तिशब्दस्तु भाक्तः ।
तस्मिंस्ते च त्रयस्स्युस्तदपि च सयुजोर्भाव इत्यैकरस्यं
युक्साम्यं [लोक]योगसाम्यादिवदपटुधियां तावतैक्यमोहः ॥ ६७ ॥

नन्वग्निहोत्रदर्शपूर्णमासादिसाधनविशेषात्तत्साध्यस्वर्गे तारतम्यमङ्गीकुर्मः, तथा मोक्षेऽपि स्यात्; अन्यथा कथमाप्तशास्त्रे क्वचित्सालोक्यादिमुक्तिभेदकथनमिति शङ्कते—**सालोक्ये**ति ॥ तेषु मुक्तिशब्दो न मुख्य इत्यभिप्रायेणाह—**मैव**मिति । मुख्यं मुक्तिशब्दविषयमाह—**सायुज्यस्ये**ति । अन्यत्र प्रयोगः कथमित्यत्राह—**तदितरे**ति । तथा च नियम्यते—*लोकेषु विष्णोर्निवसन्ति केचित्समीपमिच्छन्ति च केचिदन्ये । अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्तः ॥ इति । तर्हि सायुज्ये सालोक्यादिभोगाभावात् भोगसाम्यसूत्रं परिमितविषयं स्यादित्यत्राह—**तस्मिन्नि**ति । सायुज्ये हि सहस्रे शतादिकमिव सालोक्यादित्रिकमन्तर्भवतीति एकस्मिन्वाक्ये ब्रह्मसायुज्यसालोक्ययोस्सहपाठोऽप्येवमन्तर्भावविवक्षया मुख्यगौणमुक्त्यपेक्षिपुरुषभेदानुरोधाद्वा यथार्हं निर्वाह्यः । ननु यदि सायुज्यमेव मोक्षः, तदा पूर्वोक्तं भोगसाम्यं न स्यात् । ऐक्यापत्तिरेव हि सायुज्यम् । अतः कस्य केन भोगसाम्यमित्यत्राह—**तदपी**ति । नन्वेकीभूतयोर्भावो हि सयुजोर्भावः । तत्र परं प्राचीनब्रह्मानन्दानुवृत्तिमात्रमेव स्यात् । *अन्यूनश्चाप्यवृद्धिश्चेति स्मावनात् । अतो भोक्तृद्वित्वाभावाच्चोद्यं तदवस्थमित्यत्राह—**युक्साम्य**मिति । अत्र सालोक्यादिनयाद्युज्यमानं युक्छब्दार्थः । तेन भोगसाम्यमाक्षिप्यते । सायुज्यसार्ष्टिसहपाठे तु कण्ठोक्तम् । न हि सयुक्छब्द एकशब्दपर्यायः; तथा क्वचिदपि प्रयोगाभावात् । *द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते इति द्वयोरेव प्रयोगाच्च । *तयोरन्यः इत्युत्तर वाक्ये च स्पष्टमेतत् । *एतासामेव देवतानाँ सायुज्यम् इत्यत्र बहुदेवतासायुज्यं युगपत्? क्रमेण वा? नाद्यः, भिन्नैरेकस्य युगपदेकतापत्त्ययोगात् । न द्वितीयः, विभागाविभागविकल्पदौःस्थ्यात् । विभागयोग्यत्वे हि संयोगविशेषमात्रं स्यात् । तदभावे तु क्रमेणोत्तरोत्तरतादात्म्यादेकपरिशेषः स्यात्; न चैतत्क्वचिद्दृष्टमिष्टं वा । यदि कश्चिन्नैवण्डुकः ऐक्यं

सायुज्यमिति पठेत् तत्तस्य स्वपक्षाभिनिवेशेन शब्दशक्तिग्रहणापरिबुद्धतया वा प्रयुक्तमित्युपेक्षणीयम् । द्वित्वे स्थितेऽपि सरित्समुद्रसलिलयोरिव संभेदविशेषकृतमेकराशित्वं वा विवक्षितम् ॥ ६७ ॥ **इति मुक्तानुभवस्य समानभोगत्वलक्षणसायुज्यैकरूपत्वम् ॥**

विश्वाधारस्य लक्ष्मेत्यभिहितमखिलं संभवेन्नापवृत्ते
तन्निष्ठत्वादि सर्वं न हि विलयमियात्तच्छरीरस्य तस्य ।
तन्निघ्नत्वेऽपि मुक्तो न भवति पुनरावृत्तिशङ्काकलङ्की
तादृक्सौहार्ददृष्टेर्भयमिह तदनावृत्तिशास्त्रेण विद्मः ॥ ६८ ॥

यदि मुक्तोऽपि परतन्त्रः, तर्हि स्वच्छन्दप्रवृत्तपरबुद्ध्या पुनरपि बन्धः किं भवेदिति नित्यं शङ्काकलङ्कितः स्यात् । अतः पारतन्त्र्यादिपरिहारेण परब्रह्मसाम्यसिद्धिरवधार्या । अन्यथा *निरञ्जनः परमं साम्यमुपैति इति परमत्वविशेषणं व्यर्थं स्यादित्यत्राह–**विश्वाधारस्येति** ॥ अयं भावः–ईश्वरस्य यल्लक्षणत्वेनोक्तं तत्सर्वं मुक्ते न स्यात्, लक्ष्येतरगामित्वे लक्षणत्वायोगात् । *एकस्सर्वशरीरीति च शास्त्रसिद्धम् । अतो मुक्तस्याप्याधेयत्वादिनियमो न निवर्तेत । परमत्वविशेषणं तु तुलाधृतसुवर्णपाषाणयोरिव न सर्वाकारसाम्यं साधयितुमर्हतीति अतिशङ्कामपाकरोति–**तन्निघ्नत्वेऽपीति** । मुक्तस्य शङ्कानिवृत्तिहेतुमाह–**तादृगिति** । स्वतन्त्रेऽपि स्वाभाविकसौहार्ददर्शनादित्यर्थः । मुमुक्षूणां मुक्तावर्तनशङ्का केन निवर्त्येत्यत्राह–**भयमिति** । श्रुतिस्मृतिचक्षुषो वयं त्रैविद्याः, तस्मादस्माकमपि परसौहार्ददर्शनं सिद्धमिति भावः । *सर्वेषु लोकेषु कामचारो भवति, *इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्, *स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरस्समुत्तिष्ठन्ति इत्यादिशास्त्रदृष्ट्या च पुनरावृत्तिं वयं शङ्कामहीति चेन्न; ईदृशवाक्यानां विधूतपुण्यपापस्य स्वच्छन्दवृत्तौ तात्पर्यात् । अन्यथा महावाक्यविरोधात् । ननु *एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते इति सविशेषणश्रवणादावर्तान्तरेष्वावृत्तिश्शङ्क्येतेति चेन्न; अहेतुकावृत्त्ययोगाद्बहुश्रुतिविरोधात् विशेषणोक्तेश्च घोरत्वानुवादपरत्वेन सफलतयाऽन्यत्रावृत्तावौदासीन्यात्; अन्यथा उपबृंहणशतं च प्रकुप्येत् । गीयते च–आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन । मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ॥ इति । *इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥ इति ॥ एतत्सर्वमभिप्रेत्य सूत्रम् *अनावृत्तिश्शब्दादिति ॥ ६८ ॥ **इति पुनरावृत्तिप्रसङ्गपरिहारः ॥**

विश्वैर्वैशेषिकैस्तैर्भवति विरहितो नाशितादृग्गुणत्वा-
ज्जीवात्मा जन्मकाले घटवदिति यदि स्यादिहाम्नायबाधः ।
दृष्टान्तस्साध्यहीनः क इव निगमविल्लिप्सते मुक्तिमेतां
धीर्नित्येच्छादयस्तत्परिणतय इति स्याच्च हेतोरसिद्धिः ॥ ६९ ॥

अथ वैशेषिकादिपठितं प्रस्तरप्रायमोक्षं पराचिकीर्षुस्तदुक्तं प्रयोगमनुवदति–**विश्वैरिति** ॥ जीवाः पार्थिवपरमाणव आकाशश्च कदाचिदशेषविशेषगुणशून्याः, अनित्यविशेषगुणवत्त्वात्, उत्पत्तिक्षणे घटवत् । न चात्र दृष्टान्तस्साध्यविकलः; कार्यद्रव्यगुणानां तद्द्रव्योत्पत्त्यनन्तरभावित्वनियमात्, सहोत्पत्तावुपादानोपादेयभावायोगात् । न च भावस्समवायिकारणेन विना कश्चिदुत्पद्यते । ननु जीवः सर्वदा विशेषगुणवान् आत्मत्वात् ईश्वरवत् इति प्रतिप्रयोगः स्यात् ।

तन्न; निरीश्वरवादिनां दृष्टान्तासिद्धेः। भूषणस्य तु मुक्तिदशायां ज्ञानं कार्यमकार्यं वा? आद्ये करणसापेक्षत्वान्नश्वरत्वादिप्रसङ्गः। उत्तरत्र इदानीमप्युपलभ्येत। एकदा चैकस्य ज्ञानद्वयमयुक्तम्। किंच नित्यज्ञानं मुक्तौ भासते न वा? आद्ये स्वतो भानेऽपसिद्धान्तः; परतो भाने ज्ञानान्तरक्लृप्तिगौरवं, तदपि कार्यमकार्यं वेति विकल्पदौःस्थ्यं च। उत्तरत्र निर्विषयं सविषयं वा? नाद्यः तादृशख्यात्यनभ्युपगमात्। द्वितीये तु सर्वविषयं नियतविषयं वा? आद्येऽनेकानादिसर्वज्ञवादप्रसङ्गः। मुक्तिदशायां सर्वज्ञत्वं भवत्विति चेन्न, तथाऽपि तादृशत्र्यन्तवादानङ्गीकारात्। नियतविषयत्वं त्वीश्वरज्ञानस्येव मुक्तज्ञानस्यापि नित्यस्य दुस्साधम्। सामग्रीभेदतो हि सर्वत्र धियां विषयनियमः। विषयश्च तस्य कः? आनन्द इति चेत् स किं कार्योऽकार्यो वा? नाद्यः, अनभ्युपगतेः, हेतुनिरूपणायोगाच्च। न द्वितीयः, अद्याप्युपलब्धिप्रसङ्गात्। विषयविषयित्वानुपपत्त्याऽनुपलब्धिरिति चेत्; तन्न, किं तयोः स्वरूपमतिरिक्तं वा? आद्येऽनाद्युपलब्धिप्रसङ्गः। उत्तरत्र भावस्योत्पन्नस्य ध्वंसित्वं स्यात्। उत्पन्नोऽपि कश्चिद्भावो न नश्यतीति चेन्न, अदर्शनात् कल्पकाभावात्। * आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते इति श्रुत्या तथाऽङ्गीकुर्म इति चेन्न, अयमानन्दशब्दो जीवविषयः परविषयो वेत्यनिर्धारणात्। स्वानन्दश्च साक्षात्क्रियमाणस्साधारो निराधारो वा भाति? पूर्वत्रानन्दमात्रविषयत्वव्याघातः। परत्र अहं सुखीति भानाभावादानन्दाभिव्यक्त्याऽपि न पुरुषार्थभोक्तृत्वसिद्धिः। सुखादेस्स्वसमवेततयाऽनुभवो हि भोग इत्यास्तामेतत्। यदि कश्चित्**कौमारिल** एवं प्रयुञ्जीत—देवदत्तमुक्तिकालः एतज्ज्ञानवान्कालत्वादिति, तस्य देवदत्तसुषुप्त्यादिकालैरनैकान्त्यम्। तेषामपि पक्षीकरणे तदातनज्ञानस्य निर्विषयत्वसविषयत्वादिविकल्पक्षोभः। अत एव—* निजं यत्त्वात्मचैतन्यमानन्दोऽध्यक्ष्यते च यः। यच्च नित्यविभुत्वादि तेनात्मा नैव मुच्यते॥ मनःकरणकेनात्मा प्रत्यक्षेण प्रतीयते। इत्युपदेशोऽप्यश्रद्धेयः। यच्च कैश्चिच्चिन्मात्ररूप आत्मा चेतयितृत्वादिरहितः प्रकाशत इत्यनुशिष्यते, तदपि निष्प्रमाणकम्। अतस्समस्तविशेषगुणशून्यात्मानुमानं निष्कम्पमिति। तत्राह—**स्यादि**ति। यद्यत्र कदाचिज्जीवः स्वधर्मभूतज्ञानरहित इति साध्यं, तदा तन्नित्यत्वश्रुतिविरोधः। अथ तद्विकारविशेषरहित इति, तत्राव्यवहिताधारत्वनिषेधे सिद्धसाधनम्। व्यवहिताधारत्वनिषेधे तु शास्त्रबाधः, स्वमतेन साध्याप्रसिद्धिश्च। उत्पत्त्यवस्थघटदृष्टान्तश्च साध्यविकल इत्याह—**दृष्टान्त** इति। प्रागसद्द्रव्योत्पत्तेर्निरस्तत्वेनाश्रयहान्या तन्निदर्शनायोगात्। नित्यस्य तु त्रिगुणस्य द्रव्यस्य नित्यं यत्किंचिद्विशेषगुणवत्त्वादिति शेषः। अनुमानस्य बाधकतर्कमाह—**क इवे**ति। अत्रेदमाकूतम्—केवलं दुःखनिवृत्त्यर्था न क्वचिदपि कस्यचिदपि प्रवृत्तिर्दृश्यते। उत्तरसुखमभिसन्धायैव सर्वेषां दुःखनिरासप्रवृत्तिरिति लोकवादविदः। अन्यथाऽपि ब्रूमः—सुषुप्त्यवस्थजीवमुपदिष्टवति प्रजापताविन्द्रः प्राह—* न ह खल्वयमेवं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं पश्यामि इति। ततः प्रजापतिरपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तगुणकं ब्रह्मसमं मुक्तमुपदिदेश, अतः केवलं दुःखनिवृत्तिर्न मुक्तिरिति जानन् कथं त्वदुक्तमुक्तिकामः प्रवर्त्स्यतीति। हेतावपि विकल्पाक्षमत्वं मत्वाऽऽह—**धीरि**ति। अनित्यविशेषगुणवत्त्वादिति वदता किं धीस्वरूपं तत्परिणतयो वा आत्मगुणत्वेन कथ्यन्ते? स्वसिद्धान्तदृष्ट्या पुरुषगुणभूतागन्तुकचैतन्यादयो वा? तत्राद्यस्य दूषणम्—**धीर्नित्ये**ति। अनित्यविशेषगुणवत्त्वमसिद्धमित्यर्थः। द्वितीये त्वात्मनस्तद्वत्त्वं नेति। मतद्वयेऽपि स्वरूपासिद्धिमाह—**इच्छादय** इति। तृतीयेऽपि त्र्यन्तविद्भिरनङ्गीकारादसिद्धिस्सुगमेति तस्य पृथगनुद्धारः। एवं दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीपसन्ततिवत् इत्यनुमानमपि निरस्तम्; आगमसिद्धाभिर्नित्यसन्ततिभिरनैका-

न्त्यात्, प्रदीपावयविसन्ततेश्चास्मान्प्रति निदर्शनायोगात्, अवस्थासन्ततेश्चोच्छेदाभावात्, दीपत्वावस्थासन्ततिवदिति त्वया निदर्शयितुमयुक्तत्वादिति ॥ ६९ ॥ **इति पाषाणवन्मोक्षभङ्गः ॥**

आत्मा चिन्मात्ररूपो विकृतिमति जडे बिम्बितो बुद्धितत्त्वे
तच्चास्मिँस्तद्विवेकाग्रहणविरचितः पुंसि संसारमोहः ।
अन्त्या विज्ञानवृत्तिः प्रकृतिपुरुषयोरन्यतां गाहमाना
तादृक्संसारभेत्त्री पुरुष इह सदा मुक्त एवेति साङ्ख्याः ॥ ७० ॥

अथ सांख्योक्तं चिदचिद्विवेकं संसारं तन्निवृत्तिप्रकारं च संगृह्णाति—**आत्मेति** ॥ **चिन्मात्ररूप** इति पुरुषस्वरूपशोधनम्, नासावचित्स्वभावः, नच ज्ञातेत्यर्थः । **विकृतिमति जड** इत्यचेतनधर्माणामुपलक्षणम् । एवं हि विविच्यते—*मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त । षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ *त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि । व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ इति । **बिम्बित** इत्यादिना प्रकृतिपुरुषयोरितरेतरधर्माध्यासे हेतुविशेष उच्यते । अप्रकाशमाने कथं तद्धर्माध्यास इत्यत्रोक्तम्—**तच्चास्मि-न्निति** । स चाध्यास एवं कथ्यते—*तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् । गुणकर्तृत्वे च तथा कर्तेव भवत्युदासीनः ॥ इति । फलितमाह—**तदिति** । विवेकः—भेदः । तदग्रहणशब्देन सामग्र्येकदेशोपादानम् ॥ *ज्ञानेन चापवर्गो विपर्ययात्तद्विपर्यासः । वैराग्यात्प्रकृतिलयः संसारो भवति राजसाद्रागात् ॥ इति कारणान्तरमपि हि संगृह्यते । कृपाणप्रतिफलितमुखमलिनतान्यायसूचनाय मोहशब्दः । अस्य किं निवर्तकमित्यत्राह—**अन्त्येति** । विज्ञानवृत्तिः—विज्ञानरूपान्तःकरणवृत्तिः, विज्ञानस्य वा बुद्धितत्त्वस्य विवेकख्यातिरूपा परिणतिः । *विवेकख्यातिपर्यन्तमज्ञानं चित्तचेष्टितम् । *एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् । अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ तेन निवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्ताम् । प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितस्सुस्थः ॥ प्रकृतेस्सुकुमारतरं न किंचिदस्तीति मे मतिर्भवति ॥ या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ इति । स्फटिकरागनिवृत्तिन्यायसूचनाय तादृक्छब्दः । यद्यपि संसारः पुरुषस्यारोपितः, तथाऽपि तद्भ्रमो दुस्त्यज इत्यत्राह—**पुरुष** इति । इह—संसारे वर्तमानेऽपि, पुरुषस्तु भ्रान्त्याऽप्यनाघ्रातस्सर्वदा पुष्करपलाशवन्निर्लेप इत्यर्थः । तथा चाहुः—*तस्मान्न बध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ इति ॥ ७० ॥ **इति समीक्षोक्तसंसारानुवादः ॥**

नीरूपे बिम्बितत्वं क्वनु भवति कथं रूपशून्यस्य तस्या-
न्निर्लेपे संसृतिः का कथमतिविशदो निष्क्रियश्चैष मुह्येत् ।
नित्यं वा किं न मुह्येदुपधिभिरितरैर्वेत्तु भेदं कथं वा
को वा मोक्षोऽद्य पुंसः प्रथममपि न खल्वस्य दुःखादिगन्धः ॥ ७१ ॥

एवमनूदितेष्वर्थेषु चिन्मात्ररूपत्वस्य प्रागेव ज्ञातृत्वसाधनेन निरस्तत्वात्तदनन्तरोक्तं बिम्बितत्वं दुदूषयिषुस्तन्मुख्यममुख्यं वेति विकल्पं भावयन्मुख्यं दूषयति—**नीरूप** इति ॥ मुकुरादीनां मुखादीनां च रूपवत्त्वनियमादात्मान्तःकरणयोस्तदुभयस्थानीयत्वं न घटत इति वाक्यद्वयाभिप्रायः । दृक्छक्तिरूपः संसरन् [आत्मा] पुरुषस्स्वभोगार्थं स्वनिष्ठां बुद्धिं व्यनक्ति, तेनाबोद्धाऽपि सन् बोद्धेव भवति, बुद्धिरपि सलिलादिवत्स्वच्छस्वभावतया स्वनिष्ठां चिच्छक्तिं व्यनक्ति, तेन

स्वयमबोद्ध्री सती बोद्ध्री भवति । एतावतैव बिम्बितत्ववाचोयुक्तिरित्यमुख्यपक्षेऽपि संसरत्यात्मेति विशेषितम् । न तावदिदं निरर्थकम्, वाक्येऽनन्वयापत्तेः । मुक्तबद्धयोरपि परस्पराभिव्यञ्जकत्वप्रसङ्गाच्च । सार्थकत्वे निर्लेपत्वसमर्थनविरोध इत्यभिप्रायेणाह–**निर्लेप** इति । एतेन शास्त्रारम्भहेतुभूता मुमुक्षा दुःखत्रयाभिघातकजिज्ञासा च न संभवतीत्यपि सूच्यते । संसृतिहेतुं भेदाग्रहं तन्मूलं भ्रममपि निरस्यति–**कथ**मिति । चिद्रूपस्यात्मनो भेदः स्वरूपं धर्मो वा? आद्ये चिद्रूपतयैवातिविशदो भातीति कथं भेदस्याग्रहः, तस्य तत्त्वात्? द्वितीये ज्ञातृत्वकर्तृत्वभोक्तृत्वादिधर्मैस्त्वयैवात्मन्यपोढ इति न तादृशधर्माग्रहः । प्रकृतिपुरुषसाधारणयोस्तु नित्यत्वविभुत्वयोरग्रहो न ते भेदाग्रहः । कार्यप्रकृतौ तयोरभावाद्वैधर्म्यरूपत्वमिति चेन्न, कार्यकारणप्रकृत्योस्तादात्म्याभ्युपगमात्, कार्येऽपि तयोरङ्गीकर्तव्यत्वात् । अन्यथा कथं नासत्कार्यवादः? धर्मधर्मितादात्म्यवादे च धर्मिभाने धर्मोऽपि भायादेवेति कथंचिदपि न भेदाग्रहसंभवः । अत एवात्मा न मुह्येत् । निष्क्रियत्वाच्च ज्ञानमेव क्रियेति भीत्या जहतः कथं तद्विशेषग्रहः? अमुह्यन्नप्यन्यमोहं स्वस्मिन्नध्यवस्यतीति चेत्, तदिदं शतमदित्सतः शतार्द्धद्वयदानमिति । ननु विकृतिविशेषवदुपाधिसंनिधानमेवास्य मोहोऽस्त्वित्यत्राह–**नित्य**मिति । ईदृशोपाधिसन्निधानस्य कालान्तरेऽपि सुलभत्वात् कदा मुक्तिः? निरधिकारप्रकृतिदशायामिति चेन्न, सर्वनित्यत्ववादिभिरधिकारस्यापि ध्वंसपरिग्रहायोगात् । अनभिव्यक्तिश्च तस्य दुर्वचा, अभिव्यक्तेरपि निवृत्त्यसंभवादेवेति मोहनिवृत्त्यर्थो भेदग्रहश्च न स्यादित्याह–**वेत्त्वि**ति । प्रकृतिधर्माध्यासश्च प्रत्यूढ इति भावः । क्रियावती प्रकृतिरेव चिच्छायापत्तिमती वेत्त्री भवतीति चेन्न, छायापत्तेर्निरस्तत्वात् । पुरुषस्य भेदग्रहाभावे च स्ववाक्यविरोधः; यदात्थ *प्रकृतिं पश्यति पुरुषः, *दृष्टा मयेत्युपेक्षते एक इत्यादि । भाक्तमिदं दृष्टत्वमिति चेत्तर्हि प्रागिव भेदाग्रह एव । अस्तु वा प्रकृतिरनुपकारिणः पुंस उपकारिणी, तदर्थं भेदग्राहिणी; तथाऽप्यनया तस्य न किंचिदुपकर्तव्यमित्याह–**को वे**ति । संसारनिवृत्तिरिति चेत्तत्राह–**प्रथम**मिति । पूर्वमित्यर्थः । मा भूदुपकर्तव्यम्, का हानिरिति चेत्तस्यार्थमपार्थकं चरति । *पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य *कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति इति स्वोक्तहानिः । *रूपैस्सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः । सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ इत्यप्युक्तमिति चेत्, तथाऽपि स्वोक्तहानिरेव । पुरुषार्थं प्रतीत्यपि व्यर्थं वचः । सृष्टिप्रलयबन्धमोक्षादयश्च त्वन्मते कथं पौर्वापर्यं भजेरन्? सर्वनित्यत्ववादिनस्तत्तद्धेतुभूतगुणवैषम्यादेरपि क्रमभावित्वायोगादिति ॥ ७१ ॥

व्यापिन्येकाऽपि सांख्यैः प्रकृतिरभिहिता सर्वसाधारणी सा
व्याप्ता जीवाश्च सर्वे प्रकृतिपरिणतिभोग एषामभीष्टः ।
सर्वे सर्वस्य भोगाः स्युरिह तत इमे संनिधानादिसाम्यात्
बुद्धीच्छाद्यं च सर्वं प्रकृतिगतमतो न व्यवस्था ततोऽपि ॥ ७२ ॥

अत्र *नित्यं वेति वाक्ये बद्धमुक्तव्यवस्था न स्यादित्युक्तम् । अथ *जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ इति पुरुषबहुत्वसाधकतयोक्ता च व्यवस्था न सिध्यतीत्याह–**व्यापिनी**ति ॥ एकत्वं सत्त्वरजस्तमोरूपद्रव्यसङ्घातात्मकतया । शेषं तु पूर्वार्धं सुगमम् । ततः किमित्यत्राह–**सर्वे** इति । इमे–प्रत्यक्षानुमानागमैस्सर्वेषामात्मसाक्षिकं प्रतिनियततया प्रख्याता इत्यर्थः । व्यवस्थापकानुपपत्तिमात्रे हेतुमाह–**संनिधाने**ति । स्वरूपसंनिधिस्तावत् सर्वत्र सर्वेषां समः । तद्विशेषो दुर्वचः । विशेषवतां संनिधिरेव संनिधिविशेष इति चेन्न, **औत्सुक्य-**

पठितविशेषस्यानादरात् ; अङ्गीकारेऽपि तस्य भोगहेतुत्वाभावेन व्यवस्थापकत्वायोगात् । विहितनिषिद्धजनितादृष्टभेदैरेव हि भोगव्यवस्था, अन्यथा निर्निमित्तभोगवादप्रसङ्गात् । अस्तु तर्हि तादृशनिमित्तोपश्लेषाद्व्यवस्था । मैवम्, निष्क्रियस्य ज्ञानचिकीर्षाप्रयत्नानभ्युपगमेन कर्तृत्वाभावव्यवस्थापनात् । अकर्तुश्च न क्रियाजन्यादृष्टाश्रयत्वं तत्फलभोक्तृत्वं वा समस्ति । **श्लो.** अस्वधर्मसमानीतैरन्यनिष्ठैरुपाधिभिः । यदि लिप्येत यः कश्चिन्न लिप्येरन् कथं परे ॥ प्रकृत्यंशगतैर्धर्मैर्यदि तादृग्व्यवस्थितिः । अजागलस्तनप्रायः पुमान् किमिति कल्प्यते ॥ तप्तायःपिण्डनीतिश्च नोदाहर्तुमिह क्षमा । तत्र संसर्गिसंसर्गभेदात् सर्वोपपत्तितः ॥ न सत् प्रच्यवते यस्य नासदात्मानमृच्छति । तस्य बन्धश्च मोक्षश्च कथं न सह तिष्ठतः ॥ तदेतत् सर्वमभिप्रेत्याह—**बुद्धी**ति । **प्रकृतिगत**मित्यनेन बाह्यगतत्वं मूलप्रकृतौ नित्यस्थितत्वं चाभिसंहितम् ॥ ७२ ॥ **इति सांख्यसंसारमोक्षादिनिरासः ॥**

मुक्तिः प्राणाक्षदेहादिभिरुपधिभिरत्यन्तविश्लेषरूपा
जीवद्भावोऽपि तैस्सङ्गम इति विहतेर्जीवतस्सा कथं स्यात् ।
आपस्तम्बादयश्च श्रुतिगतिभिरिमां युक्तिभिश्च व्युदासु-
र्जीवन्मुक्तादिशब्दः क्वचिदुपचरितस्तत्समावस्थयैव ॥ ७३ ॥

अथ मुख्यामुख्यप्रयोगानभिज्ञकल्पितां जीवन्मुक्तिं दूषयति—**मुक्ति**रिति ॥ यदि कतिपयनिवृत्तिमात्रे मुक्तिशब्दः, तदाऽतिप्रसङ्ग इति भावः । नित्यसिद्धस्य पुरुषस्य जीवनमपि ह्युपाधिविशेषसंबन्ध इत्याह—**जीवद्भाव** इति । फलितमाह—**विहते**रिति । अत्र महर्षिवाक्यविरोधमप्याह—**आपस्तम्बादय** इति । प्रागेवैतत् प्रदर्शितम् । * अमृत इह भवति, * जीवन्मुक्ता भवन्तीत्यादेः का गतिरित्यत्राह—**जीवन्मुक्तादिशब्द** इति । श्रुत्यादिष्वप्यगत्यामुपचारः स्वीकृत इति भावः ॥ ७३ ॥ **इति जीवन्मुक्तिभङ्गः ॥**

चन्द्रैकत्वादिबुद्ध्या न हि विलयभियाचक्षुरर्थादिदोषः
स्याद्बाधेऽपि द्विचन्द्रप्रभृतिषु हि ततो भ्रान्तिमात्रानुवृत्तिः ।
विस्रम्भाभावतः स्यात् फलमपि न तु ते जाघटीति द्वयं तद्
ब्रह्मान्याशेषबाधादनतिबलतया बाध्यतो बाधकस्य ॥ ७४ ॥

अद्वैतिनस्त्वाहुः—श्रवणमननाभ्यां भेदसत्यत्वविस्रम्भे निरस्तेऽप्यविद्याबाधकमद्वैतज्ञानं नोदेति, ध्यानेन तु निरस्तसमस्तभेदवासनस्याद्वैतवाक्यादविद्यानिवर्तकधीसंभवः ; निवृत्ताविद्यस्यापि द्विचन्द्रादिदर्शनन्यायेन यावच्छरीरं बाधितानुवृत्तिः स्यात्, तादृश्यां दशायां ब्रह्मविज्जीवति च मुक्तश्चेत्यव्याहतिरिति । एतदपि दूषयति—**चन्द्रैकत्वे**ति ॥ तत्र तावल्लोके बाधितानुवृत्तिर्युज्यते, बाधकज्ञानेन भ्रमानुवृत्तिहेतोर्दोषस्याबाधितत्वात् । न हि चक्षुर्गतास्तिमिरादयः शुक्त्यादिगता वा दूरत्वसादृश्यादयो बाधकज्ञानेनापह्रियन्ते, सत्यत्वात् ; तत्प्रकाश्याकारविरोधित्वाभावान्न बाध्यन्त इति भावः । मात्रचाऽभिप्रेतं व्यनक्ति—**विस्रम्भाभावत** इति । एवं बाधितानुवृत्तिर्बाधकधीसाफल्यं च त्वन्मते न संभवतीत्याह—**न त्वि**ति । प्रथमस्यासंभवं विवृणोति—**ब्रह्मान्ये**ति । ब्रह्मव्यतिरिक्तं कृत्स्नं मिथ्येति हि बाधकप्रत्ययः । तत्र यदि महीयसी बलीयसी च मूलाविद्या विलीयेत, कथं तदा तूलकल्पः तदेकदेशो विलयं न गच्छेत्? यदि चास्य ज्ञानादन्यद्

बाधकम्, तदाऽपसिद्धान्तः सत्यत्वप्रसङ्गश्च स्यात्। अविद्याबाधकेनाबाधितं च कथमन्यदपि ज्ञानं बाधेत? अहेतुक-निवृत्तिश्च प्रागेव दूषिता। अन्त्यशब्दचरमसंस्कारादीनामपि हेतुविशेषत एव निवृत्तिरत्र बाधकफलस्याप्यसंभवस्माद्-अनतिबलतयेति। अयं भावः—श्रवणमननदशायामेव हि निषेध्यप्रपञ्चज्ञानं निषेधकज्ञानं चाविद्यामूलमित्यध्यवस्यति, तथा सत्येकदोषप्रसूतत्वे परत्वस्याकिंचित्करत्वात्, अन्यथा माध्यमिकविजयप्रसङ्गाच्च नोत्तरे बाधकत्वविस्रम्भः स्यात्। अत एव न तदर्थध्याने प्रवर्तेत, न च रागद्वेषादिभिरुज्झितः स्यादिति ॥ ७४ ॥ **इति परोक्तबाधितानुवृत्तिभङ्गः ॥**

स्वातन्त्र्यं ब्रह्मणैक्यं पशुपतिसमतां वासनोच्छेदमात्रं
धीसन्तानप्रणाशं निजमतिसुखयोर्नित्ययोस्सन्निकर्षम्।
चित्तेन स्वात्मसौख्यानुभवमुपलवद्भावमूर्ध्वप्रयाणं
शून्याद्वैतं च मुक्तौ श्रुतिरुपकृतये कल्पतां जल्पतां वः ॥ ७५ ॥

अथ मुक्तिविषये वादिनां प्रलापान् संक्षेपेणोद्गृह्णन् प्रत्येकदोषः श्रोतृभिः स्वयमूह्य इति मत्वा साधारणं श्रुति-विरोधं तावत् सूचयति—**स्वातन्त्र्यमिति** ॥ सिद्धिवासनासितासितमनोभिरेतदिष्यते, न च तद्युक्तम्; सर्वेषां सर्वनियन्तृ-त्वायोगात्। ब्रह्मणैक्यं तु त्रय्यन्तैकदेशिनस्संगिरन्ते। तत्र साम्यसाधर्म्यसहशब्दादिभिर्बाधः। भेदसहं केवलं वा नित्यतादात्म्यमिच्छतां किमिदानीमैक्यं साध्यम्? एकत्वनानात्वविभागाविभागशक्तिमत्त्वपक्षश्च न प्रामाणिकैः श्रद्धेयः। कल्पादावुत्पन्नाः कल्पान्ते ब्रह्मण्यैक्यं लभन्त इति पक्षे त्वकृताभ्यागमकृतविप्रणाशप्रसङ्गोऽप्यधिकः। पशुपतिसमतां तन्मतस्थाः प्राहुः। तत्रावान्तरभेदेषु विशेषश्च द्रष्टव्यः। प्रत्युक्तं तन्मतम् *पत्युरसामञ्जस्यादिति। वासनोच्छेदमात्रं तु बौद्धैकदेशिनः। तत्र सर्वज्ञानसन्तानैकतापत्तिः स्यान्न वेति विभागः। तत्र तत्प्रक्रियाप्रतिषेध एवोत्तरम्। धीसन्तान-प्रणाशं तु **प्रज्ञाकर**मतस्थाः। तत्रान्तिमस्यार्थक्रियाविरहादसत्त्वे तत्पूर्वेषामपि तथेति शून्य[ता]वादावतारः। निजमति-सुखयोर्नित्ययोः सन्निकर्षं तु **न्यायैकदेशिनः**। इदं च मतं प्रागेवापास्तम्। चित्तेन स्वात्मसौख्यानुभवं **भाट्टाः**। उप-लवद्भावं **लौक्याः, न्यायमीमांसैकदेशिनश्च**। अनयोरपि साधकासंभव उक्तः। ऊर्ध्वप्रयाणं तु **जैनाः**। तत्र भूम्यां नित्यपतनवन्नित्योर्ध्वगमनमेके। अन्ये तु लोकाकाशमतिक्रम्य सकललोकमस्तकस्थायिन्यलोकाकाशे देहमेकमनेकं वा परिगृह्य वसन्त इति। इदं तु तत्कथामात्रसिद्धम्। शून्याद्वैतं तु **माध्यमिकाः**। तत्र सर्वतोमुखी व्याहतिरूह्या। तथा च तत्प्रतिक्षेपसूत्रम्—*सर्वथाऽनुपपत्तेश्चेति। चकारोऽनुक्तान्मुक्तितारतम्यचिन्मात्रस्फुरणादिपक्षान् संगृह्णाति। एतत् सर्वं जल्पतां श्रुतिरुपकृतये कल्पतामित्युपालम्भकाक्वा बाधकत्वपरम्; सर्वभूतदयालुत्वस्मरणादिदं सानुग्रहवाक्यं वा। आयुर्वेदविद्भिरप्यन्वाख्यायते—*आत्मद्रोहममर्यादं मूढमुन्मुक्तसत्पथम्। सुतरामनुकम्पेत नरकार्चिष्मदिन्धनम् ॥ इति। तदिह *परात्परं पुरुषमुपैति दिव्यमित्युपनिषत्सिद्ध एव मोक्ष इति भावः ॥ ७५ ॥ **इति परमते विरुद्धानामर्थानां मोक्षविरुद्धत्वप्रतिपादनम् ॥**

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे जीवसरः द्वितीयः ॥ २ ॥

[जडद्रव्यसरे श्लोकाः ७०, जीवसरे श्लोकाः ७५, आहत्य श्लोकाः १४५]

———

॥ अथ नायकसरः तृतीयः ॥ ३ ॥

146. व्याप्त्याद्यव्याकुलाभिः श्रुतिभिरधिगतो विश्वनेता स विश्वं
क्रीडाकारुण्यतन्त्रः सृजति समतया जीवकर्मानुरूपम् ।
रोषोऽपि प्रीतये स्यात्सुनिरसविषयस्तस्य निस्सीमशक्तेः
स्वेच्छा[यां]तस्सर्वसिद्धिं वदति भगवतोऽवाप्तकामत्ववादः ॥ १ ॥

तदेवं प्रत्यगर्थद्वये प्रथमोद्दिष्टो जीवश्चिन्तितः । अथेश्वरश्चिन्त्यते । तत्र तावत्प्रमाणविशेषात् सिद्धिं प्रस्तौति—**व्याप्त्याद्यव्याकुलाभि**रिति ॥ धर्मप्रवृत्तियुक्तसर्वदेशकालव्यापितयाऽन्यथाकरणशङ्कानर्हाभिरित्यर्थः । यद्वा अनुमानवद्व्याप्तिपक्षधर्मतानिरूपणजनितव्यभिचारसंभवादिरहिताभिरिति । श्रुतिभिरिति भ्रमादिमूलत्वासंभवख्यापनम् । शब्दानां सिद्धे व्युत्पत्तिस्तत्र तात्पर्यं च साधयिष्यते । विश्वनेता—विश्वेषां यथेष्टं विनियोक्ता । स कथं श्रुतिभिरधिगतः, कारणवाक्येषु सदादिशब्दैः *तद्धेदं तर्ह्यव्याकृतमासीदित्यादिप्रदर्शितस्याव्यक्तापरपर्यायस्य प्रधानस्याभिधानादिति चेत्, तन्न; अव्यक्तस्य * तदैक्षत, *सोऽकामयत इत्याद्युक्तस्वसङ्कल्पपूर्वकस्रष्ट्याद्यसंभवात् । न खल्वीक्षणादिशब्दो भाक्तः ; मुख्ये बाधकाभावस्य साधकभूयस्त्वस्य च **शारीरके** स्थापितत्वात् । * सदेव सोम्येदमग्र आसीदित्याद्यचेतनसामानाधिकरण्यात् कारणमचेतनमिति चेन्न ; सामानाधिकरण्यस्य स्थूलसूक्ष्मचिदचिद्वस्तुविशिष्टविवक्षयाऽप्युपपत्तेः । सर्वं च जगत् कर्तुश्शरीरतयाऽऽम्नातम् ; * अस्मान्मायी सृजेत विश्वमेतदिति । ईदृशी च सृष्टिः *सोऽभिध्याय शरीरात्स्वादित्युपबृंहिता । अधीयते चा**थर्वणिकाः**—* विकारजननीमज्ञामष्टरूपामजां ध्रुवाम् । ध्यायतेऽध्यासिता तेन तन्यते प्रेर्यते पुनः ॥ सूयते पुरुषार्थं च तेनैवाधिष्ठिता जगत् । गौरनाद्यन्तवती सा जनित्री भूतभावनी ॥ इति । अगीयत चैतत्—*मयाऽध्यक्षेण प्रकृतिस्सूयते सचराचरमिति । अतस्साक्षात् संकल्पाश्रयत्वम्, व्यवधानेन तु विकाराश्रयत्वमिति सर्वाविरोधः । ननु सद्विद्यायां मृत्पिण्डलोहमणिनखनिकृन्तनदृष्टान्तैः * यथा पृथिव्यामोषधयस्संभवन्तीत्याथर्वणिकवाक्याच्चाचेतनमात्रोपादानत्वं जगतः प्रतीयत इति चेन्न ; मृत्पिण्डादिनिदर्शनानामेकविज्ञानेन सर्वविज्ञानस्यासंभवचोद्यपरिहारपरत्वात्, * यथा पृथिव्यामिति वाक्यस्य त्वेकस्माद्विचित्रानन्तोत्पत्तिसंभवार्थत्वात् । न तु चेतननैरपेक्ष्यमेतैस्सूच्यम् ; अन्यथा * यथा सतः पुरुषात्केशलोमानीति चेतनसन्निधिसापेक्षोत्पत्तिनिदर्शनायोगात् । अस्तु तर्हि तद्वदयस्कान्तादिनयेन निर्व्यापारपुरुषसन्निधानात् प्रकृतेः प्रवृत्तिः, सर्वस्य च कार्यजातस्य जीवकर्महेतुकत्वात्, अपहतपाप्मत्वसर्वज्ञत्वादीनां च तस्मिन्नवस्थाभेदेनोपपत्तेरिति ; तन्न । * यथोर्णनाभिस्सृजते गृह्णते चेति प्रथमोक्तदृष्टान्तवैवर्थ्यात् । *प्रकृतिं पुरुषं चैव प्रविश्यात्मेच्छया हरिः । क्षोभयामास संप्राप्ते सर्गकाले व्ययाव्ययौ ॥ इति पुरुषस्यापि पराधिष्ठानेन जगत्सृष्ट्युपयोगोक्तेः । न च जीवस्य संवर्तसमयसंहृतकरणकलेवरस्य मुख्येक्षणादिसंभवः । मुक्तस्तर्हि प्रकृतिपुरुषयोरधिष्ठाता स्यात् ; तस्य सत्यसंकल्पस्य स्वेच्छया पितृलोकादिविचित्रकार्यस्रष्टृत्वाम्नानान्मुख्येक्षणसिद्धेः । जीवान्यत्ववादाश्च बद्धान्यत्वविषयाः स्युः । * ममैवांशो जीवलोके जीवभूतस्सनातन इति जीवत्वस्यावस्थारूपत्वोक्तेः ; मुक्तस्यैव हिरण्यगर्भादिदेहाधिष्ठानेन सृष्टिस्थित्यादिहेतुत्वमिति सर्वपुराणादिसामरस्यमिति ; तदपि मन्दम् । एकस्यैवानाद्यन्तस्य सर्वमुक्तोपसृप्यत्वश्रवणात्, *मम साधर्म्यमागताः, * स्वातन्त्र्यमतुलं प्राप्य तेनैव सह मोदत इत्याद्युपबृंहणविरोधाच्च । * सायुज्यं प्रतिपन्ना ये तीव्रभक्तास्तपस्विनः । किङ्करा मम ते नित्यं भवन्ति निरुपद्रवाः ॥ इति च भगवदुक्तिः । मोक्षधर्मे च * अनेन साम्यं यास्यामीति मुमुक्षोरभिसन्धि-

वचनम् । प्रपञ्चितं चैतत्—* परेण पर[धर्मी च]धर्मेण भवत्येष समेत्य वै इत्यादिभिः एकस्य च सर्वप्रशासितृत्वं निस्सीमत्वं च श्रुतिस्मृतिशतसिद्धम् । अपि च मुक्तास्सर्वे किं संभूय जगत् सृजन्ति उत प्रतिनियतकार्याः? नाद्यः ; * स यदि पितृलोककाम इत्यादिभिरव्यवस्थितेच्छादृष्टेः, सर्वेषामेकरूपेच्छाक्लृप्तौ गौरवात्, तथा चाश्रवणात् । न द्वितीयः, * इदं सर्वमसृजतेत्यादिभिरेकस्य सर्वकर्तृत्वोक्तेः । समुदायैकत्वविवक्षा तु क्लिष्टा निर्मूला च; श्रुत्या क्लृप्त्या वा तदयोगात् । अतः * पतिं विश्वस्यात्मेश्वरमिति श्रुत एक एव सर्वकर्तेश्वरः ॥ श्लो. प्रयोजनादिविरहान्न कर्तेश इति ब्रुवन् । तस्य सिद्धावसिद्धौ च व्याघातादिपराहतः ॥

मा भूदनुमानम्, प्रसङ्गस्तु स्यादिति चेन्न ; प्रयोजनशून्यत्वे कर्तृत्वं न स्यात् । अस्ति च कर्तृत्वम् ; अतः प्रयोजनवानिति विपर्ययविश्रमात् । तथा सति नेश्वरस्य बाधः प्रयोजनसाधकानुग्रहार्थत्वात् । अथ प्रयोजनवत्त्वे कर्मवश्यत्वप्रसक्तिः ; तदभावात् प्रयोजनशून्य इति । एवमपि प्रयोजनशून्यविश्वकर्तृत्ववादिनामिष्टप्रसङ्गः । * प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तत इति चेत्, तर्हि प्रवृत्तिदर्शनात् प्रयोजनं किञ्चिदङ्गीकुरुष्व । स्वार्थं परार्थं वा प्रवर्तते इत्यत्रोभयार्थमित्याह—**स इति** । विषमसृष्ट्या साम्यं दुःखसृष्ट्या कारुण्यं च भज्येतेत्यत्राह—**समतये**ति । साम्यकारुण्यवत् यथाकर्म फलदायित्वमपि श्रुतिबलादङ्गीकार्यम् । अतस्तदविरोधेन गुणान्तरं व्यवस्थाप्यमिति भावः । दुःखनिवर्तनांशे कारुण्यसिद्धिः । ननु स्वसृष्टदुःखनिवर्तनेन कारुण्यलाभाद्वरं दुःखानुत्पादनमेव । अतस्सुखैकतानं जनयेज्जगत् करुणया सृजन्निति चेत्; किमयमीश्वरं प्रत्युपदेशः? अन्यान् प्रति वा? नाद्यः, तस्य परोपदेशाधीनप्रवृत्तित्वाभावात् । न द्वितीयः, तत्तत्प्रमाणसिद्धवस्तुस्वभावानामपर्यनुयोज्यत्वात् । स्मर्यते च—* शक्तयस्सर्वभावानामचिन्त्यज्ञानगोचराः । यतोऽतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः ॥ भवन्ति तपतां श्रेष्ठ पावकस्य यथोष्णता ॥ इति ॥ ननु दयावैकल्यपरिहारायानुग्रहांश एव भगवतः कर्तृत्वमङ्गीक्रियताम् ; स्यादेतत्, एवं यदि वयमेव स्वेच्छया वस्तु व्यवस्थापयामः, किंतु प्रमाणदृष्ट्यैव । अतो निग्रहांशेऽपि निरङ्कुशं कर्तृत्वम् । अथ स्यात्—क्रोधो हि निग्रहहेतुः ; स च स्वाश्रयदुःखाविनाभूतः, * अरोषणो ह्यसौ देव इति प्रसिद्धस्य च कथं क्रोध इति चेन्न ; * एतौ द्वौ विबुधश्रेष्ठावित्यादिषु कण्ठोक्तेः । भाक्तोऽयं क्रोधशब्द इति चेत्तन्न ; प्रसादशब्दस्यापि तथात्वप्रसङ्गात् । अस्त्वेवमिति चेन्न ; भिक्षुपादप्रसारणन्यायेन निरीश्वरवादावतारात् । अतः क्रोधावश्यंभावादीश्वरस्यापि दुःखावश्यंभाव इत्यत्राह—**रोषोऽपी**ति । क्रोधरोषादिशब्दार्थो हि परपीडेच्छामात्रम् । स तावन्न स्वरूपतो दुःखम् ; दुःखहेतुत्वमप्यस्याशक्यविषये, तथा दृष्टेः । स्मर्यते हि—* द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषणौ । यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ इति । न सर्वशक्तेरीश्वरस्य चिकीर्षितमशक्यं किञ्चिदस्ति । अतोऽस्य न दुःखाय क्रोधः, प्रत्युत निग्रहविहारेण प्रीतये स्यादिति । ननु इह विहारः क्रीडा ; सा चारतिपरिहारार्था लोके प्रसिद्धा । जगतः स्रष्टारमधिकृत्य * स एकाकी न रमेतेति श्रूयते । अतः क्रीडायोगादरतियोगः, तदभावाद्वा तदभावः स्यात् । मैवम् ; क्रीडा हि प्रीतिविशेषप्रभवः स्वयंप्रियो व्यापारः, अन्यथा तल्लक्षणमव्यापकं स्यात् ; अतो नारतिप्रसङ्गः । अरतिश्रुतिश्च तदानीमेकाकित्वमनिष्टम्, अतो ब्रह्मादिसृष्टावुदयुङ्क्तेत्यभिसन्धत्ते, न पुरुषान्तरवदप्रवृत्तिजन्यदुःखभयात् प्रावर्ततेति ; अशास्त्रवश्यस्य दुःखानर्हत्वात् । तथाऽपि * क्रीडार्थं सृजतो विश्वं विहन्येत कृतार्थतेत्यत्राह—**स्वेच्छाया**मिति । अवाप्तसमस्तकामवादो हि न काम्यनिवृत्तिपरः, अवाचकत्वात्, सत्यकामत्वश्रुतिविरोधाच्च । नापि कामनानिषेधार्थः ; * सोऽकामयत, * सत्यसंकल्प इत्यादिबाधात् । अतो यथाकामं सर्वसिद्धिमभिसन्धत्ते इति ॥ सहकारिभिरारम्भे न स्वातन्त्र्यं विहन्यते । तत्सद्भावप्रवृत्त्योश्च स्वाधीन-

त्वव्यवस्थितेः ॥ कारकान्तरवैधुर्ये किमपेक्ष्य स्वतन्त्रता । शरीरमप्यधिष्ठेयं सहकार्येव कुर्वतः ॥ निरपेक्षस्वतन्त्रस्य सहकारिमतस्सदा । अप्रवृत्तिः प्रवृत्तिर्वा नित्यं स्यादिति चेन्न तत् ॥ तत्तदिच्छाविशेषेण तत्क्रमस्योपपत्तितः । इच्छा-सन्तत्यनादित्वान्न च मूलक्षयः क्वचित् ॥ गुणेतरविपर्यासमन्योन्यसहकारिताम् । विवक्षातः क्वचित् प्राहुः निस्समत्वा-न्निमित्तताम् ॥ प्राप्यः परमभोग्यत्वान्निषेव्यः स्वामिभावतः । शक्तिकारुण्यभूम्ना च शरण्यस्सीदतां प्रभुः ॥ बहिरन्तश्च तद्व्याप्तिस्तत्र यत्रोभयं भवेत् । विभोरणोश्च न बहिर्नान्तस्तस्मान्न सा तयोः ॥ विभोर्नच्छिद्रमणुना नाणूनां विभुना च तत् । यथाप्रमाणं संबन्धमात्रमेव तयोर्भवेत् ॥ आकाशव्यतिभेदादेरसंभाव्यस्य चोदना । आकाशादिकमिच्छद्भि-रनिच्छद्भिश्च दुर्वचा ॥ न विभज्येत गच्छद्भिर्न विहन्ति गतिं च यत् । अस्पर्शत्वात्तथाभूतं विभु वाऽविभु वाऽस्ति नः ॥ विभ्वणुप्रतिषेधेन मध्यमं च निषेधता । सर्वासत्त्वं च दुस्साधं सदसत्त्वविकल्पतः ॥ समस्तमूर्तसंयोगस्संभवेद्यस्य तद्विभु । तत्संभवोज्झितं द्रव्यं महत्त्वाणुत्वचित्रितम् ॥ * अणोरणीयान्महतो महीयानित्यनुश्रवः । विश्वव्यापित्वतात्प-र्यान्न मिथो बाधमृच्छति ॥ यदल्पपरिमाणेन पृथूनां ग्रसनं श्रुतम् । अचिन्त्यमिदमित्येके चिन्तनश्रमभीरवः ॥ १ ॥

इत्यागमिकेश्वरसिद्धिः ।

147. **अप्रत्यक्षः परात्मा तदिह न घटते धातुरध्यक्षबाधो**
योग्यादृष्टेरभावान्न खलु न भवता स्वीकृतः स्वेतरात्मा ।
तस्मिन्देहानपेक्षे श्रुतिभिर[धिगते]वसिते देहबाधान्न बाधो
वेदेभ्यो नानुमानं न च पुरुषवचस्तिष्ठते बद्धवैरम् ॥ २ ॥

यद्यङ्कुराद्युत्पत्तौ कश्चित् कर्ता, स कथं न दृश्येत ? अतो यूपादित्यैक्यमिव प्रत्यक्षबाधितं न श्रुतिः प्रतिपादयती-त्यत्राह—**अप्रत्यक्ष** इति ॥ सर्वेषां स्वव्यतिरिक्तस्यात्मनः प्रत्यक्षत्वासिद्धेः ; ईश्वरेऽपि योग्यानुपलब्ध्यभावान्नात्र प्रत्यक्ष-बाध इत्यर्थः । इह—दूर्वादिकार्योत्पत्तौ । कर्तुरदृष्टस्य कथं सिद्धिरिति **चार्वाक**चोद्यं वारयति—**न खल्विति** । अयं भावः—न तावदर्धलोकायतिकैरद्वैतिभिरिवात्मभेदोऽनङ्गीकृतः । भिन्नाश्चात्मानः परस्परमप्रत्यक्षाः । एवमीश्वरोऽपि स्व-प्रत्यक्षोऽन्याप्रत्यक्षतया निषेद्धुं न शक्य इति । अनुमानादात्मान्तरस्वीकार इति चेत्, आगमादीश्वरोऽपि स्वीकर्तव्यः ; प्रमाणत्वेन श्रद्धेयत्वाविशेषात्, परोक्षत्वेन न्यक्कारस्यानुमानेऽपि प्रसङ्गात् । लोकायतिकानां तु यद्यपि भूतपरिणतिरूपः परात्माऽपि प्रत्यक्षः, तथाऽपि चैतन्यविशिष्टो न प्रत्यक्षेण गृह्यते ; यद्यन्यतस्तु कुतश्चित् तद्विशिष्टतया गृहीतः, एव-मीश्वरोऽपि किं न गृह्येत ? बाधानर्हत्वात् ; शरीरतया परात्मग्रहणमिति चेत्, आत्मनः शरीरत्वे सिद्धे हि तथा ग्रह-णम्, तदन्यत्वसिद्धौ तु परशरीरेऽपि तथैव स्यादिति । अस्तु तर्हि व्यापकानुपलब्ध्या बाधः, कर्तुर्हि शरीरं व्यापकम् ; न चाङ्कुराद्युत्पत्तौ शरीरं दृश्यते, अतीन्द्रियं तत्र शरीरमस्त्विति चेन्न ; अङ्कुराद्युत्पादकतया तादृशशरीरानभ्युपगमात् । तदभ्युपगमेऽपि करणकलेबरसापेक्षस्य कर्तुः कथमीश्वरत्वम् ? तत्राह—**तस्मिन्निति** । देहानपेक्ष इत्युपलक्षणम् । श्रूयते हि—* पश्यत्यचक्षुस्स शृणोत्यकर्णः अपाणिपादो जवनो ग्रहीतेति । यदि सर्वशरीरत्वस्य श्रुतिस्मृतिसिद्धत्वात् सर्वेषु कार्येषु शरीरसापेक्षत्वमिति, तथा सति न व्यापकानुपलब्ध्या बाधः । सर्वकार्यानुगुणतत्तद्द्रव्यशरीरकतया शास्त्रैरुप-लब्धेः । अथ विगीतमकर्तृकं कर्मवश्याजन्यत्वादित्याद्यनुमानैरीश्वरस्य बाध इत्युच्येत । तत्राह—**वेदेभ्य** इति । अयं भावः—आप्तशास्त्रस्यानुमानैर्विरोधे शास्त्रेणैव तेषां बाधोपपत्तिः ; अन्यथा स्वर्गनरकादीनामतीन्द्रियाणां कुतश्चिदनुमानाद्

बाधप्रसङ्गात् । शक्यं हि विगीतं न दुःखासंभिन्नसुखसाधनम्; साधनत्वात् किल्बिषवदिति । एवमन्यत्राप्यूह्यम् । किं चात्र **नैयायिकादिसंमतै**रीश्वरानुमानैर्बाधः प्रतिरोधो वा दुर्वारः; विपक्षे बाधकसदसद्भावौ समचर्चौ । अस्तु तर्ह्यादिविदुषस्सिद्धस्य **कपिलस्या**गमेन ब्रह्मकारणवादभङ्ग इत्यत्राह—**न चेति** । नित्यनिर्दोषश्रुतिविरोधे हि स्मृतेरेव बाध्यत्वं विरोधाधिकरणसिद्धम् । अन्यथा बौद्धाद्यागमैरपि किं न कृत्स्नवेदबाधः? तेषां भ्रमादिमूलत्वसंभावनयेति चेत्; सममेतत् । सर्वज्ञस्सांख्याचार्यः परमाप्त इति चेन्न; समाधिजनितसार्वज्ञ्यानामपि कर्मभेदैः कदाचिद्भ्रमसंभवात् । न च सार्वज्ञ्ये प्रमाणमस्ति; आहुश्च—*कपिलो यदि सर्वज्ञः कणादो नेति का प्रमा । तावुभौ यदि सर्वज्ञौ मतभेदः कथं भवेत् ॥ इति । ननु, *ददृशुः कपिलं तत्र वासुदेवं सनातनमित्यादिभिः स्वतस्सर्वज्ञपरमकारुणिकावतारतया सिद्धस्य कथमनाप्तत्वशङ्केति चेन्न; बुद्धेऽपि समत्वात्; आविष्टत्वमात्रं तत्रेति चेदत्रापि तथा, विरोधाभावात्; अन्यथा बुद्धादीन् प्रेरयत ईश्वरस्यासुरादिषु विप्रलिप्सा दुस्त्यजा । *मोहयिष्यामि मानवानित्यादि च स्वयमेवाह । अतः पौरुषेयवाक्यमार्षमपि वेदाविरोधेन नेतव्यमिति । एवं **निरीश्वरमीमांसका** अपि निर्मूला निगमान्तविद्भिरनुग्राह्याः । **श्लो.** य एवं स्यादसर्वज्ञः सर्वज्ञं न स बुध्यते । इति ब्रुवाणाः सार्वज्ञ्यं लभन्तां तन्निषेधतः ॥ २ ॥ **इतीश्वरस्य निर्बाधत्वम् ॥**

148. वाच्यत्वं वेद्यतां च स्वयमभिदधति ब्रह्मणोऽनुश्रवान्ता
वाक्चित्तागोचरत्वश्रुतिरपि हि परिच्छित्त्यभावप्रयुक्ता ।
नो चेत् पूर्वापरोक्तिस्वचनकलहस्सर्ववेदान्तबाध-
स्तत्सिद्धिर्हेतुभिश्चेत् प्रसजति विहतिर्धर्मिसाध्यादिशब्दैः ॥ ३ ॥

ननु श्रुतिभिरधिगत इत्याद्ययुक्तम्, स्वयंप्रकाशतया तत्सिद्धेः; अतो वेद्यत्वमेव न यत्र, तत्र कथं शब्दवेद्यत्वम्? *यतो वाचो निवर्तन्ते, अप्राप्य मनसा सह, *यद्वाचाऽनभ्युदितमित्यादिभिश्च तदुभयं निषिध्यत इत्यत्राह—**वाच्यत्व**मिति ॥ अयं भावः—स्वप्रकाशत्वं तावन्निगमवेद्यत्वेऽपि घटते; दर्शनस्पर्शनाभ्यामेकार्थग्रहणवदुपपत्तेः । अथानन्यवेद्यत्वमेव स्वयंप्रकाशत्वम्; तदा कथं ततस्तत्साध्यत्वम्? अवेद्यत्वग्राहकात्तत् साध्यत इति चेत्, किं तद्ग्राहकम्? न तावद्ब्रह्मस्वरूपम्, तस्य स्ववेद्यत्वावेद्यत्वयोरुदासीनत्वात्; अन्यथा तत्र तत्संशयाद्यनुत्पत्तिप्रसङ्गात् । नापि वृत्तिज्ञानानि, तद्ग्राहकत्वे तदभावे च तदवेद्यत्वसाधनायोगात् । एवं साक्षिण्यप्यवेद्यत्वग्रहणा युक्तिर्भाव्या । ग्राहकान्तरैरग्राह्यं गृह्यत इत्यविरोध इति चेत्तर्हि घटादेरप्यवेद्यत्वं सिद्धम्; स्वग्राहकेतराग्राह्यत्वात् । यैश्च त्रय्यन्तैरवाच्यत्वादिकं सिषाधयिषसि, त एव स्वयं वाच्यत्वादिकमभिदधति *तस्योदिति नाम, *अथ नामधेयं सत्यमित्यादिषु तद्वाचकविधानात् । *सर्वे वेदा यत्रैकं भवन्ति, *यो वेद निहितं गुहायां परमे व्योमन्, *यत्प्रयन्त्यभिसंविशन्ति, तद्विजिज्ञासस्व, *येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्यादिषु वाक्यतोऽन्यतश्च वेद्यत्वप्रतिपादनादिति । तर्हि, *यतो वाचो निवर्तन्त इत्यादेर्निर्विषयत्वप्रसङ्ग इत्यत्राह—**वाक्चित्ते**ति । *सैषाऽऽनन्दस्य मीमांसा भवतीत्यादिना ब्रह्मानन्दस्यापरिच्छेद्यताप्रतिपादने हि वाक्यतात्पर्यं गम्यते । अन्यथा *ब्रह्मविदाप्नोति परम्, *आनन्दं ब्रह्मणो विद्वानित्यादिपूर्वापरविरोधः स्ववचनविरोधश्च स्यात् । तदिदमाह—**नो चेदि**ति । ब्रह्मप्रतिपादकभागश्च सर्वो निर्विषयः स्यादित्यत्राह—**सर्वे**ति । उपलक्षणमेतत् वेदोपबृंहणशतबाधस्य; *वेदैश्च सर्वैरहमेव वेद्यः, *वचसां वाच्यमुत्तममित्यादिभिश्च *यतो वाचो निवर्तन्त इत्यादेरान्यपर्यं ग्राह्यम् । माऽस्त्वत्र श्रुतिभिरवाच्यत्वादिसिद्धिः, अनुमानतस्तु स्यादिति

शङ्कते—**तत्सिद्धिरिति** । श्रुतिवदेव विरोधप्रसक्त्या परिहरति—**प्रसजतीति** । ब्रह्म अवाच्यमवेद्यं वा एवंत्वादिति हि प्रयोक्तव्यम्; तत्र ब्रह्मपदं साध्याधारं ब्रूते न वा? आद्ये कथं तद्विरुद्धसाध्यधीः? द्वितीये तु निरर्थकता निराश्रयसाध्योक्तिश्च । एवं साध्यपदमपि धर्मिपदसमानाधिकरणं न वा? पूर्वत्र स्वस्य धर्मिणं ब्रूते, स्वव्यापारविरुद्धं च ब्रूत इति चित्रमेतत् । उत्तरत्रानन्वयः । हेतुपदे च स्वपक्षधर्मत्ववाचिनि प्रकृत्यंशो धर्मिविषयः । अन्यथा कथं प्रत्ययांशस्य तन्निष्ठभावाभिधायित्वम्? अतो धर्म्युल्लेखनतद्भाववाचकं हेतुपदं न स्वप्रवृत्तिविरुद्धं साध्यं साधयेत् । एवमनुग्राहकतर्केऽपि धर्मिप्रसञ्जकप्रसञ्जनीयपदेषु विहतिरवधार्या । प्रतिप्रयोगोऽपि—विगीतं वेद्यं वाच्यं च, भासमानत्वादिति । नात्र द्वितीयस्य व्यक्त्याऽनैकान्त्यम्; जातिवद्व्यक्तेरपि वाच्यत्वस्य वक्ष्यमाणत्वात्; युष्माकं च तत्र विमत्यभावात् । नन्वत्र धर्मिपदस्य धर्मिणि मुख्यवृत्तिरसिद्धा, सिषाधयिषितावस्थत्वात्; उपचाराभ्युपगमे तु विवक्षितविरोधः स्यात् । मैवम्; वृत्तिमात्रस्य स्वपरसंमतत्वेन वाच्यत्वानिश्चयेऽपि प्रयोगोपपत्तेः । **श्लो.** दुस्साधं क्वचिदप्येवमवाच्यत्वादि कस्यचित् । किं पुनस्सर्ववचसां प्रतिष्ठा यत्र तत्र तु ॥ ३ ॥ **इत्यवाच्यत्वावेद्यत्वपरिहारः ॥**

149. **नित्यं ब्रह्मादिशब्दा निरुपधिकसतो लक्षका इत्ययुक्तं**
मुख्यस्यान्यस्य हानेर्न च निपुणधियो मुख्यमिच्छन्ति लक्ष्यम् ।
मुख्यत्वे बाधकं च क्वचिदपि न वयं किञ्चिदालोकयामो
मुख्यं लक्ष्यं च वाचः पदमिति न च तद्गोचरत्वातिपातः ॥ ४ ॥

ननु लक्षणया धर्म्यादिपदानि प्रवर्तन्ताम्, मुख्यवृत्तिविषयत्वाभावस्तु साध्यत इति को विरोध इत्यत्राह—**नित्यमिति ॥** अयुक्तत्वं कुत इत्यत्राह—**मुख्यस्येति** । तीरं गङ्गापदलक्ष्यमितिवन्मुख्यवृत्त्यनर्हं किंचिन्न लाक्षणिकं दृष्टम् । सामान्यतो विशेषतो वा स्ववाचकपदान्तरनिर्दिष्टे हि पदान्तरस्य लक्षणा वाच्या । अन्यथा ब्रह्मादिशब्दा लक्षणया प्रवर्तन्त इत्युक्ते परेष्टमात्रोक्तिः स्यात् । व्यक्तिविशेषमनिष्कृष्य ब्रह्मशब्दवेद्ये लक्षणया प्रवर्तन्त इत्युक्तेऽपि प्रकृत्यादौ तथा प्रवृत्तेरुक्तदोषो दुर्वारः । अथ सर्वकारणत्वादिलक्षिते लक्षणावृत्तिर्ब्रह्मादिशब्दानां साध्येत, तदा तत्र मुख्यवृत्तौ न काचिदनुपपत्तिः; प्रवृत्तिनिमित्तपौष्कल्यादुपपत्तिरेव । अन्यस्य तु मुख्यस्य हानिः, तद्गुणलेशयोगात् प्रयोगोपपत्तेः । साध्यवाचकपदमप्यवाच्यसंबन्धिनि लक्षणया वर्तत इति वक्तव्यम् । न चान्यत् किञ्चिदवाच्यं, दृष्टमिष्टं वा । तदभ्युपगमेऽप्यत्र ब्रह्मणस्तत्संबन्धित्वं साधितं स्यात्; न त्ववाच्यत्वम् । स्वयंप्रकाशत्वादिति हेतुपदं त्वत्र स्वयंप्रकाशसंबन्धिपरं स्यात्; तथा सत्यन्यत् स्वयंप्रकाशम्, ब्रह्म तु तत्संबन्धिमात्रमिति साधु सिद्धान्तस्समर्थितः! अथ काल्पनिकं मुख्यवृत्तिविषयत्वं ब्रह्मणः स्यादित्यत्राह—**न चेति** । अयं भावः—त्वन्मतेऽन्येषामपि हि मुख्यत्वं काल्पनिकमेव; तथा सति यस्य पदस्य यन्मुख्यं तत्तस्य लक्ष्यमिति तवैवेदं शोभते । लक्षणानिमित्तं चात्र नास्तीत्याह—**मुख्यत्व** इति । क्वचिदपि—सद्ब्रह्मादिशब्देषु कुत्रचिदपीत्यर्थः । किंच श्रुतिविरोधपरिहाराय मुख्यवृत्तिबाध इष्टः; लक्षणावृत्त्यङ्गीकारेऽपि तद्विरोधस्ते स्थित एवेत्याह—**मुख्यमिति** । विरोधशमनं त्वस्मदिष्टमेव साधीय इति भावः ॥ ४ ॥ **इति सद्ब्रह्मादिशब्दानां नित्यलक्षकत्वानुपपत्तिः ॥**

150. **निस्साधारण्यनारायणपदविषये निश्चयं यान्त्यबाधे**
सद्ब्रह्माद्यास्समानप्रकरणपठिताश्शङ्कितान्यार्थशब्दाः ।

अन्तर्यन्ता च नारायण इति कथितः कारणं चान्तरात्मे-
त्यस्मादप्यैककण्ठ्यं भवति निरुपधिस्तत्र शम्भ्वादिशब्दः ॥ ५ ॥

एवमीश्वरस्य त्र्यन्तवेद्यत्वं शब्दवाच्यत्वं च स्थापितम्। स तु हिरण्यगर्भादिष्वन्यतम इति शङ्कायां **पुरुषनिर्णया**दिसाधितं विशेषनिर्धारणं संगृह्णाति—**निस्साधारण्येति** ॥ साधकबाधकाभ्यामप्राप्ते शास्त्रमर्थवदित्यभिप्रायेणोक्तम्—**अबाध** इति। सदादिशब्दानां कथं शङ्कितान्यार्थत्वम्? इत्थम्—सच्छब्दस्तावत् सत्तायोगिषु सर्वेषु प्रवृत्ततया न विशेषनिर्धारणार्हः। ब्रह्मशब्द एकरूढोऽपि बहुषु रूढवत् प्रयुक्ततयाऽन्यार्थत्वशङ्कार्हः स्यात्। आत्मशब्दश्च जीवपरादिसाधारणप्रयोगः। एवं पुरुषप्राणाक्षरादिशब्दा अपि। नारायणशब्दस्तु न जात्युपाधिवचनो न वाऽनेकरूढः। अतस्तेनान्येषां विषयविशेषनिर्धारणं युक्तम्। तत्र च हेतुः समानप्रकरणपठितत्वम्; अन्यथा पश्वधिकरणादेरपि भङ्गः स्यात्। प्रकारान्तरेणापि निर्दिधारयिषुराह—**अन्तर्यन्ते**ति। यथा **सुबालोपनिषदि** *एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण इति। एतेनान्तर्यामिब्राह्मणमप्येतद्विषयमिति निर्धारितम्। ततः किमित्यत्राह—**कारण**मिति। *तत् सृष्ट्वा तदेवानुप्राविशदित्यादिना हि सर्वस्रष्टुस्सर्वान्तर्यामित्वमप्याम्नातम्। फलितमाह—**अस्मादि**ति। नारायणशब्देन सदादिशब्दानामिति शेषः। ननु *कारणं तु ध्येय इत्यत्र *शम्भुराकाशमध्य इति समाख्यान्तरं दृष्टम्; ततः किम्? कारणानुवादेन ध्येयत्वविधिपरं हीदं वाक्यम्। पुरोवादे च नारायणत्वनिर्णये तस्मिन्निरुपाधिकावयवार्थभूम्ना तद्वृत्तिरुपपन्ना; तथा च **नारायणानुवाके**ऽपि विश्वशम्भुवमित्युच्यते, शाश्वतं शिवमिति च; अतोऽन्यपरवाक्यस्थसमाख्यामात्रमकिञ्चित्करमिति भावः ॥ ५ ॥

151. विष्णोरप्यस्त्यभिख्या शिव इति शुभतारूढिरत्रानुपाधि-
स्तस्माद्ध्येयः श्रुतोऽसौ शिव इति शिव एवेति वाक्यं त्वनुक्तिः।
उक्तं नारायणाधिष्ठितमिति च तमोऽनेकबाधोऽन्यथा स्यात्
ब्रह्मेशादेर्महत्यामुपनिषदि लयाद्युक्तमेवं तु नात्र ॥ ६ ॥

शिवशब्दस्य न केवलं शुभा[द्ध्या]दिपौष्कल्यमात्रान्नारायणे वृत्तिः, किंतु नामतयाऽपीत्याह—**विष्णोरिति** ॥ *सर्वश्शर्वश्शिवः स्थाणुरिति हि तन्नामसहस्रे पठ्यते। ननु शुभतया रुद्रेऽस्य रूढिः स्यादित्यत्राह—**शुभे**ति। शुभतया जनिता ह्यस्य रूढिः *मङ्गलानां च मङ्गलमित्यादिभिर्निरुपाधिकशुभत्वशालिनि भगवत्येव युक्ता। अन्यत्र तु तद्गुणलेशयोगाद्वृत्तिः स्यात्। प्रसिद्धिप्रकर्षस्तु प्रणववेदादिषु ब्रह्मशब्दवत् प्रचुरप्रयोगमात्रात् स्यात्। यत्र तु शिवस्य ध्येयत्वोक्तिस्तत्रापि शाश्वतशिवानुवादेन ध्यानं विधीयते। नैतावता प्रसिद्धशिवस्य श्रुतिविरुद्धं कारणत्वं कल्पयितुं शक्यमित्याह—**तस्मादि**ति। असौ—विष्णुरेव। महापुरुषवेदनस्य हि मुक्तिहेतुत्वं प्रतिपाद्य *नान्यः पन्था [अयनाय विद्यते] इति नियम्यते। ननु यदा *तमस्तदिति वाक्ये शिव एव केवल इत्युच्यते, अतः प्रसिद्धशिवः कारणमित्यत्राह—**शिव एवे**ति। इदं तावद्वाक्यं न कारणतमसः प्रतिपादकं, यदेति कालविशेषप्राप्तानुवादात्। *अव्यक्तमक्षरे लीयते, अक्षरं तमसि लीयत इति **सुबालोपनिषद्वा**क्येन तत्प्राप्तिः। सा चोपनिषन्नारायणस्यैव कारणत्वोपास्यत्वादिकं बहुधा वक्ति। अव्यक्ताक्षरक्रमेण तमःस्थाने *यस्य मृत्युश्शरीरमिति पठ्यते, अतो नारायणाधिष्ठिततमोवाक्यमिह पुरोवादः। *नासदासीन्नो सदासीत्तदानीं तम आसीदित्यादिवाक्यमत्र पुरोवादः किं न स्यादिति चेत्, तथाऽपि तस्य **सौबाल**वाक्यसमानार्थत्वं

ग्राह्यम् । अतः कारणतमोधिष्ठातृत्वेन प्रसिद्धो नारायण एवात्र शब्दान्तरपरामृष्टः । अनन्तरं च *तदक्षरम्, *तत्सवितुर्वरेण्यमित्यादिना तत्प्रकारविशेषोपदेशः । **मानवे** च * आसीदिदं तमोभूतमप्रज्ञातमित्यारभ्य, * तेन नारायणः स्मृत इत्यन्तेन स एव कारणतमोधिष्ठातेति स्पष्टमुक्तम् । तदेतत्सर्वमभिप्रेत्याह—**उक्त**मिति । एवमनभ्युपगमे बहुश्रुतिस्मृतीतिहासादिबाधः स्यादित्याह—**अनेकबाध** इति । अपि च नारायणकारणत्वप्रतिपादिकायां **महोपनिषदि** *न ब्रह्मा नेशानो नेमे द्यावापृथिवी इत्यादिना नारायणात् ब्रह्मेशानयोरुत्पत्त्यादिकं श्रुतम् । *यदा तम इति वाक्ये, *न दिवा न रात्रिरित्येतावदुक्तम् । एतेन *हिरण्यगर्भस्समवर्तताग्रे इति वाक्यमपि निरूढम्, *अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टाविति तद्विषयानुवाकान्तरसमानार्थत्वसिद्धेश्चेति ॥ ६ ॥

152. यः प्रोक्तस्सर्वकर्तुः परमखिलतनोर्नापरं किञ्चिदस्ती-
त्यस्यैव स्यादनुक्त्योत्तरतरकथनं न त्वितोऽन्यस्य बाधात् ।
विश्वव्याप्तस्य तस्योचितमुपधिपरिच्छेदनादुन्मितत्वं
स्वस्यैव प्रापकत्वादशिथिलचिदचिद्धारणाच्चैष सेतुः ॥ ७ ॥

ननु *यस्मात् परं नापरमस्ति किञ्चिदित्यादिना *तेनेदं पूर्णं पुरुषेण सर्वमित्यन्तेन पुरुषसूक्तादिप्रसिद्धं पुरुषमनूद्य *ततो यदुत्तरतरमित्यादिना तस्मात् परस्यैव वेदनममृतत्वादिसाधकमुक्तम्; स एव सर्वेश्वरः स्यादित्यत्राह—**यः प्रोक्त** इति ॥ सर्वकर्तृत्वं पुरुषसूक्तार्थप्रत्यभिज्ञया सिद्धम् । अखिलतनुत्वं च *पुरुष एवेदं सर्वमितिवत् *तेनेदं पूर्णं पुरुषेण सर्वमित्यनेन व्यञ्जितम् । यस्मादपरं किञ्चित् परं नास्तीत्यन्वयः । तेन *न तत्समश्चाभ्यधिकश्च दृश्यत इत्ययमर्थोऽनूदितो भवति । एवं समाभ्यधिकदरिद्रस्य विश्वव्यापिनोऽस्यैव सहेतुकं *ततो यदुत्तरतरमित्यनुवादः । अत एव *तदरूपमनामयमित्यादिभिराकारान्तरोपदेशः । प्रकार्यन्तरस्यासिद्धत्वाद्यदुत्तरतरमित्यनुवादायोगमभिप्रेत्याह—**न त्वितोऽन्यस्येति** । अयं भावः—*य एतद्विदुरमृतास्ते भवन्ति, अथेतरे दुःखमेवापियन्तीति च तद्विषयमेव । अन्यथा *नान्यः पन्था अयनायेति पुंसूक्तवाक्येन व्याघातः । एकविषयत्व एव ह्युभयत्रान्यवेदनस्य मोक्षहेतुत्वाभावोक्तिस्संघटते । तत्र बहुधा विरोधमप्याह—**बाधा**दिति । पूर्ववाक्ये तावत् परान्तरनिषेधादुपक्रमनयेन तद्विरुद्धमुत्तरमुदेतुं नालम्, उत्तरत्र सर्वाननशिरोग्रीवत्वादिना *सहस्रशीर्षा पुरुषः, *सहस्रशीर्षं देवमित्याद्युक्तमिह प्रत्यभिज्ञातम् । अतोऽपि न तदन्यस्योत्तरतरत्वोक्तिसंभवः । अन्यथा *न त्वत्समोऽस्त्यधिकः कुतोऽन्य इत्याद्युपबृंहणशतबाधश्चेति । ननु *पादोऽस्य विश्वाभूतानि, *एष त आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वेत्यादिभिः कारणपुरुषस्य परिच्छिन्नत्वोक्त्या ततोऽन्यदपरिच्छिन्नं परतरमित्यत्राह—**विश्वव्याप्तस्ये**ति । अयं भावः—यत्रयत्र परिच्छेदोक्तिः तत्रतत्र विश्वव्याप्तत्वमप्युक्तम् । अतस्तथातथोपासनार्थमौपाधिकः परिच्छेद उच्यत इति । सेतुत्वश्रुत्या तेनोपायेन कूलान्तरवत् प्राप्यान्तरं गम्यत इत्यत्राह—**स्वस्यैवे**ति । *अमृतस्यैष सेतुरित्यत्र तावदमृतशब्देन श्रुत्यन्तरवत् ब्रह्माभिधाने स्वप्राप्तेः स्वयमुपाय इत्येतावदेव सिध्येत् । मोक्षाभिधानेऽपि तदुपायतयाऽन्यः परतरो न कल्पयितुं शक्यते । *एष सेतुर्विधरण एषां लोकानामसंभेदायेत्यत्र तु *षिञ् बन्धने इति धातौ स्वस्मिन्नाधारे विश्वमसङ्कीर्णं बध्नातीति सेतुः । तत्रापि न ततः परसंभवः । *एतं सेतुं तीर्त्वेत्यत्रापि *अन्धस्सन्ननन्धो भवतीत्यादिपूतरवाक्येषु पुरुषस्य प्राप्यान्तरानभिधानात् तरतिः प्रातिवचनः । एवं *नैतं सेतुमित्यादावप्यन्यथासिद्धसेतुव्यपदेशो न प्राप्यान्तरकल्पनक्षम इति ॥ ७ ॥

153. पुंसूक्तं सर्ववेदप्रपठनमहितं यत्परत्वैकतानं
तस्यैव श्रीपतित्वं विशदमभिदधे ह्युत्तरत्रानुवाके ।
आम्नातश्चैष नारायण इति निखिलब्रह्मविद्यासु वेद्य-
स्तत्तद्विद्याप्रदेशश्रुतविविधपदप्रत्यभिज्ञप्तिपूर्वम् ॥ ८ ॥

अथ पुरुषसूक्तस्य विनियोगविशेषान्नारायणपरत्वे सिद्धेऽपि शब्दसाधारण्यात् सन्दिहानानां प्राकरणिकादनन्यथासिद्धलिङ्गाद्विशेषनिश्चयमुत्पादयति—**पुंसूक्तमिति** ॥ सर्ववेदप्रपठनमहितमित्यनेन परतत्त्वविषयप्रमाणानां मिथोविरोधस्फूर्तौ बलाबलचिन्तायां परिग्रहातिशयादेतस्य प्राबल्यं सूच्यते । उक्तं च तदभिप्रायेण **महाभारते**—*इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते इति । उत्तरानुवाकः पुरुषसूक्तोक्तमहापुरुषविषयः, सन्निध्यनुगुणशब्दार्थप्रत्यभिज्ञानात् । तत्र *ह्रीश्च ते लक्ष्मीश्च पत्न्याविति **तैत्तिरीयास्**समामनन्ति । **वाजसनेयिन**स्तु—*श्रीश्च ते लक्ष्मीश्च पत्न्याविति । न चात्रानुवाकद्वये धातृप्रजापतिशब्दाभ्यामन्यविषयत्वमाशङ्कनीयम्; विश्वकर्मत्वष्टृशब्दाभ्यामपि प्रसङ्गात् । अतः प्रसिद्धतमलिङ्गानुरोधेन धातृप्रभृतिशब्दानां योगत एव मुख्यत्वमेष्टव्यम् । किंच **नारायणानुवाके** *सहस्रशीर्षं देवमित्यादिभिः पुरुषसूक्तप्रभृतिसर्वपरविद्यावेद्यं पुरुषं प्रत्यभिज्ञाप्य तस्य नारायणत्वं बहुशोऽभ्यस्तम् । अतो यत्रयत्र परब्रह्मपरतत्त्वपरज्योतिःपरमात्मादिशब्दा दृष्टास्तत्र सर्वत्र नारायण एव प्रतिपाद्यत इति निश्चीयते । अतः परतत्त्वनिर्णयेऽयमेवानुवाकः पर्याप्त इत्यभिप्रायेणाह—**आम्नात** इति ॥ ८ ॥

154. रुद्रेन्द्रादिश्च यत्र स्फुरति परतयाऽनन्यथासिद्धलिङ्गै-
स्तत्तत्तत्त्वैर्विशिष्टो हरिरखिलतनुस्तासु विद्यासु वेद्यः ।
पारम्यं त्वान्यपर्यान्न भवति न किरित्यादिभिः स्तोत्रवाक्यै-
रन्याकूतैर्नमस्यादिभिरपि न परः स्यादनैकान्त्यदुःस्थैः ॥ ९ ॥

तथाऽपि त्वाष्ट्रवधादिलिङ्गैः प्रसिद्धेन्द्रादिविषयासु मोक्षार्थविद्यासु का गतिरित्यत्राह—**रुद्रेन्द्रादिरिति** ॥ प्रसिद्धेन्द्रादिलिङ्गानां परमात्मलिङ्गानां चानन्यथासिद्धावुभयानुरोधेन सद्वारकमद्वारकं च तत्तद्विशिष्टब्रह्मोपासनपरत्वं स्वीकर्तव्यमित्यर्थः । कर्मविधिप्रकरणेषु *न किरिन्द्र त्वदुत्तर इत्यादिभिः प्राकरणिकदेवताप्रशंसापरैः न तासां परत्वसिद्धिरित्याह—**पारम्य**मिति । * न किरिन्द्र इत्यस्य वस्वादित्यादिषु त्वदुत्तरो नास्तीति याथार्थ्यसिद्धिः । *एक एव रुद्रो न द्वितीयाय तस्थे इतीदमपि तत्रत्यपशुविशेषे द्वितीयानन्वयपरमिति **मीमांसाभाष्यकारादिभि**र्व्याख्यातम् । एवमीदृशवाक्यान्तराणि यथार्हं नेतव्यानि । यस्तु नमस्कारभूम्ना बहुप्रदेशबहुवाक्यप्रतिपन्नतया तत्तदपदानविशेषैश्चान्यत्र क्वचित्परत्वं शङ्कते; तं प्रत्याह—**अन्याकूतै**रिति । नमस्कारस्तावद्बाधभीत्या सान्त्वनाभिप्रायेण लोकवद्वेदेऽपि दृष्टः; *नमस्ते अस्तु मा मा हिंसीरिति तद्भूयस्त्वं च भीतिभूयस्त्वादेरपि स्यात् । अस्ति च तेषुतेषु देवताविशेषेषु नमस्कारस्तद्भूमा बहुप्रदेशपाठादिकमतिशयितापदानं च । अतो नैतैरेकः परः स्यात्, सर्वेषां च सर्वस्मात्परत्वं व्याघातदुःस्थमिति भावः ॥ ९ ॥

155. धर्माणां स्थापनार्थं स्वयमपि भजते शासिता शासनं स्वं
स्वस्यापि प्रत्यवायानभिनयति नृणां पापभीतिं विधित्सुः ।

शुद्धैस्स्वेच्छावतारैर्भजति सुलभतां तावतोत्पत्त्यनूक्तिः
प्रोक्तो विष्णुश्शिखायामपि हि स पुरुषः प्राप्ततारार्धमात्रः ॥ १० ॥

नन्ववतारेषु भगवतश्शास्त्रार्थानुष्ठानं तत्फलभोगश्च श्रुतिस्मृतिषु बहुधा दृश्यते । अतस्तस्यापि कर्मवश्यत्वं स्यादित्यत्राह—**धर्माणा**मिति ॥ तदेतत् *न मे पार्थास्ति कर्तव्यम्, *धर्मसंस्थापनार्थायेत्यादिभिस्सिद्धम् । यद्यपि *जनितेन्द्रस्य जनितोऽत विष्णोरित्येतत् प्रीणनद्रव्यप्रशंसार्थं, तथाऽप्य**थर्वशिखायां** *ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्त इति ब्रह्मादेरिव भगवतोऽपि प्रसूतिः श्रूयते । अतस्तदतिरिक्तं कारणं तत्र ध्येयतयोच्यत इत्यत्राह—**शुद्धै**रिति । अकर्महेतुकैरप्राकृतैरित्यर्थः । सौलभ्यार्थावतारानुवादस्तस्यैव सर्वकारणस्य ध्येयत्वविधानार्थमिति भावः । तत्रैव प्रणवनिरूपणे स्वार्थस्थापनं व्यनक्ति—**प्रोक्त** इति । प्रणवस्य तिसृणां मात्राणां वर्णभेदांस्त्रिमूर्तिदेवताकत्वं चोक्त्वा तस्य चतुर्थ्या अर्धमात्रायास्सर्ववर्णत्वं पुरुषदेवताकत्वं चोक्तम् । स च पुरुषः *सृष्टिस्थित्यन्तकरणीमित्यादावुक्त एव जनार्दनः । *तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासः *यथा पाण्ड्वाविकं *यथेन्द्रगोप इत्यादिना च पुरुषस्य सर्ववर्णविग्रहः श्रुतः । **भारतादौ** च विश्वरूपादिविग्रहे व्यक्तमेतत् । *भगवानिति शब्दोऽयं तथा पुरुष इत्यपि । निरुपाधी च वर्तेते वासुदेवे सनातने ॥ इति च स्मर्यते इति ॥ १० ॥

156. **आद्यं रामायणं तत्स च निगमगणे पञ्चमः पञ्चरात्रं**
सत्त्वोपज्ञं पुराणं मनुमुखमुनिभिर्निर्मितं धर्मशास्त्रम् ।
त्यक्तान्यो मूलवेदः कठपरिपठिता वल्लिकास्तापनीयं
सौबालब्रह्मबिन्दुप्रभृतिकमपि नस्तत्परं तत्परत्वे ॥ ११ ॥

उक्तस्यार्थस्यानन्यथासिद्धस्थापकभूयस्त्वमाह—**आद्य**मिति ॥ मानवादिभ्योऽपि पूर्वमित्यर्थः । तदिति परिग्रहप्रसिद्धिव्यञ्जनम्; स चेत्यपि तथैव । निगमगणे पञ्चमत्वं च *वेदानध्यापयामास महाभारतपञ्चमानिति प्रदर्शितम् । पञ्चरात्रस्य कार्त्स्न्येन प्रामाण्यं च महाभारतादिप्रसिद्धम्, शारीरके स्थापितं च । सत्त्वेन गुणेनादिभूतेन उपज्ञायमानत्वात् सत्त्वोपज्ञं वैष्णवादिपुराणम् । तेन मात्स्यादिषु विभक्तराजसतामसेभ्यः प्राबल्यं सूच्यते । **मनुमुखमुनिभि**रिति—अनेन *मन्वर्थविपरीता तु या स्मृतिस्सा न शस्यत इत्युक्तं मानवप्राबल्यं व्यज्यते । त्यक्तान्यः—परित्यक्तदेवतान्तरतद्धर्मः । मूलवेदः—अनन्यधर्ममूलभूतो वेदभागः । **कठवल्लीषु**—*विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः । सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम् ॥ इति प्राप्यविशेषदर्शनात्तासु पुरुषादिशब्दोक्त उपास्यो विष्णुरेवेति युक्तम् । **तापनीयोपनिषत्तु** नृसिंहरूपभगवदवतारैकविषया । **सुबालोपनिषच्च** नारायणस्यैव परत्वं बहुधा प्रपञ्चयति । **ब्रह्मबिन्दूपनिषदपि** *अहं वासुदेव इत्यहंग्रहोपासनदर्शनाद्वासुदेवविषया । प्रभृतिशब्देन नारायणोपनिषदादिसंग्रहः । तत्परत्वे तत्परं—भगवत्पारम्ये प्रधानाभिप्रायवदित्यर्थः ॥ ११ ॥

157. **मध्यस्थोक्तिर्विरुद्धे परमहिमपरे तत्र तत्रैतदुक्ति-**
र्वृत्तान्तास्ते विचित्राः स्वमतमभिहितं देवतातत्त्वविद्भिः ।
वैषम्यं शिल्पशास्त्रप्रभृतिषु विविधं वैदिकस्वीकृतत्वं
प्रज्ञासंस्कारभाजां भवति भगवति स्वप्रधाने प्रमाणम् ॥ १२ ॥

तत्राभ्युच्चययुक्तिमाह—**मध्यस्थोक्तिरि**ति ॥ राजसादिपुराणान्यतमेन सात्त्विकपुराणे विरुद्धे तदुभयमध्यस्थपुराणान्तरोक्तिसंवादान्निर्णयः स्यात् । ब्रह्मरुद्राद्येकैकमहिमतत्परे च पुराणे बहुषु प्रदेशेषु भगवत्पारम्यं दृश्यते । रक्तरुष्टयोरपि दोषगुणोक्तौ प्रत्ययितत्वमाहुः । वृत्तान्ताः—*कान्त्वा निगीर्य पुनरुद्गिरतीत्यादिभिस्संगृहीताः । देवतातत्त्वविद्भिः—पराशरपाराशर्यादिभिः । *विष्णोस्सकाशादुद्भूतम्, * आलोड्य सर्वशास्त्राणि, * सत्यं सत्यं पुनस्सत्यमित्यादिभिः स्वमतमभिहितम् । शिल्पशास्त्रे च परावरभावेन वैषम्यं दृश्यते ; तत्र ह्युत्तममध्यमाधमविमानान्यधिकृत्योक्तम्—* स्यान्नागरद्राविलवेसरं च क्रमेण वै सत्त्वरजस्तमांसि । महीसुरोर्वीपतिवैश्यकास्ते हरिर्विधाता हर आदिदेवः ॥ इति । * विष्णोरन्ये राध्यमाना न साक्षाच्छ्रीकरास्सुराः । सर्वदेवास्पदे विष्णौ धिष्ण्यं संपत्सुखावहम् ॥ इति । प्रभृतिशब्देनायुर्वेदादिसंग्रहः । पठ्यते—*हरिं हरीतकीं चैवेत्यादि । ज्यौतिषे च *धन्यं तदेव लग्नमित्यादि । वैदिकस्वीकृतत्वं—वेदविदुत्तमैः **सर्वैर्बोधायनटङ्कद्रमिडगुहदेवकपर्दिभारुचिप्रभृतिभिर्भगवत एव** परत्वेनाङ्गीकृतत्वम् । एतत्सर्वं सदाचार्यशिक्षाजनितप्रज्ञासंस्कारभाजाम् * आत्मेश्वरमिति स्वप्रधानतयाऽधीते भगवति प्रमाणं भवतीति ॥ १२ ॥

158. **इन्द्रेशानाद्यभिख्या स्वयमिह महदाद्युक्तिभिर्वा विशिष्टा**
तत्तत्पारम्यमानं न भवति बलवद्धर्मिमानोपरोधात् ।
नो चेत्स्यान्नैक ईशो न भवति यदि वा कश्चिदन्योन्यबाधा-
ल्लोकेऽप्यन्वर्थभावं न हि दधति महावृक्षमुख्यास्समाख्याः ॥ १३ ॥

कश्चिदाह—ईश्वरशब्दो निर्विशेषणो महत्परमशब्दविशेषितश्च कस्यचित् समाख्या ; अन्यस्य त्वेवं त्रिविधः पुरुषशब्दः ; अतस्तयोरवसीयते परावरभाव इति । अत्रेन्द्रप्रतिबन्दिं सहोक्त्या सूचयन् प्रतिवक्ति—**इन्द्रेशानादी**ति ॥ अयं भावः—इन्द्रशब्दो हि परमैश्वर्यवाचिधातुनिष्पन्नः केवलोऽपि परमेश्वरत्वं ब्रूते, किमुत महत्पूर्वः ; तथाऽपि येन तत्र समाख्यासङ्कोचः स रुद्रेऽपि समः, कार्यत्वकर्मवश्यत्वयोस्समचर्चत्वादिति । समाख्यातः श्रुत्यादेर्बलीयस्त्वं सूचयन् हेतुमाह—**बलव**दिति । एवमनभ्युपगमे बाधकप्रसङ्गद्वयमाह—**नो चे**दिति । समाख्यामात्रावलम्बने रुद्रेन्द्रादयो बहव ईश्वराः स्युः, न वा कश्चित्, तुल्ययोगक्षेमत्वादिति भावः । नाममात्रस्यासाधकत्वं सर्वसंप्रतिपत्त्या दर्शयति—**लोके**ऽपीति । महौषधमहानद्यादिसंग्रहाय मुख्यशब्दः ॥ १३ ॥ **इति भगवतः परत्वम् ॥**

159. **एकं त्रेधा विभक्तं त्रितयसमधिकं तत्त्वमीशास्त्रयस्ते**
विष्ण्वन्या मूर्तिरीष्टे प्रभवननियमः कल्पभेदात्त्रयाणाम् ।
इन्द्रादीनामिव स्यान्निजसुकृतवशादीश्वराणां प्रवाहः
स्यादेकस्येश्वरत्वं प्रतिफलनवदित्यादि चैवं परास्तम् ॥ १४ ॥

अथात्र न्यायाभासमूलानि मतान्तराण्यनूद्य तेषां दत्तोत्तरत्वमाह—**एक**मिति ॥ एकस्यैव रामकृष्णादिवत्साक्षादवतारे त्रिधा विभाग इति पक्षः, * एकैव मूर्त्तिर्बिभिदे त्रिधा[से]ऽस्येत्यादिषु विवक्षितः ; तत्र मूलभूतानां * विष्णुरेव परं ब्रह्म त्रिभेदमिह पठ्यते * सृष्टिस्थित्यन्तकरणीमित्यादीनां, * तवान्तरात्मा मम चेत्यादिवाक्यान्तरानुविधानात् क्षेत्रज्ञव्यवधानेन द्वयोरेकत्राव्यवधानेन च [वृत्तिं] प्रतीतिं व्याचख्युः । त्रिमूर्त्युत्तीर्णं पुरुषान्तरं सच्चिन्मात्रं वा परतत्त्वमिति पक्षे, * स संज्ञां याति भगवानेक एव जनार्दनः इत्यादिभिरपि बाधः । परस्परं भिन्ना ईश्वरास्त्रय इति पक्षश्चैकस्य

सर्वप्रशासितृत्वादिभिर्निरस्तः । विष्णोरन्य एव ब्रह्मा रुद्र आदित्यो वा कश्चिदीश्वर इति वादोऽपि विष्णोरेव सर्वेश्वरत्व-स्थापनादापास्तः । त्रय ईश्वरास्सत्त्वादिगुणोन्मेषभिदुरकल्पभेदाच्चक्रनेमिनीत्या निम्नोन्नतैश्वर्या इति कल्पनाऽपि निरस्ता । प्रवाहेश्वरपक्षश्च, * न कर्मणा वर्धते नो कनीयान् *स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्यादिश्रुतिभि-रवधूतः । अस्त्वेक एवेश्वरः, तस्येश्वरत्वं नित्यसत्त्वविशेषसन्निधाननिबन्धनं प्रतिफलनकल्पमिति योगराद्धान्तश्च, *पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेत्यादिभिरपोढः । आदिशब्देन नित्यचिकीर्षाप्रयत्नवां-श्चिकीर्षारहितोऽपि वा ज्ञानप्रयत्नमात्रवानित्यादिमतभेदसंग्रहः । एवं—श्रुतिलिङ्गादिप्राबल्यस्थापनप्रकारेणेत्यर्थः ॥ १४ ॥

इति त्रिमूर्त्यैक्यादिपक्षनिरासः ॥

160. **सर्गादीनामसिद्धौ न हि निगमगिरां भज्यते संप्रदाय-**
स्तत्सिद्धौ नानुमानं प्रभवति यदिदं बाधशून्यं विपक्षे ।
शास्त्रेभ्यस्तत्प्रसिद्धौ सहपरिपठनाद्विश्वकर्ताऽपि सिध्ये-
द्धर्मानुष्ठापनार्थं तदनुमितिरतो नैव शक्या कदाचित् ॥ १५ ॥

श्रुतिसिद्ध ईश्वर इत्युक्तम् । अनुमानतोऽपि सिद्ध इति वदन्तः प्रतिवक्तव्याः । तत्र तावदुपदेशलिङ्गं दूष्यते—**सर्गादीना**मिति ॥ किमस्मदादीनां धर्मोपदेशार्थमीश्वरः कल्प्यते उत कल्पादिसंभवानां पुरुषविशेषाणाम्? नाद्यः, पित्रा-दिक्रमेण संप्रदायप्रवृत्तेरीश्वरनैरपेक्ष्यात् । पित्रादिप्रेरणार्थमीश्वरोऽपेक्षित इति चेत्, न; तर्हीदमुपदेशलिङ्गं, कार्यलिङ्गानु-प्रवेशात् । न द्वितीयः, सर्गाद्यसिद्धाविदानीमिवानादिसंप्रदायाविच्छेदेन तत्प्रवर्तकानपेक्षणात् । सिद्धिस्तु सर्गादेरनु-मानात् आगमाद्वेति विकल्पे पूर्वं दूषयति—**तत्सिद्धा**विति । अयं भावः—विश्वसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीप-सन्ततिवदित्यनुमानं तावत्सर्वात्ममोक्षमिच्छतामन्त्यमुक्तिसमयभाविना सर्वकार्योच्छेदेन चरितार्थं स्यात् । वर्तमानब्रह्माण्ड-परमाणवः पूर्वमुत्पादितसजातीयसन्तानान्तराः नित्यत्वे सति तदारम्भकत्वात् घटादिपरमाणुवदित्यत्राप्युपचयापचयभिदुर-ब्रह्माण्डभेदेन तत्तत्परमाणूनां प्रागपि ब्रह्माण्डसन्तत्यन्तरारम्भसंभवेनार्थान्तरत्वापातादिति । साधारणदोषमाह—**यदिद**-मिति । न तावत्सर्गाद्यभावे काचिदनुपपत्तिः । यद्यप्यारब्धानां भावानां नश्वरत्वमात्रं गम्यते, तथाऽपि तत्सन्ततीनामनु-च्छेदोक्तौ न विरोधः । यत्तूक्तम्* प्रमायाः परतन्त्रत्वात् सर्गप्रलयसंभवात् । तदन्यस्मिन्ननाश्वासान्न विधातुरसंभवः ॥ इति, तत्राद्यो हेतुर्बुद्धिसरे दूषयिष्यते । द्वितीयस्त्विदानीं दूषितः । तृतीयोऽपि विमतः, संभवन्ति हि सर्गादिकाले प्राचीनसुकृतसञ्चयविपाकवै[जात्या]विध्यात् प्रतिबुद्धवेदराशयो देवा महर्षयश्च; ते युष्माभिरपि वेदवक्तुराप्तिख्यापनाय तदुपदेशग्रहणप्रवचनाद्यर्थं च स्वीकृताः । ऋषित्वमपि सुप्तप्रबुद्धन्यायेन सुकृतवशात् प्रागधीतप्रस्मृतवेदभागप्रत्यक्षीकरण-मेव; श्रूयते हि * अजान् ह वै पृश्नींस्तपस्यमानान् ब्रह्म स्वयंभ्वभ्यानर्षत् त ऋषयोऽभवँस्तदृषीणामृषित्वमिति । अत-स्तैरेव सर्गोपपत्तौ किमन्येन? एतेन बहुपरिग्रहगौरवं चापास्तम् । विजातीयक्लृप्तावेव हि गौरवम् । न च बहुष्व-नाश्वासः, एकस्मिन्निव तेष्वपि तत्परिहारस्य समचर्चत्वादिति । आगमात्सर्गादिसिद्धौ सर्वकर्तुरपि तत एव सिद्धिमाह—**शास्त्रेभ्य** इति । सर्वकर्तारं पुरस्कृत्यैव हि सर्गादिकथनम्; अतोऽनुमेयं नावशिष्यत इति भावः । विमतं प्रति प्रयोग-संभवेऽप्यनुमानासामर्थ्यं दर्शितम् । सांख्यागमैः सर्गादिसिद्धिः स्यादिति चेन्न, श्रुतिविरोधे बाधात्; अन्यथा सेश्वर-

सांख्येऽनुमेयाभाव एवेति । अनुमानान्तरैरपि सर्गाद्यसिद्धिं तत एवोपदेशलिङ्गस्य निर्मूलतां चाभिप्रेत्य निगमयति–धर्मेति ॥ १५ ॥ इत्युपदेशानुमानभङ्गः ॥

161. साध्यं यादृक् सपक्षे नियतमवगतं स्याद्धि पक्षेऽपि तादृक्
तस्मात्कर्मादियुक्तः प्रसजति विमते कार्यताद्यैस्तु कर्ता ।
एतत्तत्सिद्ध्यसिद्ध्योर्न घटत इति न क्ष्मादिपक्षे सपक्ष-
व्याप्ताकारप्रसङ्गात्तदनुपगमने न क्वचित्स्यात्प्रसङ्गः ॥ १६ ॥

यानि च बहून्यनुमानानि संजगृहुः–*कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः । वाक्यात्संख्याविशेषाच्च साध्यो विश्व[सृड]विदव्ययः ॥ इति, तत्रान्वयिषु साधारण्यमाह–**साध्य**मिति ॥ यादृक् सपक्षे नियतमवगतम्–येनाकारेण व्याप्तं प्रमितमित्यर्थः । स्याद्धि पक्षेऽपि तादृक्–न हि पर्वते वह्निरनुमीयमानः उष्णत्वमपहाय सिध्येदिति भावः । व्यवहितेऽपि पश्चादुष्णत्वदर्शनात्तत्सिद्धिरिति चेन्न, प्रालेयमर्मरि तैः पद्मपत्रादिभिः प्रालेयसन्निहितानुद्भूतरूपहुतवहानुमाने तदसिद्धेः । न च तत्रानुष्णो वह्निरनुमीयेत, मर्मरीभावस्यैवासिद्धिप्रसङ्गात् । यद्यनुष्णो वह्निः कश्चित्पचेत्, अन्वयव्यतिरेकवान्नीहार एव पाचकः किं न कल्प्येत ? एवं सामान्यतश्शिक्षितया व्याप्त्या प्रस्तुतेऽनिष्टप्रसङ्गमाह–**तस्मा**दिति । कार्यत्वादिभिरुर्वीदूर्वादौ कर्ता यदि सिध्येत् कर्तृव्यापककायकरणकर्मादिमान् स्यात्; तथा च नाभ्युपगम्यत इत्यनिष्टता, विपर्यये विभ्रमश्च । नन्वनुमानवत्तर्कोऽपि धर्मिसिद्धिसापेक्षः, अन्यथा प्रसञ्जकं कुत्राहार्यम्? अनिष्टं कुत्र वा प्रसञ्जनीयम्? तदिहेश्वरसिद्धौ विदेहतयैव तत्सिद्धेः; तद्विरुद्धप्रसङ्गानुत्थानम् तदसिद्धौ निराश्रयस्तर्कः कुत्र किं प्रसञ्जयेदित्यभिप्रायेण चोदयति–**एत**दिति । परोक्तहेत्वाश्रय एव प्रतिकूलतर्काश्रय इत्यभिप्रायेण प्रतिवक्ति–**नेति** । विवृणोति–**क्ष्मादी**ति । अयं भावः–यदि वयमीश्वरे धर्मिणि प्रसङ्गमवतारयामः, तदा सिद्ध्यसिद्धिविकल्पदौःस्थ्यं स्यात्; यदि च पृथिव्यादावाश्रये कार्यत्वहेतुना कर्तारं देहादिमन्तमुपस्थापयेम, तदा दूर्वादौ व्यभिचारात् न प्रतिसाधनं न प्रतितर्कश्चेति स्यात्; किंतु संप्रतिपन्ने पृथिव्यादौ धर्मिणि साध्यधर्मस्वभावात्तद्व्यापकप्रसक्तिं ब्रूमः; अतो न कश्चिद्विरोध इति । अथ साक्षात्परसाध्यमाश्रयीकृत्य प्रसङ्गः प्रयोक्तव्य इति मन्येत, तदा प्रसङ्गस्यैवोच्छेद इति प्रसञ्जयति–**तदनुपगमन** इति । परेष्टसाध्यविशेषस्य स्वीकारे बहिष्कारे च व्याघातस्य दुष्परिहरत्वादिति शेषः ॥ १६ ॥

162. यत्कार्यस्योपयुक्तं तदिह भवतु नः किं परेणेति चेन्न
ज्ञानादेरुद्भवे तद्विषयनियमनेऽप्यर्थनादिन्द्रियादेः ।
नित्यं ज्ञानं विभोस्तन्न नियतविषयं तेन नान्यार्थनं चे-
न्नानित्यस्यैव दृष्टेस्तव कथमजसंयोगभङ्गोऽन्यथा स्यात् ॥ १७ ॥

ननु कार्योत्पत्तौ कर्तुर्ज्ञानचिकीर्षाप्रयत्नमात्रमुपयुज्यते, देहादेः कार्यव्यापकत्वादर्शनात् कार्यविशेषे तदुपयोगो दृष्ट इति चेत्, यत्र दृष्टस्तत्र तथाऽस्तु, न सर्वत्र; अतिप्रसङ्गादित्यभिप्रायेण शङ्कते–**यदिति** ॥ उपयुक्तं–ज्ञानचिकीर्षादिकम् । परेण–कार्योत्पत्त्यनुपयुक्तेनेत्यर्थः । अनुपयोगो दुर्वच इत्यभिप्रायेणाह–**नेति** । तत्साधयति–**ज्ञानादे**रिति । सपक्षव्याप्तप्रकारेण पक्षेऽपि कर्तुर्ज्ञानादिना कार्येण भवितव्यम्, ततस्तत्कारणतया कायकरणकर्मादियोगोऽपि दुस्त्यजः । प्रयत्नस्य विषयनियमश्चिकीर्षया; तस्याश्च प्रियाप्रियप्राप्तिपरिहारव्यापारकारणेन तावद्बुद्ध्या, सा च तत्तत्सामग्रीनियत-

विषयेति विषयनियमे स्थिते सामग्रीशून्यं ज्ञानं कथं सविषयम्? निर्विषये च तस्मिन् किं चिकीर्षेत? अचिकीर्षुश्च कुतः प्रयतेत? ननु कार्यस्यैव सामग्र्यपेक्षणम्, नित्यस्य तु स्वतस्सर्वविषयस्योत्पत्तिविषयनियत्योरभावात् किं सामग्र्येति शङ्कते—**नित्य**मिति। त्रय्यन्तिनामिव नित्यज्ञानसिद्धावेतद्वक्तव्यं नान्यथेति स्थापयितुमाह—**नेति**। अहेतुकं ज्ञानं किं दृष्टमुत कल्पितम्? नाद्यः, असिद्धेः; न द्वितीयः, दृष्टविजातीयक्लृप्त्ययोगादित्यभिप्रायेणाह—**अनित्यस्ये**ति। तादृशज्ञानक्लृप्तौ परस्येष्टविरोधमाह—**तवेति**। मूर्तवद्द्रव्यत्वादिना विभूनां विभुना संयोगे कल्प्यमाने संयोगकारणानामन्यतरकर्मोभयकर्मसंयोगानामसंभवात्तन्निषेधः कृतः, तथेहापि विज्ञानकारणानामिन्द्रियलिङ्गादीनामभावात्तदभावः स्यात्। नित्यत्वान्नैरपेक्ष्यमजसंयोगेऽपि सुवचम्। विभूनां मिथस्संयोगाभावे न किंचित्साधकमिति चेन्नित्यज्ञानाभावेऽपि किम्? असदाद्यशक्यकार्यानुत्पत्तिप्रसङ्ग इति चेत्; न, कारणान्तरैरेव तदुत्पत्त्युपपत्तेः। कर्तृनिरपेक्षैः कारणान्तरैः कार्योत्पत्तिर्न दृष्टेति चेत्, अन्यत्रादृष्टाऽप्यत्र तथा स्यात्, प्रध्वंसस्येव निमित्तमात्रजन्यत्वम्। वरं हि कल्पितस्य ज्ञानादेः कारणनैरपेक्ष्यकल्पनात् सिद्धस्य हेतुवर्गस्य क्वचित् कर्तृनैरपेक्ष्याङ्गीकारः अजसंयोगस्वीकारो वेति; स्वीक्रियतां का हानिरिति चेत्, सिद्धान्तहानिरिति ॥ १७ ॥

163. **किं वा धीच्छे गृहीते विषयनियतये ते हि यत्नोऽत्र नेच्छे-**
न्निर्हेतुस्तत्प्रमेष्टा भवतु विषयवानेष तद्वत्स्वतस्ते।
प्रोक्ते यत्ने स्वभावाद्विषयवति सधीः स्यादितीदं क्व दृष्टं
यद्वा धीस्तं हि नित्यं न तु जनयति ते सा कथं तन्नियन्त्री ॥ १८ ॥

नन्वहेतुकसंयोगमिच्छद्भिरहेतुकज्ञानं न दूष्यम्, तद्दूषणे वा सिद्धान्तहानिः स्यादित्यत्राह—**किं वेति** ॥ कर्तुरनुमानेऽपि प्रयत्नमात्राधारत्वमनुमीयताम्, प्रयत्नव्यापकतया ते अपि सिध्येतामिति चेन्न; जीवनपूर्वकप्रयत्नमन्विच्छतां तत्र व्याप्तिभङ्गात्। अतः प्रयत्नक्लृप्तावपि ज्ञानचिकीर्षानैरपेक्ष्यमाह—**विषये**ति। सर्वकार्यविषयस्य हि प्रयत्नस्य विषयनियमाभावादेव न तदर्थं चिकीर्षाद्यपेक्षा। उक्तमर्थं प्रतिबन्दिगतं विवृणोति—**निर्हेतु**रिति। अयं भावः—अन्यत्र ज्ञानं सर्वं सकारणकं तत्प्रामाण्यं च कारणगुणाधीनमिति स्थापयद्भिरीश्वरज्ञानं तत्प्रामाण्यं च निष्कारणकमिति दृष्टविपरीतं कल्प्यते। अत्र ज्ञानचिकीर्षाख्यधर्म्यन्तरक्लृप्तिमपहाय प्रयत्नमात्रेऽन्यनिरपेक्षं विषयित्वमङ्गीकर्तुं युक्तम्। **श्लो.** नित्या चेश्वरबुद्धिस्ते नानुभूतिर्न च स्मृतिः। न प्रमा न भ्रमश्च स्यात्तत्तत्कारणवर्जनात् ॥ अनुभूत्यादिहेतूनामभावेऽपि तथा यदि। स्मृतिहेतोरभावेऽपि स्मृतिरेषा न किं भवेत् ॥ कुतश्चित् प्रमात्वादिकल्पनेऽपि तद्वदेव यत्नस्य विषयित्वेऽन्यनैरपेक्ष्यमपरिहार्यमिति। अत्र परोक्तं प्रसङ्गमनूद्य प्रतिषेधति—**प्रोक्त** इति। ज्ञानस्य स्वत एव सविषयित्वमित्येतदेव क्व दृष्टम्? सर्वत्र ज्ञाने सामग्रीनियतविषयत्वदर्शनात्। नित्यस्य चेश्वरयत्नस्य कार्यविशेषानुगुणसहकारिलाभमन्तरेण कार्यविषयत्वं नाम न किञ्चित् संभवति। न च विषयित्वमेव ज्ञानलक्षणम्, शक्त्यादीनामपि विषयधर्माणां धीत्वप्रसङ्गात्। यस्त्विच्छामनङ्गीकृत्य बुद्धियत्नावीश्वरस्य ब्रूते, सोऽपि प्रत्युत्पन्नवादी; नित्ययत्नमात्रेणापि सर्वकार्यसिद्धेरुक्तत्वात्। अबुद्धिपूर्वप्रवृत्तस्य कथं *स्वतन्त्रः कर्तेति लक्षणयोगः, कथंतरामीश्वरत्वयोग इति चेत्, अनिच्छापूर्वप्रवृत्तस्यापि सममेतत्। अत एव कारकान्तराप्रयोज्यत्वे सति कारकान्तरप्रयोक्तृत्वरूपं कर्तृत्वं कथमचेतनस्येत्यपि प्रत्युक्तम्, प्रयत्नवत एव प्रयोक्तृत्वसंभवात् तन्नित्यतया प्रयोज्यत्वाभावाच्च। ननु चेतनत्वमात्मलक्षणम्, तदभावे तत्त्वं न स्यादिति

चेत्, मैवम्; यत्नवत्त्वेन तल्लक्षणसिद्धेः; अन्यथेच्छाविरहेऽपि तदसिद्धिप्रसङ्गः। *इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मलिङ्गमित्याक्षपादी सहपठितिः, *क्रियावद्गुणवत्समवायिकारणमिति द्रव्यलक्षणमिति काणभक्षीव कथंचित्तया। ज्ञानाद्यत्यन्तायोगव्यच्छेदवन्निष्ठद्रव्यत्वावान्तरजात्याधार आत्मेति। अस्तु तर्हि यत्नमात्रवानीश्वरः, तथाऽप्यनुमानं न प्रतिक्षिप्तमिति चेन्न, *यस्सर्वज्ञस्सर्ववित्, *तदैक्षत बहु स्यां प्रजायेय, *सोऽकामयत बहु स्यां प्रजायेयेत्यादिश्रुतिशतविरोधादिति। दूषणान्तरमाह—यद्वेति। धीर्हि जनयित्री चिकीर्षाया विषयं नियच्छेत्; साऽपि तादृशी यत्नस्य। इह तु जनकत्वाभावान्न ततस्तद्विषयनियमः, सामानाधिकरण्यमात्रात्तन्नियमे जीवेश्वरगुणान्तराणामपि सविषयत्वप्रसङ्ग इति भावः॥

164. **निश्वासादिप्रयत्नक्रम इह भवतां जीव एवास्त्वदृष्टै-**
र्यद्वा तैरेव सर्वं घटत इति भवेत्तत्कृता सिद्धसाध्यम्।
क्लृप्तावन्यस्य कर्तृद्वयमुपनमति त्वत्सपक्षे तथा स्यात्
पक्षेऽपीत्यव्यवस्था यदि विफलतया त्यक्तिराद्येऽपि सा स्यात्॥ १९॥

अस्तु नित्ययत्नवानीश्वरोऽनुमेयः संप्लवाभ्युपगमादवशिष्टमागमिकं स्यादित्यत्राह—**निश्वासेति**॥ जीवनपूर्वकप्रयत्नन्यायादृष्टविशेषजनितयत्नवद्भिर्जीवैः क्षित्यादेः सकर्तृकत्वसंभवे किं नित्ययत्नतदाधारकल्पनागौरवेण? यादृशैरेवादृष्टैः शरीरादिनिरपेक्षैस्सहकृत ईश्वरस्स्रष्टेति मन्यसे, तादृशैरेव तत्फलभोक्तृष्वेव यत्नक्लृप्तेर्लघुत्वात्। एतेन मनःकरणकागन्तुकज्ञानादिमानीश्वर इति मतान्तरमपि निरस्तम्, तत्रापि देहादिनिरपेक्षमनःप्रवृत्तिक्लृप्तेर्गुरुत्वात्। अथवा कल्पनीये हि यत्ने सर्वमिदं चिन्त्यं, तत्कल्पनैव न युक्तेत्याह—**यद्वेति**। व्यवस्थापकैरदृष्टैरेव यत्नादिनिरपेक्षैरित्यर्थः। सर्वं—द्व्यणुकादि पर्वतादि च। घटते—उत्पत्तुमर्हति; एतेनानुमानस्य किमायातमित्यत्राह—**भवेदिति**। तत्कृता—चोदितमनुतिष्ठता। तत एव फलद्वारभूतादृष्टकर्त्रा जीवेनेत्यर्थः। न च क्रियाहेतुगुणेष्वन्यतमेन कार्यसंभवे तत्र गुणान्तरमपि हेतुतया कल्प्यम्; अदृष्टस्य च सर्वकार्यनिमित्तत्वेऽपि विशेषतः क्वचित् क्रियाहेतुगुणत्वं ब्रूथ *अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणुमनसोश्चाद्यं कर्मेत्यदृष्टकारितानीति, तत्कस्य हेतोः? नूनं क्रियाहेतुगुणान्तरनिवृत्त्यै स्यात्। एवं सति यत्रादृष्टप्रागल्भ्यम्, तत्र सुधा तत्पूर्वक्षणवर्तिज्ञानचिकीर्षाप्रयत्नक्लृप्तिः, प्राचीनैरेव तैर्जीवस्य तत्कर्तृत्वोपपत्तेः। अन्यथा शराभिचारकृष्यादिप्रयोगे वेधपीडादिकर्तृत्वं प्रयोक्तुर्न स्यात्। मा भूदिति चेन्न, लौकिकवैदिकचित्तविसंवादात्। नन्वदृष्टमचेतनं चेतनानधिष्ठितं कथं प्रवर्तेत? इत्थम्—स्वकारणोपनीतसहकारिसंपन्नतातिरिक्ततत्प्रवृत्त्यभावात्कारणानामपि तत्तत्कारणोपनेयत्वात्। तान्यप्यचेतनानि चेतनाधिष्ठेयानीति चेन्न, ईश्वरप्रयत्ने तदभावात्। चैतन्यायोगव्यवच्छेदवन्निष्ठतामात्रेण तस्यापि तदधिष्ठितत्वमिति चेन्न, तावतोऽधिष्ठानशब्दार्थतया कैश्चिदप्यनङ्गीकारात्। मयैवमङ्गीकृतमिति चेत्, अन्यैरपि तर्हि चैतन्यात्यन्तायोगव्यवच्छेदवन्निष्ठत्वमेव चेतनाधिष्ठितत्वमदृष्टानामित्यङ्गीक्रियेत। ईश्वरधीविशेषमदृष्टमिच्छता त्वया नैवमङ्गीकार्यमिति चेन्न, तथाविधादृष्टे त्वयाऽपि चेतनाधिष्ठेयत्वस्यासाध्यत्वात्। त्वन्मतेऽपि कारणवर्गानुप्रवेशिनो नित्यस्येश्वरज्ञानस्याचेतनस्य चेतनाधिगतत्वकल्पने तादृशचेतनान्तरक्लृप्तिप्रसङ्गः। **श्लो.** ईश्वराकूतभेदं च श्रौतादृष्टं यदीच्छसि। नृगुणापूर्वक्लृप्तिस्ते निष्फलैव तदा भवेत्॥ नन्वीश्वरप्रयत्नादेरसिद्धौ न त्वयाऽत्र व्यभिचार उदाहार्यः। तत्सिद्धौ तद्व्यतिरिक्ताचेतनेषु चेतनाधिष्ठाननियमसिद्धिरिति चेदन्येषामपि तद्वदृष्टादिव्यतिरिक्तविषये तन्नियमः स्यात्। अतोऽदृष्टवद्भिर्जीवैरेव जगदुत्पत्तिसिद्धिरिति सिद्धसाधनता दुर्वारा। जीवातिरिक्तकर्तृकल्पनेऽनिष्टं प्रस-

ञ्जयति—**क्लप्ताविति**। एककर्तृकतया प्रसिद्धे सपक्षे कर्तृद्वयं स्यात्, अनेककर्तृकेऽपि संप्रतिपन्नातिरिक्तकर्तृकत्वम्। कल्प्यमानो हि न केवलं क्षित्यादिमात्रकर्तृत्वेन कल्प्यते, तत्प्रयत्नस्य परिच्छेदकाभावेन सर्वविषयत्वात्। ततः किमित्यत्राह—**तथेति**। अयं भावः—क्षित्यादिकर्तरि साध्यमाने विश्वकर्त्रा तेन घटादेर्द्विकर्तृकत्वमायातम्, ततस्तद्दृष्टान्तेन पक्षस्य द्विकर्तृकत्वमापतेत्; ततस्सपक्षस्य त्रिकर्तृकत्वं स्यात्; एवं क्रमेणोपर्युपरि क्लृप्तावनन्तेश्वरापत्त्या *द्यावापृथिवी जनयन् देव एकः, *एकश्शास्ता न द्वितीय इति व्यवस्था भज्येतेति। अत्र परोक्तं कल्पनागौरवं शङ्कते—**यदीति**। एकेनेश्वरेण विश्वकार्यसिद्धौ द्वितीयक्लृप्तेर्निष्फलत्वात् तत्परित्याग इति। तत्र गौरवभिया त्याग एकस्मिन्नपि स्यादित्याह—**आद्येऽपीति**। उक्तं हि जीवैरेव कर्तृभिरदृष्टद्वारा सर्वकार्यं सिध्येदिति ॥ १९ ॥

165. **साध्यो हेत्वादिवेदी मत इह कलया सर्वथा वा तवासौ**
पूर्वत्रेशो न सिध्येन्न कथमपि भवेद्व्याप्तिसिद्धिः परत्र।
पक्षस्पर्शाद्विशेषान्न खलु समधिकं पक्षधर्मत्वलभ्यं
कल्प्योऽन्यस्ते विशेषस्सुकृतविषमिता जीवशक्तिस्तु सिद्धा ॥ २० ॥

पुनरपि विकल्पमुखेनानिष्टमाह—**साध्य** इति। किमत्रोपादनादिज्ञानवन्मात्रं सिषाधयिषितम्, उतोपादानादिकृत्स्नगोचरज्ञानवानिति विकल्पः। तत्राद्यं दूषयति—**पूर्वत्रेति**। जानन्ति हि जीवा जगदुपादानं पृथिव्यादिद्रव्यम्, कुम्भाद्युपयोगिपरमाणुद्व्यणुकादिज्ञानाभावेऽपि कुम्भादिकर्तृत्वं सर्वानुमतम्। द्व्यणुकप्रभृतिजगदुपकरणं च यागादि जानन्त्येव जीवाः। तच्छक्तेर्द्वारस्य वा साक्षात्काराभावेऽपि कुम्भादिन्यायाद्यागादिप्रवृत्तिरिष्टा। संप्रदानं च भोक्तारं स्वात्मानमात्मीयान् वा प्रयोजनं चेष्टप्राप्तिमनिष्टनिवृत्तिं वा न हि ते न जानीयुः, अतस्तेषामेव क्षित्यादिकर्तृत्वमविरुद्धम्। उत्तरं दूषयति—**न कथमपीति**। न हि कुम्भादिसामग्र्यन्तर्गतं सर्वं कुम्भकारादयो जानन्ति। योगिनां स्वकार्यसामग्रीसाकल्यज्ञानमस्तीति चेत्, किमतः? योगसिद्धसार्वज्ञ्या अपि हि न कुतश्चित् कल्पयितुं शक्यन्ते; अतो न तत्कार्यैस्सपक्षसिद्धिः; आगमतस्सिद्धौ तु तद्वदीश्वरोऽपि तदनुविधेयस्सिद्ध इति नानुमेयं किञ्चित्। अस्तु व्याप्त्या कर्तृमात्रमुपस्थाप्यम्, पक्षधर्मताबलात् सार्वज्ञ्यादिविशेषसिद्धिरित्यत्राह—**पक्षेति**। व्याप्यस्य पक्षधर्मतया हि व्यापकस्य प्रागविदितो धर्मिविशेषसंबन्धस्सिध्येत्। न तु सदपि सपक्षदृष्टवैजात्यम्, अन्यथा धूमानुमिते वह्नौ तार्णतादिविशयविलोपप्रसङ्गात्। सपक्षदृष्टान्यतामात्रमपि नानुमेयनियतम्, जातिव्याप्यैर्जात्यनुमाने तदनभ्युपगमात्। अतो नात्र व्याप्यपक्षधर्मतया विवक्षितविशेषसिद्धिः। परिशेषात्तर्हि तत्सिद्धिरिति चेन्न, परिशेषानुमानमपि हि क्षित्यादिकं सामान्यतस्सिद्धं तत्कर्तारं वा पक्षीकृत्य स्यात्? आद्ये किञ्चिज्ज्ञकर्तृकत्वनिषेधो वा? स्वतस्सर्वज्ञकर्तृकत्वं वा साध्यम्? नाद्यः, तत्संभवस्य स्थापितत्वात्। न द्वितीयः; तद्धि कृत्स्नं कार्यं पक्षीकृत्य कार्यत्वलिङ्गेन वा साध्यम्? प्रकृतपक्षमात्रनिष्ठेन वा केनचित्? पूर्वत्र किमन्वयिपुरस्कारेण, व्यतिरेकिण एवास्य युष्माभिः पृथगुपन्यासात्। अत एव कार्यविशेषतोऽपि सर्वज्ञानुमाने तेनैवालं किमन्वयिना कार्यलिङ्गेन? क्षित्यादिकर्तृपक्षीकारेण जीवासंभावितविशेषसाधनं तु दुश्शकम्, तादृशविशेषासंभवेऽपि जीवानामेव तत्कर्तृत्वस्य दर्शितत्वात्, तेषामेव तद्विरुद्धविशेषानुमानायोगाच्च। ननु घटादिकर्तृव्यावृत्तो विशेषः क्षित्यादिकर्तॄणां स्वीकार्यः; तदुत्पत्त्याऽऽसन्नपूर्वकाले तेषां तदनुगुणबुद्ध्यादिरहितत्वात्। अतो दृष्टविपरीतक्लृप्त्यविशेषे किमीश्वरक्लृप्तिप्रद्वेषेणेत्यत्राह—**कल्प्य** इति। अयं भावः—निश्वासादावधीपूर्वयत्नेनापि कर्तृत्वं त्वयैष्टव्यम्, कालविप्रकृष्टबुद्ध्याऽपि कर्तृत्वमाभिचारिकपरपीडादौ लोकवेद-

सिद्धम् । कुम्भाद्युत्पत्तावपि कुम्भकारादेश्चक्रचीवरदण्डसूत्रादिव्यापारहेतुभूतस्वदेहादिव्यापारे ह्यव्यवहितप्रवृत्त्युपयोगः, नान्यथा; समवायिनिष्पत्तौ वयं दृष्टान्तानुरोधेन व्यवहितव्यापारादपि कर्तृत्वं ब्रूमः; भवद्भिस्त्वदृष्टचरमेव वैषम्यं कल्प्यत इति । अथ स्यात्, कुम्भादिकृदसंभावितो गोपुरादिकर्तृषु बुद्धिशक्तिप्रकर्षो दृष्टः; मनुष्यासंभावितश्च शकुन्तलूतादिजन्त्वन्तरेषु; मनुष्येषु च विश्वामित्रादिषु; एवं देवासुरसिद्धादिषु पितामहपर्यन्तेषु; इति स्थिते बुद्धिशक्तिप्रकर्षतारतम्यस्य क्वचिद्विश्रमाद्यत्रासौ स ईश्वरस्सेद्धुमर्हतीति तत्राह—**सुकृते**ति । कर्मभेदतन्त्रमेव तारतम्यं त्वया निदर्शितं जन्मौषधिमन्त्रतपःसमाधिजाश्च सर्वास्सिद्धयस्तत्तददृष्टेष्वायतन्ते । एवं सत्यदृष्टाधीनधीशक्तिप्रकर्षतारतम्यं कालभेदेन कर्मवश्येष्वेव केषुचिद्भवतु; न विश्रमस्थानान्तरं मृग्यमिति भावः ॥ २० ॥

166. **कार्यं स्यात् कर्त्रभावेऽप्यवधिभिरितरैः कालवत्स ह्यसिद्ध-**
स्ते चादृष्टप्रयुक्तास्तदपि यतनवत्स्यात्तु यत्नानपेक्षम् ।
एकत्यागेऽन्यहेतुत्यजनमिति च न ध्वंसवत्सावधित्वात्
तस्माद्धेतोरभावे न फलमिति गतिस्तद्विशेषे विशेषः ॥ २१ ॥

अथात्र परेष्टं विपक्षे बाधं दूषयति—**कार्य**मिति ॥ एवं हि मन्यते—कारणाभावे कार्याभाव उभयाभ्युपेतः; कारणान्तराणि च कर्त्रुपहितमर्यादानि कथं कर्त्रभावे व्याप्रियेरन्? अतः कार्यस्य **सांख्यसौगतचार्वाकवर्तन्या** नित्यत्वमसत्त्वमाकस्मिकत्वं वा स्यादिति । तत्रेदमुत्तरम्—**कार्य**मिति । अयं प्रतिविधिः—कारणाभावे कार्यं न स्यान्न तु कारणविशेषाभावे; अन्यथा क्वचिद् दृष्टस्य कर्मकारकादेरभावेऽपि क्रियानुत्पत्तिप्रसङ्गात्; अतः कर्त्रभावेऽपि कारणान्तरैः कार्यसिद्ध्युपपत्तिरिति । ननु कालो यथा सर्वकार्यनिमित्तं तथेश्वरोऽपि; तत्परित्यागे समानन्यायः कालोऽपि त्यज्यतामित्यत्राह—**कालव**दिति । कालोऽप्युपाधिविशेषातिरिक्तो न वेति यथामतमस्तु; स तावल्लोकशास्त्रसिद्धः, कालप्रतीक्षया कर्षकादिप्रवृत्तेः, काले कर्मचोदनात्, शुभाशुभकालविभागे च कस्यचिद्वेदाङ्गस्य व्यापारात् । नन्ववधीनामप्यचेतनानां चेतनानधिष्ठितत्वे प्रवृत्तिर्न स्यादित्यत्राह—**ते चेति** । अदृष्टप्रेरितानामेव प्रवृत्त्युपपत्तौ किं तत्र प्रयत्नगवेषणेन? अदृष्टस्याप्यचेतनस्य प्रवृत्तौ चेतनाधिष्ठानमपेक्षितमित्यत्राह—**तदपी**ति । ईश्वरप्रयत्नो ह्यचेतनोऽपि जगत्सृष्टौ न प्रयोजकप्रयत्नाधिष्ठितः; न च कुम्भारम्भ इव जीवप्रयत्नसहकृतः; अतस्तत्र व्याप्तिसङ्कोचावश्यंभावादत्रादृष्टेऽपि क्वचित्सङ्कोचः स्यात्; अन्यथा गौरवात् । ईश्वरप्रयत्नस्य नित्यत्वात् प्रयत्नानधिष्ठितत्वमिति चेन्न, नित्यानामपि परमाण्वादीनां तदपेक्षाङ्गीकारात् । अन्यत्रान्वयव्यतिरेकनियमवतामन्यतमस्य त्यागे सर्वहेतुत्यागोऽपि स्यादिति शङ्कते—**एके**ति । सर्वहेतुत्यागे कादाचित्कत्वविरोधं प्रकृते तदभावं चाभिप्रेत्याह—**नेति** । प्रतिबन्दिं सूचयन् अन्यहेत्वपरित्यागे हेतुमाह—**ध्वंसव**दिति । ध्वंसो ह्यभूत्वा भवन् हेतुमपेक्षमाणस्समवाय्यसमवायिनोरसंभावान्निमित्तमात्रनिष्पाद्यस्त्वया स्वीकृतः, तथा पक्षेऽपि जीवातिरिक्तस्य कर्तुः कल्पयितुमशक्यत्वात् कथंचिज्जीवकर्तृकत्वं कर्तृनिरपेक्षत्वं वा स्वीक्रियतामिति भावः । विपक्षे बाधकाभावं निगमयति—**तस्मा**दिति । हेत्वभावे कार्यं न स्यात्, न तु कार्यमात्रानपेक्षितहेतुविशेषाभावे; तत्र तु कार्यविशेषनिवृत्तिर्वा, यथा कलमबीजाभावे कलमाङ्कुरस्य । *हेत्वभावे फलाभावो विशेषस्तु विशेषवानिति न्यायात् । अथवा कारणान्तरैरेव कार्यसिद्धिः यथा प्रध्वंसस्येति विशेषः ॥ २१ ॥

167. **धर्मो यावत्सपक्षानुगत उपधिरित्यभ्युपेतस्त्वयाऽपि**
त्यागे तस्यात्र तद्वच्छिथिलितनियमाः क्वापि नोपाधयः स्युः ।
तादृग्धर्मात्ययाच्च प्रकरणसमता स्यान्न चातिप्रसङ्गः
पक्षादिस्थित्यबाधान्निरुपधिकतया स्यात्परात्मानुमा तु ॥ २२ ॥

सोपाधिकत्वमपि दर्शयितुमाह—**धर्म इति** ॥ यावत्सपक्षानुगतः—पक्षे विपक्षे चावर्तमानस्सपक्षाभिव्याप्त इत्यर्थः। अस्ति चात्र तादृशो धर्मः शरीरजन्यत्वम् । यद्यप्यसौ पक्षीकृते शरीरगुणादिविशेषे वर्तते, तथाऽपि साधनव्यापकत्वाभावात् स्वनिवृत्त्या साध्यनिवर्तनशक्तेश्चोपाधिः स्यादेव । तादृशस्य धर्मस्यात्रोपाधित्वानङ्गीकारेऽतिप्रसङ्गमाह—**त्याग इति** । न हि निषिद्धत्वादीनामेतस्य च विशेषोऽस्ति, येन त एव तत्रतत्रोपाधयः स्युः, नासावत्रेति नियम्येत । एवं सोपाधिकत्वे मतभेदेन व्याप्यत्वासिद्धिः, व्यापकनिवृत्त्या व्याप्यनिवृत्तिर्वा स्यादिति भावः । शरीराजन्यत्वसमबलत्वाभिमाने प्रतिरोधमाह—**तादृगिति** । ननूपाधौ प्रतिसाधने च शरीरोपादानं व्यर्थम्; आत्मादिषु जन्यत्वनिवृत्तिमात्रेण सकर्तृकत्वनिवृत्तावुपपन्नायां विशिष्टनिवृत्त्यनपेक्षणात् । अतो निरुपाधिकं निष्प्रतिसाधनं च विश्वकृदनुमानम् । मैवम्; क्षित्यादिकं सकर्तृकमित्यत्र न हि कर्तृसंबन्धमात्रं साध्यम्, सिद्धसाधनत्वात्; सन्ति हि त्वत्पक्षे कुम्भादिकर्तारश्चेतनाः स्वरूपतस्सर्वत्र संबद्धाश्च तैः क्षित्यादयः; अस्मत्पक्षेऽपि—* अङ्गुलस्याष्टभागोऽपि न सोऽस्ति द्विजसत्तम । न सन्ति प्राणिनो यत्र कर्मबन्धनिबन्धनाः ॥ दारुण्यग्निर्यथा तैलं तिले तद्वत्पुमानपि । इत्यादिभिस्सर्वमचेतनं पुण्यपापकर्तृचेतनमिश्रम्; अतस्सकर्तृकमिति चेतनव्यापारपूर्वकत्वं साध्यम् । तत्र व्यापारपूर्वकत्वनिवृत्तिमात्रेण कादाचित्कत्वनिवृत्त्युपपत्तौ तद्विशेषणवैयर्थ्यं स्यात् । व्याप्त्युपयोगाभावेऽपि सिद्धसाधनत्वनिवृत्त्यै तदुपादानमिति चेत्तर्हि शरीराजन्यत्वेऽप्यसिद्धिपरिहारे विशेषणं समर्थमाशङ्क्य एकामसिद्धिं परिहरतो द्वितीयापत्तेरित्युक्तं वितथं स्यात् । ननु ज्ञानादित्रिकवान् कर्ता, तत्पूर्वकत्वे साध्ये व्यापारगर्भतया न पृथग्व्यापारपदोपादानं येन विशेषणवैयर्थ्यापत्तिरिति चेन्न, अन्यतमनिवृत्तिमात्रेण कार्यत्वनिवृत्त्युपपत्तौ त्रिकोपादानवैयर्थ्यात् । अन्यतमसाधने त्वदिष्टमसाधितं स्यात् । शेषं शास्त्रतः सेत्स्यतीति चेन्न; कार्यत्वनिवृत्तेर्हेतुपूर्वकत्वनिवृत्तिप्रयुक्ततया प्रयत्नादिनिवृत्तेरप्रयोजकतापातात् । तदिह तत्तद्विशेषव्यतिरेकस्यापि व्याप्तिनिवेशाङ्गीकारे शरीरजन्यत्वव्यतिरेकेऽपि न वैयर्थ्यं वाच्यमिति । नन्वेवमदृष्टचरसौधादिदर्शने सावयवत्वात् कार्यत्वमनुमाय तत एव तदुचितकर्तृमत्त्वानुमानं कुलालादिपूर्वकत्वनिवृत्त्या बाध्येत प्रतिरुध्येत वेति मन्दशङ्कां वारयति—**न चेति** । व्याप्तितदभावाभ्यां विशेषादिति शेषः । यद्यव्यापकधर्मस्य निवर्त्यतया प्रत्यवस्थीयेत, तदा सर्वत्र तस्याः सुलभत्वात् क्वचिदप्यनुमाने पक्षो न स्यात् । साध्यवत्तया वर्ण्यमानो हि पक्षः । तदभावे तत्सापेक्षौ सपक्षविपक्षावपि न स्याताम्; ततोऽनुमानकथैवोत्सीदेत् । प्रस्तुतेऽपि नैवं प्रसङ्गः, तद्व्याप्तेरुक्तत्वादित्यभिप्रायेणाह—**पक्षादीति** । यद्वा, शरीरजन्यत्वमुपाधिरित्यत्र पक्षव्यवच्छेदार्थं हि विशेषणम्, तथा सति पक्षेतरत्वमप्युपाधिः स्यादित्यत्रोक्तं—**न चेति** । नात्र पक्षान्यत्वेऽतिप्रसङ्गः, उपाधेस्साध्यसमव्याप्तिस्वीकारपक्षे अन्वयव्यतिरेकिणि पक्षेतरत्वस्य साध्यातिव्याप्तत्वात्, केवलान्वयिनि साध्यसमव्याप्तत्वेऽपि पक्षेतरत्वान्यत्वेनाप्युपाधेर्विशेषणात्; अन्यथाऽनुमानोच्छेदप्रसङ्गात् । इयमेव साध्यव्यापित्वमात्रमुपाधेरपेक्षितमिति पक्षेऽपि गतिः । ईदृशं चेदं शरीरजन्यत्वमिहोपाधिः स्यादेवेति । पक्षेतरत्वे तूपाधौ पूर्ववदेव पक्षादिव्यवस्था भज्येत, इह तु न तथेत्याह—**पक्षादीति** । ईश्वरानुमानाभावे तद्वत्स्वेतरात्मानुमानमपि न स्यात्, स्वात्मसाध्येष्वेव व्याप्तिनियम-

प्रसक्तेरित्यत्राह– निरुपधिकतयेति । यदि परशरीरस्थलिङ्गैः कर्तुर्भोक्तुश्चानुमाने स्वशरीरस्थतया स्वकर्तृकतया वा व्याप्तिरवच्छिद्येत, तदा हृदयविसंवादः; चेतनान्तरानुमानाभावे व्युत्पत्तिरेव न स्यात्; कुतश्शिष्याचार्यवादिप्रतिवादिशत्रुमित्रादिसंव्यवहारः ? श्लो. नच स्वेनान्यदेहादेरधिष्ठानादिसंभवः । सौभरिन्यायतस्तत्तत्प्रतिसन्धिप्रसञ्जनतः ॥ न च स्वान्यानुमानेऽपि विजातीयत्वकल्पना । निरुपाधिकता तत्र भवेदनुमितेस्ततः ॥ तुशब्दः कल्पनागौरवनिवृत्त्यर्थः, उक्तबाधकतर्कसूचनार्थो वा । किंच–श्लो. परदेहस्थलिङ्गानामन्यथासिद्धिकल्पने । स्वदेहेऽपि तथैवेति नैरात्म्यमवशिष्यते ॥ आगमादात्मनां सिद्धावीश्वरस्य तु किं पुनः । परात्मनिश्चयाभावे त्वागमोऽपि न सेत्स्यति ॥ २२ ॥

168. सर्वस्यावीतहेतोरपि च निरसनं द्रक्ष्यसि स्वप्रसङ्गे
श्रुत्याऽत्र व्याप्तिसिद्धावलमनुमितिभिर्निष्फलस्संप्लवोऽपि ।
तस्मादुल्लोकभूमा स कथमनुमया विश्वकर्ता प्रसिध्ये-
च्छास्त्रानुक्तत्वबाधद्वयपरिहृतये शास्त्रयोनित्वसूत्रम् ॥ २३ ॥

अथ स्यात्–अन्वयिनि हेतौ यावत्सपक्षान्वयिधर्मसंभवेन सोपाधिकता शङ्क्येत, केवलव्यतिरेकिणि तु सपक्षाभावान्न तच्छङ्केति, अत आह–सर्वस्येति । स्वप्रसङ्गे–हेतुचिन्तावसरे । अयं भावः–व्यर्थविशेषणत्वमर्थान्तरत्वं च केवलव्यतिरेकिणां सर्वेषां द्योत्यते । तथाहि; सर्वं कार्यं सर्ववित्कर्तृपूर्वकं कादाचित्कत्वादित्यत्र व्यतिरेके कर्तृपूर्वकत्वनिवृत्त्यैव कादाचित्कत्वनिवृत्तावुपपन्नायां किं सर्वविद्विशेषणेन? सिद्धसाधनत्वनिवृत्त्यै तदूह इति चेन्न ; शरीराजन्यत्वहेतावसिद्धिपरिहारे विशेषणं समर्थमिति वदन्तं प्रति एकामसिद्धिं परिहरतो द्वितीयापत्तेरिति युष्मदुक्तस्यात्र दुर्वारत्वात् । तर्हि कर्तृपदं हित्वा सर्ववित्पूर्वकमित्येतावदुक्तौ न वैयर्थ्यमिति चेत्, तथाऽपि वित्पूर्वकत्वनिवृत्त्या व्याप्तिसिद्धौ सर्वविशेषणवैयर्थ्यमेव । एवं नित्यज्ञानपूर्वकत्वादिनिर्देशेऽपि द्रष्टव्यम् । न च विशेषणेऽपि सिद्धसाधनतापरिहारः, सर्वेषां चेतनानां सर्वशब्दार्थवेदिनामसर्ववित्त्वायोगात्; अन्यथा सर्ववित्साधनस्यापि दुश्शकत्वात् । विशेषतस्सर्वं न सर्वे विजानन्तीति चेन्न; विशेषाणामपि सर्वशब्दसंग्रहात् । सर्वसाक्षात्कर्तृपूर्वकत्वं साधयाम इति चेन्न ; योगिभिरर्थान्तरतापातात् । नित्यसाक्षात्कारिपूर्वकत्वं साध्यमिति चेत्, एवमपि व्याप्तौ नित्यविशेषणवैयर्थ्यमेव । अन्यतो विशेषणसाफल्ये शरीराजन्यत्वेऽपि साफल्यं सिध्येदेव । वेदास्सर्वज्ञप्रणीताः वेदत्वादित्यत्राप्येवमर्थान्तरत्वविशेषणवैयर्थ्ये बोद्धव्ये, प्रणीतत्वनिवृत्तिमात्रेण सर्वज्ञप्रणीतत्वनिवृत्तिमात्रेण वा व्याप्तिग्रहोपपत्तेः । अपिच केवलव्यतिरेकिणस्सपक्षे सत्याभासत्वं संगिरध्वे । सन्ति चानन्तानि सर्वज्ञप्रणीतानि वेदेतरवाक्यानि भारतादिमध्यपातीनि स्मृतितन्त्ररूपाणि, कल्पादिषु लोकवेदसंव्यवहारप्रवर्त्तनौपयिकानि च । न च तेषु वेदत्वम्, प्रसिद्धिविरोधात्, अवेदत्वेनैव महर्षिप्रभृतिभिर्व्यपदेशाच्च । अतस्तेषां न वेदत्वेन पक्षीकरणं शक्यम् । संग्राहकान्तरं च दुर्वचम्, जीवप्रणीतेतरवाक्यत्वमीश्वरप्रोक्तत्वं वा नान्यतस्सिद्धम् । इत एव तत्साधनेऽन्योन्याश्रयः ; तदिह तेषां पक्षीकारे तदभावे वा वेदत्वहेतुस्तेष्वसिध्यन् हेत्वाभास[कक्षां] त्वं नातिक्रामेत् । एवं वक्ष्यमाणैश्च वेदनित्यत्वसाधकैर्बाधोऽप्यत्र मन्तव्यः । एवं घटः सर्वज्ञकर्तृकः घटत्वात्, यजुस्सर्वज्ञप्रणीतं यजुष्ट्वादित्यादिविशेषपक्षीकारेण प्रयोगाश्च निरस्ता वेदितव्याः । ननु कार्याणां सर्वेषां सर्वज्ञपूर्वकत्वव्याप्तिः श्रुत्या सिध्यति । अविदितनिगमवृत्तान्तानां नालिकेरद्वीपवासिनामिव वह्नौ महेश्वरे मा भूदनुमानम्, अन्येषां तु तत्प्रवृत्तिसंभव इत्यत्राह–श्रुत्येति । व्याप्तिग्राहकेणैव साध्यसिद्धौ किमत्रानुमितिसाध्यमित्यर्थः । संप्लववादे सिद्धेऽपि मानान्तरस्य प्रवृत्तिः स्यादि-

त्यत्राह—**निष्फल** इति । मानान्तरसिद्धे वस्तुन्याकारान्तरसमर्पणे हि संप्लवश्शोभेत । अन्यथा सिद्धसाधनत्वं वा, सर्वत्र सिद्धसाधनत्वदोषोच्छेदो वा स्यादिति भावः । अत्र—*कार्यायोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः । वाक्यात्संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥ इति **न्यायाचार्य**संगृहीतानां सर्वेषां हेतूनां स्थालीपुलाकन्यायेन निरस्तप्रायत्वं निगमनव्याजेन नियमयति—**तस्मा**दिति । नन्वनिरस्तेऽपि जगत्कर्तुरनुमाने परतत्त्वपरमहितपरमपुरुषार्थेषु शारीरकं निष्प्रतिघातम् । अतः किमत्र तन्निरासप्रयासेनेत्यत्राह—**शास्त्रे**ति । यदि जगत्कर्तुरनुमानं न प्रतिषिध्येत तदा मतान्तरप्रामाण्यव्यवसायिनः कस्यचित् *इदं सर्वमसृजत, *यतो वा इमानि भूतानि जायन्त इत्यादिवाक्यानामनुमानसिद्धानुवादित्वं मन्यमानस्य जगत्कर्तृवादिवाक्यानामनुमानविरुद्धोपस्थापकत्वे मूलघातित्वात्, तत्सिद्धमात्रबोधने नैरपेक्ष्यात्, सिद्धांशेऽनुमानानाघ्रातासंभवाच्च, सिद्धपरवाक्यविमर्शो न कार्य इति मोहः स्यात्; अतस्तदनुजिघृक्षयाऽनुमानं निरसनीयम् । किञ्च विश्वकर्तुरनुमेयत्वं मन्यमानस्य तत्तद्वादिकल्पितैर्हेतुभिर्बाधद्वयमापद्येत; *ब्रह्मण आनन्द इत्याद्युक्तप्रामाणिकत्यागात्, अप्रामाणिकायथापूर्ववेदकल्पनस्वीकाराच्च । यद्वा प्रागुक्ताभ्यां प्रतिप्रमाणतर्काभ्यां बाधद्वयम् । अथवा अनुमितेस्सोपाधिकत्वादिकारणदोषात् साक्षादकर्तृकत्वानुमानेन साध्यप्रतिषेधाच्च । अपि वा विश्वकर्तर्यनुमानं प्रवर्तमानं स्वयं तावन्नित्यप्रयत्नं समानन्यायतया स्वोपस्थापितानुमानेन नित्यशरीरादिरहितत्वं चोपस्थाप्यागमविषयमपहरेत् । **श्लो.** तस्मादेवंविधानेकबाधशङ्कापनुत्तये । नित्यनिर्दोषशास्त्रैकवेद्यत्वमिह सूचितम् ॥ शब्दप्रमाणके तस्मिन् यथाशब्दं व्यवस्थितिः । सर्वैरनतिलङ्घ्येति न शङ्कातङ्कसंभवः ॥ नन्वीश्वरानुमानदूषणे *विद्याचोरो गुरुद्रोही वेदेश्वरविदूषकः । त एते बहुपाप्मानस्सद्यो दण्ड्या इति श्रुतिः ॥ इति शास्त्रविरोधः स्यादिति चेन्न; अनुमानदूषणेऽप्यागमात् तत्सिद्धेः । अन्यथाऽस्मदादिप्रत्यक्षवेद्यत्वनिषेधेन तवापि तद्दूषकत्वप्रसङ्गः *आगमेनानुमानेन ध्यानाभ्यास[रसेन]वशेन च । त्रिधा प्रकल्पयन्प्रज्ञां लभते योगमुत्तमम् ॥ इत्याप्तोक्तिः कथम्? इत्थम्—श्रवणमननध्यानानां योगहेतुत्वस्य विवक्षितत्वात् । मननं चात्रानुग्राहकयुक्तिभिः स्थिरीकरणम्; तदेवात्र श्रवणानन्तरभावितयाऽनुमानशब्देन ग्रहीतुमुचितम्; अनुग्राहकयुक्तय एव वा, *यस्तर्केणानुसन्धत्त इति स्मरणात् । तर्कानुमानयोरदूरविप्रकर्षात्समाख्याविपर्यासश्च दृष्ट इति ॥ २३ ॥

इति ईश्वरानुमानभङ्गः ॥

169. **प्राज्ञाधिष्ठानशून्यं न तु परिणमितुं शक्तमव्यक्ततत्त्वं**
वास्यादौ व्याप्तिसिद्धेरिति यदभिहितं सांख्यसिद्धान्तभङ्गे ।
सोऽपि प्राज्ञव्युदासेऽप्यनुमितिशरणान् प्रत्युपात्तः प्रसङ्गो
नेष्टे तत्सिद्ध्यसिद्ध्योरनुमितिरिति खल्वाशयस्सूत्रकर्तुः ॥ २४ ॥

तथाऽपि सांख्याधिकरणविरोधः स्यात्; तत्र हि परोक्तानां पक्षदृष्टान्तभूतानामचेतनानां संप्रतिपन्नवत् प्राज्ञाधिष्ठितत्वं सूत्रभाष्याभ्यां साध्यते; अतश्शास्त्रयोनित्वसूत्रमन्यपरं नेतव्यमिति शङ्कायां तावद्विरुद्धोक्तिमनुवदति—**प्राज्ञे**ति ॥ तात्पर्यवृत्त्या विरोधं शमयति—**सोऽपी**ति । तात्पर्यभेदं विवृणोति—**ने**ति । प्राज्ञानधिष्ठितत्वमनुमातुं न शक्यमिति सांख्याधिकरणतात्पर्यम् । शास्त्रयोन्यधिकरणस्य त्वधिष्ठितत्वं नानुमातुं शक्यमिति । अतस्साधकबाधकाभावे शास्त्रं निरङ्कुशप्रसरमिति सूत्रकाराभिप्राय एव **भाष्ये** दर्शित इति ॥ २४ ॥ **इति शास्त्रयोन्यधिकरणसांख्याधिकरणविरोधपरिहारः ॥**

170. **अस्यैवाचिन्त्यशक्तेरखिलजनयितुस्स्यादुपादानभाव-**
स्सूक्ष्माव्यक्तादिदेहः परिणमति यतोऽनेकधा स्थूलवृत्त्या ।

निष्कृष्टेऽस्मिन् शरीरिण्य[खि]मलगुणगणालङ्कृतानन्दरूपे
संपद्यन्ते समस्तास्समुचितगतयो निर्विकारादिवादाः ॥ २५ ॥

श्रुतिसिद्धस्य विश्वकर्तुः श्रौतमुपादानत्वमपि प्रस्तौति—अस्येति ॥ अखिलजनयितुरस्यैवेति विरोधशङ्कासूचनम्; अचिन्त्यशक्तेरिति परिहारनिदानगर्भम् । विकारापुरुषार्थनिषेधकशास्त्रविरोधशान्त्यै सर्वोपादानत्वं बाल्युवपरिणतिवत् सद्वारकमित्याह—सूक्ष्मेति । सूक्ष्मस्थूलत्वोक्तिर्हेतुकार्यभावघटनार्था । अनेकधेत्युक्त्या *तम एकीभवतीत्यादिप्रसिद्ध-प्राच्यावस्थातो वैषम्यं व्यज्यते । उपादानतया विकाराद्याश्रयस्य कथं तदभावोपदेश इत्यत्राह—निष्कृष्ट इति ॥ २५ ॥

171. कर्तोपादानमेव स्वसुखमुखगुणे स्वप्रयत्नप्रसूते
संयोगं स्वस्य मूर्तैस्स्वयमुपजनयन्नीश्वरोऽप्येवमिष्टः ।
सर्वोपादानभावस्तत इह घटते सर्वकर्तर्यमुष्मिन्
सर्वश्रुत्यैकरस्यप्रणयिभिरुचितं द्वारमत्राभ्युपेतम् ॥ २६ ॥

ननु यद्यस्य निमित्तं न तत्तस्योपादानमिति स्थिते साक्षात्सद्वारकं वा कथमुपादानत्वमित्यत्र परप्रक्रिययैव विरोधं परिहरति—कर्तेति ॥ जीवस्तावत्तैस्तैरुपायैः स्वसुखादीनुत्पादयति, तेषां समवायिकारणं च भवतीति मन्यसे; तावदेव च निमित्तोपादानत्वम् । ईश्वरेऽपि तदुभयं क्वचिदङ्गीकरोषीत्याह—संयोगमिति । नचात्रोपादानत्वं भाक्तम्; विपरिवर्तस्य सुवचत्वात् । अतः प्रकृत्यधिकरणसाधितं न प्रतिक्षेप्तुं शक्यमित्याह—सर्वेति । तर्हि *सोऽकामयत *तदात्मानं स्वय-मकुरुत इत्यादिकं स्वरूपपरिणामवादिब्रह्मदत्तभास्करादिमतभेदैरव्यवहितमेव किं न निरुह्यत इत्यत्राह—सर्वश्रुतीति । अन्यथा जीवानां प्रतिकल्पमुत्पत्तिप्रलयौ स्याताम्; अकृताभ्यागमः कृतविप्रणाशो विषमसृष्ट्यादिभङ्गश्च भवेयुः । ब्रह्मण-स्तदंशस्य वा सर्वेश्वरस्य *बहु स्यामिति सङ्कल्पयतोऽनादिजीवद्वारा क्लेशाद्यन्वयः । त्रिगुणांशद्वारा विकारान्वय इति पक्षेऽपि सर्वदोषाकरत्वं विरुद्धधर्माध्यासश्च दुस्त्यजः । अतश्चिदचिच्छरीरद्वारा बहुभवनादिकमिति कृत्स्नविद्भिर्निरुह्यत इति ॥२६॥

इति ईश्वरस्य जगन्निमित्तोपादानत्वोपपत्तिः ॥

172. साविद्यं केऽपि सोपाधिकमथ कतिचिच्छक्तिभिर्जुष्टमन्ये
स्वीकृत्यैकाद्वितीयश्रुतिमपि जगदुस्तद्विशिष्टैक्यनिष्ठाम् ।
नित्यत्वं विग्रहत्वं प्रकृतिपुरुषयोर्हेतुतां विश्वकर्तु-
स्तद्वैशिष्ट्यं च शास्त्रप्रथितमजहतां कोऽपराधोऽतिरिक्तः ॥ २७ ॥

एवं वैशिष्ट्यादुपादानमपि कर्तैव । अन्यैरपि त्रय्यन्तवादिभिर्यत्किंचिद्वैशिष्ट्यमङ्गीकृतमित्याह—साविद्यमिति ॥ अद्वैतव्याख्यायिनः खल्वाहुः—*अनिर्वाच्याऽविद्या द्वितयसचिवस्य प्रभवतो विवर्ता यस्यैते वियदखिलतेजोबवनयः ॥ इति । भास्करीयास्तु—चिदचिदंशविभक्तं ब्रह्मद्रव्यमचिदंशेन विक्रियते, तद्विकारोपहितेन चिदंशेन संसरतीति । यादवप्रकाशीयास्तु—सर्वात्मकं सद्रूपं ब्रह्म चिदचिदीश्वररूपांशत्रयशक्तिविशिष्टं समुद्र इव फेनबुद्बुदतरङ्गप्रभेदेन सावा-न्तरभेदत्रिविधव्यष्टिभावेन परिणमते इति । एवमद्वितीयश्रुत्यविरुद्धान्यविद्योपाधिशक्तिरूपविशेषणानि चेद्विचित्रचिदचि-दुपादानतोपयोगीनि स्वीक्रियन्ते, तदा श्रुतिस्मृतिशतसिद्धस्वरूपविशेषणाभ्युपगमे कः प्रद्वेषः ? स्वपक्षस्य प्रमाणतस्सिद्धिं

विरोधाभावादौचित्यातिशयं च प्रपञ्चयति—**नित्यत्व**मिति । कोऽपराधोऽतिरिक्त इत्यनेन विशेषणपरिग्रहमात्रमपराधश्चेत् सर्वेषामपि समानदोषत्वम्, अतिरिक्तापराधोऽपि तेषामेवेति व्यज्यते ॥ २७॥ इति **जगत्कारणवैशिष्ट्यावश्यंभावः** ॥

173. **ब्रह्मोपात्तान् विकारान् कतिचिदभिदधुश्चेतनाचेतनेशा-**
नैतद्युक्तं यदीशादनधिकमनघं निर्विकारं श्रुतं तत् ।
भिन्नाया ब्रह्मशक्तेर्विकृतय इति चेद् ब्रह्मजन्यत्वभङ्गो
भेदाभेदोपपाद्यं सकलमिति मते सप्तभङ्गी न दूष्या ॥ २८ ॥

नन्वेकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय मृत्तत्कार्यदृष्टान्तैस्तदुपपादनात् *ईश्वराव्याकृतप्राणैर्विराट्सिन्धुरिवोर्मिभिः । यत्प्रनृत्यदिवाभाति तस्मै सद्ब्रह्मणे नमः ॥ इति **कात्यायनकारिक**या च सद्ब्रह्मोदन्वदूर्मिभेदाश्चिदचिदीश्वरा इति निर्धार्यते, तदेतदनुवक्ति—**ब्रह्मेति** ॥ अत्र प्रतिज्ञाया अनन्यथासिद्धबहुश्रुत्यविरोधाद्विशिष्टैकानेकविषयविज्ञानार्थत्वात् दृष्टान्तानामप्युपादानोपादेयैक्यसंभवार्थत्वादृषिवचनस्यापि *न चानृषेर्दर्शनमस्ति किंचिदिति न्यायेन विरोधाधिकरणनीत्या चानपेक्ष्यत्वात् *नित्यो नित्यानां चेतनश्चेतनानाम्, *अजामेकाम्, *न त्वेवाहं जातु नासम्, *प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीत्यादिश्रुतिस्मृतिशतदृष्टेश्चापन्यायमूलमेतदित्यभिप्रायेणाह*__नैतद्युक्त__मिति । त्रिष्वपि विकारतयाऽभिमतेषु श्रुतिविरोधादयुक्तिमुपपादयति—**यदिति** । *नारायणः परं ब्रह्मेत्यादिभिरीश्वरस्यैव परब्रह्मत्वं सिद्धम् । अतो न तत्तदुपादानम्; अवतारणपरिणत्याऽपि नेश्वरस्योपादेयत्वम्; *स एव सृज्य इत्यादिकमपि वि[श्वसृष्टि]शिष्टविषयम् । *स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयान्, *न कर्मणा वर्धते नो कनीयानित्यादिभिरकर्मवश्यतया प्रसिद्धस्य न खलु निरयनिपातादिदुरत्ययदुःखकारणदुरितपराधीनानन्तजीवभावेन परिणामः । *नास्य जरयैतज्जीर्यति, *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिर्विकारजाड्यादिविधुरतया श्रुतस्य कथं तद्विपरीतविकारागमः? तत्र परोक्तं परिहाराभासं शङ्कते—**भिन्नाया** इति । अभिन्नत्वे परिहारगन्धाभावात् भिन्नत्वानुवादः; यदि ब्रह्मव्यतिरिक्ता तच्छक्तिर्विक्रियते तदा ब्रह्मण उपादानत्वं न स्यात् । अनादितया श्रुतस्य त्रिकस्य जन्यत्वायोगश्च न परिहृत इत्यभिप्रायेणाह—**ब्रह्मजन्यत्वभङ्ग** इति । अथ शक्तिशक्तिमतोरभेदाद्ब्रह्मण उपादानत्वनिर्विकारत्वादिकमिति परेष्टमनुवक्ति—**भेदाभेदे**ति । अत्रानिष्टमाह—**सप्तभङ्गीति** । स्यादस्ति स्यान्नास्तीत्यादीनां विरोधस्फौट्यात्तदुक्तिः । सर्वोऽपि परपक्षो न दूष्यः; कथंचिदभेदात्, स्वपक्षस्य परपक्षत्वेऽपि विरोधस्य दुर्वचत्वादिति तात्पर्यम् ॥ २८ ॥ इति **ब्रह्मणश्चिदचिदीश्वरविकारवत्त्वभङ्गः** ॥

174. **विश्वं चित्तद्गुणानुद्भव इह घटते रत्नगन्धादिनीत्या**
सर्वं ब्रह्मेत्यधीतं त्रिविधमिति च तद्दाशताद्यस्य चोक्तम् ।
तस्मात् सर्वानुवृत्तं सदनवधिदशाचित्रमित्यप्ययुक्तं
प्रत्यक्षागोचरत्वप्रभृतिबहुभिदावादिसर्वोक्तिबाधात् ॥ २९ ॥

अथ सच्चित्सुखस्वरूपं ब्रह्म सर्वत्र तादात्म्येनानुवृत्तमित्येतदनूद्य प्रत्याह—**विश्व**मिति ॥ चिच्छब्देन स्वप्रकाशत्वं चेतनत्वं च तन्त्रेण गृह्येते । उपलम्भविरोधनिवृत्त्यर्थमाह—**तद्गुणानुद्भव** इति । रत्ने गन्धस्य नित्यानुपलम्भात्तन्निदर्शनम् । न हि नित्यगन्धानुपलम्भेऽपि रत्नस्य पृथिवीत्वं नाङ्गीकृतम्; एवमिहापि । अयं भावः—विश्वस्य स्वप्रकाशत्वं तावन्न निषेद्धुं शक्यम्; प्रत्यात्मं स्वप्रकाशत्वस्य परैरनुपलम्भेऽप्यङ्गीकारात् । चेतनत्वमपि घटादेर्न प्रत्यक्षतः

प्रतिक्षेप्तुं युक्तम् ; परचैतन्ये सर्वत्र योग्यानुपलम्भाभावात् । कार्याभावादपि न तत्प्रतिक्षेपः, सुषुप्तन्यादिनयेन कार्याभावोपपत्तेः ; स्वभावभेदाच्च नित्यानुद्भवोपपत्तिरिति । चिद्रूपत्वे सिद्धे हि चैतन्यानुद्भवः कल्प्यः ; तदेव तु कथमित्यत्राह—**सर्वमिति** । * सर्वं खल्विति श्रुत्या सर्वस्य ब्रह्मत्वं विधीयते, तच्च ज्ञानादिस्वभावगर्भम् । भोक्तृभोग्यादीन् प्रक्रम्य * सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतदिति श्रूयते । अत्र हि स्वरूपत्रैविध्यं स्वारसिकम् । * ब्रह्मदाशा ब्रह्मदासा इत्यादौ च ब्रह्मण एव दाशत्वादिकमाम्नातम् । तत्र व्यवधानक्लृप्तिस्तु गुर्वी ; तस्मात् स्वरूपतादात्म्येन चिदचिदीश्वरानुवृत्तं सद् ब्रह्मैकम्; तदेव त्रितयपूर्वावान्तरव्यष्टिभिरनन्तविषमावस्थाविशिष्टमिति भावः । त्र्यात्मके ब्रह्मणि चित्रपटन्यायसूचनार्थः चित्रशब्दः । एतदपि दूषयति—**इत्यप्ययुक्त**मिति । श्रुतस्य कथमयुक्तिरित्यत्राह—**प्रत्यक्षे**ति । * अद्रेश्यमग्राह्यं * निष्कलं निष्क्रियं शान्तमित्यादिभिः श्रुतिभिस्तावद्बाधस्सिद्धः । भेदश्रुतयश्च नाभेदं सहन्ते ; शरीरात्मभावश्रुतयश्च भेदगर्भाः ; अत एवाभेदश्रुतयोऽपि विशिष्टैक्यविषयाः स्थापनीयाः । किञ्चाचेतनस्य चेतनस्य वा कस्यचिद्ब्रह्मत्वविधौ किमत्रेदं विधेयम् ? सत्त्वमिति चेत्तन्न ; सर्वत्र सर्वेषां सुप्रसिद्धत्वेन तदुपदेशायोगात् । कारणत्वमिति चेत्, तत्प्रातिस्विककार्यं प्रति प्रसिद्धमेव । आदिकारणत्वं तु कार्यस्य विरुद्धम् । कार्यस्य कारणद्रव्यतादात्म्यमुपदिश्यत इति चेन्न, श्रुतिसिद्धविशिष्टकारणतादात्म्ये त्वदिष्टासिद्धेः । प्रदर्शितं च विशिष्टपरिणामस्य युष्माभिरपि दुस्त्यजत्वम् । ईश्वरत्वमंशान्तरयोरुपदिश्यत इति चेन्न ; प्रत्यक्षाद्यशेषप्रमाणविरोधात् । न च परागादेः पर्वतत्वं शरावादेर्वा मणिकत्वं संव्यवहरन्ति । साजात्यविवक्षया तथा संव्यवहारः स्यादिति चेत्तर्ह्यत्र सत्ताजात्यैवेश्वरसाजात्यमुपदिष्टं स्यात् । तत्र चानुपदेश्यत्वमुक्तमेव । एवं सर्वश्रुतिबाधाद्ब्रह्मसामानाधिकरण्यत्रैविध्यश्रुतिश्चाविरुद्धविषयतया नीयेतेति । यदपि कल्पयन्ति जीवव्यष्टिवदीश्वरव्यष्टयोऽप्यनन्ताः, तत्र प्राणमयमनोमयवाङ्मयरूपः प्रथमो विभागः, तिस्रश्च ब्रह्मादिमूर्तयस्तद्व्यष्टय इति ; इदमप्येकस्यैव चैतन्यस्य स्वमायाकल्पितविचित्रान्तःकरणदर्पणप्रतिविम्बिततया विश्वतैजसप्राज्ञरूपविभाग इति क्लृप्तिवदनादर्तव्यम् ॥ २९ ॥ **इति सर्वानुवृत्तसन्मात्रब्रह्मत्वभङ्गः ॥**

175. **अव्यक्तं त्वन्मतेऽपि ह्यनवयवमथाप्येतदंशा विकारा-**
स्ते चान्योन्यं विचित्राः पुनरपि विलयं तत्र तत्त्वेन यान्ति ।
इत्थं ब्रह्मापि जीवः परिणमति विहृत्यर्थमित्यप्यसारं
स्वानर्थैकप्रवृत्तेः प्रसजति च तदा सर्वशास्त्रोपघातः ॥ ३० ॥

अन्ये तु भेदाभेदिन आहुः—निष्कलचिदानन्दजलनिधिरपारस्वानन्दानुभवप्रीतिजनितनानाविकार एव स्वल्पमंशं जडरूपं संकल्प्य तमेवाजडेन चिदंशान्तरेण संयोज्यानन्तविचित्रसुखदुःखानुभवभागिनं कृत्वा तद्दर्शनेन प्रीयत इति । यथोक्तम्—* त्वं चिन्महोदधिरणुं तव बिन्दुमेकं कृत्वा जडं तमजडेन नियोज्येत्यादि । दृश्यन्ते जगति कतिचिदात्मपीडावहां क्रीडां सादरमनुतिष्ठन्तः । अन्यथा कथमवतारेषु तादृशा विहाराः, कथं च स्वेच्छया कर्मफलान्यनुभवेदिति । एतदनुभाषते—**अव्यक्त**मिति ॥ तदिदमसमञ्जवृत्तान्तादप्यधिकं जुगुप्सनीयतममित्याह—**असार**मिति । अव्यक्तनिदर्शनमिह मन्दप्रलोभनमिति कृत्वा तद्दूषयितुं परोक्तप्रक्रियामेव हेतुमाह—**स्वानर्थे**ति । अयं भावः—यद्यपि दुःखप्रायेषूपायेषु प्रभूतसुखार्थिनः प्रवर्तन्ते, यद्यपि * भ्रान्तिज्ञानवतां पुंसां प्रहारोऽपि सुखायत इत्यादिन्यायेन बालिशैस्ताडनादिभिः क्रीडारस उपादीयते । तथाऽपि सर्वज्ञस्य सर्वशक्तेः स्वदुःखलवोत्पादनमपि न युक्तम्, किं पुनरनन्तजीवात्मभावेन दुर्विषह-

दुःखोत्पादनम्? अतः क्रीडारस[कणिका]कारणिका सत्यपि निरवधिकस्वानर्थनिमित्तनिर्मितेति, अत्र स्वानर्थैकप्रवृत्त ईश्वरः स्यात्। अवतारवृत्तान्ताः शैलूषन्यायेन निरूढा इति। अस्मन्मते तु विशेषणगता दोषा न विशेष्यं स्पृशन्ति, ऐक्यभेदाभेदानङ्गीकारात्, अकर्मवश्ये संसर्गजदोषाणामसंभवाच्चेति ॥ ३० ॥ **इति ब्रह्मणः स्वलीलार्थं जीवादिपरिणामवादभङ्गः ॥**

176. **ब्रह्मैवोपाधिभिन्नं भजति बहुविधां संसृतिं सोऽप्यनादि-**
स्तस्मान्नात्यन्तभिन्नो जड इति तु मते दुःखमद्वारकं स्यात्।
सौभर्यादौ व्यवस्था न कथमुपधिभिः स्वावतारेषु चैषा
सर्वज्ञः स्वैक्यवेदी कथमनवधिभिर्जीवदुःखैर्न दुःख्येत् ॥ ३१ ॥

उक्तपक्षासन्नं **भास्कर**पक्षमुपालभते—**ब्रह्मैवे**ति। एवकारो विरोधं व्यनक्ति—महाकाशघटाकाशादिनयादीश्वरान्मिथश्च जीवानां भेदेन गुणदोषसंकरपरिजिहीर्षया उपाधिभिन्नत्वे स्वीकृतेऽपि प्रलयदशायामुपाधिविलयेन भेदाभावे मुक्तिप्रसङ्गः। ततश्च प्राग्वदकृताभ्यागमादिः स्यादित्यत्राह—**सोऽपी**ति। उपाधिभेद इत्यर्थः। प्रलयेऽपि प्रतिजीवमुपाधयस्सूक्ष्मरूपेण तिष्ठन्ति, ततस्तदवच्छिन्नजीवभेदस्थितिरुपपद्यत इति भावः। अनाद्युपाधिभेदस्वीकारे ब्रह्मव्यतिरिक्ताङ्गीकारः स्यादित्यत्राह—**तस्मा**दिति। बहुधा भिन्नोऽपि ह्युपाधिर्ब्रह्माभिन्नः; तस्मान्नाब्रह्मतत्त्वाङ्गीकृतिरिति भावः। ब्रह्मतादात्म्याविशेषेऽपि उपाधेस्तद्वतो वैषम्यमाह—**जड** इति। पूर्वापरदूष्येभ्यो विशेषं व्यनक्ति—**इति तु मत** इति। दुःखमद्वारकं स्यात्—न ह्यस्मन्मतवद्विशेषणद्वारकम्, न च त्वन्मते विकारवदुपाध्यंशद्वारकमित्यर्थः। औपाधिक्यां व्यवस्थितावतिप्रसङ्गमाह—**सौभर्यादी**ति। अस्ति हि योगिनां युगपदनेकदेहभृतां तत्तद्देहोपाधिकृतभोगप्रतिसन्धानम्। स्मर्यते हि *आत्मनो वै शरीराणि बहूनि मनुजेश्वर। प्राप्य योगबलं कुर्यादित्यादि। अवतारेषु त्रैकालिकावतारान्तरवृत्तान्तव्यवहारास्तत्रतत्र दृश्यन्ते। तथाऽपि कर्मोपरोधादप्रतिसन्धानमित्यत्राह—**सर्वज्ञ** इति। न हि नित्यसर्वज्ञतयाऽभ्युपगत ईश्वरांशः स्वात्मगतमुपाधिं तत्परिच्छिन्नं स्वांशं च स्वेनाभिन्नं न वेत्ति, ततश्चाहमेवोपाधिपरवशतयाऽनन्तदुःखमनुभवामीति न कथं दुःख्येत् ॥ ३१ ॥

177. **बन्धो ब्रह्मण्यशेषे प्रसजति स यदोपाधिसंयोगमात्रात्**
सादेश्याच्चेदुपाधौ व्यभिचरति भवेद्बन्धमोक्षाव्यवस्था।
अच्छेद्ये च्छेदनादिर्विहत उपधिभिर्न स्वतोंऽशस्तथासि-
न्नोपाधिर्जीवतामप्यनुभवितुमलं ब्रह्मरूपोऽप्यचित्त्वात् ॥ ३२ ॥

अपि चात्रोपाध्यवच्छिन्नं ब्रह्म जीव इति परोक्ते किमुपाधिसंयोगमात्रविशेषितं ब्रह्मस्वरूपमेव जीवः? उत घटाकाशवदवच्छेदेन विभक्तो भागः? अथ घटोदकवद्विच्छेदेन? यद्वा विदारिताग्रदारुनयात् किञ्चिद्विदलनेन? यद्वा उपाधिसंयोगव्यञ्जितविभागः कश्चित्सहजोंऽशः? घटाद्यवच्छिन्नपृथिव्यंशवदुपाधिभावेन परिच्छिन्न एव वा कश्चिद् ब्रह्मांशः? इति विकल्पं विभाव्य प्रथमे दोषमाह—**बन्ध** इति। अत्र नित्यमुक्त ईश्वरांशो निष्कष्टुं न शक्यः, बद्धमुक्तविभागश्च न स्यादिति भावः। द्वितीयमनुवक्ति—**सादेश्याच्चे**दिति। तत्रोपाधिसञ्चारदशायां घटाकाशनीत्यैव नियतजीवांशासंभवात् बद्धमुक्तप्रदेशनियमाभावमाह—**उपाधा**विति। कर्मनिरपेक्षो बन्धः तत्कालसमुचितविद्यानिरपेक्षो मोक्षश्च स्यादित्याकूतम्। एवं सति, *आकाशमेकं हि यथा घटादिषु पृथग्भवेत्। तथात्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान् ॥ इति

स्मृतिः कथमिति चेत्; इत्थम्—आकाशोऽपि पृथिव्यादिवत् सभागः, पञ्चीकरणप्रक्रियया तत्सिद्धेः। तद्भागानां त्वेक-रूपाणामपि यथा घटादिसंयोगभेदैरेव मिथो वैषम्यम् एवमात्मनां देवादिपिण्डसंयोगभेदैरिति जीवविषयत्वे निर्वाहः। परमात्मविषयत्वेऽपि ब्रूमः। अत्र तत्तत्संसर्गप्रयुक्तविकारादिराहित्ये तात्पर्यम्। एतच्च वृद्धिह्रासादिसूत्रभाष्ये व्यक्तमनु-संधेयमिति। *एक एव हि भूतात्मा भूतेभूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते जलचन्द्रवत्॥ इत्यपि गता-र्थम्। *घटध्वंसे घटाकाशो न भिन्नो नभसो यथेति मुक्तविषयस्मृतिरप्यौपाधिकविशेषनिवृत्तिपरा। न ह्यत्र घटा-काशस्य नभस्तत्त्वतादात्म्यं नि[दर्श्य]दिश्यते, तस्य घटसंयोगदशायामप्यवस्थानात। नापि बहिर्भूतमहाकाशादितादात्म्यम्; तस्य घटध्वंसदशायामप्यसंभवात्। तत्समानतापत्तिस्त्वैक्यविरोधिन्येव। तृतीयचतुर्थौ दूषयति—**अच्छेद्य** इति। पञ्चमेऽप-सिद्धान्तमाह—**न स्वत** इति। षष्ठे त्वचिदंशक्लृप्तिव्याघातमाह—**नोपाधिरिति**। भूतेन्द्रियचैतन्यवादसमोऽयं पक्ष इति च भावः॥ ३२॥ **इति ब्रह्मण औपाधिकजीवभावभङ्गः।**

178. **नापि ब्रह्मण्यविद्यास्थगितनिजतनौ विश्वमेतद्विवृत्तं**
तस्मिन् सा स्वप्रकाशे कथमिव विलगेत्तत्प्रकाशैकबाध्या।
न ह्येतस्मिन्नविद्याविलयकृदधिको वृत्तिवेद्यो विशेषो
बाधो वृत्तिस्वरूपाद्यदि भवति तदा ज्ञानबाध्यत्वभङ्गः॥ ३३॥

एवमिह जैनगन्धिनां जल्पितानि निराकारिषत। अथ सौगतगन्धिनां निराक्रियन्ते। तत्र प्रत्यस्तमितसमस्तभेद-कूटस्थविज्ञानैकरसं ब्रह्मानाद्यनिर्वचनीयाविद्यातिरोहितस्वरूपमनन्तभेदप्रपञ्चात्मना विवर्तत इति मृषावादस्तावदपोह्यते—**नापीति**। आस्तां तिरोधानम्, आलोकसन्निधावन्धकारस्येवानादिस्वप्रकाशब्रह्मसंनिधौ तदज्ञानस्य स्वरूपलब्धिरेव न स्यादित्यभिप्रायेणाह—**तस्मिन्निति**। प्रदीपकज्जलन्यायशङ्कापनुत्त्यै विरोधं व्यनक्ति—**तत्प्रकाशैकबाध्येति**। ननु ब्रह्म-स्वरूपप्रकाशो नाज्ञानं बाधते, किंतु साक्षित्वेनावस्थाय साधयत्येव। तत्त्वावेदकवाक्यजन्यं तु वृत्तिज्ञानं तद्बाधकमित्यत्र वृत्तेर्बाधकत्वं विषयस्थविशेषप्रकाशनशक्त्या स्वरूपशक्त्या वेति विकल्पं सङ्कल्प्य प्रथमं प्रतिक्षिपति—**न हीति**। अधिकः—स्वरूपादन्यः, विशेषस्याविद्याविलयहेतुत्वं स्वधीद्वारा। यदि तु वृत्तिः कल्पितविशेषविषयतया ब्रह्माज्ञानं बाधेत तर्हि तत्त्वधीबाध्यत्वं तस्य न स्यात्। द्वितीयमनुवदति—**बाध** इति। वृत्तिस्वरूपात्प्रदीपवह्निमुद्गरादिवत् किञ्चित्प्रकाश-निरपेक्षादिति यावत्। दूषयति—**तदेति**। अज्ञानस्य ज्ञाननिवर्त्यत्वं न स्यात्; तत एव मिथ्यात्वलक्षणातिक्रम इति भावः॥ ३३॥ **इति साविद्यब्रह्मविवर्तवादभङ्गः।**

179. **छन्नत्वे स्वप्रकाशादनधिकवपुषो ब्रह्मणः स्यादभावो**
भावानां छादनं हि स्फुरणविलयनं तस्य वोत्पत्तिरोधः।
मिथ्या दोषाद्भ्रमोक्तौ कथमधिकरणं सत्यमित्येव वाच्यं
नाधिष्ठानानवस्था भवतु तव यथा नास्त्यविद्याऽनवस्था॥ ३४॥

तिरोधिमपि दूषयति—**छन्नत्व** इति। घटादीनां स्वस्वरूपातिरिक्तप्रकाशवत्त्वात्तन्निवर्तकैस्तिरोधानं युक्तम्; ब्रह्म-णस्तु न तथेत्याशयः। अभावापत्तिं तिरोधानविकल्पेन व्यनक्ति—**भावानामिति**। स्फुरणविलयनं—सिद्धस्य प्रकाशस्य नाशः। तस्य—स्फुरणस्येत्यर्थः, असिद्धस्येत्यर्थापन्नम्। ननु वृत्त्यधीनप्रकाशान्तरापेक्षया तिरोधानं सिध्येत्, तन्न;

तस्यापि ह्यनुत्पन्नस्य नाश्यत्वायोगादुत्पत्तिरोध इत्येष्टव्यम्। ततश्च सत्यामविद्यायां कथं तद्बाधिका वृत्तिरुत्पद्यते? अन्यतस्तन्निवृत्तौ किं पुनरेषा वृत्तिस्साधयेत्? स्वयमेवाविद्यां निवर्त्योत्पद्यत इति चेन्न; परस्पराश्रयापत्तेः, स्वोत्पत्त्या प्रतिबन्धकनिवृत्तिः तया च सेति। एवं तिरोधानं दूषितम्। तदधीनं विक्षेपमपि विक्षिपति—**मिथ्येति**। सर्वासु भ्रान्तिष्वधिष्ठानदोषयोस्सत्यत्वमारोप्यस्य च मिथ्यात्वं दृष्टम्। ततश्च माध्यमिकं प्रति निरधिष्ठानभ्रमानुपपत्तिं वदन्, भ्रममूलस्य दोषस्य कथं मिथ्यात्वं ब्रवीषि? यद्यधिष्ठानं मिथ्या तदा तदध्यासस्याधिष्ठानान्तरं वाच्यम्। एवं चानवस्था स्यादिति चेत्, दोषमिथ्यात्वेऽपि तदध्यासार्थं दोषान्तरापेक्षयाऽनवस्था स्यादेव; यदि दोषस्य स्वरूपतः प्रवाहतो वाऽनादित्वान्नानवस्थादोष इति मन्यसे। एवमधिष्ठानमिथ्यात्वेऽप्यधिष्ठानस्य दोषवदुभयथाऽनादित्वान्न दोषः स्यात्। अथ स्यात्—न वयं निरधिष्ठानभ्रमभीत्याऽधिष्ठानस्य सत्यत्वं ब्रूमः; अपि तु *सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिश्रुतिसिद्धमङ्गीकुर्म इति, तर्हि दोषतयाऽभिमताया जगत्प्रकृतेरपि *गौरनाद्यन्तवती सा जनित्री भूतभावनी *अव्यक्तं कारणं यत्तन्नित्यं सदसदात्मकम्, इत्यादिभिरन[वयवत्व]श्वरत्ववचनात् सर्वकालानुवृत्त्या सत्यत्वमङ्गीकार्यम्। *भूयश्चान्ते विश्वमायानिवृत्तिरिति तद्विनाशः श्रुत इति चेन्न; पुरुषस्य मायासंबन्धनिवृत्तौ तत्र तात्पर्यात्। मायाशब्द एव मिथ्यात्वं बोधयतीति चेन्न, आश्चर्यसृष्टिहेतुतया तदुपपत्तेः; अन्यथा *देवमायेव निर्मिता *तेन मायासहस्रं तदित्यादिविरोधात्। न च शुक्तिरूप्यादिषु क्वचिदपि मायाशब्दो दृष्टः। नापि मिथ्याशब्दपर्यायतया मायाशब्दं लोकवेदनिघण्टुकाराः पठन्ति। *अनृतेन हि प्रत्यूढा इत्यत्रानृतशब्दो न जगत्प्रकृतिविषयः, किंतु ऋतेतरदुष्कर्मपरः; ऋतं चात्र फलाभिसन्धिरहितं कर्म स्यात्। कारणविषयत्वेऽपि ब्रह्मविषयासच्छब्दवदान्यपर्यमवसेयम्। एतेन *नासदासीन्नो सदासीत्तदानीं *न सत्तन्नासदुच्यत इत्याद्यपि सदसच्छब्दाभिप्रेतव्यष्टिभेदप्रलयपरतया न तद्वैलक्षण्याय योज्यमिति ॥ ३४ ॥ **इति तिरोधानाद्यनुपपत्तिः ॥**

180. **दोषाभावेऽप्यविद्या स्फुरति यदि ततः किं न विश्वं तथा स्यात्**
सा चान्यां कल्पितां चेदभिलषति तथा साऽपि चेत्यव्यवस्था।
नापेक्षा चेदनादेरकलुषधिषणागोचरत्वात् सती स्यात्
ब्रह्मैवास्यास्तु दोषो यदि न तु विरमेद्ब्रह्मणो नित्यभावात् ॥ ३५ ॥

अथाविद्यास्वरूपसिद्धिरूपब्रह्मणस्तत्साक्षित्वं दोषनिरपेक्षं तत्सापेक्षं वेति विकल्पे पूर्वानुवादेनानिष्टमाह—**दोषेति**॥ मिथ्याभूतस्य कस्यचिद् दोषनिरपेक्षप्रकाशत्वे वियदादिप्रपञ्चस्यापि तथात्वं लाघवात् स्वीकार्यमेव। न चासौ प्रपञ्चप्रतिभासहेतुर्दृष्टः, येन लोकसिद्धदोषवन्न त्यज्येतेति भावः। अनुमानं तु निरसिष्यते। उत्तरानुवादेनानवस्थामाह—**सेति**। अनवस्थापरिहारं शङ्कते—**नापेक्षेति**। स्वरूपानादेस्तावदविद्याया न कल्पकापेक्षा, प्रवाहानादेर्नानवस्था दोषः स्वकारणातिरिक्तानपेक्षणादिति भावः। पक्षद्वयेऽप्यनिष्टमाह—**अकलुषेति**। स्वरूपानादिरविद्या निर्दोषया संविदा भाति; अन्यथा अनवस्थानात्। तथा च सत्यत्वं दुस्त्यजम्। अविद्या स्वप्रकाशे स्वकार्यप्रकाशे च स्वयमेव दोष इति मन्यसे, तर्हि सर्वमप्यनिर्वचनीयं दोषान्तरमनपेक्ष्यावभासेत, अविशेषात्। अन्यदनिर्वचनीयं कादाचित्कत्वात् कारणमपेक्षत इति चेत्, किमतः? न हि मृदादयो घटादीनां हेतवोऽपि दोषा इति व्यवह्रियन्ते, न च स्वेष्टमुक्तिहेतोर्दोषत्वं ब्रूषे। भवन्तु वा हेतवो दोषाः। अविद्याप्रवाहवादिभिः पूर्वनिवृत्तावप्युत्तरस्य स्थैर्यमङ्गीकृतम्, चिरप्रकाशश्च। तत्र दोषनिवृत्तावपि

सिध्यता प्रकाशेन प्राग्वद्विषयस्य सत्यत्वं प्रसज्येत । सामग्र्यवस्थपूर्वदोषचरमक्षणजनितावुत्तरप्रकाशौ चिरमनुवर्तेते इति चेन्न ; विषयस्थैर्येऽपि वृत्तिप्रकाशानामाशुतरविनाशित्वाभ्युपगमात्, सामग्रीसन्तत्या धारावाहिकदृष्टेश्च । न चाध्यासकाल एवाविद्या भाति, पश्चात्तु स्वरूपेणैवावतिष्ठत इति वाच्यम्, संविदधीनस्वसिद्धेस्तस्या अप्रकाशमानक्षणावस्थानायोगात् । ईश्वरस्य भातीति चेन्न; ईश्वरस्य बुद्धेरप्यदोषायत्तप्रकाशत्वे तद्विषयस्य सत्यत्वं सिध्येत्; दोषायत्तत्वे तु तद्दोषप्रकाशो निर्दोषस्य सदोषस्य वेति विकल्पदौःस्थ्यं प्राग्वत् । अथान्यनिरपेक्षं ब्रह्मैवाविद्याप्रकाशप्रयोजको दोष इति शङ्कते—**ब्रह्मेति** । एवं सति स्वरूपतः प्रवाहतो वाऽनादिरविद्या नोच्छिद्यत इत्याह—**न त्विति** । तत्र निरपेक्षदोषानुवृत्तिं हेतुमाह—**ब्रह्मण** इति । तत्त्वधीप्रागभावविशिष्टस्य दोषत्वात् तदभावे कथमविद्या भासेतेति चेत्, हन्तैवं प्राप्ताप्राप्तविवेकेन तत्त्वधीप्रागभावस्यैव दोषत्वमायातम्; अलं भावरूपाविद्यादोहलेनेति ॥ ३५ ॥ **इत्याविद्यादर्शनानुपपत्तिः॥**

181. **ज्ञातेऽज्ञातेऽप्यभावः खलु दुरवगमस्संविदस्ते न [वेद्यं] भावः**
स्यादज्ञानं यदीहाप्यपरिहृतमिदं तद्विरोधादिसाम्यात् ।
तुल्यैवाकारभेदात् परिहृतिरुभयोः क्लृप्तिरत्राधिका ते
मुग्धोऽसीत्यादिसाक्षात्कृतिरपि नियतं तत्प्रतिद्वन्द्विगर्भा ॥ ३६ ॥

ननु यदज्ञानमात्मसाक्षिकं भाति, तद्भावरूपमेव स्यात् ज्ञानप्रागभावस्य दुर्ग्रहत्वादिति शङ्कते—**ज्ञात** इति ॥ अयं भावः—अभावो ह्याश्रयप्रतियोगिनिरूप्यः ; प्रतियोगि च ज्ञानम्, तत्र सर्वज्ञानाभावस्तावन्न कदाचिदपि ग्राह्यः ; अभावज्ञानस्य तदाश्रयप्रतियोगिज्ञानस्य च विद्यमानत्वात् । अथ विषयविशेषावच्छिन्नस्य ज्ञानान्तरस्य प्रागभावः सुग्रह इत्युच्येत; तदपि न, विषयविशेषज्ञानसदसद्भावयोस्तज्ज्ञानाभावस्य दुर्ग्रहत्वात् । षष्ठप्रमाणवेद्यश्चाभावः कथमपरोक्षधीविषयः स्यात्? भावरूपाज्ञाने तु न तावद्भावाभावरूपत्वविरोधः ; न चान्यत् किंचिदिह स्यादिति । अतः स्वेष्टस्य फलितत्वमाह—**तेनेति** । ईदृशं दुर्ग्रहत्वं त्वदिष्टेऽपि स्यादिति प्रत्याह—**इहापीति** । तत्र तदुक्तमेव हेतुमाह—**तद्विरोधेति** । भावरूपस्यापि ह्यज्ञानस्य ज्ञानविरोधित्वं समानम्; तस्य तद्बाध्यत्वाभ्युपगमात् । आदिशब्देन विषयविशेषनिरूप्यप्रतिसंबन्ध्यादिसापेक्षत्वग्रहः । अपरोक्षधीविषयत्वं च मतान्तरेणाभावस्याप्यस्ति । षष्ठप्रमाणवेद्यत्वेऽपि विरोधस्समः । तत्रापि प्रमाणतयाऽभिमत उपलब्ध्यभावः केनचित् प्रमाणेन निर्धार्यते । तेन च ज्ञानप्रागभावोऽपि गृह्यमाण आश्रयप्रतियोगिस्वधीसद्भावे कथं सिध्येत्? मा भूत्ततोऽपि ज्ञानाभावग्रह इति चेत्तन्न ; ज्ञानाभावस्य दुर्ग्रहत्वं साधयताऽपि हि गृहीत एव ज्ञानाभावः । अन्यथा कथं प्रमाणज्ञानं पक्षीकृत्य स्वप्रागभावव्यतिरिक्तेत्यादि वक्ष्यसि? देवदत्तप्रमापक्षीकारेण तत्स्थप्रमाभावातिरेकिण इत्यादि च? ननु भावरूपाज्ञानग्रहणे किं तदितरज्ञानेन प्रतियोग्यादिनिरपेक्षत्वादिति चेन्न; अज्ञानमिति गृह्यमाणस्य तदन्यतया तद्विरोधितया तदभावतया वा प्रतीतौ प्रतियोग्यादिभिर्नैरपेक्ष्यायोगात् । नन्वज्ञानावच्छेदकतया सामान्यतः किंचिद्विषयं प्रतियोगिसाक्षिचैतन्येन ज्ञाताज्ञातसर्वग्राहिणा विषयीक्रियते; विशेषतस्तु गृह्णत् प्रमाणज्ञानं चानादिभावरूपाज्ञानबाधकमिति तत्राह—**तुल्येति** । अभावरूपेऽप्यज्ञाने तथैव प्रतियोगिधीर्व्यवस्थितेति न विरोध इत्यर्थः । तुल्यत्वे कथमितरप्रद्वेष इत्यत्राह—**क्लृप्तिरिति** । लाघवादभावपक्ष एव ग्राह्य इति भावः । स्यादेतत्—प्रतिसंबन्ध्यपेक्षानियमे हि प्रतिबन्धवतारः, स्वरूपेण तु मुग्धोऽस्मि मूढोऽस्मीत्यज्ञानं साक्षिणा प्रकाश्यते ; अतो न विरोध इति; तत्राह—**मुग्ध** इति । अयं भावः—मोहादिशब्दाः खल्वत्र बुद्ध्यभावरूढास्सविषयप्रतियोग्यव-

च्छिन्नमेव स्वार्थमुपस्थापयन्ति, प्रलयादिशब्दव[त्त्र]त् नञ्प्रयोगाभावमात्रान्नैरपेक्ष्याभिमान इति ॥ ३६ ॥ **इति भावरूपाज्ञानप्रत्यक्षत्वभङ्गः ॥**

182. स्वाजन्मान्यस्वदेश्यस्वविषयवृतिकृत्स्वव्यपोह्यार्थपूर्वात्
ध्वान्तोत्थाद्यप्रभावद्विमतमितिरिहापूर्वनिर्भासनाच्चेत् ।
अज्ञानाज्ञानभेत्त्री किमियमनुमितिः स्वेष्टभङ्गोऽन्यथा तु
व्यर्थाऽसाविन्द्रियादिष्वतिचरणमसिद्ध्यादि च स्याद्विकल्पे ॥ ३७ ॥

अथ **पञ्चपादिकाविवरणो**क्तमनुमानमनुभाषते—**स्वाजन्मे**ति ॥ विप्रतिपन्नं मानज्ञानं स्वप्रागभावव्यतिरिक्तस्वदेशगतस्वविषयावरणस्वनिवर्त्यवस्त्वन्तरपूर्वकम् अप्रकाशितार्थप्रकाशकत्वात् अन्धकारे प्रथमोत्पन्नप्रदीपप्रभावदिति प्रयोगः। अत्रैतदनुमानज्ञानं स्वविषयावरणनिवर्तकं न वेति विकल्पे प्रथममनुयुङ्क्ते—**अज्ञाने**ति । तदभ्युपगमेऽनिष्टमाह—**स्वेष्टभङ्ग** इति । अज्ञानस्य ह्यज्ञानान्तरावृतत्वे तदपि तथेत्यनन्ताविद्याक्लृप्तिगौरवं स्यात्, आवृता च साक्षिणा न दृश्येत । तत्कटाक्षविरहादलब्धस्वरूपा वन्ध्यासुतेव न प्रजाः प्रजनयेदिति भावः । द्वितीयमनूद्य दूषयति—**अन्यथा त्विति** । यद्यज्ञानविषयाज्ञानमनयाऽनुमित्या न निरस्येत, निष्फलैवासौ प्रसज्येत निरसनीयाभावात्, प्रकाशितमात्रप्रकाशकत्वाद्वा । अपि चेयमनुमितिः पक्षकोटिस्तदन्या वा ? आद्येंऽशतो बाधः ; द्वितीये तस्यामतिचारः । हेतुविकल्पे च दोषानाह—**इन्द्रियादिष्विति** । अयं भावः—प्रकाशहेतुत्वमिह ज्ञानहेतुत्वम्, ज्ञानकरणत्वम्, तदनुग्राहकत्वम्, ज्ञानत्वम्, विषयविस्फुरणरूपत्वम्, स्वविषयावरणनिरासकत्वमन्यद्वा किञ्चित्? नाद्यः, आत्मादृष्टादिभिरनैकान्त्यात्, ज्ञानस्य च ज्ञानहेतुत्वनियमाभावात् । अत एव न द्वितीयतृतीयौ ; इन्द्रियादिष्वतिचाराच्च । नापि चतुर्थः, दृष्टान्तस्य साधनविकलत्वात्, साक्षिज्ञाने च विपक्षे हेतुवृत्तेस्सपक्षवृत्त्यभावाच्च विरुद्धत्वापत्तेः । नापि पञ्चमः, पक्षसपक्षयोर्हेतुवृत्त्यभावादेव । नापि षष्ठः, तस्य साध्यानुप्रविष्टत्वात् । सप्तमस्तु कश्चिन्न दृश्यत एवेति । चकारात् दोषान्तराण्यपि द्योत्यन्ते । तथा हि—स्वप्रागभावव्यतिरिक्तेति स्वदेशगतेति च पृथगुपादानं निरर्थकम् ; अभावव्यतिरिक्तेत्येतावतैव वेद्यगत[वृ]वित्त्यभिव्यक्तिप्रागभावस्यापि व्यवच्छित्तेः । स्वविषयावरणे च स्थिते स्वोत्पत्तिरेव न संभवतीत्युक्तम् । ब्रह्माश्रयतया चाभ्युपगतस्य विश्वप्रकृतेः तदज्ञानस्य न घटाद्यज्ञानवत् प्रमाणज्ञानदेशगतत्वं युक्तमिति ॥ ३७ ॥ **इति पञ्चपादिकाविवरणोक्तभावरूपाज्ञानानुमानभङ्गः ॥**

183. यच्चोक्तं दैवदत्ती मितिरितरमितिन्यायतो हन्त्यनादिं
मात्वात्तन्मित्यभावाधिकमिति तदपि स्यादबाधं विपक्षे ।
नाभावो भावतोऽन्यो न च पुरुषभिदाऽस्त्येकजीवत्ववादे
दृष्टान्ते ध्वंसकत्वं न च विदितमिदं ध्वंसतामात्रसिद्धेः ॥ ३८ ॥

यत्तु कश्चिदाह—* देवदत्तप्रमा तत्स्थप्रमाभावातिरेकिणः । अनादेर्ध्वंसिनी मात्वाद्यज्ञदत्तप्रमा यथा ॥ इति, तदनुभाषते—**यच्चेति** ॥ दूषयति—**तदिति** । अपिना पूर्वानुमानेऽप्ययं दोषोऽस्तीति ख्याप्यते; विपक्षे बाधकमेव हि प्रतिबन्धरहस्यमाहुः ; न चेह तदस्ति ; अतो नेदं साधकमिति भावः । भावान्तराभावनयेन दूषणमाह—**नाभाव** इति । यद्यभावो भावातिरिक्तः स्यात्तदा ह्यत्राभावव्यवच्छेदार्थं विशेषणं स्यात् । न च भावातिरिक्तोऽभाव इति वक्ष्यते । माभूत्तर्हि

विशेषणमिति चेन्न ; परसंमतमात्रसाधने सिद्धसाधनात्, तावदुक्त्या च त्वदिष्टासिद्धेः, तदतिरिक्तस्य चानुपस्थापनात्। परस्य पक्षदृष्टान्तविभागायोगमप्याह—**न चेति**। ये ह्यद्वैतिनो जीवमप्येकमेवेच्छन्ति तन्मते देवदत्त एव यज्ञदत्त इत्यपि कल्प्यते। लोकव्यवहारमात्रात् परसंमत्या वा पक्षादिभेदक्लृप्तिरिति चेन्न ; स्वानभ्युपगतस्य साधनाङ्गत्वेनोपादानायोगात्। अस्तु नानाजीवमतेन दृष्टान्तोक्तिरिति चेन्न ; तन्मतेऽपि जीवानां प्रमाधारत्वासिद्धेः। न हि स्वरूपचैतन्यं वा साक्षिचैतन्यं वा जीवतया कल्पितं वा जीवाश्रितमिति युष्माभिः कल्प्यते, वृत्तिरूपा प्रमाऽन्तःकरणनिष्ठा कथ्यते। अतः पुरुषस्थतया प्रमानिर्देशो न युक्तः। कृपाणादिप्रतिफलितमुखमलिनिमादिन्यायेन प्रातीतिकतया पुरुषस्थत्वोक्तिरिति चेन्न ; प्रातीतिकस[त्ताया]तामर्थक्रियाकारित्वानभ्युपगमात्। अन्तःकरणवृत्तिद्वयमेव पक्षदृष्टान्ताविति चेन्न ; तस्य परसंमत्यभावेन परान् प्रति प्रयोगायोगात्। किंच देवदत्तनिष्ठधारावाहिकद्वितीयादिज्ञानेषु देवदत्तप्रमाभावातिरिक्तानादिनिवर्तकत्वाभावेऽपि प्रमात्वं दृष्टम्, तद्व्यवच्छेदाय पूर्ववदप्रकाशितार्थप्रमात्वादिविशेषणेऽपि देवदत्तप्रमान्तराभावातिरिक्तानादिस्वप्रागभावध्वंसनात् सिद्धसाधनत्वम्। देवदत्तप्रमाभावत्वात्यन्ताभाववदनादिध्वंसकत्वं साध्यमिति चेत्, इदमपि स्वजन्यसंस्कारप्रागभावध्वंसनेन दत्तोत्तरमेव। किंच, अनादेर्ध्वंसिनीत्यत्र ध्वंसरूपत्वमात्रं वा ध्वंससंबन्धित्वं वा ध्वंसहेतुत्वं वा विवक्षितम्? नाद्यः, अनभ्युपगमात्। न च ध्वंसो घातक इति युज्यते। न द्वितीयः, विवक्षितस्याज्ञाननिवर्तकत्वस्यानुक्तेः। अस्ति हि स्वजन्यसंस्कारप्रागभावोऽनादिः तस्य च ध्वंसरूपस्संस्कार एकाश्रयत्वादिना स्वसंबन्धी च। दृष्टान्ते चानादिप्रतियोगिकध्वंससंबन्धित्वासिद्धेः। अतस्तृतीयः परिशिष्यते। अत्रापि दृष्टान्तस्य साध्यविकलत्वमाह—**दृष्टान्त** इति। उक्तं हि पूर्वमेव प्रागभावस्य कार्यस्य चैकक्षणसंपातायोगात्तयोर्वध्यघातकभावो न संभवतीति। एतदेवाभिप्रेत्याह—**ध्वंसतामात्रसिद्धेरिति**। अपि चात्र स्वप्रागभावातिरिक्तानादिध्वंसकत्वसाधने तद्ध्वंसनीयमनादिकिंचिद्भावरूपमिति कुतस्सिद्धम्? न तावद्व्याप्त्या, दृष्टान्ते तदसिद्धेः। नापि पक्षधर्मताबलात्, पक्षस्थस्य हेतोस्तादृशबलादृष्टेः ; दृष्टस्य च [तादृश]पक्षधर्मसंबन्धमात्ररूपस्य पक्षसाध्यसंबन्धमात्रार्थत्वात्। न च परिशेषात्; अभावान्तरनिवर्तकत्वेऽपि विरोधाभावात्। दण्डचक्रादयो हि स्वाभावातिरिक्तं घटाभावं निवर्तयन्ति। तद्वद्देवदत्तप्रमाऽपि संस्कारोत्पत्तिहेतुभूता स्वसंस्कारप्रागभावं ध्वंसयत्येव। एतत्परिहाराय अभावव्यतिरिक्तानादिध्वंसिनीत्येतावन्मात्रमुपाददीमहीति चेत्; हन्त तर्हि सिद्धसाधनत्वं परिजिहीर्षता दृष्टान्तस्य साध्यविकलत्वापत्तौ न दृष्टिर्दीयते ॥ ३८ ॥ **इति चित्सुखोक्तभावरूपाज्ञानानुमानभङ्गः ॥**

184. **अस्पृष्टावद्यतोक्तेर्न खलु विषयतामभ्युपेयादविद्या**
न क्षेत्रज्ञोऽपि तापत्रयपरितपनान्नापि तद्ब्रह्म मौग्ध्यात्।
मिथ्यात्वादोषभावो न भवति यदि किं तन्निरासप्रयासै-
रुच्छेत्तव्या पुमर्थान्वयत इह परः कोऽभिलष्येत दोषः ॥ ३९ ॥

अथ ब्रह्माज्ञानकल्पनां श्रुतिविरोधेन निर्मूलयति—**अस्पृष्टेति** ॥ न तावन्निरवद्यत्वश्रुतिरनादर्तव्या ; सर्वश्रुत्यनादरप्रसङ्गेन निष्कञ्चुकबाह्यत्वापातात्। न चासौ स्तोभवन्निरर्थिका ; स्वबोधितेऽर्थे स्वतःप्रामाण्यात्। अतस्सविषयत्वे केवलमविद्यैव वा तद्विषयः, तत्कल्पितो जीवो वा, तदवरुद्धं ब्रह्म वेति विकल्पं विभाव्य प्रथमं प्रतिक्षिपति—**न खल्विति**। * निरवद्यमिति श्रुतिर्ब्रह्मैव विशिनष्टि, न त्वविद्याम् ; त्वत्पक्षे ह्यविद्यान्तराभावात् निरवद्यत्वश्रुतिस्तद्विषया स्यादित्युपालम्भकाकूक्तिरियम्। अतो नात्राभागिप्रतिषेधः। द्वितीयं दूषयति—**न क्षेत्रज्ञ** इति। न हि त्वन्मते प्रतिबिम्बप्रायस्य

जीवस्यावस्थान्तरेणापि निर्दोषत्वमिति भावः । तथैव तृतीयमपि निरस्यति—**नापीति** । तच्छब्देन सर्वाध्यासाधिष्ठानत्वादिसूचनम् । मौग्ध्यात्—अविद्यातिरोहितस्वप्रकाशत्वादित्याशयः । ननु कल्पिते जीवे कल्पनाधिष्ठाने ब्रह्मणि वा निरवद्यत्वादिश्रुतिस्संबोभवीति, अविद्यातत्कार्याणामसत्यतया दोषत्वाभावादिति शङ्कते—मिथ्यात्वादिति । परिहरति—किमिति । यद्यविद्यादीनां स्वकालसत्त्वं दोषत्वं च न स्यात् तर्हि किं तन्निरासार्थसाधनचतुष्टयसंपत्तिपूर्वकश्रवणमनननिदिध्यासनप्रयासैः ? अविद्यानिरासकदर्शनार्थमेव हि तद्विधिमातिष्ठध्वे । नन्वसत्यस्य दोषत्वमप्यसत्यं, तादृशदोषवत्त्वेऽपि तात्त्विकदोषात्यन्ताभावान्निर्दोषत्वश्रुतिरर्थवती स्यादित्यत्राह—**उच्छेत्तव्येति** । असत्योऽपि दोषः उच्छेत्तव्यो न वा ? पूर्वत्र तादृशापुरुषार्थान्वियादतिरिक्तः को नाम दोषशब्दार्थः ? उत्तरत्र तन्निरासप्रयासनैरर्थक्यमेवेति भावः । अनिर्वचनीयस्य नित्यनिवृत्तस्वरूपस्य किं निवर्तनेन ? अत्यन्ताभावस्यासंपाद्यत्वात्तत्प्रतिभासोऽप्यनिर्वचनीय एवेति ? सोऽपि नित्यनिवृत्तित्वान्न संपाद्यनिवृत्तिः । किंच तात्त्विकदोषः श्रुत्या निरस्यत इति वदता स दोषः किं ब्रह्मस्वरूपमेवेत्यभिमतम् ? अन्यद्वा किञ्चित् ? पूर्वत्र किं तदधीनसत्ताकयाऽविद्यया ? तेन च सर्वोपपत्तेः दोषभूतस्वाधीनप्रकाशतया ब्रह्मापि मिथ्या स्यात् । उत्तरत्र द्वैतापत्तिः ; यत्र क्वचिद्विद्यमानत्वाभावे तात्त्विकत्वविरोधात् । भावाद्वैतिनो ब्रह्मस्वरूपातिरिक्ततात्त्विकाभावरूपदोषसंभवात् तन्निषेधिका श्रुतिरियमिति चेन्न ; अभावनिषेधे तत्प्रतियोगिभावसंबन्धापातात्, ततश्चाद्वैतवादो निरुध्येत । दोषस्य परमार्थत्वं नास्तीति निरवद्यत्वश्रुत्यर्थ इति चेन्न ; दोषस्वरूपनिषेधके तदनुज्ञया तत्सत्यत्वनिषेधकशब्दाभावात्, तत्परत्वक्लृप्तेश्च गुरुत्वात् । अतो भावमभावं वा सत्यमसत्यं वा ब्रह्मणि निरसनीयं किञ्चिदिच्छता निर्विषयैव निरवद्यत्वश्रुतिरापादितैवेति ॥ ३९ ॥ **इति ब्रह्माज्ञानानुमानानां नित्यनिर्दोषश्रुतिबाध्यत्वम् ॥**

185. **शुद्धे ब्रह्मण्यविद्या न यदि न घटते तस्य जीवैक्यवाद-**
स्तस्मान्निर्दोषतोक्तिर्निरुपधिदशया निर्वहेदित्ययुक्तम् ।
प्रत्यक्षादिप्रमाणानुगुणबहुविधश्रुत्यबाधेन नेतुं
शक्येऽप्यैक्यादिवाक्ये बहुगुणनिधये ब्रह्मणेऽसूयसि त्वम् ॥ ४० ॥

यदि निरवद्यत्वश्रुतिविषये ब्रह्मणि अविद्या कदाचिदपि न स्यादित्युच्येत, तर्हि तस्य जीवैक्योपदेशो न घटेत; तस्मान्निर्दोषत्वश्रुतिस्त्वदभिमतजीववन्निवृत्ताविद्यस्वरूपपरतया निरुह्येतेति शङ्कते—**शुद्ध** इति ॥ अत्र * स एष देवः कृतभूतभावनः स्वयं विशुद्धो विरजाः प्रकाशत इत्यादिभिर्बद्धमुक्तावस्थाद्वयभागिनः कर्मवश्यादन्यत्वेन प्रमितस्य परस्य ब्रह्मणस्सदोषनिर्दोषावस्थाद्वयक्लृप्तिस्साहसमित्यभिप्रायेणाह—**इत्ययुक्त**मिति । * तत्त्वमसि * अयमात्मा ब्रह्मेत्युपदेशो भेदनिषेधश्च कथमित्यत्राह—**प्रत्यक्षादी**ति । अयं भावः—यद्यपि जीवपरभेदश्रुति[मात्रमवस्थाद्वयविषयमिति] मात्रादवस्थाद्वयमिति शङ्कितुं शक्येत, तथाऽप्येकैकस्यामेवावस्थायां जीवादन्यः परः प्रतिपाद्यते । जागरे तावत् * तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीतीति । तथा च सूत्रं * स्थित्यदनाभ्यां चेति । * समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ इति चोच्यते । स्वप्ने च *य एषु सुप्तेषु जागर्ति कामंकामं पुरुषो निर्मिमाण इति । तत्र च स्वतन्त्रपरतन्त्रविभागव्यञ्जकं सूत्रं—* पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययाविति । सुषुप्तिप्रायणयोश्च * प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमिति * प्राज्ञेनात्मनाऽन्वारूढः उत्सर्जन् यातीति च । तत्रापि सूत्रं *सुषुप्त्युत्क्रान्त्योर्भेदेनेति । मुक्तावस्थायामपि *सोऽश्नुते सर्वान्

कामान् सह ब्रह्मणा विपश्चितेति । अत्र यदि भोक्तृसाहित्यमभिप्रेतं तदा सुव्यक्त एव भेदः, यदा तु प्रस्तुतब्राह्मणपदविवरणक्रमेण भोग्यसाहित्ये तात्पर्यं तदाऽपि भोक्तुर्भोग्यस्य च स्वारसिकी भेदधीर्न बाधमर्हति; ब्राह्मणस्थपरशब्दानुग्रहाच्च । एवं * परात्परं पुरुषमुपैति दिव्यमित्यादि । एतदपि सूत्रितं * मुक्तोपसृप्यव्यपदेशाच्चेति । * ब्रह्म वेद ब्रह्मैव भवतीत्यादिवाक्यं तु * निरञ्जनः परमं साम्यमुपैतीति मुक्तविषयतयैव प्राकरणिकेन वाक्येन परमसाम्यतत्परतया स्थापितार्थम्; परमसाम्यं च * भोगमात्रसाम्यलिङ्गाच्चेति सूत्रेण नियमितम्; श्रुत्यन्तरे च तादृगेव भवतीति निर्दर्शनम्; * विष्णुरेव भूत्वेत्यादिन्यायाच्च । **मोक्षधर्मे** च * परेण परधर्मी च भवत्येष समेत्य वै इत्यादिभिः परमसाम्यमेव प्रदर्शितम् । अनेन साम्यं यास्यामीति च मुमुक्षोरभिसन्धिरप्यभिधीयते । स्वयं चागीयत * मम साधर्म्यमागता इति । * इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति जीवब्रह्मतादात्म्योक्त्याऽनिष्टप्रसङ्गमाशङ्क्य * अधिकं तु भेदनिर्देशादिति च प्रत्युक्तम् । स्रष्टुस्स्रज्यस्य भेदः श्रुत्यैव हि निर्दिश्यते * अस्मान्मायी सृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरुद्ध इति । एवं प्रस्पष्टार्थसूत्रप्रतिष्ठापितस्वरसार्थानां भेदश्रुतीनां न त्वदभीष्टवत् प्रत्यक्षादिविरोधः, प्रत्युतानुगुण्यमेव । तस्मादेवंविधनिर्बाधानन्यपरबहुविधश्रुत्यनुसारेण जीवपरसामानाधिकरण्यस्य भेदनिषेधस्य च निर्वाहे संभवति, निर्दोषकल्याणगुणाकरे ब्रह्मण्यविद्यादिदोषमाविष्कुर्वन्नात्मीयामसूयामेवाविष्करोषि; तन्निर्णीतं च **मोक्षधर्मान्ते** परस्य बन्धप्रसङ्गरहितत्वम्; इतरस्य बन्धमोक्षभागित्वं च— * तत्र यः परमात्मा तु स नित्यो निर्गुणो मतः । स तु नारायणो ज्ञेयस्सर्वात्मा पुरुषो हि सः ॥ न लिप्यते कर्मफलैः पद्मपत्रमिवाम्भसा । कर्मात्मा त्वपरो योऽसौ मोक्षबन्धैस्स युज्यते ॥ इति ॥ ४० ॥ **इत्यविद्याकल्पकश्रुतार्थापत्तिभङ्गः ॥**

186. **मायाविद्यादिशब्दैः प्रकृतिरभिम[हि]ता ज्ञानकर्मादयो वे-**
त्येतत्तत्तत्प्रदेशे स्फुटविदितमतो न त्वदिष्टाऽस्त्यविद्या ।
किंचाविद्यादिशून्यः पर इति विविधाम्नायकण्ठोक्तमर्थं
क्षेप्तुं मायादिशब्दः क्षम इति वदतः स्यादविद्या तवैव ॥ ४१ ॥

आस्तां श्रुतार्थापत्तिः, श्रुतिभिरेव भावरूपाज्ञानं सिध्यतीत्यत्राह—**मायेति** ॥ * मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यत्र न प्रकृतेर्मिथ्यात्वं प्रतिपाद्यते, यथाक्रममुद्देश्योपादेयस्थापनोपपत्तेः । अत्र हि पूर्ववाक्यस्थमायामायिशब्दार्थबुभुत्सायां प्रसिद्धार्थप्रकृतिमहेश्वरशब्दाभ्यां संशयादिरपाचिकीर्ष्यत; अन्यथा उद्देश्योपादेयक्रमविपर्यासः । तथा चाहुः— * यद्वृत्तयोगः प्राथम्यमित्याद्युद्देश्यलक्षणमिति । न च मायाशब्दो मिथ्यावाची; लोकवेदनिघण्टुपाठाभावात् । क्वचित्प्रयोगस्तु भाक्तः स्यात्; अन्यथा * देवमायेव निर्मिता, * स्वमायया सांप्रतमागतं वा, * ऋते मायां विशालाक्षीं तव पूर्वपरिग्रहाम्, * तेन मायासहस्रं तदित्यादिभिर्विरुध्येत । नीतिशास्त्रेषु च मुख्यामुख्यसंकलनेन सप्तविधोपायपरिगणने मायेन्द्रजालयोरन्यथाकरणान्यथाप्रतिभासनसामर्थ्यरूपतया विभागस्सिद्धः । मन्त्रौषधादिविशेषवति च मायावीति प्रयोगः, न तु क्वचिदपि मिथ्यार्थसंबन्धिनि । तिमिरादिभासितरज्जुसर्पादौ च मायाशब्दो न दृष्टचरः । स्वमतव्यामोहितानां प्रयोगस्त्वनादेयः । * मायां न सेवे भद्रं ते न वृथा धर्ममाचरे, * मायाविनं मायया वर्तमानमित्यत्र च व्यामोहनमात्रं विवक्षितम् । * तेन वञ्चयते लोकान्मायायोगेन केशवः इत्येतदप्यसुरवञ्चनाशक्तियोगपरम् । * इन्द्रो मायाभिः पुरुरूप ईयते इत्येतच्च शक्तिविशेषैः प्रभूतरूपप्रकाशनपरम्, अन्यथाऽनन्वयात् । नचेदमिन्द्रभ्रान्तिपरं वाक्यं,

प्रशंसार्थप्रकरणविरोधात्। कथमन्यथा *युक्ता ह्यस्य हरयश्शतादश *भूरि त्वष्टेह राजतीत्यादिकं घटते? *संभवाम्यात्ममाययेत्येतदप्यौचित्यात् स्वच्छन्दावतारहेतुभूतबुद्धिविशेषविषयम्, *माया वयुनं ज्ञानमिति च नैघण्टुकाः। एवं सति *इच्छागृहीताभिमतोरुदेहः *समस्तशक्तिरूपाणि तत्करोति जनेश्वरः। देवतिर्यङ्मनुष्याख्याचेष्टावन्ति स्वलीलया॥ इत्यादिभिरैकार्थ्यं स्यात्। *मम माया दुरत्ययेत्यादिषु गुणमयीति विशेषणात् त्रिगुणद्रव्यविषयत्वमेव कण्ठोक्तम्। तथा च तन्नामपाठः। एतेन *भ्रामयन् सर्वभूतानि यन्त्रारूढानि माययेत्यपि गतार्थम्। *भूयश्चान्ते विश्वमायानिवृत्तिरित्येतदपि प्रस्तुतयोगबलान्निश्शेषमायातरणमेव निर्दिशति। एवं *विष्णुमायामहावर्तम्, *विष्णोर्विचित्राः प्रभवन्ति मायाः इत्यादिकमपि सत्यविषयमेव संमन्तव्यम्। *मायामात्रं त्विति सौत्रं पदमपि स्वतन्त्रसंकल्पमूलस्वाप्नसर्गस्याश्चर्यतमत्वपरम्। जीवकर्तृकसृष्टिव्यवच्छेद एव ह्यधिकरणे युज्येत। प्रागेव हि स्थापितप्रपञ्चमिथ्यात्वानामिह पुनस्सुप्रसिद्धे स्वप्नविषये विशेषतश्शङ्का नाङ्कुरति। योगे वा जागरप्रपञ्चसत्यत्वमभ्यनुज्ञायैव चिन्ता न स्यात्। अविद्याशब्दोऽपि न क्वचिदप्यनिर्वचनीयजगदुपादानविषयः। तथा हि *क्षरं त्वविद्या ह्यमृतं तु विद्येत्यादौ *क्षरं प्रधानमित्यादिप्राकरणिकवाक्यैकार्थ्यात् प्रधानविषयत्वमेव युक्तम्। अत्र च विद्याशब्दोक्तात् पुरुषादन्यतामात्रेण प्रकृतावविद्याशब्दः। न च सा मिथ्या, *गौरनाद्यन्तवती सा जनित्री भूतभावनी *त्रिगुणं तज्जगद्योनिरनादिप्रभवाप्ययम् *अचेतना परार्था च नित्या सततविक्रियेत्यादिभिस्तन्नित्यत्वसिद्धेः। कथं तर्हि *मृत्युर्वै परे देव एकीभवति, *तमः परे देव एकीभवतीति वाक्ययोर्निर्वाहः? इत्थम्—सर्वाधारभूते परस्मिन्देवे विभक्तावस्थात्यागेनैकत्वदशावस्थानमात्रं ह्यत्राभिप्रेतम्। एतेन *प्रकृतिर्या मयाऽऽख्याता व्यक्ताव्यक्तस्वरूपिणी। पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि॥ इत्येतदपि व्याख्यातम्। *अविद्यया मृत्युं तीर्त्वेत्यत्राविद्याशब्दस्तत्त्वज्ञानविरोधिनिवर्तकसत्कर्मविषयतया भाष्ये व्याख्यातः; अनुवाके प्रकृतयोर्विद्याकर्मणोरेव *विद्यां चाविद्यां च यस्तद्वेदोभयं सहेति परामर्शात्, पर्युदासवृत्तेर्नञश्चासन्नविषयत्वोपपत्तेः। अविद्यया मृत्युं प्राप्य स्थित इति निर्वाहस्य चातिक्लिष्टत्वात्; बाधाभावे च स्वरसपरित्यागायोगात्; *ब्रह्मविद्यामधिष्ठाय तर्तुं मृत्युमविद्ययेत्युपबृंहणानुगुण्याच्च। *अविद्या कर्मसंज्ञाऽन्येत्यत्र बन्धककर्मविषयत्वं वाक्यशेषसिद्धम्। *अविद्यायामन्तरे वर्तमानाः *सोऽविद्याग्रन्थिं विकिरतीह सौम्य, *अविद्यासञ्चितं कर्म, *अविद्यातरुसंभूति बीजमेतद् द्विधा स्थितमित्यादौ प्रकरणानुगुणतत्तदर्थविषयत्वं ग्राह्यम्। आदिशब्देन *अनृतेन हि प्रत्यूढाः *त इमे सत्याः कामाः अनृतापिधानाः *तेषां सत्यानां सतामनृतमपिधानमित्याम्नातोऽनृतशब्दश्च संगृहीतः। सत्कर्मणि ऋतशब्ददर्शनात्तदितरवृत्त्या दुष्कर्मविषयोऽत्रानृतशब्दः, दुष्कृतस्य च ज्ञानपिधायित्वं श्रुतिस्मृतिसिद्धम्, त्वयाऽपि दुस्त्यजं च। एवमसदव्याकृतशब्दैरपि न मिथ्यार्थग्रहः, अवस्थाविशेषवैशिष्ट्यपरत्वात्। तदत्र फलितमाह—**अत** इति। त्वदिष्टानिर्वचनीयत्वादिविशिष्टेत्यर्थः। अनन्यथासिद्धबहुश्रुतिप्रतिहतेश्च मायादिशब्दैर्न ब्रह्माज्ञानक्लृप्तिरित्याह—**किंचे**ति। निरवद्य इति सामान्योक्त्याऽप्यज्ञानरूपमवद्यं निरस्यते। अस्ति चाकर्मवश्यत्वस्वतस्सर्वज्ञत्वश्रुतिः, *सकला न यत्र क्लेशादयस्सन्ति परावरेशे इत्याद्युपबृंहणशतं च। मोक्षप्रदत्वश्रुत्या च स्वयं न मायासंबद्धः; तत्प्रसादाधीनं ह्येषां मायातरणं गीयते। ननु *त्वं हि नः पिता योऽस्माकमविद्यायाः परं पारं तारयसीति कर्मवश्यस्य योगसिद्धस्य गुरोरविद्यातारकत्वमाम्नातमिति चेत्; अस्तु तत्रार्थस्वभावात् परम्परया तारकत्वम्, ब्रह्मण एव साक्षान्मोक्षप्रदत्वेन प्रतिपादनात्। एवमविद्याप्रसङ्गरहिते ब्रह्मणि असाधकतमैः शब्दविशेषैरविद्यां वदतस्तवैवाप्रतिपत्तिविप्रतिपत्तिभ्यां निग्रहः स्यादित्यभिप्रायेणोक्तम्—**स्यादविद्या तवै**वेति ॥ ४१ ॥ इति **मायादिशब्दानां ब्रह्मदोषप्रतिपादकत्वानुपपत्तिः ॥**

187. निर्दोषश्रुत्यबाधप्रणयिभिरुदितो ब्रह्मजीवानुबन्धी
मायाविद्याविभागोऽप्यफल इह परोन्मोहनार्था हि माया ।
मिथ्यार्थान् दर्शयित्वा विहरणमपि तैस्तादृशं भावयन्ती
मायैव स्यादविद्या न कथमितरथा स्यादनुच्छेदनीया ॥ ४२ ॥

अत्र केचिन्निर्दोषश्रुत्यविरोधमाकाङ्क्षन्त एवं व्यभाङ्क्षुः—अविद्या किल स्वकल्पितानां क्षेत्रज्ञानां सत्यं तिरोधायासत्यं सत्यत्वेन प्रकाशयति; दुःखादिकं च दोग्धि; माया तु ब्रह्मणः सत्यमसत्यं च सम्यगेव दर्शयन्ती, दुःखादिकं चानुत्पादयन्ती विश्वव्यापारलीलारसं प्रसूत इति । इमं विभागमनुभाष्य दूषयति—**निर्दोषे**ति ॥ अफलत्वं विवृणोति—**परे**ति । अयं भावः—ये नाम केचिन्मायया क्रीडन्ति न तेऽनया मोमुह्यन्ते ; परानेव व्यामोहयन्ति । अत्र तु न वस्तुतस्सन्ति भवतां परे मोहनीयाः । कल्पितांस्तु क्षेत्रिणः कल्पितानि च मोहकरणोपकरणानि स्वयं सर्ववित्परमेश्वरो मायावी यदि कल्पितत्वेन पश्येत्, कथं तान् मुमोहयिषेत्? कथं च तैश्चिक्रीडिषेत्? अत ईदृशोपाधिविभागेन जीवेश्वरयोस्सदोषनिर्दोषत्वविभागो दुस्साध इति । अथ पराविद्याकल्पितानि जीवाद्युपकरणानि ब्रह्मापि स्वमायया परमार्थवत्पश्यतीति मन्वीत; तत्राह—**मिथ्यार्था**निति । दर्शयित्वा—सत्यत्वेनेनि शेषः, तादृशं—मिथ्याभूतमित्यर्थः । इयं स्वयमसत्येव माया स्वसिद्धान्यविद्यासिद्धानि वा मिथ्याभूतानि विहारोपकरणानि तत्साध्यं विहरणं च यदि सत्यत्वेन दर्शयन्ती अर्भकादीनामिव प्रतिबिम्बकल्पैर्जीवैस्संव्यवहारमारभेत, सैव कथमविद्या न स्यात्? सुखजनकत्वादिति चेन्न; अविद्यायामपि तस्याभ्युपगमात् । दुःखाजनकत्वे सतीति चेत्तत्राह—**इतरथे**ति । इतरथा—दुःखासंभिन्नसुखजनकत्वेनाविद्यात्मकत्वाभावे सतीत्यर्थः । नन्वनादित्ववन्मायाया अनुच्छेद्यत्वमप्यस्तु, का नो हानिरिति चेत्; प्रथमं तावदसत्यस्य सर्वस्यानित्यत्वाभ्युपगमविरोधः । अथ च ब्रह्मस्वरूपवन्निर्बाधस्य नित्यस्य भावरूपस्यासत्यत्वक्लृप्तिविरोधः । अथवा *विश्वमायानिवृत्तिः रिति स्वाभीष्टपरतया व्याख्यातश्रुतिविरोधः, नित्यानित्यवस्तुविवेकवैतथ्यं चेति ॥४२॥ **इति मायाविद्याविभागभङ्गः** ॥

188. मिथ्याभूतस्य सत्यं निरुपधि भजते न ह्युपादानभावं
तस्योपाधिश्च मिथ्यात्मक इति निरधिष्ठानता नास्य युक्ता ।
तस्मात्सत्यानृते द्वे मिथुनमिति न सद्विश्वसत्ता ह्यबाध्या
सद्विद्यायां च कार्यं ननु कथमसतस्सद्भवेदित्युपात्तम् ॥ ४३ ॥

यत्तु मिथ्याभूतस्य प्रपञ्चस्य तादृशमेवोपादानं भवितुमर्हतीत्याहुः, तदनुभाषते—**मिथ्ये**ति । अयं भावः—यद्यपि ब्रह्मोपादानकमशेषं कार्यमाम्नातम् ; तथाऽपि तस्य न स्वरूपतस्तदुपादानत्वं युक्तम्, निर्विकारत्वात् विरूपत्वाच्च । अत उपाध्यपेक्षायां ब्रह्मण उपादानत्वघटकतया प्राप्त उपाधिः स्वकार्यवन्मिथ्याभूत एष्टव्यः । स च स्वरूपसत्यत्वाभावान्निरधिष्ठानो न सिध्येत् । अतो ब्रह्मण उपादानत्वार्थमुपाधेः स्वरूपसिद्ध्यर्थं मिथःकरम्बितसत्यानृतमिथुनसंभवः सर्गः स्वीकार्य इति । अत्र लोकसिद्धोपादानप्रक्रियाविरोधमभिप्रेत्याह—**इति न सदि**ति । सत्ययोरेव हि प्रकृतिविकृतित्वं दृष्टम् ; न च कल्पितरजताद्युपहितस्य तत्तदर्थक्रियाकारित्वम् । अतो मिथ्योपसृष्टतयाऽपि ब्रह्मण उपादानत्वं मृग्यमिति भावः । उपादानमिथ्यात्वकल्पकासिद्धिमाह—**विश्वे**ति । प्रपञ्चस्य सत्यत्वं तावद्व्यावहारिकव्यपदेशेन त्वयाऽपि संगृह्यते ; बाधश्च परिहरिष्यत इति भावः । श्रुतिविरुद्धं च कार्यमिथ्यात्वमित्याह—**सद्विद्याया**मिति । *तद्धैक आहुः

असदेवेदमग्र आसीदिति परमतमनूद्य स्वमतेन तत्प्रतिक्षेपे *कुतस्तु खलु सोम्यैवं स्यात् कथमसतः सज्जायेत इति कार्यसत्यत्वं संप्रतिपन्नत्वेनोपात्तम् । अतः प्रथमप्रतीतानुसारेण *वाचारम्भणं विकारो नामधेयम् *अपागादग्नेरग्नित्वमित्यादिकमसत्कार्यवादनिरासार्थतया नेतव्यमिति भावः । एवं *मृत्तिकेत्येव सत्यम् *त्रीणि रूपाणीत्येव सत्यमित्यादौ च श्रुत्युपात्तमृत्तिकादिसत्यत्वानुरोधेनोपादानोपादेयद्रव्यतादात्म्यपरत्वसंग्रह एव साधीयान् । *अथ नामधेयं सत्यस्य सत्यं प्राणा वै सत्यं तेषामेष सत्यमित्यत्र च प्रकृत्यवगतप्राणसत्यत्वाबाधेन संबन्धविभक्तेरुचितविशेषसंभवे विपरीतविवक्षाकल्पनमन्याय्यम् । यदि च प्राणेषु व्यावहारिकं सत्यत्वमिहानूद्येत तदा मिथ्याभूतानाम् एष सत्यमिति किं नाम त्वदिष्टं निर्दिष्टं स्यात्? प्रत्युत समभिव्याहारसामर्थ्यात् ब्रह्मणोऽपि सत्यत्वमविशिष्टोपात्ततया व्यावहारिकमित्येव सिध्येत् । स्वरूपेऽधिकसत्यत्वविधौ च तस्य नीलादिवन्निष्प्रतियोगिकत्वान्न षष्ठी समन्वीयेत । अतो यथाभाष्यमिहार्थः ॥ ४३ ॥ **इत्यविद्याकल्पककार्यमिथ्यात्वानुपपत्तिभङ्गः ॥**

189. **कार्याणां यत्सरूपं किमपि गुणमयं कारणं कापिलोक्तं**
तत्क्षिप्तं माक्षिकादेः क्रिमिमुखजनिना सूत्रकारैर्द्वितीये ।
तस्मान्मिथ्यात्मकस्य स्वयमनुपधिकं सत्यमेवास्तु सूतिः
सत्योपादानवादे जगदपि न मृषा स्यादितीष्टं त्विदं नः ॥ ४४ ॥

अत्र यदुपजीवनेन मिथ्याभूतस्य मिथ्याभूतमेवोपादानमिति कल्प्यते तमेव प्रकृतिविकृत्यैकरूप्यनियमं निरस्यति—**कार्याणा**मिति ॥ नविलक्षणत्वाधिकरणे हि सत्त्वरजस्तमोमयस्य जगतस्तादृशमेवोपादानं युक्तम् । न तु निर्गुणं ब्रह्मेति वदतस्**सांख्यस्य** द्वितीयेऽध्याये **सूत्रकारै**रुत्तरं दत्तं *दृश्यते त्विति । कथंचित्सारूप्यं ब्रह्मणोऽपि सिद्धम्; सर्वथा सारूप्यं न ते प्रकृतेरपि स्यात्; भेदाभेदाङ्गीकारेऽपि समविषमदशाभेदव्यवस्थापनात् । अतः कार्यान्तरकारणव्यावर्तकाकारेण सारूप्यमपेक्षितमिति वक्तव्यम् । तत्र माक्षिकगोमयादिभ्यः क्रिमिवृश्चिकाद्युत्पत्तिदर्शनाद्व्यभिचारः । एष्वपि पार्थिवत्वाकारेण सारूप्यमस्तीति चेत्, किमतः? तेनाकारेण तेषां तत्कारणत्वे पार्थिवान्तरेभ्योऽपि तज्जातीयोत्पत्तिप्रसङ्गात् । यदि चासजातीयोत्पादकव्यावर्तकाकारेण सारूप्यमिष्येत कथमिदं प्रकृतौ संभाव्येत? सर्वस्याप्यन्ततः प्रकृतिकार्यत्वाभ्युपगमात्तद्व्यतिरिक्तोपादानानङ्गीकाराच्च । एवं कार्यस्य विजातीयकार्यव्यावर्तकाकारेण सरूपमुपादानमित्यपि नियमो दूष्यः; सारूप्यविकल्पदौःस्थ्यस्य दुर्वारत्वात्, शरावादिजातीयव्यावर्तकघटत्वादिना मृदस्सारूप्यायोगात् । अतस्सारूप्येण वा वैरूप्येण वा अन्वयव्यतिरेकवता धर्मिग्राहकसिद्धेन वा केनचिदाकारेण निमित्तवदुपादान[त्व]मपीति नियमः । एवं स्थिते सत्यकारणत्वं कार्याणामसत्यत्वं च स्थापयतस्ते निरुपाधिकात् सतो जगदुत्पत्तौ न विरोध इत्याह—**तस्मा**दिति । निर्विकारश्रुतिविरोधात् उपहितग्रह इति चेन्न; विकारमिथ्यात्वेन युष्माभिस्तत्समाधानात् । सूतिः—अध्यासाधिष्ठानतया उपादानमित्यर्थः । अत्र प्रसङ्गान्तरमाशङ्क्य परिहरति—**सत्ये**ति । तुशब्देन न केवलमिष्टप्रसञ्जनता; व्याप्तिसापेक्षे प्रसङ्गे पूर्ववत्सारूप्यनियमभङ्गोऽप्यस्तीति द्योत्यते ॥ ४४ ॥ **इत्युपादानोपादेयसालक्षण्यनियमभङ्गः ॥**

190. **दृश्यत्वाद्विश्वमिथ्यावचसि विहतयोऽसिद्धयश्चात्र बह्व्यः**
पक्षादेस्सिद्ध्यसिद्ध्योर्न हि गतिरितरा नापि वादाङ्गमीदृक् ।

मर्यादां लोकसिद्धां विजहत इह ते नापरा सा प्रसिध्ये-
न्निर्मर्यादोक्तिमात्राज्जगदपलपतः किं न सत्यं ततस्तत् ॥ ४५ ॥

अथ कार्यमिथ्यात्वासिद्धिरेवासिद्धा, अनुमानतस्तत्सिद्धेरित्यत्राह—**दृश्यत्वादिति** ॥ मिथ्याशब्दोऽत्र * द्व्येकयो-रितिवद् भावप्रधानः; विगीतं मिथ्या दृश्यत्वात् यद् दृश्यं तन्मिथ्या यथा शुक्तिरूप्यमित्यत्र सर्वे दोषास्समाह्रियन्ते। विहतयस्तावत्-विगीतपदं किञ्चिन्निष्ठं विगीतत्वमुपस्थापयति, तस्यापि पक्षीकरणात् तन्निष्ठात्यन्ताभावो मिथ्यापदेनोप-स्थाप्यत इति प्रतिज्ञापदयोर्व्याघातः। द्वयोरपि पदयोस्तत्त्वतः स्वार्थसमर्पकत्वाभावान्न व्याघात इति चेत्; एवं सति त्वन्मते क्वचिदपि प्रतिज्ञाविरोधो न स्यादिति विशृङ्खलविरुद्धभाषितेन भवता भवितव्यम्। ईदृशतत्त्ववेदिना च त्वया प्रतिवादिनोऽपि विरुद्धं वदन्तो न निग्राह्याः। परबुद्धिसिद्धविरोधात्तन्निग्रह इति; न, परबुद्धिसिद्धेऽपि त्वया तत्त्वशून्य-त्वावधारणात्। किंच विगीतत्वं यदि मिथ्या स्यात्, तदा सत्यत्वेन वा मिथ्यात्वेन वा संप्रतिपत्तिः स्यात्? तत्राद्ये मिथ्यात्वसाधनव्याघातः; द्वितीये साध्यत्वव्याघातः। मिथ्यापदं च सत्यमसत्यमनिर्धारितविशेषद्वयं वा मिथ्यात्वमु[पस्था-पयति] पाददीत? प्रथमे तस्य मिथ्यावृत्तित्वव्याघातः। न हि सत्यं रूप्यत्वं शुक्तिरूप्ये वर्त्स्यति। सिद्धान्तव्याघा-तश्च, ब्रह्मस्वरूपस्य सत्यस्य निराधारस्यासत्यवृत्तित्वे व्याघातः; तदतिरिक्तस्वीकारे सत्याद्वैतव्याघातः। हेतुपदेन च पक्षमर्धतयोपस्थाप्यमानं लिङ्गं साध्यपदेनापह्रियत इति प्रतिज्ञाहेतुविरोधः। शुक्तिरूप्यगतयोश्च साध्यसाधनयोस्सत्यत्वेन ग्रहणे प्राग्वद्विरोधः। असत्यत्वेन ग्रहणे तूदाहरणवाक्येन व्याप्तिप्रदर्शनविरोधः। दृष्टान्ते च मिथ्यात्वेन प्रदर्शितस्य साध्यस्य पक्षे सत्यत्वेनोपसंहारे प्रतिज्ञोदाहरणविरोधः। असत्यत्वेनोपसंहारे च विधायकमेव निषेधकमिति व्याघातः। एवमसिद्धयश्च। तथाहि—यद्यपि तर्कस्यारोपितलिङ्गधीरङ्गं, तथाऽपि साधने तु न तथा, तथैवोभयव्यवस्थादृष्टेः। अन्यथा स्वबुद्धिकल्पितधेनुपर्वतादिषु कल्पितैरेव कैश्चिल्लिङ्गैः पयःपावकादीननुमाय तदर्थिनां तत्र प्रवृत्तिप्रसङ्गात्। व्यावहारिक-संदेव साधनाङ्गं न प्रातिभासिकमिति चेन्न; शुक्तिरूप्यस्य त्वया दृष्टान्ततयोपादानात्। अत एव प्रमितत्वेन लोक-बुद्ध्यारूढमाश्रयादि भवतीत्यपि निरस्तम्। प्रतिवादिसंमतत्वमात्रेण पक्षीकारादिः स्यादिति चेन्न; स्वार्थानुमाने तद-योगात्, तत्पूर्वकत्वात् परार्थप्रयोगस्य, अन्यतरासिद्ध[स्व]लोपप्रसङ्गाच्च। तदिह पक्षादीनां प्रमाणतस्सिद्धौ तन्मिथ्यात्वसाधन-व्याघातः। असिद्धौ चाश्रयाद्यसिद्धयो बह्व्यस्संमन्तव्याः। विरुद्धद्वयसमुच्चयनिषेधौ तु सुदुर्वचावित्यभिप्रायेणाह—**पक्षादे-रिति**। यदि ह्यसिद्ध्यादिदोषदुष्टमपि साधकमङ्गीक्रियेत, तदा कैव कथा कथायास्तत्फलव्यवस्थायाश्चेत्यभिप्रायेणाह—**नापीति**। दुष्टमपि जल्पवितण्डयोरङ्गमिति चेन्न; तयोर्निग्रहस्थाननिवृत्तिप्रसङ्गात्। न हि कथाङ्गस्वीकर्तुः कश्चिदप-राधः स्यात्। अतः प्रतिभाक्षये परव्यामोहनेन पाक्षिकावष्टम्भविजयावहतया तयोस्तदनुज्ञानं न त्वङ्गतया, अवश्यप्रयोक्त-व्यत्वप्रसङ्गाच्च। न च दुष्टानां कथाङ्गत्वं कैश्चिदनुशिष्टम्। अतिक्रान्तमर्यादानामभिमतिरुन्मदिष्णूनामिवोपेक्षणीया। माध्यमिकादयोऽप्येतादृग्घेतुभिस्त्वदनिष्टं तत्तत्साध्यं साधयन्तस्त्वया न निगृह्येरन्। विमतमसाधकं दृश्यत्वात् संमतवदिति त्वदुक्तोपालम्भे च किं वक्ष्यसि? केन चान्यदपि किञ्चित्स्वयंप्रकाशत्वादिकं साधयिष्यसि? स्वव्याघातदुष्टतया माध्य-मिकादिप्रयोगोऽनास्थेय इति चेत्, स्वोक्तमपि तथाऽवधारय। स्वपरनिर्वाहकत्वसमाधिरस्म[त्प्रयोगे]त्पक्षे त्विष्ट इति चेत्; अन्येषामपि तथा किं न स्यात्, अविशेषात्? नन्वाभिमानिकसिद्धिभिः प्रमाणैस्सर्वसिद्धान्ताः स्थाप्यन्ते; अत ईदृशमपि कथायामङ्गं भवतीति मर्यादान्तरं मया कल्प्यत इत्यत्र सेयं कल्पना प्रमाणतर्कसिद्धेत्यभिमता, उत स्वत्वाज्ञामात्रसिद्धेति

विकल्पे पूर्वस्य निर्मूलतयाऽनुदयमाह—**मर्यादा**मिति । स्वाभीष्टमर्यादायाः प्रमाणादिसिद्धत्वं हि लोकमर्यादानुरोधेन वक्तव्यम्; अन्यथा तत्साधकासिद्धेः । अतः स्वमर्यादासिद्ध्यर्थं लोकमर्यादा अनतिक्रमणीयेति भावः । उत्तरत्र विपरीतप्रसक्तिमाह—**निर्मर्यादे**ति । स्वोक्तिमात्रसिद्धमर्यादया जगन्मिथ्यात्वाभिधाने मदुक्तिमात्रसिद्धमर्यादया सत्यत्वसाधकप्रमाणाभावेऽपि जगत्सत्यमिति प्रत्युक्तिमात्रेण सिद्धौ बाधितविषयं त्वदनुमानं स्यादिति भावः ॥ ४५ ॥

191. **साध्ये सत्येतरत्वे कथित इह भवेत् स्वस्य हि स्वान्यभावो**
नान्यत्सत्यं तु दृष्टं तदवधिकभिदासाधने चेष्टसिद्धिः ।
सत्यत्वं चेन्निषेध्यं प्रसजति दहनेऽप्युष्णताया निषेध-
स्साध्यं त्वक्षाद्यबाध्यं यदि किमपि परं तेन न व्याप्तिसिद्धिः ॥ ४६ ॥

मिथ्याशब्दविवक्षितं च विकल्पासहत्वेन दूषयति—**साध्य** इति ॥ अयं भावः—किं यतःकुतश्चिदन्यत्वं सिषाधयिषितम्? उत सर्वस्मात्? आद्ये सत्यानां पृथिव्यादीनां परस्परान्यत्वेन सिद्धसाधनता; द्वितीये सर्वेषां प्रत्येकं सत्यशब्दवाच्यतया स्वस्मादप्यन्यत्वं सर्वेषां प्रतिज्ञातं स्यात्; तथा च व्याघातः, तत्त्वातत्त्वयोरेकस्मिन्नसंभवात्; अन्यथा कथमनेकान्तवादनिस्तार इति । ननु विगीतानां व्यावहारिकसत्यत्वनिबन्धनं मिथस्सत्येतरत्वं न साधयामः । किंत्वस्ति किञ्चिदशेषकल्पनारहितं परमार्थसत्यं, ततोऽन्यत्वं त्विहातिष्ठामहे; तत्राह—**नान्यदि**ति । अशेषविशेषोज्झितं किञ्चित्परमार्थसत्यं न प्रत्यक्षादिषु कुतश्चित्प्रमाणात् सिद्धम् । न च तथा स्वयं प्रकाशते, तवापि हृदयविसंवादादिति भावः । ननु त्वयाऽपि परमार्थसद्ब्रह्माङ्गीकृतम्; अतस्तदन्यत्वसाधनमनुपालम्भनीयमित्येतदपि दूषयति—**तदवधिके**ति । न हि वयं जगतो जैनगन्धिवत् ब्रह्मानन्यत्वमङ्गीकुर्म इति भावः । अथ मिथ्याशब्दस्य सत्यत्वशून्यत्वमर्थ इति शङ्कते—**सत्यत्व**मिति । अत्र कालातीतत्वं निदर्शने प्रसक्त्या निर्धारयति—**प्रसजती**ति । अयं भावः—इह हि प्रातीतिकं व्यावहारिकं पारमार्थिकं वा सत्यत्वं निषिध्येत? तत्राद्यः परानिष्टोपालम्भ इत्यन्यौ शिष्येते; तयोश्च व्यावहारिकसत्यत्वनिषेधे यत्रैव यस्य प्रसिद्धिं मन्यसे तत्रैव तन्निषेधसीति न कथं कालातीतेन चापसिद्धान्तेन च निगृह्येथाः? व्यावहारिकं च मिथ्येति त्वद्दृष्टिः; मिथ्याभूतसत्यत्वनिषेधेऽपि परेष्टमेव त्वया प्रतिष्ठापितं स्यादिति । सत्यत्वान्तरनिषेधमनुवक्ति—**साध्य**मिति । तुः परेष्टविशेषनिषेधद्योतकः । परम्—अन्यत् । परमार्थसत्यत्वं हि लोकदृष्टादन्यत् । ब्रह्मनिष्ठं तद्वैधुर्यं चात्र बाधयोग्यादन्यदेव । अतः कथं बाधादिप्रसङ्ग इति भावः । तद्दूषयति—**तेने**ति । परमार्थसत्यत्वं हि व्यावहारिकादेव प्रमाणात्सिध्येत्? पारमार्थिकाद्वा? नाद्यः; प्रपञ्चस्यापि तत एव तत्सिद्धौ बाधस्य दु[र्वच]र्वारत्वात्, क्वचित्तस्य तत्साधकत्वं क्वचिन्नेति नियामकाभावात् । द्वितीये त्वपसिद्धान्तः; व्यावहारिकप्रमाणागोचरसत्यत्वनिरूपिताभावेन सह व्यावहारिकप्रमाणेन कथं व्याप्तिः गृह्येत? तत्रापि पारमार्थिकप्रमाणाद्ग्रहणे सिद्धान्तादिविरोधदोषस्तदवस्थः । शुक्तिरूप्यशब्देन च किं रूप्यत्वाश्रयतया रूप्यतादात्म्येन वा प्रतीतं भास्वरं द्रव्यं निर्दिश्यते? एतन्निष्ठतया प्रतीतं रूप्यत्वं वा? इदंत्वेन भातरूप्यं वा? रूप्यत्वसंसर्गो वा? रूप्यतादात्म्यं वा? विकल्पभेदारूढमतद्व्यावृत्तिरूपमलीकं वा? रजतसरूपबुद्ध्याकारविशेषो वा? शुक्त्यवच्छिन्नाविद्याकृतचैतन्यविवर्तो वा? शुक्तिरजतव्यवहारगोचरमात्रं वा किञ्चित्? आद्येषु चतुर्ष्वन्यथाख्यातिस्वीकारप्रसङ्गः । तत्र च निरुपाधिकमिथ्यात्वं न दृष्टम् । सोपाधिकमिथ्यात्वसाधने सर्वस्यापि प्रपञ्चस्य परस्परारोपयोग्यस्य देशकालान्तराद्युपधानेन मिथ्यात्वसाधनात् सिद्धसाधनता । न पञ्चमषष्ठौ; तयोरपि स्वस्थाने सम्यक्त्वात् शुक्तिस्थयोस्तयोरसदनभ्युप-

गतयोस्त्वयोदाहर्तुमशक्यत्वात् । अत एव न सप्तमः, व्यावहारिकसत्यानामपि तथात्वाभ्युपगमप्रसङ्गाच्च । नाप्यष्टमः, न हि सत्याया बुद्धेराकारो मिथ्या स्यात्, अन्यतया अनन्यतया वा प्रमितस्य तदयोगात् । अप्रमितस्य चानुदाहर्तव्यत्वात्, अन्यथाऽतिप्रसङ्गात् । भ्रान्तिज्ञाने बुद्धितदाकारावसत्याविति तदाकारनिदर्शनोपपत्तिरिति चेन्न; बाधाभावात्; परानभ्युपगतेश्च । नवमोऽप्यत्यन्ताप्रसिद्धेरपास्तः । अपाकरिष्यते चानिर्वचनीयोत्पत्त्यादिः । नापि दशमः, सत्येषु शुक्त्यादिषु अन्यतमस्यैव कयाचिद्विवक्षया शुक्तिरजतव्यवहारविषयत्वात्; अन्यथा वर्णक्रमनिर्देशवन्निरर्थकत्वापातात्; तथा चाश्रयहीनमुदाहरणमिति न कथञ्चिदपि व्याप्तिसिद्धिरिति ॥ ४६ ॥

192. स्वात्यन्ताभावदेशे विदितमिति यदि स्थाप्यमिष्टं क्वचित्त-
त्तत्रैवेति त्वशक्यं क्वचिदपि न तथा ह्यस्ति सिद्धान्तसिद्धिः ।
बाधश्चास्मिन्नुपाधिस्समधिगतदशादेशकालाद्युपाधौ
नासौ साध्योऽत्र मानं निखिलमपि यतस्तद्विधानैकतानम् ॥ ४७ ॥

पुनस्साध्यविकल्पे कोट्यन्तरमनुवक्ति—**स्वात्यन्ते**ति ॥ स्थाप्यं—साध्यम् । तत्र सिद्धसाधनतामाह—**इष्टमि**ति । क्वचित्—योग्यस्थले । सर्वेऽपि हि पदार्थास्सामग्रीविशेषैः स्वात्यन्ताभाववत्स्वध्यस्यन्ते । तत एव हि सर्वत्र पूर्वपक्षोदयः; आहार्यलिङ्गजा च तर्कधीस्सार्वत्रिकी निरनिष्टेऽनिष्टमुल्लेढि । अत एव हि विपर्यये पर्यवस्यति । ननु स्वात्यन्ताभावदेश एव विदितमिति साध्यं स्यात्; तथा च न सिद्धसाध्यतेत्यत्राह—**तत्रैवेती**ति । अत्र ह्यवधारणं स्वदेशव्यवच्छेदार्थम्; तदिदं स्वदेशसदसद्भावयोरशक्यमेव । स्वदेश एव स्वात्यन्ताभावदेश इति प्रस्तुतप्रतिज्ञाभिप्राय इति । अत्र व्याप्तिग्रहणाभावमाह—**क्वचिदपी**ति । यत्रक्वचिद्देशे काले वा जागरस्वप्नावस्थयोर्व्यावहारिकप्रातिभासिकयोर्वेत्यर्थः । शुक्तिरूप्योदाहरणं त्वसिद्धिप्रदर्शनेन प्रत्युक्तम् । एतेन स्वात्यन्ताभावप्रदेशवर्तित्वं साध्यमित्यपि निरस्तम् । सिद्धसाध्यत्वपरिहारेऽपि व्याघातादेरपरिहार्यत्वात् । **श्लो.** नहि वस्तु विकल्प्येत न विरुद्धसमुच्चयः । न चोभयपरित्यागो विहर्तिं जहतः क्वचित् ॥ न हि तदेव तत्रैव तदानीमेव विद्यते न विद्यते वेति विरुद्धानियतरूपता, ईदृशस्यानियमस्य जैनैरप्यनङ्गीकारात् । नच तदङ्गीकृतविरुद्धसमुच्चयः, स्वपरपक्षसमुच्चये सर्वकथोच्छेदापत्तेः । अत एव नोभयमिथ्यात्वेनोभयत्यागः, विरुद्धान्यतरविधिनिषेधयोरितरनिषेधविधिनान्तरीयकत्वात्, स्वात्यन्ताभावसामानाधिकरण्यसाधनायोगाच्च । अस्तु वा कश्चिन्मिथ्याशब्दार्थः; तत्र दृश्यत्वस्याप्रयोजकत्वमाह—**बाधश्चे**ति । मिथ्याशब्दवाच्यत्वे हि प्रतिपन्नोपाधौ बाधितत्वं प्रयोजकम् । अत एव न तदेव तदित्यनुपाधित्वम् । ननु बाध एवात्र साध्यस्स्यात्, तत्र च नोपाधिश्शक्यो वक्तुम्; तत्राह—**नासावि**ति । अयं भावः—किमत्र यस्यकस्यचित् पुरुषस्य यत्रकुत्रचिद्देशे काले वा बाधोऽस्तीत्येतावन्मात्रं साध्यम्? उतानेन प्रमाणेनास्य बाधो दृश्यत इति । न प्रथमः, एतावन्मात्रसाधनस्य ब्रह्मण्यपि सुवचत्वात् । शक्यं हि साहसिकस्य भासमानत्वमात्रेण सर्वमिथ्यात्वं साधयितुम् । किं च ब्रह्मव्यतिरिक्तकृत्स्नपक्षीकारेण बाधं साधयतस्तद्बहिर्भूतपुरुषदेशकालानामभावात् कस्यचित्पुरुषस्येत्यादिनिर्देशो निर्विषयः । तदन्तर्गतपुरुषदेशकालविवक्षया प्रयोगे तु विद्यमानेऽप्यविद्यमानभ्रमवतः कस्यचित् क्वचित् कदाचित्तत्र तन्नास्तीति धीसंभवात् सिद्धसाध्यता । मन्यते च **माध्यमिकः** सांवृतेन मानेन सर्वमिथ्यात्वम्; तथा तस्य विश्वबाधकज्ञानं जातमिति च वयमपि विद्मः । अप्रमाणमूलत्वादपारमार्थिकस्तदुक्तो बाध इति चेत्, त्वदुक्तोऽप्येवमेव । व्यावहारिकप्रमाणतो मदुक्तसिद्धिरिति चेत्, तदुक्तसिद्धिरपि तथैव । संवृतादिसमाख्या

वैषम्यं चाकिंचित्करम् । नापि द्वितीयः; प्रत्यक्षेण तावदस्तीत्येव प्रपञ्चः प्रतीयते । यदा च कुत्रचिन्नास्तीति मनुषे, तदाऽपि तत्रैव तदभावस्य सत्यत्वम्, अन्यत्र च तत्सत्यत्वमध्यक्षयामः । आह च **न्यायभाष्यकारः**—* सत्सदिति गृह्यमाणं तथाभूतमविपरीतं च तत्त्वमिति, *असच्चासदिति गृह्यमाणं तथाभूतं विपरीतं च तत्त्वमिति । अनुमानं त्वद्याप्यलब्धजीवितम् । आगमिकस्तु निषेधो विध्यनुरोधेन नेतव्यः; अन्यथाऽतिप्रसङ्गात् । वाचारम्भणादिशब्दाश्च द्रव्यान्तरनिरासपरा दर्शिताः । नन्वनन्तपदेनासंकोचाद्वस्तुपरिच्छेदराहित्यमपि गृह्यते; सति वस्त्वन्तरे तत्परिच्छेदाभावो दुर्वच इति चेन्न; यथा देशकालसद्भावो न कस्यचिद्देशकालपरिच्छेदः, किंतु परिमितदेशकालवर्तित्वम्; तथा न वस्त्वन्तरसद्भावो वस्तुपरिच्छेदः, अपि तर्हि परिमितवस्त्वन्तरप्रकारित्वम्; यथा गौः शुक्लो गच्छतीत्यादौ । न तथाऽत्र, * सर्वं खल्विदं ब्रह्म, * पुरुष एवेदं सर्वमिति विश्वरूपतया व्यपदेशात् । ततश्चायं सर्वाविरुद्धस्संग्रहः—**श्लो.** अविधेयमनाधेयमशेषमधिकं समम् । नेति वस्तुपरिच्छेदाभावः स्याद्विश्वदेहिनः ॥ यस्तु वस्त्वन्तराभावमपरिच्छित्तिमिच्छति । कथितोऽसौ कथाऽनर्हः क्षीबोन्मत्तैडमूकवत् ॥ किञ्च संख्यापरिच्छेदराहित्यं किं न दृश्यते । मानबाधाद्यदि समं निर्बाधेऽर्थे स्थितिः स्थिता ॥ पराभिमतैरुपमानार्थापत्त्यादिभिरपि न जगद्बाधः; तेषामन्तर्भावबहिर्भावयोरुक्तानतिरिक्तशक्तित्वादिति । तदेतत्सर्वमभिप्रयन्नाह—**मान**मिति । निखिलं स्वपराभ्युपेतं सर्वं तद्विधानैकतानं ब्रह्मण इव तद्विभूतिप्रपञ्चस्याप्यस्तीति बोधने नियमेन प्रवृत्तत्वान्न तद्बाधकमित्यर्थः ॥ ४७ ॥

193. तुच्छत्वं ते न हीष्टं सदसदितरता व्याहतत्वादिदुःस्था
ऽसिद्धा चासौ परेषां भवदनभिमतोऽनात्मना वेद्यतादिः ।
विश्वं हीदं मृषा नस्तदितरवपुषा त्वन्मतारोपितैश्च
स्यादेवं दूरतस्ते ध्रुवमपसरतोऽप्युक्तदोषानुषङ्गः ॥ ४८ ॥

पुनरप्यसंभवतोऽपि तत्तद्बाद्यभिमानात् संभवत इव साध्यविकल्पभेदाननूद्य दूषयति—**तुच्छत्व**मिति श्लोकेन ॥ तुच्छत्वं—खपुष्पादिवदसत्त्वम् । ते—माध्यमिकसमाख्यामनिच्छत इति भावः । नहीष्टं—एतत्साधनेऽपसिद्धान्त इति भावः । अस्तु मिथ्यात्वं सदसत्कोटिबहिर्भूतत्वमित्यत्राह—**सदसदितरते**ति । आदिशब्देनार्थान्तरत्वादिसंग्रहः । अयं भावः—सदसद्विलक्षणत्वं नाम सत्त्वासत्त्वात्यन्ताभावसमुदायवत्त्वं वा, सतोऽसतश्च कुतश्चिद्व्यावृत्तत्वं वा, सदसच्छब्दगोचरसर्वान्यत्वं वा, ब्रह्मतुच्छव्यावृत्तत्वं वा, ब्रह्मत्वतुच्छत्वसमुदायशून्यत्वं वा, तदुभयात्यन्ताभावसमुदायो वा, अन्यद्वा किंचित्? आद्ये व्याहतता, * परस्परविरोधे हि न प्रकारान्तरस्थितिरिति न्यायात्, न ह्यत्रानुष्णाशीतवद्गतिः, कोट्यन्तरस्यात्यन्तानुपलम्भात् । न च तत्राप्युष्णानुष्णविकल्पे कोट्यन्तरं समस्ति । द्वितीये सिद्धसाध्यता, सतामेव परस्परमसद्भ्यश्च व्यावृत्तत्वात् । तृतीयेऽपि स एव दोषः । अस्ति हि सत एवैकस्य तत्, एकस्य सर्वसदसद्रूपत्वाभावात् । अत एव न चतुर्थः; न हि वयं ब्रह्मस्वरूपं वा निरुपाधिकतुच्छं वा विश्वं ब्रूमः; विरुद्धार्थान्तरता च, खरशृङ्गे खपुष्पाद्यन्यस्मिंस्तद्भावात् । एवं पञ्चमेऽपि, खरशृङ्गादौ ब्रह्मणि ब्रह्मत्वतुच्छत्वयोरसमुच्चितत्वात् । षष्ठेऽपि सिद्धसाध्यता । न तु विगीतं ब्रह्मस्वरूपं न च तुच्छम्; अन्यदपि केनचिद्विशेषशब्देनोपस्थापयितुं शक्यं वा न वा? शक्यं चेदस्माभिरपि विशेषतो दूषयितुं शक्यम् । अशक्यं चेत्, अव्यपदेश्ययत्किञ्चिद्धर्मवत्त्वं साध्यं स्यादिति कस्तत्र विमन्यते? अतो यत्किञ्चिदेवैतदिति । किंच विगीतप्रयोगेषु सर्वेषु यत्र कुत्रचित् पूर्वसिद्धमेव पक्षे साध्यम्; इह तु ब्रह्मणि तुच्छे वा न साध्य-

ग्रहः,तयोर्विपक्षत्वात्; नच विगीते, तस्य संदिग्धसाध्यत्वात्। सपक्षस्तु शुक्तिरजतशब्देन प्रदर्शयितुं न शक्य इत्युक्तम्। नच परासिद्धस्साध्यावस्थो दृष्टान्तः स्यात्, तत्साधनं च दूषयिष्यते। तदसौ त्वदभिमता सदसद्विलक्षणता परेषां सर्वत्रासिद्धतया पक्षे दुस्साधेत्यभिप्रयन्नाह—**असिद्धा** चेति। ननु घटादौ तावदसद्विलक्षणत्वं संप्रतिपन्नम्, सद्विलक्षणत्वमपि पटादिवैलक्षण्याद्ब्रह्मवैलक्षण्याद्वा। अतो भेदव्यवहारव्यवस्थापकलक्षणरूपकेवलव्यतिरेकिन्यायेन साध्यस्य पक्षैकदेशसिद्धस्यैवाभिव्याप्तया साधनान्न साध्याप्रसिद्धिरिति। अत्र तु **सिद्धा चासा**विति नञ्प्रहाणेनोत्तरम्; पक्षे सर्वत्र सिद्धैवेत्युक्तम्; तथाऽपि मिथ्याशब्दनिमित्तं किञ्चित्त्वयाऽङ्गीक्रियते, तदेव साधयाम इत्यत्राह—**भवदनभिमत** इति। परे हि रजतादेश्शुक्त्याद्यात्मना वेद्यत्वं वा रजतादेरतत्संसृष्टस्य तत्संसृष्टतया भातत्वं वा बाध्यव्यवहारहेतुधीविषयत्वं वा मिथ्याशब्दनिमित्तं सिद्धान्तयन्ति। न चैतत् त्वया साध्यम्; अन्यथाख्यातेरख्यातेर्वा स्वीकारप्रसङ्गात्; तथा चापसिद्धान्तः। स्वदेशादौ च विश्वं सत्यं स्यादिति विवक्षितविपरीतसाधनापत्तिः; अतस्सिद्धसाध्यत्वं चाह—**विश्व**मिति। हिशब्द आगोपालपण्डितं दुरपह्नवां प्रसिद्धिं द्योतयति। तदितरवपुषा—स्वेतरस्वरूपतयेत्यर्थः। नहि स्वप्रतियोगिकान्योन्याभाववत्त्वं वा स्वेतरतादात्म्यं वा कस्यचिदनुबोभूयामहे शोश्रूयामहे वा। परसिद्धान्तकल्पिताकारवत्तया च मिथ्यात्वं सिद्धमित्याह—**त्वन्मतारोपितैश्चे**ति। ब्रह्माविद्याविवर्तत्वानिर्वचनीयत्वबाध्यत्वैरिति शेषः। चकारादसंसृष्टसंसृष्टतयेत्यपि गृह्यते। एवमनिर्वाच्यत्वादिविकल्पकोट्यन्तरेष्वपि तत्तद्विकल्पावतारेण बाधापसिद्धान्तसिद्धसाधनत्वादिदोषाणामनतिक्रमणीयत्वं प्रच्छन्नबौद्धोपालम्भव्याजेन छात्रान्प्रतिबोधयति—**स्यादिति**। ध्रुवं—निश्चितम्, प्रसञ्जकानामङ्गपञ्चकसंपत्तेरिति भावः॥ ४८॥

194. **साध्यं मिथ्या न वा ते द्वितयमनुचितं निष्फलत्वादिदोषा-**
दाद्यं हीष्टं ममापि प्रसजति भवतस्सत्यभेदः परस्मिन्।
पक्षीकारेऽस्य बाधादिकमतिचरणं तद्बहिष्कारपक्षे
तच्चेद् ब्रह्मस्वरूपं भुवनमभिहितं हन्त सब्रह्मकं स्यात्॥ ४९॥

स्वरूपविकल्पेन दूषितं मिथ्यात्वं धर्मतोऽपि विकल्पासहमित्याह—**साध्य**मिति। ते—ब्रह्मव्यतिरिक्तविश्वमिथ्यात्ववादिनः। द्वितयं—मिथ्यात्वस्य मिथ्यात्वं तत्प्रतिभटं सत्यत्वं च। अनयोरनौचित्ये क्रमात् कारणमाह—**निष्फलत्वादिदोषा**दिति। आदिपदमपसिद्धान्तार्थम्। नैष्फल्यं सिद्धसाधनतया विवृणोति—**आद्य**मिति। अपसिद्धान्तमुद्धाटयति—**प्रसजती**ति। पुनरपि साध्यमेतन्मिथ्यात्वं पक्षीकृतं न वेति विकल्पे पूर्वं दूषयति—**पक्षीकार** इति। अत्र हि प्रामाणिकमिथ्यात्वं पक्षीकृत्य तस्य मिथ्यात्वसाधने बाधः; अन्यस्य तु सिद्धसाध्यता; विधेयस्य निषेधात् व्याघातश्चेत्यर्थः। न ह्यत्र स्वपरनिर्वाहकनीतिः; यतः—**श्लो.** मिथ्यात्वस्य हि मिथ्यात्वे मिथ्यात्वं बाधितं भवेत्। सत्यत्वस्य तु सत्यत्वे सत्यत्वं स्थापितं भवेत्॥ उत्तरत्रोत्तरमाह—**अतिचरण**मिति। पक्षबहिर्भावो हि सपक्षतया विपक्षतया वा स्यात्? आद्ये जगन्मिथ्यात्वस्य हि मिथ्यात्वे संप्रतिपन्ने कथं तद्विरुद्धं साध्येत? द्वितीये मिथ्यात्वस्य सत्यत्वसंप्रतिपत्त्या तत्र च हेतुवृत्तेरतिचरणम्; यदीदं न दृश्यं तदा साध्यमपि न स्यात्; साधनाधीनदृग्विषयत्वायोगात्। अपि च ब्रह्मवदिह विपक्षभूतं मिथ्यात्वं ब्रह्मणस्सद्वितीयत्वमापादयेत्। अभावरूपं जगन्मिथ्या[त्वं]त्वमसत्यमप्येकदेशिभिरङ्गीक्रियत इति चेत्, तथाऽपि तत्र हेतुवृत्तेरतिचरणं दुस्तरमेव। सत्यमेव जगन्मिथ्यात्वम्; तच्च ब्रह्मस्वरूपमेवेति नापसिद्धान्तादिदोष इति पराभिप्रेतं कृत्वाऽनुब्रूते—**तच्चेदि**ति। तत्रापि सिद्धसाधनत्वमाह—**भुवन**मिति। मिथ्यात्वयोगि मिथ्या तच्च मिथ्यात्वं यदि ब्रह्म तदा विगीतं ब्रह्मवदिति साध्यार्थः स्यात्, तत्र न वयं प्रत्याख्यातार इति भावः॥ ४९॥

195. **इष्टं ब्रह्मापि दृश्यं तव च कथयतस्तस्य जिज्ञास्यतादीन्**
मिथ्या चेद् दृश्यताऽस्मिन्ननुविमतिपदेऽप्येवमेषा त्वयेष्टा ।
लिङ्गं जाड्यादिकं चेत्तदपि मम मते ह्यंशतः स्यादसिद्धं
मिथ्यालिङ्गैश्च सिध्येत् किमपि यदि भवेद् बाष्पधूमोऽग्निलिङ्गम् ॥ ५० ॥

एवं व्यापकवद्व्याप्यस्यापि विकल्पासहत्वं चतुष्पद्या दर्शयति—**इष्ट**मिति ॥ यदेतन्मिथ्यात्वसाधकतयोक्तं दृश्यत्वं, तद् ब्रह्मणि विद्यते न वेति विचारे नेति पक्षस्तावद् दूष्यते । *अथातो ब्रह्मजिज्ञासा, *तद्विजिज्ञासस्व तद्ब्रह्म, *आत्मा वा अरे द्रष्टव्यः, *आत्मन्येवात्मानं पश्येदित्येवमादीनि परश्शतं वाक्यानि पुरस्कृत्य श्रोतव्यमन्तव्यत्वादि-विशेषान् साधयतस्ते ब्रह्मणि दृश्यत्वनिषेधो न युक्तः । विद्यत इति पक्षे हेतोरतिचार इति भावः । ब्रह्मणि दृश्यत्वं तन्मिथ्याभूतम्; अतो न तत्रातिचार इति शङ्कते—**मिथ्या चे**दिति । एतदुपालभते—**नन्विति** । मिथ्याभूतेनैव हि दृश्यत्वेन ब्रह्मव्यतिरिक्तेऽपि मिथ्यात्वं त्वया साध्यते । नहि दृश्यं मिथ्या, तद्धर्मस्तु दृश्यत्वं सत्यमिति संभवति; तथा-ऽङ्गीकारे तत्रैवातिचारः, सत्यद्वित्वप्रसङ्गश्चेति भावः । ननु दृश्यत्वे दृश्यत्वं त्वयाऽपि वक्तुं न शक्यम्, आत्माश्रयादि-प्रसङ्गात् । अतस्सत्येऽपि तस्मिन् हेतुवृत्त्यभावान्नातिचारः स्यात् । मैवम्; दृश्यत्वं नाम लिङ्गं दृश्यत्वादिति हेतुपदेन बोध्यं न वा? आद्येऽतिचारस्त्वयैवेष्टः । द्वितीये साध्यव्याप्यमनुपस्थापयतो हेतुपदस्य प्रयोगाङ्गतायोगः । न चैवमात्मा-श्रयादिदोषः, स्वपरनिर्वाहकसमाधिना दृश्यत्वधर्मस्य तदाश्रयाणां च दृश्यपदेन संग्रहणस्य त्वया स्वीकार्यत्वात्; अन्यथा दृश्यत्वं न दृश्यमिति स्वोक्तिविषयत्वव्याघातात् । यदि च हेतुपदजन्यधीविषयताभावेऽपि हेतुपदं तत्र प्रयुज्येत एवमनैकान्तिकादिपदमपि तज्जन्यधीविषयत्वाभावेऽपि तत्र लब्धप्रसरमिति सर्वदोषसंपातः स्यात् । दोषाभावे कथं दुष्ट-शब्दस्सार्थ इति चेत्, दृश्यत्वाभावे कथं दृश्यशब्दस्सार्थ इति सममेतत् । किंच दृश्यत्वरहितं दृश्यत्वं निष्प्रकाशं स्वप्रकाशं वा? नाद्यः; स्वोक्तिव्याघातादेव । न द्वितीयः, अब्रह्मत्वात् । अतः कथं दृशिविषयत्वं नासादयेत्? अथ स्यात्, दृश्यत्वशब्देन स्वगोचरदृशि निरपेक्षप्रकाशात्यन्ताभावो वा दृशिजन्यफलाश्रयत्वं वा विवक्षितम्? तदुभयं स्वयं-ज्योतिषि ब्रह्मणि नास्तीति कथं तत्रातिचार इत्यपसर्पणवाक्यमनुभाषते—**लिङ्ग**मिति । तदुभयं दूषयति—**तदपी**ति । अस्मन्मते हि ब्रह्मव्यतिरिक्ता जीवा धर्मभूतज्ञानं च स्वयंप्रकाशतया स्वगोचरदृशिनिरपेक्षप्रकाशानि । अतो हेतोर्भागा-सिद्धिः । दृशिजन्यफलं च त्वदनुविधेयाभिमतं प्राकट्यं वा? त्वदभिमतं वेद्यगतवित्तिस्फुरणं वा? द्वयोरपि विगीते क्वचि-दपि अस्माभिरनङ्गीकारात् सार्वत्रिकी स्वरूपासिद्धिः । तवापि स्फुरणस्य वाच्यं व्याहाराख्यं फलं विगीतस्यापीति चेत्, तर्हि तद्ब्रह्मापि व्याप्नोति । अन्यथा तत्र मौनैकशरणः कथं तद्व्याचिख्यासया प्रवर्तेथाः? भवन्तु चात्र यानिकानिचिल्लिङ्गानि, तानि सत्यान्यसत्यानि वेति विकल्पे पूर्वत्रापसिद्धान्तादि स्फुटमिति कृत्वा पश्चिममनुवक्ति—**मिथ्यालिङ्गै**रिति । तत्रा-निष्टमाह—**भवे**दिति । बाष्पधूमः—बाष्पारोपितधूमः । भ्रान्तिसिद्धस्य धूमस्य व्यभिचारदृष्ट्या वह्निगमकत्वाभावः, न तु मिथ्यात्वादिति चेत्, तत एव यन्मिथ्या न तद्गमकमिति व्याप्तिसिद्धेस्त्वदभिमतान्यपि न साध्यं साधयेयुः । साधने वा ब्रह्मण्यपि तानि कथञ्चित्कल्पितानि तदप्यपरमार्थयेयुः । एतेन परोक्तं बाधकमपि प्रतितर्कप्रत्यूढं दर्शितं भवति । अपि च सत्यत्वपक्षे याऽसौ दृग्दृश्यसंबन्धानुपपत्तिर्बाधिकेति संभाव्यते । असत्यत्वेऽपि सा अस्ति वा न वा? आद्ये तर्काङ्गपञ्चकान्यतमहानेरतर्कत्वम्; तदा वाऽसत्यत्वे साध्ये कथं दृश्यत्वं हेतुरुपादीयेत? द्वितीये सत्यादन्यस्मिन् खपु-

ष्येऽपि दृश्यत्वानुपपत्तिर्न स्यात् । माभूदिति चेन्न; ख्यातिबाधान्यथानुपपत्तितर्कानुदयप्रसङ्गात् । अथ शब्दज्ञानानुपपत्तिवस्तुशून्यविकल्पगोचरतामात्रेण तस्य दृश्यत्वं, सत्येतरत्वसाध्यापेक्षया च सपक्षत्वमिष्येत, तदा तद्वदेव तुच्छत्वेऽपि संभवति अभिमतानिर्वचनीयत्वं न नियम्येत । शब्दज्ञाननिरपेक्षश्च खपुष्पाद्यध्यासः प्रागपि दर्शितः । भवतु तत्राप्यनिर्वचनीयत्वं शब्दमात्रानुपातिविकल्पविषये तुच्छत्वम् । तत्र च विवक्षितदृश्यत्वानुपपत्तिस्सिद्धेति चेत्; तदपि न, शब्दमात्रप्रतीतबाह्यागमविकल्पविषयाणामन्येषामपि पूर्वपक्षवाक्यार्थानामनिर्वचनीयत्वाभ्युपगमात् । अस्तु तत्रापि तुच्छत्वम्; किं नश्छिन्नमिति चेन्न; प्रत्यक्षाद्याभासप्रतिपन्नेऽप्याभासप्रतिपन्नत्वाविशेषेण तुच्छबहिर्भावक्लृतिभङ्गप्रसङ्गात् । ननु सत्ये दृक्संबन्धोऽनुपपन्नः; अस्वयंप्रकाशस्य स्वतस्सिद्धिविरहेण सत्यत्वायोगात् । तुच्छेऽपि तथा, स्वरूपाभावे संबन्धाभावात्; अनिर्वचनीये त्वविद्यामाहात्म्यादाध्यासिकस्संबन्धस्सिध्यन् दुरपह्नव इति, तन्न; पराधीनसिद्धेरपि निर्बाधस्य सत्यत्वाविरोधात्; सत्येऽपि ब्रह्मणि आध्यासिकदृक्संबन्धाभ्युपगमाच्च । **श्लो.** दृक्संबन्धश्च दृश्यानामसत्यत्वे विवक्षितः । सत्यत्वादिविकल्पेन सीदत्यनुपपत्तिमान् ॥ सत्यत्वे त्वनुपपद्यमानो हि दृक्संबन्धः सत्योऽसत्य उभयरूपोऽनुभयरूपो वा? नाद्यः, सत्यत्वे प्रपञ्चस्य दृक्संबन्धस्सत्यो न स्यात्; असत्यश्चासाविति विपर्ययविश्रमायोगात् । विषयसत्यत्वे हि धिया संबन्धः स्वीकार्यः । न चासौ घटते विकल्पदौःस्थ्यादिति प्रसङ्गतद्विपर्ययाविति चेन्न; इष्टप्रसङ्गत्वात् । दृशस्सत्यत्वेऽपि दृश्यसंबन्धासत्यत्ववद् दृश्यस्य सत्यत्वेऽपि दृशिसंबन्धमात्रासत्यत्वमनुपपत्त्या कल्प्यम् । दृक्संबन्धासत्त्वे तदधीनसिद्धेः कथं सत्यत्वमिति चेन्न; असत्यात्सत्यसिद्धेस्त्वया त्वद्विधैश्च जोघुष्यमाणत्वात्; अस्माकं तु संबन्धविकल्पदौःस्थ्यानङ्गीकारादेव समीहितसिद्धिः । **श्लो.** संबन्धफलसिद्धौ च स्वरूपे दुरपह्नवे । अन्तर्भावबहिर्भावविवादस्त्विह निष्फलः ॥ ये च दृग्दृश्यसंबन्धे संयोगादिविकल्पतः । दोषाः प्रलपितास्तेऽत्र दृश्यासत्यत्वभीरवः ॥ संबन्धमात्रदौर्घट्यात्तद्विशेषोऽपि दुर्घटः । इति चान्धस्य जात्यन्धयष्टिदानोपमं विदुः ॥ न द्वितीयः, विषयस्य सत्यतायामसत्यसंबन्धो न स्यादिति ह्यत्र प्रसङ्गः स्यात् । अयं ब्रह्मण्यतिचरितः इष्टप्रसङ्गश्च; विपर्यये विश्रान्तिश्चाद्याप्यसिद्धा । अत एव न तृतीयचतुर्थौ, व्याघाताच्च । तथाऽपि कोऽसौ दृग्दृश्ययोस्संबन्ध इति निर्मत्सराः पृच्छाम इति चेत्, वयमपि निर्मत्सराः पृच्छन्तं पृच्छामः । तत्र किंनामेति वा, किंस्वरूप इति वा, संयोगादिषु कतम इति वा, तेष्वन्तर्भूतो बहिर्भूतो वेति वा, सत्योऽसत्यो वेत्यादिप्रकारकोटिभेदेन वा प्रश्नार्थः स्यात्? नाद्यः, अप्रज्ञातविशेषनाम्नामानन्त्यात्; सामान्यतस्तु प्रश्नवाक्येऽपि प्रख्यातेः । न द्वितीयः, सर्वत्र स्वरूपमात्रे प्रश्नोत्तरविचारादेरनवतारात् । न तृतीयः, संयोगादिराश्यन्तर्भावनिर्बन्धाभावात्, अन्यथा सर्वत्र तज्जातीयराशिविशेषप्रश्नप्रसङ्गात् । नापि चतुर्थः, उभयधाऽपि स्वरूपलाभे विशेषनिर्धारणवैफल्यात्, अनिर्धारितेऽप्यन्यतरकोटेरनपायात् । न पञ्चमः, परस्परविरुद्धे सर्वत्रानुपपत्तिरहितान्यतरकोटेर्यथार्हमवशेषणीयत्वात् । दूषिता च संबन्धपक्षानुपपत्तिः; दर्शितश्चासंबन्धपक्षे दोषः । यदि चैतादृशस्तर्कोऽनुग्राहकः, स तर्हि यत् प्रकाशते तन्मिथ्या यथा ग्राह्यग्राहकौ तथा संविदित्यादिसंविन्मिथ्यात्वसाधकानुमानेष्वपि सुलभः, सत्यत्वस्वप्रकाशत्वादिधर्मसंबन्धानुपपत्तेस्त्वत्प्रलापप्रस्थित्यैवाकुण्ठितप्रसरत्वात् । **श्लो.** मिथ्यात्वेन च दृश्यत्वं स्वतःसंबन्धि साधयन् । अप्रामाण्यस्वतस्सिद्धिमुद्गिरत्यनया गिरा ॥ ५० ॥ इति दृश्यत्वानुमानभङ्गः ॥

196. **व्यावृत्तं शुक्तिरूप्यं विदितमिह मृषा विश्वमेवं न किं स्यात्**
मैवं हेतोरयुक्तेस्स खलु भिदुरता बाध्यता नाशिता वा ।

आद्येऽनैकान्त्यमन्त्ये स्वसमयविहतिर्मध्यमे स्यादसिद्धि-
र्धीविच्छेदादिकल्पान्तरमपि कथितैश्चूर्णितं दोषबृन्दैः ॥ ५१ ॥

उक्तदोषदुष्टमप्यनुमानान्तरमधिकदोषशिक्षार्थं व्याचष्टे—**व्यावृत्त**मिति ॥ इह—यत्र भाति तत्रेत्यर्थः । अन्यत्र तु प्रसङ्ग एव नास्ति; यद्वा सर्वस्मिन्निह जगतीत्यर्थः । विमतम् मिथ्या व्यावर्तमानत्वात्, यदुक्तसाधनं तदुक्तसाध्यम् यथा शुक्तिरूप्यम्; तत्खलु स्वतादात्म्येन भाते शुक्तिद्रव्येऽनुवर्तमाने स्वयं व्यावर्तते, अतो मिथ्या । एवं रज्ज्वादेस्सर्पभूदलनाम्बुधारादेश्च सत्यत्वमिथ्यात्वे व्यवतिष्ठेते इति । अत्रापि प्रागुक्तदूषणानि न प्रसर्तव्यानीत्यभिप्रायेण प्रतिवक्ति—**मैव**मिति । तत्र हेतुदौःस्थ्यं हेतुमाह—**हेतो**रिति । अयुक्तिं प्रथयितुं विकल्पयति—**स खल्वि**ति । योऽयं व्यावर्तमानत्वहेतुः, कुतश्चित् भिन्नत्वं वा? बाध्यत्वं वा, नश्वरत्वं वा? प्रथमं दूषयति—**आद्य** इति । भिन्नत्वं ह्यत्र स्वप्रतियोगिकं वा? स्वेतरप्रतियोगिकं वा? स्वतोऽन्यतो वेति विशेषानादरेण यत्किंचित्प्रतियोगिकं वा? आदिमस्त्वसंभवग्रस्तः; भेदाभेदकुसृष्टिश्च त्वया नाङ्गीक्रियते । अनन्तरस्त्वनैकान्त्यहतः । सत्ये ब्रह्मण्यतद्व्यावृत्तिं वर्णयता त्वयैव स्वेतरान्यत्वस्य स्वीकारात् । तत एव सामान्योक्तिरपि निर्धूता । अत्र क्रमस्य दूषणानुपयोगित्वादपसिद्धान्तोद्धाटनत्वरया च तृतीयं दूषयति—**अन्त्य** इति । यदि ह्यत्र स्वकालसत्त्वमभ्युपेत्य उत्तरकालासत्त्वं हेतुरुद्गृह्यते, तदा मिथ्यात्वेन सिषाधयिषितस्य स्वकालसत्त्वाभ्यनुज्ञानेऽपसिद्धान्तः; हेतुसाध्यपदव्याघातश्च । अनभ्युपगतस्वकालसत्त्वे तु नश्वरत्वहेतुरसिद्धः । न खलु नित्यासतां खपुष्पादीनां नश्वरत्वं पामरः परीक्षको वा कश्चित् प्रत्येति । **श्लो.** तत्रापि नश्वरत्वेन नित्यसत्त्वं निरुध्यताम् । स्वकालेतरकाले च तेन मिथ्यात्वमिष्यताम् ॥ बाध्यत्वहेतुं बाधते—**मध्यम** इति । प्रपञ्चस्य बाध्यत्वं हि स्वदेशादौ वा? स्वारोपदेशादौ वा? आद्ये त्वसिद्धिरवस्थापिता । द्वितीये बाधस्थलेष्वेव मिथ्यात्वसाधने सिद्धसाध्यता । अन्यत्र साधने त्वविषयवृत्तित्वम्, अन्यथाऽतिप्रसङ्गः; प्रपञ्चविषयबाधेन ब्रह्मबाधस्यापि सुवचत्वात् । ब्रह्म मिथ्या, सप्रपञ्चात्मना बाधितत्वात्, यत्कथंचिद्बाध्यते तत्सर्वथा बाध्यत इति त्वयैवाश्रितत्वादिति । ननु यत्सत्यं तन्नित्यं प्रकाशते, स्वतश्च, यथा ब्रह्म, विगीतं तु न तथा; सुषुप्त्यादौ प्रपञ्चभानाभावात्, जागरादौ चान्यत एव भानात् । किंच सत्यस्य सर्वस्मिन् प्रकाशमाने प्रकाशो दृश्यते, यथा संवित्स्वरूपस्य; न तथा प्रपञ्चस्य, अप्रकाशमाने घटादौ पटादिप्रकाशदर्शनात् । सत्यं च ब्रह्म देशपरिच्छेदरहितम्; न तथा विगीतमिति मिथ्या स्यात्; अतः कोट्यन्तरसंभवात् विकल्पन्यूनः प्रस्तुत उपन्यास इति शङ्कापनुत्त्यै कोट्यन्तरेष्वप्युक्तदोषानतिदिशति—**धीविच्छेदे**ति । यदत्र कदाचिदप्रकाशमानत्वान्मिथ्येति, तत्र किमस्मदाद्यपेक्षया कदाचिदप्रकाशमानत्वं हेतुः? उत सर्वापेक्षया? नाद्यः, सामग्र्यनुदयप्रयुक्तस्य प्रकाशाभावस्य प्रकाश्यमिथ्यात्वसाधकत्वायोगात् । न च पशुभिर्नृपशुभिश्चाविदितेष्वदृष्टेश्वरादिषु प्रामाणिकैरसत्यत्वमध्यवसीयते; वयं तु तत्राप्यध्यवस्याम इति चेन्न; ब्रह्मण्यपि प्रसङ्गात्; विदितमेवास्माभिरप्यात्मतया ब्रह्मेति चेत्, किमर्थं तर्हि तद्विविदिषया यज्ञदानाद्युपादानम्? शारीरकारम्भश्च? अविदिताकारबोधार्थमिति चेन्न, तस्यैवाकारस्य मिथ्यात्वप्रसङ्गात् । तत्त्वावेदकवाक्यवेद्यस्य च मिथ्यात्वं व्याहतम् । निराकारे च कथं विदिताविदिताकारभेदः? तत्कल्पनयेति चेत्तर्हि कल्पिताकारविविदिषयैव शास्त्राद्यारम्भात् स्वेष्टापप्लवः । न द्वितीयः, ईश्वरस्य नित्यसर्वज्ञतया तदसिद्धेः । प्रकाशप्रकाश्ययोश्च भिन्नायुष्कत्वं युष्माभिरपि दुरपह्नवम्; अनादिसाक्षिचैतन्यविषयभूतानामविद्याव्यतिरिक्तानामनादित्वानङ्गीकारात्, स्वतः-प्रकाशमानत्वाभावाच्च । सत्यत्वनिषेधः पूर्वहेतुविकल्पे दूषितः; परतः प्रकाशोऽपि कारणदोषबाधकप्रत्ययाभावात् प्रति-

ष्ठितप्रामाण्यः । यच्च सत्यं संवित्स्वरूपं सर्वस्मिन् प्रकाशमाने प्रकाशते, न तथा विगीतम्; अतो मिथ्येति ; तदसत्; सर्वसंविदामैक्यस्यास्माभिरनभ्युपगमात्, त्वयाऽपि तस्य दुस्साधत्वाच्च । अन्यथा कथं न सर्वे सर्वज्ञाः? स्वसंविदो गुरुसंविदा प्रतिवादिसंविदा चैक्यं पश्यन् किं तदनुगुणं नाचरसि? भिदुरास्तु संविदः स्ववेद्येतरप्रकाशदशायां न प्रकाशन्त इति न तन्निदर्शनम् । एतेन सत्यं सत् सर्वत्र वेद्ये प्रकाशत इत्यपि दत्तोत्तरम् । प्रतिवित्तिवेद्यानां सतां परस्परव्यावृत्तत्वात् । सत्तारूपस्तु तेषां धर्मो न त्वया सत्यत्वेन स्वीक्रियते, शेषं तु स्वस्थाने भविष्यति । यत्तु देशपरिच्छेदवतां स्वदेशेऽपि निवृत्तिः सेत्स्यतीति, तदपि नश्वरत्वोक्तन्यायेन प्रत्युक्तम् । यदि हि यत्र कचिद्देशे व्यावृत्तिर्हेतुस्स तर्हि स्वदेशासत्त्वं न साधयेत्, तत्सत्त्वे विरोधाभावात् । सार्वत्रिकव्यावृत्तिस्तु साध्यगर्भेति न हेतुः स्यात् । **श्लो.** यन्न कचिन्न कचित्तत्खरशृङ्गादिरीतितः । इति मध्यमशिक्षा च स्वविधिक्षेपखण्डिता ॥ ५१ ॥ **इति व्यावर्तमानत्वानुमानभङ्गः ॥**

197. **यत्स्यात्तत्सर्वदा स्याद्यदपि च न भवेत्तच्च न स्यात् कदाऽपि**
क्वापि व्योमारविन्दादिवदिति यदि न व्याहतेस्साध्यहेत्वोः ।
मध्ये सत्त्वं गृहीत्वा खलु तदुभयतोऽसत्त्वलिङ्गं गृहीतं
सामग्र्या चावधी द्वौ स्फुटतरविदितौ साऽपि तत्तत्प्रवाहात् ॥ ५२ ॥

नश्वरत्वहेतावुक्तदोषमनिर्धारयतः कालपरिच्छेदसामान्यमुखेन मिथ्यात्वशङ्कामङ्कुरन्तीमुज्जिहीर्षुरुद्घाटयति—**यत् स्यादि**ति ॥ विवक्षितस्य हेतोरनादरप्रतिरोधाय प्रथममिहानुग्राहकोक्तिः । यत्कचित्काले स्यात् तत्कालान्तरेऽपि स्यात्; सत्स्वभावत्वे ब्रह्मण इव सामग्रीसहस्रेणाप्यसत्त्वापादनायोगात् । असत्स्वभावत्वे खपुष्पस्येव कालविशेषे सत्त्वापादनासंभवात् । तदिहानुग्राह्याभिप्रायेणाह—**यदपी**ति । अयमत्र प्रयोगः—यत्प्रागूर्ध्वं चासत् तन्मध्येऽप्यसत्; यथा संप्रतिपन्नम्; विमतं च तथात्वान्मिथ्येति । अनयोस्तर्कानुमानयोराभासतामभिप्रेत्याह—**नेति** । तर्के तावत्कालविशेषोपश्लिष्टं सत्त्वं प्रसञ्जनीयम्? उताविवक्षितकालविशेषं सत्त्वमात्रं वा? नाद्यः, स्वस्वरूपस्यैवाभावे स्वकालाभावात् तदवधिककालान्तरासिद्धेः तदुपश्लिष्टप्रसञ्जनीयबोधासंभवेन तत्प्रसङ्गायोगात् । न द्वितीयः, इष्टप्रसङ्गत्वात्, प्रसञ्जकैकदेशस्य प्रसञ्जनीयत्वायोगाच्च । अथ विशिष्टाङ्गीकारे विशेष्याङ्गीकारप्रसङ्गः, तच्च नास्ति बाधादित्याकूतम्; तदपि न; अन्यतो बाधादृष्टेः । एतेन तर्केण बाधमुज्जीव्यैतत्सिद्धेरशक्यसंपादनत्वात् कुतश्चिदसत्त्वस्यासिद्धौ सत्त्वस्य प्रसञ्जनीयत्वायोगाच्चेति भावः । अनुग्राह्याभासत्वे विरोधं हेतूकरोति—**साध्यहेत्वो**रिति । एतत् लक्षणहेत्वोरितिवत् । अत्र हेतुसाध्ययोर्व्याहतिं विवृणोति—**मध्य** इति । अयमाशयः—कालविशेषासत्त्वं ह्यसिद्धं तावन्न लिङ्गं स्यात्, त्वयाऽपि तथाऽनभ्युपगमात् । तत्सिद्धिस्तु स्वकालेऽप्यसत्त्वं क्रोडीकृत्य वा? बहिष्कृत्य वा? पूर्वत्रासिद्धिरंशतस्साध्याविशेषश्च; स्वदेशकालासत्त्वात्मनो मिथ्यात्वस्य प्रचिख्यापयिषितत्वात् । उत्तरत्र स्वकालसत्त्वानुमतिलब्धजीवितेन हेतुना कथं सा प्रतिक्षिप्येत? तत्कालवर्तित्वबुद्ध्यपेक्षया प्रागुत्तरकालपरिक्लृप्तिरिति चेत्, न; नित्ययाऽपि धिया तत्कालवर्तित्वग्रहणोपपत्तेः । अनित्यबुद्ध्यपेक्षया प्रागूर्ध्वसमयसिद्धिरिति चेत्, बुद्धेस्तर्हि स्वकालसत्त्वमेष्टव्यम्, अन्यथा तदवधिकपूर्वोत्तरासिद्धेः । बुद्धिरपि बुद्ध्यधीनसिद्धिः, न तु वस्तुतस्सतीति चेन्न; अनित्यबुद्धिवन्नित्यबुद्धिरपि तथेति प्रसङ्गे निवारकाभावात् । किंचासौ स्वाधीनसिद्धिर्वा स्वेतरबुद्ध्यधीनसिद्धिर्वा? नाद्यः, अनित्यबुद्धेस्त्वया स्वयंप्रकाशतानभ्युपगमात्; अभ्युपगमे

वा नित्यसत्यत्वप्रसक्तेः। न द्वितीयः; अन्यबुद्ध्या तत्स्वरूपसिद्धावनित्यबुद्धेर्नित्यभानप्रसङ्गात्, ईश्वरबुद्धिवत् स्वकालवर्तित्वप्रतिभासे स्वत एव सत्याया अनित्यबुद्धेः कालोपाधित्वप्रसङ्गात्। तत एव तदपेक्षः पूर्वोत्तरकालासत्त्वलिङ्गेन स्वोपजीव्यमध्यकालसत्त्वप्रतिषेधः प्रासादनिगरणप्रयासप्राय इति। अत्र सतोऽसत्त्वमसतस्सत्त्वं च दुस्साधमिति दुरभिमानमुन्मूलयति—**सामग्र्येति**। अपरोक्षप्रमितिसामग्र्येत्यर्थः। यद्वा जनिध्वंससामग्र्योपलक्षितौ पूर्वापरावधी प्रत्येकं समुदायतो वा यथावस्तु प्रत्यक्षसिद्धाविति वाक्यार्थः। तरपा पण्डितपृथुकतिर्थकपर्यन्तदुरपह्नवत्वं सूच्यते। ततश्च निर्बाधस्फुटदृष्टापह्नवे वैभाषिकादिपरिभाषया ब्रह्मणोऽपि कालपरिच्छेदरहितत्वादेव खपुष्पकल्पत्वं प्रसज्यत इति भावः। ननु कालपरिच्छिन्नोत्पत्तिज्ञप्तिसामग्रीसिद्धावेवं वाच्यम्, सैव कुतस्त्येत्यत्राह—**साऽपीति**। सामग्रीस्वरूपप्रवाहस्तद्बोधकप्रवाहश्चानादिरपर्यनुयोज्य इति भावः। **श्लो.** किंचानित्यत्वसत्यत्वे नानित्यं सत्यतां त्यजेत्। तदसत्यत्वपक्षे तु नित्यत्वात्सत्यता भवेत्॥ ५२॥ **इति अनित्यमिथ्या[त्व]क्लृप्तिपरिहारः॥**

198. **आम्नायस्यापि शक्तिर्न खलु गमयितुं स्वोपजीव्यप्रतीपं**
यूपादित्यैक्यवाक्यप्रभृतिरितरथा नोपचारं भजेत।
अक्षाम्नायः स्वपूर्वापरविहतिभयान्नेति नेत्यादिवाक्यं
वैलक्षण्यादिमात्रं प्रथयति भुवनाद्ब्रह्मणो विश्वमूर्तेः॥ ५३॥

माभूदनुमानम्; नित्यनिर्दोषनिगमवाक्यगणैरेव निर्विशेषस्वप्रकाशसच्चिदानन्दब्रह्मव्यतिरिक्तसर्वमिथ्यात्वसिद्धिः स्यादित्यत्राह—**आम्नायस्येति**॥ अयं भावः—प्रत्यक्षमुपजीव्यानुमानस्य, ते उभे उपजीव्य शास्त्रस्य च प्रवृत्तिः, तच्चैते बाधेत, अनुमानेऽपि कालात्ययापदिष्टकथैव न स्यात्; तथा च बाधाभावे कथं दूष्यदूषणव्यवस्थेति कथात्रयोच्छेदः। ननु पदपदार्थादिस्वरूपमात्रं शास्त्रस्य प्रत्यक्षादुपजीव्यम्, अनुपजीव्यं तु तत्सत्यत्वं प्रमाणाभासभासितं शास्त्रेण बाध्येत; मैवम्; न हि जगत्सत्यत्वग्राहिणः प्रमाणाभासत्वमितः पूर्वं सिद्धम्। ततश्च तदाभासत्वसिद्ध्या शास्त्रेण तद्बाधः, तेन च सेति मिथस्संश्रयः स्यात्। अस्त्वाम्नायत्वमेव प्राबल्यकारणमित्यत्रातिप्रसङ्गमाह—**यूपादित्येति**। ननु * आदित्यो यूप इत्यादेराम्नायस्य कर्मविधिशेषतयाऽन्यपरत्वाद् दुर्बलतया प्रत्यक्षानुविधानेन वृत्त्यन्तरस्वीकारः, इह तु तत्त्वावेदकवाक्यस्यातत्परत्वासंभवात् प्रत्यक्षादिबाधकत्वं युज्यते। हन्त, किं क्रियाशेषत्वमेव मन्त्रार्थवादानां स्वार्थप्रहाणकारणम्? तथा सत्यतिप्रसङ्गात्। तावता त्वन्यार्थं स्वार्थबोधनं सिध्येत्। क्वचिच्च स्वार्थप्रहाणं बाधादेव; न त्वन्यशेषत्वात्। तथैव हि लोके वेदे च स्तुत्यादेर्दृष्टिः; अनन्यपरेष्वपि * ब्रह्म वनं ब्रह्म स वृक्ष आसीदित्यादिष्वर्थासंभवे भाक्तो निर्देशः। ननु जगद्ब्रह्मसामानाधिकरण्येऽपि स्वरूपैक्यविरोधात् बाधार्थतयोपचारः स्यात्, तन्न; श्रुतिस्मृतिशताबाधेन संभवन्त्यां गतौ विपरीतलक्षणाङ्गीकारायोगात्। व्याप्तिविशेषापेक्षया च सामानाधिकरण्यं व्यज्यते; *स भूमिं विश्वतो वृत्त्वा, अत्यतिष्ठद्दशाङ्गुलम्, पुरुष एवेदं सर्वम्, * सर्वं समाप्नोषि ततोऽसि सर्वः, * सर्वगत्वादनन्तस्य स एवाहमवस्थितः इत्यादिषु। अत एव * ब्रह्मैवेदं सर्वम्, * आत्मैवेदं सर्वम्, * यत्र त्वस्य सर्वमात्मैवाभूदित्याद्याः सावधारणनिर्देशाश्चाब्रह्मात्मकत्वनिषेधाभिप्रायाः। तथा च * नेह नानाऽस्ति किञ्चनेत्यादिकमपि गतार्थम्। इदं च वाक्यं यदि ब्रह्मणि नानात्वं प्रतिषेधेत्; तदा ब्रह्मैकत्वसिद्धौ का कथा तद्गुणविभूतिनिषेधस्य? अथ भावप्राधान्यानाञ्जस्यं किञ्चनेति पदवैयर्थ्यं च मत्वा नानाभूतं किञ्चन वस्तु ब्रह्मणि नास्तीति युज्येत, तथाऽपि न जगन्निषेधः; ब्रह्मण्यविद्यमानानामपक्षयविनाशरूप-

वर्णादीनामिव स्वाधारेषु निराधारतया वा वृत्त्युपपत्तेः । बहुव्यापिनि सर्वाधारतया चाधिगते ब्रह्मणि * नास्ति किञ्च-नेति निषेधात् तन्मिथ्यात्वे तात्पर्यं गम्यत इति चेत्, तथा सति नेदं किञ्चनास्तीत्येतावद्वक्तव्यम् । अधिकरणोक्ति-स्त्वजागलस्तनायेत । अथ प्रपञ्चे नानात्वं नास्ति नानाभूतं नास्तीति वा प्रतिपाद्येत, तथाऽपि न प्रपञ्चस्वरूपबाधः, तन्नानात्वनिषेधे वाक्यप्रवृत्तेः । तत्र दृष्टश्रुतविरोधपरिहृत्यै विश्वस्य ब्रह्मात्मकत्वादिसाधर्म्यविधौ वा जडपण्डितशत्रुमित्रादि-वैधर्म्यदृष्टिनिषेधे वा तात्पर्यं स्थापनीयम् । इयं च गतिः * एकधैवानुद्रष्टव्यः * विद्याविनयसंपन्ने, * सुहृन्मित्रार्युदासीने-त्यादिभिरनुगृह्यते । अत ईदृशेषु सर्वेषु वाक्येष्वेवं सर्वाविरुद्धः कश्चिदर्थस्समर्थनीय इत्यभिप्रायेण * अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्तीति वाक्यं तावदविरुद्धार्थविषयं साधयति—**अक्षे**ति । प्रत्यक्षग्रहणमनुमानस्या-प्युपलक्षणम् । आम्नायशब्दः इह श्रुत्यन्तरपरः । अत्र * द्वे वा व ब्रह्मणो रूपे मूर्तं चामूर्तमेव चेत्यादि पूर्ववाक्यम् । * अथ नामधेयं सत्यस्य सत्यमित्यादि पश्चिमम् ; तदिह प्रत्यक्षानुमानश्रुत्यन्तरपूर्वापरविरोधभीत्या मध्यमं * नेति नेती-त्यादिवाक्यं ब्रह्मगुणविभूतिविग्रहाद्यबाधेन ब्रह्मण्येवानुक्तातिशयान्तरपरं नेतव्यम् । ततश्च लोकदृष्टप्रकारवैलक्षण्यार्थमिह केचिदाहुः । अन्ये तु इति नेति व्यवहारेणेतोऽधिकं किञ्चिदस्तीति निर्देष्टव्यं नास्तीति । प्रकृतैतावत्त्वसूत्रभाष्योक्त-मिहादिशब्दसंगृहीतं ब्रूमः । पूर्वप्रदर्शितप्रकारमात्रयोगाद् ब्रह्मणः प्रकृतमेतावत्त्वं * नेति नेतीत्यादिवाक्यं प्रतिषेधतीति । ब्रह्मणो विश्वमूर्तेरिति पदाभ्यां धर्मिग्राहकप्रसिद्धगुणविभूत्यादिप्रकर्षः प्रख्याप्यते ॥ ५३ ॥ **इति निषेधश्रुतीनां प्रत्यक्षादिविरुद्धप्रतिपादकत्वानुपपत्तिः ॥**

199. **प्रत्यक्षेणैव पुंसां भवति दृढतरो देह एवात्ममोहो**
ज्वालैक्यप्रत्यभिज्ञाद्युभयमपि च तद्बाध्यते ह्यागमाद्यैः ।
तस्मादक्षादिसिद्धं श्रुतिभिरपि जगद्बाध्यतामित्ययुक्तं
सन्देहार्हेषु शक्तं यदिह न खलु तद्दोषदूरेष्वपि स्यात् ॥ ५४ ॥

ननु प्रत्यक्षस्य प्रत्यक्षान्तरेणेव परोक्षेणापि बाधस्तत्रतत्र संमतः, तद्वदिहापि स्यादिति शङ्कते—**प्रत्यक्षेणे**ति ॥ अस्ति हि मनुष्यत्वस्थूलत्वादिविशिष्टे पिण्डे तिरश्चामिव विपश्चितामप्यात्मत्वाभिमानः ; तत्र चामोक्षादसमाहितदशायां जाग्रतः स्वपतो वा दर्पणतलदत्तदृष्टेरिव सामग्रीसामर्थ्यादनिच्छतोऽपि देहविभ्रमे बाधितानुवृत्तिरित्यभिप्रायेण दृढतर-शब्दः । अस्य ज्वालैक्यप्रत्यभिज्ञायां विपरिणतानुषक्तिः ; अपिः प्रत्यक्षस्य बाध्यत्वसंभावनार्थः ; चकारश्चन्द्रसूर्यपरि-माणाल्पत्वादिभ्रमाकारसंग्रहार्थः । आगमाद्यैरित्यनेनानुमानवत्परेष्टमर्थापत्त्यादिकमपि गृह्यते । अत्र देहात्मबोधस्यानु-मानागमाभ्यां ज्वालैक्यग्रहस्य चानुमानेन बाधः । एवं निदर्शितमर्थं प्रकृते निवेशयति—**तस्मा**दिति । विषमो दृष्टान्त इत्यभिप्रायेणाह—**इत्ययुक्त**मिति । **सन्देहार्हेष्वि**ति । अयं भावः—क्षेत्रभूषणादिनयात् मम देह इति व्यतिरेकप्रत्यय-स्तावद् दुरपह्नवः । ममात्मेत्येतत्तु घटस्यात्मेतिवत् स्वरूपपरमिति सर्वसंमतम् । वीतरागजन्मादर्शनादिभिश्च देहात्मभेद-स्संभाव्यते । अतस्तप्तायःपिण्डादिन्यायात् भ्रमहेतुसंसर्गविशेषवति द्रव्यद्वये स्थौल्यचैतन्यादिगुणव्यतिहारधीः स्यादिति शङ्काकलङ्कितस्तत्तद्देहात्मबोधस्सर्वेषां सर्वदा संभवन्नपि नित्यनिर्दोषनिगमजन्यधिया न्यक्कारमर्हति । ज्वालैक्यधीरप्य-दृष्टनिर्वापणस्य पुनरारोपितदीपेऽपि संभवात् सादृश्यसादेश्यभेदाग्रहादिप्रसूतेति लैङ्गिक्या धिया नियम्येत । चन्द्रसूर्य-परिमाणाल्पत्वादिबोधेष्वपि दूरत्वादिदोषसंप्रतिपत्त्याऽनन्यथासिद्धानुमानागमसिद्धया बुद्ध्या बाधः साधीयान् । इह तु

तत्तत्प्रमाणदोषत्वेन संभावितानां सर्वेषामसिद्धेर्न शास्त्रबाध्यत्वं संभाव्यमिति ॥ ५४ ॥ **इति परोक्षबाध्यत्वयोग्यायोग्यप्रत्यक्षविभागः ॥**

200. **प्रत्यक्षं दोषमूलं श्रुतिरिह न तथा पौरुषेयत्वहाने-**
स्तस्मात्सा बाधिकाऽस्येत्यसदखिलधियामन्ततो दोषसाम्यात् ।
शास्त्रस्यापि ह्यविद्याप्रभृतिभिरुदयस्संमतस्त्वन्मतस्थै-
स्तस्यानाविद्यभावे न हि निखिलभिदापह्नवश्शक्यशङ्कः ॥ ५५ ॥

पुनः प्रत्यक्षादेर्निर्दोषत्वमसिद्धमिति शङ्कते—**प्रत्यक्ष**मिति ॥ अयं भावः—विगीतं प्रत्यक्षं दोषमूलं प्रत्यक्षत्वात् द्विचन्द्रादिप्रत्यक्षवत् । अत एव तन्मूलस्यानुमानस्यापि दोषमूलत्वं सिद्धम् । श्रुतिस्तु न तथा; सर्वेषु कल्पेषु एकरूपतयैव श्रूयमाणतया पौरुषेयत्वासंभवे वक्तृदोषप्रसङ्गाभावात्, इह च तद्द्वये ब्रह्मणि भेदनिषेधे वाऽनन्यगोचरत्वेन तात्पर्यस्थापनात् । अतस्सा श्रुतिरस्य प्रत्यक्षस्य बाधिकेति । तदेतत् प्रत्याचष्टे—**इत्यसदि**ति । स्वव्याघातादिदोषादिति भावः । अभिप्रेतं विवृणोति—**अखिलधिया**मिति । अयं समाधिः—प्रत्यक्षत्वादिति स्वप्रकाशप्रत्यक्षेऽपि वृत्तेरनैकान्तिकम् । अथानित्यप्रत्यक्षत्वादिति विशेष्येत, तथाऽपि स्वाभीष्टध्यानजन्ये शब्दजन्ये वा परब्रह्मप्रत्यक्षे तद्वृत्तिस्सिद्धा । तत्रापि दोषमूलत्वाभ्युपगमे कथं तत्त्वसाक्षात्कारसिद्धिः? दोषमूलादपि तत्सिद्धावतिप्रसङ्गः । दुष्टप्रत्यक्षमूलतया चानुमानस्यापि बाध्यत्वं दुर्वचं स्यात् । यदि च प्रत्यक्षत्वमात्रेण पृथिव्यादिस्वरूपप्रत्यक्षस्य दोषमूलत्वम्, बोधकत्वादेव ब्रह्माद्वैतवाक्यानामपि किं नैतत्स्यात्? वाक्यदोषत्वेन संप्रतिपन्नं किञ्चित्तत्र न दृश्यत इति चेत्; समानमेतद्भिमतेऽपि प्रत्यक्षे; अतिरिक्तदोषानुमानस्य तु वाक्येऽपि कः प्रत्यूहः? भेदवासनाख्यो दोषः प्रत्यक्षे प्रसिद्ध इति चेन्न । शब्देऽपि तस्यास्तद्वत् प्रसिद्धत्वात् । न ह्यत्र प्रकृतिप्रत्ययपदवाक्यपदार्थवाक्यार्थादिविकल्पान् वासनानपेक्षानभिमन्यध्वे । न च द्विचन्द्रादिवासनानां वासनात्वादेव दोषत्वम्; किंतु भ्रान्तिमूलत्वात् । अतोऽभिन्नेष्वेव भेदवासना दोषः, अयथार्थस्मृतिहेतुत्वात् । अन्यथा ह्यद्वैतवासनाया अपि दोषत्वप्रसक्तिः । प्रत्यक्षे तु वासना भ्रान्तिप्रसूतैवेति चेत्; न, वासनाया दोषत्वसिद्धौ तद्धेतोरनुभवस्य भ्रान्तित्वसिद्धिः; ततश्च तत्सिद्धिरिति मिथस्संश्रयात् । एतेन भेदधीजनकत्वाद्वासनाया दोषत्वमित्यपि प्रत्युक्तम्; पृथिव्यादिभेदधियां भ्रान्तित्वसिद्धौ तज्जनकवासनाया दोषत्वम्, ततश्च तदिति । तत्त्वावेदकवाक्यबाधितत्वात् भेदधियां भ्रान्तित्वे सिद्धे ततस्तद्धेतोर्दोषत्वक्लृप्तौ नान्योन्याश्रय इति चेन्न; प्रत्यक्षस्य वासनाख्यदोषमूलत्वे सिद्धे वाक्यस्य तद्विरुद्धतत्त्वावेदकत्वम्; ततश्च भेदधियां भ्रान्तित्वम्; तत एव तद्धेतुवासनाया दोषत्वम्; ततः प्रत्यक्षस्य दोषमूलत्वमिति चक्रकापत्तेः; पर्वसंकोचेन मिथस्संश्रयो वा । प्रत्यक्षं सर्वं भेदवासनामूलमित्यपि निर्विकल्पके दुर्वचम्; तस्य त्वयापि संस्कारजन्यत्वानभ्युपगमात् । अस्ति च शब्दानुगमवादिनामप्यवासनाधीनं प्रथमाक्षसन्निपातजं प्रत्यक्षम्; तत्कल्पितयोश्शब्दविवर्तपरिणत्योस्संस्कारापेक्षप्रकाशत्वात् । अस्तु सर्वजननी मायैव निर्विकल्पके दोष इति चेन्न; वाक्यतज्जन्यज्ञानयोरपि तदपत्यभेदत्वादिति । तदिदमाह—**शास्त्रस्यापी**ति । प्रभृतिशब्देन भेदवासनां तन्मूलभेदभ्रमं च गृह्णाति । अतः प्रत्यक्षमात्रस्य दोषमूलत्वकल्पना निर्दोषज्ञप्तिसद्भावं न सहेतेति निश्चिनुमः । अथ शास्त्रस्य ब्रह्मवदविद्यावचानादित्वादविद्यामूलत्वं नास्तीति मुग्धाद्वैतिमतमनूद्य दूषयति—**तस्ये**ति । तत्र शास्त्रस्यादोषकल्पितानादिभावत्वात् ब्रह्मवदविद्यातद्विवर्तान्यतया च सत्यत्वप्रसक्तौ स्वाभिमतमद्वैतं भज्येतेति भावः ॥ ५५ ॥ **इति शास्त्रप्रत्यक्षयोर्दोषसाम्यापादनम् ॥**

201. दोषोत्थत्वाविशेषे न हि भवति परं पूर्वबाधप्रगल्भं
दोषज्ञानं तु माभूदविदुषि पुरुषे वस्तुतस्त्वन्यथा तत् ।
निर्दोषत्वाभिमन्तृस्वसमयिमतिभिः किं न मिथ्याकृतान्ताः
प्रा[बल्यं]गल्भ्यं चेन्निषेधः पर इति मुखरं तुर्यबौद्धस्य तूर्यम् ॥ ५६ ॥

अत्र कैश्चिदनाकलिततर्कतन्त्रगतिभिः प्रपञ्चलुण्टाकैरेवं प्रत्यवस्थितम्—दोषमूलत्वाविशेषेऽपि परत्वादद्वैतवाक्यजन्यं ज्ञानं प्रत्यक्षस्य बाधकम्; *पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि सेत्स्यतीति न्यायात्; न चाविशेषः परस्य बाधकत्वं प्रतिरुन्ध्यात्, प्रमाणत्वाविशेषेऽप्युद्गातृप्रतिहर्त्रपच्छेदयोर्युगपदुभयसंभवे परस्य नैमित्तिकशास्त्रस्य बाधकत्वस्थापनात्; अपैति च रज्जुसर्पभीतिः कस्यचिदनाप्तवाक्येनापि; अतश्शास्त्रतः प्रत्यक्षबाधश्शक्य इति, तत्प्रतिक्षिपति—**दोषोत्थत्वेति** ॥ अयं भावः—न हि सर्पभूदलनभ्रमयोरुपरितनस्य बलीयस्त्वमुत्पादयितुं शक्यम् । अनाप्तवाक्यबाधिते रज्जुसर्पे तदनाप्तत्वपरामर्शिनस्तद्भयं पुनरनुषज्यते । इह त्वादावेव दोषमूलत्वाविशेषश्शिक्षितः प्रतिसंहितश्चेति न परबलीयस्त्वभावनावकाश इति । दोषपरामर्शाभावमन्वारुह्यापि दूषयति—**दोषज्ञान**मिति । तुः वैपरीत्यद्योतकः । **वस्तुतस्त्विति** । अत्र तुः विदुषि तद्धीसंभवद्योतनार्थः । दोष एव ह्ययथार्थधीहेतुः; तज्ज्ञानं तु तद्वि[स्रम्भ]भ्रमनिवर्तकम् । दुष्टस्यापि बोधस्य दोषपरामर्शाभावमात्रात् वस्तुस्थितिवैपरीत्यव्यवस्थापकत्वेऽतिप्रसङ्गमाह—**निर्दोषत्वेति** । सर्वे हि वादिनः स्वसिद्धान्तस्थापकं निर्दोषमभिमन्यन्ते । नच तत्तथ्यम्; नच तथातथा भिद्येत वस्तुगतिः व्याघातात् । तदिह स्वपक्षस्थापकदोषानाकलनमात्रेण बाह्यसिद्धान्ता विपश्चिद्भिर्विदितदोषाः किं न मिथ्या भवन्ति? तद्वदिहापि बाधकदोषस्य सतः परामर्शे अन्यथाऽपि वा बाध्यबाधकभावो दुर्धर्षण इति भावः । अनन्यगतिकापच्छेदन्यायदर्शनमात्रेण तुल्यस्यापि परस्य प्राबल्ये सर्वबाधकमाध्यमिकविजयतूर्यं जोघुष्येतेत्याह—**प्राबल्य**मिति । निषेधः पर इत्येतावता तस्य प्राबल्यं चेदित्यन्वयः ॥५६॥

इति दोषसाम्ये परस्य बाधकत्वानुपपत्तिः ॥

202. निर्दोषं यच्च शास्त्रं तदपि बहुविधं बोधयत्येव भेदं
वाक्ये तत्त्वोपदेशप्रकरणपठिते नान्यपर्यं प्रतीमः ।
नात्रापच्छेदनीतिर्नियतिमति सदोपक्रमन्यायसिद्धेः
स्वप्रख्याप्यापलापे श्रुतिरपि वृषलोद्वाहमन्त्रायते वः ॥ ५७ ॥

असंभावितदोषादौपनिषदवाक्यादद्वैतज्ञानं सिध्यतीति परोक्ते प्रतिबन्दिं प्रस्तुवान इव स्वपक्षमपि स्थापयति—**निर्दोष**मिति ॥ बहुविधं भेदम्—आधाराधेयभावादिभिरीशेशितव्यभेदम्, भोक्तृभोग्यनियन्तृभावैस्तत्त्वत्रयभेदम्, अणुत्वविभुत्वादिभिर्जीवेश्वरभेदम्, बद्धमुक्तनित्यतदवान्तरविभागैर्जीवभेदम्, एतेषु च कालभेदेन तत्तदवस्थाभेदं चेत्यर्थः । प्रतिषेधगन्धिना त्वयाऽपि प्रतिषेध्यधीर्दुरपलपेत्येवकाराभिप्रायः । प्रस्तुतभेदवाक्यान्यन्यपरत्वान्न भेदं विदधतीत्यत्राह—**वाक्य** इति । नहि सद्विद्यादिषु कर्मविधयः उपासनविधयो वा संनिदधतीति त्वयाऽपि संप्रधार्यते । सन्ति च तत्रापि *अहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीत्यादीनि तत्तद्द्रव्यस्वरूपव्यापारादिविविधभेदविषयाणि वाक्यानि । अतोऽनन्यपरनिर्दोषवाक्यसिद्धत्वादद्वैतवद्द्वैतमपि दुर्निषेधमित्यभिप्रायः । ननु प्रतिषेधस्य प्रसक्तिसापेक्षत्वात् भेदप्रसञ्जकवाक्यं पूर्वं तन्निषेधकं तु परत्वेनापच्छेदनयात्तद्बाधकं स्यादित्यत्राह—**नात्रेति** । अत्रेत्यनेनाभिप्रेतं

हेतुमाह—**नियतिमती**ति । अयं भावः—अनियतपौर्वापर्ये ह्यपच्छेदनयः, नियमे तूपक्रमनयात् परानुत्पत्तिरेवेति नीतिविदः । इह च त्वयैव प्रसञ्जकप्रतिषेधकयोः पौर्वापर्यनियमः स्थापितः; अतः परस्यैव दौर्बल्यं प्रत्येतव्यमिति । अनुष्ठाने त्वस्य न्यायस्यानन्यथाभावमभिप्रेत्य सदाशब्दः । ननु लोकसिद्धान् भेदांस्तावत्प्रसिद्धत्वादनुवदति, अलौकिकानपि प्रतिषेधार्थमेवोपदिश्य प्रतिषेधतीति परप्राबल्यं दुर्वारम्, तत्राह—**स्वप्रख्याप्ये**ति । अप्रख्यातस्य प्रख्यापनाद्वरं तत्र तूष्णींभावः । न हि भ्रमनिवर्तनाय प्रवृत्तं शास्त्रं भ्रमान्तरमुत्पादयतीति त्वदन्यः प्रतिपद्येत । तदिह श्रुतिः प्रत्यक्षाद्यनवगतान् भेदान् स्वयं विधत्ते प्रतिषेधति चेति वृषलविवाहमन्त्रवद्व्याघात एव परिशिष्यते इति भावः । एतेन सगुणनिर्गुणश्रुत्योरपि परप्राबल्यवर्णनं निरस्तम् ॥ ५७ ॥ **इति भेदतन्निषेधश्रुत्योरपच्छेदन्यायानर्हत्वम् ॥**

203. **भेदः प्रत्यक्षसिद्धो न निगमविषयः स्यादिति त्वर्भकोक्तिः**
प्रख्यातादन्यमेनं प्रथयति यदसौ त्वन्मताद्वैतवन्नः ।
सन्मात्रग्राहि चाक्षं नियमयसि ततो ब्रह्म दृश्यं मृषा स्यात्
किं ते श्रुत्या तदानीं फलमपि लभतां क्वापशूद्राधिकारः ॥ ५८ ॥

एवमपि मुग्धान् प्रति मुग्धैरुपादेशि । भेदस्तावद् भूतभौतिकादिष्वासंसारं प्रसिद्धः; अतीन्द्रियनिष्ठोऽप्यसौ सामान्यतः प्रत्यक्ष एव; अन्यथा भेदसामान्यप्रयुक्तभेदशब्दवाच्यत्वादिव्याप्तिग्रहणायोगात् । व्याप्तिग्रहणरूपं हि प्रत्यक्षमदृष्टसकलव्यक्तिगोचरमिति धूमानुमानादिष्वपि समर्थयन्ते । सावयवत्वानित्यत्वव्याप्तिग्रहणमतीन्द्रियसावयवपक्षीकारेण शिक्षयन्ति । तदिह भेदमात्रस्य प्रत्यक्षविषयत्वादप्राप्तप्रापकस्वभावशास्त्रगोचरत्वं न संभवतीति । एतदनुभाष्योपालभते—**भेद** इति ॥ तुः सर्वशास्त्रनिर्विषयत्वप्रसञ्जावहत्वं द्योतयति । प्रायेण हि तवापि यत्किंचिद्भेदविषयं सर्वं शास्त्रम्; अन्ततः प्रतिपन्नादन्यदेव हि सर्वशास्त्रे प्रख्याप्यम् । तद्यदि यस्यकस्यचिद्भेदान्तरस्य प्रत्यक्षतया सामान्यतः सर्वभेदग्रहणात् शास्त्रस्य विषयलोपः स्यात्, लुप्येत तर्हि सकललौकिकवैदिकशास्त्रविषयः । व्याकरणादिव्युत्पत्तिलोपादद्वैतशास्त्रमप्यशक्यारम्भं स्यात् । अतो भेदस्य शास्त्रविषयत्वं निराचिकीर्षता सिषाधयिषितस्याभेदस्यापि तन्निराकृतमेवेति । अथ सर्वशास्त्रे प्रतिपत्तॄणामन्यप्रतिपन्नादन्यद्विशेषतः प्रतिपित्सार्हं प्रतिपाद्यमिति पश्यसि, तदा [अस्] मन्मतेऽपि लोकप्रसिद्धगजतुरगनीलपीतादिभेदातिरिक्तः परावरादिभेद उपनिषद्घोषणीयः । तदिदमाह—**प्रख्याता**दिति । असावित्यौचित्यान्निगमः परामृश्यते । त्वन्मताद्वैतवदिति प्रतिबन्दिपरम् । तथा हि—यदि भेदमात्रस्य प्रसिद्धत्वादलौकिकभेदोऽपि शास्त्रविषयो न स्यात्, अभेदमात्रस्यापि प्रतिवस्तु सर्वलोकप्रसिद्धत्वात् त्वदभिमतमद्वैतमपि तदविषयः स्यात् । यदि प्रसिद्धविलक्षणमद्वैतं तत्प्रतिपाद्यं पश्यसि, भेदेऽपि तादृशे तथैव दीयतां दृष्टिरिति । प्रत्यक्षविषयत्वादेव शास्त्राविषयत्वे परस्य सिद्धान्तविरोधमपि सूचयति—**सन्मात्रे**ति । भेदस्य भ्रान्तिविषयत्वं सन्मात्रस्य प्रत्यक्षविषयत्वं च त्वया स्थाप्यते । अतस्तस्यापि शास्त्रविषयत्वं त्वया दुस्साधमिति भावः । अस्तु सन्मात्रमनागमविषयः, भेदनिषेधमात्रे त्रय्यन्ततात्पर्यात्; सन्मात्रं तु प्रत्यक्षत एव सिध्यतीति, तत्राह—**तत** इति । यदि प्रत्यक्षत एव ब्रह्मणस्सिद्धिः, तदा दृश्यत्वसामान्यसंगृहीतया युष्मत्पदव्या मिथ्यात्वं दुस्तरं स्यादिति भावः । अन्यमपि सिद्धान्तविरोधमाह—**किमि**ति । प्रत्यक्षत एव ब्रह्मस्वरूपसिद्धौ तद्विभूतिगुणादेश्च मिथ्यात्वादनुपदेष्टव्यत्वे भेदनिषेधस्य च माध्यमिकोपदिष्टैरेव तर्कैस्सिद्धौ शारीरकविचारार्थिनः श्रुतिसाध्यं न किंचित्स्यादित्यर्थः । ब्रह्मविद्यायां शूद्राधिकारप्रतिषेधोऽपि दुश्शक इत्याह—**फल**मिति ।

ब्रह्मणस्त्र्य्यन्तवेद्यत्वे सिद्धे ह्यनधीतश्रुतीनां शूद्रादीनां ब्रह्मविद्यायामनधिकारस्सिध्येत्; प्रत्यक्षवेद्यत्वे तु त्रैवर्णिकाविशिष्ट-शूद्रोऽनधिकारी न स्यादिति भावः ॥ ५८ ॥ इति अलौकिकभेदस्य शास्त्रवेद्यत्वोपपत्तिः ॥

204. वेदा बुद्धागमाश्च स्वयमपि हि मृषा मानता चैवमेषां
बोद्धा बुद्धिः फलं च स्थिरतदितरताद्यन्तरालं च बुद्धेः ।
आतस्त्रैविद्यडिम्भान् ग्रसितुमुपनिषद्वारबाणोपगूढैः
प्रायः प्रच्छादिता स्वा पटुभिरसुरता पौण्ड्रकाद्वैतनिष्ठैः ॥ ५९ ॥

ये चैते प्रमाणप्रमेयादिभेदान् भ्रान्तिसिद्धान् साधयन्ति, तेषां योगाचारादिसमयमनास्थाय त्र्य्यन्तवादाश्रयणं बालप्रलोभनार्थमित्यभिप्रायेणाह—**वेदा इति** ॥ स्वयं—स्वरूपतः । अपिना व्यापारानुग्राहकयोस्संग्रहः । मानता—प्रामाण्यम् । एवं—मृषा । एषाम्—उभयेषाम् । स्थिराभावादेव सौगतानां बोद्धा मिथ्याभूतः; स्थिरसद्भावेऽप्यद्वैतिनामात्मनोऽनुभूतिमात्ररूपत्वेनाबोद्धृत्वात् तदाश्रयतया भातस्याहमर्थस्याविद्याविवर्तत्वाच्च बोद्धुर्मिथ्यात्वं सिद्धम् । बुद्धिरपि सर्वा माध्यमिकस्य मिथ्या; मायावादिनस्तु शास्त्रसाध्या; साध्यत्वादेव सत्यव्यतिरिक्ता । अपि च अनेनोक्तं बुद्धिस्थैर्यं निर्विशेषत्वविरोधात् काल्पनिकम्; योगाचारोक्तं क्षणिकत्वमपि तथैव, क्षणिकधियां ग्राह्यग्राहकस्वगतविशेषस्य मिथ्यात्वाभ्युपगमात् । फलं—व्याहारो हानोपादानादि च । एवं सर्वतस्साम्ये कुदृष्टीनामन्यतरपरिग्रहनियतौ निदानमुत्प्रेक्षमाण इवोपालभते—**आत** इति । शेषमतिरोहिततात्पर्यम् । एवमिह **यादवप्रकाशीय**संग्रहः—* वेदोऽनृतो बुद्धकृतागमोऽनृतः प्रामाण्यमेतस्य च तस्य चानृतम् । बोद्धाऽनृतो बुद्धिफले तथाऽनृते यूयं च बौद्धाश्च समानसंसदः ॥ इति ॥ ५९ ॥ **इति प्रपञ्चमिथ्यात्ववादिनां सौगतसाम्यापादनम् ॥**

205. त्वन्निष्ठासिद्ध्यसिद्ध्योः परमतनियतिस्सिद्धिमेवाधिरूढा
वेदस्यामानतायां त्वदभिमतहतिर्मानतायां च तद्वत् ।
साध्याऽसाध्याऽपि मुक्तिस्त्वदुपगमहता तत्समं चान्यदित्थं
रक्षोभ्यः प्रेषितोऽयं रघुपतिविशिखो राहुमीमांसकेभ्यः ॥ ६० ॥

अथास्मिन् पश्यतोहराणां पक्षे विकल्पदौःस्थ्यं विविधमुदाहरति—**त्वन्निष्ठेति** ॥ नितिष्ठत्यस्मिन् परीक्षेति निर्णयोऽत्र निष्ठा; तद्विषय एव वा राद्धान्तः । याऽसौ त्वन्निष्ठा सा असिद्धा भ्रान्तिसिद्धा वा; तर्हि तद्विपरीता परेषां निष्ठैव प्रमितिसिद्धिमधिरोहेत् । अथ प्रमितिसिद्धा, प्रमितिरसौ चेद् व्यवहारिकी वा पारमार्थिकी वा ? न प्रथमः दत्तोत्तरत्वात् । तादृश्या तया परमतान्यपि किं न सिध्येयुः ? असदुक्तबाधकैरिति चेत्, तदुक्तबाधकैस्त्वन्मतमपि न सिध्येत् । ते बाधकाभासा इति चेत्, त्वदुक्ता अपि तथैवेत्यन्ततस्त्वमेव ब्रूषे । स्वव्याघातादिदोषस्त्वधिकः । तदिदं संजगृहुः—* स्वशास्त्रनिर्णये सिद्धे सिद्धाः स्युर्लोकनिर्णयाः । स्वशास्त्रनिर्णयेऽसिद्धे सिद्धाः स्युर्लोकनिर्णयाः ॥ अपि च वेदाः प्रमाणमप्रमाणं वा ? अप्रमाणत्वे कथं ततस्तद्विषयसिद्धिः ? अन्यथा बाह्यागमैरपि तत्तद्विषयाः किं न सिध्येयुः ? कथं तर्ह्यप्रमाणात् भयविस्मयादिसिद्धिः ? इत्थम्—न हि वयमप्रमाणस्य स्वानुरूपार्थक्रियाकारित्वं नेति ब्रूमः; किंतु न ततस्तद्विषयसत्यत्वस्थापनं सिध्येदिति । प्रमाणत्वं तु तस्य सत्यमसत्यं वा ? ब्रह्मणः स्वरूपभूतमन्यद्वा ? नाद्यः, ब्रह्मणश्शब्दधर्मत्वायोगात् । न द्वितीयः, सदद्वैतव्याघातात् । असत्यत्वे तु वृत्तमेवोत्तरम् । मुक्तिश्च ब्रह्मण उपायसाध्या? उत स्वरूपत्वा-

दसाध्या वा? आद्ये भावरूपा अभावरूपा वा? पूर्वत्राद्वैतभङ्गः। उत्तरत्र सत्यमिथ्याप्रतियोगिकत्वविकल्पे प्राच्योऽप-सिद्धान्तहतः; पश्चिमस्तु प्रध्वंसमिथ्यात्वमपि स्थापयेदेव। अलब्धस्वरूपस्य हि प्रध्वंसोऽपि स्वरूपं न लभेत। एवं स्वयंप्रकाशत्वादिषु स्वतस्सिद्धत्वान्यतस्सिद्धत्वादिविकल्पदौःस्थ्यं दुस्तरमित्याह—**तत्सम चान्य**दिति। उक्तानुक्ततर्काणां [अ]मोघत्वं व्यञ्जयन्निगमयति—**इत्थ**मिति। रक्षोभ्य इत्यनेन स्वव्याघातकमायाप्रवर्तकत्वं व्यज्यते। रघुपतिविशिखः—तद्वत् सर्वत्राप्रतिहत इति तात्पर्यम्। राहुमीमांसकशब्देन सशिरस्कवेदनिर्णयप्रवृत्तमीमांसाशास्त्रशरीरेऽपि शकलितशिरो-मात्रसंग्रहीतृत्वं सूच्यते ॥ ६० ॥ **इति प्रपञ्चमिथ्यात्ववादिनां बाधकविकल्पोदाहरणम्** ॥

206. **शुद्धस्याशुद्धसृष्टिक्रम इति कथितश्शुद्धसत्त्वे तु तत्त्वे**
स्थानं नित्यं श्रुतं तत्स्मृतमपि कलया तत्र देहाद्यवस्थाः।
सृष्टेः प्रागेकमेवेत्यपि निगमवचस्त्वक्ष्यमाणव्यपेक्षं
नो चेत्स्वाभीष्टमायोपधिमुखविलये स्वस्ति विश्वप्रसूत्यै ॥ ६१ ॥

एवं प्रसक्तानुप्रसक्तिं परिसमाप्य परमप्रकृतसृष्टिविशेषोक्तिं संगमयन् प्रकरणारम्भोद्दिष्टलक्षितनित्यविभूतिपरीक्षां परिमितनिरूप्यत्वादौचित्याच्च प्रधानप्राप्यप्रापकभूतपरतत्त्वनिरूपणानन्तरं निवेशयति—**शुद्धस्ये**ति॥ शुद्धस्येत्यनुकथन-मशुद्धद्रव्यानुप्रवेशात् तत्सृष्ट्यादिभिश्च स्वतन्त्रस्याप्यशुद्धिशङ्कामपनयति। अशुद्धसृष्टिक्रमः कथित इत्यत्र शुद्धसृष्टि-क्रमस्तु वक्तव्य इति शेषः। शुद्धसत्त्वे तु तत्त्व इत्यनुवादेन तद्ग्राहकप्रमाणमपि सूच्यते। तस्याप्राकृतत्वस्थापकमाह—**स्थान**मिति। श्रूयते हि * तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः इति। तदिदं सदापश्यत्सूरिविशिष्टस्थानविधानार्थ-मिति **वेदार्थसंग्रहे** स्थापितम्। एवम् * आदित्यवर्णं तमसः परस्तात् * क्षयन्तमस्य रजसः पराके इत्यादि। **शाट्या-यनिन**श्च एवमामनन्ति * सहस्रस्थूणे विमिते दृढ उग्रे यत्र देवानामधिदेव आस्ते इति। **कौषीतकिनां** पर्यङ्कविद्या चात्र पठितव्या। सर्वमेतत् संक्षिप्तं **षडर्थसंक्षेपे** * व्यतिरेकाधिकरणनिवासशब्दैरिति। * तद्विप्रासो विपन्यवो जागृवांस-स्समिन्धते, विष्णोर्यत्परमं पदमित्यादिप्रसिद्धिसूचनार्थस्तच्छब्दः। अस्यार्थस्योपबृंहणप्रतिष्ठितत्वमाह—**स्मृतमपी**ति। यथोक्त**मुत्तरश्रीरामायणे**—* तं चा[यद्वा]काशं सनातनमिति। **महाभारते** च *दिव्यं स्थानमजरं चाप्रमेयमिति। भगव-च्छास्त्रसंहितासु च विस्तरस्सिद्धः। ननु * अक्षरे परमे व्योमन्नित्यव्यक्ततमसोरन्तरालेऽधीतस्त्रिगुणपरिणतिविशेष ईश्वरस्य मुक्तानां च भोगस्थानतयाऽऽम्नायत इति **यादवप्रकाशो**क्तं युक्तम्, अक्षरशब्दप्रत्यभिज्ञानस्यात्र बाधकाभावात्, शुद्ध-सत्त्वव्यपदेशस्य रजस्तमसोरभिभूततयोपपत्तेः, अप्राकृतस्थानक्लृप्तौ च गौरवात्, तत्रापि पृथिव्यादिभेदाभ्युपगमेन प्राकृतत्वं प्रज्ञायत इति। अत्र ब्रूमः—अक्षरशब्दप्रत्यभिज्ञामात्रं त्वतिप्रसञ्जकम्। अस्ति चात्र * परमे व्योमन्निति समभिव्याहारो बाधकः; न हि तमोनन्तरस्याक्षरस्य व्योमत्वम्; उपचारस्तु गत्यभावे। अस्मत्पक्षे त्वक्षरपरमविशेषणाभ्यां प्रसिद्धव्योम-वैलक्षण्यं युक्तम्। नच स्थानान्तरादिस्वीकारे गौरवं, यथाश्रुतमात्रसंग्रहणात्। पृथिव्यादिभेदस्तु शब्दादिगुणतारतम्य-सारूप्यात्; युष्मदिष्टाक्षरस्थाने च प्रकृत्यामिव पृथिव्यादीनामसन्निधानात्। न च तत्त्वसंख्याधिक्यप्रसङ्गो दोषः, कालवदेव पृथक्कृत्वोपपत्तेः; * तं षड्विंशकमित्याहुः सप्तविंशमथापरे इत्यधिकसंख्याम्नानात्। न चैवं षट्त्रिंशत्तत्त्ववादस्यापि स्वी-कार्यत्वम्, अनाप्तागमप्रणीतस्यानादरणीयत्वात्; आप्तागमे त्वधिकगणनमनतिविप्रकृष्टावान्तरपरिणामख्यापनाभिप्रायं बोद्धव्यम्। * लोकं वैकुण्ठनामानमिति प्रकृत्य * अप्राकृतं सुरैर्वन्द्यमिति विशेष्यते। अत एवाण्डान्तर्वर्तिलोकविशेषत्व-

शङ्काऽपि निर्धूता। *न तस्य प्राकृता मूर्तिरित्यनेनापि द्रव्यान्तरं सिध्यति। न चात्र बाधकमस्ति; अतश्शुद्धाशुद्धविभूतियुगलं व्यवस्थितमिति। नन्वेवमपि नित्यानित्यविभूतिविभागोऽनुपपन्नः, अत्राप्यात्मस्वरूपादेर्नित्यत्वात्, तत्राप्यैच्छदेहादेरनित्यत्वात्, तत्राह–**कल्येति**। नित्यानित्यप्राचुर्यविवक्षया तथा विभाग इति भावः। न हि तत्रत्यानां पृथिव्यादीनामीश्वरदेहादीनां चात्रत्यवत् सृष्टिप्रलयौ। उक्तं हि **महाभारते**–*नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम्। ऋते तमेकं पुरुषं वासुदेवं सनातनम्॥ इति। भूतशब्दोऽत्र कार्यांशपरः। अत एव जीवलयोक्तिरौपचारिकी; वासुदेवशब्दोऽत्र परविग्रहविशिष्टपरः; स्वरूपनित्यत्वस्य जीवेष्वपि समत्वात्। विशिष्टलयस्य वासुदेवे विश्वविशिष्टेऽपि सिद्धत्वात् परविग्रहनित्यत्वोक्तिस्तदनुबन्ध्युपलक्षणार्था। ननु कारणवाक्येष्वेकत्वावधारणादनन्तरं च बहुभवनसङ्कल्पोक्तेर्नित्यस्थानादिव्यपदेशस्त्रिदशामरत्वन्यायेन नेतव्य इति त्र्यन्तकुदृष्टीनां सर्वेषां व्यावघोषी, तत्राह–**सृष्टेरिति**। अयं भावः–सृष्टिकालापेक्षया स्रक्ष्यमाणस्य जगत उपदेशकालापेक्षयेदङ्कारगोचरस्य प्रलयदशायामविभक्तनामरूपतया एकत्वमवधार्यते। अत एव हि *तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति श्रुतिरेकत्वबहुत्वप्रकारमेतमेव व्यनक्ति। अथाऽपि यथाश्रुति जीवादिसमस्तैक्ये को दोष इत्यत्राह–**नो चेदिति**। अयं भावः–*प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपीत्यादिकमास्तां तावत्; चोदयितॄणां तु स्वसिद्धान्तविरोधः स्यात्। न हि मायाविलयः प्रलये मृषावादिभिरङ्गीक्रियते; औपाधिकभेदवादिभिश्चोपाध्यंशप्रध्वंसः। मुखशब्दः स्वाभाविकभेदाभेदवाद्युक्तचिदचिदीश्वरशक्तित्रयसंग्रहार्थः। यदि मायोपाधिशक्तीनामपि विलयस्तैरभ्युपगम्येत, तदुपहिताद्ब्रह्मणो विश्वप्रसूत्यभावात् अनुपहितस्य च तस्य तत्कारणत्वानभ्युपगमात् बहुभवनसङ्कल्पपूर्वकविश्वसृष्ट्याद्यभावात् कारणवाक्यं सर्वं कबन्धमीमांसककल्पितमूषरत्वमेव भजेतेति। स्वस्तीत्युपालम्भकाकुगर्भम्॥ ६१॥ **इति नित्यविभूतिसद्भावः॥**

207. **ज्ञानत्वं चेद्रहस्यागमविदितमिति स्वीकृतं नित्यभूतेः**
षाड्गुण्यात्मत्वमेवं प्रसजति सह तत्पाठतोऽतो जडा सा।
तत्संबन्धात् कुतश्चित्तदुपचरणमित्याहुरेके परे तु
ज्ञानत्वाजाड्यकण्ठोक्त्यनुगुणमवदन्मुख्यतामात्मनीव॥ ६२॥

नित्यविभूतौ जडाजडविकल्पे प्रथमं दर्शयति–**ज्ञानत्वमिति**॥ अयं भावः–प्रसिद्धशास्त्रेषु तावदजडत्वं शुद्धस्य सत्त्वस्य न पश्यामः। अथ **रहस्यागम**वाक्यविशेषैस्तदिष्येत, एष्टव्यं तर्हि षाड्गुण्यमयत्वमपि; तस्यापि तस्मिन्नेव शास्त्रे सहपाठात्। इष्टप्रसङ्गोऽयमिति चेन्न; चेतनत्वप्रसङ्गात्। न च तदप्यस्त्विति वाच्यम्, जीवेश्वरविकल्पबाधात्। षाड्गुण्यमयत्वमौपचारिकमिति चेत्, ज्ञानमयत्वमपि तथैव स्यादविशेषात्। अतस्त्रिगुणविभूतिरिवाद्यापि सा विभूतिरन्याधीनसिद्धितया जडैवेति कुतस्तत्र ज्ञानत्वोक्तिरित्यत्राह–**तत्संबन्धादिति**। निश्शेषाविद्यानिवृत्तिहेतुतया, निरुपाधिकज्ञानविकासस्थानतया, अन्यतो वा कुतश्चित्संबन्धात् *आयुर्घृतमितिवज्जडेऽपि ज्ञानत्वोपचार इत्यवोचन् केचित्। पक्षान्तरमुपक्षिपति–**परे त्विति**। किमात्मिकैवैषा भगवतो व्यक्तिरित्यनुयोगे यदात्मको भगवानिति प्रतिवचनात्, किमात्मको भगवानिति पुनरनुयोगे च ज्ञानात्मक इत्यादिप्रत्युक्तेः, शक्त्यात्मकत्वादिवन्मुख्यत्वविरोधाभावाच्च, *स्वसत्ताभासकं सत्त्वं गुणसत्त्वाद्विलक्षणमित्युपबृंहणस्वारस्याच्च विषयाश्रयावच्छेदनिरपेक्षं स्वगोचरज्ञाननिरपेक्षप्रकाशनत्वनिमित्तेनात्मनीव ज्ञानत्वं मुख्यमिति॥ ६२॥ **इति नित्यविभूतेर्जडत्वाजडत्वपक्षौ॥**

208. **निस्संकोचा समस्तं चुलकयति मतिर्नित्यमुक्तेश्वराणां**
बद्धानां नित्यभूतिर्न विलसति ततः कस्य सा स्वप्रकाशा ।
मैवं नित्येश्वरादेस्सति मतिविभवे साऽस्तु तेनानपेक्षा
वेद्यानुद्भासकाले मतिरिव न तु सा बन्धकाले विभाति ॥ ६३ ॥

नन्विह जडपक्ष एव साधीयान्, पक्षान्तरं तु न संभवमृच्छतीत्यभिप्रायेण चोदयति—**निस्सङ्कोचेति** ॥ न हि कंचित्पुरुषमनपेक्ष्य किंचित्प्रकाशत इति संभवति । पुरुषास्तु नित्यमुक्तेश्वरास्सर्वज्ञा निष्प्रतिघया स्वधर्मभूतधिया सर्वं साक्षात्कुर्वते । बद्धानां तु नित्यविभूतिर्न प्रकाशत एव । अतः स्वप्रकाशत्वं न स्यादित्याक्षेपः । तत्र यथाश्रुतस्वारस्यसक्तस्समाधत्ते—**मैव**मिति । अभिप्रेतं विवृणोति—**नित्ये**ति । यथाऽऽत्मनां नित्यस्वप्रकाशानां धर्मभूतधीगृह्यमाणदशायामपि स्वप्रकाशत्वं नापैति, तथा सर्वज्ञैस्तत्तद्धिया साक्षात्क्रियमाणस्यापि शुद्धसत्त्वस्य स्वप्रकाशत्वमविरुद्धमिति । तर्हि सर्वसाधारण्याद् बद्धान् प्रत्यपि भासेतेत्यत्राह—**वेद्ये**ति । यथा धर्मभूतज्ञानस्य विषयग्रहणवेलायां स्वाश्रयायैव भातीत्यवस्थाभेदात् पुरुषभेदाच्च भाननियमः, तथा स्वसाक्षात्कर्तॄणामेव स्वयमपि प्रकाशत इति व्यवस्थायां न कश्चिद्बाधः । पुरुषाणां नैरपेक्ष्यं न वस्तुस्वभावं प्रतिरुणद्धीति भावः । नन्वयं प्रकाशः स्वविषयबुद्धिधर्मो वा स्वधर्मो वा? पूर्वत्र स्वप्रकाशत्वहानिः । उत्तरत्रानादिरागन्तुको वा? आद्ये बद्धान् प्रत्यप्यनादिरिति भानप्रसङ्गो दुर्वारः । द्वितीये कारणानिरूपणादसंभवः । मैवम्; न ह्यागन्तूनां सर्वेषां विशेषकारणमस्माभिर्विविच्यते । न चास्मदविवेचितमिति नास्ति; अतिप्रसङ्गात् । सामान्यकारणं तु विश्वकर्तुरिच्छादिकं श्रुतमेव । अत एव हि नित्यानां मुक्तानां च स्वच्छन्दचिकीर्षासन्ततिभेदसिद्धिरिति ॥ ६३ ॥ **इति नित्यविभूतेरजडत्वपक्षोपपत्तिः ॥**

209. **तत्त्वान्यप्राकृतानि त्रिगुण इव परीणामतश्चेद्भवेयुः**
स्थानादि स्यादनित्यं न यदि न घटते भूततादीति चेन्न ।
अत्रत्यक्ष्मादितत्त्वक्रमनियतगुणप्रक्रियाद्यैकरूप्या-
न्नित्येऽपि स्यान्निमित्तानुगतिनियमितस्तत्तदाख्याविशेषः ॥ ६४ ॥

दिव्यस्थानादेर्नित्यत्वमाक्षिप्य प्रत्याह—**तत्त्वानी**त्यर्धेन ॥ त्रिगुण इव—त्रिगुणद्रव्ये यथा परिणामतः पृथिव्यादिविभागस्तथेत्यर्थः । **स्थानादि स्यादनित्य**मिति । सङ्घातिनामनित्यत्वे कथं तत्सङ्घातनित्यत्वमिति भावः । अपरिणामपक्षं शङ्कते **न यदी**ति । तत्र चोद्यमाह—**न घटत** इति । अप्राकृतपञ्चभूतादिव्यपदेशो न युज्यत इत्यर्थः । अनित्येष्वप्याकाशादिपञ्चभूतसमाख्यानिवेशस्यान्यथासिद्धिमाह—**अत्रत्ये**ति । त्रिगुणविकृतीनां हि तत्त्वानां परिणतिविशेषादेकद्वित्र्यादिगुणनियतिः । दिव्यतत्त्वानां तु नित्यसिद्धा । ततश्च यथा नित्ये चानित्ये च निमित्ताविशेषात् परेषां पृथिव्यादिशब्दः, तथाऽत्रापि तत्तद्गुणतारतम्यनिमित्तस्तत्तच्छब्द इति नित्यत्वाविरोधः ॥ ६४ ॥ **इति अप्राकृतस्थानादेरनित्यत्वादिपरिहारः ॥**

210. **निर्दिष्टं पौष्करादौ स्वयमखिलकृता स्वं वपुर्नित्यसिद्धं**
नित्याऽलिङ्गेति चैकायननिगमविदो वाक्यभाष्यादि चैवम् ।

नित्यत्वं वासुदेवाह्वयवपुषि जगौ मोक्षधर्मे मुनीन्द्रो
नित्येच्छातस्तथा तत्तदिह विहतिमान् सांशजन्मादितर्कः ॥ ६५ ॥

अथ परविग्रहनित्यतां प्रमाणतः स्थापयति—**निर्दिष्ट**मिति ॥ **श्रीपौष्करे** तावत् * नित्यसिद्धे तदाकारे तत्परत्वे च पौष्कर इति । **श्रीसात्वते** च * नित्यं नित्याकृतिधरमिति । भगवन्मूर्तिं प्रस्तुत्य * नित्याऽलिङ्गा स्वभावसंसिद्धिरिति **रहस्याम्नायोक्त**माह—**नित्ये**ति । अत्र **ब्रह्मनन्द्यादि**संप्रदायमाह—**वाक्ये**ति । आप्ततमोपबृंहणमाह—**नित्यत्व**मिति । यथा—* नित्यं हि नास्ति जगति भूतं स्थावरजङ्गमम् । ऋते तमेकं पुरुषं वासुदेवं सनातनम् ॥ इति । **श्रीवैष्णवे पुराणे**—* सदैकरूपरूपायेति । * इच्छागृहीताभिमतोरुदेह इति स्मरणाद्विग्रहस्येच्छागृहीतत्वे कथं नित्यत्वम्, तस्मिन् वा कथं तदित्यत्राह—**नित्येच्छात** इति । अयं भावः—अवतारविग्रहेषु तावदिच्छागृहीतत्वमविरुद्धम् । नित्येऽप्यनिच्छाया-मनित्यत्वप्रसङ्गमभिसन्धाय नित्येच्छाधीनस्थितित्वविवक्षयेच्छागृहीतत्ववाचोयुक्तिर्युक्तेति । अत्र तर्कबाधं परिहरति—**तदि**ति । तथा—प्रमाणसिद्धत्वादित्यर्थः । सांशत्वेन जन्मादिसहितत्वं तद्विरहेण वा निरंशत्वं प्रसञ्जयितुं न शक्यमिति भावः । यत्तु कैश्चिदुच्यते—नित्यं निष्कलं निर्विकारं च परं ब्रह्म अशरीरश्रुत्या स्वरूपत एव विचित्रविग्रहाकारम्; तत एव विग्रह[ा]नित्यत्वम्; न चात्र स्वरूपविग्रहयोर्भेदः, नापि भेदाभेदप्रसङ्ग इति, न तद्भावनीयम्; अन्यथा विश्वाद्वैत-स्यापि संग्राह्यत्वप्रसङ्गादिति ॥ ६५ ॥ **इति परविग्रहनित्यत्वम्** ॥

211. अस्त्रैर्वा भूषणैर्वा किमिह भगवतोऽवाप्तकामस्य तस्मा-
देवो देहेऽपि वीतावरण इति जगुः केऽपि जैनोपजप्ताः ।
किं वा देहेन विश्वात्मन इति वदतां किं प्रतिब्रूयुरेते
तच्चेत्तस्याश्रितार्थं तदधिकरणकं सर्वमप्येवमस्तु ॥ ६६ ॥

केचिदाहुः—वीरशृङ्गारादिरसानुबन्धीनि अस्त्रभूषणा[दी]नि; तानि तदुचिताधिकारिणां यद्यपि तत्तद्विग्रहेष्वनुसं-धेयानि, तथाऽप्यत्यन्तनिष्कामानां तादृशचिन्तनमयुक्तं * प्रशान्तं साक्षसूत्रकमित्यादिविशेषणाच्च; न चावाप्तसमस्तकामस्य * निर्दोषो निरनिष्ट इत्यादिप्रख्यातप्रकारस्य परमात्मनो भूषणादिसाध्यं किंचिदस्ति । अत इदमुच्यते—* न ते रूपं न चाकारो नायुधानि न चास्पदमिति; तदिदमनुभाषते—**अस्त्रैरि**ति ॥ देहेऽपीत्यादिकमुपालम्भकाकुगर्भम् । अपिशब्देन स्वरूपे वीतावरणत्वं व्यज्यते; तेनातिरोहितस्वभावत्वमनुसन्धत्ते । अत्र प्रतिबन्दिमुखेन परिहारमाह—**किं वे**ति । अयं भावः—विश्वशरीरिण ईश्वरस्य किं विशेषतः केनचिद्विग्रहेण परिगृहीतेनेति चोदयतां किमेते प्रत्युत्तरं ब्रूयुः ? अथ योगविशेषसक्तानां चित्तालम्बनसिद्ध्यर्थमीश्वरस्य दिव्यगात्रपरिग्रह इति, तथैवास्त्रभूषणादिपरिग्रहोऽपीति तुल्य-प्रमाणसिद्धत्वादेष्टव्यम् । न च शान्त्यर्थभावनाविरोधः, यथोपदेशमस्त्राद्युपयोगस्य स्वीकार्यत्वात्, * दामोदरं बन्धगत इतिवत् । तथा भगवज्जन्मादिवेदिनो जन्मादिनिवृत्तिश्च स्मर्यते । ऊहमात्रेण विरोधकल्पतिस्त्वतिप्रसक्त्यै स्यात् ॥ ६६ ॥ **इति परस्यास्त्रभूषणाद्यनुपपत्तिपरिहारः** ॥

212. रूपस्थानायुधाख्याजनिलयविधृतिव्याप्तीच्छागुणादे-
र्विश्वाधारे निषेधो विधिरपि विषयद्वैतशाम्यद्विरोधो ।

इत्थंभूते निषेधः क्वचिदपि न विधिं बाधते सावकाशः
कल्याणैरस्य योगस्तदितरविरहोऽप्येकवाक्यश्रुतौ च ॥ ६७ ॥

ये तु मन्यन्ते–परस्य ब्रह्मणो विग्रहादिषु विधिनिषेधौ दृश्येते, तत्र निषेधप्राबल्याद्विधीनामन्यार्थत्वमिति, तान् प्रत्याह–**रूपेति** ॥ विषयद्वैतं–विषयभेदः । तेन विधिनिषेधौ शाम्यद्विरोधौ । ततः किमित्यत्राह–**इत्थमिति** । इत्थंभूते–आलम्भादिवद्विशेषविधिसिद्धावित्यर्थः । एवमनभ्युपगमेऽतिप्रसङ्ग इति भावः । विधिनिषेधयोरत्र विषयभेदं विवृण्वन् तस्यैकश्रुतिपठितत्वेन न्यायनिरपेक्षप्रसिद्धिमप्याह–**कल्याणैरिति** । एतेनापच्छेदन्यायस्यात्र दूरनिरस्तत्वं सूच्यते ॥ ६७ ॥ **इति विग्रहादिविधिनिषेधविरोधप्रशमनम् ॥**

213. **देहादिर्देवतानां हविरनुभवनं सन्निधेर्यौगपद्यं**
प्रीतिर्दानं फलस्याप्यसदिति कथयन्त्यर्धलोकायतस्थाः ।
तत्राध्यक्षादिदूरस्वमहिमसदृशाशेषवैशिष्ट्यमासां
तत्तद्विध्यर्थवादप्रभृतिभिरविदुस्तत्परैरेव शिष्टाः ॥ ६८ ॥

अत्र प्रसङ्गात् सर्वदेवतानां विग्रहादिपञ्चकनिरासं परिहर्तुं तमनुभाषते–**देहादिरिति** ॥ आदिशब्देन इन्द्रियभोग्यभोगोपकरणादिसंग्रहः । अर्धलोकायतमतम्–कर्माराध्यापह्नवमतम् । एतत्प्रतिक्षिपति–**तत्रेति** । तस्मिन् पक्षे प्रतिक्षेप्ये सतीत्यर्थः । अध्यक्षादिदूरत्वोक्तिः यूपादित्यैक्यादिवन्नात्र बाधप्रसङ्ग इति ज्ञापनार्थम् । स्वमहिमसदृशत्वोक्त्या स्वपरोपयोगिसाधनानुगुण्यसूचनम् । अशेषशब्देन तत्तदाराध्यप्रतिनियतविग्रहतदनुबन्ध्यस्त्रादिसर्वसंग्रहः । प्रभृतिशब्देन मन्त्राणां स्मृतीतिहासपुराणानां च संग्रहः । अप्रधानेऽप्युपयुक्ते तात्पर्यमस्त्येवेत्यभिप्रायेण तत्परैरेवेत्युक्तम् । **देवताधिकरणे** च विग्रहादिनिरासो न सूत्रोक्तः । प्रयोजकाप्रयोजकविभागमात्रं तु न विग्रहादिसदसत्त्वापेक्षम् । हविर्देवतासामान्ये हविर्बलीयस्त्वं प्रमाणप्रसक्तिवैषम्यात् । विशेषणतः पर्यायतश्च देवताभेदोक्तिस्तथातथोद्देशार्था । विस्तरस्त्वन्यत्र । शिष्टाः–**बोधायनटङ्कद्रमिडादयः** ॥ ६८ ॥ **इति विग्रहादिपञ्चकनिराकरणपरिहारः ॥**

214. **साधुत्राणादिहेतोस्तदुचितसमये विग्रहांशैः स्वकीयैः**
स्वेच्छातस्सत्यरूपो विभुरवतरति स्वान् गुणौघाननुज्झन् ।
व्यूहे संकर्षणादौ गुणनियतिरभिव्यक्तिवैषम्यमात्रा-
द्वृद्धिह्रासाद्यभावात् स हि भवति सदा पूर्णषाड्गुण्यशाली ॥ ६९ ॥

यद्यपि भगवतो गुणविग्रहादियोगस्सत्यः, तथाऽपि षाड्गुण्यस्य व्यापित्वमयुक्तम्; विभवेषु विपरीतदृष्टेः, व्यूहेषु संकर्षणादिषु ज्ञानबलादिगुणद्वन्द्वनियमोक्तेरित्यत्राह–**साधुत्राणेति** ॥ *अजोऽपि सन्नव्ययात्मेत्यादिप्रसिद्धमिह प्रतिसन्धेयम् । प्रतिनियतगुणद्वन्द्वोक्तेरन्यथासिद्धिमाह–**व्यूह इति** । अयं भावः–**श्लो.** निगूहनं चतुष्काणां द्वन्द्वानां च प्रकाशनम् । षड्गुणस्य तथाभूतसमाधिस्थोपयोगतः ॥ मोहनशक्त्या मनुष्यादिसजातीयशङ्कास्पदेषु विभवेष्वपि हि सिद्धं षाड्गुण्यम् । व्यूहेषु कैमुत्यसिद्धम् । सर्वेष्वपि हि भगवत्त्वं पूर्णत्वं च प्रख्याप्यते । संकर्षणादौ व्यवस्थया गुणद्वन्द्वाभिव्यक्तेः गुणचतुष्कान्तराणामनभिव्यक्तेश्च विशेषनिर्देशोपपत्तिरिति । *न कर्मणा वर्द्धते नो कनीयान्, *स न

साधुना कर्मणा भूयान् नो एवासाधुना कनीयान्, *अन्यूनश्चाप्यवृद्धश्चेत्यादिश्रुतिस्मृतिबलेन वृद्धिह्रासाद्यभावाद् व्यूहादिषु गुणकात्स्न्र्यमाह—वृद्धीति ॥ ६९ ॥ **इति परव्यूहादिपञ्चरूपस्यापि पूर्णषाड्गुण्यवत्त्वम् ॥**

215. **शास्त्रादीनां प्रवृत्तिः प्रतितनु नियता स्याद्धि संकर्षणादौ**
जीवादौ या विभज्याभिमतिरिह लयोत्पत्तिरक्षाविधिश्च ।
तत्तद्विद्याविशेषप्रतिनियतगुणन्यायतस्तौ तु नेयौ
सर्वस्यैकोऽभिमन्ता स हि सकलजगद्व्याप्तिष्वेककर्ता ॥ ७० ॥

उक्तेषु व्यूहेषु क्रमाच्छास्त्रप्रवर्तनधर्मनयनतत्त्वगमनरूपमुपकारत्रयं जीवमनोहङ्कारेष्वभिमानत्रयं संहारसृष्टिरक्षा-रूपलीलात्रयं च व्यपदिश्यते; तत्र प्रथमत्रिके व्यवस्थानुपपत्तिचोद्यं सुपरिहरमित्यभिप्रायेणाह—**शास्त्रादीना**मिति ॥ द्वितीयतृतीयत्रिके विरोधं परिजिहीर्षुरनुभाषते—**जीवादा**विति । अत्रेदमाभिप्रायिकं चोद्यम्—यदि सङ्कर्षणादयोऽपि वासुदेव एव स्युस्तदा अभिमानत्रयस्य संजिहीर्षादित्रयस्य चैकाश्रयत्वाद्व्यवस्था न स्यात्; अतस्ते परस्मादन्ये केचित् पुरुषा इति । परिहरति—**तत्त**दिति । यथैक एव परमात्मा तत्तद्विद्याविशेषव्यवस्थितगुणविशेषवत्तयोपास्य इति **गुणोप-संहारपादे** निरणायि, तथाऽत्रापि मिथस्संघटितविग्रहाभिमानव्यापारविशेषवत्तया व्यूहनिष्ठैर्विभज्यानुसन्धेय इति भावः । चेतनभेदक्लृप्तौ बाधमाह—**सर्वस्ये**ति । न हि विश्वमूर्तेरभिमानः कश्चित्संकुचति, न च संहारादौ क्वचिदुदास्ते, न च हिरण्यगर्भादिवद्विशेषणभूतचेतनान्तराण्यत्र वचनान्तरप्राप्तानि; प्रत्युतैक्यमेव प्रतिपादितमित्याशयः ॥ ७० ॥ **इति व्यूहेषु विशेषाभिमानादिविरोधपरिहारः ॥**

216. **त्रिव्यूहः क्वापि देवः क्वचिदपि हि चतुर्व्यूह उक्तस्तदेवं**
व्याघातेऽन्योन्यबाधादुभयमिदमसत्कल्पनामात्रमस्तु ।
तन्नाद्ये व्यूहभेदे त्रियुगगुणतया चिन्तनीये परस्मा-
द्युक्ता भेदाविवक्षा तदनुपगमने तत्त्वसंख्यादिबाधः ॥ ७१ ॥

मानमेयमलिम्लुचास्त्वाहुः—त्रिव्यूहचतुर्व्यूहवाक्ययोर्विरोधात् सर्वमेतदुपासनार्थकल्पनामात्रसिद्धमिति । तदनु-ब्रूते—**त्रिव्यूह** इति ॥ प्रतिवदति—**तन्ने**ति । विरोधं शमयति—**आद्य** इति । वस्तुतश्चतुर्व्यूहत्वेऽप्याद्यव्यूहस्य षड्गुण-तयाऽनुसन्धेयत्वात् परस्मादभेदं विवक्षित्वा त्रिव्यूहत्वोक्तिः प्रवृत्तेति न मिथो बाधश्शङ्कनीय इति हृदयम् । उक्तप्रकारान-भ्युपगमेऽतिप्रसङ्गमाह—**तदनुपगमन** इति । एवमिह प्रसङ्गः—यदि न्यूनाधिकनिर्देशमात्राद्विरोधः, तदा क्वचिदप्य-नुक्तमन्यतो ग्राह्यं न स्यात्; ततश्च विद्यैक्ये गुणोपसंहारस्त्यज्येत; तथा **छान्दोग्ये** भूतत्रयं **तैत्तिरीयके** भूतपञ्चकम् अन्यत्र च तथातथा न्यूनमधिकं च तत्त्वजातमधीतमिति तत्त्वसंख्याव्यवस्थापनं च विलीयेतेति । आतिवाहिकगणनादि-संग्रहार्थः आदिशब्दः । एवं च पञ्चमूर्त्यादिपरिगणनाऽपि परित्रातेति वेदितव्यम् ॥ ७१ ॥ **इति व्यूहगणना-वैषम्यनिर्वाहः ॥**

217. **मूर्तीनां मूलमूलिप्रभृतिषु बहुधा वैपरीत्यप्रतीते-**
र्वर्णादौ बीजतादिव्यवहृतिवदियं वर्णना भावनार्था ।

मैवं कालादिभेदात् प्रशमितविहतौ कल्पितत्वं न कल्प्यं
नो चेद् ब्रह्माद्युदन्तेष्वपि विषमकथाभेदवैयाकुली स्यात् ॥ ७२ ॥

पुनरपि मुखान्तरेण मूर्तिकल्पनामनुभाषते—**मूर्तीना**मिति ॥ अस्ति हि तत्तत्संहितास्वभिन्ननाम्नो मूर्तेर्भिन्नकारणकत्वं वर्णभुजादिवैषम्यं च । अतो मन्त्राक्षरेषु बीजतत्कार्यव्यपदेशवत् सितरक्तादिव्यपदेशवच्च भावनार्थं दृष्ट्युपदेशमात्रमेतदिति भावः । एतन्निषेधति—**मैव**मिति । काल्पनिकत्वशङ्कामूलं विरोधं परिहरति—**कालादिभेदा**दिति । उक्तानभ्युपगमेऽतिप्रसङ्गमाह—**नो चेदि**ति । सन्ति हि चतुर्मुखस्य सप्त जन्मानि ; रुद्रस्य ब्रह्मपुत्रत्वं ब्रह्मानुजत्वं च । इन्द्रादीनामपि कारणभेदाः कथ्यन्ते । न चैतेषु कल्पादिभेदप्रशमितविरोधेषु काल्पनिकत्वशङ्कावकाशः, तथाऽत्रापि स्यात् ; अन्यथा तत्रापि विपरीतापत्तिरिति ॥ ७२ ॥ **इति प्रादुर्भावादिप्रक्रियान्तरोपपत्तिः ॥**

218. **ईशस्य व्यष्टिभेदानभिदधति मनोवाङ्मयादीन् यदन्ये**
तत्र त्रेधा यदीष्टा विकृतिरविषया निर्विकारागमाः स्युः ।
नित्यत्रित्वे तु नैकेश्वरनियमगतिर्भ्रान्तिसिद्धे विभागे
मायादायादपक्षः श्रुतिरपि नियतैरस्त्वधिष्ठानभेदैः ॥ ७३ ॥

इह केचिदीश्वरस्वरूपेऽपि भोक्तृभोग्यन्यायेन समष्टिव्यष्टिभेदं वर्णयन्ति, वदन्ति च मनोमयप्राणमयवाङ्मयाख्यं व्यूहत्रयम् ; तदनुभाषते—**ईशस्येति** ॥ ईदृशोऽयं भेदः किं भोग्यवत्परिणामतः, उत भोक्तृवत्स्वभावतः, अथ प्रतिबिम्बितचन्द्रादेरिव भ्रान्तित इति विकल्पं मन्वानः प्रथमे निर्विकारश्रुतिविरोधमाह—**तत्रेति** । त्रेधेत्यनन्तव्यष्ट्यन्तराणामुपलक्षणम् । सर्वात्मनो ब्रह्मणस्सविकारत्वादीश्वरांशो हि तैर्निर्विकारत्वश्रुतिर्निवेशिता ; तत्राप्यनवकाशत्वं तस्याः प्रसक्तम् । द्वितीयं दूषयति—**नित्यत्रित्व** इति । * एको देवः सर्वभूतेषु गूढः, * एकश्शास्ता न द्वितीयोऽस्ति शास्ता इत्यादिभिर्विरोधस्स्यादिति भावः । तृतीयेऽनिष्टमाह—**भ्रान्तीति** । मायादायादपक्षः—मायार्जितभ्रान्तिविभागोपजीविपक्षः ; स ते स्यादिति शेषः । सत्यमीश्वरमनभ्युपगच्छतामीश्वरत्रित्वश्रुतिस्तर्हि निरधिष्ठानभ्रमविषया स्यादित्यत्राह—**श्रुतिरपी**ति । अयं भावः—ईश्वरस्तावन्मायोपहिते ब्रह्मणि कल्प्यताम् ; त्रित्वं च तस्य द्विचन्द्रादिन्यायात् मायाविलासविप्लुतब्रह्माधिष्ठानतया स्वीक्रियतामिति । यद्वा मनोमयादिविभागवादिनी श्रुतिः कथं निर्वोढव्येत्यत्राह—**श्रुतिरपी**ति । अपिशब्द इह एतादृशश्रुत्यसंभवाभिप्रायः । संभवेऽप्युच्यते परोपकारकमनःप्रभृत्यधिष्ठानभेदादीश्वरस्य मनोमयत्वादिविभागो निरुह्यतामिति ॥ ७३ ॥ **इति ईश्वरस्वरूपविषयसमष्टिव्यष्ट्यादिवादनिरासः ॥**

219. **युक्तिः प्रश्नोत्तरादेर्न हि पुरुषभिदां बुद्धिभेदं च मुक्त्वा**
तस्माद्व्यूहादिभेदे कतिचन पुरुषाः स्युः परेणानुबद्धाः ।
तन्न स्वच्छन्दलीलः स्वयमभिनयति स्वान्यतां सर्ववेदी
तद्वच्छिष्यादिवृत्तिप्रसृतिमिह सतां शिक्षयन् सानुकम्पः ॥ ७४ ॥

पुनरपि परव्यूहादिषु पुरुषभेदमाशङ्कते—**युक्तिरिति** ॥ आदिशब्देन कृष्णबलभद्रादिषु मिथो विषादकोपादि संगृह्यते । अस्ति तावत्सात्त्वतादिषु गुरुशिष्यन्याये वासुदेवसंकर्षणादीनां प्रश्नप्रतिवचनक्रमेण विद्याधिगमः । तत्र न

तावत् स्वात्मानं स्वयं पृच्छति प्रतिवदति वा; हेतुप्रयोजनयोरसंभवात्। अतः प्रष्टृप्रतिवक्तृचेतनभेदः कल्प्य इति। ननु भेदकानिश्चये कथं भेदक्लृप्तिरित्यत्राह—**बुद्धिभेदं च मुक्त्वेति**। न्यूनबुद्धिः [परि]पृच्छेदधिकबुद्धिरनुशास्तीति लोकवेदप्रसिद्धमिति भावः। एतदन्यथासिद्धमित्यभिप्रायेण प्रति [क्षिपति] वक्ति—**तन्नेति**। चेतनभेदाभावेऽपि प्रश्नोत्तराद्युपपत्तिमाह—**स्वच्छन्दलील इति**। स्वयमित्यनेन स्वस्यैवेति गम्यते। अभिनयप्रयोजनमाह—**तद्वदिति**। शिष्याचार्यादिभिरेवं वर्तितव्यमिति धार्मिकशिक्षणं देवस्य दयान्वितलीलाप्रसूतमिति भावः॥ ७४॥ **इति ईश्वरस्य स्वात्मनि शिष्याचार्यत्वाद्यभिनयफलम्॥**

220. **विश्वान्तर्वर्तिबालोदरगतमखिलं कस्य विश्वासभूमि-**
स्तस्मादौपेन्द्रमीदृग् भवतु रसवशादिन्द्रजालं प्रवृत्तम्।
मा भूदाश्चर्यशक्तेरवितथमिदमित्येव सर्वाप्तसिद्धे-
र्व्याघातस्योपशान्तिस्तदनुगुणदशाभेदयोगादिभिः स्यात्॥ ७५॥

अत्र मायामतानुयायी चोदयति—**विश्वेति**॥ विश्वशब्देन त्रैलोक्यादि गृह्यते। कस्यचिदन्तरे किंचिद्वर्तते, तदेव तदानीमेव तस्माद्बहिरेव; क एतच्छ्रद्दधीतेति भावः। विश्वापह्नवाभिलाषी स्वोक्तफलितमाह—**तस्मादिति**। रसवशात्—इच्छावशादीप्सितक्रीडारसवशाद्वा। तादृशाद्भुतविवक्षया प्रतिषेधति—**मा भूदिति**। तत्तत्प्रकरणपरामर्शेन मिथ्यात्वपरिहारे सिद्धे विरुद्धवत्प्रतिपन्नं सर्वमविरुद्धावस्थाविशेषादिविवक्षया निर्वोढुं शक्यम्। तत्र भगवद्विग्रहविभूत्यादीनां सङ्कोचशक्तिर्विकासशक्तिस्तत्तदभिमानविषयसजातीयोत्पादनशक्तिस्सूक्ष्मस्थूलावस्थाभेदः परिमितविग्रहव्यङ्ग्यापरिमितस्वरूपलक्षणमित्यादिकं यथार्हमवधारणीयम्। एवम् * अणोरणीयान् महतो महीयानित्यादीनि ब्रह्मस्वरूपविषयवाक्यान्यपि तत्तदविरुद्धार्थविवक्षया नेतव्यानि। वस्त्वन्तरादृष्टवैचित्र्यमात्रेण विरोधशङ्कायां सर्वत्रातिप्रसङ्गः स्यादिति॥ ७५॥ **इति आश्चर्यवृत्तान्तविशेषसत्यत्वम्॥**

221. **यद्भावित्वेन बुद्धं भवति तदथ चातीतरूपं तदस्मि-**
न्नुल्लेखो भिद्यते चेदकरणजमतेरैकरूप्यं प्रकुप्येत्।
प्राचीनोल्लेख एव स्थितवति तु गते भाविबुद्धिर्भ्रमः स्यात्
मैवं पूर्वापरादिक्रमनियतसदोल्लेखसत्यत्वसिद्धेः॥ ७६॥

अथ निखिलजगत्कारणतयाऽवधृतस्येश्वरस्य सर्वसृष्ट्यनुगुणेषु ज्ञानशक्त्यादिष्वनुपपत्तिः परिह्रियते। तत्र ज्ञाने तावदयुक्तिरेवं शङ्क्यते—नित्यसर्वज्ञ ईश्वरः भविष्यद्वस्तु भविष्यत्त्वेन पश्यति न वा? पूर्वत्र तस्यैव वस्तुनो भवदवस्थायां भूतावस्थायां च किं स एवोल्लेखस्तदन्यो वा? आद्ये भवतो भूतस्य च भविष्यत्त्वेनोल्लेखाद्भ्रान्तिरेव स्यात्; द्वितीये *पश्यत्यचक्षुरित्यादिना करणनिरपेक्षज्ञानवत्त्वेन कथितस्य कार्यज्ञानासंभवात् प्रतिक्षणं भिदुरानन्तोल्लेखसन्ततिपरिग्रहो निर्मूलः स्यात्। भविष्यतां भविष्यत्त्वेनादर्शनं तु तेषामदर्शनत एव वा, स्वस्वरूपमात्रदर्शनेन वा, वर्तमानत्वभूतत्वदर्शनेन वा स्यात्? आद्ये किंचिज्ज्ञत्वप्रसङ्गः। द्वितीयेऽपि प्रकारतस्स एव। तृतीये भ्रान्तत्वं दुस्तरम्। एवं वर्तमानेऽतीते च वर्तमानत्वादिबुद्धिरस्ति वा न वा? सा च निवृत्तिमती नित्या वा? इत्यादिविकल्पेन प्रसक्ता दोषाः प्रतिसन्धेया

इति । तदभिप्रेत्याह—**यद्भावित्वेने**ति ॥ भवति तत्—वर्तमानत्वावस्थां प्राप्नोति । अथ चातीतरूपम्—वर्तमानत्वावस्थानन्तरमतीतावस्थं स्यादित्यर्थः । तत्—तस्मात् । अस्मिन्—अवस्थात्रयवति वस्तुनि । नित्यसर्वज्ञबुद्धेरागामित्वाद्युल्लेखो भिद्यते चेत्करणनिरपेक्षबुद्धेरीश्वरस्य नित्यैकरूपसर्वदर्शनानुपपत्तिः स्यात् । प्राचीनोल्लेखे नित्यानुवृत्ते तु, वर्तमाने गते च भविष्यत्त्वबुद्धिर्भ्रान्तिः स्यादिति परचोदनानुवादः । अत्रोल्लेखभेदे तदभावे चादोष इत्यभिप्रायेण प्रतिषेधति—**नैव**मिति । उल्लेखभेदपक्षे तावदेवं निस्तारः । नह्यत्र करणनिरपेक्षज्ञानवत्त्वविरोधः, चक्षुरादिनिरपेक्षत्वेऽपि हेतुतस्साध्यप्रकाशोपपत्तेः । हेतुश्चोल्लेखसन्ततावुत्तरोत्तरस्य पूर्वपूर्वः । तत्प्रवाहानादित्वाच्च न कदाचिन्निर्मूलत्वम् । नचेदृशाऽनवस्था दोष इति । एकरूपोल्लेखपक्षे त्वाह—**पूर्वापरे**ति । अयं भावः—सर्वं कार्यं स्वकाले न हि नित्यासत् ; तच्च किंचिदपेक्ष्य पूर्वं किंचिदपेक्ष्योत्तरम् । तत एवं त्रिप्रकारं कार्यं सर्वदैकबुद्धिसमारूढम् । न कदाचिदपि स्वकालवर्तिनः कालान्तरवर्तित्वेनोल्लेखः । भविष्यत्त्वादिकं चापेक्षिकम् । किंचिदपेक्षयोत्तरत्वमेव कस्यचित्तत्समकालप्रागभाववतस्तदपेक्षया भविष्यत्त्वम् । एवं किंचिदपेक्षया पूर्वत्वमेव तत्समकालप्रध्वंसवतोऽतीतत्वम् । तच्च किंचित्कादाचित्कम् । न हि नित्यापेक्षया किंचिद्भविष्यद्भूतं वा । एवं सर्वप्रकारं वस्तु सर्वज्ञबुद्ध्या यथावस्थितरूपेण सर्वदैवोल्लिख्यत इति करणनैरपेक्ष्यं विपर्यासविरहश्च सिध्यतीति । **श्लो.** य एव स्यादसर्वज्ञस्सर्वज्ञं न स बुध्यते । इति तद्बोधबाधार्थी तन्निषेधेऽपि न क्षमः ॥ ७६ ॥ **इति सार्वज्ञ्यानुपपत्तिनिरासः ॥**

222. **नीलं किंचित्तदानीमरुणमिति न खल्विन्द्रजालादृतेऽद्धा**
नो चेदेवं विरोधः क्वचिदपि न भवेत् कश्च जैनेऽपराधः ।
तस्मादीशो विरुद्धद्वितयमघटयन् सर्वशक्तिः कथं स्या-
न्नैवं व्याघातशून्येष्वनितरसुशकेष्वस्य तादृक्त्वसिद्धेः ॥ ७७ ॥

ईश्वरस्य सर्वशक्तित्ववादमपह्नोतुमिच्छन् कश्चिद्विरुद्धोदाहरणं तावद्व्यवस्थापयति—**नील**मिति ॥ अद्धा—सत्यम् । इत्यद्धेत्यन्वयः । इन्द्रजालतिरोहितस्त्वेवमद्धेत्यभिमन्येतेति भावः । उक्तानभ्युपगमेऽतिप्रसङ्गमाह—**नो चे**दिति । क्वचिदपि—दूष्यदूषणपूर्वपक्षसिद्धान्तादावपीत्यर्थः । अतिप्रसङ्गान्तरमाह—**कश्चे**ति । विरुद्धसप्तभङ्गीपरिग्रहो हि जैनस्यापराधः, विरोधोच्छेदे सोऽपि न निगृह्येतेति भावः । विरोधसिद्धिमुपजीव्य चोदयति—**तस्मा**दिति । शक्तिर्हि शक्यविषया ; विरुद्धं तु घटयितुं न शक्यम् । अतोऽशक्यसद्भावात् कथं सर्वशक्तिस्स्यादित्याक्षेपः । अविवक्षितदूषणमिदमित्यभिप्रायेण प्रत्याह—**नैव**मिति । अभिप्रेतं विवृणोति—**व्याघाते**ति । नहि व्याहतमीश्वरो घटयतीति तस्य सर्वशक्तित्वं ब्रूमः ; किंतु यत् कार्यं तत्सर्वं करोति, ततश्चान्यैरप्यशक्यं करोतीति सिध्येत् । ईदृशमस्य सर्वशक्तित्वमागमाभिप्रेतम् । तच्च विरोधाभावाद्युज्यत एवेति ॥ ७७ ॥ **इति सर्वशक्तित्वस्थापनम् ॥**

223. **संगृह्य ज्ञानयत्नौ कतिचन निखिलस्रष्टुरिच्छां तु नैच्छन्**
तस्यां द्वेषः क एषामनुमितिशरणानीकनासीरभाजाम् ।
श्रुत्या तद्बोधयत्नावभिदधति यदि क्षम्यतामेवमिच्छा
निर्बाधं स्वात्सकामप्रभृतिवचनमप्यान्यपर्योपरुद्धम् ॥ ७८ ॥

एवमस्तु सर्वज्ञस्सर्वशक्तिरीश्वरः; तथाऽपि चिकीर्षा नाङ्गीकार्या। नहि कर्तुः कार्योत्पादकत्वमिच्छाप्रयुक्तम्; यदभावे क्वचिदपि ततस्तदसिद्धेः। इच्छाभावेऽपि प्रयत्नतः कार्यसिद्धिर्जीवनपूर्वकप्रयत्नकार्यनिश्वासादिनिष्पत्त्या संगृहीता। अतः कार्यलिङ्गेन उपदेशलिङ्गेन वा कर्तुर्ज्ञानयत्नवत्त्वमात्रमेवानुमेयम्; किमजागलस्तनकल्पया चिकीर्षयेति **काश्यपीयाः** केचिदाचक्षते। तदिदमन्वाचष्टे—**संगृह्येति**॥ तुशब्दः प्रदर्शितमनपेक्षितत्वं द्योतयति। अत्र प्रतिबन्दिर्मभिप्रेत्य प्रतिब्रूते—**तस्यामिति**। अनुमानादागमाच्चेश्वरसिद्धिं **नैयायिका** निर्धारयन्ति, **वैशेषिका**स्त्वागममप्यनुमानीकृत्य तदेकवेद्यमीश्वरं तन्त्रयन्ति। अनुमानं च ज्ञानयत्नवच्चिकीर्षामपि समर्थयितुं शक्नोति। तत्र यदि जीवनपूर्वकप्रयत्नन्यायेन चिकीर्षानैरपेक्ष्यं संगृह्येत तद्वदेव ज्ञाननैरपेक्ष्यं किं न स्यात्? न हि ज्ञानमपि प्रयत्नमनपेक्ष्य क्वचित् कार्यं जनयति; प्रयत्नस्तु ज्ञानमनपेक्ष्यापीति दृष्टमेव। अत एव चिकीर्षा प्रयत्नोत्पत्त्यर्थमन्यत्रापेक्ष्यते, इह तु नित्यप्रयत्ने किं तयेत्यपि मन्दम्। चिकीर्षोत्पत्त्यर्थमन्यत्र ज्ञानमपेक्ष्यते, इह तु प्रयत्नस्य नित्यत्वेन चिकीर्षानैरपेक्ष्यात् किं ज्ञानेनेत्यपि सुवचत्वात्। प्रयत्नस्य स्वतो विषयनियमाभावात् ज्ञानविषयेण सविषयत्वं वक्तव्यमिति चेन्न, उक्तोत्तरत्वात्। न हि जीवनपूर्वकप्रयत्नस्य स्वाधारज्ञाननियतविषयत्वम्; नच सर्वकार्यविषयस्य ईश्वरप्रयत्नस्य विषयनियामकापेक्षा; सत्यां च तस्यां सहकारिशक्तिभूतजीवादृष्टविशेषत एव प्रयत्नस्य नियतविषयत्वे संभवति सर्वविषयज्ञानेन प्रयत्नस्य विषयनियमकल्पनं बालिशकृत्यम्। विषयत्वमात्रं चात्र न यावद्धीविषयत्वम्, नित्यानामपि निष्पाद्यत्वप्रसङ्गात्; अशक्यविषयप्रयत्नवत्तया वा डिम्भादिकल्प ईश्वरस्स्यात्। अथ स्वासाधारणधीविषयेणैव विषयवत्त्वं प्रयत्नस्येति मन्येत, तदपि न; धिय इव प्रयत्नस्यापि नियामकनिरपेक्षविषयत्वोपपत्तेः; अन्यथा कल्पनागौरवात्। स्वतस्सविषयत्वे ज्ञानत्वप्रसङ्ग इति चेन्न; धियोऽपि तन्नियामकत्वाभावात्। नच स्वाधारधीविषयस्य सर्वस्य प्रयत्नविषयत्वमिति मन्यसे; सारूप्येऽप्यवान्तरलक्षणेन भेदोपपत्तेः; अन्यथाऽतिप्रसङ्गात्। किंच सामग्रीनियतविषये निरीश्वरज्ञाने व्याप्तिर्दुर्ग्रहा; ईश्वरज्ञानं त्वव्याप्यसिद्धम्। यदि च यथादृष्टप्रकारानादरेण बुद्धियत्नयोर्हेतुनिरपेक्षत्वं कल्प्यते, तथा यत्नस्य बुद्धिनिरपेक्षविषयत्वमदृष्टमभिमन्यताम्, अविशेषाल्लाघवाच्च। एवं बुद्धिमात्रमवलम्ब्य प्रयत्नपरित्यागप्रतिबन्दिरपि प्रयोक्तव्या। ईश्वर इच्छात्यन्ताभाववान् कर्मवश्यव्यतिरिक्तत्वात् घटादिवत्, इत्यादिषु च तादृशप्रयोगः प्रतिप्रयोक्तव्यः। धर्मिसिद्ध्यसिद्ध्यादिविकल्पेन दूषणजातं च दुस्तरमिति यथाश्रुतिबलादीश्वरज्ञानप्रयत्नस्थापनं शङ्कते—**श्रुत्येति**। तथा *सोऽकामयतेत्यादिश्रुतिबलात्तदिच्छाऽपि स्वीक्रियतामित्याह—**क्षम्यतामिति**। नन्ववाप्तकामत्वपूर्णत्वादिश्रुतिस्मृतिशतैरिच्छाराहित्यमीश्वरस्य सिध्येदित्यत्राह—**निर्वाह्यमिति**। तुश्शङ्कानिवृत्त्यर्थः। अयं भावः—आप्तकामशब्दस्तावदीशितुरेष्टव्याभावमिच्छाराहित्यं वा न ब्रूते। अत्र कामशब्दस्य काम्यपरत्वे कामनापरत्वे वा तत्प्राप्तिवचनतस्तन्निषेधायोगात्। अत इष्टं सर्वमस्य प्राप्तमेव भवतीति तात्पर्यं ग्राह्यम्। अनित्यानां वा भोग्यानां प्राप्तत्वं प्रत्येतव्यम्। अत एव पूर्णशब्दोऽपि गुणादिपौष्कल्यमाह, न तु श्रौतीं कामनां निरुन्ध्यात्। विधिनिषेधविरोधशमनं च प्रागेव स्थापितम्। तदिह सर्वकार्यविषयाप्रतिहतानन्याधीनेच्छावानीश्वरः; जीवस्तु न तथा। ईप्सितालाभजनितदुःखं च क्षेत्रज्ञस्यैव, नित्यमुक्तेश्वराणां तदलाभ एव नास्तीति नियमः॥ ७८॥

इति ईश्वरस्येच्छावत्त्वसिद्धिः॥

224. **स्वीकृत्येशानतत्त्वं कतिचन जहतस्तत्प्रसादादिसाध्यं**
गङ्गाम्भःपञ्चगव्यप्रभृतिवदवदन् पावनत्वादि तस्य।

तच्छ्रुत्यादिप्रतीपं यदपि च फलदं दर्शितं निष्प्रसादं
तच्चैतस्य प्रसादादिति हि निजगदुर्धर्ममर्मज्ञचित्ताः ॥ ७९ ॥

अथ प्रस्तुतानुबन्धं पण्डितंमन्यप्रलपितं प्रदर्शयति—**स्वीकृत्येति** ॥ अयमत्राभिसन्धिः—यद्यपि राजादिवत्कर्मवश्या देवताः कुप्यन्ति तृप्यन्ति च; तथाऽपि न तथा परः पुरुषः; निरपेक्षत्वात् सर्वभूतसुहृत्त्वाच्च । अतस्तस्मिन् प्रसादकोपव्यपदेशौ भाक्तौ; तदुपचारापचारशक्तित एवानुकूलप्रतिकूलसंपत्तिः । पावनत्वं मोक्षप्रदत्वं च तस्य * यस्य देवे परा भक्तिरित्यादिस्वारस्याद्गङ्गोदकादेरिव स्वविहितविषयानुष्ठानसामर्थ्यात्स्यादिति । इमं पक्षं पण्डितरूपपदव्या प्रतिक्षिपति—**तदिति** । * धातुः प्रसादात्, * मत्प्रसादादित्यादिश्रुतिरिह प्रख्यापिता । अत्र च मुख्ये संभवति न गौणत्वकल्पना न्याय्या । प्रशस्तवस्तुविषयतत्तत्कर्मशक्त्यैव फलसिद्धिरित्युक्तं प्रतिवक्ति—**यदपीति** । निष्प्रसादम्—आराध्यप्रसादनिरपेक्षमित्यर्थः । यद्वा क्रियादिस्वरूपं स्वयमचेतनत्वात् प्रसादवन्निष्प्रसादं फलप्रदमिति । उपलक्षणमेतत्, निष्कोपमित्यपि ग्राह्यम् । एतस्य—सर्वकर्तुस्सर्वसुहृद इति भावः । **धर्ममर्मज्ञचित्ता** इत्यत्र धर्माणां कारणभूतं कार्यभूतं च भगवत्कटाक्षणं स्वपीडायां धर्मपीडनात् धर्ममर्मत्वेनोपचरितम् । धर्मस्य यथा परप्रसादः कारणम्, एवमधर्मस्यापि तत्कोपः कारणम् । श्रूयते हि तस्य साध्वसाधुकर्मकारयितृत्वम्; स्मर्यते च बहुशः ॥ ७९ ॥ **इतीश्वरस्य साध्यप्रसादादिमत्त्वम्** ॥

225· **त्रय्यन्तोदन्तचिन्तासहचरणसहैरेभिरस्मिन् परस्मिन्**
भक्तिश्रद्धास्तिकत्वप्रभृतिगुणसिरावेदिभिस्तर्कशस्त्रैः ।
स्वार्थत्वस्वाश्रयत्वस्ववशयतनताद्यूहवर्गोपसर्ग-
श्छिद्येताच्छेद्यपूर्वोत्तरसरयुगलस्यूततत्त्वस्थितीनाम् ॥ ८० ॥

एवं सकलफलप्रदस्य सत्त्वस्थानां स्वयंफलभूतस्य च परस्य प्रतिपादनेन श्रोतॄणामनुनिष्पन्नं फलविशेषमाह—**त्रय्यन्तेति** ॥ पूर्वोत्तरयोस्सरयुगलयोः समर्थितानां चेतनाचेतनतत्त्वस्थितीनां यथासंभवं स्वशेषत्वं स्वाधारत्वं स्वाधीनव्यापारत्वं चेतनान्तरशेषत्वादिकं च विवेकशून्या मन्यन्ते । सोऽयमुपद्रवस्सर्वशेषिणस्सर्वाधारस्य सर्वनियन्तुरीश्वरस्य प्रतिष्ठापकैः प्रमाणानुग्राहकैः प्रतिक्षिप्येतेति ॥ ८० ॥ **इति ईश्वरनिरूपणप्रयोजनविशेषः** ॥

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे नायकसरः तृतीयः ॥ ३ ॥

॥ अथ बुद्धिसरः चतुर्थः ॥ ४ ॥

226. धीत्वाद्वेद्मीति सिद्धा स्वयमितरमतिर्बुद्धिलक्ष्मादिधीव-
यद्वा सर्वज्ञधीवन्न स मतियुगवान्नापि चैकोनवेदी ।
नो चेद्धारामतौ सा प्रथममपि सती नावबुद्धेति धीः स्यात्
स्वस्यां वृत्तेर्विरोधोऽप्युपशमनमियादुक्तदृष्टान्तनीत्या ॥ १ ॥

आत्मतत्त्वं परमपरं च निरूपितम् । अथ यथोद्देशलक्षणं तद्धर्मभूता बुद्धिश्चिन्त्यते । तत्र प्रथमं तत्स्वरूपस्य स्वतस्सिद्धिमाह—**धीत्वा**दिति ॥ इतरमतिः—विप्रतिपन्ना बुद्धिः । स्वयं सिद्धा—स्वगोचरज्ञाननिरपेक्षव्यवहारानुगुणेत्यर्थः । वेद्मीत्युपलम्भानुगुण्यप्रदर्शनम् । अस्ति तावत्सर्वसिद्धान्तिनामिदमहं वेद्मीति कर्मकर्तृघटितक्रियाविशेषावभासः । सोऽयं पूर्वज्ञानगोचरेण मानसप्रत्यक्षेण प्राकट्यलिङ्गजनितेनानुमितिज्ञानेन वेति न केनचिद्दृष्टम् । तत्कल्पने तु गौरवम् । बुद्धि-सामग्र्येवात्र बोद्धृविशेषणत्वेन भातीति चेत्, तदेतदनुमेयवादिनं प्रत्युत्तरं स्यात्, नतु प्रत्यक्षरूपां बुद्धिसिद्धिमिच्छन्तं प्रति । प्रत्यक्षाप्रत्यक्षसमुदायरूपा च सामग्री न प्रत्यक्षा स्यात् । नच प्रत्यक्षं किंचिदन्यद्वेद्मीत्यत्र बोद्धृविशेषणतया भाति । अतो यदत्रैवं प्रत्यक्षं तदेव ज्ञानमिति धर्मिसिद्धिः । तथाऽप्यदृष्टचरं स्वयंप्रकाशत्वं न ज्ञाने कल्पयितुं शक्यम् । तत्रैव तत्सिद्धौ न कल्प्यत्वम्; अन्यत्र तत्सिद्धिरसिद्धा । एवं तर्हि युष्मदिष्टमपि तत्र चान्यत्र चासिद्धं न तत्र कल्प्यमिति पश्य । प्राकट्यानुमेयत्वस्यान्यत्रासिद्धावपि मानसप्रत्यक्षत्वं सुखादिषु स्वात्मनि च सिद्धमिति चेन्न; सुखादीनि स्वात्मा च स्वयं भासन्ते, मानसप्रत्यक्षतो वेति को विविङ्क्ते? अस्तु वा तत्र तत्सिद्धिः; अस्मदिष्टमपि क्वचित्त्वयैष्टव्यमित्यभि-प्रायेणाह—**बुद्धिलक्ष्मादिधीव**दिति । बुद्धिलक्षणधीर्हि लक्ष्यभूतकृत्स्नबुद्ध्यभिव्याप्ता साधारणधर्मविषया तद्योगेन स्वा-त्मानमपि विषयीकरोति । बुद्धिरस्तीति च बुद्धिः स्वात्मना विषयिणी; बुद्धित्वसामान्योपष्टब्धसर्वव्यक्तिभासनात् । न च तदाऽनुव्यवसायाद्यवकाशः, शब्दशब्दादिवत् सामान्यतस्स्वात्मप्रकाशने तन्निरपेक्ष्यात् । बुद्धिव्यतिरिक्तत्वादिबुद्ध्योऽप्येवं ग्राह्याः । दृष्टान्तान्तरमाह—**यद्वा सर्वज्ञधीव**दिति । सामान्यतो विशेषतो वा सार्वज्ञ्यमिच्छतां तद्बुद्धिः स्वात्मानमपि सर्वानुप्रविष्टं युगपदेव प्रकाशयति; अन्यथाऽनवच्छिन्नसर्वशब्दप्रयोगादिकमपि न स्यादिति भावः । यत्तु कैश्चिदुक्तं—सर्वज्ञबुद्ध्यादीनां स्वसंवेद्यत्वमस्ति; न तु स्वयंप्रकाशत्वमिति, तत्तेभ्य एव रोचेत । न ह्यत्र स्वात्मानं प्रति कर्मकारकत्वं स्वबोद्धृत्वं वा विधातुं युक्तम् । नच स्वगोचरधीनिरपेक्षव्यवहारानुगुण्यं निषेद्धुं शक्यम् । अथ केचिदूचुः—स्वेतराशेष-गोचरज्ञानद्वयवत्तया सर्वज्ञत्वमीश्वरस्येति । तद् दूषयति—**न स मतियुगवा**निति । अयं भावः—ईदृशज्ञानद्वयवानीश्वर इत्यत्र न किंचित्प्रमाणं पश्यामः, सर्वज्ञत्वान्यथानुपपत्त्या तत्कल्पनं चायुक्तम्, स्वपरनिर्वाहकसमाधिनाऽपि तदुपपत्तेः । यच्च स्वयंप्रकाशत्वमसहमानैरेकोनसर्वज्ञत्वमीश्वरस्योक्तम्, तत्प्रतिक्षिपति—**नापि चे**ति । यदि स्वज्ञानमीश्वरो न जानाति, तदा अन्येषां हेतूनां तद्बुद्धिविषयभूतानामेव हेतुत्वम्; तद्बुद्धेस्तु तदविषयभूताया इति विभागस्स्यात् । तथाऽन्येषां स्व-गोचरधीविषयतयैव प्रकाशमानत्वम्, तस्यास्तु तन्निरपेक्षमिति किं न विभज्येत? अपि च स्वज्ञानमजानता सर्वज्ञेन स्वस्य तदाधारत्वमन्येषां तदनाधारत्वं तद्विषयत्वतदन्यत्वादीनि स्वज्ञानविशेषणानि सर्वाणि दुर्ग्रहाणि स्युः । ततश्चानन्तज्ञान-वत्त्वमिवानन्ताज्ञानवत्त्वमपि तस्य स्यात् । तथा च जीवप्रायत्वे तै रेवालम् । आयोजनहेतुश्च भग्नव्याप्तिकः; अचेतनाऽपि हि तद्बुद्धिर्न चेतनायोजिता प्रवर्तते । ततश्चादृष्टादेरपि तथात्वं लाघवादेष्टव्यम् । अस्मिंश्च पक्षे सर्वज्ञत्वश्रुतिर्बाध्येत;

भवतां च सर्वज्ञपूर्वकत्वं साधयन्नवीतहेतुरलब्धविषयस्स्यादिति भावः। स्वयंप्रकाशत्वानभ्युपगमे अनिष्टप्रसङ्गमाह—**नो चेदि**ति। क्वचित्क्वचिद्विषये कदाचिद्धारावाहिकबुद्धिस्सर्वसम्मता; सा च पश्चादियन्तं कालमिममर्थमद्राक्षमिति परामृश्यते। न चान्यतः पूर्वं तद्ग्रहसंभवः; धाराविच्छेदप्रसङ्गात्। अतो धारावाहिकधीः पूर्वमनवबुद्धेति भानाभावादवबुद्धेति परामर्शाच्चात्मनैव भातेति भाव्यते। ननु नाङ्गुल्यग्रं स्वात्मानं स्पृशति, न कुठारः स्वात्मानं छिनत्ति, न वह्निः स्वात्मानं दहति, तद्वद्बुद्धेः स्वात्मनि वृत्तिविरोधात् न स्वयंप्रकाशत्वमित्यत्राह—**स्वस्या**मिति। उक्तदृष्टान्तनीत्या—स्वपरनिर्वाहकवर्गन्यायेनेति भावः। यथा चात्मा ग्राह्यश्च ग्राहकश्च, यथा प्रत्यक्षविषयः स्वयं बोध्यः स्वगोचरबोधजनकश्च, एवं यथादृष्टि सर्वमिति ॥ १ ॥ **इति ज्ञानसत्तास्वयंप्रकाशत्वे ॥**

227. **स्मृत्या शब्दानुमानप्रभृतिभिरपि धीर्वेद्यते स्वप्रकाशा**
धीत्वादेस्तामवेद्यामनुपधि वदतः स्वोक्तिबाधादयः स्युः।
वेद्यत्वे सा जडा स्यादिति च विहतिमद्व्याप्तिभङ्गश्च नो चे-
च्छिष्याचार्यादिसर्वव्यवहृतिविरहाज्जातमौनं जगत्स्यात् ॥ २ ॥

अपरे तु बुद्धेः स्वयंप्रकाशत्वं त्रातुकामा वेद्यत्वमपह्नुवते; तान् प्रत्याह—**स्मृत्येति** ॥ अत्र स्वप्रकाशेति संमतांशानुवादो वेद्यत्वविरोधाभावज्ञापनार्थः; स्मृतिस्तावदिह देवदत्तमद्राक्षमित्यादिषु दृष्टा। शब्दश्च बुद्धिपर्यायस्सर्वो बुद्धिं बोधयति; परबुद्धयश्च प्रवृत्त्यादिभिरनुमीयन्ते; स्वबुद्धिं च भविष्यन्तीमनुमाय शृणोति। प्रभृतिशब्देन योगिप्रत्यक्षादिग्रहणं, पराभिमतप्रमान्तरानुधावनं वा। अत्र परोक्तमवीतहेतुमपाकरोति—**धीत्वादे**रिति। आदिशब्देन स्वयंप्रकाशत्वधीशब्दवाच्यत्वादीनि गृह्यन्ते। पुरुषभेदेन कालभेदेन च बुद्धेरवेद्यत्वमस्ति; नतु सर्वैः सर्वदेत्यभिप्रायेणानुपधीत्युक्तम्। आदिशब्देन स्वबुद्धिबाधः स्वसिद्धान्तबाधश्च गृह्यते। तत्र स्वोक्तिविरोधस्तावत्—अनुभूतिः स्वयंप्रकाशा अनुभूतित्वादित्यादिभिर्धर्मिसाध्यहेत्वादिशब्दैरनुभूतिर्बोध्यते न वा? आद्ये कथं न तद्बाधः? द्वितीये कथमयं प्रयोगस्त्वदिष्टं साधयेत्? भ्रान्त्या बोध्यते न तु वस्तुत इति चेत्तर्हि भ्रान्तिसिद्धं बोध्यत्वमनुमतत्वान्न प्रतिषेध्यम्। वस्तुतस्तु बोध्यत्वं न क्वचित्सिद्धमिति तथाऽपि न प्रतिषेध्यम्। अपि च तादृशस्य वेद्यत्वस्याभावस्सर्वत्र वस्सिद्ध इति सपक्षे सति पक्षमात्रवर्ती हेतुरयं कथं[अ]नाभासः? एवं परबुद्धिमहं जानामीति स्वबुद्धिबाधः; ज्ञानरूपब्रह्मबोधनार्थं शास्त्रमिति स्वसिद्धान्तबाधश्च। अत्रानुग्राहकमपि परप्रयुक्तं दूषयति—**वेद्यत्वे** इति। वेद्यत्वे जडत्वप्रसङ्ग इति वदता प्रसञ्जकप्रसञ्जनीयधर्मान्वितत्वेन शब्दवेद्यत्वं स्वीकृतं न वा? पूर्वत्र व्याघातः, उत्तरत्र वैयर्थ्यम्। किंचात्र प्रसज्यमानं जडत्वं वेद्यत्वमात्रं वा, स्वगोचरवेदनेनैव सिद्धत्वं वा, स्वयंप्रकाशत्वाभावो वा, अविदितावस्थायोगो वा, अन्यद्वा किंचित्? न प्रथमः; इष्टप्रसङ्गरूपत्वात्, प्रसञ्जकप्रसञ्जनीययोरविशेषाच्च। न द्वितीयः, अवधारणव्यवच्छेद्यस्य स्वगोचरवेदननिरपेक्षसिद्धित्वस्यानुमानादिना समर्थ्यमानस्य स्वाश्रयवेद्यत्वसहदृष्ट्या प्रसङ्गस्य भग्नव्याप्तिकत्वात्। अत एव न तृतीयः; नामभेदमात्रत्वात्। नापि चतुर्थः, इष्टप्रसङ्गत्वात्; न हि बुद्धिर्विद्यमानावस्थायां स्वबुद्ध्यन्तरविदिता। अप्रकाशमानावस्थाप्रसङ्गे तात्पर्यमिति चेन्न; सर्वेषां सर्वदा अप्रकाशमानत्वावस्थायास्त्वय्यन्तवादिनां घटादिष्वप्यसंमतत्वात्, कदाचित्कस्यचिदप्रकाशमानत्वस्य बुद्धावप्यस्माभिरभ्युपगमात्। नापि पञ्चमः; बुद्धौ दृष्टस्य कस्यचिद्विरुद्धधर्मे प्रसज्यमाने पूर्ववद्व्याप्तिभङ्गादेव। अतथाभूतस्य तु यथासंभवमिष्टप्रसङ्गत्वाद्व्याप्तिरहितत्वाद्वेति। एवं परोक्तं प्रसङ्गं प्रतिक्षिप्य प्रतिप्रसङ्गमाह—**नो चे**दिति। न तावच्छि-

ख्याचार्यौ परस्परबुद्ध्यनभिज्ञौ ; प्रश्नप्रतिवचनाद्यसंभवप्रसङ्गात् । एवं वादिप्रतिवादिप्रभृतयोऽपि मिथो बुद्धिमबुद्ध्यमाना न विवादादिकं कुर्युः ; तथा पामराणामपि संलापो न स्यादिति भावः । नन्वन्तःकरणवृत्तय एव परस्परं बुद्ध्यन्ताम्, तत एव च सर्वो व्यवहारः स्यात् ; न स्यात् ; बाह्यकरणव्यापाराणामिवान्तःकरणव्यापारस्यापि ज्ञानशब्दवाच्यत्वाभावात् । भावे वा तदतिरिक्तचैतन्यस्वीकारायोगात् । एतेन वृत्त्यवच्छिन्नचैतन्यं मिथो वेद्यम्, न तु शुद्धमित्यादिकमपि दुराशामात्रम् ॥ २ ॥ इति **बुद्धेरवेद्यत्वभङ्गः** ॥

228. **बुद्धेरर्थप्रकाशादनुमितिरिति चेत्तन्न साध्याविशेषात्**
साध्याद्भेदेऽपि बुद्धिर्यत उदयति ते स्यात्ततोऽर्थप्रकाशः ।
मध्ये बुद्धिः किमर्था ननु सममुभयोरप्यसाधारणत्वं
तत्सा नित्यानुमेया यदि फलति तदा बुद्धितत्त्वापलापः ॥ ३ ॥

कौमारिलास्तु कथयन्ति—न स्वयंप्रकाशा, नापि मानसप्रत्यक्षा बुद्धिः, स्वफलेन तु विषयप्रकाशेनानुमीयत इति । तदनुभाषते—**बुद्धेरिति** ॥ *बुद्धिलक्ष्मादिधीवदित्यादिना पूर्वोदाहृतं स्वप्रकाशत्वं दुस्त्यजमित्यभिप्रायेण प्रतिक्षिपति—**तन्नेति** । अर्थप्रकाशो बुद्धिरिति हि बुद्धिं लक्षयन्ति । अतः कथं तेनैव लिङ्गेन तस्यैवानुमानमिति व्यञ्जयन्नाह—**साध्याविशेषा**दिति । नन्वर्थगतः प्रकाशो लिङ्गम्, पुरुषगतः प्रकाशोऽनुमेय इत्यत्राह—**साध्या**दिति । अयं भावः—पुरुषगतप्रकाशकल्पनेऽपि यद्यर्थगतप्रकाशमन्तरेण व्यवहारो न जायेत तदा बुद्धिजनकत्वेनाभिमतैव समग्री लाघवादर्थगतप्रकाशस्याव्यवहितहेतुरिति कल्प्यतामिति । फलितमाह—**मध्य** इति । किमर्था—न तावदर्थव्यवहारार्था, नाप्यर्थप्रकाशार्था ; द्वयोरन्यथासिद्धेरिति भावः । प्रतिपुरुषनियतविशेषमन्तरेण कथमर्थप्रकाशः प्रतिपुरुषनियतो भवेदित्यत्राह—**ननु सम**मिति । बुद्धेरिव बुद्धिसामग्र्या अपि तत्तत्पुरुषासाधारणत्वं त्वयाऽपि स्वीकृतम् । अन्यथा कथमेकपुरुषमात्रनिष्ठबुद्धिजनकत्वमिति भावः । उक्तं निगमनेन व्यनक्ति—**तदिति** ॥ ३ ॥ **इति बुद्धेर्नित्यानुमेयत्वभङ्गः** ॥

229. **ज्ञातुर्ज्ञप्तेरलोपं कथयति निगमः स्मर्यते चैवमेषा**
तस्मादेकत्वसिद्धौ प्रसरणभिदया तद्भिदैकत्र पुंसि ।
योग्यादृष्टेरभावान्न च भवति सुषुप्त्याद्यवस्थासु बाध-
स्तत्तद्वस्तुप्रकाशक्षणविरहवती न प्रकाशेत बुद्धिः ॥ ४ ॥

वैशेषिकादयो वदन्ति—अनीश्वराणामात्मनामक्षजन्यमेव ज्ञानं न तु स्वाभाविकमिति । तन्निरासर्थमाह—**ज्ञातु**रिति ॥ श्रूयते हि *न विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यत इत्यादि । नेयं श्रुतिरीश्वरधीविषया, प्रकरणवैघट्यात् । न धीप्रवाहाविच्छेदपरा, सुषुप्त्यादौ तद्विच्छेदस्य युष्माभिरेवोक्तेः । न ज्ञानशक्तिनित्यत्वार्था, मुख्ये सत्युपचारायोगात् । नात्मस्वरूपनित्यत्वार्था, व्यतिरेकोक्तेः । न चात्र सामानाधिकरण्यम्, आत्मस्वरूपनित्यत्वस्थापने विशेषणनैरपेक्ष्यात् । अत्र स्वाभीष्टार्थस्य उपबृंहणसिद्धत्वमाह—**स्मर्यत** इति । एवं—विपरिलोपरहितत्वेनेत्यर्थः । तदाह भगवान् **शौनकः**—*यथा न क्रियते ज्योत्स्ना मलप्रक्षालनान्मणेः । दोषप्रहाणान्न ज्ञानमात्मनः क्रियते तथा ॥ यथोदपानकरणात् क्रियते न जलाम्बरम् । सदेव नीयते व्यक्तिमसतस्संभवः कुतः ॥ तथा हेयगुणध्वंसादवबोधादयो गुणाः । प्रकाश्यन्ते न जन्यन्ते नित्या एवात्मनो हि ते ॥ इति । एवं तर्हि स्मृत्यनुभवरूपेण, प्रत्यक्षपरोक्षभेदेन, दर्शनश्रवणादिभेदेन,

पूर्वापरादिभेदेन च सर्वलोकविदितो धीभेदः कथं निर्वाह्य इत्यत्राह—**तस्मा**दिति। अत्र *प्रज्ञा च तस्मात् प्रसृता पुराणी *तेनास्य क्षरति प्रज्ञा *आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा इत्यादिकमप्यभग्नस्वारस्यमिति भावः। पुरुषभे[द]देन नियतधीभेदस्य प्रसरणभेदोपाधिकत्वाभावादेकत्र पुंसीति नियमितम्। ननु सुषुप्त्यादिषु स्वतोऽन्यतो वा बुद्धेरुपलम्भासंभवान्नित्यत्वश्रुतिः *आदित्यो यूप इत्यादिवदपहृतविषया; तत्राह—**योग्यादृष्टे**रिति। योग्यानुपलब्धेरभावादनुपलब्धिमात्रस्याबाधकत्वाच्च न तदानीं तद्बाधः; यूपद्रव्यस्य तच्छक्तेर्वा तपनतादात्म्यं विरुद्धधर्मसहिततत्तद्धर्मिग्राहकेण विद्रावितमिति भावः। कथमत्र योग्यादृष्टेरभाव इत्यत्राह—**तत्त**दिति। प्रकाशयोग्यदशायामप्रका[शे]शो हि योग्यानुपलब्धिः स्यात्। विषयप्रकाशरहितावस्थायां न बुद्धिरनन्याधीनप्रकाशा। अतस्सुषुप्त्यादौ तस्याः स्वतः प्रकाशयोग्यत्वाभावान्न योग्यानुपलब्धिरिति ॥ ४ ॥ **इति क्षेत्रज्ञबुद्धेरपि स्वरूपनित्यत्वम्** ॥

230. **उत्पत्त्यादेरभावान्न यदि दृशि भिदा नो दशाभेददृष्टेः**
दृष्टादृष्टव्यवस्था क्वचिदिह पुरुषे बुद्ध्यवस्थाभिरेव।
अज्ञानाद्यैरनैकान्तिकमपि न च धीरात्मभेदेऽप्यभिन्ना
ज्ञत्वाज्ञत्वादिभेदः कथमिव घटते सर्वथैका मतिश्चेत् ॥ ५ ॥

यदाहुः—संविन्न नाना उत्पत्तिरहितत्वान्नाशरहितत्वाद्वा, न यदेवं न तदेवं यथा घट इति, तदनुभाषते—**उत्पत्त्यादे**रिति॥ अत्र परमार्थभेदो वा अपरमार्थभेदो वा प्रतिक्षिप्यते? नाद्यः, व्यतिरेकस्थाने घटादौ परमार्थभेदाभ्युपगमप्रसङ्गात्। न द्वितीयः; पक्षे परमार्थभेदाभ्युपगमप्रसङ्गात्। तथा च किं नश्छिन्नं, कल्पितभेदास्वीकारात्? तन्निषेधे स्वमतविरोधश्च। अत एव भेदमात्रप्रतिषेधप्रतिज्ञाऽपि दुश्शकेत्यभिप्रायेण प्रतिवक्ति—**नो** इति। बाधितत्वमाह—**दशाभेददृष्टे**रिति। उत्पत्तिनाशाद्यवस्थास्संविदस्सर्वलौकिकपरीक्षकसंदृष्टाः; तत्प्रतिषेधस्तैरेव प्रतिषिध्येतेति भावः। हेत्वसिद्धिमपि दर्शयन् दशाभेदं दर्शयति—**दृष्टादृष्टे**ति। यदि त्वेकैव बुद्धिस्सर्वदा सर्वविषया, किंचिन्मया दृश्यते नान्यत्, दृष्टं च तत् तदिदानीं न दृश्यत इत्यादिप्रतीताप्रतीतव्यवहाराः प्रलुप्येरन्; चिन्ताबुभुत्साप्रश्नोत्तरादयश्च न भवेयुरित्याशयः। पुरुषभेदनियतबुद्धिभेदस्यावस्थाभेदप्रयुक्तत्वाभावात् **क्वचिदिह पुरुष** इति विशेषितम्। किं चोत्पत्तिरहितः प्रागभावः; त्वदिष्टं देवदत्तादिभेदप्रतिनियतप्रमानिवर्त्यानादिभावरूपं घटाद्यज्ञानं च त्वयैव भेदवत्तयाऽङ्गीक्रियते; नाशरहितश्च घटपटादिप्रध्वंसो नानाभूतः। अतस्तैस्त्वदुक्तमनुमानमनैकान्तिकमित्याह—**अज्ञानाद्यै**रिति। उत्पत्तिनाशाभावद्वयसमुदायात्मा युगलहेतुर्नानैकान्तिक इति चेत्; तदपि न, अत्यन्ताभावैरुभयान्तररहितैः प्रतियोगिभेदेन नानाभूतैरनैकान्त्यस्य दुस्तरत्वात्, तेषां चोत्पत्त्यादिमत्त्वे प्रागूर्ध्वं च तदाश्रये प्रतियोगिप्रसङ्गेनात्यन्ताभावरूपताव्याघातात्। न चैक एवात्यन्ताभावस्सर्वप्रतियोगिकः, एकशून्यस्य सर्वशून्यत्वप्रसङ्गादिति भावः। प्रकारान्तरेणापि बाधं दर्शयति—**न चेति**। अयं भावः—अस्माभिस्तावन्नित्यस्सत्यश्चात्मभेदः स्वीकृतः, युष्माभिरपि काल्पनिकः; पक्षद्वयेऽपि जडपण्डितगुरुशिष्यादिव्यवस्था संविद्भेदमन्तरेण न संपद्येत। ततश्च पुरुषभेदनियतबुद्धिभेदापह्नवस्सहृदयविसंवादीति हृदयम्। उक्तं विवृणोति—**ज्ञत्वे**ति। यत्तु मायाकृतविच्छेदप्रत्ययाच्चिच्छक्तिचित्रभित्तौ विचित्रप्रतिभास इति बाह्याद्वैतिभिरुक्तम्, तत्र यदि वैचित्र्यं सत्यम्, ऐक्यव्याघातोऽपि दुर्वारः। अथ काल्पनिकम्, त्रय्यन्ताद्वैतमतवदेव सर्वोपप्लवप्रसङ्ग इति। सर्वथा—विषयाश्रयस्वगतभेदविधूननेनेत्यर्थः ॥ ५ ॥ **इति पारमार्थिकसंविद्भेदः** ॥

231· भेदादिर्दृश्यभावान्न दृशि दृशितया दृश्यधर्मा न दृक् चेत्
पूर्वस्मिन्नित्यताद्यैरनियतिविहती वाग्विरोधादि शेषे ।
बाधश्चात्र द्वयोस्स्यात् स्वमत इह च यैस्साध्यते ये च साध्या
नैते मिथ्या विरोधान्न दृशिरविमतेः स्यादभावोऽपि धर्मः ॥ ६ ॥

अन्यदपि संविदो निर्भेदत्वे निर्धर्मकत्वे च परोक्तं वीतमवीतं चानुमानमनुभाषते—**भेदादि**रिति॥ आदिशब्देन जन्मादयः स्मृतित्वानुभूतित्वादयश्च गृह्यन्ते । विगीता धर्मा न संविदि वर्तन्ते, दृश्यत्वात् रूपादिवदित्येकः । अनुभूतिर्धर्मरहिता, अनुभूतित्वादित्यपरः । तत्राद्यं दूषयति—**पूर्वस्मिन्नि**ति । अयं भावः—अत्र नित्यत्वस्वयंप्रकाशत्वादयो धर्माः पक्षीक्रियन्ते न वा? न चेत्, तेषां दृश्यत्वेऽपि संविद्वर्तित्वेन तैरनैकान्त्यम्; पक्षीकारे तु सौगतादीन् प्रति त्वयैव साध्यन्ते बाध्यन्ते चेति सिद्धान्तव्याघात इति । द्वितीयमपि दूषयति—**वाग्विरोधादी**ति । आदिशब्देनासिद्धिबाधसिद्धान्तविरोधसंग्रहः । अत्रापि विकल्पतः प्रत्युक्तिः । संविदि निर्धर्मकत्वं साधयता प्रयुज्यमानौ हेतुसाध्यधर्मौ तत्रान्वीयेते न वा? पूर्वत्र स्ववाग्विरोधः, उत्तरत्र हेत्वनन्वयात् स्वरूपासिद्धिः, साध्यानन्वयाद्बाधः, स्वसिद्धान्तसिद्धयोरुभयोरपि प्रतिषेधादपसिद्धान्त इति । किं च—**श्लो.** सत्यधर्मनिषेधे स्याद्घटादेस्सत्यधर्मता । सत्येतरनिषेधे तु दुस्तरं सिद्धसाधनम् ॥ **बाधश्चे**ति । प्रत्यक्षानुमानागमैरिति शेषः । पुनरपि द्वयोस्साधारणं दूषणं वक्तुं विकल्पालम्बनमनुवदति—**स्वमत** इति । युष्मत्सिद्धान्ते साधकत्वेन साध्यत्वेन च ये धर्मास्संगृहीताः ते दृशिस्वरूपादतिरिक्ताः, अनतिरिक्ता वा? अतिरिक्तत्वपक्षे सत्या मिथ्या वा? सत्यत्वे च तत्पक्षीकारबहिष्कारयोरुक्तमेव दूषणम् । मिथ्यात्वं निषेधति—**नैत** इति । मिथ्यात्वे तद्विपरीतानित्यत्वजडत्वादिप्रसङ्गं सिद्धान्तविरोधं चाभिप्रेत्याह—**विरोधा**दिति । अनतिरेकपक्षं प्रतिक्षिपति—**न दृशि**रिति । विरुद्धधर्माध्यासेन व्यतिरेकमभिप्रयन्नाह—**अविमते**रिति । न ह्युभयाविगीतमनुभूतिस्वरूपम्; विगीतं च नित्यत्वादिकं न मिथोऽतिरिच्येतेति भावः । नन्वस्मिन् सिद्धान्ते साधकास्साध्याश्च सर्वे धर्मास्तत्तद्विरोध्यभावमात्ररूपाः ; अतो हेत्वादिसिद्धिर्निर्धर्मकत्वाविरोधश्चेति ; तत्राह—**स्यादि**ति । अयं भावः—अभावरूपा अपि हेतुसाध्यविशेषाः पक्षीकारबहिष्कारसत्यत्वमिथ्यात्वधर्म्यन्वयानन्वयविकल्पैर्यथोचितदूषणग्रस्तैः प्रत्युक्ता एवेति ॥ ६ ॥ **इति संवित्सधर्मकत्वम्** ॥

232· बुद्धिर्द्रव्यं विकारान्वयत इतरवद्बोद्धृवच्चाजडत्वात्
संकोचादिप्रयोगा बहव इह तथा न ह्यमुख्या भवेयुः ।
एवं नास्या गुणत्वं गलति न खलु तत्तन्त्रसङ्केतसिद्धं
लोके धर्मस्वभावो गुण इति विदितं साऽपि सिद्धा प्रभावत् ॥ ७ ॥

प्रागुक्तं बुद्धेर्द्रव्यत्वं प्राप्तावसरे प्रतिष्ठापयति—**बुद्धिर्द्रव्य**मिति । समवायिकारणं द्रव्यमिति वदद्भिः परैरपि विकाराश्रयो द्रव्यमित्यङ्गीकृतम् । अतो विकारान्वयत इति द्रव्यलक्षणयोगकथनम् । इतरवत्—संप्रतिपन्नद्रव्यवदित्यर्थः । यान्यन्यानि द्रव्याणि तानि सर्वाणि यत्किंचिद्विकारवन्ति । अतो द्रव्याभिव्याप्तलक्षणयोगात् द्रव्यत्वं युक्तमिति । न चात्र साध्याविशेषः; द्रव्यशब्दवाच्यत्वसाधने तदभावात् । व्यवहारव्यवस्थापकत्वं च लक्षणस्य परैर[प्य]ङ्गीकृतम् । अनुमानान्तरमाह—**बोद्धृव**दिति । पुरुषस्य स्वयंप्रकाशत्वं प्रागेव श्रुतिभिः प्रदर्शितम्; बुद्धेरप्येतत्सरादौ स्थापितम्; तदयं

प्रयोगः—बुद्धिर्द्रव्यम् स्वयंप्रकाशत्वात् आत्मवदिति । प्रथमस्यासिद्धिपरिहारं द्वितीयस्यानुग्राहकं चाभिप्रेत्याह—**सङ्कोचा-दीति** । सङ्कोचप्रयोगस्तावत् * आवृतं ज्ञानमित्यादिना दर्शितः । आदिशब्देन प्रसरणक्षरणसंग्रहः । तत्प्रयोगश्च दर्शित एव । द्रव्यत्वे ह्येतेषामबाधान्मुख्यत्वम्; अन्यथा श्रुतिस्मृतिसिद्धबहुप्रयोगमुख्यत्वभङ्गः स्यादिति भावः । ननु बुद्धेरात्मगुणत्वं बोद्धृसद्भावागमेषु सर्वेषु प्रसिद्धम्; गुणस्य चाद्रव्यत्वं रूपादिषु दृष्टम्; तदत्र धर्मिग्राहकबाधितमनुमानमित्यत्राह—**एव-मिति** । द्रव्यत्वे सत्यपीत्यर्थः । कथं तर्हि **कणचरणा**दिभिरद्रव्येष्वेव गुणत्वमवस्थापितमित्यत्राह—**न खल्विति** । अर्थ-शास्त्रेषु सन्धिविग्रहादयो गुणत्वेन गृह्यन्ते; तद्वत्परोक्तमद्रव्यनियतं गुणत्वमिह न ब्रूम इत्यभिप्रायः । किंनिमित्तस्तर्हि बुद्धौ गुणशब्दप्रयोग इत्यत्राह—**लोक** इति । दासादयो हि गुणभूता उच्यन्ते, दध्यादिद्रव्यविधानं च गुणविधिरिति व्यवह्रियते । ननु न बुद्धिर्बोद्धृधर्मः; बोद्धा तु तदभिव्यक्तिस्थानम्; तत एव तद्व्यङ्ग्यद्रव्यत्वाद्धर्मत्वारोपः । वस्तुतस्तु सा न द्रव्यं, न च गुण इति परोक्तं बाधितुमाह—**साऽपीति** । प्रभावतो यथा प्रभा धर्मत्वेन प्रख्याता तथा बुद्धिरपि बोद्धृधर्मत्वेन प्रत्यक्षादिभिः प्रसिद्धा; न चात्र प्रतिबिम्बादिवद्बाध इति भावः ॥ ७ ॥ **इति ज्ञानद्रव्यत्वम्** ॥

233. **नित्या धीर्हेतुतोऽस्या भवति विषयितेत्येवमिच्छन्त एव**
द्रव्यत्वं नास्ति बुद्धेरिति गुणगणने तामपि स्थापयन्ति ।
अद्रव्यत्वं कथं स्याद्विकृतिमति विकृत्युज्झने पूर्ववत् स्या-
दित्थंभूताद्विकारान्न भवति यदि नातिप्रसङ्गप्रसङ्गात् ॥ ८ ॥

उक्तार्थे सयूथ्यविमतिं वारयितुं तदुक्तप्रकारं तावदाह—**नित्येति** ॥ एवकारः स्वोक्तिविरोधसूचनार्थः । गुण-गणने—द्रव्यत्वरहितगुणगणनायामित्यर्थः । एवकारद्योतितं विकल्पमुखेन व्यनक्ति—**अद्रव्यत्वमिति** । विकृतिमतीति सामान्याभिप्रायेण नपुंसकलिङ्गनिर्देशः । यदि नित्यायां बुद्धौ तत्तत्सामग्रीभिस्तत्तद्विषयित्वावस्थास्संभवन्ति तदा कथमसौ द्रव्यं न स्यात्? न हि विकृतिमति क्वचिदद्रव्यत्वमन्यत्र संमतम् । विकृत्यसंभवपक्षे दोषमाह—**विकृत्युज्झन** इति । पूर्ववत् स्यात्—सामग्रीसंपातेऽपि प्रागिव न किंचिद्विषयीकुर्यादित्यर्थः । विषयित्वलक्षणविकारेण द्रव्यत्वं न स्यादिति शङ्कते—**इत्थंभूता**दिति । सामान्यलक्षणयोगे सत्यवान्तरवैषम्यात् कथमतज्जातीयत्वमित्यभिप्रायेण प्रत्याह—**नेति** । अन्यथा बाधकमाह—**अतिप्रसङ्गप्रसङ्गा**दिति । द्रव्यत्वेन संमतेष्वपि तत्तदवान्तरविशेषोपादानेन द्रव्येतरत्वसाधनं प्रस-ज्येतेत्यर्थः । तदिह सयूथ्यवाक्यस्य भाष्यानुगुणमान्यपर्यमवसेयम् ॥ ८ ॥ **इति अद्रव्यनित्यबुद्धिवादभङ्गः** ॥

234. **सर्वं ज्ञानं न मानं परमतविजयान्नाप्रमाणं स्वबाधा-**
न्मानामानव्यवस्था तदियमनुमता लौकिकैर्यौक्तिकैश्च ।
तत्रामाने त्ववर्ज्यं स्वरसमिति वदन्त्यन्यथाभानमेके
तत्सामग्र्यैव तादृग्व्यवहृतिमपरे लाघवादाश्रयन्ति ॥ ९ ॥

अथ पूर्वापरसरस्यूतसर्वप्रमेयप्रतिष्ठापकं प्रमाणं शोधयितुं सामान्यतः प्रमाणाप्रमाणविभागं तावदाह—**सर्वमिति** ॥ अयमर्थः—न तावत्सर्वं ज्ञानं प्रमितिः, प्रतिपक्षविजयाभ्युपगमप्रसङ्गात् । यत्र ख्यातिरेव नास्ति तत्र कथं विजयप्रसङ्ग इति चेन्न; स्वहृदयविसंवादात् । परोक्तीनां स्वोक्तिविरुद्धबुद्धिजनकत्वाभावे विवादविलयप्रसङ्गः । अन्यथा स्वोक्तानुभाषण-वर्णक्रमपाठादावपि विवादः प्रसज्येत । अत एव प्रतिपक्षतो जाताऽपि ख्यातिः प्रमितिरिति न वक्तव्यम् । स्वोक्तमात्र-

विषयत्वेऽनुक्तमात्रविषयत्वे स्वोक्तानुक्तमात्रविषयत्वे च विवादायोगात्; विरुद्धविषयत्वे त्वन्यतरबुद्धेरप्रमात्वमपरिहार्यमिति। सर्वबुद्धीनामप्रमात्वमपि प्रतिषेधति—**नाप्रमाण**मिति। स्ववचनस्वसिद्धान्तसर्वलोकधीविरोधमभिप्रेत्याह—**स्वबाधा**दिति। स्वोक्तं लौकिकपरीक्षकसर्वसंमतमित्याह—**मानामाने**ति। एवमन्यथाख्यातिपक्षाभिप्रायेण दर्शिते विभागे **भाष्योक्तं** पक्षान्तरमपि प्रतुष्टूपुरुक्तस्य प्रतीतिस्वारस्यरसिकैरेकदेशिभिस्संगृहीतत्वमाह—**तत्रेति**। अमाने—संशयविपर्ययात्मकबुद्धा-वित्यर्थः। अवर्ज्यं—ख्यात्यन्तरवादिभिरपि दूरापसर्पणेऽपि दुरत्ययम्। स्वत एव रसो यस्य तत्स्वरसम्। अस्ति हि शुक्तिशकलमेव मया रजततया गृहीतमित्यादिप्रतीतिस्वारस्यम्; * योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते * अयथा-वत् प्रजानाति बुद्धिस्सा पार्थ राजसी * अनात्मन्यात्मबुद्धिर्या अस्वे स्वमिति या मतिः इत्याद्याप्तवाक्यस्वारस्यं च। अतो भ्रान्तावन्यथाभानं प्रथममुपन्यस्तं **भाष्यकारा**भिप्रेतमित्येके वदन्ति। केषांचित्पक्षान्तरपरिग्रहं सहेतुकमाह—**तत्सामग्रचेति**। व्यवहारविशेषान्यथानुपपत्त्या ह्यन्यथाभानमवस्थाप्यते; तत्रान्यथाख्यातिसाध्यतयाऽभिमता व्यवहृति-स्तज्जनकतयाऽभिमतसामग्र्यैव संपाद्यताम्; अदृष्टचरान्यथाख्यातिसंग्रह[स्तु]स्तन्मध्ये मुधेत्यपरे समाश्रयन्ति। पक्षद्वयोप-न्यासप्रपञ्चस्तु **न्यायकुलिशे** निपुणमवधारणीयः॥ ९॥ इति **प्रमाणाप्रमाणव्यवस्था**॥

235.　**नाथैरुक्ता यथार्था विमतमतिरपि न्यायतत्त्वे तदेत-**
द्भाष्येऽनूक्तं तदत्र व्यवहृतिरुभयी बाधिताबाधिताख्या।
शुक्तौ रूप्यं प्रभाम्भः श्रुतिनयवशतः स्वाप्नमप्यस्तु सत्यं
योग्यायोग्यादिभेदाग्रह इह चरमां गाहते संप्रतिष्ठाम्॥ १०॥

उक्तपक्षद्वये द्वितीयस्य सांप्रदायिकत्वमाह—**नाथै**रिति॥ विमतमतिः—शुक्तिरजतादिबुद्धिः। सा **न्यायतत्त्वे** भ्रान्त्यधिकरणसिद्धान्ते * षष्ठी चेयं ख्यातिर्यथार्थख्यातिरित्यादिना निरधार्यत। अयं च पक्षः * अथवा, यथार्थं सर्व-विज्ञानमिति वेदविदां मतमिति **भाष्यकारै**रन्वभाषि। कथमस्मिन् पक्षे प्रमाणाप्रमाणव्यवस्थादिकमित्यत्राह—**व्यवहृति**-रिति। बाध्यव्यवहारहेतुर्ज्ञानमप्रमाणं भ्रान्तिरित्युच्यते। तत्र मणिप्रभादिदर्शने मण्याद्यर्थप्रवृत्तौ तत्संवादोऽन्यायत्तः। अबाध्यव्यवहारहेतुर्ज्ञानं प्रमाणमभ्रान्तिरिति व्यवह्रियते। तत्र कदाचित्पक्षिबुद्बुदादौ प्रवृत्तिविसंवादो विषयापक्रमादेरिति भावः। यत्तु शुक्तौ सादृश्यात् रजतसद्भावः; मरीचिकायां पञ्चीकरणानुरोधेन तोयसद्भावः; स्वप्ने च रथादेस्सृष्टि-विशेषतया सत्यत्वं भाषितम्; तत्र विषयसत्यत्वेऽप्यप्रमाणव्यवहारनिदानमाचिख्यासुर्यथाभाषितमनुभाषते—**शुक्ता**विति। प्रभाम्भः—सूर्यप्रभायां दृश्यमानं तोयमित्यर्थः। स्वाप्नं—स्वप्नसिद्धं रथादि। यद्यप्यत्रातस्मिन् तद्बुद्धिर्नास्ति, अतज्जातीय-भेदाग्रहश्च न प्रवर्तकः; तथाऽपि तज्जातीये स्वाभीष्टयोग्यायोग्यादिभेदाग्रहात् प्रवृत्ता व्यवहृतिर्विसंवदेतेत्यप्रमाण-व्यवहारोऽत्यर्थं घटेतेत्यभिप्रायेणाह—**योग्येति**। शुक्तिलीनं रजतं मरीचिकास्थं जलं चाङ्गुलीयकसेकाद्यनर्हम्। अत-स्तदनर्हे तदर्हभेदाग्रहात् प्रवृत्तिर्वितथा भवति। एवं स्वाप्नेष्वपि धनपित्रादिषु जागरदृष्टसरूपेषु तत्तद्भेदाग्रहात् प्रवृत्ता दुराशा मोघा भवति। आदिशब्देन नष्टानष्टादिसंग्रहः। चरमां संप्रतिष्ठां—व्यवहारविसंवादनिदानतामित्यर्थः॥ १०॥

236.　**भेदाज्ञानात् प्रवृत्तौ न कथमुपरतिः स्यादभेदाप्रतीत्या**
रूप्यारूप्यभ्रमादाविव यदि न यतोऽनिष्टभेदाग्रहात् सा।

आधारे भेदवर्जं स्फुरति सदृशवस्त्वन्तरे चोपपन्ना
तत्तद्वस्तूचितैव व्यवहृतिनियतिस्त्वन्मते बुद्धिवन्नः ॥ ११ ॥

नन्वन्वयव्यतिरेकाभ्यां कारणविशेषस्सर्वत्र व्यवस्थाप्यः । तत्र चेतनप्रवृत्तिरिच्छातः ; सा चानुकूलताज्ञानात् । न चात्र ज्ञानेच्छाप्रवृत्तीनां भिन्नविषयत्वं युक्तम् । यद्यपि शुष्के पतिष्यामीति कर्दमे पतति ; तथाऽप्यवशागतप्रवृत्तिन्याय इह नास्थेयः, इदं रजतमित्यत्रेदमर्थभूतभास्वरद्रव्यजिघृक्षयैव प्रवृत्तेः ; न च रजतभेदाग्रहादर्जते प्रवृत्तिः, अग्रहस्य कचिदपि प्रवृत्तिहेतुत्वादृष्टेः ; इति मत्वा भेदाग्रहात् प्रवृत्तावतिप्रसङ्गमाह—**भेदाज्ञाना**दिति ॥ यदि निवृत्तिकारणभूतभेदग्रहाभावात् प्रवर्तते, तथा प्रवृत्तिकारणभूताभेदग्रहाभावात् किं न निवर्तेत ? यथा भेदग्रहस्य निवृत्तिकारणत्वं नेदं रजतमित्यत्र दृश्यते, एवमभेदग्रहस्य प्रवृत्तिकारणत्वम् इदं रजतमित्यभ्रान्तबुद्धौ दृष्टमेव । ततश्चाभेदग्रहरूपप्रवृत्तिकारणाभावात् प्रवृत्तिप्रतिपक्षभूता निवृत्तिः कथं न स्यादिति भावः । अथ रजते प्रवृत्तिरपि रजतभेदाग्रहादेवेति दृष्टम् , स चात्रापि समान इति मन्यसे ; तर्हि रजतार्थिनः कदाचिदरजतान्निवृत्तिरपि रजताभेदाग्रहादिति दृश्यते ; अतो निवृत्तिकारणभूतरजताभेदाग्रहसद्भावात् निवृत्तिरनिवार्येत्यभिप्रायेणोदाहरति—**रूप्यारूप्यभ्रमादावि**वेति । तत्र निवृत्तिरन्यकारणिकेत्यभिप्रायेणाह—**नेति** । हार्दं विवृणोति—**यत** इति । सा—निवृत्तिः । अयं भावः—न ह्यसौ रजतार्थिनस्ततो निवृत्तिरिष्टरजताभेदाग्रहात् , किंतु अनिष्टारजतभेदाग्रहात् । अरजताद्भेदो रजतत्वम् ; तदग्रहादेव हि तत्रापि तदर्थिनो निवृत्तिः । कथं प्रवृत्तिर्निवृत्तिश्च भेदाग्रहतस्स्यातामिति चेत् ; इत्थम्—प्रतियोगिविषयभेदेन सामग्रीभेदात् इष्टभेदाग्रहात् प्रवृत्तिः, अनिष्टभेदाग्रहान्निवृत्तिरिति । किंचोपादानवद्धानमपि प्रवृत्तिविशेषः ; तत्र भेदाग्रहः प्रवृत्तिसामान्यप्रयोजकः ; तद्विशेषस्य तु तद्विशेष इति किं नो बाध्यते ? नन्वधिकरणप्रतियोगिनोरुभयोरन्यतरस्य वा ग्रहणाभावेऽपि तद्भेदाग्रहसिद्धिः । किं तत्रापि प्रवृत्तिः स्यात् ? नेत्याह—**आधार** इति । भेदाधारे भेदमन्तरेण भासमाने सतीत्यर्थः । स्फुरतीत्यत्र ग्रहणतः स्मरणतो वेति यथासंभवं ग्राह्यम् । सदृशवस्त्वन्तरे—अभिमतेऽनभिमते वाऽन्यस्मिन्वस्तुनि । **तत्त**दिति इष्टानिष्टविभागाभिप्रायम् । एवमनभ्युपगमेऽन्यथाख्यातिपक्षेऽप्यतिप्रसङ्गो दुर्वार इत्यभिप्रायेणाह—**त्वन्मत** इति । भ्रान्तेर्हि विशेषाग्रहसहकृतसामग्र्या सिद्धिस्त्वयोच्यते । तत्र न ह्यधिकरणादिग्रहणरहितभेदाग्रहस्य सहकारित्वं मन्यसे । संशयविपर्ययरूपविशेषोत्पत्तौ च विशेषकारणापेक्षां ब्रूषे ; तद्वदिहाप्यतिप्रसङ्गपरिहारः । ननु यदा शुक्तौ रजतभेदाग्रहस्तदा तत्र शुक्तिभेदाग्रहोऽपि विद्यते । अतोऽनिष्टशुक्तिभेदाग्रहात्ततो निवृत्तिः किं न स्यात् ? तव शुक्ति[भेद]भ्रमात्पूर्वक्षणेऽन्यत्र भ्रमकारणतयाऽभिमतशुक्तिभेदाग्रहात् शुक्तिभ्रमः किं न स्यात् ? शुक्तौ शुक्तिभ्रमो न घटत इति चेत्, शुक्तौ रजतधीरप्यघटितैव त्वयाऽङ्गीक्रियते । न हि रजतोल्लेखिनी धीररजतविषयेति घटते ; अदृष्टचरत्वात् । अदृष्टमपि भेदाग्रहविशेषो घटयतीति चेत्, तद्वदिहापि शुक्तौ शुक्तिभ्रममघटितं घटयतु । दर्शनादर्शनाभ्यां विशेष इति चेत्, एवं निवृत्तिहेतुत्वेऽपि निध्यातव्यमिति । एतदपि प्रतिबन्द्यैव प्रज्ञापितम् । अग्रहणस्य प्रवृत्तिकारणत्वं न दृष्टमित्यस्याप्येषैव प्रतिबन्दिः । न ह्यग्रहस्य बुद्धिकारणत्वमप्यन्यत्र दृष्टं भवति । अगत्या कल्पनं त्वन्यत्रापि समानम् ; त्वन्मते गौरवमधिकम् ॥ ११ ॥ **इति अख्यातिसंवलितयथार्थख्यातिपक्षः ॥**

237· **अन्यस्मिन्नन्यबुद्धिर्न यदि न घटते तत्प्रवृत्तिस्तदिच्छो-**
रिष्टं तत्साधनं वा यदभिमतमतोऽन्यत्र सा नेति चेन्न ।

रत्नांशौ रत्नबुद्ध्या विदुरनवगते रत्न एव प्रवृत्तिं
ज्ञातस्वेष्टानुषङ्गादविदितमपि खल्वाददीतात्र चैवम् ॥ १२ ॥

अत्र प्रसङ्गमुखेनान्यथाख्यातिसाधनमनुभाषते—**अन्यस्मिन्निति** ॥ विवादपदं शुक्तिशकलं रजतज्ञानविषयः रजतोपायान्यत्वे सति रजतार्थिप्रवृत्तिविषयत्वात् सम्यग्रजतवत् । यदि पुरोवर्तिनो रजतबुद्धिविषयत्वं न स्यात् किं तत्र पुरुषः प्रवर्तते? सुखे दुःखनिवृत्तौ तदुभयसाधने वा बुद्ध्यारूढे पुरुषस्येच्छा भवति, इष्टे च प्रवर्तते । तदिह शुक्तौ यद्युपादित्साप्रसाधिका रजतधीर्न स्यात्; तर्हि न स्यादेव तत्र प्रवृत्तिरिति । अतोऽन्यत्र सा न—सुखदुःखनिवृत्तितत्साधनबुद्धिविषयादन्यत्र पुंसां प्रवृत्तिर्न दृष्टेत्यर्थः । प्रवृत्तेः स्वविषयबुद्धिपूर्वकत्वनियमो नास्तीत्यभिप्रायेण प्रत्याह—**नेति** । व्यभिचारमुदाहरति—**रत्नांशाविति** । त्वत्पक्षे हि रत्नांशुविषयेण रत्नभ्रमेण प्रसारितहस्तस्तत्रत्यमनवगतं रत्नमुपादत्ते । तत्र रत्नार्थिप्रवृत्तिविषयभूतं रत्नं न प्रवृत्तिहेतुरत्नधीविषयः, प्रभाया एव तत्र धीविषयत्वात् । अस्मत्पक्षेऽपि सामान्यतो रत्नजातीयस्मृत्या प्रवृत्तिः, न तु तदानीं गृह्यमाणरत्नविशेषविषयस्मृत्या; तस्याननुभूतचरत्वात् । सामान्यतो विदितत्वादप्यविदितत्वं नास्तीति चेन्न; एतावता विदितत्वेन प्रवृत्तिविषयत्वेऽतिप्रसङ्गात् । एवं व्यभिचारस्थलान्तरमाह—**ज्ञातेति** । किंचिदिष्टं क्षीरादिकं कश्चिदुपादत्ते; तत्र सामान्यतोऽप्यज्ञाततोयतृणादिकमप्युपात्तं भवति । पुरुषप्रवृत्तिविषयत्वं तत्र नास्तीति चेन्न; ज्ञातानामज्ञातानां च तत्प्रवृत्तिजन्यफलाधारत्वाविशेषात् । तदेवमविदितस्यापि प्रवृत्तिविषयत्वे पुरोवर्तिन इदंत्वेन विदितस्य रजतत्वेनाविदितस्यापि प्रवृत्तिविषयत्वं कैमुत्यसिद्धमित्यभिप्रायेणाह—**अत्र चैवमिति** । चकारात् दूषणान्तरमपि समुच्चिनोति । तत्र रजतोल्लेखस्य शुक्त्युल्लेखरूपत्वमसंभवीति पूर्वमेवोक्तम् । संभवद्विषयत्वे त्वनुमानस्य सिद्धसाधनता, शुक्तिरजते इत्युभयग्राहिण एकज्ञानस्य सर्वसंमतत्वात् । रजतत्वविशिष्टज्ञानविषय इत्युक्तेऽपि स एव दोषः । यज्ज्ञानं रजतत्वाश्रयतया स्वविषयं गृह्णाति तस्य विषय इत्युक्तेऽपि रजतव्यक्तिं रजतत्वाश्रयतया विषयीकुर्वतो ज्ञानस्य शुक्तिरपि विषय इति स्यात् । अथैतन्निष्ठरजतत्वाश्रयतया ज्ञानस्य विषय इति साध्यते, तत्र दृष्टान्तासिद्धिः, साध्यस्वरूपासंभवश्च, एतन्निष्ठरजतत्वाद्यभावात् । स्वविषयरजतताज्ञानविषय इत्युक्तेऽपि न निस्तारः; रजतगतरजतत्वोल्लेखिज्ञानस्यैवैतद्विषयत्वसंभवात् । अथ स्वोपादित्साहेतुभूतरजतज्ञानविषय इति ब्रूषे, तथाऽपि सहकारिविशेषात्तद्धेतुभूतरजतस्मृतेस्सन्निहितासन्निहितानुभवजनितसंस्काराभ्यामुत्पत्तिसंभवात् तद्विषयतयाऽर्थान्तरतैव । रजतानुभवविषय इति विशेषितेऽपि स्मृतिमूलप्रवृत्तिविषये रजते व्यभिचार इति ॥ १२ ॥

238. शुक्तित्वारूप्यतादेर्न तु रजततया भाति शुक्तिर्विगीता
यद्वा धीत्वाद्यथार्था विमतमतिरतो बुद्धिबाधोक्त्ययोगः ।
वैशिष्ट्यासिद्धिमात्रप्रथनमिह परं बाधकस्यापि कृत्यं
किंचासत्ख्यातिरंशे प्रसजति भवतामन्यथाख्यातिवेद्ये ॥ १३ ॥

अन्यथाख्यातिवादमनुमानतोऽपि प्रत्याचष्टे; तत्र बोध्यपक्षीकारेण तावदाह—**शुक्तित्वेति** ॥ विगीता शुक्तिर्न रजततया भाति शुक्तित्वात् अरूप्यत्वाद्वा; आदिशब्देन रजतविरुद्धार्थक्रियाकारित्वसंग्रहः । अन्यथाख्यातिसमर्थनहेतोस्सविशेषणत्वान्निर्विशेषणशुक्तित्वादिहेतुः प्रबल इति द्योतनार्थस्तुशब्दः । किंच मदुक्तस्य विपक्षे गौरवप्रसङ्गो बाधकस्संभवति, न तु त्वदुक्तस्य । प्रवृत्तिविशेषो हि भेदाग्रहादप्युपपन्नो दर्शितः । अथ बुद्धिपक्षीकारेणाप्याह—**यद्वेति** ।

विगीता बुद्धिर्यथार्था बुद्धित्वात्संप्रतिपन्नवत् । नन्वन्यथाख्यातिपक्षीकृतावाश्रयासिद्धिर्धर्मिग्राहकविरोधो वा । अथ विषयांशभेदेन तद्याथात्म्यमभिप्रेतं तदा सिद्धसाधनम्, धर्मिणस्समानधर्मस्य चानारोपितत्वात्; बुद्ध्यन्तरपक्षीकारेऽप्ययमेव दोष इति । मैवम्; अत्र हि पुरोवर्त्यर्थं व्यवहर्तुरुपादित्सां प्रत्यव्यवहितहेतुभूता काचिद्बुद्धिरस्तीति सामान्यत उभयाभ्युपेतम् । यद्यपि सिद्धस्य वाऽसिद्धस्य वा धर्मिणस्सत्त्वासत्त्वे विधिनिषेधानर्हे । तथाऽपि गृह्यमाणयत्किंचिदाकारेण सत्ये पर्वतादौ अवयविसङ्घातप्राकृतपरिणामादिविवादानादरेण पक्षीकरणं सर्वसंमतम् । तद्वदिहापि शुक्तिविषयत्वतदविषयत्वादिविवादे सत्यप्युभयानुमतोपादित्साकरणत्वविशिष्टज्ञानपक्षीकारेणात्र प्रयोगोपपत्तिः । यथा च प्रमितिरूपत्वभ्रान्तिरूपत्वविशेषानादरेण शुक्तिशकलस्य रजतज्ञानविषयत्वमात्रं सामान्यतस्साध्यते, तत्र च प्रमितिरूपत्वे विरोधः भ्रान्तिरूपत्वे त्वप्रसिद्धविशेषणत्वमिति पर्यनुयोगं न क्षमसे; एवमिहापि सामान्यतः पक्षसिद्धिरिति मध्यस्थदृष्टिमनुसंधत्स्व । तथाऽप्यत्र साध्यं यथार्थत्वम्? अनारोपितविषयत्वम्? आरोपितविषयरहितत्वं वा? आद्ये धर्म्यंशादेरनारोपितत्वात्तद्विषयत्वेन सिद्धसाधनत्वम् । आरोपितविषयत्वात्यन्तासिद्धौ चानारोपितविषयत्वमपि दुर्वचम् । अत एव न द्वितीयः, निष्प्रतियोगिकनिषेधायोगादित्यत्राह—**अत** इति । यथार्थत्वप्रतिज्ञानवशाद्व्यवच्छेद्यत्वेन क्वचित् बुद्धिबाधः स्यादित्युक्तेरयोग इत्यर्थः । अयं भावः—**योगाचारा**दयो हि स्वप्नादिनिदर्शनेन सर्वप्रत्ययानां प्रत्ययत्वेनायथार्थत्वं साधयन्ति; सर्वत्रासिद्धं च यथार्थत्वं प्रतिषेध्यं प्रतिपद्यन्ते; तानुद्दिश्यायं प्रयोगः स्यात्; पिशाचानां पिशाचभाषयैव ह्युत्तरं देयम् । तदिह यद्वेत्यनेन पक्षान्तरान्वारोहः प्रख्याप्यते । कस्तर्हि तान् प्रति दृष्टान्तो वाच्यः? यस्तेषां स्वपक्षसाधकबोधः । नहि तस्यायथार्थत्वं तैर्वक्तुं युक्तम्, स्वपक्षासिद्धिप्रसङ्गादिति । ननु बुद्धिबाधः कश्चित्सिद्धो न वा? आद्ये कथं तन्निषेधः? द्वितीये कथंतरामिति चेत्; उच्यते, नहि वयं बुद्धिबाधशब्दस्य कंचिदर्थमनुमत्य प्रतिषेधामः, किंतु बुद्धिबाधोक्तिरयोग्यपदसमभिव्याहाररूपा न विशिष्टमर्थं बोधयतीति तत्प्रयोगास्यायुक्ततामात्रं ब्रूम इति भावः । एतेनान्यथाख्यातिः क्वचिदस्ति न वेत्यादिकमपि प्रत्युक्तम् । अस्ति तावत् परस्परविरुद्धाकारभानरूपान्यथाख्यातिस्सर्वेषु वस्तुषु । सेयं शुक्तिविरुद्धाकारवत्तया अन्यत्र सिद्धा । अन्यथाख्यातिश्शुक्त्यालम्बना न भवतीत्युक्तौ क्वचित् सिद्धस्यैवान्यत्र निषेधः । यत्तु शुक्तेरेव बाधदशायां रजतादन्यथात्वेन भानम्, न तन्निषेध्यम्; स्वाकारविरुद्धाकारवत्तया भानमिति त्वयोग्यपदसमभिव्याहारमात्रमिति । ननु पूर्वधीबाधाभावे परस्य कथं बाधकत्वमित्यत्राह—**वैशिष्ट्ये**ति । बाधकज्ञानं हि पुरोवर्तिनि रूप्यत्ववैशिष्ट्यं नास्तीति बोधयति; तच्च रूप्ये सिद्धं प्रतियोगि भवति । अत एव भेदग्रहसिद्धौ भेदाग्रहप्रभवप्रवृत्तिरूपसाध्यापहारात् पूर्वोत्तरधियोर्बाध्यबाधकत्ववाचोयुक्तिरिति भावः । असत्ख्यातिदूषणेनान्यथाख्यातिं साधयतामनिष्टप्रसङ्गमाह—**किंचे**ति । यद्यप्यधिष्ठानं सत्यं भाति; यद्यपि रजतस्य रजतत्वस्य चान्यत्र सिद्धेस्तदारोपे नात्यन्तासत्ख्यातिः; तथाऽपि शुक्तिशकले रजततादात्म्यस्य रजतत्वसंसर्गस्य वा तत्र चान्यत्र चासिद्धस्य निषेध्यस्य ख्यातिविषयत्वादत्यन्तासत्ख्यातिरनिवार्या । एतावदसत्ख्यातिरङ्गीक्रियत इति चेदिदमपि गौरवान्तरम् । तथा चासत्ख्यातिदूषणाद्विरन्तव्यम्; अन्यथाख्यातिसाधनाद्वेति ॥

239. योऽसौ बोधोऽन्यथाधीजनक इति जगे भ्रान्तिरित्युच्यतेऽसौ
नेत्थं बोधापलापः क्वचिदपि वदतां बोधमध्यक्षसिद्धम् ।
यत्र प्रत्यक्षसिद्धादधिकमपि परे निष्फलं कल्पयेयुः
सिद्धैरेवात्र तत्तद्व्यवहृतिरिति हि स्थापितं भाष्यकारैः ॥ १४ ॥

नन्वन्यथाख्यातिमपह्नुवानानां सर्वस्या बुद्धेर्याथार्थ्याविशेषाद्भ्रान्तिशब्दः क्वचिदपि न स्यात्। न ह्यसावसाधुः; न च साधुरपि निर्विषयः स्यात्। स्पष्टदृष्टबोधापलापे च सर्वबोधापलापप्रसक्त्या विश्वविलोपस्स्यादित्यत्राह—**योऽर्थाविति** ॥ अयं भावः—अस्ति ह्यधिष्ठानादिगोचरं भेदाग्रहविशेषसहकृतं भ्रान्तिजनकत्वेन युष्मदभिमतं किंचित् ज्ञानं, तदेव भ्रान्तिरित्युच्यते। न चात्र बोधापलापः; ईदृशबोधोपलम्भस्याभ्युपगमात्, तदतिरिक्तबोधोपलम्भस्याभावाच्चेति। नन्वनादेशिकमेतत् भाष्यादिष्वनुक्तेरित्यत्राह—**यत्रेति**। यत्र संप्रतिपन्नैः कैश्चिद्व्यवहारस्संभवति तत्र मध्ये न किंचित् कल्पनीयमित्यभावजात्यवयविभेदादिनिरासे **भाष्यकारै**र्निरणायि, प्रस्तुतार्थश्च भ्रान्तिचिन्तायां प्रदर्शितप्राय इति। *ननु चाख्यातिपक्षेऽप्यन्यविशेषणमन्यविशेषणत्वेनेति **भाष्ये** कथं चोदितम्? किमिति वा तत्राप्रदिष्टोत्तरम्? सत्यं, तदुच्यते—सर्पभूदलनाम्बुधारादिभ्रमेष्वयं सर्प इदं भूदलनमियमम्बुधारेति सर्पादिविशेष्यलिङ्गभाञ्जि विशेषणानि भवन्ति; इदं च समानाधिकरणत्वाभिमानात्। अतोऽन्यथाख्यातिरवर्जनीयेति चोद्याभिप्रायः। परिहारानुक्तिस्तु तत्तद्भेदाग्रहनिबन्धनवाचकव्यवहारविशेषमात्रमिति स्वयमूहक्षमशिष्यशिक्षार्थेति। **श्लो.** तर्कतत्फलसामर्थ्यादन्यथाधीप्रसञ्जनम्। दत्तोत्तरमिति ग्राह्यं दृष्टगौरवलाघवैः ॥ यदेतदाहार्यव्याप्यजनितमारोपितव्यापकविषयं ज्ञानं तर्क इति ब्रूषे, तज्जनकतयाऽभिमतज्ञानस्यैव तर्कशब्दवाच्यत्वं, तस्यैव च मानानुग्राहकत्वमिति ॥ १४ ॥ **इति अन्यथाख्यातिभङ्गप्रकारः** ॥

240. **एकाधारे विरुद्धाकृतियुगयुगपत्ख्यातिरन्योन्यबाध्या**
डोलाविक्षेपकल्पा तदनियतिरियं धीक्रमे साक्षिणी नः।
तस्मात्तद्विशेषस्मृतिसमसमयं छन्नतर्त्ताद्विरोधः
ख्यातस्साधारणोऽर्थः परमिह विशये येन बुद्ध्यन्तरं वः ॥ १५ ॥

अथ स्यात्—विरुद्धानियतकोटिद्वयगोचरं संशयात्मकं ज्ञानं सर्वेषां प्रसिद्धम्; तच्च वस्तुनि विकल्पस्य विरुद्धानियताकारत्वस्य चायोगात् अन्यथाख्यातिरूपमेव। तदनभ्युपगमे *सन्दिग्धे न्यायप्रवृत्तिः *विषयस्संशयश्चैवेत्यादिकमुच्छिद्येतेत्यत्राह—**एकाधार** इति ॥ अयं भावः—यदि स्थाणुत्वविशिष्टतया पुरोवर्ति भायात्, पुरुषत्वविशिष्टतया न भायादेव; तथाऽन्यत्र सर्वत्र दृष्टेः। तदयं प्रयोगः—विप्रतिपन्नं स्थाणुपुरुषभानं भिन्नाधा[र]रे स्थाणुत्वपुरुषत्वे बोधयति स्थाणुपुरुषभानत्वात् स्थाणुपुरुषाविति भानवत्। ततश्च पुरोवर्तिभानं स्थाणुपुरुषभानं च मिथो भिन्नमिति सिद्धम्। तस्मादूर्ध्वद्रव्यभानमनुभवः; स्थाणुपुरुषभानं तु स्मरणम्। न चैकस्मिन् पुरुषे स्मृत्यनुभवयोरेकदा संभवं मन्यसे; स्मर्यमाणाधारसंशये धर्मिस्फुरणस्य कोटिद्वयस्फुरणस्य च स्मृतित्वाविशेषेऽपि धर्मिस्फुरणस्य कोटिद्वयस्मृतिहेतुसंस्कारोद्बोधकतया पूर्वत्वमनिवार्यमिति। प्रकारान्तरेणापि धीक्रमं साधयति—**डोलेति**। संशयडोलाधिरूढो डोलायमानमानस इति रूपकोपमानाभ्यां क्रमेण विरुद्धयोगिसारूप्यं व्यज्यते। अनियतत्वव्यञ्जकश्च वाकारप्रयोगोऽन्यतरस्फुरणमितरोल्लेखवर्जितं स्वरसतो दर्शयति। न ह्यसाविह समुच्चयार्थः, तथा सत्यनियमानुल्लेखेन संशयरूपत्वाभावप्रसङ्गात्; वाकारश्चाविशेषात् प्रयुज्येत। नाप्युपमानार्थः, धर्मिणस्तत्तदन्यत्वानिश्चयेन तत्तदुपमेयत्वायोगात्। न च मिथः; अयमिति पुरोवर्तिनिर्देशेनाघटितत्वात्, अध्याहारवाक्यभेदयोरवर्जनीयत्वाच्च। अतोऽत्र विकल्पतः प्रवृत्तमिदमव्ययम्; तत्त्वे अतदयोगात्। ऊर्ध्वः पदार्थः कश्चित् स्थाणुर्भवति, कश्चित्पुरुषो भवतीत्यूर्ध्वत्वस्य स्थाणुत्वपुरुषत्वाभ्यां विभज्य साहचर्यं व्यनक्ति। तदिहायमिति पुरोवर्तिमात्रमगृहीतविशेषमनुभूयते, स्थाणुपुरुषौ तु स्मर्येते इति विभागः। एतदेव निगमन-

व्याजेन स्पष्टयति—**तस्मा**दिति । समसमयमित्यगृहीतक्रमयोरनुभवस्मृत्योर्निरन्तरभानाभिप्रायम् । अथवा पुरोवर्त्यनुभवजनितसंस्कारेण कोटिद्वयस्मृतिहेतुसंस्काराभ्यां च संभूय तैर्युगपदेकस्मृतिसंभवात्तदुल्लिख्यमानविषयत्रययुगपत्प्रकाशख्यापनार्थमेतत्। **छन्नतत्तद्विरोध** इति। एतद्भेदकधर्मानुल्लेखपरम् । साधारणः—साधारणाकारविशिष्ट इत्यर्थः । परं—पश्चात्, केवलमिति वा । एतावतैव संशयव्यवहार इति भावः । ईदृशस्य ज्ञानस्य संशयव्यवहारजनकत्वं न क्वचिद् दृष्टमित्यत्र लाघवं प्रतिबन्दिं चाभिप्रेत्याह—**येने**ति । साधारणख्यातिपरामर्शोऽयम् । ईदृशबोधेन संशयरूपज्ञानोत्पत्तिरप्यन्यत्र न दृष्टा; व्यवहारविशेषस्तु त्वदिष्टतत्कारणेनैव सिध्येदिति भावः । **श्लो.** ऊहानध्यवसायौ च परोक्तौ संशयात्मकौ । तदन्यत्वेऽपि निर्वाहस्समानन्यायतः स्थितः ॥ १५ ॥ **इति संशययाथार्थ्यप्रकारः ॥**

241. **दुस्साधा बाधधीभ्यां सदसदितरता कुत्रचिद् व्याहतत्वात्**
सत्त्वासत्त्वं च ताभ्यां कथमिव न भवेद्व्याहतेश्चेत् समं तत् ।
दृष्टत्वाद्वा विशेषः क्वचिदपि न हि नस्सर्वरूपेण सत्त्वं
नासत्ता चानुपाधिर्न च विमतिरिह ब्रह्मतुच्छातिरेके ॥ १६ ॥

श्लो. सयूथ्यमतभेदौ द्वौ भ्रमे किंचित्प्रदर्शितौ । अथ प्रतिमतस्थानां प्रलापः प्रतिरुध्यते ॥ तत्र तावत् कचोल्लुञ्छनमतोज्झितामनिर्वचनीयख्यातिमधिक्षिपामः । तत्र यदाहुः—* सत्त्वे न भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधने । सदसद्भ्यामनिर्वाच्येत्यादि । अनिर्वाच्यत्वं नाम किं वाच्यादन्यत्वम्, वाच्यत्वराहित्यम्, निरुपाख्यत्वम्, सदसदन्यत्वम्, सत्त्वासत्त्वरहितत्वम्, ब्रह्मतुच्छविलक्षणत्वम्, अन्यद्वा किञ्चित्? नाद्यः; सर्वलौकिकवैदिकव्यवहारविरोधात् स्ववचनादिविरोधाच्च । वाच्यानामेव मिथोऽन्यत्वेन तत्साधने सिद्धसाधनात् । सर्ववाच्यान्यत्वमप्येकैकस्मिन्विद्यत एव ; न ह्येकैकस्यापि वाच्यस्य सर्ववाच्यत्वम् । सर्वेषां वाच्यान्योन्याभावानामाश्रयत्वमित्यप्ययुक्तम् ; अनिर्वाच्यादिशब्दवाच्यस्य स्वान्योन्याभावाधारत्वायोगात् । अत एव न द्वितीयः ; ब्रह्मणि तुच्छे च वाच्यत्वानभ्युपगमात्; तयोरपि प्रपञ्चतुल्यत्वस्वीकारप्रसक्तिश्च । न तृतीयः, निरुपाख्यशब्दस्य यौगिकत्वे दत्तोत्तरत्वात्, निरुपाख्योपाख्यया च त्वयैव विगीतस्योपादानात्, रूढिमात्रस्य परिभाषाप्रायत्वेन विगीतसत्यत्वानुपरोधित्वात्, खरशृङ्गाद्यविशेषसाधने दृष्टविरोधादपसिद्धान्ताच्च । एवं स्थिते चतुर्थादीन् दूषयति—**दुस्साधे**ति ॥ बाधधीभ्यामित्युपलक्षणम् । नाशधीभ्यामित्यपि भाव्यम् । अयं भावः—सदसदन्यत्वं तावत्सतामेव सदन्तरव्यावृत्त्या तुच्छव्यावृत्त्या च संभवति । सर्वेभ्यस्सद्भ्योऽन्यत्वं च त्वया दुर्वचम् ; अनेकसदनभ्युपगमात् । यद्यपि पारमार्थिकं सदेकमेव; तथाऽपि प्रातिभासिकानि व्यावहारिकाणि च बहूनि सन्तीति चेत्, किमतः? अनिर्वचनीयत्वाभिमतस्य व्यावहारिकसतः स्वस्मादन्यत्वायोगेन सर्वसदन्योन्याभावकात्स्न्यासिद्धेः; व्यावहारिकराशिबहिर्भावाभ्युपगमे च पारमार्थिकप्रातिभासिकतुच्छकोटिप्रवेशप्रसङ्गेन स्वमतादिव्याघातात् । अत एव सत्त्वासत्त्वरहितत्वमपि निरस्तम्; व्यावहारिकसत्त्वराहित्यस्य सत्त्वमात्रराहित्यस्य वा साधने व्याघातात् । पारमार्थिकसत्त्वराहित्यविवक्षायां तु ब्रह्मतुच्छयोरपि तद्राहित्यात्तदविशेषप्रसङ्गः; नहि ब्रह्मण्यपि पारमार्थिकं सत्त्वं नाम धर्मस्त्वयेष्यते । तदपि तत्र प्रपञ्चवत् कल्पितमिति चेत्, अन्यत्रापि तस्य कल्पितत्वादविशेष एव । ब्रह्मणि च तस्य कल्पितत्वे कथं ब्रह्म परमार्थसत्? तथात्वे वा विगीतमपि कथं न तथा? एवं ब्रह्मतुच्छान्यत्वमपि दुस्साधम्; सत्यस्य तस्य असत्यवृत्तित्वव्याघातात् । तदसत्यत्वे तु सत्यासत्ययोस्तुच्छातुच्छयोश्च तादात्म्यापत्त्या व्याघातादेव । ब्रह्मणि तुच्छे च ब्रह्मतुच्छान्यत्व-

मसत्यं विद्यत इत्यविशेषश्च । यदप्यन्यत्किंचित् तदपि विगीते सत्यत्वं सहेत न वा? पूर्वत्र न विवादः; उत्तरत्र स्वयं सत्यमसत्यं वा? आद्ये ब्रह्मान्यत्वानन्यत्वोभयसमुच्चयोभयप्रतिषेधविकल्पेनापसिद्धान्तसिद्धसाधनत्वव्याघातादयः । द्वितीये स्वसाध्यमसत्यं वदतस्ते न किंचिदन्यैर्दूषणं देयम्; तत्प्रदानफलस्य त्वदुक्त्यैव सिद्धत्वादिति । अथ प्रतिबन्द्यभिप्रायेण विपरिवर्तं प्रसञ्जयति—**सत्त्वासत्त्व**मिति । समाहारद्वन्द्वोऽयम् । चकारो जैनानुधावनप्रसक्तिं सूचयति । ख्यात्यन्यथानुपपत्त्या सत्त्वं बाधान्यथानुपपत्त्याऽसत्त्वं किं न कल्प्यत इति भावः । प्रतिक्षेपार्थं कथंशब्दं प्रश्नार्थं मन्यमानस्य प्रत्युक्तिं शङ्कते—**व्याहतेश्चे**दिति । सत्त्वासत्त्वयोस्सितासितत्वन्यायेन मिथो विरोधान्नैकत्रैकदा तयोस्संभव इति भावः । हार्दमुद्गिरति—**समं त**दिति । तत्—व्याहतिप्रयुक्तमभवनं त्वदुक्तेऽपि समानमित्यर्थः । अयं भावः—यदि सत्त्वमसत्त्वं च मिथो विरुद्धं मन्यसे तदा तदभावयोरपि तथात्वं नान्तरीयकम् । यद्यपि परस्पराभावव्याप्यमात्ररूपाणां शीतोष्णनीलपीतादीनां मिथो विरोधेऽप्युभयाभावः क्वचिन्न विरुध्यते, दृष्टस्य दुरपह्नवत्वात्; तथाऽप्युष्णत्वानुष्णत्वनीलत्वानीलत्वादीनामिव परस्पराभावात्मनोस्सत्त्वासत्त्वयोरेकत्रोभयसमुच्चयवदुभयव्यतिरेकोऽपि व्याहत एव; यत्र सत्त्वं तत्र नासत्त्वं यथा ब्रह्मणि, यत्रासत्त्वं तत्र न सत्त्वं यथा कूर्मरोमणीतिवत् । यत्र सत्त्वाभावस्तत्र नासत्त्वाभावः, यथा खपुष्पे; यत्र नासत्त्वाभावः तत्र न सत्त्वाभावः, यथा ब्रह्मण्येवेति नियमस्य निर्व्याघातत्वादिति । यदि समत्वं तर्हि त्वत्पक्षाय कुतस्तुष्यसि मत्पक्षाय किमिति कुप्यसीत्यशिक्षितप्रतिबन्दिशक्तेरनुयोगे सत्त्वासत्त्वसमुच्चयपक्षस्य प्रत्यक्षाद्यानुगुण्यमाह—**दृष्टत्वा**दिति । अनयोस्सहभावः क्व दृष्ट इत्यत्र सर्वत्रेत्यभिप्रायेणाह—**क्वचिदपी**ति । सर्वरूपेण—सर्वप्रकारेण । कालतो देशतस्स्वभावतश्च तत्रतत्र नियतं हि सत्त्वम्; अन्यथा सर्वनित्यत्वसर्वविभुत्वसर्वाद्वैतवादानां प्रसङ्गात् । असत्त्वमपि तथैव; अन्यथा सर्वशून्यत्वप्रसङ्गात् । एतावत् सदसत्त्वमविरोधादङ्गीकुर्मः; नान्यद्विरुद्धमिति चेत्, सदसद्व्यतिरेकमप्येवं यथादर्शनमविरुद्धमेवाङ्गीकुरुष्व; नतु विरुद्धम् । सदसद्व्यतिरेकवादः शास्त्रेषु दृश्यत इति चेत्, तथा सदसत्त्ववादोऽपि तत्रतत्र दृश्यत एव । अन्यविषयोऽयमन्यपरश्चेति चेत्, त्वत्प्रदर्शितोऽपि तथैवेति । सदसद्विलक्षणशब्देन ब्रह्मतुच्छान्यत्वविवक्षायां दूषणान्तरमाह—**न चेति** । इह—प्रपञ्चे । ब्रह्मतुच्छान्यत्वस्यासदभिमतत्वात्तत्साधने सिद्धसाध्यत्वप्रसक्तिरिति भावः । एतेन **श्लो.** सत्त्वे न भ्रान्तिबाधौ स्तां नासत्त्वे ख्यातिबाधने । सदसद्भ्यामनिर्वाच्याविद्याविद्यैस्सह भ्रमः ॥ इति डिम्भजृम्भितं प्रत्यूढम् । यदपि तत्तन्निर्वचनखण्डनया सर्वमनिर्वाच्यमिति; तदप्यनिर्वचनीयनिर्वचनखण्डनया सर्वं निर्वचनीयं भवेदिति प्रतिवक्तव्यम् । निर्वचनीयत्वानिर्वचनीयत्वखण्डनयाऽपि प्रपञ्चस्यानिर्वचनीयत्वं सिध्येदिति चेत्; ब्रह्मतुच्छयोरपि तत्खण्डनया किं तन्न सिध्येत्? सिध्यतु, न ततः प्रस्तुतबाध इति चेन्न; तृतीयसौगतसीमातिलङ्घनेन तुर्यसौगतगङ्गाप्रवेशप्रसङ्गात् । **श्लो.** किंच निर्वनीयत्वखण्डनोक्त्यनिरुक्तितः । विश्वनिर्वचनीयत्वमखण्डितमपेक्ष्यताम् ॥ एवं त्वदभिमतानिर्वचनीयासंभवात् न तत्ख्यातिसाधने यतितव्यम् ॥ १६ ॥ **इत्यनिर्वचनीयख्यातिभङ्गः** ॥

242. रूप्यं जातं तदा चेन्न रजतमिति धीरप्रमा स्यादमुष्मिन्
कार्यासामर्थ्यमात्रान्न तदिति कथनं कल्पतेऽतिप्रसक्त्यै ।
शुक्तौ चैतत्तदात्वे कथमिव जनयेद् दुर्घटाऽनाद्यविद्या
नाक्षादिस्त्वर्थहेतुर्न च रजतमतिस्सा हि तेनैव जन्या ॥ १७ ॥

यदपि शुक्तिप्रदेशनियताविद्याशकलशबलिताद्ब्रह्मणः किमप्यनिर्वचनीयं रजतं तदानीमुत्पन्नम् इदं रजतमिति भातीति भावयन्ति, तद्दूषयति—**रूप्यमि**ति ॥ यदि सामग्रीविशेषात्तत्रोत्पन्नं रजतजातीयं रजतमिति गृह्येत तदाऽऽपणस्थ-रजतधीवदमुष्मिन्नपि रजतधीरप्रमा न स्यात् । अपि चामुष्मिन् नेदं रजतमिति बाधकधीरप्रमा स्यात् । तथा च बाधायोगा-दबाधितस्य सत्यत्वसिद्धिः । रजते च रजतान्यत्वमुल्लिखन्ती बुद्धिरन्यथाख्यातिस्स्यात् । अथ नेदं रजतमिति बुद्धिश्शुक्ति-विषयेत्युच्यते, तदा [अनया] पूर्वसिद्धस्य रजतस्य कथं बाधः? नहि रजतसंसृष्टस्यापणादेररजतत्वबुद्ध्या रजतं बाध्येत । अन्यथा तत्र रजते नेयं शुक्तिरिति बुद्ध्या शुक्तिरेव किं न बाध्येत? ननु नेदं रजतमिति बुद्धिरध्यासाधिष्ठानं ब्रह्म रजतान्यत्वेन गृह्णती तत्रतत्र रजतात्मतां बाधतां, तर्ह्यरजतस्याधिष्ठानस्य रजतात्मताबुद्धिरन्यथाख्यातिरेवेति मुधा तत्प्रद्वेषः । अधिष्ठानरजतयोर्भेदबुद्ध्या च न रजतबाधः; किंतु तदुभयनिरूपितं तादात्म्यमेव बाध्येत । तथाऽप्यधिष्ठानस्य निषिध्य-मानात्यन्ताभावाधिकरणत्वग्राहिणी निषेधबुद्धिस्तत्रत्यं रजतत्वमेव बाधत इति चेद्बाध्यतामधिष्ठाने तत्र रजतत्वम्; किमा-यातं तत्रोत्पन्नस्य तन्निष्ठरजतत्वस्य, निषेधाभावात्? न हि रजतत्वं किंचिन्निष्ठात्यन्ताभावप्रतियोगित्वग्रहणेन सर्वत्र मिथ्या भवति । अपि चास्य रजतत्वस्य स्वाधिकरणतया प्रतिपन्ने निषेधाद्बाधः? उत यत्किञ्चिन्निष्ठात्यन्ताभावबोधात्? आद्ये ऽन्यथाख्यातिरनिवार्या ; तदनधिकरणे तदधिकरणत्वबोधात् । द्वितीये विगीतस्य को विशेषः, सर्वस्य सर्वनिष्ठत्वाभावात्? **श्लो.** जाते च सदसद्बाध्ये सदसद्धीः क्रमात्सती । स्वच्छायामिव दुर्लङ्घ्यामन्यथाख्यातिमावहेत् ॥ अन्यथाख्याति-रस्तीति परबुद्धिं निषेधता । इष्टा तदन्यथाख्यातिरन्यथा किं निषिध्यते ॥ अथ स्यात्—उत्पन्नमेव रजतं रजत-कार्यानर्हतया नेदं रदतमिति निषिध्यते, अगोप्ता राजा न राजेति न्यायादिति; तत्राह—**कार्येति** । अयमाशयः—नहि किंचिज्जातीयं कुतश्चिद्वैगुण्यात्तज्जातीयकार्यानर्हत्वेनातज्जातीयमनृतं वा भवति, अतिप्रसङ्गात् । अतस्तज्जातीयेऽप्यत्रा-तज्जातीयत्वोपचारमात्रमिति न बाधसद्भावः । ननूपचारोऽपि बाधाविनाभूतः; सत्यम्; न तत्रोपचर्यमाणस्वभावबाधः, किं तूपचारशब्दमुख्यार्थबाधमात्रम् । तथाऽप्यरजतशब्दमुख्यार्थबाधे रजतं प्राणित्येवेति । एवमप्यत्र योज्यम्—कार्या-सामर्थ्ये सत्यपि तदिति कथनं नातिप्रसक्त्यै कल्पत इति । ननु समर्थासमर्थस्वभावयोरैकजात्यासंभवादतज्जातीये कथं तदिति कथनम्? मैवम्; अवान्तरवैजात्यकल्पनेऽपि तज्जातीयत्वानपायात् । अन्यथा कथं तवात्र रजतव्यवहारः? तज्जातीयत्वव्यामोहादिति चेत्; आश्रितोऽसि तर्हि विपरीतख्यातिम् । सारूप्यादिति चेन्न; सरूपमिति बुद्धौ सारूप्य-तिरस्कारेण किंचिदिति बुद्धौ चोपादित्साद्ययोगात्; सरूपे तद्बुद्धिद्वारा सारूप्यस्य प्रवर्तकत्वे दत्तोत्तरत्वात् । अतो-ऽवान्तरवैषम्येऽपि रजतजातीयमेवोत्पन्नं वक्तव्यम् । न च तस्य बाधस्सुवचः । अबाधे कथं पश्चान्नानुवर्तत इति चेत्, स्वाभ्युपगतात् प्रणाशादेवेति पश्य । नाशोऽपि बाध एवेति चेन्न; तस्य प्रतिपन्नोपाधौ निषेधरूपत्वाभावात् । बाधाभावे नाशोऽपि न स्यादिति चेन्न; * जातस्य हि ध्रुवो मृत्युरिति न्यायेन जातत्वादेव नाशोपपत्तेः; त्वया चानिर्वचनीयं रजतं जातमित्येव समर्थनादिति । हेतुनिरूपणासंभवादप्यनिर्वचनीयरजतोत्पत्तिं दूषयति—**शुक्ता**विति । कथमिव—न कथं-चित् । अयं भावः—न तावदहेतुकमिदं रजतं जायेत, **लोकायत**मतप्रसङ्गात् । हेतुश्च न तत्स्वरूपम्, व्याघातात् । नच तत्प्रागभावमात्रम्; तस्यानादित्वेन प्रागपि तज्जनकत्वप्रसङ्गात् । अत एव न तत्सहकृतं तन्निरपेक्षं वा स्वरूपानाद्यविद्या-मात्रम् । अविद्यासन्तानपक्षे च सन्तानिनः कस्यचिद्रजतकारणत्वं किं दृष्टत्वादङ्गीक्रियते? कुतश्चित् कल्प्यते वा? नाद्यः, असिद्धेः । न द्वितीयः, कारणसंभवात्कार्यक्लृप्तिस्तया च तत्क्लृप्तिरिति मिथस्संश्रयात् । न ह्यत्र रजतमुत्पन्नमिति दृष्टम्;

तद्बुद्धेरन्यथासिद्धतया न तयाऽपि तदुत्पत्तिक्लृप्तिः । * इदं सर्वमसृजतेति श्रुत्यसंकोचादिदङ्कारविषयस्य शुक्तिरजतस्यापि सृष्टिरवगम्यत इति चेन्न ; प्रमाणसिद्धविषयत्वात्तत्र * यदिदं किं चेत्यनुवादस्य । ननु * सत्यं चानृतं चेत्यनन्तरमेवाप्रामाणिकमप्युपात्तमिति चेन्न; अनृतशब्दस्यात्र विकारिवस्त्वन्तरपरत्वात् । अन्यथा * सत्यमभवदित्यादिना समन्वयवैघट्यादिति । दुर्घटेत्यनेन तत्स्वरूपाद्यसंभवं व्यञ्जयति । स्वयं दुर्घटाऽपि सती यदि दुर्निरूपं किञ्चित्कार्यं जनयेत्, अन्यथाख्यातिमपि तथाभूतां किं न जनयेत्? वरं च भ्रान्तितद्विषयजननादुभयसम्मताप्रमाणख्यातिमात्रजननमिति च भाव्यम् । अनाद्यविद्यायास्तदातनकार्यजनकत्वं सहकारिवशात्स्यादित्यत्र संभावितान् सहकारिणो दूषयति—**नाक्षादि**रिति । आदिशब्देन तद्दोषग्रहणम् । इन्द्रियाणि तावन्नार्थमुत्पादयन्ति ; क्वचिदप्यदृष्टेः । तद्दोषाश्च तज्जन्यधीवैपरीत्यापादनेन चरितार्था नार्थविशेषजनकत्वेन कल्पनीया इति भावः । अस्तु रजतबुद्धेरेव सहकारित्वमित्यत्राह—**नचेति** । किमत्र पूर्वानुभूतरजतस्मृतिरेव रजतजनकतया शङ्क्यते, उत स्वविषयेण सहाध्यस्यमाना, आहोस्वित् आपणस्थरजतबुद्धिवद्विषयजन्येति विकल्पे प्रथमं दूषयति—**न चेति** । नहि धीः स्वविषयसजातीयमुत्पादयन्ती क्वचिद्दृष्टा । अन्वयव्यतिरेकमहिम्ना त्वन्यथाख्यातिजनकत्वमागोपालं प्रसिद्धमिति भावः । द्वितीयं दूषयति—**सेति** । अत्र तेनेति सहयुक्ते तृतीया । सविषयवृत्त्यध्यासवादिना त्वया विषयेण सह जायमाना या बुद्धिरिष्यते सा चेद्विषयं जनयेत्, विपरिवर्तः किं न स्यादिति भावः । तृतीयदूषणेऽप्येतदेव वाक्यमावर्तनीयम् । अत्र तेनेति कर्तरि तृतीया । तज्जन्यायास्तदुत्पादकत्वे ह्यन्योन्याश्रयः प्रसज्येत । अथ स्यात्—अस्ति सर्वसाक्षिभूतं किमपि चैतन्यम्, तदेव रजतधीरूपेणापि विवर्तते, तत्सहकृताविद्यया कालविशेषनियतरजतोत्पत्तिरिति । अत्राप्येतदेव पठितव्यम् । तत्र ते न इति पदद्वयम् । या साक्षित्वेन तवाभिमता संवित् साऽनादित्वात् नैव जन्या; अतस्साऽपि तत्कालनियतरजतं जनयितुं नार्हति; सहकार्यन्तरस्य [च] अन्वयव्यतिरेकादिमतः कस्यचिददृष्टेरिति भावः ॥ १७ ॥ **इति अनिर्वचनीयरजतोत्पत्तिभङ्गः ॥**

243. **सत्त्वासत्त्वद्वयाख्यद्वयविरहचतुष्कोटिमुक्तं च तत्त्वं**
व्याघाताद्यैर्विधूतं न यदि तत्र कथं सप्तभङ्गीनिषेधः ।
तुच्छालीकादिशब्दाः क्वचन सति परं क्वाप्यसत्त्वे प्रवृत्ता
वन्ध्यापुत्रादिशब्दैर्भजति च समतां विध्यलीकादिवादः ॥ १८ ॥

संविद्व्यतिरिक्तं सर्वं सर्वत्राविद्यमानं सत्प्रतिभातीति पक्षः प्रतिक्षिप्तः । अथ संविदपि तथेति पक्षः प्रतिक्षिप्यते—**सत्त्वासत्त्वेति** ॥ यदाहुः—* न सन्नासन्न सदसन्न चाप्यनुभयात्मकम् । चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिका विदुः ॥ इति । अयमत्राभिसन्धिः—सच्चेत् किंचित् न तद्बाध्येत । सर्वदा सर्वत्र सर्वथा च स्यात् । नान्यथा, स्वभावपरित्यागायोगात् । असच्चेत् न [जा]ख्यायेत । [तन्न]नच कदाचित् कुत्रचित् कथंचिदपि स्यात् ; तत एव । नापि क्वचित्सत्त्वासत्त्वसमुच्चयः ; उक्तदूषणसमुच्चयात् व्याघाताच्च । उभयशून्यत्वं च तत्समुच्चयसमानदूषणम् । अतः सदादिरूपकोटिचतुष्टयविनिर्मुक्तं सर्वं निरधिष्ठानमेव संवृतिशक्त्या भाति । इदमेव तत्त्वम् । अयमेव सर्वज्ञोपदेशसारः । शुश्रूषुबुद्धितारतम्यात् क्रमेण तद्बुद्ध्यारोहाय भिक्षुपादप्रसरणन्यायेन क्षणभङ्गादिनिबन्धनमिति । एवं वदता स्वपक्षतत्प्रतीतिस्वागमतर्कतन्मूलतत्त्वनिर्णयजयादीनां सत्यत्वं प्रतिपाद्येत न वा? पूर्वत्र सर्वमसत्यमिति स्वागमव्याघातः; स्वोक्तिव्याघातश्च । उत्तरत्र किं तद्दूषणेन? अदूषितस्तद्ध्वंसस्तत्पक्षस्सिध्येदिति चेन्न; साधकाभावे दूषणानुक्तिमात्रेण सिद्ध्यसंभवात् । संवृतिसत्यं स्वपक्षादि-

क्रममङ्गीकुर्म इति चेत्, एवमपि तथाभूतपरपक्षादेरिव स्वपक्षादेरपि सिद्धिर्न स्यात्। सत्यपि केनचिदकारेणाविशेषे सर्वबाधकतयैवास्मत्पक्षस्य विशेषस्सिध्यतीति चेत्; मिथो विरुद्धयोर्बलाबलवैषम्याभावे किं कस्य बाधकं बाध्यं वा? विधिनिषेधयोर्निषेधस्य प्रसक्तिसापेक्षत्वेन परत्वाद्बलीयस्त्वमिति चेन्न; संवृतिदोषमूलत्वाविशेषे परत्वस्याकिञ्चित्करत्वात्। अन्यथा चतुष्कोटिविनिर्मुक्तं तत्त्वं नास्तीत्यसदुक्तस्य निषेधस्य बलीयस्त्वेन त्वन्मतोन्मूलनप्रसङ्गात्। असंजातविरोधिकालोत्पन्नतया वा पूर्ववृत्तविधिप्राबल्यं किं न स्यात्? निषेधसिद्धान्तस्यानादित्वात् न तत्पूर्वं किंचिदिति चेत्, विधिसिद्धान्तस्याप्यनाद्यनन्ततया ततः परत्वं कस्यचिन्न स्यात्। यत्तु सतस्सर्वप्रकारसत्त्वं स्यात्, अन्यथा स्वभावविरोधप्रसङ्गादिति; तदसत्; देशकालादिनियततयैव तत्तद्वस्तुस्वभावसिद्धेः, तस्य च स्वभावस्य कुतश्चिद्विरोधाभावात्। तथा अनभ्युपगमे स्वभावग्रहणस्यैवासंभवात् प्रसङ्गोऽपि निर्मूलः, एतेनासत्स्वभावस्य सर्वथैवासत्त्वं स्यादिति प्रसङ्गोऽपि प्रत्युक्तः। खरशृङ्गादौ तथा व्याप्तिर्दृष्टेति चेन्न; घटादिषु कालादिनियतासत्त्वदृष्ट्या व्याप्तेर्दुर्ग्रहत्वात्। माभूदसत्त्वमात्रं साध्यव्याप्तं, खरशृङ्गादितुल्यं चासत्त्वं प्रसञ्जकमिति चेन्न; तस्य विगीतेष्वस्माभिरनभ्युपगमात् प्रसञ्जकप्रसञ्जनीययोरविशेषप्रसङ्गाच्च। एतेन यदसत् तत्सर्वथैवासत् यथा खरशृङ्गम्; विगीतं च तथा; यत्पूर्वापरदेशकालयोरसत्तन्मध्येऽप्यसत्; यथा खपुष्पम्; इदं च तथेत्याद्यनुमानमपि निकृत्तमूलम्।

ननु ह्रस्वत्वदीर्घत्वाणुत्वमहत्त्वान्यत्वानन्यत्वाद्यापेक्षिकधर्माणां स्वभावत्वे निरपेक्षत्वप्रसङ्गः, परसापेक्षत्वे च किंचित्प्रति स्वभावत्वं न स्यात्। न हि खपुष्पादेश्शून्यत्वस्वभावः परसापेक्षः स्यात्। मैवम्; यथादृष्टि सर्ववस्तूनां सापेक्षनिरपेक्षस्वभावभेदस्य दुरपह्नवत्वात्। यच्च—**श्लो.** बुद्ध्या विविच्यमानानां स्वभावो नावधार्यते। अतो निरभिलप्यास्ते निःस्वभावाश्च [देशिताः]दर्शिताः॥ इति, तदप्यसत्। तत्स्वभावानवधारणस्यापि स्वभावानवधारणाद् विपरीतापत्तेः। तदेवमुक्तमनुक्तं च दूषणजातमभिप्रेत्योक्तम्—**व्याघाताद्यैर्विधूत**मिति। **श्लो.** सर्वथाऽनुपपत्तेश्चेत्येवं सूत्रयता स्फुटम्। सर्वदोषाकरत्वं च पक्षस्यास्य प्रदर्शितम्॥ अविद्यां विश्वजननीमर्धपञ्चमरूपिणीम्। निवृत्तिपञ्चमाकारां कल्पयन्तोऽप्य-[धःकृताः]तः क्षताः॥ ननु व्याघातादयोऽप्यसत्याः; सदसदादिविकल्पानुपपत्तिदुःस्थत्वात्। अतस्ते नास्तत्पक्षं दूषयिष्यन्तीत्यत आह—**न यदी**ति। सप्तभङ्ग्युपादानं सर्वस्य पक्षान्तरस्योपलक्षणम्। व्याघातादिभिरेव हि सप्तभङ्ग्यादिकं त्वयाऽपि दूष्यते; ते चेत् त्वत्पक्षे न दोषाः, त्वत्प्रतिपक्षेऽपि न दोषा भवेयुः। अतः कथं त्वया तन्निषेधः कार्य इति भावः। अथ ब्रूषे—तुच्छादिशब्दाः क्वचिद् व्युत्पन्ना न वा? नेति तावन्नाङ्गीकरोषि; व्युत्पन्नाश्चेद्विगीते, अन्यत्र वा? विगीते चेदागतोऽसि मध्यमागमानां मार्गम्; अन्यत्र चेत्तद्दृष्टान्तेन विगीतेऽपि तुच्छत्वं साधयामः—यश्शब्दार्थस्स तुच्छः यथा त्वदिष्टोऽन्यः तथा च विगीतमिति; तत्राह—**तुच्छे**ति। क्वचिदन्यत्र विद्यमाने हि पदार्थे केवलं किंचिन्निष्ठाभावप्रतियोगित्वापेक्षया तुच्छशब्दः अलीकमिथ्यानृतादिशब्दाश्च स्वाभावाधिकरणाध्यस्तोपाधिकाः, न तु निरुपधिनिषेधमपेक्ष्य प्रवर्तन्ते, यतस्त्वत्पक्षावकाश इति भावः। यदप्युच्यते—द्विविधमलीकं विधिपदं निषेधपदं चेति; आद्यं विगीतम्; द्वितीयं वन्ध्यासुतादीति; एतद्दूषयति—**वन्ध्यापुत्रे**ति। अयं भावः—वन्ध्यासुतादेरपि न निषेधैकविषयत्वम्। * एष वन्ध्यासुतो याति शशशृङ्गधनुर्द्धरः। मृगतृष्णाम्भसि स्नातः खपुष्पकृतशेखरः॥ इत्यादिषु तदभावात्; विगीतस्यापि न विध्येकविषयत्वम्। आकारभेदैरपि निषेधैस्सर्वत्र निषेधस्य प्रसिद्धत्वात्, त्वया च सर्वप्रकारतस्तन्निषेधात्। अत ईदृशो विभागो नोपपद्यत इति। एवमविशेषापादनात् किं त्वया लब्धमिति चेत्; एवं विशेषवर्णनाच्च किं

त्वया लब्धम्? व्यवहारविशेषव्यवस्थापनमिति चेत्, तन्निषेधो मयाऽपि लभ्यत इति पश्य। एवं वाऽभिप्रायः—विध्यलीकशब्दो न कंचिदर्थं बोधयति; अयोग्यपदसमभिव्याहाररूपत्वात् [निषेधालीकपदवदिति]। किंचिदिति हि विधिशब्दो बोधयेत् न किंचिदिति चालीकशब्दः। कथं तयोस्सामानाधिकरण्यसंभवः? यद्यपि *अत्यन्तासत्यपि ज्ञानमर्थे शब्दः करोति हि; तथाऽपि वन्ध्यासुतशब्दार्थवत् विध्यलीकशब्दार्थस्याप्यसिद्धेर्विवक्षितासिद्धिरिति। आदिशब्देन संवृतिसत्यव्यावहारिकसत्यादिप्रलापसंग्रहः। संवृतिसत्यमिति तावत् किमुच्यते? किं संवृतिरेव सत्यमुत संवृतिसंबन्धि किंचित् सत्यमिति? नाद्यः, संवृतिशब्दस्य मिथ्यार्थपरत्वे सत्यशब्दसामानाधिकरण्यायोगात्। तदाहुः—*संवृतेर्न तु सत्यत्वं सत्यभेदः कुतो न्वयम्। सत्या चेत् संवृतिः केयं मृषा चेत् सत्यता कुतः॥ इति। सत्यार्थपरत्वेऽपसिद्धान्तः प्रपञ्चमिथ्यात्वप्रयोजकत्वायोगश्च। न द्वितीयः; सत्यस्य सतः कुतश्चित् संवृतिसंबन्धात् असत्यत्वासिद्धेः। न हि किंचिज्जातीयं तद्विजातीयसंबन्धात्स्वयमतज्जातीयं दृष्टम्। अथ वस्तुतोऽसत्यमेवासत्यत्वसंवृत्या सत्यत्वेन भासमानं संवृतिसत्यमित्युच्येत, तथा सति विशेषाग्रहनिबन्धनेयमन्यथाख्यातिरेव कक्षीकृतेति न क्वचिदपि ख्यात्यन्तरकल्पनावकाशः। एतेन संवृत्तिर्नाम भ्रान्तिरेव; तया मिथ्याभूतमेव सत्यत्वेन भासितं संवृतिसत्यमित्यपि निरस्तम्। अथ शुक्तिकारजतमितिवत् संवृतिरूपाधिष्ठानाध्यस्तं सत्यं संवृतिसत्यमित्यभिमतम्; तथा सति निरधिष्ठानभ्रमपरित्यागप्रसङ्गः। संवृतिमात्रे निरधिष्ठानं भ्रमं ब्रूम इति चेत्; तद्वदेव संभवे किं प्रपञ्चस्य सत्यासत्यादिविकल्पासहसंवृतिरूपाधिष्ठानकल्पनेन? न च संवृतिरधिष्ठानं भवितुमर्हति; शुक्तिवत् केनचिदाकारेण तद्भानादृष्टेः। अत एव संवृतिरपि संवृत्यन्तरेऽध्यस्तेति निरस्तम्; संवृतिसन्ततेरसन्ततानन्तसंवृतिवर्गस्य चानुपलम्भात्। सन्ततिपक्षे च पूर्वपूर्वसंवृतीनामुत्तरोत्तरसंवृतिकारणत्वमात्रं स्यात्; न त्वधिष्ठानत्वम्, असमानकालत्वात्। न हि नष्टे शुक्तिकादौ वर्तमानतया रजतमध्यस्यमानं दृष्टम्। असन्ततिपक्षे च सर्वसंवृतीनामनादित्वेन कल्पनासिद्धत्वायोगात् किमधिष्ठानेन? न ह्यकल्पितस्यापणस्थरजतादेरन्यदधिष्ठानमन्विष्यते। एवं तैमिरिककेशस्तबकादिन्यायेन संवृत्याख्यदोषाध्यस्तं संवृतिसत्यमित्यप्यसारम्। अतिदूरत्वात्यासन्नत्वसादृश्यतिमिरकाचपटलादिवत् संवृतिसंज्ञस्य दोषस्य कुतश्चित्प्रमाणादसिद्धेः। अलीकप्रकाशान्यथानुपपत्त्या तत्क्लृप्तिरिति चेत्, किं संवृतिरलीकमप्रकाशमाना प्रकाशयति, प्रकाशमाना वा? आद्ये अवगमाधीनसत्ताकत्वाभावात् स्वरूपसत्यत्वप्रसङ्गः। द्वितीये त्वसिद्धिः; सर्वलोकानुपलब्धिबाधितत्वात्। न हि त्वयाऽपि तादृशी संवृतिः काचिदुपलभ्यते। अलीकप्रकाशान्यथानुपपत्तिप्रकाशिताऽपि विश्वं प्रकाशयतीति चेन्न; अन्योन्याश्रयणात्—तत्प्रकाशादलीकप्रकाशस्तन्मूलकल्पनया च तत्प्रकाश इति। अपि चालीकप्रकाशस्य दोषोऽपेक्ष्यत इति कुत्रावगतम्? संप्रतिपन्नभ्रमेष्विति चेत्; तत्र तर्ह्यधिष्ठानदृष्टसारूप्यदोषाश्रयादिकमपि कारणत्वेन दृष्टमिति तान्यपि किं न कल्प्यन्ते? कल्प्यमानान्यपि तानि काल्पनिकान्येव सिध्येयुरिति चेत्; किमनया संवृत्यादिगणकल्पनया? तद्वदेव प्रपञ्चो दोषादिनिरपेक्षः कल्पित इत्यङ्गीकुरुष्व। तथाऽङ्गीकारे च संवृतिसत्यमिति रिक्तं वचः। एवं व्यावहारिकसत्यशब्दोऽपि न क्वचिद्विवक्षितसाधकः; कुतश्चिदपि समासादुपलभ्यमानसत्यत्वप्रतिषेधासिद्धेः। न च व्यावहारिकशब्दो मिथ्यापर्यायः। तथात्वे सत्यपि सामानाधिकरण्ये सत्यशब्दान्वयवैघट्यम्, वैयधिकरण्ये त्वदिष्टस्यासिद्धिः। न हि मिथ्यारजतादिसंबन्धिशुक्त्यादिकं मिथ्या भवति। अथ शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति न्यायात् व्यवहारजन्यविकल्पकल्पितं व्यावहारिकसत्यमिति मन्वीथाः, तदपि न; प्रत्यक्षानुमानवेद्यस्य प्रपञ्चस्य शब्दकल्पितत्वाभावात्। यत्र तु शशशृङ्गादौ शब्दकल्पितत्वं

कथंचिदभ्युपगम्येत, तत्रैव व्यावहारिकसत्यत्वं स्यात्; न तु प्रत्यक्षादिसिद्धेष्विति स्वेष्टविपरीतापत्तिः, असतः प्रातीतिकसत्यस्य च व्यावहारिकसत्यत्वानभ्युपगमात्। अपि चेदमपारमार्थिकं सत्यं पारमार्थिकसत्यतया भातीत्यङ्गीकार्यम्; अन्यथा प्रवृत्त्यनुपपत्तेः। तथा चान्यथाख्यात्यनपनयात् किं ख्यात्यन्तरेणेति ॥ १८ ॥

244. व्याघातादिप्रसङ्गौ प्रमितिपरिभवे मानतोऽमानतो वा
मानान्मानस्य सिद्धौ स्वतदितरपरित्राणमेकप्रवृत्त्या।
साधीयानेष पन्थास्समयिभिरखिलैरर्थ्यतां सार्थनीत्या
नोचेदुच्छिन्नलोकव्यवहृतिनियमाः कामचाराः कथास्स्युः ॥ १९ ॥

ननु प्रमेयसिद्धिः प्रमाणादेष्टव्या; प्रमाणं चासिद्धं न साधकं भवति। तत्सिद्धिश्च स्वतोऽन्यतो वा? पूर्वत्रात्माश्रयः; उत्तरत्रानवस्था। अतः प्रमाणमात्रस्यैवासंभवान्न किंचिदपि प्रमेयं, न कश्चिदपि प्रमाता, न काचिदपि व्यवहृतिरिति; तत्राह—**व्याघाते**ति ॥ अयं भावः—प्रमाणस्य प्रतिषेधः प्रमाणतो वा स्यादप्रमाणतो वा? पूर्वत्र व्याघातः; प्रमाणस्य सर्वस्य प्रतिषेधात्, तदर्थं च कस्यचित् प्रमाणत्वेनोपादानात्। ननूपक्रमापच्छेदपदाहवनीयादिन्यायेषु प्रमाणत एव प्रमाणबाधस्त्वयेष्यते। सत्यम्; न प्रमाणमात्रं बाध्यते, येन व्याघातः स्यात्। किंतु स्वेतरत् किंचित्प्रमाणम्। तथाऽपि प्रमाणस्य सतः कस्यचित्कथं बाध इति चेन्न; तत्प्रामाण्यमात्रस्यानपहारात्। प्रबलविरुद्धविशेषे हि प्रामाण्याभावस्समर्थ्यते; इह पुनः कृत्स्नप्रमाणबाधाशक्यत्वमुच्यते। उत्तरत्र व्याघातातिप्रसङ्गौ; यदि ह्यप्रमाणतः प्रमाणं प्रतिषिध्येत तत्प्रतिषेधोऽपि तत एव प्रतिषेध्यः स्यात्, त्वत्पक्षश्च सर्वस्सर्वैः प्रतिपक्षैः, रज्ज्वादिबुद्धिश्च सर्पादिभ्रमैः। कथं तर्हि भूदलनबुद्ध्या रज्जुसर्पनिवृत्तिः? इत्थम्—उतरधियः पूर्वविपरीताकारावगाहित्वेन पूर्वभ्रमानुवृत्तिप्रतिरोधात्; न हि भूदलनबुद्धिबाधिततया तत्र सर्पस्य मिथ्यात्वव्यवस्थापनम्; तथा सति रज्जोरपि तत्प्रसङ्गात्; किंतु प्रमाणभूतेनाधिष्ठानयाथात्म्यज्ञानेन बाधितत्वात्। एवं प्रमाणस्याप्यप्रमाणबाधितत्वमात्रेण न मिथ्यात्वं स्यात्। **श्लो.** अप्रमाणतयाऽभीष्टान्न बाधस्तर्कतः क्वचित्। अनुग्राह्यप्रमाणानामभावे परिगृह्यते ॥ प्रसञ्जनीयधर्मस्य मानसिद्धो विपर्ययः। प्रमाणं भवति क्वापि प्रसञ्जकविपर्यये ॥ तदेवं प्रमाणतोऽप्रमाणतो वा प्रमितिपरिभवे व्याघातातिप्रसङ्गौ व्यवस्थिताविति। प्रमाणसिद्धिः स्वतोऽन्यतो वेति विकल्पे तु यथादर्शनमुभयथाऽपीति ब्रूमः। स्वपरनिर्वाहकसमाधिना त्वात्माश्रयानवस्थयोरपसारणम्। तदेवाह—**माना**दिति। नहि वयमप्रमाणात्प्रमाणस्यान्यथा वा सिद्धिं ब्रूमः, किंतु प्रमाणतः। तत्र व्यक्तिभेदे तु प्रमाणान्तरात्प्रमाणसिद्धिः, यथा एतद्दृष्टम्, इदं द्रक्ष्यामीति। यदा त्वीदृशी प्रमेति प्रमितिमात्रं गृह्यते, ईदृशं वा प्रमितिकरणमिति प्रमाकरणमात्रम्, तदा पुनरेकहेलया स्वस्वेतरलक्ष्यसमुदायव्यवस्थापनान्नानवस्था, आत्माश्रयो वा, शब्दशब्दादिन्यायात्। तर्ह्यप्रमाणादपि प्रमाणप्रतिक्षेपे स्वपरनिर्वाहकसमाधिना स्वात्माऽपि प्रतिक्षिप्यतामिति चेन्न; अविरुद्धविषयत्वात् स्वपरनिर्वाहस्य। यथा—**श्लो.** अहं सत्यं वदामीति स्वोक्तिः स्वपररक्षिणी। न कदाचिद्वदामीति वादस्तु स्वोक्तिबाधितः ॥ मानस्थापकमानस्य मानसंक्षोभकस्य च। गतिरेवमिति प्रेक्ष्य गहनां कुहनां त्यज ॥ सर्वैरपि सिद्धान्तिभिरियं गतिरनतिलङ्घनीयेत्यभिप्रायेणाह—**साधीया**निति। समयिभिरखिलैः—प्रमाणस्थापकैरिव तद्दूषकैरपीति भावः। व्यावहारिकप्रमाणव्यवस्थाऽपि हि क्वचित्क्वचित्स्वपरनिर्वाहकसमाधिमनुरुध्यैव प्रवर्तेत। मिथ्यात्वादिसाधकेषु च त्वयाऽभ्युपगम्यते। तस्मात् अर्थ्यताम्—इष्यतामित्यर्थः। सार्थनीत्या—यथा विपश्चित्प्रयुक्तस्सर्वश्शब्दस्सार्थ इति वाक्ये

तदन्तर्गतपदानामपि सार्थकत्वमविशेषेण संप्रधार्यते । यद्वा त्वद्व्यापारस्सर्वोऽपि निरर्थकः सार्थको वा? आद्ये किं स्वपक्षस्थापनपरपक्षदूषणादिप्रयासेन ? द्वितीये तत्सार्थत्वं कस्यचित्प्रमाणस्यार्थः स्यान्न वा ? न चेत्, न तत्सिद्धिः । प्रमाणार्थश्चेत् तत्प्रमाणाभ्युपगमः । अथवा तीर्थयात्रादिप्रवृत्तस्सार्थः परस्परविरुद्धाभिप्रायवतां समवायेऽपि केनचिदाकारेणाभिप्रायसाम्यादन्योन्याविघातेन गन्तव्यं गच्छति; तथा मिथो विरुद्धावष्टम्भेऽपि सिद्धान्तिभिः प्रमाणात्प्रमेयसिद्धिरित्यादिकं लौकिकपरीक्षकसेतुमभिन्दानैः प्रस्थातव्यमिति । एवमनभ्युपगमे बाधकमाह—**नो चेदि**ति । कथाः—वादजल्पवितण्डारूपाः उच्छिन्नलोकव्यवहारनियमतया कामचाराः स्युः—वक्तव्यावक्तव्यकर्तव्याकर्तव्यविभागरहिततया न तत्त्वनिर्णयादिफलपर्यन्ताः स्युरिति भावः । यद्वा कथाः—साधनदूषणाद्युक्तयः सदसद्भावानादरेण स्वच्छन्दतः स्युरिति । ननु सर्वक्षोभकस्य कथासंक्षोभप्रसङ्गेनापि किमनिष्टमापादितम्? एवं वदतस्ते किञ्चिदनिष्टमस्ति वा न वा? न चेत्, * न सन्नासदित्यादिना परपक्षो न दूष्यः । अस्ति चेत्, त्वद्वाक्यमात्रेण त्वत्पक्षो दुष्ट इत्यनिष्टमापादितमेवेति ॥ १९ ॥ **इति निरधिष्ठाननिरुपाधिकासत्ख्यातिभङ्गः ॥**

245. **ज्ञानाकाराधिकं हि प्रथितमिदमिति श्वेतपीतादि बाह्यं**
तादात्म्ये तस्य साध्ये सहमतिनियमाद्यन्यथैवात्र सिद्धम् ।
ग्राह्यात्मत्वान्मृषा स्यान्मतिरपि यदि वा ग्राह्यमप्यस्तु तथ्यं
किंचान्योन्यं विरुद्धैर्युगपदवगतैर्धीरभिन्ना कथं स्यात् ॥ २० ॥

अथ नास्तिक्यमान्द्यात् संविदपलापे दुर्बलबुद्धीनां **योगाचाराणा**मात्मख्यातिमपाकर्तुं प्रत्यक्षविरोधप्रतिपिपादयिषया बाह्यार्थसिद्धिं तावदाह—**ज्ञानाका**रेति ॥ ज्ञायत इदमिति वा जानामीदमिति वा बोधे क्रियारूपाया बुद्धेः कर्मरूपतया प्रसिद्धं श्वेतपीतादिवस्तुजातं बुद्धितत्त्वात् बाह्यमेव भवितुमर्हति; अन्यथा क्षणभेदसन्ततिभेदयोरपि केनचिज्ज्ञानेन गृहीतावगृहीतौ च क्षणभेदाद्यसिद्धिप्रसङ्गेन दत्तोत्तरत्वात् । ततश्च भेदमात्रापह्नवे त्र्यन्तकुदृष्टिवादस्य स्वीकारः । भिद्यमानापह्नवे तु माध्यमिकमतावतार इति भावः । एतेन—* अविभागो हि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ इति प्रलपितं प्रत्युक्तम् । श्वेतपीतादि बाह्यमिति वदतश्चायं भावः—बुद्धिबोध्ययोरभेदं ब्रुवता विरुद्धधर्माध्यासेन भेदः कश्चिदङ्गीकृतो न वा? न चेदुक्तमेवोत्तरम्—क्षणभेदाद्यसिद्धिप्रसङ्ग इति । अङ्गीकृतश्चेत्, श्वेतपीताद्यनेकाकारग्राहिण्येकत्र ज्ञाने कथं मिथोविरुद्धश्वेतपीतादितादात्म्यसंभवः? मिथो विरुद्धयोरेकबुद्धिविषयत्ववदेकबुद्ध्याकारत्वमप्यविरुद्धमिति चेन्न; दर्शनादर्शनाभ्यां विशेषात् । एकत्वविरोधः एकदैकाश्रयत्वविरोधश्च श्वेतपीतादेर्दृष्टः; न त्वेकधीविषयत्वविरोधः; त्वया तु श्वेतपीतादेर्बुद्ध्याकारत्वं वदता बुद्ध्यैक्यं बुद्धिधर्मत्वं वोच्यते; द्वितयमपि व्याघातविघटितम् । अतो बुद्ध्यतिरिक्तार्थस्य बुद्धिवदबाधितोपलब्धिसिद्धत्वात् न तदभावस्साध्य इति । सूत्रितं चैतत् * नाभाव उपलब्धेरिति । ननु भेदोपलम्भमात्रात् न भेदसिद्धिः; द्विचन्द्रादावपि प्रसङ्गात् । बाधात्तत्र तथेति चेन्न; अविशेषात् । कथमविशेषः? न हि प्रत्यक्षतो बोध्यबाधः; नेदमस्तीति सार्वत्रिकनिषेधाभावात् । अनुमानादिकं तु न स्वोपजीव्यप्रत्यक्षप्रतिषेधक्षममिति चेन्न; ज्वालैक्यादिप्रत्यक्षस्यानुमानादिना बाधाभ्युपगमात् । तत्र प्रत्यक्षस्याचिरनिर्वापितारोपितप्रदीपन्यायेनान्यथासिद्धिशङ्काग्रस्ततया दौर्बल्यमिति चेन्न; इहापि प्रतिबिम्बभेदोपलब्धिन्यायेनान्यथासिद्धिसंभवात् । ततश्च ग्राह्यग्राहकयोरनुमानादभेदसिद्धिरित्यत्राह—**तादात्म्य** इति । तस्य वेद्यतयैव सिद्धस्य

पदार्थस्य वित्तितादात्म्ये सिषाधयिषितेऽस्मिन् सहोपलम्भनियमादिलिङ्गमन्यथैव सिद्धमित्यर्थः। यद्यपि स्वयंप्रकाशवादे वित्तिवेद्ययोस्सहोपलम्भ[नियम]स्सिद्धः, तथाऽपि न तावता तयोर्मिथस्तादात्म्यसिद्धिः; भिन्नस्यापि वेद्यस्य स्वयंप्रकाशसमकाले प्रकाशमानतया तेन सहोपलम्भोपपत्तेः। नियमस्तु स्थिरपक्षे दुर्वचः; कालान्तरे पुरुषान्तरे चासहोपलम्भात्। अतः *सहोपलम्भनियमादभेदो नीलतद्धियोरिति त्वप्रयोजकादप्रयोज्यव्यपदेशः। ननु यद्यतो भिद्यते न तत्तेन सहोपलभ्यते, यथा घटेन पट इति व्यतिरेकशुद्धया व्याप्तिसिद्धौ कथमप्रयोजकत्वम्? इत्थम्—व्यभिचारेण व्यतिरेकस्याशुद्धत्वात्। त्वत्पक्षे तावत् [स्व]सन्ततिपूर्वापरज्ञानानि सन्तत्यन्तरज्ञानानि च केनचिज्ज्ञानान्तरेणोपलभ्यन्ते। अन्यथा कथं तानि समर्थ्येरन्? ततश्च ग्राह्यग्राहकयोस्तत्र तादात्म्ये सर्वसंविदद्वैतप्रसङ्गः। भेदे तु व्यभिचारसिद्धिः। यदि मन्यसे, सर्वज्ञानानां स्वेस्वे काले स्वेनैव प्रकाशनात् स्वग्राहकज्ञानान्तरेण सहोपलम्भनियमो नास्तीति, एवं सति नीलपीतादेरपि स्वग्राहकेणैकेन ज्ञानेन सहोपलम्भनियमो नास्ति; स्थिरपक्षे कालादिभेदेन पुरुषभेदेन च नीलादेरनियतानेकोपलम्भविषयत्वसिद्धेः। न चैकस्य नीलस्यानेकस्वग्रहणतादात्म्यसंभवः; त्वयाऽपि नैतत् संमन्यते। प्रतिसंवेदनं नीलभेदान्नोपलम्भानियम इति चेन्न; ज्ञानज्ञेयैक्यसिद्धौ प्रतिज्ञानं नीलभेदः, तत्सिद्धौ च सहोपलम्भनियमात्तदैक्यसिद्धिरिति चक्रकापत्तेः। किं च सहभाव एव तावद् भेदसापेक्षः; तदुपलम्भनियमः[तु]अभेदगन्धं न सहते। अतस्तेन कथं तादात्म्यसाधनम्? ज्ञानेनार्थस्य नियतस्सहोपलम्भश्च अत्र किं ज्ञानार्थगोचरमेकं ज्ञानान्तरम्? उत स्वप्रकाशस्वगोचरज्ञानानतिरिक्तप्रकाशः? नाद्यः, ज्ञानोदयकाले ज्ञानार्थगोचरैकज्ञानान्तरादृष्टेः; अन्वयव्यतिरेकिविवक्षायां दृष्टान्ताभावाच्च। अस्ति द्विचन्द्रदृष्टान्त इति चेन्न; अकल्पितस्य चन्द्रस्य कल्पितेन सहोपलम्भनियमाभावात्। अन्यतरस्य सहोपलम्भनियमो विवक्षित इति चेत्; हन्त तर्हि तदुभयतादात्म्यं निदर्शयतस्ते कथमसौ नियमस्तस्यैवास्ति [च] नास्ति चेति घटेत? केवलव्यतिरेकिविवक्षायां [तु] अन्यत्र साध्यसद्भावात् आभासत्वम्। सिद्धो हि स्वेन सहोपलम्भाभावेऽपि सर्वबोधानां स्वस्मादभेदः। यद्यसौ न स्यात् सर्वे बोधाः स्वयमेव न स्युरिति **माध्यमिक**मतप्रसङ्गः। ननु ग्राह्यस्य स्वग्रहणतादात्म्यमिह साध्यम्; तच्च नान्यत्र क्वचिदस्तीति केवलव्यतिकित्वोपपत्तिः स्यात्। मैवम्; सर्वज्ञानानां स्वग्रहणरूपत्वाभ्युपगमेन स्वग्रहणतादात्म्यस्यापि सिद्धत्वात्। व्यतिरेकश्चात्र दुर्वचः; यत् स्वग्रहणतादात्म्यरहितं तत्सहोपलम्भनियमरहितमित्युदाहरणीयाभावात्। मन्यसे हि ग्रहणानामपि स्वग्रहणतादात्म्यम्। आदिशब्देन संवेदनादिहेतुसंग्रहः। संवेदने तावत् यद्येन संवेद्यते तत्तदभिन्नमित्यन्वयव्याप्तिर्नास्ति, संविदन्तरसंवेदने व्यभिचारात्; तदनभ्युपगमेऽपि चानिष्टस्योक्तत्वात्। यद्यतो भिद्यते न तत्तेन संवेद्यते यथा च घटेन पटः, यथा वा घटमात्रज्ञानेन पटः; संवेद्यते च नीलज्ञानेन नीलमिति व्यतिरेकव्याप्तिरस्तीति चेत्; न, अन्वयतो व्यभिचारे व्यतिरेकाव्यभिचारस्याकिंचित्करत्वात्। व्यतिरेकश्चात्र त्वया दुर्वचः, घटपटोदाहरणस्याश्रयविकलत्वात्। संविदात्मना पटादिरूपाश्रयभेदसिद्धिरिति चेत्; अस्त्वेवम्, तथाऽपि पूर्ववद्व्यभिचारो दुर्वारः; संविदन्तरस्य संविदन्तरेण व्यवस्थाप्यत्वस्थापनात्। एतेन भिन्नस्य ग्राह्यत्वेऽतिप्रसङ्गात् संयोगसमवायैकार्थसमवायकारणत्वादीनामव्याप्त्यादिदुःस्थतया ग्राह्यलक्षणत्वायोगाच्च परिशेषात्तादात्म्यमेव ग्राह्यलक्षणमास्थेयमित्यपि निरस्तम्; ज्ञानान्तरेषु ज्ञानान्तरेण गृह्यमाणेषु स्वग्रहणतादात्म्यायोगादेव। किं च अतीतानागतग्राहिषु विज्ञानेषु यदि स्वग्राह्यतादात्म्यं, तदा विज्ञानमेव स्वयमतीतमनागतं वा स्यात्। किं तदानीं तद्ग्राह्यं स्यात्? अथ नातीतोऽनागतो वा कश्चिद्विषयः; किं तु वर्तमानज्ञानेऽतीतत्वानागतत्वकल्पनामात्रमिति मन्यसे; तथा सत्यतीतानागतविज्ञानग्राहिणि विज्ञानान्तरेऽप्येवं स्यादित्येकक्षणपरिशेषो वा नित्यैकज्ञानपरिग्रहो वा स्यात्।

अपि च—**श्लो.** ग्राह्यग्रहणतादात्म्यं खरशृङ्गाद्यसद्ग्रहे । अस्ति चेद्याहतिर्नो चेद्यभिचारस्सुदुस्तरः ॥

तादात्म्यं च ग्राह्यलक्षणं व्यवस्थापयता लक्ष्यस्य लक्षणव्यापकत्वमभिसन्धाय किं यस्य येन तादात्म्यं तस्य तेन ग्राह्यत्वमिति नियमो विवक्षितः ? उत लक्ष्यस्य लक्षणव्याप्तत्वमभिसन्धाय यस्य येन ग्राह्यत्वं तस्य तेन तादात्म्यमिति ? न प्रथमः, स्वेनाभिन्नस्य घटस्य स्वेन ग्रहणाभावात् । स्वसंवित्तादात्म्यात्तत्र स्वेन ग्रहणमिति चेन्न ; इतःपूर्वं संवित्संवेद्ययोस्तादात्म्यासिद्धेः । न द्वितीयः ; संवेदनहेतुदूषणनयेन दत्तोत्तरत्वात् । किंच ग्राह्यस्य स्वग्रहणाभिन्नत्वनियमे खरशृङ्गशुक्तिरजतादेरपि तथात्वं प्रसज्येत । न चैतदनुमन्तव्यम् ; सत्यासत्ययोस्तादात्म्यायोगात् । योगे वा जैनवादविजयापातादिति । तत्र व्याघातशमनमिच्छतामन्यतरस्वभावपरित्यागप्रसङ्गमाह—**ग्राह्यात्मत्वा**दिति । मिथ्याभूतबोध्यतादात्म्यात् बुद्धेरपि मिथ्यात्वे माध्यमिकमनीषितसिद्धिः ; सत्यभूतबुद्धितादात्म्यात् बोध्यस्यापि सत्यत्वे खरशृङ्गकम्बुकलधौतादेरपि सत्यत्वापात इति भावः । उक्तहेतुत्रयस्य साधारणं श्वेतपीतादीत्यनेन पूर्वं सूचितं दूषणान्तरमाह—**किंचेति** । अयं भावः—निर्विशेषवस्तुप्रकाशो नास्त्येवेति सिद्धे सर्वबुद्धीनां यत्किंचिदनेकग्राहित्वादनेकेषां च मिथस्तादात्म्यायोगादनेकैस्तैरेकस्या बुद्धेरपि तादात्म्यमुपलम्भविरुद्धं न कथञ्चिदपि स्यादिति । एकैकस्य क्रमेणावगतौ बुद्धिभेदात् परिहारः स्यात्, तन्निवृत्त्यै **युगप**दित्युक्तम् । अथ मन्यसे—बुद्धिबोध्यतादात्म्यमुपदिशतो **बुद्धस्या**यमभिप्रायः ; बुद्धिव्यतिरिक्तस्य बोध्यस्य मिथ्यात्वात्तदव्यतिरेकोपचार इति । यद्येवं बाह्यार्थमिथ्यात्वमिहाभिसंहितं, तत्र सहोपलम्भनियमादयो न साधकाः । बुद्धोपदेशस्तु श्रद्दधानेष्वेव शोभते । **श्लो.** स्थूलास्थूलादिकोटीनां बाधकैर्बाह्यनिह्नवः । सुन्दोपसुन्दन्यायेन बाधकानां हतेर्हतः ॥ अपि च कृत्स्नबाह्यार्थापह्नवेऽनुमानानां स्वोपजीव्यप्रत्यक्षविरोधादनुत्थानमेव । **श्लो.** बोध्यापह्नवयुक्तीनां निस्तारमनुपश्यता । बोद्धृपह्नवयुक्तिश्च सुतरां सुतरा भवेत् ॥ न तावद् बुद्धिमात्रं ज्ञाताऽहमर्थः, तद्धर्मतयैव तत्प्रतीतेः । तथा च **सूत्रम्**—*व्यतिरेको गन्धवत्तथा च दर्शयतीति । न च बुद्धावहंत्वक्लृप्तिः ; बुद्धिरहमित्यवभासप्रसङ्गात् । नापि बुद्धेराश्रयतयाऽहमर्थकल्पना ; निरधिष्ठानकल्पनानङ्गीकारात् । अथ निराश्रयाऽपि बुद्धिः साश्रयतया कल्प्यत इति मन्यसे, तथा सत्यन्यथाख्यातिस्स्यात् । बाधे च सत्येवं वक्तव्यम् । नचाश्रयबाधकं किंचिदबाधितमस्ति ; बुद्ध्यन्यत्वादिकुतर्कैस्तद्बाधे बुद्धिरपि भासमानत्वादिमाध्यमिककुतर्कैर्बाध्येत । तस्मात् ग्राह्यग्राहकापह्नवे गृहीतिरप्यपह्नोतव्या । तद्ग्रहे वा तयोरपि ग्रहणं स्यादेव । तदिदं ***न भावोऽनुपलब्धेरिति सूत्राभिप्रेतम्** । एवं दृग्दृश्यसंबन्धानुपपत्त्या दृश्यमिथ्यात्वमिति कुदृष्टिकल्पनाऽप्युन्मूलनीया । अत्र ह्यनुपपद्यमानसंबन्धोपपादकतया वा दृश्यमिथ्यात्वं कल्प्यते ? उत सिद्धस्य संबन्धाभावस्य व्यापकतया ? नाद्यः, दृश्यमिथ्यात्वे सुतरां संबन्धायोगात् । न द्वितीयः, दृश्यस्येव दृशोऽपि मिथ्यात्वक्लृप्तिप्रसङ्गात् । न च मेरुमन्दरयोस्संबन्धो नास्तीत्यन्यतरमिथ्यात्वमुभयमिथ्यात्वं वा कल्प्यते । असंबद्धयोस्संबन्धित्वेन भानाद्विशेष इति चेत्, तथा सति तत्संबन्धस्यैव मिथ्यात्वं वाच्यम्, नतु तदुभयस्वरूपस्य । तदसंब[न्ध]द्धस्य तेन वास्तवप्रकाश्यत्वायोगात्तत्तत्प्रकाश्यत्वस्य काल्पनिकतया प्रकाश्यस्वरूपासिद्धिरिति चेत्, तर्हि काल्पनिकस्याप्यसंबद्धस्य कथं तत्प्रकाश्यत्वमिति चिन्तय । मायामाहात्म्यादिति चेत्, एवं सत्यस्यापि सामग्र्यादिमाहात्म्यादिति यथालोकमवलोकय । किंचासंबद्धस्य वास्तवप्रकाश्यत्वं न घटत इति वदता संबद्धस्यैव वास्तवप्रकाश इति नियमस्त्वया दृष्टः स्यात् ; अन्यथा तद्व्यतिरेके तद्व्यतिरेकनियमनिर्देशायोगात् । यदि चासंबद्धस्य प्रकाशमानत्वमयुक्तं मन्यसे, तर्हि दुरपह्नवस्य प्रकाशमानत्वस्य सिद्ध्यै संबन्ध एव कश्चित्कल्पयितुं युक्तः । स तु संप्रतिपन्नसंबन्धेष्वनन्त-

भूतश्चेत्, तदन्यः कश्चिदित्येवाङ्गीकार्यः। अथ तेन तस्य प्रकाशमानत्वमेव नास्तीति पक्षः, तदा कस्यानिर्वचनीयत्वादि कल्प्येत? अपि च दृग्दृश्ययोस्संबन्धं प्रतिक्षिपता किं संबन्ध एव नास्तीत्यभिसंहितम्? उत क्वचित् सन्नप्यसौ प्रस्तुतयोर्नास्तीति? नाद्यः, दूष्यदूषणादिसंबन्धविलोपे स्वव्याघातादिदोषगणोन्मेषात्। न द्वितीयः, यथा संबन्धान्तरमन्तरेण क्वचिदसौ कस्यचित्सिद्धः, तथा दृग्दृश्यभावरूपः संबन्धोऽपीति स्वीकर्तुमुचितः। यच्च सविषयवृत्त्यध्यासात् दृश्यवद् दृशोऽपि मिथ्यात्वमिष्यत एवेति, तदप्यसत्; साक्षिणोऽपि स्वदृश्यमिथ्यात्वेन मिथ्यात्वप्रसङ्गात्। अनादित्वात्तस्याकल्पिततया न मिथ्यात्वमिति चेन्न; अनादेर्भावरूपाज्ञानस्यापि तथात्वप्रसङ्गात्। अनादित्वं च तद्वदेव न कल्पितत्वविरोधि। यदि च साक्षिणो न कल्पितत्वं स्यात्, ब्रह्मस्वरूपवत्तस्यापि नित्यत्वप्रसङ्गः। न चैवं स्वीक्रियते, तद्विषयाविद्यास्वरूपस्यापि नित्यत्वप्रसङ्गेन तन्मूलजगद्विवर्तस्यापि नित्यानुवृत्तिप्रसङ्गादिति॥ २०॥

246. **हन्त त्र्यन्तपक्षे कणभुगभिमतो नावयव्यस्ति कश्चित्**
संघातो नांशतोऽन्यस्तदणुषु न भवेद् दृश्यतेत्यन्धचोद्यम्।
संसर्गैर्विश्वमेतद् घटत इह यथादृष्टि दृश्याणुपक्षे
नादृष्टं कल्पयामः परिणतिभिरसौ दृश्यतादिः श्रुते स्यात्॥ २१॥

ननु बाह्यार्थ एव न संभवति, यत्प्रत्यक्षबलादात्मख्यातिभङ्गं मन्यसे; गुणानां तावद् द्रव्यासिद्धावसिद्धेः; द्रव्याणां च पृथिव्यादीनामवयविसंघातादिविकल्पासहत्वादैन्द्रियिकद्रव्याभावेऽतीन्द्रियस्य दूरनिरस्तत्वाच्चेत्यभिप्रायेण चोदयति—**हन्तेति**॥ हर्षार्थोऽयं हन्तशब्दः, वाक्यारम्भार्थो वा। अवयवी तावत्सौगतैरिव त्र्यन्तवादिभिरपि नाङ्गीक्रियते; संघातस्तु [स्व]संघातिभ्यो नातिरिच्यते, तत्संबन्धश्च स्वरूपातिरिक्तो न संभवति। संभवेऽपि संघातिनामप्रत्यक्षत्वे तत्संघातस्य प्रत्यक्षत्वं न स्यात्; संघातिनां चान्ततः परमाणुपरिशेषात्, तेषां चाप्रत्यक्षत्वादिति भावः। दूषयति—**इत्यन्धचोद्य**मिति। तत्त्वनिरीक्षणासामर्थ्यादन्धत्वोपचारः। परमतेन तावत्परिहारमाह—**संसर्गै**रिति। त्रसरेण्ववयवा एव परमाणव इति पक्षे तत्संसर्गविशेषैरेव ह्रस्वत्वदीर्घत्वत्र्यश्रचतुरश्रवृत्तवक्रकुटिलत्वादिविचित्रसन्निवेशं विश्वमेतद्यथादर्शनं दृश्यं स्यादित्यर्थः। वयं तु न त्रसरेणुव्यतिरिक्तं तदवयवादिकं कल्पयामः, येन तदप्रत्यक्षतया विश्वाप्रत्यक्षत्वशङ्का स्यादित्यभिप्रायेणाह—**नादृष्ट**मिति। ननु श्रुतेऽपि सूक्ष्मद्रव्ये प्रत्यक्षत्वादिकं न मन्यसे, अतस्तदात्मकस्य प्रपञ्चस्य कथं प्रत्यक्षत्वादिकमित्यत्राह—**परिणतिभि**रिति। असाविति दुरपह्नवत्वाभिप्रायम्। आदिशब्देन तत्तदिन्द्रियान्तरविषयलाभः तत्तत्कार्यविशेषहेतुत्वादिकं च संगृह्यते। **श्लो.** रूपस्पर्शादिजननाद् दृश्यत्वस्पृश्यतादयः। तन्नाशात्तदभावश्च युज्येत श्रुतिचक्षुषाम्॥

247. **आत्मख्यातौ मतीनां मिथ इतरतया संविदन्या न सिध्ये-**
दन्योन्यार्थानभिज्ञाः कथमिव च धियो वादजल्पादि कुर्युः।
मानाभासादिसीमा न कथमपि भवेद् ग्राह्यमिथ्यात्वसाम्यात्
सर्वं तत्संवृतेश्चेन्न खलु सदितरा साऽपि तत्तन्नियन्त्री॥ २२॥

एवं बाह्यख्यातेरसंभवं परिहृत्य स्वात्ममात्रख्यातेरनुपपत्तिमाह—**आत्मख्याता**विति॥ ग्राह्यस्य ग्राहकतादात्म्ये संविदन्तरासिद्ध्या मतान्तरप्रसङ्गः प्राक् प्रदर्शितः। तत्र स्वप्रवृत्तिविरोधं चाह—**अन्योन्ये**ति। वादिबुद्धिविषयादिकमनुलिखन्त्या प्रतिवादिबुद्ध्या कथं तत्प्रतिषेधव्यवहारः प्रवर्त्येतेति भावः। उपलक्षणमेतत् शिष्याचार्यादिसंव्यवहाराणाम्।

प्रसङ्गान्तरमाह—**मानाभासे**ति । आदिशब्देन तर्कतदाभाससद्वचनासद्वचनादिसंग्रहः । सर्वत्र समाधानं शङ्कते–**सर्व**मिति । विकल्पाभिप्रायेण प्रतिक्षिपति—**न खल्वि**ति । अयं भावः—संवृतिः संवित्स्वरूपादन्या वा, अनन्या वा? आद्ये कथं तदन्यस्यास्तेन ग्राह्यत्वम्? अगृह्यमाणायाश्च स्वरूपसत्यत्वाभावात् संविदधीनसिद्ध्यभावाच्च कथं मानतदाभासादिव्यवस्थापकत्वम्? न द्वितीयः, संविदनन्यया हि संवृत्या सिद्धं संविदैव सिद्धमित्युक्तं भवति । तथा च त्यज्यतां तन्मिथ्यात्वाभिसन्धिः; अन्यथा संवित्स्वरूपमेवापह्नुतं स्यात्; तस्यास्तदभिन्नत्वादिति ॥ २२ ॥

248. **एकाकारप्रतीतिर्निजमतिविहता नैव दृष्टे गुरुत्वं**
व्यर्थाऽस्मिन् संमतिस्ते बहिरपि नियतं वक्ष्यते ग्राह्यलक्ष्म ।
व्याघातो लिङ्गसंख्यापरिमितिवचसां नास्त्युपाधिप्रभेदा-
देकं नानाकृति स्यान्निजगुणभिदया बाधिते धीः स्वहेतोः ॥ २३ ॥

अन्यानपि बौद्धोक्तान् बाह्यापह्नवप्रकारान् प्रत्याचष्टे—**एकाकारे**ति ॥ यत्तत्राहुः—इदं नीलमित्यादिबुद्धौ नीलादिरेक एवाकार उपलभ्यते; स चेत् स्वार्थस्य तर्हि निराकारा बुद्धिर्न प्रकाशेत; तदप्रकाशे च कुतोऽर्थप्रकाशः? अतः प्रकाशमान एक आकारः प्रकाशमानस्य ज्ञानस्यैव स्यादिति । अत्र ब्रूमः—एकाकारप्रतीतिः स्वमतिव्याहता, ज्ञानार्थयोर्भिन्नाकारतयैव सर्वैरुपलब्धेः। अर्थो हि नीलाद्याकारः; ज्ञानं तु तत्प्रकाशाद्याकारमिति । न च *अर्थेनैव विशेषो हि निराकारतया धियामिति नियमः; भेदकान्तराभावदशाविषयत्वादेवं व्यपदेशस्य; अस्ति ह्याधारत आधेयतः कारणतः कार्यतश्च ज्ञानस्य विशेषः; अतः परस्परभिन्नाकारतयैव ज्ञानार्थयोरुपलम्भ इति । तथाऽपि नीलादेर्ज्ञानाकारत्वकल्पनयैव सर्वव्यवहारसिद्धेः बाह्यार्थकल्पनायां गौरवप्रसङ्ग इत्यत्राह—**नैवे**ति । यदि वयं सौत्रान्तिकवज्ज्ञानाकारवैचित्र्येणार्थस्वभावं कल्पयामः तदैवमनुयुज्येमहि । दृष्टत्वादेव हि बाह्यार्थमभ्युपगच्छाम इति भावः । ननु विप्रतिपन्नो बाह्यार्थः, ज्ञानं तु संप्रतिपन्नम् । अतः प्रकाशमानो नीलादिराकारस्संप्रतिपन्नस्यैव भवितुमर्हति; सिद्धसध्ययोः सिद्धस्यैवावलम्बनीयत्वादिति; तत्राह—**व्यर्थे**ति । यदि वादिविप्रतिपत्त्या वस्त्वतिवर्तेत, तदा हि तत्संमतिरन्वेषणीया । न चैवमस्ति; अन्यथा सर्ववादिनां परपक्षभङ्गस्यायत्नलभ्यतया साधनदूषणादिप्रयोगो निरर्थकः स्यात् । न च मत्संमतिविरहात् त्वत्पक्षं सर्वमसिद्धं मन्यस इति भावः । ननु बाह्यस्य नीलादेः प्रकाशमानत्वमौपाधिकमनौपाधिकं वा? नाद्यः; अप्रकाशस्वभावस्योपाधिसहस्रेणापि प्रकाशापादनायोगात् । न द्वितीयः; अनौपाधिकप्रकाशस्य स्वयंप्रकाशत्वज्ञानत्वयोरवर्जनीयत्वात् । ततश्च वित्तिवेद्यभेदासिद्धेस्तादात्म्यमेव ग्राह्यलक्षणं स्यादित्याह—**बहिरपी**ति । अयं भावः—न तावन्नीलादेरौपाधिकप्रकाशत्वे प्रकाशासिद्धिः; हेतुफलभावस्य त्वयाऽपि स्वीकारात् । अन्यथा कथमसत्स्वभावस्य हेतुसहस्रेणापि सत्त्वापादनमिति माध्यमिकपर्यनुयोगे किं प्रतिवक्ष्यसि? अतः प्रत्यक्षानुपलम्भप्रतिष्ठापितहेतुविशेषाधीनं प्रकाशमानत्वं बाह्यत्वेऽपि नीलादेरप्रतिक्षेप्यमिति स्थिते, ग्राह्यस्य किं नियामकेन लक्षणान्तरेण? तदन्वेषणे च तस्यापि तथेत्यनवस्थापातात् । न हि वयं वैभाषिकसौत्रान्तिकादिवदेकसामग्रीप्रसूतत्वं स्वाकारसमर्पणक्षणहेतुत्वमन्यद्वा क्वचिदनियतं ग्राह्यलक्षणं ब्रूमः, येनातिप्रसङ्गः स्यात्; किंतु सामग्रीनियतिबलात् सदसद्वा किंचित् केनचिदेव ग्राह्यम् । एवमनभ्युपगमे किंचित् प्रति कस्यचिदेव तदन्यस्य कार्यत्वं कथं वक्ष्यसि? कारणादन्यस्य कार्यत्वेऽतिप्रसङ्गं च कथमपनेष्यसि? तदिह वैनाशिकसमयमुत्तीर्य सत्कार्यवादे स्थातुमिच्छसीति । **श्लो.** एवं च दूष्यवाच्यादेस्तादात्म्यं दूषणादिभिः । कल्पनीयं त्वयेति स्यान्

स्वव्याघातादिरक्षतः ॥ नन्वव्यवस्थितस्वभावं न किंचिदपि तत्त्वं भवति; अन्यथाऽतिप्रसङ्गात् । न च व्यवस्थित-स्वभावं किंचिद्बाह्यम् । एकमेव हि भिन्नलिङ्गं व्यपदिश्यते, नक्षत्रं तारका तिष्य इति । एकत्र योषिति दारा इति बहुवचनम् । एकमेव हि परिमाणमणुमहद्दीर्घह्रस्वात्मना विकल्प्यते; अन्यदप्येवंप्रायम् । अतो न बाह्ये क्वचिदपि तत्त्व-व्यवस्थेत्यत्राह—**व्याघात** इति । उक्तेषु लिङ्गवचनाव्यवस्थितिस्तावन्न वस्तुव्यवस्थामन्यथयति, तत्तच्छब्दस्वभावप्रति-नियतत्वाद् व्यपदेशभेदस्य । न हि मनुष्यादौ दृष्टं नपुंसकत्वादि नक्षत्रादौ निर्दिश्यते; न चैकां स्त्रियं दारा इति बह्वीमभिमन्यन्ते। परिमाणे व्यपदेशभेदस्तु प्रतियोग्युपाधिकः। तत्तदपेक्षया च तत्तद्रूपत्वं तस्य तात्त्विकमेव । तथाऽन्य-दपि । एवमनभ्युपगमे त्वन्मतमपि निर्मूलं स्यात् । बुद्धिरपि हि न सर्वं प्रति बुद्धिः; सर्वस्याप्ययत्नतः सर्वज्ञत्व-प्रसङ्गात् । सा च न सर्वं प्रति कार्यं कारणं वा; अनभ्युपगमात् अनुपपत्तेश्च । न च सर्वत्र सदा सती, विभुत्वनित्य-त्वापातात् । न च सर्वं प्रतीष्टाऽनिष्टा वा; वेदनासाधारण्यप्रसङ्गात् रागद्वेषानुत्थानप्रसङ्गाच्च । नापि नीलैकाकारा बुद्धिः पीतादिभिराकारिणी; सर्वाद्वैतप्रसङ्गादिति भावः । अथ स्यात्—नीलमुत्पलं दीर्घः पट इत्यादिषु एकमनेकस्वभावं बाह्यार्थवादिभिरङ्गीक्रियते, तच्चायुक्तम्; नीलपीतादेरिवानेकस्य एकस्वभावत्वायोगादेकस्यानेकस्वभावत्वायोगाच्च । अतो निःस्वभावमेव सर्वं बाह्यमिति । तत्राह—**एक**मिति । न खल्वेकमेवानेकमिति वयं पश्यामः, प्रतिजानीमहे वा, येन विरोधः स्यात्; किंत्वेकमनेकसंबन्धीति । न चैवं विरोधगन्धः; तवापि विशेषमात्ररूपस्यैकस्य संवेदनस्य स्वेतरसर्वप्रतिसंबन्धि-तयाऽपि विरोधप्रसङ्गात् । नीलोत्पलसंविदि च जातिगुणग्राहिण्यामाकारभेदस्यापरिहार्यत्वात्; नीलपीतग्राहिण्यां तु किं पुनः? **श्लो.** किंच सर्वज्ञसंवित्तौ सर्वाकारानुबन्धतः । सर्वस्वभावता वा स्यान्निःस्वभावत्वमेव वा ॥ ननु च बाधितोऽपि द्वितीयचन्द्रादिः पुनरपि प्रकाशमानो दृश्यते; न चात्र बाह्यं किंचिदप्यधिष्ठानं कारणं वा पश्यामः; अतो ज्ञानस्यै-वाधिष्ठानत्वं समनन्तरप्रत्ययस्य च कारणत्वं कल्पयितुं युक्तमित्यत्राह—**बाधित** इति । अयं भावः—अन्वयव्यतिरेका-वधारितं प्रथमभ्रमाधिष्ठानमेव बाधितानुवृत्तिभ्रमेऽप्यधिष्ठानम्; तत्कारणमेव चानुवृत्तं कारणम्; अतो बहिरप्यधिष्ठान-कारणयोस्संभवान्नान्तरत्वं कल्प्यमिति ॥ २३ ॥ **इति स्वात्माकारख्यातिभङ्गः ॥**

249. **धीत्वात्स्वान्यार्थशून्या विमतमतिरिति स्वोक्तिबुद्ध्यादि भग्नं**
ज्ञानज्ञानेऽतिचारः क्षणिकविविधधीसन्ततेः संमतत्वात् ।
दृष्टान्तस्साध्यशून्यो न च निरुपधिकासत्प्रतीतं क्वचिन्नः
तावन्मिथ्यात्वक्लृप्तौ न तु फलति तवाशेषबाह्यार्थभङ्गः ॥ २४ ॥

अथानुमानतोऽपि बाह्यापलापमनूद्य दूषयति—**धीत्वा**दिति ॥ एवं ह्याहुः—यः प्रत्ययस्स निरालम्बनः यथा स्वप्नादिप्रत्ययः तथा च विमतिपदमिति । तदेतदन्ववादिषुः—*स्तम्भादिप्रत्ययो मिथ्या प्रत्ययत्वात्तथा हि यः । प्रत्ययस्स मृषा दृष्टः स्वप्नादिप्रत्ययो यथा ॥ इति । तत्र स्वोक्तिबाधस्तावत्—अयं प्रयोगो यदि न कंचित् प्रत्ययं साध-यितुं प्रवृत्तस्तदा नैरर्थक्याद्भग्नः । अथ साधयितुम्; तदा सोऽपि प्रत्ययः पक्षीकृतो न वा? आद्ये स्ववाक्यजन्यबुद्धेः स्वेतरालम्बनाभावसाधनाद् बुद्ध्यन्तरस्य निरालम्बनत्वं न सिध्येत्, अतस्तदर्थं वाक्यमतदर्थं भवतीति व्याघातः । बहि-ष्कारेऽपि सालम्बनत्वनिरालम्बनत्वविकल्पेन व्याप्तिभङ्गव्याघातौ स्याताम् । स्वबुद्धिविरोधस्तु—यद्यसौ बुद्धिः पक्षीकृत-बुद्ध्यन्तराकारतया निरालम्बनत्वमवलम्बेत, तर्हि सिद्धं बुद्धेः स्वेतरालम्बनत्वम् । अथ स्वाकारतयैव, तथाऽपि बुद्ध्य-

न्तराणां निरालम्बनत्वासिद्धिः। नच बुद्ध्यन्तराकारो बुद्ध्यन्तरस्य निरालम्बनत्वम्, सर्वबुद्धीनां सर्वाकारत्वप्रसङ्गेन व्याघातापसिद्धान्तमतान्तरोत्थानप्रसङ्गः। आदिशब्देन प्रवृत्तिसंग्रहः। बुद्धिसिद्धा[न्ति]न्तानामपि प्रवृत्तिर्न निष्प्रयोजना; अप्रवृत्तेरेव प्रसङ्गात्। सप्रयोजनत्वे तु साधकबुद्ध्यारूढं तत्प्रयोजनं तदात्मकं, ततोऽन्यद्वा? आद्ये वर्तमानत्वभविष्यत्त्वविरोधः। द्वितीये तु बुद्धेः स्वेतरालम्बनत्वमपरिहार्यम्। अनैकान्तिकत्वमाह—**ज्ञानेति**। अयं भावः—यदि ज्ञानान्तरगोचरं किमपि ज्ञानं न स्यात्, क्षणिकबुद्धिसन्तानभेदाभ्युपगमो भज्येत। अतस्संविदन्तरग्राहिणि ज्ञाने स्वेतरालम्बनत्वं स्वीकृतम्। तस्य पक्षीकारे स्वमतविरोधः; अपक्षीकारे तु तत्रातिचार इति। विविधशब्देन आलयविज्ञानप्रवृत्तिविज्ञानचित्तचैत्तादिकल्पनाभेदसंग्रहः। स्वप्नादिदृष्टान्तस्य साध्यविकलत्वेन व्याप्त्यसिद्धिमाह—**दृष्टान्त** इति। इदमत्राकूतम्। न हि वयं स्वप्नादिधियां स्वविषयतादात्म्यमभ्युपगच्छामः। नापि बाह्यालम्बनशून्यत्वं, तत्र वाऽन्यत्र वा सत एव स्वप्नादावपि भानात्। तिष्ठतु वा स्वाप्नार्थसृष्टिपक्षः; पक्षान्तरेऽपि ह्याहुः—* जन्मन्येकत्र भिन्ने वा तथा कालान्तरेऽपि वा। तद्देशे वाऽन्यदेशे वा स्वप्नज्ञानस्य गोचरः॥ इति। न च जागरज्ञानेषु तद्वदन्यथाख्यातिरूपत्वमपि साधयितुं शक्यम्; बाधाद्यभावात्। तत्र च सूत्रं * वैधर्म्याच्च न स्वप्नादिवदिति। नन्वसद्विषयत्वे साध्ये स्यादेव दृष्टान्तसिद्धिः; अन्यथाख्यातिवादिभिरपि भ्रान्तेरंशतस्तथात्वस्वीकारादित्यत्राह—**न चेति**। निरुपाधिकासद्विषयत्वसाधने दृष्टान्तासिद्धिरेव; भ्रमविषयसंसर्गतादात्म्ययोरपि सामान्यतः क्वचित्सिद्धत्वात्, तदसिद्धौ च तद्भ्रमायोगात्। निषिध्यमानौ च तादात्म्यसंसर्गौ तत्तत्सत्यवस्त्ववच्छिन्नावेव निषेधविषयाविति भावः। सोपाधिकासद्विषयत्वसाधनं तु निश्शेषबाह्यार्थनिह्नवायोगाद् बाधकासिद्धेश्च न युक्तम्। असद्विषयत्वमात्रं तु सर्वेषां देशान्तरादावसत्त्वात् सिद्धमेवेत्यभिप्रायेणाह—**तावदि**ति॥ २४॥ **इति निरालम्बनानुमानभङ्गः॥**

250. **प्रत्यक्षं संप्रयुक्ते स्मृतिरपि विदिते व्याप्तिसिद्धेऽनुमा स्यात्**
शाब्दी धीरन्वितादौ भवति तदनुगा भ्रान्तिधीः क्वाप्यसिद्धेः।
व्योमाम्भोजादिशब्दोऽप्यनियतमतिकृत् स्यात् पदार्थं त्यजेच्चेत्
नो चेत्स्यादन्यथाधीर्ध्रुवमिह यदि वाऽनन्वितत्वाप्रतीतिः॥ २५॥

निरुपाधिकासत्प्रतीत्यभावं हेतुदर्शनाभावतः प्रपञ्चयति—**प्रत्यक्षमिति**॥ कार्यमपरोक्षज्ञानमन्वयव्यतिरेकावसितेन्द्रियसंप्रयोगविशेषिते विषये भवति। यत्पुनराहुः—स्मृतिर्न बाह्यविषया, नष्टेऽप्यर्थे स्मृतिदर्शनादिति, तत्राह—**स्मृतिरपीति**। अनुभवविषयीकृते ह्यर्थे संस्कारप्रत्यासत्त्या स्मृतिर्भवति। स्मृतिकालेऽतीतोऽनागतो वेति न स्वकालेऽप्यर्थो न स्यात्। नच न बाह्यः। तथैव हि स्मृतिरपि समुचितमर्थमवलम्बते, न विरुद्धाकारान्तरस्थं स्वाकारं शून्याकारं वा; स्वानुभवविरोधात्। कालान्तरवर्तिविषयत्वादपि सन्निहिताबाह्यविषयत्वं युक्तमिति चेन्न; अनुमेयातीतानागतसंविदामस्वात्मताया ग्राह्यत्वस्य वाऽभावप्रसङ्गात्। तत्र च पूर्वस्मिन् सन्ततिकल्पना लुप्येत। उत्तरत्र संविन्नित्यत्वप्रसङ्गः; स्मृतेस्त्रिकालवर्त्याकारत्वात्। अतः स्मृतेः कालान्तरवर्तिबाह्यविषयत्वं न विरुद्धम्। ननु सुगतमतवर्तिनामनुमानं न वस्तुतः प्रमाणम्। अदूरविप्रकर्षमात्रेण तु प्रमाणत्वपरिगणना। निपुणनिरूपणे कल्पितसामान्याकारावलम्बनत्वादिदमप्रमाणमेवेति कथं तन्निदर्शनेन स्मृतिरसद्विषया न स्यादित्यत्राह—व्याप्तीति। प्रत्यक्षादिसिद्धस्य लिङ्गस्य तथाविधाद्व्याप्तिबलात् सामान्यतः पक्षधर्मतया च विशेषतस्सिद्धेन व्यापकेनानुमितिर्विषयिणी। नचात्र कारणदोषो बाधकप्रत्ययो वेति प्रमितिरेवासौ;

तद्विषयश्च सन्नेव स्वकालेषु । अन्यथा सर्वसंविदां स्वमात्रप्रकाशरूपत्वे सन्तत्यन्तरस्य संविदन्तरस्य चानुमानाभावात् परस्परानभिज्ञतया सर्वासिद्धिस्सर्वैक्यं वा स्यात् । नह्येका संवित् अहमस्मीति संविदन्तराय स्वात्मानं साधयति । अनुमानप्रामाण्यतिरस्कारे च तद्विशेषतयाऽभिमतः स्वागमोऽपि तिरस्क्रियेत । माभूद्वस्तुतः शब्दोऽपि प्रमाणम् । पदपदार्थयोरेव हि संबन्धो मृग्यः । तद्द्वारा भवंस्तु वाक्यार्थसंबन्धो दूरनिरस्तः । अतो वाक्यवाक्यार्थप्रत्ययौ स्वमात्रप्रकाशात्मानौ कल्पितं किंचिदलीकं स्वाकारेणोपरञ्जयतः । तेन वाक्यवाक्यार्थौ प्रमाणप्रमेयभावेनाभिमन्येते इति । तत्राह—शाब्दीति । आदिशब्देन मतभेदेनान्वयग्रहणम् । अयं भावः—पदानि तावत्प्रत्यक्षसिद्धसद्भावानि विभक्त्यन्ततया व्याकृतानि नापह्नवमर्हन्ति; पदार्थाश्च । संबन्धश्च तेषां मिथः संयोगाद्यसंभवेऽपि वाच्यवाचकभावरूपः सांव्यवहारिकः । तदनभ्युपगमे कथानां घोषमात्रशेषत्वप्रसक्तेः । ततश्च लौकिकेष्वलौकिकेष्वपि वाक्येष्वाकाङ्क्षादिपरिष्कृतेषु संसृष्ट[ार्थ]विषया संसर्गविषया वा बुद्धिर्जायत एव । सा च बाधाद्यभावे स्वार्थनियतेति स्वरूपत इव हेतुतो विषयतोऽपि नालीकभावमनुभवतीति । तथाऽपि बाधितांशप्रतीतेरिन्द्रियादिकमसद्ग्रहणे हेतुः स्यादित्यत्राह—तदनुगेति । प्रत्यक्षादित्रयानुगेत्यर्थः । भ्रान्तावपि ह्यसंसृष्टानां संसृष्टतया बोधने संसर्गतादात्म्ययोर्वा सामान्यतस्सिद्धयोः स्वाभावाधिकरणनिष्ठतयाऽऽरोपेऽन्यथाख्यातिमात्रपरिशेषादलीकतुच्छाविद्यमानशब्दानामप्यन्यत्र विद्यमानमेव विषयः । नित्याविद्यमानं निरुपाधिकासदित्यादिशब्दैरपि क्वचिदधिकरणे कस्यचित्स्वदेशादिसिद्धसत्ताकस्यासत्त्वं विवक्षितम् । ननु * अङ्गुल्यग्रे हस्तियूथशतमित्यत्र संसर्गस्सत्योऽसत्यो वा? आद्ये सर्वमुपप्लवेत; द्वितीये त्वसद्ग्रहणं तद्धेतुश्च सिध्यत इति । मैवम्; अयोग्यपदसमभिव्याहाराणामपि क्वचित्सिद्ध एवार्थस्तदभावाधिकरणे प्रतिभास्यते । श्लो. इह त्वारोप्यसंसर्गिसंसर्गासत्त्ववर्णनम् । नासद्ग्रहणक्लृप्त्यै स्यात् प्रमाविषयसाम्यतः ॥ अदुष्टबुद्धौ तत्रैव संसर्गस्सन् विशेषकः । अन्यत्र सिद्ध एवासौ दुष्टायां दोषवैभवात् ॥ अथ स्यात्—खपुष्पवन्ध्यासुतादिशब्दास्तावन्न बुद्धिं न जनयन्ति; * एष वन्ध्यासुतो यातीत्यादि त्वदिष्टोदाहृतिविरोधात् । जनयन्तश्च न निर्विषयां, तदनभ्युपगमात् । सविषयामपि न प्रत्येकांशविषयां, विशिष्टप्रतिभासविरोधाद्बाधानुपपत्तेश्च । अतोऽसदेव किंचिद्विशिष्टमन्यत्खपुष्पादिशब्दैरवभास्यत इति । तत्राह—व्योमाम्भोजेति । नह्यत्र संसर्गिद्वितयमनुपस्थाप्य तदुपहितविशिष्टभ्रमः; अतिप्रसङ्गात् । नच खपुष्पवन्ध्यासुतशब्दयोर्बोध्यमसदविशिष्टं, शशशृङ्गादिभिर्वन्ध्यासुतविशेषणविरोधात् । द्वितीयं दूषयति—नो चेदिति । अवयवार्थानुरोधे ह्यन्यथाधीरेव सिध्येत्; अनन्वितेऽन्वितधीमात्रजननात् । कथमत्रानन्वयग्रहेऽप्यन्वितभ्रम इति दोषमेव पृच्छ । किं न पश्यसि चन्द्रैकत्वं बुध्यमानोऽप्यङ्गुल्यवष्टम्भाच्चन्द्रे द्वित्वम्, निर्मुखमपि मुकुरमवधारयंस्तत्र मुखमिति? अख्यातिपक्षेण त्वाह—यदि वेति । अनन्वितत्वं न गृह्यते; अनन्वितत्वाग्रहणविशिष्टसामग्रीविशेषात् तत्र विशिष्टव्यवहार इति भावः ॥ २५ ॥ इति असद्ग्राह्यख्यातिहेतुदर्शनादिभङ्गः ॥

251. **नेष्टः स्वान्यग्रहश्चेत् क्वचिदपि न हि धीधर्मिणी वः कृतान्ते**
बुद्ध्यात्मा वा स नातो न च किमपि तयाऽपेक्षणीयं बहिष्ठम् ।
धीसन्ताने त्वनादौ भवति च निखिला वासनैकः क्षणस्त-
न्निश्शेषध्वंसिनी सा युगपदखिलमप्युद्वमेत् कल्पनौघम् ॥ २६ ॥

बुद्धेः स्वेतरालम्बननिषेधे दोषान्तरं विवक्षुर्दूष्यमनुभाषते—नेष्ट इति ॥ इदमहं पश्यामीत्यादिषु बुद्धिस्वरूपातिरिक्तानां विषयाश्रयस्वगतविशेषाणां ग्रहोऽनभ्युपगतश्चेदित्यर्थः । विवक्षितस्योपयुक्तं वासनाबुद्धिस्वरूपयोर्भेदाभावं

तावदाह—**न हीति**। बुद्धिर्हि स्वयंविशेषात्मिका, न तु विशेषवतीति सिद्धान्ते वासनयाऽपि धर्मवत्त्वं तस्या नास्तीति यावत्। तत्फलितमाह—**बुद्ध्यात्मेति**। बुद्धिस्वरूपमेवेत्यर्थः। वासनायाः स्वकार्ये सहकार्यसंभवमाह—**न चेति**। बाह्यमभावादेव नापेक्षणीयम्; बुद्ध्यन्तरं तु सदपि न बुद्ध्यन्तरस्य सहकुरुते, अनभ्युपगमात्; अभ्युपगमे च समकालानां सर्वसंविदां तदुत्तरकालसंविदारम्भकतया सन्ततिभेदासिद्धिप्रसङ्गादिति भावः। अनादिसंवृतिसंभूतानां नीलपीताद्यनन्तवासनानामेकैकक्षणात्मकत्वमाह—**धीसन्तान** इति। उक्तपरम्पराफलितमनिष्टमाह—**तदिति**। निश्शेषध्वंसिनी—निरन्वयविनाशिनी। एतेन भविष्यत्सर्वविकल्पसामग्रीभूतबुद्धिक्षणध्वंसकाले काचिदेव कल्पना जायते नान्येति नियमो न स्यादिति व्यज्यते। अखिलं—तत्सन्ततावासंसारं भविष्यत्सर्वम्। एवं सर्वकल्पनायौगपद्यात् उत्तरक्षणवत्पूर्वक्षणेष्वपि तुल्यन्यायतया तत्तदुत्तरलोपे नानादिस्संसारप्रवाहः स्यादिति **माध्यमिक**मध्यमध्यास्स्वेति ॥ २६ ॥ **इति योगाचारोक्तवासनाभङ्गः ॥**

252. **स्वाकारोऽर्थैः स्वबुद्धौ निहित इति च नाधारहानाद्ययोगात्**
स्वच्छे च्छाया परस्मिन्न च भवति न च स्यादसौ रूपशून्ये।
साम्यासत्त्याद्ययोगाद्विषयविषयिणोर्नापि भेदाग्रहः स्या-
न्नैकाका[रेण रक्तं]रोपरक्तं द्वयमपि स च ते ग्राह्यतो नातिरिक्तः॥ २७ ॥

अथ बाह्यार्थवादि**बौद्ध**कल्पिताः पक्षाः प्रतिक्षिप्यन्ते। तत्र **सौत्रान्तिकाः** प्राहुः—विज्ञानं तावत्स्वप्रकाशप्रत्यक्षसिद्धम्; तच्च क्षणिकम्; पूर्वापरकालवर्तितया प्रकाशाभावात्। न चेदमर्थशून्यम्, नीलादिज्ञानसन्ततौ पीतादिज्ञानसन्तत्यनुत्पादप्रसङ्गात्। स चार्थो न प्रत्यक्षः; अधिपतिसंप्रयुक्तस्य क्षणस्य निरुद्धत्वात्। असंप्रयुक्तस्योत्तरक्षणस्य प्रत्यक्षत्वेऽतिप्रसङ्गात्। अतो बुद्धिजनकस्यार्थक्षणस्य स्वाकारसमर्पकहेतुत्वमेव ग्राह्यत्वमित्युपचर्यते। तदुक्तम्—*भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः। हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम्॥ इति। अतः स्वहेतुभूतार्थसमर्पिताकारो बुद्ध्यात्मैव वस्तुतः प्रत्यक्ष इति; तदिदमनुभाष्य प्रतिभाषते—**स्वाकार** इति॥ विकल्पितदूष्यकोटिभञ्जकहेतुमाह—**आधारहानाद्ययोगा**दिति। अयमाशयः—योऽयमर्थेन बुद्धावाकारस्समर्प्यते, स किम् अर्थस्य स्वरूपम्, उत धर्मः, उभयातिरिक्तो वा? नाद्यः, क्षणध्वंसिनः क्षणान्तरवर्तिसंक्रमणायोगात्; अन्यथा स्थिरवादप्रसङ्गात्; अर्थस्य च साक्षात्प्रत्यक्षत्वापत्तेरनुमेयपरिशेषाभावाच्च। न द्वितीयः, धर्मधर्मिभावानभ्युपगमात्, तदभ्युपगन्तॄणामपि धर्मस्य धर्मिप्रहाणेनान्यत्र प्रवेशादृष्टेः, क्षणिकत्वस्थिरत्वविकल्पेन दत्तोत्तरत्वाच्च। अत एव न तृतीयः; अर्थस्य तेन संबन्धाभावात्, असंबद्धस्य चान्यत्र सञ्चारयितुमशक्यत्वात्, अन्यथाऽतिप्रसङ्गादिति। त्रिष्वपि च पक्षेषु परेष्टप्रत्यक्षानुमानयोरप्रवृत्तिरुद्घाटनीया। अत्रानवहितहृद्यं गत्यन्तरं शङ्कते—**स्वच्छ** इति। यथाऽत्यासन्नमपि मुखं स्वयमगृह्यमाणं दर्पणसन्निधानेन तत्र समर्पितच्छायं तत्रत्यमेव गृह्यते, तथाऽर्थाकारोऽपि स्वच्छबुद्धिप्रतिफलितश्छायात्मा गृह्यत इत्यर्थः। एतदपि दूषयति—**न चेति**। न हि नष्टस्य क्वचिच्छायापत्तिर्दृष्टा, न च वर्तमानस्यापि वर्तिष्यमाणे। अन्यमपि दृष्टविरोधमाह—**न चेति**। रूपवत्येव हि पदार्थे रूपवतामेव प्रतिबिम्बसिद्धिः। न च विज्ञानं रूपवत्, नाप्यर्थः; स्पर्शगन्धादिग्रहणे रूपप्रसङ्गाभावात्; नीलादौ रूपवत्त्वानभ्युपगमात्; तत्कल्पनेऽपि प्रत्यक्षत्वानभ्युपगमेन प्रतिबिम्बप्रसङ्गाभावात्। अप्रत्यक्षस्याकाशस्य जलादिषु प्रतिबिम्बितत्वं दृश्यत इति चेन्न; आकाशप्रत्यक्षत्वपक्षे तदभावात्। पक्षान्तरे तु यत्त-

न्मलिनताध्यासविशिष्टतया किंचिच्चाक्षुषं सर्वलोकसिद्धं, तस्यैव जलादौ प्रतिबिम्बितत्वम्। अतो नार्थस्य बुद्धौ कथंचिदपि प्रतिबिम्बितत्वसिद्धिरिति। स्यादेतत्, न मुख्यच्छायापत्तिं ब्रूमः, किं त्वध्यासमात्रम् आरोपितार्थाकारं विज्ञानमनुभूयत इति, तद्दत्तोत्तरम्। अर्थस्य तदाकारस्य च ग्रहणाभावे कथं बुद्धौ तदध्यासः? ग्रहणे च कथमर्थो न प्रत्यक्षः? अर्थग्रहणाभावेऽपि तदाकारो वासनावशादन्यत्राध्यस्यत इति चेन्न; अप्रत्यक्षमेव ह्यर्थं समर्थयमानस्य तद्वासनैव निर्मूला; सा कथमध्यासं प्रसुवीत? अर्थनिरपेक्षवासनाप्रवाहवैचित्रीसंभवे **योगाचारयूथात्** किं निर्गतोऽसि? किं च यत्रानुमानादावर्थस्य न बुद्धिहेतुत्वं, तत्र स्वाकारसमर्पणक्षमहेतुत्वायोगात् ग्राह्यत्वाभावः प्रसज्येत। अथ स्यात्—यथा माषराशौ मषी यथा वा नीलोत्पलवने कादम्बस्तद्भेदाग्रहात्तदपृथग्भावेनाभिमन्यते व्यवह्रियते च; एवं तत्तदर्थसन्निहितविज्ञानं तथेति; इदमपि दत्तोत्तरमेव। गृह्यमाणे हि माषराश्यादौ मषीप्रभृतेस्तत्सारूप्ये तत्संसर्गे च सति तथाऽभिमानव्यवहारौ स्याताम्। इह तु न तथा, अर्थस्याप्रत्यक्षत्वात् ज्ञानस्य च तत्सारूप्यसंसर्गयोरयोगात्, तत एव भेदाग्रहस्याप्यसंभवादिति। अत एव **वैभाषिकमुखे**नापि नैतद्वाच्यम्। नन्वस्ति तावत्कश्चिन्नीलादिराकारः; दृष्टस्य दुरपलपत्वात्। स त्वर्थे सन्नपि परमाणुगतसत्तावन्न गृह्यते। बुद्धिगतस्तु स्थूलगतसत्तावदुपलभ्यते। अत एकस्याकारस्योभयोपरञ्जकत्वादर्थाकारो बुद्धौ गृह्यत इत्यत्राह—**नैकेति**। अयं खल्वाकारः प्रागुक्तैरर्थस्वरूपधर्मादिविकल्पक्षोभैरपास्तः। किंचानेकनिष्ठोऽयमेकाकारः सत्यः, असत्यो वा? नाद्यः; जात्यादिखण्डनाशाप्रहाणप्रसङ्गात्, पूर्वापरवर्तिन एकत्वे स्थिरवादप्रसङ्गाच्च। न द्वितीयः, अवगमाधीनसत्ताकस्यासत्यस्य कथमगृह्यमाणतयाऽर्थेऽवस्थानम्? तद्ग्रहे च तत्कल्पनाधिष्ठानस्यार्थस्यापि प्रत्यक्षत्वमकामेनापि स्वीकार्यम्। अपि च नीलाद्याकारस्यार्थातिरिक्तत्वस्वीकारेऽपसिद्धान्तः, अनतिरेके तु न बुद्धौ तत्संभवः, संभवे च बुद्ध्यारूढस्यार्थस्य प्रत्यक्षत्वं सुदुस्त्यजमित्यभिप्रायेणाह—**स चेति** ॥ २७ ॥ **इति ज्ञानेऽर्थाकारसमर्पणादिभङ्गः** ॥

253. **संसर्गाद्बोध्यबुद्ध्योरभिदधति सिताद्याकृतेस्सिद्धिमन्ये**
सादेश्यात् तन्मतेऽसौ न तु भवति तथा कालजोऽतिप्रसक्तः।
व्यंशे नैवाभिमुख्यं विषयविषयिताऽत्राकृतेः प्रागसिद्धा
क्वास्यास्संसृष्टनाशे जनिरिति कुसृतिः पूगताम्बूलनीतिः ॥ २८ ॥

अन्ये त्वाहुः—बुद्धिरर्थश्च वस्तुतो निराकारौ; तथाऽपि चूर्णहरिद्रायोगजरागन्यायेन सितरक्तादिराकारस्तदोत्पन्नो गृह्यत इति। तदनुभाषते—**संसर्गा**दिति ॥ तत्र संसर्गव्यवस्थापकविकल्पभेदानभिसन्धाय देशैक्यात् संसर्गं तावन्निराकरोति—**सादेश्या**दिति। यथा चूर्णहरिद्रयोरत्यासन्नदेशाधिष्ठानतया मिथःसंयोगो निरन्तरत्वं वा, न तथाऽत्र, विप्रकृष्टबोध्यग्रहणात्, कालान्तरवर्तिनामपि कयाचिद् बुद्ध्या गृह्यमाणत्वात्; तत्र संसर्गाभावादेव तज्जन्याकारायोगात्, स्वाकारधीसिद्धेश्च वर्तमानधीसमानत्वात्। न च त्वन्मते देशो नाम कश्चिदन्यः, येन सादेश्यसंभवः। अथ मन्यसे यत्र कालासत्तिस्तत्रैव सांसर्गिक आकारः, अन्यत्र तु वासनात एवेति; तत्राह—**तथेति**। कालजो हि ग्राह्यग्रहणयोर्निरन्तरपूर्वापरत्वमात्रेण वा समानकालतया वा? उभयत्राप्यतिप्रसक्तिरनिवार्या। स्वभावनियमादनतिप्रसक्तिरिति चेत्, तर्हि किमर्थसंसर्गेण, विज्ञानवादनीत्या बुद्धेरेव स्वभावनियमोपपत्तेः? नन्वयस्कान्ताभिमुख्यादयस एव विकृतिः, चन्द्रसूर्याभिमुख्यात्तत्कान्तयोरेव। एवं कुतश्चिदाभिमुख्यविशेषात् क्वचिदाकारविशेषोत्पत्तिः स्यात्। तत्राह—**व्यंश** इति। सांशयोरेव पदार्थयोराभिमुख्यसंगतिः। इह तु द्वयोरपि निरंशत्वाभ्युपगमान्न तत्संभव इत्यर्थः। भिन्नकालयोश्च तदसंभवः स्पष्टः।

स्यादेतत्; समकालयोर्भिन्नकालयोश्च बोध्यबुद्ध्योर्विषयविषयिभावः सर्वाभिनन्द्यः; तत एव संसर्गादाकार उत्पद्यतेति। तदपि दूषयति—विषयेति। किमत्र निराकारे वस्तुनि विषयीकृते पश्चादाकार उत्पद्यते? साकारे वा? नाद्यः, अर्थस्य प्रत्यक्षत्वानभ्युपगमात्, आकारोत्पत्तिकाले बोध्यबुद्ध्योर्विनष्टतया निराधाराकारोत्पत्तिग्रहणयोः प्रसङ्गात्, आकारस्य च द्विष्ठैकनिष्ठत्वादिविकल्पदौःस्थ्यात्। न द्वितीयः, विषयीकारादाकारसिद्धिः, साकारस्य विषयीकार इति मिथस्संश्रयात्। दूषणान्तरमाह—कास्या इति। अस्याः—आकृतेः। क्षणिकवस्तुद्वयसंसर्गजन्यायास्तदुभयनाशकाले तत्र वाऽन्यत्र वा स्थित्ययोगात्, निराधारत्वे च अर्थादेराकार इति ग्रहणायोगाच्च, संसर्गजाकारनीतिः प्रमाणाभावात् प्रमेयविरोधाच्च कुत्सितगतिरित्यर्थः। अयं चात्र भावः—ज्ञानार्थसंसर्गादुत्पत्स्यमान आकारो न प्रत्यक्षज्ञानेन गृह्येत; ज्ञानकाले ग्राह्याकाराभावात्, आकारोत्पत्तिकाले ज्ञानस्य विनष्टत्वात्। लोकदृष्ट्या चात्र निदर्शनेन संभावना स्थाप्यते। लोकश्च स्पर्शवद्रूपवद्द्रव्यसंसर्गाद्रक्तिमाद्युत्पत्तिं पश्यति। तत्र यद्यप्यचाक्षुषेऽर्थे क्वचिद्रूपस्पर्शविकल्पास्पदत्वम्, तथाऽपि न बुद्धिस्तथा। अतस्तयोरुभयत्र एकत्र वा न संसर्गहेतुको नीलाद्याकार उत्पद्येत। एकस्य च द्विष्ठत्वे स्वमतक्षोभः, विषयमात्रनिष्ठत्वे तदाकारविषयप्रत्यक्षतापत्तिः, ज्ञानमात्रनिष्ठत्वेऽर्थनैरपेक्ष्यप्रसङ्गश्चोक्त इति ॥ २८ ॥ **इति संसर्गजाकारमतभङ्गः ॥**

254. **भ्रान्तौ रूप्यादिरर्थो विलसति निरधिष्ठान इत्याहुरेके**
तन्नाधिष्ठानदृष्टेरनियतिविरहादन्यथाऽतिप्रसङ्गात्।
निष्ठ्यूतस्वाक्षिदोषप्रभृतिषु च भवेत् केश[गुच्छा]पुञ्जादिबुद्धिः
किं चैषाऽप्यन्यथाधीर्यदनिदमिदमित्यत्र भातं ब्रवीषि ॥ २९ ॥

अथ कैश्चिद् बाह्यार्थवादिभिस्सौगतैरुक्तां निरधिष्ठानख्यातिमन्वाख्याति—**भ्रान्ताविति** ॥ नात्र पुरोवर्तिनि रजताध्यासः; किं तु संस्कारोपनीतं प्रमुषिततदंशं रजतं दोषवशादिदमिति भाति। अन्यथा कथं तैमिरिककेशस्तवकटिट्टिभादिप्रत्ययः? न हि तत्र किंचिदधिष्ठानं भ्रान्तिदशायां बाधदशायां वा भाति। न चेयं स्मृतिरेव; अननुभूतेदंत्वग्रहणात्। प्रागनुभूतमेवेदंत्वं भातीत्ययुक्तम्; तद्भाने तत्कारप्रसङ्गात्। अन्यथा कथं भ्रा[न्तिः]न्ता सविहतिरिति। तदेतत् प्रतीतिविरोधादिविवक्षया प्रतिषेधति—**तन्नेति**। अबाधितलोकप्रतीतिविरोधात् निरधिष्ठानत्वं दुर्वचमित्यभिप्रायेणाह—**अधिष्ठानदृष्टेरिति**। पुरोवर्तिद्रव्यमङ्गुल्या निर्दिशन्निदं रजतमिति व्यपदिशति; उपादत्ते च स्वयम्। तद्वाक्यश्रावी च तत् रजतत्वेन वदति। यदि शुक्लभास्वरशुक्तिशकलमिदंतया न प्रतीतं, कथं रजतार्थी तदेवोपादत्ते? कथं च नेदं रजतमिति बाधकोदये जहाति? इत्यभिप्रायेणाह—**अनियतिविरहादिति**। अन्यथा प्रतीतिप्रवृत्त्योरनियतिरेव स्यादित्याह—**अन्यथेति**। न हि निमीलिताक्षो रजतं स्मरन् कदाचिद्रजतमिदमिति भ्राम्यति। न च रजतस्मृतिकालदृष्टमङ्गुलीयकार्थी संगृह्णातीति भावः। तैमिरिकभ्रान्तिषु साधिष्ठानत्वं साधयति—**निष्ठ्यूतेति**। प्रभृतिशब्देन गन्धर्वनगरादिभ्रमेषु मेघादेरधिष्ठानस्य संग्रहः। एवं च वर्णयतामन्यथाख्यातिरनतिक्रमणीयेत्याह—**किंचेति**। इदमर्थस्य रजततया भानमसन्निहितस्य रजतपदार्थस्येदंतया भानमिति को विशेषः? असत्पक्षे तु प्रतीतिप्रवृत्तिबाधानामुपपत्तिरिति विशेषः ॥ २९ ॥ **इति बाह्यार्थवादिसौगतोक्तनिरधिष्ठानख्यातिभङ्गः ॥**

255. **ख्यातिं भ्रान्तिस्वरूपां जगदुरविषयां केऽपि तद्धीविरुद्धं**
ख्यातिः कस्यापि पुंसः क्वचिदपि विषये सिद्धरूपा हि सिद्धा।

अत्रार्थासत्त्वतः स्यादियमविषयता सर्वथा सत्त्वतो वा
तादृक्त्वेऽप्यन्यथाख्यात्यसदधिगमयोरेव पर्याय एषः ॥ ३० ॥

अत्र केचिदेवमूचुः—ख्यात्यन्तरवादिनां तावदन्ततोऽख्यातिपक्षेऽन्यथाख्यातिपक्षे वा विश्रमः; तत्र च ख्यात्यपह्नवदोषमसत्ख्यातिप्रसङ्गं च परिजिहीर्षमाणैरन्यासक्तदृष्टिन्यायेन निर्विषयैव ख्यातिरङ्गीकार्येति । तदनुभाषते—**ख्यातिमिति** ॥ तत्र प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तिरित्यभिप्रायेणाह—**तद्धीविरुद्धमिति** । निर्विषयत्वे घटादिवत् ख्यातित्वं न स्यादिति प्रसङ्गमभिसन्धायाह—**ख्यातिरिति** । अयं भावः—यद्यप्यात्मस्वरूपं ज्ञानमिति त्रय्यन्तसिद्धान्तः, तथाऽपि तस्य स्वप्रकाश[रूप]तामात्रेण ज्ञानत्वं श्रुतिपरतन्त्रैरङ्गीक्रियते । एवं क्षेत्रिणां धर्मभूतज्ञानस्य विषयप्रकाशरहितावस्थाऽपि । न त्विह तथा वक्तुं शक्यम्; भ्रान्तिर्निर्विषयेत्यवगमाभावात्; प्रत्युत सविषयत्वमेव तस्यास्सर्वेषु शास्त्रेषु सुव्यक्तमुक्तम् । हिः प्रसिद्धौ । तदिह सविषयत्वेऽवश्यंभाविनि तदविरोधाय भ्रान्तिविषयस्यार्थस्याध्यासाधिष्ठानेष्वविद्यमानतया सर्वत्राभावाद्वा भ्रान्तेर्निर्विषयत्वं वक्तव्यम्; तथा सत्यन्यथाख्यातिरलीकख्यातिर्वा स्यादिति न निर्विषयख्यातिसिद्धिरित्युत्तरार्धेनाह—**अत्रेति** । एषः—भ्रान्तिशब्दार्थो बोधः । स च निर्विषयोऽपि सविषयत्वेन भातश्चेदन्यथाख्यातिस्वीकारः । निर्विषयतया भाने तु प्रवृत्त्यादिहेतुत्वं न स्यादिति भावः ॥ ३० ॥ **इति निर्विषयख्यातिभङ्गः ॥**

256. **प्रत्यक्षादित्रयं च स्मृतिरिति च मतिः श्रुत्यभीष्टा चतुर्धा**
प्रत्यक्षं त्वत्र साक्षात् प्रतिपदनुमितिर्व्याप्यतो व्यापके धीः ।
शाब्दी वाचाऽर्थबुद्धिः स्मृतिरपि कथिता संस्क्रियामात्रजा सा
येषामिष्टाऽन्यथाधीः पृथगभिदधिरे तैरिहान्येऽपि भेदाः ॥ ३१ ॥

प्रमाणाप्रमाणविभागप्रसङ्गात् ख्यातौ वादिभेदोक्ता विकल्पाः प्रत्युक्ताः । अथ श्रुत्याद्यभिमतं बुद्धेश्चातुर्विध्यमाह—**प्रत्यक्षादीति** ॥ श्रूयते हि *स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयमिति । ऐतिह्यमिह शाब्दज्ञानम्, औचित्यात् । आह च भगवान्**मनुः**—*प्रत्यक्षमनुमानं च शास्त्रं च विविधागमम् । त्रयं सुविदितं कार्यं धर्मसिद्धिमभीप्सता ॥ इति ॥ तज्जन्यायाः स्मृतेस्तदनुविधानादधिकार्थासिद्धेश्च पृथगनुक्तिः । यथोद्देशं पादद्वयेन लक्ष्यते । अत्र—उक्तेषु चतुर्षु । प्रत्यक्षमिह साक्षात्प्रतिपत्तृबुद्धिः । तस्यास्साक्षात्त्वं नाम लैङ्गिकत्वशाब्दत्वस्मृतित्वरहितज्ञानत्वम् । तेन मुक्तादीनां धर्मभूतज्ञानेषु धर्मिज्ञाने चानुस्यूतिः । वैशद्यमात्रं साक्षात्त्वमिति त्वव्याप्तमतिव्याप्तं च; सुषुप्त्यादावविशदात्मस्वरूपभानस्य परोक्षज्ञानेष्वपि प्रकाशांशवैशद्यस्य च भावितत्वात् । वैशद्यविशेषः साक्षात्त्वमिति तु दुर्विवेचम् । ननु लैङ्गिकादिज्ञानानां स्वात्मनि साक्षात्त्वमस्ति वा न वा? आद्ये लिङ्गादिजन्ये कथं तदभावलक्षणं साक्षात्त्वम्? न च तत्र तज्जन्यत्वं नास्ति, अजन्यत्वेनानादित्वप्रसङ्गात् । न चैकस्य निरंशस्य वेद्यांशत आगन्तुकत्वम्, अंशान्तरतश्चानादित्वमिति श्रद्धेयम् । न द्वितीयः, प्रत्यक्षज्ञाने स्वात्मनि प्रत्यक्षत्वाभावप्रसङ्गात् । न ह्यक्षजन्ये लिङ्गादिजन्ये वा ज्ञाने स्वात्मनि कश्चिद्विशेषो दृश्यत इति । अत्र ब्रूमः । ये खल्वाहुः—*सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा । साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन संमता ॥ इति, तान् प्रत्ययं पर्यनुयोगश्शोभते । ये तु लैङ्गिकादिज्ञानेषु स्वात्मस्वविषयविभागानादरेण ज्ञातकरणसंस्कारमात्रयोरन्यतरजन्यज्ञानत्वेन परोक्षत्वं निर्धारयन्ति, न तान् प्रत्यसौ । **श्लो.** अन्ये तु भ्रमसंवित्तौ सत्यासत्यार्थते यथा । प्रत्यक्षत्वपरोक्षत्वे तथैकत्राहुरंशतः ॥ अनिर्धारितसाक्षात्त्वैरत्र वक्तुं न शक्यते । बुद्धावेकत्र साक्षात्त्वं परोक्षत्वा-

विरोधतः ॥ परोक्षेतरबोधत्वं साक्षात्त्वमिति चेन्मतम् । स्वस्य स्वान्यत्ववैधर्म्यात् साक्षात्त्वाभाव इष्यताम् ॥ अनादिबुद्धिसाक्षात्त्वं कुतस्त्यमिति चेन्न तत् । कारणेनानपेक्षत्वात् प्रमाणं पुनरागमः ॥ श्रूयते हि * कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्चेति । स्मर्यते च * नैव किंचित् परोक्षं ते इत्यादि । * पश्यत्यचक्षुरित्यादिभिरपि सर्वदर्शित्वं सिद्धमिति । **अनुमितिरिति** लक्ष्यपदम् । **व्याप्यतो व्यापके धीरिति** लक्षणपदम् । व्याप्यतया प्रतिसन्धीयमानात्तद्व्यापकतया सामान्यतः प्रसिद्धस्यार्थस्य विशेषतोऽवगतिरनुमितिरित्यर्थः । **शाब्दी**त्यत्र धीरिति योज्यम् । वाचा—वाक्येन । अर्थबुद्धिः—विशिष्टार्थधीः । स्मृतिः लक्ष्यम् । ननु स्मृतिलक्षणे संस्कारमात्रजन्यत्वमसंभवि ; एकहेतुजन्यस्य कस्याप्यभावात् । अत्र तु तथाऽभ्युपगमे संस्कारोद्बोधकादिभिरपि नैरपेक्ष्यप्रसङ्गात् । न चैवमस्त्विति युक्तम् ; अतिप्रसङ्गात्, उत्पन्नस्थिरसंस्कारस्य च प्रत्ययान्तराव्यवहितस्मृतिसन्ततिप्रसङ्गात्, सुषुप्त्याद्यभावप्रसङ्गाच्चेति । मैवम् ; न ह्यत्र साधारणकारणानां सहकारिणां च व्यवच्छित्त्यै मात्रशब्दः, किंतु पृथग्बोधजननसमर्थतत्तदसाधारणकारणानपेक्षत्वार्थम् ; मनसोऽपि ज्ञानोत्पत्तौ साधारणकारणत्वात् न दोष इति । मात्रशब्दः प्रत्यभिज्ञाव्यवच्छेदार्थः । ननु सन्ति संशयादयोऽपि मतिभेदाः, किं ते न विभज्यन्त इत्यत्राह—**येषामिति** । अयं भावः—* यथार्थं सर्वविज्ञानमिति पक्षेण धीचातुर्विध्यमुक्तम् । अन्यथाख्यातिपक्षे तु संशयादिभेदाश्च वक्तव्याः । तद्व्यवच्छेदाय प्रत्यक्षादिलक्षणे प्रमितिशब्दः प्रयोक्तव्य इति ॥ ३१॥

इति प्रत्यक्षादिप्रमाणविभागलक्षणे ॥

257. **ईदृक्त्वात्यन्तशून्ये न हि मिषति मतिर्नापि युक्तिस्तथात्वे**
सामग्रीभेदवेद्ये पृथगवगतिरस्त्वत्र नैषाऽन्यथात्वात् ।
धीत्वादेर्वा विशिष्टं प्रथयति जनिता बुद्धिराद्याक्षयोगैः
तस्मात् संस्कारशून्येन्द्रियजनितमतिर्निर्विकल्पेति वाच्या ॥ ३२ ॥

प्रमाणज्येष्ठतया प्रथमोद्दिष्टलक्षितस्य प्रत्यक्षस्य निर्विकल्पकसविकल्पकविभागमात्रं सर्वानुमतं सिद्धं कृत्वा निर्विकल्पकमविशिष्टविषयमिति परोक्तं निर्मूलयति—**ईदृक्त्वेति** ॥ अयं भावः—अप्रत्यक्षा बुद्धिरिति वादं परिहरिष्यामः । प्रत्यक्षत्वपक्षे तु नीलपीतादिवत्तत्स्वरूपमपि यथोल्लेखं निर्धार्यम् । तत्र न तावत्प्रथमाक्षसन्निपातसमनन्तरमविशिष्टविषया मे बुद्धिर्जातेति पामरः पण्डितो वा सावधानोऽनवहितो वा कश्चिद्विजानन् व्याहरन् वा दृश्यते । न च निर्विकल्पकान्तरेण तद्ग्रहणं परैरभ्युपगम्यते । एवं सविकल्पकेनापि ; तद्धि निर्विकल्पकविषयं विशिष्टं गृह्णाति, न तु निर्विकल्पकम् । यत्तु पठ्यते—* अस्ति ह्यालोचनाज्ञानं प्रथमं निर्विकल्पकम् । बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥ इति, तदपि डिम्भविप्रलम्भनम् । निदर्शनं च विशिष्टविषयमेव ; बालमूकपश्वादीनां जातिगुणादिविशिष्टवस्तुग्रहणाभावे तत्तन्नियतप्रवृत्त्यादिभङ्गप्रसङ्गात् । शुद्धवस्तुजत्वं च वस्तुजत्वमात्रं वा, असहितवस्तुजत्वं वा, अनारोपितवस्तुजत्वं वा, निर्विशेषवस्तुजत्वं वा ? नाद्यः, सविकल्पकसाधारण्यात् । न द्वितीयः, अनेकव्यक्तिविषयैकनिर्विकल्पकसंभवात्, जातिगुणादीनां च धर्मिणा सह मिथस्संबन्धरहित[स्य]ग्रहणस्य कैश्चिन्निर्वाहात् । न तृतीयः, सविकल्पकसाधारण्यादेव । न चारोपितवस्तुजत्वं सविकल्पकस्य कैश्चिदुपन्यस्तं यतस्तद्व्यवच्छेदार्थं शुद्धवस्तुजत्वोक्तिश्शोभेत । न चतुर्थः, अपसिद्धान्तापातात् । न हि निर्विकल्पकगृहीतं वस्तु निर्विशेषमिति वस्सिद्धान्तः ; तदात्मकजात्यादिविशेषाभ्युपगमात्, अन्तर्हितसुगतमतानभ्युपगमाच्च । धर्माजन्यत्वे सति धर्मिजन्यत्वं विवक्षितमिति चेन्न ; धर्मधर्मितादात्म्यवादिनां भवतां तथोक्तेः

पांसुविक्षेपप्रायत्वादित्यास्तामेतत् । मा भू दुपलम्भतस्तादृशधीसिद्धिः, युक्तितस्तु स्यादित्यत्राह—**नापीति** । नह्याद्यादावविशिष्टग्रहणे काचिद्युक्तिः, तदभावे वा काचिदयुक्तिरिति भावः । नन्वस्ति युक्तिः ; सर्वत्र हि विशिष्टप्रत्ययस्य विशेषण-विशेष्यधीपूर्वकत्वं दृष्टम् । अतः प्रथमसविकल्पकमपि तथा ; अन्यत्र विशिष्टप्रत्ययस्य विशिष्टप्रत्ययपूर्वकत्वनियमादनवस्थाप्रसङ्गः । अतोऽवसीयते प्रथमाक्षसन्निपातात् प्रत्येकधीरिति । तत्राह—**सामग्रीति** । अयं भावः—यत्र विशिष्टप्रत्ययस्य पृथग्विशेषणविशेष्यग्रहणपूर्वकत्वं, तत्र भिन्नसामग्रीवेद्यत्वनिबन्धनस्तथाभावः ; सुरभिचन्दनत्वयोरन्योन्यनिरपेक्षभिन्नेन्द्रिय-ग्राह्यत्वात् । तदपेक्षस्तु पश्चात् कुतश्चित् सुरभि चन्दनमिति विशिष्टप्रत्ययः । स तु चाक्षुषो मानस आनुमानिको वे-त्यवसरे चिन्त्यम् । नन्वेकेन्द्रियवेद्येष्वपि दण्डदेवदत्तादिषु कदाचिद्विशिष्टप्रत्ययस्य पृथक्प्रत्ययपूर्वकत्वं दृष्टम् । सत्यम्; तत्रापि सामग्रीप्रवाहवशात् प्रथमं प्रत्येकग्रहणसामग्रीप्रवृत्तिः, अनन्तरं विशिष्टग्रहणमपि न पृथग्ग्रहणकारणकम् । यत्र तु विशेषणविशेष्यतत्संबन्धानां युगपद्योग्यैकेन्द्रियसंबद्धानां विशिष्टप्रत्ययः, तत्र न पृथग्ग्रहणपूर्वकत्वमस्तीति दृष्टम् । अत एव तत्राप्यनुमीयत इति चेन्न ; भिन्नसामग्रीवेद्यत्वोपाधेरनिस्तारात् । विशिष्टप्रत्ययत्वं चानादिविशिष्टप्रत्यये व्यभि-चरितम् । न चाविशिष्टविषयमेवेश्वरज्ञानम्, तेन कर्तृत्वानिर्वाहात् । आदिमत्त्वे सतीति विशेष्टव्यमिति चेत् ; तत्कस्य हेतोः ? अनादेरनपेक्षत्वादिति चेन्न ; आदिमतोऽप्येकसामग्रीवेद्यविषयस्य विशिष्टोल्लेखे पृथग्ग्रहणनैरपेक्ष्यात् । तदिद-मभिप्रेत्याह—**अत्र नैषेति** । एकसामग्रीवेद्यविषये विशिष्टप्रत्यये कारणभूता पृथगवगतिर्नास्तीत्यर्थः । तत्र भिन्नसामग्री-वेद्यविषयत्वासंभवं हेतुमाह—**अन्यथात्वादिति** । प्रतिप्रयोगमप्याह—**धीत्वादेरिति** । आदिशब्देन धीशब्दवाच्यत्व-धीलक्षणयोगित्वयोर्ग्रहणम् । प्रथमाक्षसन्निपातजनिता बुद्धिर्विशिष्टविषया, धीत्वात् संप्रतिपन्नवदिति । आत्मस्वरूपप्रत्यय-श्चाहंत्वादिविशिष्टप्रकाशात्मेत्यङ्गीचक्रुः । किं तर्हि निर्विकल्पकस्योदाहरणमिति चेत् प्रथमाक्षसंप्रयोगजमेव । कथं तस्य निर्विकल्पकशब्दवाच्यत्वम् ? विवक्षितविकल्पाभावमात्रात्, अल्पधने दरिद्रव्यवहारवत् । ननु तत्तद्विकल्पाभावतारतम्या-द्व्यवहारानियतिः स्यात्, न च व्यवस्थापकं लक्षणं दृश्यते, तत्राह—**तस्मादिति** । अविशिष्टविषयं प्रत्यक्षं निर्विकल्पक-मिति परोक्तासंभवादित्यर्थः । संस्कारनिरपेक्षेन्द्रियजन्या मतिर्निर्विकल्पिकेति लक्षणसिद्धेर्नोक्तदोष इति भावः । एतेन प्रत्यभिज्ञायां सविकल्पकत्वमेवेति अर्थादुक्तं भवति । ननु **भाष्ये** कथं * निर्विकल्पकमेकजातीयेषु प्रथमपिण्डग्रहणम्, द्वितीयादिपिण्डग्रहणं सविकल्पकमिति विभज्यते ? इत्थम्—लक्षणोन्नयनार्थमुदाहरणप्रदर्शनपरत्वादिति । नन्विह विशिष्ट-विषयत्वसाधनम् अविशिष्टविषयव्यवच्छेदाय । तस्याश्च सिद्ध्यसिद्ध्योस्तद्व्यवच्छेदो दुश्शकः । मैवम् ; सर्वत्र विधौ व्यवच्छेदावश्यंभावाभावात् । प्रसिद्धः खलु केवलान्वयी, तादृशं च साध्यम् । तादृशहेतुसाध्यानभ्युपगन्तॄणामपि तत्स्व-रूपं सिद्धम् । न च तद्विधिर्नास्ति ; सति च तस्मिन् नान्यव्यवच्छित्तिः ; असंभवात् । अत्र तु विशिष्टविषयत्वं स-विकल्पकादौ दृष्टम्, तदभावो घटादौ ; तन्निषेधे च न सिद्ध्यसिद्धिविरोध इति । एतेन निर्विकल्पकमप्रमाणम्, अन-वधारणात्मकत्वादिति **लोकायतोक्तमपि** लूनमूलम् ; हेत्वसिद्धेरिति ॥ ३२ ॥ **इत्यविशिष्टविषयनिर्विकल्पकभङ्गः ॥**

258. **लिङ्गाद्यव्यापृताक्षान्वयवति विषयेऽक्षार्थजन्यो विकल्प-**
स्संस्कारस्त्विन्द्रियाणामिह सहकुरुतां तावता न स्मृतित्वम् ।
न स्यात्तस्यान्यथात्वं बहुविहतिहतैः कल्पनात्वादिलिङ्गैः
स्याद्वाऽनैकान्त्यमेषामनियतिमविसंवादिबाधश्च सूते ॥ ३३ ॥

सौगतास्तु निर्विकल्पकमेव प्रत्यक्षम्, अर्थजत्वादर्थविषयत्वाच्च; विकल्पस्तूभयरहितः, अतो न प्रत्यक्षमिति; तान् प्रत्याह—**लिङ्गादी**ति॥ अयमर्थः—लिङ्गशब्दबोधनानुपक्षीणेन्द्रियसंप्रयोगानन्तरं यो विशिष्टप्रत्ययो जायते स इन्द्रियार्थसंप्रयोगजन्यः, निर्विकल्पकवत्तदन्वयव्यतिरेकानुविधानात्, परैरपि प्रत्यक्षानुपलम्भाभ्यां कारणत्वव्यवस्थापनात्; अन्यथाऽतिप्रसङ्गात्। अत्र च पराभीष्टकारणचतुष्केऽधिपत्यालम्बनयोरनन्यथासिद्धत्वात्; तदिह निर्विकल्पकवदर्थजत्वमर्थविषयत्वं च दुस्त्यजम्। ननु निर्विकल्पकस्य विकल्पहेतुत्वं किं साक्षात्, उत संस्कारद्वारा? नाद्यः; नायनरश्मिप्रवाहे प्रथमचक्षुस्संयोगस्याशुतरविनाशित्वेन सविकल्पकपूर्वक्षणेऽनवस्थानात्, संप्रयोगान्तरकाले च क्षणिकस्य निर्विकल्पस्यापक्रान्तेः, संप्रयोगनिरपेक्षनिर्विकल्पकजन्यत्वे विकल्पस्यानिन्द्रियजन्यत्वापातात्, तत एवार्थजत्वस्याप्यसिद्धेः, अप्राप्यकारित्वस्य भवद्भिरनङ्गीकाराच्च। नापि द्वितीयः, संस्कारजन्यत्वे विकल्पस्य स्मृतित्वप्रसङ्गादिति। तत्राह—**संस्कारस्त्वि**ति। इह—सविकल्पके। अयं भावः—न वयं ज्ञानेऽपि त्वदिष्टं क्षणिकत्वमिच्छामः, येन संप्रयोगान्तरकाले अनवस्थाननियमः। तथात्वेऽपि संस्कारजन्यत्वमात्रेण न स्मृतित्वापत्तिः; प्रत्यभिज्ञान्यायेन सहकारिमात्रत्वात् संस्कारस्य, अन्यथा प्रत्यभिज्ञाऽपि स्मृतिरेव स्यात्। अस्त्विति चेन्न; अननुभूतविशिष्टग्रहणात्, अन्यथा इन्द्रियसंप्रयोगस्य तत्राकारणत्वप्रसङ्गात्। भवत्वत्र कारणत्वसहकारित्वयोर्विपर्यास इति चेत्, कुतोऽयं निर्णयः? स इत्युद्देशप्राधान्यादिति चेत्, न; अयं स इति विपरीतप्रत्यभिज्ञायां तदभावात्। त्वत्पक्षेऽपि कुतस्त्यः प्रधानाप्रधानविभाग इति चेत्; अस्तु यतःकुतश्चित्; मा भूद्वा; तथाऽपि संस्कारमात्रजत्वाभावात् प्रत्यभिज्ञायास्सविकल्पकस्य च स्मृतित्वं दुरुपपादम्। ननु अविसंवादि विज्ञानं प्रमाणम्; अविसंवादश्च बाधविरहः, स च नास्ति विकल्पस्य, स्वारसिकबाधाभावेऽपि नभःस्थलमलिनतादिष्विव यौक्तिकबाधात्। यो विकल्पस्स विभ्रमो यथा विगीतः, तथा च जात्यादिविकल्प इति। न चात्र प्रत्यक्षविरोधादनुमानमेव दुर्बलमिति वाच्यम्; ज्वालैक्यादिषु प्रसङ्गादिति। एतद्दूषयति—**न स्यादि**ति। कल्पनात्वम्—विशिष्टग्राहित्वम्। आदिशब्देन निर्विकल्पकेतरत्वं संस्कारजन्यत्वमित्यादि गृह्यते। **बहुविहतिहतै**रिति हेतुगर्भम्। सन्ति ह्यत्र बह्व्यो विहतयः। तथा हि; कल्पनात्वादिति हेतुप्रयोगे तत्तत्पक्षदृष्टान्तादिविकल्पाः पक्षीकृता न वा? नाद्यः, स्वयमेवाश्रयाद्यसिद्ध्यापादनात्। न द्वितीयः, पक्षव्यतिरिक्तस्यात्र सपक्षत्वासंभवे विपक्षत्वपरिशेषात्; तथा च तत्र कल्पनात्वादिहेतुवृत्तेरनैकान्त्यमपरिहार्यम्। तदिदमाह—**स्याद्वाऽनैकान्त्यमेषा**मिति। एवं स्वाभिमतक्षणिकत्वाद्यनुमानसाध्यादिविकल्पपक्षीकारबहिष्कारयोरुक्तदूषणमनुसन्धेयम्। यत्पुनराहुः—*विकल्पोऽवस्तुनिर्भासादसंवादादुपप्लवः। इति, *तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः। व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः॥ इति, तदप्यसिद्धहेतुकं प्रलोभनमात्रम्; विकल्पविषयावस्तुत्वे समीचीनयुक्त्यभावात्। कूटयुक्तिभिस्तद्बाधे **योगाचारमाध्यमिक**तर्कैस्त्वदिष्टनिर्विकल्पकविषयनीलादिस्वलक्षणानामपि निरस्ततापत्तेः। तदिदमभिप्रेत्याह—**अनियत**मिति। नन्वर्थक्रियास्थितिमविसंवादं ब्रूमः। नच विकल्पविषयाणां जात्यादीनां काचिदर्थक्रियाऽस्ति; स्वलक्षणसापेक्षत्वे तस्यैव हेतुत्वोपपत्तेः, तन्निरपेक्षत्वे तेषां पृथगेव कदाचित् कस्याश्चिदर्थक्रियायास्साधकत्वप्रसङ्गात्। अतः कल्पनात्वादिहेतुभिरविसंवादिबाधः क्रियत इति चोद्यानुयोगः। मैवम्; तत्तत्कार्यापेक्षया नियतपूर्वभावित्वेन प्रत्यक्षानुपलम्भनिश्चितस्वभावानां जात्यादीनां तत्तदर्थक्रियाहेतुत्वस्य दुरपह्नवत्वात्। एतेन समर्थप्रवृत्तिहेतुत्वमविसंवाद इति स्थापनेऽपि विकल्पप्रामाण्यस्य न काचित् क्षतिः। विकल्पद्वारैव हि निर्विकल्पकस्य प्रवृत्तिहेतुत्वं मन्यसे। तदविसंवादाच्च वस्तदविसंवादवाचोयुक्तिः। अथ मणिप्रभाविषयमणिविकल्पन्यायेन विकल्पस्य परम्परया निर्विकल्पकविषयार्थप्रतिबन्धात् विवेकाग्रहप्रसूतोऽयं तस्मिन्नविसंवादारोपः; नतु वस्तुतस्तस्य प्रामाण्य-

मिति । तर्ह्यनुमानस्यापि तथैव प्रसक्तिः ; तदेव वस्तुतस्सौगतरहस्यमिति चेत् ; प्रलीनं तर्ह्यत्र प्रयुक्तैरनुमानैः । उपयोगविशेषादनुमानस्य पृथग्ग्रहणमिति चेत् ; तद्भूयस्तया विकल्पस्यापि तदस्तु, न वा द्वयोरपीति निपुणमवसीयतामिति ॥ ३३ ॥ **इति सविकल्पकबाधपरिहारः ॥**

259. **शब्दात् प्रागर्थसिद्धेः परमपि च तयोरक्षभेदादिबोधात्**
शब्दैक्ये वाच्यभेदादपि बहुषु पदेष्वेकवाच्यप्रसिद्धेः ।
साम्यासत्त्याद्ययोगाद्युगपदवगतेर्व्यक्तिजात्यादिशब्दैः
शब्दाध्यासो न युक्तः प्रथयति विषयं किंतु संज्ञा तटस्था ॥ ३४ ॥

ननु सर्वे विकल्पाश्शब्दानुविद्धा एव दृश्यन्ते ; शब्दश्च विकल्पविषयमर्थं स्वात्मनैवोपरञ्जयति पीतिमेव शङ्खं पीतश्शङ्ख इति । अभ्रान्तौ पृथगुपलम्भस्त्वध्यासोपयुक्त एव ; अतोऽशब्दात्मकस्यार्थस्य शब्दात्मना भानादप्रमितिर्विकल्प इति । अत्र किमिदं कृत्स्नविकल्पापेक्षयोच्यते उत तद्विशेषापेक्षयेति बुद्ध्या विभज्य पूर्वं तावत्प्रतिक्षिपति—**शब्दा**दिति ॥ अयमभिसन्धिः—नहि सर्वो विकल्पश्शब्दोपरञ्जनघन एव प्रवर्तते, पश्वादीनामव्युत्पन्नानां च तदयोगात् । व्युत्पन्नानामपि तत्तत्संज्ञाविशेषस्मरणहेतुतया तत्तत्प्रवृत्तिनिमित्तविशिष्टवस्तुग्रहणावश्यंभावादिति । तेन शब्दप्रतीतेः पूर्वमर्थप्रतीतिरस्तीत्ययमेको हेतुः । हेत्वन्तरमप्याह—**परमपी**ति । विस्मृतशब्दस्य शब्दप्रतीतिमन्तरेण केवलमर्थ एव प्रतीयते ; तत्रापि न शब्दप्रतीत्यवश्यंभावः । किंच शब्दः श्रोत्रेन्द्रियेण प्रतीयते, अर्थस्तु यथायोगं तत्तदिन्द्रियेण । इदं च ग्राहकमात्रोपलक्षणम् । अतो ग्राहकप्रमाणवैलक्षण्यनियमादर्थैक्येनैव शब्दग्रहणमसमञ्जसमित्याह—**तयो**रिति । तथा च कतिपयविकल्पापेक्षयाऽपि शब्दाध्यासो न युक्तः । पीतशङ्खादिष्वेकेन्द्रियग्राह्यत्वादन्योन्यसंसर्गाध्यासो युक्त एव । अपिच एक एव शब्दो बहूनप्यर्थानभिदधाति ; शक्तिवैचित्र्यात् । तत्र परस्परविरुद्धेष्वर्थेष्वेकस्यैव शब्दस्य ऐक्येन बोधनं न घटत इत्याह—**शब्दैक्य** इति । एवं बहुषु पदेषु परस्परविरुद्धस्वभावेष्वेकस्यैव वाच्यत्वं दृश्यते पर्यायशब्देषु । तत्राप्यर्थैक्योपलम्भनमनेकेषां शब्दानां न युज्यत इति वदति—**बहुष्वि**ति । उपलभ्यते च शब्दानां साम्येऽप्यर्थवैषम्यम् ; एवमर्थानां साम्येऽपि शब्दवैषम्यम् ; साम्यं चैकजात्यादेकाकारधर्मयोगित्वाद्वेति । एवमर्थस्य दूरस्थत्वं शब्दस्य सन्निकृष्टत्वं शब्दस्य दूरस्थत्वमर्थस्य सन्निकृष्टत्वं च । एवं तीव्रमन्दादि [विशदाविशदादि] विविधवैचित्र्ययोगदर्शनान्न शब्दार्थयोरन्योन्याध्यासेन प्रतिपत्तिरित्याह—**साम्ये**ति । यद्वा साम्यं—शब्दार्थयोः समदेशवर्तित्वम् । आसत्त्यादिः पूर्ववदेव । युगपदवगतेः—समानाधिकरण्यवाक्ये परस्परविरुद्धस्वभावैर्जात्यादिशब्दैरेकस्यैवार्थस्य यौगपद्येन प्रतीतेरपि न शब्दाध्यासो युक्तः । एवं व्यधिकरणवाक्येऽपि शब्दार्थसंसर्गयोः पृथग्भावेनैव भानादिति भावः । कथं तर्हि सविकल्पकज्ञाने संज्ञा स्वोपश्लेषेणार्थं प्रकाशयतीत्याशङ्क्याह—**प्रथयती**ति । अयमर्थः—तटस्थैव संज्ञा विशेषणान्तरवद्वाचकत्वेनैव प्रतीयते, न पुनरर्थात्मना । अर्थात्मना प्रतीयमाने कथं वाचकत्वेन प्रतीतिर्योयुज्यत इति भावः । उक्तं च—* संज्ञा तु स्मर्यमाणाऽपि प्रत्यक्षत्वं न बाधते । संज्ञिनस्सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति । अयमत्र निर्णयः—**श्लो.** परस्परविरुद्धत्वप्रतिभासानुरोधतः । सविकल्पकविज्ञाने शब्दाध्यासो न युज्यते ॥ इति ॥ ३४ ॥ **इति शब्दाध्यासभङ्गः ॥**

260. **धीत्वाच्छब्दानुविद्धां विमतमतिमुशन्त्यत्र शब्दा न सत्त-**
त्तस्यार्थः सार्थभावात् स्फुरतु च स कथं बालमूकादिबोधे ।

सूक्ष्मा वाङ्मात्रकल्प्या न हि समधिगता तादृशी क्वापि संज्ञा
वाचस्सूक्ष्माद्यवस्थाकथनमपि विदुर्भावनाद्यर्थमाप्ताः ॥ ३५ ॥

अत्र केचिदाहुः—अनुमानेनैव सर्वप्रतीतेश्शब्दानुवेधमुपपादयाम इति, तदेतदनुवदति—**धीत्वा**दिति ॥ अनूदितमर्थं प्रतिक्षिपति—**न सत्त**दिति । तस्य हेतुमाह—**तस्ये**ति । अयमर्थः—परिदृश्यमान एवार्थः शब्दं स्मारयति ; तस्य कथं तदात्मना भानमिति । बालमूकादिबोधे कालात्ययापदेशमाह—**स्फुरतु चे**ति । सूक्ष्मा पश्यन्ती मध्यमा वैखरीति शब्दविभागात् सूक्ष्मशब्दस्सर्वत्रास्तीति न बालमूकादिबोधे कालात्ययापदेश इत्याशङ्क्य परिहरति—**सूक्ष्मे**ति । अवाचकस्य तादृशावस्थापन्नस्य शब्दस्य प्रतिपत्तिवेलायां प्रसङ्गाभावादित्यर्थः । तदेव विवृणोति—**न हीति** । वाचकश्शब्द एवात्र विमृश्यत इति भावः । कथं तर्हि सूक्ष्माद्यवस्थाकथनं तेषुतेषु शास्त्रेष्वित्यत्रोत्तरम्—**वाच** इति । अवस्थाभेदकथनं केवलभावनार्थं न पुनर्वाचकत्वेन ; अतश्शब्दानुवेधानुमानमसमञ्जसमिति भावः । अनेन—* न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥ इति शब्दानुवेधप्रत्यक्षत्वोदाहरणमपि दत्तोत्तरम् ; तादृशोपलम्भाभावादेव ॥ ३५ ॥ **इति सर्वप्रत्ययानां संज्ञानुविद्धत्वभङ्गः ॥**

261. **सत्त्वाद्यैरक्षगम्यं विमतमिति वदन् वक्तु बाधं विपक्षे**
श्रुत्यालम्बे तु सैव प्रसजति शरणं तादृशादृष्टसिद्धौ ।
अध्यक्षं लौकिकं चेदधिगतिविहतं भावनोत्थं न युक्तं
नित्यं त्वक्षानपेक्षं निरुपधिरिह ते दुर्वचोऽक्षप्रकर्षः ॥ ३६ ॥

इत्थं सर्वप्रत्ययानां शब्दानुवेधवादी निरस्तः । इदानीं सर्वेषामप्यर्थानां प्रत्यक्षत्ववादी निरस्यते । स खल्वेवमाह—धर्मादयः कस्यचित्प्रत्यक्षाः सत्त्वादित्यादिकमनुमानजातं धर्मादीनां प्रत्यक्षत्वं साधयतीति ; तथा च योगिप्रत्यक्षं सिद्धमिति । तदेतदनूद्य परिहरति—**सत्त्वाद्यै**रिति ॥ अयं भावः—किं प्रत्यक्षत्वमात्रं प्रसाध्यते ? किं वा पुनरैन्द्रियिकप्रत्यक्षत्वम् ? पूर्वत्र न योगिप्रत्यक्षसिद्धिः ; ईश्वरप्रत्यक्षेणैवान्यथासिद्धत्वात् । उत्तरत्र विपक्षे बाधकाभावात् अन्यथासिद्धिरनुमानस्य । अतो न योगिप्रत्यक्षं साधयितुमलम् । श्रुतिस्मृत्यादिबाधप्रसङ्गो विपक्षे बाधक इति चेत्, तर्हि श्रुत्यादिकमेव शरणम्, किमनेनानुमानेनेत्याह—**श्रुत्ये**ति । उक्तमर्थं विकल्प्यापि दूषयति—**अध्यक्ष**मिति । किमध्यक्षं लौकिकं वा ? किं वा भावनोत्थम् ? उत नित्यमेव ? लौकिकं चेत् प्रत्यक्षविरुद्धमित्याह—**अधिगतिविहत**मिति । लोकोपलम्भविरुद्धमित्यर्थः । न हि धर्मादिविषयं लौकिकं प्रत्यक्षमुपलभ्यते, तथात्वे वा * सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादिति सूत्रविरोधः । भावनोत्थमपि प्रत्यक्षं भावनावैशद्यातिरेकेण न क्वापि दृष्टमित्याह—**भावनोत्थं न युक्त**मिति । मारीचादेर्भावनया रामादिसाक्षात्कारो भयभरदोषनिमित्तं विपरीतज्ञानमेव * वृक्षे वृक्षे च पश्यामीति । एवमनुरागादिनिमित्तकामिनीमुखदर्शनादिकमपि व्याख्यातम् । नित्यं प्रत्यक्षं न कारणायत्तमित्याह—**नित्यं** त्विति । तत्साधनेऽपि न योगिप्रत्यक्षसिद्धिरिति भावः । ननु प्रकृष्यमाणं सर्वं निरतिशयदशाशिरस्कं यथा कुवलामलकबिल्वादिपरिमाणं प्रकृष्यमाणं निरतिशयदशाशिरस्के परममहत्परिमाणे विश्राम्यति ; तथा चेन्द्रियशक्तेः प्रकृष्यमाणायाः सार्वज्ञ्ये विश्रमस्समुचितः ; एवं च योगिनां मानसप्रत्यक्षस्य सर्वविषयत्वं सेत्स्यतीत्याशङ्क्य परिहरति—**निरुपधि**रिति । यथा चक्षुःस्पर्शनादेः प्रकृष्यमाणस्य न सर्वविषयत्वे विश्रमः, एवं मनसोऽपीति भाव्यम् । अन्यथा धर्मादयः कस्यचिच्चाक्षुषाः स्पार्शनाः इत्यादिकमपि वक्तुं शक्येत ॥ ३६ ॥

॥ अस्या महाराजपोषका राजपोषकाश्चैते ॥

Patrons. Rs 100.

1. **Sri M. Sudarsanam Iyengar & Sons.,** Timber Merchants, MADRAS.
2. **Sri S. Varadacharyaswami,** Federal Court Judge, Delhi,
3. **Sri A. V. Gopalacharyaswami** M.A., B. L., Advocate, TRICHINOPOLY.
4. महामहोपाध्याय. पण्डितराज. रा. च. वि. कृष्णमाचार्याः [कुम्भघोणम्]
5. **R. Srinivasacharyar swami,** B.A., B.L , Judge Chief Court. PUDUKOTAH.
6. **Sri Ubhayavedanta Pravartana Sabha,** Malleswaram, BANGALORE.
7. **V. S. Sundaram Iyenger,** Accountant General, Seethavilas Mylapore.

Donors. Rs 50

1. **Sri K. Raghavacharyar,** Retired Postal Inspector, MADI
2. **T. S. Ramaswami Iyengar,** Advocate, Madu
3. Dewan Bahadur. **C. V. Venkataramana** COIMBA
4. श्रीयुत. महन्त.गरुडध्वजाचार्यः उज्ज
5. वेदान्तशिरोमणि श्रीस्वामी. रामानुजा शास्त्रीजी. हरिदेवजी का मंदिर. वृ
6. **S. Raghava Iyengar swami,** Rtd., Dt., Judge, Srira
7. **H. Rangacharya,** M.A., Dt. Traffic Superintenda Malleswaram, Ban

SRI BHAGAVATH RAMANUJA GRANTHAMALA

All the works of Sri Ramanuja have been printed in a similar manner, in characters, under the title of " Sri Bhagavad Ramanuja Granthamala." Price Rs

---

All communications to be addressed to

VIDWAN A. SAMPATHKUMARACHAR, M.A.
Granthamala Office, 39, Sannidhi Stre
L. CONJEEVERAM, S.

Cover Page Printed at Sri Sudarsana Press, L. Conjeeveram.

262. **प्रत्येकं ह्यक्षवेद्यं प्रतिनियततया सर्वलोकप्रसिद्धं**
काकोलूकादिकानामपि निजविषये ह्यैक्षि चक्षुःप्रकर्षः ।
मान्थालव्यालपूर्वेष्वपि खलु रसनास्पर्शनादिक्रमात् स्या-
दक्षस्थानैक्यमात्रं स्थितविषयमतस्त्वक्पिपासादिवाक्यम् ॥ ३७ ॥

तदेव प्रकाशयति—**प्रत्येक**मिति ॥ प्रतिनियतविषयतया हि चक्षुरादीनां प्रसिद्धिः; प्रवृत्तिरप्येवमेव । एवं मनसोऽपि प्रतिनियतविषयत्वं स्वीकार्यम्, दृष्टं च तत्; आत्मादिविषय एव हि मनसः स्वातन्त्र्यमवलोक्यते, बाह्यविषये पुनरिन्द्रियान्तरसहकारितामात्रमेव । परमाण्वदृष्टादिविषये पुनस्तदपि नास्ति; तेषामतीन्द्रियत्वात् । तथा च स्वात्मनि तज्ज्ञानादिषु वा शक्तस्य मनसः स्वातन्त्र्येण न बाह्यविषयेषु शक्तिः । तत्र प्रमाणमाह—**सर्वलोके**ति । ननु चक्षुरादीनामपि स्वविषयातिलङ्घनं दृश्यते; दूरे हि काकः पश्यति, अन्धकारेऽप्युलूकादिरर्थं गृह्णाति । अतो मनसोऽपि प्रकर्षविशेषादविषयग्रहणं युक्तमित्याशङ्क्याह—**काकेति** । काकादिचक्षुःप्रकर्षोऽपि न स्वविषयातिलङ्घी; रूपरूपितदेकार्थसमवायिमात्रग्रहणात् । न हि काकश्चक्षुषा रसं गृह्णाति, नापि चोलूकश्चक्षुषा जिघ्रति । कथं तर्हि मान्थालव्यालादिष्विन्द्रियवृत्तिसंकरः? मान्थालो हि मुखेनैवाभ्यवहरति निर्हरति च, व्यालश्चक्षुषैवाकर्णयत्यवलोकते च । अत इन्द्रियवृत्तेरनियमो युक्त इत्याशङ्क्य परिहरति—**मान्थाले**ति । तत्र हि रसनास्पर्शनयोरेकस्थानवर्तित्ववत् वागपानयोश्चक्षुःश्रोत्रयोश्च स्थानैक्यमेव, न पुनरन्येन्द्रियेणान्येन्द्रियकृत्यमाचर्यते । अतो न स्वविषयातिलङ्घनमिन्द्रियवृत्तेरिति भावः । **श्लो.** धर्मादिविषयत्वं तु मनसो यद्विशिष्यते । चक्षुरादेस्तथाभावो नेष्यते केन हेतुना ॥ इति चक्षुरादिप्रतिबन्दिरेव मनसो धर्मादिविषयत्वं निवारयतीति संग्रहः । कथं तर्हि—*त्वक् च दृक् च निपिपासति जिह्वा विह्वला श्रवणवत् परवृत्तौ । नासिका त्वयि करीश तथेति प्राप्नुयां कथमिमां स्विदवस्थाम् ॥ इति इन्द्रियवृत्त्यनियमो महापुरुषैरभिधीयत इति । इत्थम्—इन्द्रियवृत्तिनियममन्तरेण स्वाभाविकेनैव ज्ञानेन सर्वं साक्षात्करिष्यामीति भावः । न पुनरन्येन्द्रियविषयेष्वन्येन्द्रियवृत्तिरभिधीयते । *पश्यत्यचक्षुस्स शृणोत्यकर्णः इत्यादेः परविषयतया तस्याप्यकरणायत्तज्ञानत्वस्यासंकुचित[वि]ज्ञाने मुक्तात्मन्यपि साधारण्यात् । अयमत्र निर्णयः—यदि योगिप्रत्यक्षं प्रामाणिकम्, तदा श्रुत्या स्मृत्या पुराणेन च सिध्यति न पुनरनुमानेन; तस्यान्यथासिद्धत्वात्, चाक्षुषत्वादिप्रसञ्जनप्रतिबन्दिग्रस्तत्वाद्वेति पूर्वमेवोक्तम् । **श्लो.** यथौपनिषदस्त्वीशो नानुमानेन सिध्यति । तथा योगी च शास्त्रेण केवलेन प्रसिध्यतु ॥ ३७ ॥ **इति योगिप्रत्यक्षानुमानभङ्गः ॥**

263. **संयुक्तव्यापकत्वप्रभृतिसहकृतैर्व्याप्तिधीसव्यपेक्षै-**
रक्षैरेवानुमाधीर्भवतु किमितरत्कल्पयित्वेति चेन्न ।
निर्व्यापारेन्द्रियस्याप्युदयति खलु सा भूतभाव्यादिलिङ्गैः
स्मृत्यारूढैः श्रुतैर्वा मन इह सकलज्ञानसामान्यमिष्टम् ॥ ३८ ॥

एवं योगिप्रत्यक्षादागमगम्यादृष्टादेरसिद्धिरुक्ता । अथायोगिप्रत्यक्षादनुमानगम्याग्न्यादेरसिद्धिरुच्यते । कश्चिदाह—धूमादिसंयुक्तमिन्द्रियमेव वह्न्यादिकं गृह्णातु; किमनेनानुमानेन? सहकारिसामर्थ्ये सर्वमपि संपत्स्यते । चक्षुर्धूमादिसंयोगः प्रथमं सहकारी, तत्सहकारि च व्याप्तिपक्षधर्मत्वपरिज्ञानादि; किमितरप्रमाणपरिकल्पनयेति । एतदाशङ्कते—सं-

युक्तेति ॥ परिहरति—**नेति** । परिहारं विवृणोति—**निर्व्यापारेति** । अयमत्र भावः—नेन्द्रियमत्र वह्न्यादिज्ञाने करणमपि तु धूमादिज्ञान एव । अतो न वह्न्यादिज्ञानं प्रत्यक्षप्रमाणफलम् । अपि तु धूमादिज्ञानमेव वह्न्यादिज्ञानं जनयति । नन्वस्तु धूमादिज्ञानमवान्तरव्यापारः, तद्द्वारा प्रत्यक्षमेव वह्न्यदिज्ञानं जनयतीति चेत्; तन्न; इन्द्रियार्थसन्निकर्षजन्यधूमादिज्ञानमन्तरेणापि स्मृत्यारूढैः श्रुतैर्वा भूतभाव्यादिलिङ्गैरग्न्यादिज्ञानदर्शनात् । किं च यद्धि यज्जनयित्वैव यज्जनयति तस्य तत्र तदवान्तरव्यापारत्वमिति ह्यवान्तरव्यापारलक्षणमाचक्षते । न चेदं लक्षणं धूमादिज्ञानेऽस्ति; धूमादिज्ञानमन्तरेणापि प्रत्यक्षेण वह्न्यादेर्द्रष्टुं शक्यत्वात्, तथा दर्शनाच्च । अतोऽनुमानादेव साध्यसिद्धिः; न पुनः प्रत्यक्षात् । अन्यथा शब्दज्ञानमवान्तरव्यापारीकृत्य शब्दार्थज्ञानमपि प्रत्यक्षमेव प्रसज्येत । न च तद्युक्तम्; परोक्षापरोक्षविभागाभावप्रसङ्गात् । अथापि सर्वविषयस्य मनइन्द्रियस्य वह्न्यादिज्ञाने व्यापृतत्वान्मानसप्रत्यक्षं वह्न्यादिज्ञानमस्त्वित्याशङ्क्य परिहरति—**मन** इति । **सकलज्ञानसामान्य**मिति—संशयविपर्ययस्मृत्यादि[ज्ञान]साधारणत्वान्मनइन्द्रियस्य न तज्जन्यतामात्रेण प्रत्यक्षत्वसिद्धिरिति भावः ॥ ३८ ॥

264. **पक्षस्थं व्याप्यमादौ विदितमिह तु न व्यापकस्य प्रसक्ति-**
र्व्याप्तिस्तेन स्मृता स्यान्न च तत उभयोर्निश्चयः पक्षयोगे ।
तादृग्व्याप्यान्वितोऽसाविति मतिरपि न व्यापकं तत्र यच्छेत्
तस्मात्तद्व्यापिपक्षान्वयनियतमतिर्नाक्षतस्संस्कृतेर्वा ॥ ३९ ॥

उक्तार्थस्थेम्ने पुनरपि विकल्प्य दूषयति—**पक्षस्थ**मिति ॥ किं धूमादिदर्शनदशायां प्रत्यक्षो वह्निः? तदा धूमादिरेव विदितः; नतु वह्न्यादिः । तदिदमाह—**इह तु न व्यापकस्य प्रसक्ति**रिति । यदा पुनर्व्याप्तिस्मरणं तदा पुनर्दृष्टान्त एव साध्यप्रसिद्धिः, तत्रैव पूर्वं ग्रहणात्; न तु पक्षे । तदिदमाह—**न चेति** । तर्ह्युपनयावस्थायां साध्यसिद्धिरस्तु, ततोऽनुमानं व्यर्थमित्याशङ्क्याह—**तादृगि**ति । उपनयजन्यं ज्ञानं व्याप्तस्य हेतोः पक्षधर्मत्वमवगाहते; न पुनः साध्यस्य पक्षधर्मत्वम् । तस्मात् साध्यस्य पक्षधर्मत्वप्रतीतिर्नाक्षतः । नापि व्याप्तिदर्शनजनितसंस्कारात्; न चोभयस्मात् । अतो व्याप्तस्य हेतोः पक्षधर्मत्वप्रतीतिः साध्यस्यापि पक्षधर्मत्वं प्र[साध]ख्यापयतीति सुस्थिरमनुमानम् ॥ ३९ ॥ **इति अनुमानस्य प्रत्यक्षादिबहिर्भावः ॥**

265. **नायोग्यस्याक्षबाधः स्वविषयविहतिं न क्षमेतानुमानं**
स्वस्यैवापेक्षितत्वादनुमितिमखिलां बाधते नागमोऽपि ।
निस्सन्देहप्रवृत्तेरिह निपुणधियां नाप्यसौ संशयात्मा
वैशिष्ट्यान्न स्मृतिश्चेत्यनुमितिरुदिताऽध्यक्षवन्मानमन्यत् ॥ ४० ॥

नन्वनुमानं प्रमाणमेव न भवति; प्रामाण्ये सत्येव हि प्रत्यक्षाप्रत्यक्षविवादः, इत्याशङ्क्य परिहरति—**नायोग्यस्येति** ॥ अयमत्र विकल्पक्रमः—अनुमानस्याप्रामाण्यमबाधितत्वेऽपि, उत बाधितत्वेन? तत्रापि किं बाधः प्रत्यक्षेण? अथानुमानेन? अथवाऽऽगमेन? यद्वा नियतबाधकाभावेऽपि संशयात्मकत्वेनाप्रामाण्यम्? अथवा स्मृतिरूपत्वेन? तत्राबाधितत्वेऽप्यप्रामाण्यमिति तावद्व्याहतम् । बाधेऽपि प्रत्यक्षबाधो योग्यस्यैव । स पुनर्धूमानुमानादौ न दृश्यते । अयोग्यविषये बाधस्त्वप्रयोजकः; अयोग्यानुपलब्धेरबाधकत्वात् । अतो न प्रत्यक्षबाधात् अप्रामाण्यमनुमानसामान्यस्य । यत्र

पुनः क्वचित् प्रत्यक्षबाधः तत्र वयमप्यप्रामाण्यमङ्गीकुर्महे । नैतावताऽनुमानतत्त्वापलापः । न चानुमानेन वा बाधः; व्याघातात्, कृत्स्नानुमानाप्रामाण्ये बाधकस्याप्यनुमानस्य तदन्तर्भावात् । तदिदमाह—**स्वविषये**ति । नाप्यागमेन बाधः, आगमस्यैव व्युत्पत्तिदशायामनुमानसापेक्षत्वात् । इदमप्याह—**स्वस्ये**ति । नच संशयात्मकमनुमानम्, निश्चयेनैव प्रवृत्ति-व्यवहारयोर्दर्शनात् । तदप्याह—**निस्सन्देहे**ति । स्मृत्यात्मकत्वमवशिष्यते, तच्च साध्यस्य पक्षधर्मताप्रतिपत्तौ न संभवतीत्युक्तं प्रागेव । एतदपि वदति—**वैशिष्ट्या**दिति । अतः प्रत्यक्षवदनुमानमपि पृथगेव प्रमाणमिति निगमयति—**अध्यक्षव**दिति । अत्र स्मृतेरप्रमाणत्वेनोपादानमन्वारुह्यवादेनेति भाव्यम् ॥ ४० ॥ **इत्यनुमानप्रामाण्यसिद्धिः ॥**

266. **सामान्यं प्राक्प्रसिद्धं न पुनरनुगमस्सिद्धपूर्वो विशेषे**
व्याप्तिस्सर्वाऽपि भग्ना क्वचिदपि सकलव्याप्यसङ्गत्यदृष्टेः ।
भूयोदृष्टेर्व्यवस्था न हि भवति तथोपाधयः स्युर्दुरूहा
इत्याद्याः स्वेष्टतर्कस्थिरनियमजुषां दर्शनेनैव बाध्याः ॥ ४१ ॥

अत्र **चार्वाकः** प्रत्यवतिष्ठते । किमनुमानेन विशेषस्साध्यते, उत सामान्यम्? न तावत्सामान्यम्; प्रागेव प्रसिद्धत्वात् । न ह्यग्निमत्त्वसामान्यमप्रसिद्धम्; महानसस्याप्यनग्निमत्त्वेन दृष्टान्तस्य साध्यविकलत्वप्रसङ्गात् । तदिदमाह—**सामान्य**मिति ॥ न च विशेषस्साध्यः तस्मिन्ननुगमाभावादित्याह—**न पुन**रिति । यथाऽऽहुः—*विशेषेऽनुगमाभावस्सामान्ये सिद्धसाधनम् । अनुमाभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः ॥ इति; *विशेषेऽनुगमाभावात्सामान्ये सिद्धसाधनात् । तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः ॥ इति च । किंच—**श्लो.** व्याप्तिरेवानुमानस्य जीवातुः सा च सर्वथा । न संभवति संबन्धग्रहस्यानुपपत्तितः ॥ कतिपयव्यक्तिदर्शनेन संबन्धग्रहणस्य व्यभिचारिष्वपि साधारणत्वात्; सकलव्यापकव्यक्तिदर्शनेन संबन्धग्रहणमसर्वज्ञेन कर्तुं न शक्यते । यदि सर्वज्ञस्संबन्धवेदी किम[नेना]नुमानेन? एवं च सर्वाऽपि व्याप्तिर्भग्ना । प्रमेयत्वाभिधेयत्वादौ सर्वव्यक्त्युपसंहारेण व्याप्तिग्रहणस्याशक्यत्वादित्याह—**व्याप्ति**रिति । अस्तु भूयोदर्शनेन व्यवस्थेत्याशङ्क्याह—**भूयोदृष्टे**रिति । सहस्रशो भूयोदर्शितस्यापि तत्रतत्र व्यभिचारदर्शनादिति भावः । तर्हि निरुपाधिकसंबन्धो व्याप्तिरिति लक्षणं कृत्वोपाधिविधूननेनैव व्याप्तिं प्रतिष्ठापयाम इति चेन्न; दृष्टादृष्टोपाधीनामनन्तानां दुरूहत्वेन तद्विधूननस्यैवाशक्यत्वादित्याह—**तथोपाधय** इति । इत्थमनुमाननिराकरणे दुर्वादिनां प्रलापोऽयं किमनुमानमूलः? उत तर्कमूलः? अथवा निर्मूलः? निर्मूलत्वे प्रलाप एव; अनुमानमूलत्वे तर्कमूलत्वे वा व्याप्तिमन्तरेण तदुभयं न संभवतीति तवापि व्याप्तिग्रहणमवश्यंभावि; तथा च व्याघात इत्यभिप्रायेण परिहरति—**इत्याद्या** इति । न केवलं तर्क एव परपक्षबाधकः, अपि तु लोकोपलम्भोऽपीत्याह—**दर्शनेने**ति ॥ ४१ ॥ **इत्यनुमानबाधकतर्कपरिहारः ॥**

267. **दृष्टेऽतीचारशङ्का न भवति यदि सा क्वापि देशान्तरादौ**
सिद्धा तत्रानुमानस्थितिरथ न तदा क्वातिशङ्कावकाशः ।
व्याघातान्ता तु शङ्का न पुनरुदयति स्वप्रवृत्त्यादिभङ्गा-
द्यावच्छङ्कं च तर्कप्रसृतिरिह ततो नानवस्थादिदोषः ॥ ४२ ॥

अनुमाने तावत् सामान्यं न साध्यते; येन सिद्धसाधनत्वमुद्भाव्येत । किंतु सामान्यव्याप्तिसहकृतेन पक्षधर्मत्वेन सामान्यस्य पक्षनिष्ठत्वरूपो विशेषस्साध्यते । कथं तर्हि विशेषव्याप्तिशून्येन पक्षधर्मेणापि हेतुविशेषेण तत्सिद्धिरिति

मा वोचः । विशेषव्याप्तेरनुमानाङ्गत्वस्वीकारे पुनरयुक्ताङ्गत्वम् ; अनपेक्षितप्रातिकल्पनया दूषणात् प्राप्तिसमा ; समाधिश्च सामान्यव्याप्तेरेवानुमानाङ्गत्वात् । कथं सामान्यविषया व्याप्तिर्विशेषसिद्धावङ्गमिति चेत्; एवं तर्हि युक्ताङ्गपरित्यागः, सामान्यव्याप्तेरेव विशेषसिद्धौ युक्ताङ्गत्वात् । विशेषव्याप्तिरूपायाः प्राप्तेरङ्गत्वं परिकल्प्य तदभावेन दूषणमप्राप्तिसमां प्रक्रियामनुधावति । अविषयवृत्तित्वं च सामान्यविषयाया व्याप्तेर्विशेषविषये सञ्चारणेन दूषणकथनात् । तथा च सामान्यव्याप्त्या पक्षधर्मतया च परिष्कृतो हेतुः पक्षे साध्यविशेषं साधयति ; अन्यथा प्रत्यनुमानप्रतितर्कयोरपि कण्ठगतजीवितत्वमापद्येत । अतो विशेषेऽनुगमाभाव इत्यादेरनवकाशः । यत्पुनस्सामान्येन सर्वव्यक्तिग्रहणासंभवान्न व्याप्तिग्रहणं संभवतीति, तदनन्तरमेव समाधास्यामः । तदवशिष्यते भूयोदर्शनाद्व्याप्तिग्रहणं न संभवति अतिचारशङ्कायास्सर्वत्र सुलभत्वादिति, तदेतद्विकल्प्य दूषयति । भूयोदर्शनदृष्टस्साप्यर्थस्य किं दृष्ट एव देशेऽतिचारशङ्का उत देशान्तरादौ ? न तावत् दृष्ट इत्याह—**दृष्ट** इति ॥ नापि देशान्तरादाविति वक्तुमनुवदति—**यदीति** । देशान्तरादावतिचारशङ्कायां देशान्तराद्यनुमानमेव निष्प्रतिद्वन्द्वमवतिष्ठत इत्याह—**सिद्धेति** । देशान्तरानुमानाभावमाशङ्कते—**अथेति** । शङ्कितमर्थं प्रतिक्षिपति—**तदेति** । तर्हि शङ्कायाः को निवारकः? निवारकाभावे कथं शङ्का निवर्तेतेत्यत आह—**व्याघातान्ते**ति । अयमर्थः—उत्पन्ना शङ्का व्याघातदर्शनेन निवर्तते । तेनैव व्याघातदर्शनेन उत्तरोत्तरशङ्का न जायत इति । तथा च शङ्कानिवृत्तौ तर्कप्रवृत्तिस्तावतैवावसीदतीत्याह—**यावच्छङ्क**मिति । तेनोत्तरोत्तरतर्कप्रवृत्त्याऽनवस्थावचनमस्थानवाद इत्याह—**तत** इति । एतत्सर्वमभि[सन्धायो]प्रेत्योक्तं न्यायविद्भिः—*शङ्का चेदनुमाऽस्त्येव न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कश्शङ्कावधिर्मतः ॥ इति । अनेन * व्याघातो यदि शङ्काऽस्ति न चेच्छङ्का ततस्तराम् । व्याघातावधिराशङ्का तर्कश्शङ्कावधिः कुतः ॥ इति कुसृष्टिरपि नष्टप्राया ; यावद्व्याघातदर्शनं शङ्कायास्सत्त्वम्; व्याघातदर्शने तन्निवृत्तिरित्युक्तत्वात् । भूयोदर्शनदृष्टाया व्याप्तेर्न निर्मूला शङ्का ; तस्यास्सर्वत्र सुलभत्वेन स्वप्रवृत्त्यादिविरोधप्रसङ्गात् । उपाधिदर्शनादिमूलशङ्कायामुपाधिविधूननमुत्तरत्र दर्शयिष्यते ॥ ४२ ॥ **इति अतिचारशङ्कोद्धारप्रकारः ॥**

268. **व्याप्यत्वं यस्य यत्र स्फुरति सहचरे सोऽस्य हेतोरुपाधि-**
स्साध्यव्यापी समोऽयं समगणि निपुणैस्साधनाव्यापकश्च ।
योग्यादृष्ट्या च तर्कैरपि तमपनुदेच्छङ्कितं निश्चितं वा
साम्यं नात्राहुरेके तदभिमतमिह व्यापकादर्शनादि ॥ ४३ ॥

उपाधिस्वरूपप्रदर्शनपूर्वकमुपाधिविधूननप्रक्रियां प्रदर्शयितुमारभते—**व्याप्यत्व**मिति ॥ अत्र मतभेदेन लक्षणद्वयमाह—साधनाव्यापकत्वे सति साध्यसमव्याप्तो धर्म उपाधिरित्**युदयनः** । साधनाव्यापकत्वे सति साध्यव्यापक इति समशब्दप्रतिक्षेपेण **वादीन्द्रः** । तत्र स्वधर्ममन्यत्रारोपयन्नुपाधिशब्देनोच्यते ; तथा च स्वधर्मभूताया व्याप्तेर्हेतुत्वाभिमते मैत्रीतनयत्वादौ प्रतीतिहेतुत्वाच्छाकाद्याहारपरिणतिरुपाधिः । यथा स्फटिकगतारुणिमप्रतीतिहेतुर्ज[वा]पाकुसुमादिः । तथा च निरुपाधिकसंबन्धत्वस्य व्याप्तिलक्षणत्वात् तदभावेन व्याप्तिमवसादयन्नुपाधिर्दूषणमिति समशब्दं प्रयुञ्जानानामुपाधिशब्दार्थापरित्यागेन दूषणाभिधाने तात्पर्यम् । अन्येषां तु समो विषमो वा भवतूपाधिः, तन्निवृत्तौ पक्षे साध्यनिवृत्तेरुभयत्रापि साधारणत्वात्; तथा च साध्यनिवृत्त्यङ्गभूतव्यापकत्वोपादानमन्तरेण समशब्दप्रयोगो व्यर्थः । तथा च समो वाऽधिको वा व्यापकत्वेनाभिमतः पक्षे व्यावर्तमानः साध्यं व्यावर्तयतीति पक्षे साध्यबाधादुपाधेर्दूषणत्वम् । उपाधि-

शब्दार्थस्तु यथातथा वा भवत्विति । तदेतत्सर्वं पूर्वार्धेनोक्तम् । अत्र निपुणैरिति कथनम् उपाधिशब्दार्थनिरूपणेन निर्वाहात् । अन्यथाऽपि दूषणत्वे सिद्धे कथमनपेक्षितसमशब्दोपादानमिति चेत्; इत्थम्—यथा पक्षविपक्षयोर्वर्तमानत्वेन हेतोर्दूषणत्वे सिद्धेऽपि पक्षविपक्षयोरेव वर्तमानो हेतुर्विरुद्ध इति विरुद्धलक्षणे सावधारणनिर्देशः प्रकारान्तरप्रदर्शनार्थः । विपक्षे वर्तमानत्वात् साध्यासाधकत्वम्; विपक्ष एव वर्तमानत्वात्परपक्षस्यापि साधकत्वम्; तथा चात्यन्तदुष्टमनुमानमितीममर्थं प्रकाशयितुं पक्षविपक्षयोरेवेत्यवधारणप्रयोग इति चेत्; एवं तर्हि व्यापकनिवृत्त्या व्याप्यनिवृत्तिद्वारेण पक्षे साध्यबाधं बोधयितुं व्यापकत्वोपादानम् । [व्याप्यस्य] मैत्रीतनयत्वादेर्व्याप्यत्वप्रतिभासोऽपि न स्वाभाविकः । अपि तु स्फटिकारुणिमवदन्यप्रयुक्त इति प्रतिभासमात्रस्यापि दुष्टत्वेन हेतोर्व्याप्तिनिवृत्तिं स्फुटमेव वक्तुं समशब्दप्रयोग इति सन्तोष्टव्यम् । व्यापकत्वमात्रोपादाने व्यापकनिवृत्त्या व्याप्यभूतसाध्यनिवृत्तिमुपजीव्य साध्यबाधेन हेतुदोषो वाच्यः । समशब्दोपादाने तु हेतोर्व्याप्तिप्रतिभासोऽप्यौपाधिक इति साक्षाद्धेतुदोषकथनमुद्भटत्वाद्दोषस्येति । अत उपाधिशब्दार्थस्वारस्यादुद्भटदोषप्रकाशनौचित्याच्च समशब्दप्रयोग इत्यौ**दयनिका** इति । अस्तूपाधिलक्षणम्, कथं तस्य विधूननमित्याशङ्क्याह—**योग्येति** । उपाधिः खलु शङ्कितो निश्चितश्च । शाकाद्याहारपरिणत्यादिः शङ्कितः, निषिद्धत्वादिर्निश्चितः । यत्र खलु साधनाव्यापकत्वसाध्यसमव्याप्तयोरन्यतररूपस्याशङ्का, स शङ्कितोपाधिः; अन्तिमगर्भेऽपि शाकाद्याहारपरिणतिसंभवेन साधनाव्याप्तेराशङ्कितत्वात् । यत्र पुनर्द्वयोरपि रूपयोर्निश्चयः, स निश्चितोपाधिः; यथा हिंसात्वानुमाने निषिद्धत्वम्; यन्निषिद्धं तदधर्महेतुरिति नि[यमा]र्णयात् साध्यव्याप्तिः, वैधहिंसायां निषिद्धत्वाभावात् साधनाव्याप्तिः । उभयं च निश्चितम् । उभयं च प्रत्यक्षेण ग्रहीतुं योग्यं चेत्; योग्यादृष्ट्या तावदपनुद्यते, अयोग्यं चेत्तर्कैणैवेति विभागः । तदिदमाह—**योग्येति** । तर्कप्रवृत्तिस्तु—किमुपाधयः सर्वथा प्रमाणपथमनवतीर्णा वा उतावतीर्णा वेत्यादिना विकल्प्य तेषुतेषु ग्रन्थेषु वादिनां पठितपाठा । तथाहि—$समव्याप्तिपक्षस्य सर्ववादिसंप्रतिपन्नत्वाद्विषमव्याप्तिमनूद्य तेषां वादिनां भावमाह—**साम्यमि**ति । अयमत्र भावः—व्यापकस्योपाधेः पक्षे दर्शनाभावाद्व्याप्यस्य साध्यस्य बाध इति । आदिशब्देन बौद्धोक्तषोडशविधानुपलब्ध्यन्तर्गता व्यापकविरुद्धोपलब्धिरुच्यते, यथा द्रव्यत्वाभावात् पृथिवीत्वाभाव इति व्यापकानुपलब्धिः, द्रव्यत्वविरुद्धगुणत्वाद्युपलम्भात् पृथिवीत्वाभाव इति व्यापकविरुद्धोपलब्धिरित्यादि । एवं पक्षे साध्यव्यापकस्योपाधेरनुपलम्भे तथोपाधिविरुद्धधर्मान्तरोपलम्भेऽपि साध्यासिद्धिरिति भावः । अन्यत् सर्वं विस्तरभयान्न लिख्यते ॥ ४३ ॥

269. **नित्यो व्यापी च न स्यादुपधिरिह सदा सर्वतस्तत्प्रसङ्गा-**
न्नाप्येष व्याप्यमात्राकृतिरवियुतितो नैकलिङ्गोपपत्तेः ।
नासौ पक्षेतरत्वप्रभृतिरपि भवेद्व्यापकोऽतिप्रसङ्गा-
त्तुल्यस्साध्येन पक्षे सह यदि घटते साधनं व्याप्नुयात् सः ॥ ४४ ॥

अत्रोपाधिविधूननप्रक्रियां विशेषतो दर्शयति—**नित्य** इति ॥ न तावदनुमाने धूमादौ वह्न्यादिसाधने नित्यो व्यापी वा कश्चिदुपाधित्वेन शङ्कितुं शक्यते । कुत इत्यत्राह—**सदेति** । उपाधेस्सदातनत्वप्रसङ्गात् सार्वत्रिकत्वप्रसङ्गात्; तथा च तत्समवृत्तेस्साध्यस्यापि वह्न्यादेस्सदातनत्वं सार्वत्रिकत्वं च प्रसज्येतेति भावः । तर्ह्यनित्योऽसार्वत्रिकश्च व्याप्यमात्राकृतिरस्त्वित्याशङ्क्याह—**नापीति** । तत्र हेतुं दर्शयति—**अवियुतित** इति । व्याप्यमात्ररूपस्योपाधित्वाङ्गीकारे कृत-

$ अत्र किञ्चिद् ग्रन्थलोप इति प्राञ्चः ।

कत्वानुमाने सावयवत्वमुपाधिः स्यात् । न्यायविदां मते सावयवत्वस्यानित्यत्वकृतकत्वाभ्यां व्याप्तत्वात् उभयं चानित्यत्वसाधने सम्यगनुमानमेव । आहुश्च--* कृतसावयवत्वादिप्रयुक्ता च विनाशितेति । अवियुतितः--अविनाभावात् । ये तु समपदं प्रतिक्षिप्य व्यापकमात्रमुपाधिरिति वदन्ति, तेषामपि पक्षेतरत्वम्, पक्षप्रतियोगिकान्योन्याभाववत्त्वम्, पक्षत्वात्यन्ताभाववत्त्वम्, पक्षत्वविरुद्धधर्मवत्त्वम्, पक्षत्वात्यन्ताभावाविनाभूतधर्मवत्त्वमित्येतादृशं नोपाधिरित्याह--**नामाविति** । कुत इत्यत्राह--**अतिप्रसङ्गा**दिति । तदुक्तमस्माभिरेवान्यत्र--* नोपाधिः पक्षतोऽन्यत्वं साधनं न विपक्षतः । बाधनं न सपक्षेभ्यः सर्वानुमितिबाधनात् ॥ इति । अयमर्थः--पक्षेतरत्वं नोपाधिः ; एवं पर्वतो वह्निशून्यः सपक्षेतरत्वात् विपक्षवदिति बाधितुं न शक्यते । तथा पर्वतो वह्निमान् विपक्षेतरत्वात् सपक्षवदिति साधयितुमपि न शक्यते ; सर्वानुमानबाधनादिति । यं पक्षीकरोति वादी तमेव प्रतिवाद्यपि विपक्षीकरोति । तथा च परस्परविरोधादनुमान[स्य]प्रामाण्यमेव संभज्येतेति । इत्थं न्यूनाधिकवृत्त्योर्निरासे समवृत्तिरवशिष्यते । स च यदि पक्षे संभवति, साधनव्यापकत्वान्नोपाधिः ; असंभवे स एवोपाधिः । अत एव वह्निसामग्र्याः पक्षे संभवमाश्रित्य साधनव्यापकत्वादनुपाधित्वमाहुः । अत उभयाव्यभिचारिणामुभयव्यभिचारिणामन्यतरव्यभिचारेऽपि व्याप्यमात्राव्यभिचारिणां व्यापकमात्राव्यभिचारेऽपि विषमवृत्तीनामनुपाधित्वे [साध्य]व्याप्यव्यापकस्वभावानां साधनाव्यापकानामुपाधित्वमित्युक्तं भवति । तथा च यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवृत्तिरुपाधिः ; साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वे सति साध्यवन्निष्ठात्यन्ताभावाप्रतियोग्युपाधिरित्यादिकमपि लक्षणं संगच्छते ॥ ४४ ॥

270. **दृष्टं साध्यस्य यत्स्यात् सममधिकमपि क्वापि पक्षान्यता वा**
तस्याभावेऽपि साध्ये सति यदि न भवेद्बाधकं व्यापि नैतत् ।
दुर्वारे बाधके तद्द्वयमपि दहनानुष्णतादावुपाधिः
साध्यं तद्व्याप्यतां वा हरतु स विरहात् पक्षतो हेतुतश्च ॥ ४५ ॥

समाधिकव्याप्तिकपक्षाङ्गीकारेणोपाधेर्व्यापकत्वप्रकारपरिशोधनपूर्वकं तद्दूषणत्वप्रकारमपि विशदयति--**दृष्टमिति** ॥ पूर्वं पक्षेतरत्वस्योपाधित्वं प्रतिक्षिप्तम् । इदानीं तस्याप्युपाधित्वमङ्गीकरोति--**क्वापीति** । अयं भावः--यत्र वह्न्यनुष्णत्वानुमानादौ पक्षे साध्यबाधः स्फुटमेव दृश्यते, तत्र पक्षेतरत्वमप्युपाधिः । यत्र पुनर्बाधो नास्ति, न तत्र पक्षेतरत्वमुपाधिरिति विभागः । अत्रोपाधेर्व्यापकत्वावगमप्रकारमाह--**तस्येति** । अयमस्यार्थः--यद्यस्य व्यापकत्वेन निर्दिश्यते, तस्याभावेऽपि तत्संभवे यदि बाधकतर्कः प्रवर्तते स एव तस्य व्यापकः ; यथा शाकाद्याहारपरिणत्यभावे पुरुषगताद्यश्यामिकाभावो नियतमुपलभ्यते । एवमन्यत्रापि । अन्यथा अकारणकार्योत्पत्तिप्रसङ्ग इति तर्कः । एतादृशबाधकसद्भावे व्यापकत्वम् । या तु क्षीराद्याहारपरिणतिः सा श्यामत्वं प्रति न व्यापिका ; विपक्षे बाधकाभावादित्यर्थः । तथा च वह्न्यनुष्णत्वानुमाने पक्षे प्रत्यक्षबाधकसद्भावादुपजीव्यविरोधादितर्कबाधाच्च सममधिकं वा पक्षेतरत्वं पक्षेतरवह्निसामग्रीशून्यत्वमित्यादिकं सर्वमप्युपाधिः स्यादित्याह--**दुर्वार** इति । तद्द्वयमपि--सममधिकमपि । उपाधेर्दूषणत्वप्रकारं निगमयति--**साध्यमिति** । पक्षे साध्यापहारे बाधः, हेतोस्साध्यव्याप्यत्वापहारे व्याप्यत्वासिद्धिः । उपाधिः खलु व्यापकस्वभावः पक्षे स्वाभावेन साध्यमपहरन् हेतोस्साध्यव्याप्यतामप्यपहरतीति भावः ॥ ४५ ॥ **इति उपाधितद्विधूननादिः** ॥

271. व्याप्तिः पक्षान्वयश्चेत्युभयमविकलं यस्य हेतुस्स सम्य-
ङ्ङाभासौ तद्विहीनौ तदुभयविततिस्स्यादनैकान्तिकादिः ।
तत्तद्वक्रानुमोत्प्रेक्षणमपि घटते न क्वचित् साध्यसिद्ध्यै
स्वव्याघातादिदोषादविषयनियतेर्वाञ्छितालाभतश्च ॥ ४६ ॥

एवमनुमानेषूपाधिविधूननप्रकारमुक्त्वा हेतुतदाभासादिविभागं दर्शयति—**व्याप्तिरिति** ॥ द्वयमनुमानाङ्गं व्याप्तिः पक्षधर्मता चेत्युक्तम् । सा च व्याप्तिरन्वयव्यतिरेकाभ्यां द्वेधा भवति । साधनसद्भावे साध्यसद्भावोऽन्वयः, साध्याभावे साधनाभावो व्यतिरेकः । तत्रान्वये सर्वसपक्षवर्तिनो हेतोस्साध्येन सह सार्वत्रिकस्संबन्धः । तद्यथा, शब्दोऽनित्यः कृतकत्वादिति । कतिपयसपक्षवर्तिनस्तस्य सपक्षे कुत्रचित् साध्येन संबन्धः, तच्च सावयवत्वमिति ; घटादिषु सावयवत्व-सद्भावात् क्रियादिष्वभावात् । व्यतिरेकस्तु सकलविपक्षव्यावृत्त्यात्मकत्वादेकरूप एव । तथा च यस्ययस्यानुमानस्यान्वय-व्यतिरेकौ स्तः, तदन्वयव्यतिरेकित्वात् सर्वाविगीतमेव । यस्य पुनरन्वयो व्यतिरेको वा न, तयोरुभयोर्गतिरुत्तरत्र वक्ष्यते । एवं व्याप्तिपक्षधर्मताभ्यां सम्यक्त्वमुक्त्वा तदभावे पुनरसम्यक्त्वमाह—**आभासाविति** । व्याप्त्यभावे व्याप्यत्वासिद्धिः ; पक्षधर्मताभावे स्वरूपासिद्धिः । अनैकान्तिकत्वादिकमशेषमपि हेत्वाभासजातं व्याप्तिपक्षधर्मताविरहे विश्राम्यतीत्याह—**तदुभयेति** । तथा हि । विपक्षगामित्वे व्याप्तिविरहः । पक्षविपक्षमात्रगामित्वेऽपि स एव । सपक्षे सति पक्षमात्रगामित्वे-ऽपि व्याप्तिप्रदर्शनाभावात् स एव ; विपक्षादिव सपक्षादपि व्यावृत्तत्वेन व्यतिरेकव्याप्त्य[वगमात्]भावात् । यदा पुनः कालात्ययापदिष्टः तदाऽपि व्याप्त्यभावः । तदा साध्यशून्ये साधनवृत्त्या व्याप्तिभङ्ग इति केचित् । अपरे तु बाधितेऽपि सिद्धसाधनवत् साध्यसन्देहाभावात् पक्षधर्मत्वभङ्ग इति । एवं प्रकरणसमेऽपि पक्षे साध्यनिश्चयावसादनेन व्याप्तिभङ्ग इति केचित् । अन्ये तु स्वारसिकसन्देहापवादिनाऽपि विपरीतनिश्चयप्रसङ्गेन बाधतुल्यत्वमापाद्य पक्षधर्मता-भङ्ग इति । इतरे तु व्याप्तिपक्षधर्मत्वयोर्द्वयोरपि विमर्देनेनोभयदोषापादनमिति । कथं तर्ह्यनुमानस्य सन्देहोऽङ्गमित्यु-च्यते ? इत्थम्—उभयी खलु सन्देहप्रवृत्तिः । एका सर्वानुमानसाधारणी स्वारसिकी, सा भवेदनुमानाङ्गम् । द्वितीया पुनः प्रतिकूलानुमानदर्शनजनिता । सा पुनर्नानुमानाङ्गं, शङ्कापनोदनप्रवृत्तपूर्वानुमानपरिपन्थिरूपेणानुमानान्तरेण प्रवर्ति-त्वात् । अतः प्राचीन एव संशयोऽनुमानाङ्गम्; पराचीनस्तु परिपन्थ्यनुमानमूलत्वादनुमानबाधकेष्वन्तर्भवतीति विभागः । अनुकूलतर्काभावो व्याप्तिमेवावसादयति व्याप्तेस्तु तर्कमूलत्वात् । प्रतिकूलतर्कोऽप्येवमेव ; अनुकूलतर्कसद्भाववत् प्रति-कूलतर्काभावस्यापि व्याप्त्यङ्गत्वात् । आत्माश्रयादिः स्वरूपासिद्धिमापादयति ; केवलानिष्टप्रसङ्गः प्रतिकूलतया व्याप्तिमव-सादयतीति विभागः । सोपाधिकत्वमपि व्याप्तिमेव व्यावर्तयति, निरुपाधिकसंबन्धत्वाद्व्याप्तेः । यत्सोपाधिकं तदेवान्यथा-सिद्धमप्रयोजकमित्यादिशब्दैरभिलप्यते । यदा पुनर्हेतोः स्वरूपमसिद्धं विशेषणं वा, यद्वा पुनराश्रयः, अत्र सर्वत्रापि स्वरूपासिद्धिरेव,अतस्सर्वो हेत्वाभासोऽप्यसिद्धावेव पर्यवस्यति, व्याप्यत्वासिद्धेरप्यसिद्धिव्यवहारविषयत्वात् । दृष्टान्तदोषाणां पुनर्हेतुदोषपर्यन्तचिन्तायां हेत्वाभासेष्वन्तर्भावमाहुः । अज्ञानासिद्धिरप्यन्ततस्तत्रैव विश्राम्यति । अतस्सर्वेषामपि हेत्वा-भासानां व्याप्तिपक्षधर्मताभञ्ज[न]कत्वेन दोषत्वात्तदुभयभञ्जनविततिरेव सर्वमनुमानदोषजातमित्याह—**तदुभयवितति-रिति** । एवं च व्याप्तिपक्षधर्मतयोरनुपप्लवे अन्वयव्यतिरेकिवत् केवलान्वयिनोऽप्यनुमानत्वमङ्गीकृतम् । तर्हि वक्रानुमानस्यापि केवलान्वयित्वादनुमानत्वमङ्गीकर्तव्यमित्यत आह—**तत्तदिति** । वक्रानुमानं सर्वमपि स्वसाध्यसिद्धेरनङ्गत्वादप्रयोजकमेव ।

कुत इत्यत आह—**स्वव्यघाते**ति । विषयनियमाभावादपि दुष्टत्वमाह—**अविपर्ये**ति । येनैवानुमानेनानित्यत्वं साध्यते, तेनैव यत्किंचित्पदव्यत्ययेन नित्यत्वमपि साधयितुं शक्यते । अत एव स्वव्याघातो व्यक्तः । वक्रानुमाने सामान्यसिद्धावपि न विशेषसिद्धिः । अतो वाञ्छितस्याप्यर्थविशेषस्य लाभो नास्ति । अतो वक्रानुमानं केवलान्वयिरूपमपि साधनजातिरेव, स्वव्याघातात् । जातिर्द्विविधा, साधनजातिर्दूषणजातिश्च । तत्र साधनजातिर्महाविद्या; दूषणजातिः प्रतिधर्मसमादिरिति विचक्षणानां निर्णयः । एतत्सर्वं **विडम्बने** विस्तरेण द्रष्टव्यम् । अतो वक्रानुमानस्य नानुमानत्वप्रसङ्ग इति ॥ ४६ ॥ **इति हेतुतदाभासादिविभागः ॥**

272. **साध्येन व्याप्तिमेके जगदुरिह सकृद्दर्शनेनैव गम्यां**
शङ्कानिर्धूतिमात्रं फलमिति च परं भूयसां दर्शनानाम् ।
धूतोपाधिस्तु योगः स्फुरति बहुविधैर्दर्शनैरेव पश्चात्
तज्जात्याधारभावाद्युगपदखिलमप्यक्षसंबन्धि तत्र ॥ ४७ ॥

पूर्वोक्तव्याप्तिग्रहणानुपपत्तिं पूर्वं परिहृतामपि सिंहावलोकितेन प्रकारान्तरेण परिहरति—**साध्येने**ति ॥ भूयोदर्शनेनैव व्याप्तिरवगम्यते इति न्यायवित्संप्रदायः । एकदेशिनस्तु प्रथमदर्शनेनैव व्याप्तिर्गृह्यते । किमर्थं तर्हि भूयोदर्शनमित्यत्राह—**शङ्केति** । आद्येनैव दर्शनेन व्याप्तिर्गृह्यते ; भूयसां तु दर्शनानां व्यभिचारशङ्कानिराकरणमात्रं फलमित्यर्थः । तर्हि तर्कस्य किं फलमित्यत्राह—**धूतोपाधिस्त्व**ति । प्रथमदर्शनेनैव व्याप्तिग्रहणं भूयोदर्शनैर्व्यभिचारशङ्कनिराकरणं, तर्केण पुनर्व्यभिचारशङ्कानिदानभूतोपाधिनिराकरणमिति विभागः । अस्तु तावदयं क्रमः । अथापि व्याप्तिग्रहणं किं सर्वव्यक्त्युपसंहारेण? उत कतिपयव्यक्त्युपसंहारेण ? द्वितीये व्याप्तिरेव न संभवति । प्रथमे सर्वव्यक्त्युपसंहारे सर्वव्यक्तिसंबन्धाभावादिन्द्रियस्य कथं ग्रहणमित्यत्राह—**तज्जात्याधारभावा**दिति । अयं भावः—इन्द्रियेण तावत्सन्निहिता व्यक्तिस्संबद्धा, तत्समवेतत्वेन जातिः, तदाधारतया तद्विशेषणत्वेन सर्वा व्यक्तयः । तथा चेन्द्रियेण सह संबद्धविशेषणत्वेन सर्वव्यक्तीनां संबन्धः । अतः सर्वव्यक्त्युपसंहारेण व्याप्तिग्रहणोपपत्तिरिति । अस्मिन्नर्थे किं प्रमाणमिति चेत्, आबालगोपालमानुमानिकव्यवहारानुपपत्तिरेव । किमानुमानिकव्यवहारो नास्ति? किं वा तद्व्याप्तिमन्तरेण संभवति? अथवा व्याप्तिरज्ञाताऽप्यनुमानाङ्गं भवति? अथवा व्याप्तिज्ञानापेक्षायां प्रकारान्तरेण व्याप्तिज्ञानं संभवति? अथवा न प्रकारान्तरेण, नानेनापि प्रकारेण व्याप्तिज्ञानं संभवतीति? नाद्यः, लोकोपलम्भविरोधात् । न द्वितीयः, अकारणकार्योत्पत्तिप्रसङ्गात् । अतएव न तृतीयः, व्याप्तिज्ञानमन्तरेणानुमानादर्शनात् । न चतुर्थः, तस्याप्युपायस्य त्वदुक्तदोषग्रस्तत्वस्य वक्तुं शक्यत्वात् । न पञ्चमः, व्याप्तिज्ञानोपायाभावे व्याप्त्यभावेन सर्वानुमानोच्छेदप्रसङ्गात् । व्याप्तिभञ्जकानुमानतर्कयोरपि व्या[प्त्यभावेन] प्तिबाधेन विवक्षितासिद्धेः । तयोर्व्याप्तिज्ञानविधुरयोरपि बाधकत्वे साधकानामपि तद्विधुराणां साधकत्वं स्यात् । अस्मदुक्तप्रकारेण व्याप्तिज्ञानसाधने अस्माकमपि तथैव स्यादिति । तर्हि प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहणे सर्वोपसंहारात् भवतस्सार्वज्ञ्यं स्यादिति चेत्, भवतोऽपि तर्हि सार्वज्ञ्यं स्यात् । अन्यथा कथं सर्वज्ञत्वापादानं करोषि? भवतः किंचिन्नाविदितं स्यादित्यापादयामीति चेत्; किं सर्वेष्वपि पदार्थेषु किंचिन्नाविदितं स्यादित्यापादयसि? यद्वा येषुकेषुचिदर्थेषु? उत्तरत्र न सार्वज्ञ्यापादानम् । पूर्वत्र सर्वेष्वपि पदार्थेषु किंचिन्नाविदितं स्यादिति वदतो भवतोऽपि सार्वज्ञ्यं स्यात् । सामान्याकारेण सर्वं मम विदितम्, विशेषतो न विदितमिति चेत्; ममाप्येवमेवेति समस्समाधिः । अतस्सामान्याकारेण व्याप्तिग्रहणस्य वादिप्रतिवादि-

साधारणत्वान्नैकः पर्यनुयोक्तव्य इति न्यायः । यदि कतिपयव्यक्तिग्रहणमात्रेऽपि व्याप्तिग्रहणमङ्गीकृत्य प्रतिकूलानुमानं प्रतिकूलतर्कं च वदसि तच्चास्माकमपि समानम् ; तस्मात् सुस्थितमनुमानम् ॥ ४७ ॥ **इति व्याप्तिग्रहणप्रकारः ॥**

273. **अस्मिन् सत्येतदस्तीत्यवितथनियतेरन्वयव्याप्त्यभिख्या**
तस्याभावे तु तन्नेत्ययमपि नियमस्तौ पृथक् चापृथक् च ।
तस्मात् त्रेधाऽनुमानं कतिचिदकथयन्नेकहानाद्द्विधैके
कश्चिच्चेद्व्याप्तियुग्मप्रिय इह भविता वर्णयत्वैकविध्यम् ॥ ४८ ॥

अथ व्याप्त्यादिविभागप्रकारं विशदयति—**अस्मिन्निति** ॥ हेतुसद्भावे साध्यसद्भावोऽन्वयः । व्यतिरेकव्याप्तिमुदाहरति—**तस्येति** । साध्याभावे साधनाभावो व्यतिरेकः ; न पुनस्साधनाभावे साध्याभावः । यथाऽऽहुः—*व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते । तयोरभावयोस्तस्माद्विपरीतः प्रतीयते ॥ इति । एतौ व्याप्तिप्रकारावन्वयव्यतिरेकिणि [सहैव] उभावेव वर्तेते ; केवलान्वयिनि केवलव्यतिरेकिणि च पृथगेव वर्तेते इति न्यायसंप्रदाय इत्याह—**ताविति** । अतोऽनुमानत्रैविध्यमिति च दर्शयति—**तस्मादिति** । **कुमारिलादयो** व्यतिरेकिणं निरस्यन्ति ; **वादीन्द्रादयो**ऽन्वयिनमिति विशेषं दर्शयति—**एकहाना**दिति । एवमन्वयव्यतिरेकिमात्रसक्तो यदि कश्चिद्भविष्यति स त्वन्वयव्यतिरेकिणमेवाङ्गीकृत्य तद्द्वयमपि प्रतिक्षिपत्वित्याह—**कश्चिच्चे**दिति । अयमत्र भावः—अन्वयव्यतिरेकिवत् केवलान्वयी न प्रतिक्षेप्यः ; अन्वयस्य निश्चलत्वात् । केवलव्यतिरेकिणं वयमेव प्रतिक्षेप्स्याम इति ॥ ४८ ॥ **इति व्याप्त्यादिविभागः ॥**

274. **सर्वस्थः केवलान्वय्यघटितसरणिः स्यात् स्ववृत्तेर्विकल्पे**
साध्ये स्वस्मान्निवृत्ते भवति च स तदा साध्यहानेर्विपक्षः ।
हेतोस्तद्वृत्त्यवृत्त्योरभिमतविहतिस्तत्र चैवं विकल्पा-
दित्युत्प्रेक्षाविभागं विघटयतु न वा सर्वथा व्याप्तिसिद्धिः ॥ ४९ ॥

एवं केवलान्वय्यङ्गीकारे महाविद्याऽप्यङ्गीकार्या ; तस्या अपि केवलान्वयित्वात् । तथा च पूर्वोक्तं तन्निराकरणं न युज्यते । किंच सकलसपक्षवर्ती हि केवलान्वयी महाविद्येत्युच्यते ; तच्च न संभवति, प्रमेयत्वाभिधेयत्वादीनां सर्वस्थत्वे स्वात्मन्यपि वृत्तिप्रसङ्गात् , तदभावे केवलान्वयित्वाभावादिति चोदयति—**सर्वस्थ** इति ॥ तदेव विवृणोति—**साध्य** इति । साध्यं स्वस्मान्निवर्तते न वा ? न निवर्तते चेदात्माश्रयः ; निवर्तते चेत् , तद्विपक्ष एव । तदिदमाह—**साध्य** इति । विपक्षभूते तस्मिन् साध्ये हेतुर्वर्तते न वा ? यदि वर्तते, विपक्षवृत्तित्वेन हेतुत्वमेव भज्येत ; यदि न वर्तते, प्रमेयत्वाभावात् साध्यस्य साध्यत्वं व्याहन्येत । तदेतदाह—**हेतो**रिति । एवं प्रमेयत्वादिहेतौ साध्यं वर्तते न वा ? न चेद्धेतुरेव विपक्षः स्यात् । तस्मिन् विपक्षभूते हेतौ हेतुर्वर्तते चेदात्माश्रयः, विपक्षगामित्वाद्व्यभिचारश्च । न वर्तते चेत् कथमिव केवलान्वयित्वं हेतोः, क्वचिद्व्यतिरेकस्यापि दर्शनात् ? यदि हेतौ साध्यं वर्तते स तु हेतुः सपक्षः स्यात् । तत्र हेतुवृत्तावात्माश्रयः, अवृत्तावप्रमेयत्वाद्धेतोरेवासिद्धिः । किंच हेतुसाध्ययोर्द्वयोरपि सपक्षत्वादन्योन्यवृत्तावन्योन्याश्रयप्रसङ्गः । अवृत्तौ कथमिव केवलान्वयित्वम् ? इत्थं बहुविधतर्ककर्कशं महाविद्यानुमानं न प्रतितिष्ठतीत्याह—**तत्र चैवं विकल्पा**दिति । यथासंभवं विकल्पानां भूयस्त्वादित्यर्थः । इयमुत्प्रेक्षा केवलान्वयिरूपमहाविद्यादिविभागं विघटयतु न वा । सर्वथा अन्वयव्यतिरेकिहेतुसद्भावात् व्याप्तिरभङ्गुरेत्याह—**इतीति** । न वेत्युक्त्या विभागविघटनं न सिध्यतीत्यभिप्रैति ।

अयमभिप्रायः—महाविद्या चेत् स्वव्याघातादिभिः प्रागेव दूषिता । अभिधेयत्वादिसाधकं प्रमेयत्वादिकं तु सर्व[र्व]था केवलान्वयि च भवति ; तस्य च त्वदुक्तदूषणाभासैरपाकरणशङ्काऽपि नाङ्कुरतीति ॥ ४९ ॥

275. तत्तद्धीव्यक्तिभेदात्प्रमितिविषयता मानसिद्धा घटादौ
प्रत्यक्षत्वं च तद्वत्तदिदमुभयमध्यक्षसिद्धं तथैव ।
इत्थं तद्वृत्त्यवृत्तिव्यतिकरकलहैः केवलान्वय्यपोहे
दुर्वारः शून्यवादो न तमभिमनुषे स्थापयन् किञ्चिदिष्टम् ॥ ५० ॥

केवलान्वयिविशेषमुदाहृत्य पूर्वोक्तदूषणाभावं दर्शयति—**तत्तदिति** ॥ धर्मादयः कस्यचित् प्रत्यक्षाः ; प्रमेयत्वादिति केवलान्वयिनमुदाहरन्ति न्याय[वादिनः]विदः । तत्र मेयत्वं स्वात्मनि वर्तते वा न वा? प्रत्यक्षत्वं स्वात्मनि वर्तते वा न वा? इति साध्यसाधनविषयविकल्प एव दूषणाङ्कुरः । तत्र स्वात्मनि वृत्तौ न कश्चिदपि दोषः, स्वपरनिर्वाहकसमाधेस्सर्ववादिसाधारणत्वात् । औपाधिकधर्माणां यावदुपाधि वृत्तिमेवाङ्गीकुर्वन्ति विपश्चितः । एकं हि वस्तु प्रमाणेन सिध्यति ; अतस्तत्प्रमेयं, तच्च प्रमाणान्तरेण, तच्च तदन्येन प्रमाणेनेति प्रमेयत्वं सर्वसाधारणमेव । एवं वाच्यत्वादिकमपि । अतो वृत्तिभेदेन प्रमेयत्ववाच्यत्वादीनां यावदुपाधिवृत्त्यङ्गीकारावश्यंभावेन नात्माश्रयदोषः । नाप्यन्योन्याश्रयदोषः ; प्रमेयत्वस्याभिधेयत्वात् अभिधेयत्वस्यापि प्रमेयत्वात् । न हि दृष्टेऽनुपपन्नं नाम । प्रमेयत्वमेव ह्यभिधीयते ; अभिधेयत्वमेव प्रमीयते । व्यक्तिभेदेन विरोध उपशाम्यतीत्युक्तम् । उक्तं च यावदुपाधिवृत्तित्वं सर्वौपाधिकधर्मसाधारणम् ; इत्थमनङ्गीकारे शून्यवाद एव प्रसज्येत ; न च भावान् शून्यवादी, केवलान्वयिमात्रविडम्बनप्रवृत्तत्वात् । एतत्सर्वमभिप्रेत्याह—**तत्तद्धीति** । अयमत्र शब्दार्थः—तत्तद्बुद्धिव्यक्तिभेदात् प्रमेयत्वस्यापि प्रमेयत्वे न दोषः । प्रत्यक्षत्वं च प्रत्यक्षान्तरेण प्रत्यक्षम्, तथा च प्रमेयत्वं प्रत्यक्षत्वं च प्रत्यक्षान्तरेण प्रत्यक्षमित्युक्तम् । इत्थं सत्युपरञ्जकधर्माणां स्ववृत्त्यवृत्तिविकल्पेन दूषणे नित्यसमा ; विषयिधर्माणां स्वविषयत्वाविषयत्वविकल्पेन दूषणे पुनरनुपलब्धिसमा । एतादृशजात्यन्तर्गतैर्विकल्पैर्दूषणकथने शून्यवादो दुर्वारः । भवान् पुनर्महाविद्यामेव विडम्बयन् न शून्यवादी, तत्तत्स्थापनप्रवणत्वात् । तदिदमाह—**न तमभिमनुष** इति । **श्लो.** नात्माश्रयप्रसक्तिर्वा नान्योन्याश्रयसंस्थितिः । प्रमेयत्वाभिधेयत्वप्रसङ्गे सर्ववादिनाम् ॥ औपाधिकानां धर्माणां वृत्तिर्यावदुपाधि चेत् । प्रमेयत्वादिकं सुस्थमन्यथा व्याहतिस्तव ॥ व्याघातो यदि दोषो न को वा दोष इतीर्यताम् । दोषादोषविभागश्चेन्न स्यात्त्वं दूषकः कथम् ॥ ५० ॥ **इति केवलान्वयिविशेषनिरूपणम् ॥**

276. ख्यातत्वाच्छब्दवाच्यो विमतिविषय इत्यादिरूपे तु साध्ये
व्यर्थोऽसौ हेतुरित्थं विमतिसमुदयासंभवादित्ययुक्तम् ।
व्याघातव्यक्त्यभावाच्छ्रुतिशकलबलात् कूटयुक्त्यादिभिर्वा
पाकः कश्चित् प्रमुह्यन् प्रमितिगतिकथापत्तिभैर्हि प्रबोध्यः ॥ ५१ ॥

अथापि विप्रतिपन्नमभिधेयं प्रमेयत्वादिति केवलान्वय्यनुमानं निष्प्रयोजनम्, विप्रतिपत्त्यभावादित्याशङ्क्य परिहरति—**ख्यातत्वादित्यादिना** पूर्वार्धेन ॥ तत्र हेतुमाह—**व्याघातेति** । अविचाराणां बालप्रायाणां व्याघाताभिव्यक्त्य-

भावात्, *यतो वाचो निवर्तन्त इति श्रुतिशकलश्रवणात्, प्रच्छन्नसौगतप्रवादाच्च व्यामुह्यन्ननेनानुमानेन प्रतिबोध्यत इति प्रयोजनवानेवायमनुमानप्रयोग इत्युत्तरार्धस्य भावः ॥ ५१ ॥ **इति केवलान्वयिविशेषप्रयोजनम् ॥**

277. **पक्षेऽन्यत्रापि साध्यं न मितमविदिते नापि संबन्धधीः स्यात्**
क्वापीत्यप्यस्य सिद्धावृजुरविहतिमान्नास्ति सामान्यहेतुः ।
सत्यप्यस्मिन्न शक्याधिकरणनियतिः स्वेच्छया सर्वसाम्या-
द्वैषम्यं दुर्वचं तत्प्रमितिकरणता क्वापि नावीतहेतोः ॥ ५२ ॥

इत्थमन्वयव्यतिरेकिणं केवलान्वयिनं च व्याप्तिसंरक्षणप्रकारैर्बहुभिरुपपाद्य केवलव्यतिरेकिणं निराकर्तुमुपक्रमते—**पक्ष** इति ॥ व्याप्तिग्रहणसापेक्षं प्रमितिसाधनमनुमानमित्यनुमानलक्षणम् । व्याप्तिश्च साध्यसाधनयोः; अतस्तदुभयज्ञान-सापेक्षं व्याप्तिपरिज्ञानम् । साध्यं च न क्वापि मितम् । पक्षे मितं चेत् सिद्धसाधनम्; सपक्षे चेद्व्यतिरेकित्वहानिः; विपक्षे चेद्व्याघातः; अविदिते संबन्धबुद्धिरसंभाविनी । तदिदमाह—**अविदित** इति । ननु शब्दः क्वचिदाश्रितः गुणत्वात्, ज्ञानादयः क्वचिदाश्रिताः इति सामान्यहेतुना सिद्धं साध्यमुपजीव्य विशेषविषयस्याष्टद्रव्यतिरिक्तद्रव्यानुमानस्य व्यति-रेकिरूपिणो व्याप्तिरिति मतमनूद्य दूषयति—**क्वापी**ति । साक्षात्साध्यसिद्ध्यभावेन विशेषव्याप्तिकथने तावदार्जवं नास्ती-ति । तदिदमाह—**ऋजुरविहतिमान्नास्ति सामान्यहेतु**रिति । यस्य येन व्याप्तिरभिधीयते तयोरन्यतरस्येतरेण संबन्ध-कथने तद्विशेषप्रतिपत्तिरुपयुज्यते; न तु सामान्यस्य प्रतिपत्तिरिति भावः । यद्यन्यप्रतिपत्तिरन्यसंबन्धप्रतिपत्तावुपयुज्यते सर्वत्राप्यन्यप्रतिपत्तिरन्यसंबन्धप्रतिपत्तावुपयुज्येत; अन्यत्वाव्याघातात् । न हि गन्धवत्त्वपृथिवीत्वसंबन्धप्रतिपत्तौ गुण-वत्त्वद्रव्यत्वप्रतीतिस्तन्त्रमिति भावः । अस्तु वा सामान्यहेतुर्विशेषसंबन्धोपयोगी । अथापि परिशेषः कर्तुं न शक्यते; भवदभिमतमात्रे परिशेषप्रवृत्तेर्विश्रमाभावात्, परस्परव्यावृत्त्या परिशेषानियमाच्चेत्याह—**सत्यपी**ति । अस्मिन्परिशेषप्रमाणे कथं परिशेषानुपपत्तिरित्यत आह—**स्वेच्छये**ति । किं स्वेच्छया परिशेषः? तथा सति परेच्छया वस्त्वन्तरपरिशेषोऽपि कर्तुं शक्यत इत्यर्थः । वस्तुवैषम्यात् परिशेषसिद्धिमाशङ्क्य परिहरति—**वैषम्यं दुर्वच**मिति । यथा श्रोत्रेन्द्रियग्राह्यत्वात् शब्दः पृथिव्यादीनां गुणो न भवतीति साध्यते, तथा तेनैव हेतुना विभूनां गुणो न भवतीति साधनादाकाशगुणत्व-मपि भज्येत । यथा विशेषगुणत्वादिति दिक्कालगुणत्वं बाध्यते, एवं श्रोत्रेन्द्रियग्राह्यत्वाद्विभ्वन्तरगुणत्वमपि बाध्येत । तथा च बाह्येन्द्रियग्राह्यत्वादतीन्द्रियगुणत्वमपि बाध्येत । अत एव हेतोर्निरवयवगुणत्वमपि निर्धूयेत । उपलक्षणमेतत्; सर्वपरिशेषानुमानेष्वतिप्रसङ्गबाहुल्यं द्रष्टव्यम् । तर्कानुग्रहाद्वैषम्यमपि तत्रतत्र तर्कान्तरकथनेन बाधनीयम् । अतः प्रमितिहेतुत्वं न केवलव्यतिरेकिण इत्याह—**तदि**ति । तस्मादित्यर्थः ॥ ५२ ॥

278. **साध्याभावो विपक्षे कथमिव विदितस्तस्य साध्याप्रसिद्धे-**
र्भावात्मन्यप्यमुष्मिन् प्रतिभटवपुषा ह्यत्र ते व्याप्तिसिद्धिः ।
इत्यज्ञातान्वयेऽस्मिन् कथमिव सुशकः स्यादभावो नियन्तुं
हेतौ सारोऽन्वयोऽतः क्वचिदनुपधिकः केवलान्वय्यपीष्टः ॥ ५३ ॥

श्रुतार्थस्य विशदीकरणाय व्यतिरेकिणो विपक्षे व्यतिरेकव्याप्तिदर्शनासंभवमुक्तमप्यनुवदति—**साध्याभाव** इति ॥ साध्याप्रसिद्ध्या तद्व्यतिरेकोऽपि विपक्षे ज्ञातुं न शक्यत इत्यर्थः । अत्र केचिदाहुः—यस्मिन् व्यतिरेकिणि साध्यं भाव-

रूपं, तत्र व्यतिरेकग्रहणासंभवः; व्यतिरेकस्याभावरूपत्वात्, अभावस्य प्रतियोगिग्रहणमन्तरेणासिद्धेः, प्रतियोगिनश्च पक्षादिपु न क्वापि सिद्धेः। यत्राभावरूपं साध्यं तत्र भावरूपो व्यतिरेकः। स च भावो न प्रतियोगिग्रहणसापेक्षः भावत्वादेव। तथा च व्यतिरेक्यनुमानसिद्धिः। उदाहरन्ति च गौरितरेभ्यो भिद्यते सास्नादिमत्त्वादिति। अत्र इतरेभ्यो भेदो हि इतरप्रतियोगिकान्योन्याभावः, तस्य चाभावरूपत्वाद्व्यतिरेक इतरत्वादिकं भावरूपम्; तस्मादभावरूपसाध्यव्यतिरेकस्य निरपेक्षप्रतीतिकत्वात्तेनैव हेतुव्यतिरेकस्य व्याप्तिग्रहणं युज्यत इति। अयं च ग्राम्यजनविप्रलम्भ इत्याह—**भावात्मनी**ति। अयं भावः—व्यतिरेकस्य भावात्मकत्वेऽपि व्यतिरेकव्याप्तिकथनावस्थायां साध्याभावरूपतया कथनमवश्यंभावि। यदितरस्मान्न भिद्यते तत्सास्नादिमन्न भवतीति हि व्यतिरेकव्याप्तिकथनम्। अन्यथा साध्यप्रतिभटत्वाभावे व्यतिरेकव्यवहारानुपपत्तिः। तथा च भावरूपत्वेऽभावरूपत्वे च व्यतिरेकस्य साध्यविरोधित्वेन ग्रहणावश्यंभावात्साध्याप्रसिद्धौ न प्रसिद्धिः। साध्यं च पक्षादिषु न प्रसिद्धमित्युक्तं प्रागेवेति। अतोऽन्वयापरिज्ञाने व्यतिरेकपरिज्ञानं सर्वथा न शक्यमित्याह—**इती**ति। अस्मिन्—व्यतिरेक्यनुमाने। इत्थं केवलव्यतिरेकिणं निरस्य सर्वानुमानसारभूतमन्वयव्यतिरेकिणं प्रमाणतया निगमयति—**हेता**विति। अन्वयः—व्यतिरेकसहितोऽन्वयः। हेतौ सारः—स्थिरांशः। अतोऽन्वयव्यतिरेकी सर्वप्रधानः, अन्वयव्यतिरेकाभ्यामर्थतत्त्वनिर्णयात्। केवलान्वय्यपि क्वचिदिष्टः। यत्र निरुपाधिकत्वादिनिर्णयः तर्कानुग्रहेण भवति, यथा प्रमेयत्वादभिधेयत्वमिति, स च हेतुरभीष्ट एवेति। अतः केवलव्यतिरेकी अभावविषयत्वे भावविषयत्वेऽपि न साधक एव। अयं गौरिति व्यवहर्तव्य इति भावविषयः। इतरेभ्यो भिद्यत इत्यभावविषय इति भेदः॥ ५३॥ **इति केवलव्यतिरेकिभङ्गः॥**

279. **संत्यक्तावीतहेतोरभिदुरमखिलं लक्षणाभावतः स्यात्**
मैवं लक्ष्मैव भेदस्तदवगमकमित्याप्तवाक्ये तदुक्तिः।
यद्वा गन्धादिरप्त्वप्रभृतिविरहितेष्वेव दृष्टो घटादि-
ष्वाज्यादावन्वयी स्यादयमिव विमतेष्वेकलक्ष्मण्यपोहः॥ ५४॥

ननु केवलव्यतिरेक्यभावे सर्वमपि लक्षणं निष्प्रयोजनं स्यात्। *व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम् तदुभयमपि केवलव्यतिरेक्यनुमानसाध्यमित्याशङ्कते—**संत्यक्ते**ति॥ अभिदुरं—भेदकानुमानाभावादभिन्नमित्यर्थः। निराकरोति—**मैव**मिति। तत्र हेतुमाह—**लक्ष्मैव भेद** इति। विरुद्धधर्माध्यासो हि भेदः; लक्षणानि च विरुद्धधर्माः। अतो लक्षणप्रतीतिरेव भेदप्रतीतिः। अतोऽनुमानसाध्यं नावशिष्यते; लक्षणप्रतीतेरेव लक्षणप्रतीत्या साधने पुनरात्माश्रयः। भवन्तोऽप्याहुः—अयमेव हि भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यास इति लक्षणस्यापि भेदत्वम्। लक्षणातिरिक्तो भेदस्तु भवद्भिरङ्गीकृतोऽपि नैरर्थक्यान्नास्माभिरङ्गीक्रियत इति भावः। कथं तर्हि लक्षणस्य भेदत्वम्? लक्षणं हि वाक्यरूपं, स पुनर्न भेद इत्याशङ्क्य परिहरति—**तदवगमक**मिति। आप्तवाक्ये लक्षणत्वकथनमौपचारिकमित्यर्थः। अथवा लक्षणमनुमानम्। अन्वय्येव तदित्याह—**यद्वे**ति। तथा हि—अबादिव्यतिरिक्ततया संप्रतिपन्नेषु घटादिषु गन्धादिर्दृष्टः, तमेव दृष्टान्तीकृत्य सन्दिग्धेष्वाज्यादिष्वबादिव्यतिरेकस्साध्यः; तथा चान्वयित्वमेव। अयमेव हि पक्षस्साधीयान्। लोके हि व्यवहारानुसारिणा लक्षणेन सुशिक्षिताः पामराः परीक्षकाश्च विप्रतिपन्नेषु विपयेषु लक्षणानुरोधेनार्थतत्त्वं निर्णयन्तीति सार्वलौकिकमेतत्। अतो लक्षणाद्व्यतिरेकसाधनमन्वय्यनुमानफलमेव। एवं क्वचिदनुमाने विनिश्चिते सर्वत्रापि लक्षणप्रयोगे केवलमन्वयित्वेनैव [लक्षण] वैलक्षण्यप्रसाधनं युक्तमिति दर्शयति—**अयमिवे**ति॥ ५४॥ **इति लक्षणनिरूपणम्॥**

280. भेदोऽबादेर्घटादौ विदित इतरथा त्वप्रसिद्धिः पुरोक्ता
कृत्स्नक्षोण्यन्वितोऽसौ न विदित इति चेत् पक्षसिद्धिः कथं स्यात् ।
व्याहारेऽप्येवमूह्यं न खलु न विदितं तन्निमित्तं घटादौ
नो चेत्तत्तन्निमित्तव्यवहृतिनियमस्थापनं दुश्शकं ते ॥ ५५ ॥

एवं परोक्तचोद्यमन्यथासिद्ध्या निराकृत्य परोक्तं लक्षणफलद्वयं विभज्य विशेषेण निराकरोति—**भेद** इति ॥ भवता खलु, * भेदो वा व्यवहारो वा लक्षणेन नियम्यत इत्यभिधीयते; उभयमप्यसंबद्धम् । भेदे तावद्वदामः—अयं घटोऽबादेर्भिद्यत इत्यनुमानं प्रयुज्यते । अयमर्थः प्रसिद्ध एव । अन्यथा पाषाणादेरबादिभेदव्यवहाराभावप्रसङ्गः । अन्यथा पक्षस्याप्रसिद्धविशेषणत्वं पूर्वमुक्तमित्याह—**इतरथे**ति । अस्तु प्रसिद्धो घटादेः प्रत्येकमबादिभ्यो भेदः; तथाऽपि कृत्स्नक्षोण्यन्वितोऽबादिभ्यो भेदो न प्रसिद्धः । तथा हि—घटपाषाणकाष्ठादिकं प्रत्येकं जलविलक्षणतया उपलभ्यते; तथाऽपि यावन्ति पार्थिवानि वस्तूनि परमाणुद्व्यणुकत्रसरेणुपूर्वकाणि मेरुसर्षपादीनि च तेषां सर्वेषां यौगपद्येन जलविलक्षणत्वं न पूर्वप्रसिद्धम्; तद्गन्धवत्त्वानुमानेन साध्यत इत्यसत्पक्षः; तथा च न सिद्धसाधनमिति । इदमनुवदति—**कृत्स्ने**ति । परिहरति—**पक्षसिद्धि**रिति । अयं भावः—प्रसिद्ध एव पक्षे साध्यं साध्यते, प्रसिद्धिश्च पक्षस्य सपक्षविपक्षाभ्यां व्यावृत्तत्वेन; तथा च कृत्स्नाऽपि क्षोणी विपक्षव्यावृत्तत्वेन प्रसिद्धा चेदनुमेयं नावशिष्यते; व्यावृत्तेरेवानुमेयत्वात् । अप्रसिद्धा चेत् कथमनुमानस्य [प्रसिद्धिः] प्रवृत्तिः ? न हि पक्षप्रतीतिमन्तरेणानुमानं प्रवर्तत इति । व्यवहारेऽपि साध्ये दूषणमेतादृशं वाच्यमित्याह—**व्याहारेऽपी**ति । व्यवहारस्यापि पूर्वमप्रसिद्धावप्रसिद्धविशेषणत्वं पक्षस्य । इयं पृथिवीति व्यवहर्तव्या गन्धवत्त्वादिति ह्यनुमानं प्रयुञ्जते । तच्च प्रसिद्धमेव घटादौ; अन्यथा कुत्रापि पृथिवीव्यवहारनियमप्रसिद्ध्यभावात् विप्रतिपन्नं जलमिति व्यवहर्तव्यं गन्धवत्त्वात्, एवं विप्रतिपन्नं पृथिवीति व्यवहर्तव्यं स्नेहवत्त्वादिति वैपरीत्येनानुमानं प्रवर्तेत । एवं व्यवहारे लोकव्यवहारविरोध इति चेत्; एवं तर्हि लोकव्यवहारादेव व्यवहारनियमे सिद्धे किमनेनानुमानेन ? असिद्धे वा किमनेनानुमानेन ? स्वयमेव व्यवहारनियमस्थापकत्वाभावात् । तदिदं सर्वमभिप्रेत्याह—**नो चेदि**ति । अतो व्यवहारनियमस्य लोकप्रसिद्धिसिद्धत्वादेवानुमानमनर्थकमिति । कथं तर्हि लक्षणेन तत्तदर्थव्यवहारस्थापनं वादिभिः क्रियते ? अनादिप्रसिद्धव्यवहारस्य नियामकधर्ममात्रप्रदर्शनं शिष्याणामिति न कश्चिद्दोषः । न खलु सर्वमपि शब्दार्थव्युत्पादनं लक्षणोपदेशेन, लोकव्यवहारस्यैव प्रायेण नियामकत्वादिति ॥ ५५ ॥

इति परोक्तलक्षणसाध्यद्वयभङ्गः ॥

281. विद्यास्थानेषु धर्म्येष्विह यदगणयन् विस्तरं न्यायपूर्वं
तत्रापि ह्यक्षपादस्स इति न नियतिर्न्यायतत्त्वेऽनुगम्ये ।
नार्षत्वादिप्रधानं क्वचिदपि यदि वा वार्तिकं क्वापि युक्तं
यद्वा नेयं कथंचिन्निखिलमपि न किं निर्वहन्त्येवमन्ये ॥ ५६ ॥

यद्येवं न्यायशास्त्रविरुद्धमपि भवद्भिरभिधीयते, तर्हि न्यायशास्त्रस्य कथं धर्म्येषु विद्यास्थानेषु प्राधान्येनाभिधानं * पुराणन्याय इति ? एतदनुवदति—**विद्यास्थाने**ष्विति । अस्तु न्यायस्य वेदाङ्गत्वं, स पुनर्न्यायोऽक्षपादप्रणीत इति न नियमोऽस्तीत्याह—**तत्रापी**ति । कस्तर्हि न्याय इत्यत्रोत्तरम्—**न्यायतत्त्व** इति । अनुसर्तव्ये वेदान्तानुकूले विद्व-

द्विशेषनिर्मिते ग्रन्थे सति किमनेन वेदविरुद्धेनाक्षपादकल्पितेन। उक्तं खलु **नाथमुनिभिः** वेदान्तानुकूलं न्यायशास्त्रं **न्यायतत्त्वाभिधानेन**। तच्च परिगृहीतं **यामुनाचार्यादिभिः**। नन्वार्षं परित्यज्य कथं मानुषं परिगृह्यते? युक्त एव मानुषस्याप्युपपन्नस्य परिग्रहः, आर्षस्याप्यनुपपन्नस्य परित्यागः। अन्यथा लोकायतस्यापि परिग्रहः स्यादित्याह—**नार्षत्वे**ति। आर्षत्वमेव परिग्रहकारणं चेत्; ऋषिप्रणीतेषु ग्रन्थेषु वार्तिकारम्भो न स्यात्; उक्तानुक्तदुरुक्तचिन्तारूपत्वाद्वार्तिकस्य। तदिदमाह—**यदि वे**ति। अत्रापि नेत्यनुषज्यते। इत्थमक्षपादप्रणीतस्य न्यायशास्त्रस्य वेदान्तविरुद्धत्वमङ्गीकृत्यान्वा[रुह्य]रोहवादेन त्याज्यत्वमभिहितम्। इदानीं विरोध एव नास्तीति पक्षान्तरमाह—**यद्वे**ति। अयं भावः—**अक्षपाद**प्रणीते सूत्रे न क्वापि वेदान्तविरोधः; व्याख्यातार एव स्वयमप्रतिपत्तिविप्रतिपत्तिभ्यामन्यथा व्याचख्युः; तत्सम्यङ्न्यायविद्भिः परिशोधनीयमिति। अत्रोपपत्तिमाह—**न किमि**ति। सर्वेऽपि हि व्याख्यातारः सूत्रभाष्यवार्तिकादिषु विरुद्धवदवभासमानमित्थमेव समादधते इत्यर्थः॥ ५६॥ **इति व्यवहारशिक्षायां न्यायविस्तरविरोधनिस्तारः॥**

282. **अन्यस्मै स्वप्रतीतं प्रकटयति यया वाक्यवृत्त्याऽनुमानं**
तत्रोदाहृत्युपेताऽप्यविकलमिह तद्बोधयेन्नोपनीतिः।
युक्ता तूदाहृतिस्स्वोपनयनिगमना सप्रतिज्ञादिका वा
वक्तव्या वावदूकैस्तदधिकमपि वा संमतः स्याद्यथेष्टम्॥ ५७॥

तर्हि न्यायानुसारे पञ्चावयवमनुमानमेव सर्वत्र प्रयुज्यताम्। त्र्यवयवमपि क्वापिक्वापि प्रयुज्यते भवत्कैरेव विद्वद्भिः कथमित्याशङ्क्यानुमानावयवपरिमाणं नि[ग]यमयितुं परार्थानुमानस्वरूपमाह—**अन्यस्मा** इति॥ अयमर्थः—यावदपेक्षितं तावद्वक्तव्यम्; यद् बौद्धपरिकल्पितमुदाहरणोपनयमात्रम्, तत्पक्षे साध्यव्यवस्थापनाभावादनादरणीयमेवेत्याह—**तत्रे**ति। कियत्तर्हि वक्तव्यमित्यत्राह—**युक्ते**ति। *त्रीनुदाहरणान्तान्वा यद्वोदहरणादिकानित्युक्तक्रमेण त्र्यवयवमेव प्रायेण परिपूर्णमिति भावः। ये तु प्रतिज्ञामन्तरेण न हेतुप्रयोगः कर्तव्यः, साध्यस्यैव प्रमित्सितत्वात्। नापि हेतुप्रयोगमन्तरेण उदाहरणप्रसङ्गः; हेतुसाध्ययोर्व्याप्तिप्रदर्शनात्मकत्वादुदाहरणस्य। न चोदाहरणमन्तरेणोपनयप्रसिद्धिः; उदाहरणेन गृहीताविनाभावस्य हेतोस्तेनैवाकारेण पक्षधर्मताप्रदर्शनार्थत्वादुपनयस्य। न च हेतुना पौनरुक्त्यमुपनयस्य; पक्षधर्मतामात्रं हेतोरर्थः, व्याप्तस्य पक्षधर्मत्वमुपनयस्यार्थ इति विभागेनार्थनिर्णयात्। न च निगमनं निरथकम्; पक्षे बाधकप्रमाणाभावद्योतनार्थमग्निमानेवेति सावधारणसाध्यनिर्देशरूपत्वेन निगमनस्यापि सफलत्वात्। अतः पञ्चावयवयुक्तं वाक्यमेव परिपूर्णोपदेश इति मन्यन्ते; तेषामपि पक्षमविरुद्धत्वादनुमन्यते—**तदधिक**मिति। अयमर्थः—त्र्यवयवपञ्चावयवयोर्द्वयोरपि संमतत्वादसत्पक्षवादिना त्र्यवयवप्रयोगे पञ्चावयवप्रयोगे न न्यूनाधिकभावप्रसङ्ग इति॥ ५७॥ **इति अनुमानप्रयोगावयवनिरूपणम्॥**

283. **कार्यैर्वा कारणैर्वा स्वगुणत उत वा किञ्चिदस्तीति सिद्धं**
पक्षीकारादियोग्यं समयनियमितव्यक्तिभेदो न दोषः।
सिद्धान्तास्पृष्टचित्तैरिति खलु पशुभिः पामरैर्वाऽनुमेयं
नो चेद्रोचेत कस्मै विषमितमनसे वादसंग्रामकेलिः॥ ५८॥

नन्वनुमानप्रयोग एव कर्तुं न शक्यते; परस्परविरुद्धाङ्गीकारप्रचुरत्वाद्वादिनोः। तथा हि—शब्दो द्रव्यं नित्यमिति **कौमारिलाः**, गुणोऽनित्य इत्यन्ये, शब्दब्रह्मविवर्तो वृक्षादिशब्द इति **शाब्दिकाः**, पञ्चभूतगुण इति **पौराणिकादयः**, आकाशगुण **इत्यौलूक्याः**, **आक्षपादाश्चैव**। तथा च शब्दानित्यत्वाद्यनुमानं न संघटते; एकेन परिगृहीतस्य पक्षस्य इतरेणाग्रहणात्। तथा च परस्परविसंवादादन्यतरासिद्धिः। एवं चानुमानवार्तैव सोषुप्यत इतीमामाशङ्कां परिहरति—**कार्यैरिति**॥ अयमभिसन्धिः—पक्षस्य सामान्येन प्रसिद्धत्वमुपजीव्यं वादिप्रतिवादिनोः; न पुनरन्योन्यं विशेषप्रसिद्ध्यभावेन सामान्यप्रसिद्धस्य पक्षस्य पक्षत्वहानिः। पक्षप्रसिद्धिश्च प्रत्यक्षेण चेत्; अविवादमेव। अनुमानेन चेत् कार्येण वा कारणेन वा तद्व्यतिरिक्तेनापि व्याप्तिवैकल्यरहितेन स्वगुणेन वा किंचिदस्तीति प्रसिद्धं पक्षीकारार्हम्। एवं सपक्षो विपक्षश्च प्रमाणप्रसिद्धत्वेन तत्तत्कोटिनिवेशार्ह इत्यादिशब्देनोच्यते **पक्षीकारादियोग्यमिति**। एतच्च हेत्वादिष्वपि समानम्। ततस्तत्तत्सिद्धान्तप्रसिद्धव्यक्तिभेदो न दोष इत्याह—**समयेति**। एतच्च न केवलं वादिनामेव, शास्त्रपरिज्ञानशून्यानामपि पश्वादीनां साधारणमित्याह—**सिद्धान्तेति**। इत्थमनङ्गीकारे वादिनां प्रवृत्तिरेव न स्यादित्याह—**नो चेदिति**। वादिनां वादप्रवृत्तिर्यथा न घटते तथा पामराणां प्रतिनियतप्रवृत्तिरपि न भवेदिति भावः। सर्वस्या अपि प्रवृत्तेरनुमानमूलत्वादनुमानस्य चोक्तप्रकारेणावान्तरविभागानादरेण वस्तुस्वरूपप्रामाणिकत्वमात्रावलम्बित्वादिति॥ ५८॥ **इति प्रतिज्ञादेर्लोकसिद्धानुसारित्वम्**॥

284. § **आभासोद्धारवाक्ये स्वयमिह पठितेऽप्यक्षतान्यस्य शङ्का**
स्याचेद्व्यर्थोपनीतिर्निगमनमपि ते तत्तदर्थे यदात्थ।
तस्मादुद्घाटितानां परिहृतिरुचिता जेतुमिच्छोर्विशेषा-
दुक्ते माने विमर्शो यदि भवति परं तत्र तर्कोऽपि वाच्यः॥ ५९॥

---

§ **नृसिंहराजीयम्**। मूले अवयवनिरूपणानन्तरं कण्टकोद्धारविषयकश्लोको दृश्यते। सर्वार्थसिद्धौ न दृश्यते तस्य टीका। पतिता वा, यद्वा मूले श्लोकः प्रक्षिप्त इति न जानीमः। अस्यार्थस्तु—पर्वतो वह्निमान्, धूमवत्त्वात्, यो धूमवान् सोऽग्निमान् यथा महानसः, तथा चायं तस्मात्तथा—इति पञ्चावयवप्रयोगानन्तरं नायमत्राभासः तल्लक्षणरहितत्वात् इति कण्टकोद्धारवाक्य**माक्षपादाः** प्रयुञ्जते। तत्र किमिदं वाक्यं प्रयोजनरहितम्? प्रयोजनवद्वा? नाद्यः, प्रयोजनरहितस्य प्रयोगायोगात्। न द्वितीयः, तत्रापि किमाभासशङ्कानिरासः प्रयोजनम्? उत तदन्यत्? न द्वितीयः, तथाभूतस्यादर्शनात्। नाद्य इत्याह—**आभासोद्धार** इति। शतवारं तत्प्रयोगेऽपि वादिवाक्यस्य तन्निरासकत्वायोगादित्यर्थः। यदि वाक्यादेव शङ्कानिवृत्तिः, तदा प्रतिज्ञाद्यवयवत्रयादेवेष्टसिद्धेरसिद्धिबाधादिनिरासकयोरुपनयनिगमनयोः प्रयोगो भवद्भिः क्रियमाणो व्यर्थः स्यात्। अपिशब्देन प्रतिज्ञावाक्यादेव साध्यसिद्धेर्हेत्वादिवैयर्थ्यं सूच्यते। किंच किमिदं वाक्यं प्रतिवादिशङ्कायाः प्राक् प्रयोज्यम्? उतानन्तरम्? नाद्य इत्याह—**तस्मादिति**। उद्घाटिता शङ्का परिहर्तुमुचिता, नानुद्घाटिता, अनाकाङ्क्षितत्वात्; अन्यथा अनाकाङ्क्षिताभिधानदोषस्य जल्पकथायामप्रसङ्गादिति भावः। द्वितीय आह—**विशेषादिति**। उक्तहेतौ विशेषरूपेण शङ्कायां तर्काप्रयोगे निवृत्त्यसंभवात् तर्कोऽपि प्रयोक्तव्य इत्यावश्यकतर्कादेव तन्निवृत्तेरुक्तवाक्यं व्यर्थमिति भावः। यद्वा विशेषादित्येतत् परिहृतिरुचितेत्यत्र संबध्यते; विशेषं प्राप्येति ल्यब्लोपे पञ्चमी; तथा च विशेषेणोचितेत्यर्थः। अनाकाङ्क्षिताभिधानदोषस्य विजिगीषोरवश्यं परिहरणीयत्वादिति भावः॥ ५९॥
इति आभासोद्धारादेः प्रयोजनाभावः॥

285. तर्को व्याप्त्याभ्युपेतावनभिमतिपदव्यापकस्य प्रसक्ति-
मानप्रत्यूहघाती द्विविषय उदितः पञ्चधाऽऽत्माश्रयादिः ।
विश्रान्तिर्वैपरीत्ये प्रतिहतिविरहोऽनिष्टतोऽनानुकूल्यं
व्याप्तिश्चास्याङ्गमेनं कतिचिदनुमितेस्तादृशं भेदमाहुः ॥ ६० ॥

एवमनुमानमुक्त्वा तदङ्गभूततर्कतत्कर्तव्यतदवान्तरभेदतदङ्गान्याह—**तर्क** इति ॥ अयमत्र श्लोकार्थः—व्याप्त्या-ङ्गीकारेऽनिष्टव्यापकप्रसञ्जनं तर्क इति तर्कलक्षणम् । तत्फलमाह—**मानप्रत्यूहघाती**ति । विपक्षजिज्ञासाविच्छेदक इत्यर्थः । **द्विविषय उदित** इति तर्कावान्तरभेदकथनम्; प्रामाणिकपरित्यागाप्रामाणिकस्वीकाररूपविषयद्वयोपेत इत्यर्थः । स चात्माश्रयान्योन्याश्रयचक्रकानवस्थाकेवलानिष्टप्रसङ्गभेदेन पञ्चविधः । प्रतिबन्दीति तर्कान्तरमाचक्षते केचित्; तच्च केवलानिष्टप्रसङ्गावान्तरभेद इत्यपरे इत्याह—**पञ्चधे**ति । वैपरीत्ये विश्रान्तिः—विपर्यये पर्यवसानम् । प्रतिहतिविरहः—प्रति-तर्कपराहत्यभावः । अनिष्टता—प्रसञ्जनीयस्यानिष्टत्वम् । अनानुकूल्यम्—विरुद्धहेत्वाभासवत् परपक्षसाधकत्वाभावः । स्व-पक्षपरपक्षयोर्द्वयोरपि साधारणमिष्टं परस्य, परपक्षस्यैवासाधारणं परस्यानुकूलं, तदुभयरूपविधुरमित्यर्थः । यथाऽनैकान्तिकः स्वपरपक्षसाधारणः, यथा च विरुद्धः परपक्षस्यैवासाधारणः, तदुभयरूपरहितस्तर्क इत्यर्थः । व्याप्तिः पूर्वोक्ता । एतत्परमङ्गं तर्कस्य । इमं च तर्कं केचिदनुमानभेदमाहुरित्याह—**एनमि**ति । नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्त्वप्रसङ्गा-दित्यनुमानभेदमाचक्षते केचिन्न्यायवादिन इति भावः ॥ ६० ॥ **इति तर्कलक्षणफलावान्तरभेदाङ्गादि ॥**

**286. यस्सर्वं नाभ्युपेयात् स्वपरमतविदा केन किं तस्य साध्यं
प्रश्नोऽसावुत्तरं नः कथमनधिकृते कल्पनीयाः कथाः स्युः ।
मध्यस्थोऽप्येतदेवं यदि न न मनुते योजयेन्नात्र वादं
नो चेन्माध्यस्थ्यहानिः परमनधिकृतिस्त[त्र]स्य शिष्याय वाच्या ॥ ६१ ॥**

इत्थं तर्कस्वरूपमुक्त्वा दुस्तर्कावलम्बनेन सर्वापलापवादिनः कथानधिकारादिकमाह—**यस्सर्व**मिति ॥ अत्र कश्चित् पृच्छति—यस्सर्वमपि दूषणभूषणवादिप्रतिवादिस्वपक्षपरपक्षादिविभागं नाङ्गीकरोति स्वपरमतविदा विदुषा केन किं तस्य साध्यमिति । नायं तावत्प्रतिक्षेपः; हेत्वाद्यनुपादानात् । उपादाने वा यस्सर्वं नाभ्युपैतीति वचनस्य नायं विषयः; हेत्वादेरेवाभ्युपगमात् । अतश्शिष्यप्रश्नोऽयमित्यवशिष्यते । तदिदमाह—**प्रश्नोऽसा**विति । तत्रोत्तरमाह—**उत्तरं न** इति। कथमुत्तरमित्यत्राह—**कथमनधिकृत** इति । नहि बालमूकोद्भ्रान्तादिभिर्वादं कुर्वते वादिनः । न च तदकरणात् सर्व-वादिनां विदुषामतिशयस्य काचिद्धानिः । एवमनधिकृतैस्सर्वानङ्गीकारवादिभिरव्यवहारे न कश्चिद्विपश्चितां दोष इति भावः । यदि भवतैवमुच्यते तत्ते न गौरवाय, मध्यस्थवचनमेव सर्वनियामकमिति वदतामुत्तरमाह—**मध्यस्थ** इति । मध्यस्थोऽप्युद्भ्रान्तवदयथायथवादिनां वादाधिकारो नास्तीति यदि न न मनुते—मनुत इत्यर्थः । द्वौ नञौ प्रकृतमर्थं सूचयत इति । यद्येवं जानाति मध्यस्थः वादमेव तेन न प्रवर्तयेत्; न ह्युद्भ्रान्तादिभिर्वादं मध्यस्थाः प्रवर्तयन्ति । यदि पक्षपातात् प्रवर्तयति तर्हि मध्यस्थ एव न स्यादित्याह—**नो चेदि**ति । ननु सर्वानङ्गीकारवादिनो वादानधिकार इति यदि तं प्रति वदसि, तस्य वादाधिकारं स्वयमेवानुमन्यसे; तस्मिन्नेव वादेऽधिकारात् । यद्यन्यं प्रति अन्यस्य प्रति-वादित्वाभावात् कथं व्याघातादिदोषोऽभिधीयेत? न हि दोषाभिधानमन्तरेण वादाधिकारनिराकरणं वक्तुं शक्यते ।

अत्रोत्तरं—**पर**मिति । उद्भ्रान्तवत् सर्वानिर्वचनीयत्ववादिनो दुर्वादिनो वादानधिकारिण इति शिष्यादीनामुपदिश्यते ॥ ६१ ॥ **इति कथानधिकारादिः ॥**

287. **निर्दिष्टा व्युत्थितोक्तेर्विततिरिह कथा सा त्रिधा तत्र वादः**
कर्तव्यो मानतर्कैरभिमतिनियतैस्तत्त्वसिद्ध्यै विरागैः ।
जल्पाख्याऽन्या जयार्था भवति कथकयोस्साधनाक्षेपवत्त्वे
सैव प्रोक्ता वितण्डा त्यजति परमते साधनं तां द्विधैके ॥ ६२ ॥

अथ वादिप्रतिवादिनोर्विवादस्थानभूतां कथां तद्विशेषानप्याह—**निर्दिष्टे**ति । परस्परविरुद्धवादिनोर्व्यवहारः कथा । सा त्रिधा, वादजल्पवितण्डाभेदात् । वादे प्रमाणतर्कौ साधनम् । प्रामाणिकत्वाभिमानपरिगृहीतौ प्रमाणतर्कावित्यर्थः । प्रयोजनं पुनस्तत्त्वसिद्धिः, तत्त्वज्ञानम् । अधिकारी वीतरागः । वादाज्जल्पस्य विशेषमाह—**जल्पे**ति । जयार्थी जल्पाधिकारी ; अत एव न वीतरागः । उभयोरपि वादिनोस्साधनवत्त्वे जल्पः ; अन्यतरस्य स्वपक्षसाधनवत्त्वे परस्य दूषणमात्रशरणत्वे वितण्डा । तत्रापि वैतण्डिकस्य दूषणसमर्थनं कर्तव्यम् । अन्यथा वैतण्डिकव्यवहारः प्रलापमात्रमेव स्यात् । एतमेव विभागमाह—**सैवे**ति । जल्परूपा कथैव वितण्डा ; अपि तु परमते साधनं त्यजतीत्यर्थः । **तां द्विधैक** इति । वितण्डायमपि द्वैविध्यमाहुरेके—वीतरागवितण्डा विजिगीषुवितण्डेति । अयं भावः—स्वपक्षसाधनं परपक्षदूषणं साधनदूषणसमर्थनं शब्ददोषवर्जनमिति पञ्चाङ्गो वादः । एकस्मिन् वादे वादिप्रतिवादिनावधिकारिणौ । तत्र वीतरागकर्तृकवादद्वयसमुच्चयेन वीतरागकथारूपो वादः प्रवर्तते । एवं विजिगीषुकर्तृकवादद्वयसमुच्चयेन विजिगीषुकथारूपो जल्पः । जल्पार्धेनैकेनैव वादेन यथा विजिगीषुवितण्डा ; तथा वादार्धेनैकेनैव वादेन वीतरागवितण्डेति । अत्र वितण्डाशब्दोऽन्यतरसाधनवत्त्वसाधर्म्यादिति मन्तव्यम् । दृश्यते चेयं वीतरागवितण्डा । आदौ तावदाचार्यो वदति, शिष्यस्सोपपत्तिकमेवानुयुङ्क्ते, आचार्योऽपि सोपपत्तिकमेव परिहरन् शिष्यचोद्यं विनिवर्तयति ॥ ६२ ॥ **इति कथातदवान्तरविशेषादि ॥**

288. **कर्तव्यत्वेन यत्तु प्रमितिपरवशैः कल्पितं स्वेच्छया वा**
यच्चाकर्तव्यमेवं परिभवनपदं तत्प्रहाणग्रहौ स्तः ।
स्वाचारद्यूतसंयत्प्रभृतिषु च तथा स्वीकृतेयं व्यवस्था
नैनामीषद्वितण्डाऽप्यलमतिपतितुं साधनांशोज्झिताऽपि ॥ ६३ ॥

वितण्डायामपि वादिप्रतिवादिव्यवस्थानुपालनं कर्तव्यमित्याह—**कर्तव्यत्वेने**ति ॥ कर्तव्यत्वेन प्रमितिपरवशैः कल्पितं स्वपक्षसाधनादि । अकर्तव्यत्वेन कल्पितं छलजातिनिग्रहस्थानादि । स्वेच्छया कल्पितं निरोष्ठ्यव्यवहारः, अदन्त्यव्यवहारः, उक्तशब्दस्य पुनरनभिधानं, लुङ्प्रयोगः, चङ्प्रयोगः, यङ्प्रयोगः, यक्प्रयोगः इत्यादिकं शब्दविषयम् । अनुमानेनैव साधनमागमेनैव साधनं वक्रानुमानेनैव साधनं वैदिकागमेनैव साधनमित्यादिकं प्रमाणविषयम् । एवमन्यदपि वादिप्रतिवादिप्रौढिप्रकाशनार्थं कल्पनं द्रष्टव्यम् । एतत्परित्यागे निग्रह इत्याह—**परिभवनपद**मिति । नियमातिलङ्घने परिभवनं स्वकुलाचारद्यूतादिष्वपि दृष्टमित्याह—**स्वाचारे**ति । सर्वा चेयं व्यवस्था वादजल्पयोरेव ; वैतण्डिकस्य न काचि-

व्यवस्थेत्याशङ्क्य परिहरति—**नैनामिति** । **साधनांशोज्झिताऽपीति** । वितण्डायां स्वपक्षसाधनाभावेऽपि दूषणसमर्थन-सद्भावात् सर्वाऽपि व्यवस्था वैतण्डिकेनाप्यङ्गीकार्येत्यर्थः ॥ ६३ ॥ **इति वितण्डायामपि व्यवस्थानुपालनम्** ॥

289. सदोषोक्त्या कथायां परपरिभवनं स्वोक्तहान्यादिनाम्ना
तत्त्वाबोधस्य लिङ्गं विविधमकथयन्निग्रहस्थानमाप्ताः ।
तत्राचोद्यानुयोगं द्विविधमशकनासिद्धिभेदादवोचन्
पूर्वो जातिः परस्तु च्छलमनृतवचः स्यादकालग्रहश्च ॥ ६४ ॥

इत्थं वैतण्डिकस्यापि दोषादोषव्यवस्थानुपालनमुक्त्वा निग्रहस्थानलक्षणतद्विभागादिकं दर्शयति—**सदोषेति** ॥ वादिप्रतिवादिभ्यां दोषत्वेनाङ्गीकृतानामभिधानेन कथायां परेषां परिभवनं—निग्रहो भवति; प्रतिज्ञाहान्यादिनाम्ना वक्तव्य-मित्याह—**स्वोक्तेति** । निग्रहस्थानलक्षणमाह—**तत्त्वेति** । अप्रतिपत्तिर्विप्रतिपत्तिश्च निग्रहस्थानमिति निग्रहस्थानलक्षण-सूत्रम् । तस्याभिप्रायस्तत्त्वाप्रतिपत्तिसूचकं निग्रहस्थानमिति, अप्रतिपत्तिविप्रतिपत्त्योर्द्वयोरपि तत्त्वाप्रतिपत्तिसूचकत्वादिति । वादेऽपि कथावसानहेतुत्वेनात्यन्तानुपादेयस्य निरनुयोज्यानुयोगस्य विभागान् दर्शयति—**तत्रेति** । जातिः, छलं, प्रतिज्ञा-हान्याद्याभासः, अप्राप्तकाले ग्रहणमिति चतुर्विधो निरनुयोज्यानुयोगः । स च जातिरजातिरिति द्विविधः । अजातिरपि छलमछलमिति । अछलमपि हान्याद्याभासस्तदन्यच्चेति । तत्र छलजात्योर्वैषम्यमाह—**अचोद्यानुयोगं द्विविधमशकना-सिद्धिभेदादवोचन्निति** । सिद्धमपि दूषणासमर्थं जातिः; दूषणसमर्थमप्यसिद्धं छलमिति विभागः । तदिदमाह—**पूर्वो जातिः परस्तु च्छलमिति** । अनृतवचः—अविद्यमानस्य वचनं हान्याद्याभासवचनम् । अकालग्रहः—अप्राप्तकाले ग्रहणम् ॥ ६४ ॥ **इति निग्रहस्थानलक्षणविभागादि** ॥

290. जातिः स्वव्याहता वागुपधिनियतिभिर्भिद्यतेऽनेकधा सा
युक्तत्यागस्त्वयुक्तग्रहणमविषये वृत्तिरप्यत्र दोषाः ।
स्वव्याघातोऽनुवृत्तश्छलमपि वचसां कल्पितार्थे निषेध-
स्तत्तद्वृत्तिप्रभेदादिदमपि विविधं विस्तरेणालमत्र ॥ ६५ ॥

अथ छलजात्योर्लक्षणविभागमाह—**जातिरिति** । *स्वव्याघातकमुत्तरं जातिः *दूषणाशक्तमुत्तरं जातिरिति मतभेदेन पूर्वमुक्तम् । सा जातिरवान्तरलक्षणनियतिभिः प्रतिधर्मसमादिभेदेनाऽनेकधा भिद्यत इति दर्शयति—**उपधीति** । जातिषु विशेषदोषान् कथयति—**युक्तेति** । युक्ताङ्गत्यागोऽयुक्ताङ्गस्वीकारोऽविषयवृत्तित्वं चेति हि जातिदोषविशेषाः । सर्व-जात्यनुवृत्तस्तु दोषः स्वव्याघातः । छललक्षणमाह—**छलमपीति** । कल्पितदूष्यदूषणाभिधानं छलमित्यर्थः । इदं च छलं तत्तच्छब्दप्रवृत्तिभेदात् मुख्योपचारतात्पर्यवृत्तिभेदेन त्रिविधम् । अस्यार्थस्यानेकेषु ग्रन्थेषु प्रसिद्धत्वात्किमत्र विस्तरेणेति विस्तरानादरः ॥ ६५ ॥ **इति जात्यादिलक्षणविभागादि** ॥

291. यस्मिन्मानप्रवृत्तिस्तदिदमशरणैरभ्युपेत्यं हि सर्वै-
र्व्याघातो यत्र दृष्टस्तदपि न शरणं साधने दूषणे वा ।
इत्थं सिद्धे कथानां रहसि कथकयोस्सावधानत्वभूम्ने
षट्पक्ष्यन्ता सदुक्तिः परिषदनुमता रुद्धरोधावकाशा ॥ ६६ ॥

उक्तदोषेष्वन्यतमस्यापि संभवे द्वितीयादिकक्ष्यायामेव वादविच्छेदः स्यात्, किमनया षट्पक्षीकल्पनयेत्याशङ्कमानस्याचरं वदति—यस्मिन्निति ॥ अयमर्थः—यत्प्रमाणेन प्रतीयते तत्सर्वैरपि वादिभिरङ्गीकार्यम् । यत्र पुनस्साधने दूषणे वा व्याघातो दृश्यते तदपि न शरणमेव—स्वपक्षसाधने परपक्षदूषणे वाऽनुपाय इत्यर्थः । इत्थं कथानां तिसृणामपि सिद्धे रहस्ये यद्यपि द्वितीयादिकक्ष्यायामेव दूषणं मध्यस्थैरवलोक्यते ; तथाऽपि कथकयोस्सावधानत्वसिद्ध्यर्थं षट्पक्षीपर्यन्ता पुनरसदुक्तिर्मध्यस्थैरनुमता भवति । तत्र हेतुमाह—रुद्धेति । षट्पक्षीपर्यन्तं मध्यस्थानां निवारणावकाशाभावादित्यर्थः । तथा हि—द्विविधा हि कथा ; सत्साधनोपक्रमा तावदेका ; अपरा पुनरसत्साधनोपक्रमा । पर्यनुयोज्योपेक्षणं च मध्यस्थैर्वक्तव्यम् ; उभयोरपि वादिनोर्दुष्टत्वात् । अन्यतरदोषमात्रकथने माध्यस्थ्यमेव हीयेत । तथा च सत्साधनोपक्रमकथायां वादी न दुष्टः । असदुत्तरकथने द्वितीयकक्ष्यायां प्रतिवादी दुष्टः । तत्र वादिना तृतीयकक्ष्यायां दुष्टवचनपरिग्रहे वादिनः पर्यनुयोज्योपेक्षणम् । अयमेव मध्यस्थानां वक्तुमवसरः । अथ मध्यस्थाः प्रतिवादिनो यथावस्थितवचनसंभवमपेक्षन्ते, स पुनरयथैव भाषते ; तत्र चतुर्थकक्ष्याप्रवृत्तिः । ततो वादिनमपेक्षन्ते, सोऽप्ययथैव भाषते ; अत्र पञ्चमकक्ष्या प्रवर्तते । अथ वादिप्रतिवादिनोः स्तम्भे सभापतिप्रश्नमपेक्षन्ते ; स पुनर्न पृच्छति । तस्मिन्नवसरे प्रलाप एव प्रतिपादित इति षष्ठी कक्ष्या । एवं सत्साधनोपक्रमकथायां षट्पक्षी ; असत्साधनोपक्रमकथायां पञ्चैव पक्षाः ; द्वितीयकक्ष्यायामेव पर्यनुयोज्योपेक्षणस्य प्रवृत्तेरिति विभागः । ततः षट्पक्षादिकमनुसृत्य मध्यस्था निवारयन्तीति न्याय्यमेतत् ॥ ६६ ॥ **इति षट्पक्षीसंभवः ॥**

292. **वाक्यार्थो यस्त्वपूर्वो न खलु किमपि तद्व्याप्यमस्मिन् पदादौ**
साङ्गत्यं बोधकत्वादधिकमनुमितौ ग्राह्यमत्रैतदेव ।
वक्तृज्ञानानुमानादिकमपि न भवेदन्ततो व्याप्त्यभावा-
त्तल्लिङ्गाप्रतीतावपि मतिजननाद्वक्त्रभावाच्च वेदे ॥ ६७ ॥

इत्थं प्रमाणाभासप्रवृत्तिरूपां षट्पक्षीमुक्त्वा **सौगत**समयानुवर्तिना येनकेनापि परिकल्पितस्य वाक्याद्वाक्यार्थानुमानस्य **प्राभाकरवैशेषिक**परिकल्पितयोश्च वक्तृज्ञानानुमानयोराभासत्वं वक्तुमारभते—**वाक्यार्थ** इति ॥ कृत्स्नस्यापि वाक्यस्यानुमानरूपतामाहुः सौगता वैशेषिकाश्च । प्राभाकरास्तु लौकिकवाक्यमात्रस्य । कथं तत्रानुमानप्रवृत्तिरिति पृच्छामः । विप्रतिपन्नानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि पदत्वादिति यदि वदसि, तदा न विशेषसिद्धिः । यदि संसर्गविशेषज्ञानपूर्वकाणि संसर्गविशेषवन्तीति वा, तदा संसर्गविशेषो न प्रसिद्धः, कथं व्याप्तिग्रहः ? अनेनैव वाक्येन प्रसिद्धश्चेदन्योन्याश्रयः ; अव्युत्पन्नेषु च पदेषु व्यभिचारः । न ह्यव्युत्पन्नानि पाठमात्रावगतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि । व्युत्पन्नपदत्वादिति चेत् केयं व्युत्पत्तिः ? अभिधानशक्तिग्रहणमिति चेत् ; तर्हि पदसङ्घातेनैव वाक्यार्थसिद्धिः ; किमनयाऽनुमानकुसृष्ट्या ? वाक्याद्वाक्यार्थप्रतिपत्तिरिति हि लौकिका मन्यन्ते । पूर्वमनुमानं पश्चाद्वाक्यार्थप्रतिपत्तिरनुवादरूपतयेति चेन्न ; अदर्शनात् । न हि प्रयुक्ते वाक्ये द्विवारमर्थप्रतिपत्तिर्दृश्यते । अतो वेदवल्लोकेऽपि वाक्यादेवार्थप्रतिपत्तिरिति प्राभाकरस्योत्तरम् । वैशेषिकस्याप्युपलम्भविरोधः । सर्वे हि व्यवहर्तारः शब्दादेव साक्षादर्थप्रतीतिमुपलभन्ते । कल्पनागौरवं चोत्तरम् । शब्दादर्थप्रतीतिरिति कल्पने लाघवम्, वक्तृज्ञानानुमानपृष्ठलग्नवाक्यार्थप्रतीतिकल्पने गौरवम् । संबन्धभेदादपि प्रमाणभेदमाह—**साङ्गत्य**मिति । शब्दे केवलबोधकत्वमात्रं संबन्धः ; अनुमाने

व्याप्तिरिति विभागः । एतदेव बोधकत्वम् । उक्तमर्थं सङ्कलय्य विशदयति—**वक्तृज्ञाने**ति । यदि वा पूर्वं वाक्यादर्थानुमानं परास्तम्, अत्र वक्तृज्ञानानुमानपूर्वकमर्थसिद्धिर्निरस्यत इति न पौनरुक्त्यशङ्का । बुद्धप्राभाकरवैशेषिकाणां निराकरणं न्यायतौल्यात् साधारण्येनास्माभिर्व्याख्यातं पूर्वमिति न दोषः । तत्र हेतुमाह—**व्याप्त्यभावा**दिति । हेत्वन्तरमप्याह—**तत्त्व**दिति । तत्तद्वाद्युक्तलिङ्गाप्रतीतावपि वाक्यार्थप्रतीतिप्रसिद्धिप्राचुर्यादिति । वैशेषिकस्य विशेषदूषणं प्रदर्शयति—**वक्त्रभावाच्च वेद** इति । ईश्वरानुमानं निरस्तमिति भावः ॥ ६७ ॥ **इति आगमस्यानुमानाद्बहिर्भावः ॥**

293. **प्रत्येकं स्वानुभूतात्तदुभयमधिकं संस्कृतिद्वन्द्वयोगात्**
स्मृत्यारूढं विजानन्त्यनुमितिवचसोर्वेद्यमप्येवमस्तु ।
पारोक्ष्यं तत्स्मृतित्वादनधिकमिति न प्रागनिर्धारितांश-
ज्ञानस्य स्पष्टदृष्टेः परिहितहरितस्त्वेतदस्पष्टमाहुः ॥ ६८ ॥

अत्र कश्चिदाह—आगमजन्यमनुमानजन्यं वा परोक्षज्ञानमिति किंचिन्नास्ति ; किंतु नानासंस्कारजन्यस्मृतिसमुच्चयमात्रमेव । यथा प्रत्येकमनुभूतानां वृक्षादीनां समुच्चयेन सेनावनादिस्मरणं स्मरणमेव, एवं प्रत्येकानुभूतपदार्थस्मरणमेवागमजन्यं ज्ञानं; तथाऽनुमानजन्यमपीति, न स्मरणादतिरिच्यते परोक्षम् । तदिदमाशङ्कते—**प्रत्येक**मित्यारभ्य **अनधिक**मित्यन्तेन ॥ परिहरति—**ने**ति । तत्र हेतुमाह—**प्रागनिर्धारिते**ति । अयमत्र भावः—वाक्यार्थे तावत्प्रागविदितस्संसर्गविशेषस्सिध्यति ; अतो न स्मृतित्वम् । एवमनुमानेऽपि पक्षनिष्ठं साध्यं सिध्यति । अतोऽपूर्वार्थप्रतीत्या न स्मृतित्वसिद्धिरिति । अयमत्र निर्णयः—संस्कारे सत्यप्यपूर्वार्थप्रतिपत्तौ न स्मृतित्वम् ; अन्यदा पुनः स्मृतित्वमिति । अनुभव एव परोक्षापरोक्षविभागं बाह्या अप्याहुरित्याह—**परिहिते**ति । **क्षपणकाः** खलु प्रत्यक्षपरोक्षविभागं स्पष्टमस्पष्टमिति विभज्य व्याचक्षते ॥ ६८ ॥ **इति परोक्षानुभवासिद्धिपरिहारः ॥**

294. **प्रत्यक्षादीव मानं विमतिपदवचो हेतुदोषाद्यभावा-**
द्वाक्यत्वादप्रमाणं विमतमिति यदि स्वोक्तिबाधादयः स्युः ।
अव्युत्पन्नस्य बोधं न जनयति वचस्संगतिज्ञानहाने-
र्लिङ्गं व्याप्तिप्रतीतेः पुरत इव न चावद्यमेतावताऽस्य ॥ ६९ ॥

सर्वं वाक्यमप्रमाणमिति वादिनं प्रतिक्षिपति—**प्रत्यक्षादी**ति ॥ विप्रतिपन्नं वाक्यं प्रमाणम् कारणदोषबाधकप्रत्यया[द्य]भावादिति हेतुः, दृष्टान्तः प्रत्यक्षमनुमानं वा । अत्र प्रत्यनुमानमाशङ्क्य परिहरति—**वाक्यत्वा**दिति । **स्वोक्ति**बाधः—स्वाभ्युपगमबाधः, स्वप्रवृत्तिबाध इत्यादिकमूह्यम् । सर्ववाक्याप्रामाण्ये स्वाचार्यवचनस्यापि सर्वशब्दार्थत्वेन स्वमतपरमतविभागो न स्यादित्यर्थः । यदि शब्दः प्रमाणम्, अव्युत्पन्नस्याप्यर्थं बोधयेत् प्रदीपवत् ; न हि दीपो व्युत्पन्नाव्युत्पन्नविभागेनार्थमवबोधयतीत्याशङ्क्य परिहरति—**अव्युत्पन्नस्ये**ति । **सङ्गतिज्ञानहाने**रिति । वाच्यवाचकभावसंबन्धप्रतिपत्तिरागमस्यैवार्थावबोधनाङ्गम्, न तु प्रत्यक्षस्य; अतः सहकार्यभावादव्युत्पन्नस्य शब्दोऽर्थं नावबोधयतीति न दोषः । तत्र दृष्टान्तमाह—**लिङ्ग**मिति । यथा व्याप्तिप्रतीतिशून्यस्य लिङ्गं साध्यप्रतीतिं न जनयति, नैतावता लिङ्गस्य दोषः ; एवमागमस्येति ॥ ६९ ॥ **इति निर्दोषवाक्यप्रामाण्यम् ॥**

295. **वक्त्री व्युत्पत्तितः प्राग्यदि निजविषयं वाग्विभक्त्यन्वयाद्यैः**
किं व्युत्पत्त्या तिरश्चामपि न कथमितो बालकानां च बोधः ।
स्वा[र्थे]र्थश्शब्दस्तथा चेत्तदपि न विषयैस्तस्य साम्यात्तदन्यै-
रव्युत्पन्नत्वतो वा स्वमपि न गमयेदेष तद्वत्स्ववाच्यम् ॥ ७० ॥

अत्र शब्दस्य बोधकत्वशक्तिसमर्थनेन संतुष्टः कश्चिदाह—अव्युत्पन्नोऽपि शब्दोऽर्थप्रत्यायक इति, तं प्रति-ब्रूते—**वक्त्रीति** ॥ अत्र वक्रीति किं शक्तिमात्रमभिधीयते, किं वा वचनक्रियासंबन्धः ? पूर्वस्मिन् पक्षे नास्माकमपि विप्रतिपत्तिः, शब्दशक्तेर्नित्यत्वात् । उत्तरं पक्षमनुवदति—**वक्त्री व्युत्पत्तितः प्रा**गिति । विभक्त्यन्वयाद्यैरिति वचन-हेतुः । प्रकृतिप्रत्ययादिभेदेन व्युत्पन्नो हि शब्दोऽर्थं प्रत्याययतीति भावः । अनूदितमर्थं प्रतिक्षिपति—**किं व्युत्पत्त्ये**ति । स्वयमेव शब्दोऽर्थं प्रत्याययति चेत्, व्युत्पत्तिर्निरर्थिकैव स्यात् । अव्युत्पन्नाच्छब्दात्तिरश्चां बालमूकानां च बोधः कथं न स्यात् ? नन्वव्युत्पन्नानामपि शब्दः स्वरूपं प्रतिपादयति ; अतः शब्दस्याव्युत्पन्नस्यापि बोधकत्वं स्वस्वरूपे दृष्टमिति, तदिदमाह—**स्वार्थ** इति । दूषयति—**तदपि ने**ति । तत्र हेतुमाह—**विषयै**रिति । अयं भावः—यथा विषयेषु व्युत्पन्नः शब्दोऽर्थमवगमयति, एवं स्वबोधकत्वेनापि व्युत्पन्नश्शब्दः स्वात्मानमवगमयति । अन्यथा स्वात्मनि व्युत्प-त्त्यभावात् स्वात्मानमपि नावबोधयेत् । उक्तमर्थमनुमानेनाप्युपपादयति—**अव्युत्पन्नत्वत** इति । स्वात्मन्यव्युत्पन्नश्शब्दः स्वात्मानं नावगमयेत्, यथा स्वविषये अव्युत्पन्नश्शब्दः स्वविषयं नावगमयति । अयमत्र भावः—शब्दस्य द्वयी शक्तिः; अर्थप्रकाशकत्वं स्वस्वरूपप्रकाशकत्वं चेति । अर्थप्रकाशनशक्तिः स्वयमगृहीता नार्थप्रकाशनाङ्गं भवति । एवं शब्द-प्रकाशनशक्तिः स्वयमगृहीता चेत्, न स्वप्रकाशनाङ्गं भवति । तस्माच्छब्दः स्वार्थवत् स्वस्मिन्नपि व्युत्पन्नः स्वप्रतीतिं जनयतीति । अतश्शक्तस्यापि शब्दस्य तत्तदर्थप्रकाशनशक्तिप्रतिसन्धानमन्तरेण नार्थप्रतिपत्तिजनकत्वमिति ॥ ७० ॥ **इति अव्युत्पन्नशब्दबोधकत्ववादभङ्गः ॥**

296. **शब्दस्संकेतितोऽर्थं गमयति विमतोऽपीति शास्त्रप्रतीपं**
तत्कर्ताऽद्य ह्यसिद्धस्स च दुरधिगमस्सृष्टिकालेऽनुमानैः ।
श्रुत्या चेत्प्रत्युतैतद्विभुरपि तनुते वेदतो नामरूपे
व्याकृत्यादेर्विरुद्धौ क्रमजनिविलयौ क्षुद्रभाषासु नैवम् ॥ ७१ ॥

सर्वस्यापि शब्दस्य संकेतपूर्वकत्वं कश्चिदाह विप्रतिपन्नश्शब्दः सांकेतिकः शब्दत्वात् भाषाशब्दवदिति । तदेतदनुवदति—**शब्द** इति ॥ परिहरति—**शास्त्रप्रतीप**मिति । * वाचा विरूपनित्ययेत्यादिश्रुतिविरुद्धत्वात् कालात्ययाप-दिष्टमित्यर्थः । संकेतकर्ता किमाधुनिकः ? किं विश्वजगत्सृष्टिकालस्थः ? आधुनिकश्चेन्न दृष्टः ; ईश्वरश्चेदीश्वरानुमान-निरासेन प्रागेव निरस्त इत्याह—**तत्कर्ते**ति । श्रुतिप्रसिद्धस्संकेतकर्तेति चेत्, तद्विरुद्धमेव भवतः ; * धाता यथापूर्व-मकल्पयत् * नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥ इति नामरूप-व्याकरणस्य वेदपूर्वकत्वश्रवणात् । कथं तर्हि काठकादिसमाख्या ? कथं व्याहृत्यादेः क्रमादुपदेशः ? कथं वा ऋग्वेदादेरनुक्रमादुपदेशः पुराणेषु व्यवह्रियते ? सर्वं चैतदभिव्यक्तिविशेषादित्याह—**व्याकृत्यादे**रिति । प्रवर्तनविशे-

पादेरित्यर्थः । उत्पत्तिविलयौ * नामरूपे व्याकरोदिति श्रुतिविरुद्धौ । तर्हि भाषान्तरेऽप्यसांकेतिकत्वं स्यादित्याशङ्क्य परिहरति—**क्षुद्रेति** ॥ ७१ ॥ **इति सर्वशब्दसांकेतिकत्वभङ्गः** ॥

297. **व्युत्पत्तिः कार्य एव प्रथमसमुदिता वृद्धवाक्यात्प्रवृत्तौ**
तत्सर्वास्तत्पराः स्युर्गिर इति यदि न क्वापि सिद्धेऽपि सिद्धेः ।
स्याद्वा कार्यैकलक्ष्या प्रथममिह कुतश्शब्दशक्तिं नियच्छे-
त्तात्पर्यं चान्यथाऽपि ह्यनितरशरणैर्लोकवेदप्रयोगैः ॥ ७२ ॥

एवं व्युत्पत्तिं प्रसाध्य सिद्धे व्युत्पत्तिं साधयितुमारभते । तत्र **प्राभाकर**मतमनुवदति—**व्युत्पत्ति**रिति ॥ पूर्वं सर्वशब्दानां सांकेतिकत्वं निरस्तम् । अत्र सर्वशब्दानां कार्ये व्युत्पत्तिं वदन् **प्राभाकरो** निरस्यते । स ह्येवं मनुते—व्युत्पत्त्यायत्तं शब्दस्य प्रामाण्यम् ; आद्या व्युत्पत्तिः कार्य एव । वृद्धव्यवहारो हि व्युत्पत्तिबीजम् ; प्रयोजकवृद्धो हि गामानयेति वाक्यं प्रयुङ्क्ते ; प्रयोज्यश्चानयति ; व्युत्पित्सुरन्योऽनेन वाक्येनानुमानसध्रीचा व्युत्पाद्यते । इत्थं ह्यनुमिनोति व्युत्पित्सुः—विप्रतिपन्ना प्रयोज्यप्रवृत्तिः कार्यताबुद्धिपूर्विका चेतनप्रवृत्तित्वात् अस्मत्प्रवृत्तिवत् । विप्रतिपन्ना कार्यताबुद्धिः प्रयोजकवाक्यजन्या तदन्वयव्यतिरेकानुविधायित्वात् । यद्यदन्वयव्यतिरेकानुविधायि तत्तज्जन्यं यथा संप्रतिपन्नमिति । एवं सामान्यतः कार्यपरत्वे प्रयोजकवाक्यस्य निश्चिते, गामानय गां बधान अश्वमानय अश्वं बधानेत्यादिषु वाक्येषु आवापोद्वापवशाद्विशेषव्युत्पत्तिरपि जायते । अतः कार्य एव शब्दानां व्युत्पत्तिः । तस्मान्न सिद्धरूपे ब्रह्मणि वेदान्तवाक्यानां प्रामाण्यमिति । एतदनुभाषते—**व्युत्पत्ति**रिति । परिहरति—**नेति** । तत्र हेतुमाह—**क्वापी**ति । सिद्धे व्युत्पत्तिप्रकार उपरितनग्रन्थे विस्तरेण प्रतिपादयिष्यते । तत्तावत्तिष्ठतु ; अन्वारुह्यापि वदामः । कार्य एव व्युत्पत्तिरस्तु ; तथापि सिद्धेऽपि तात्पर्यं स्यादित्याह—**स्यादिति** । अयं भावः—चत्वारो ह्यर्थाश्शब्दस्य मुख्यगौणलाक्षणिकतात्पर्यवृत्तिभेदेन । तत्र मुख्यवृत्तेरेकत्रावस्थानेऽपि तात्पर्यवृत्तिरन्यत्रापि संक्रमते । अन्यथा कथमृत्विक्पत्नीयजमानादिभेदेन कर्तृविभागः ? स्फ्यकपालपुरोडाशादिभेदेन करणविभागः ? स्वर्गस्वाराज्यपशुपुत्रादिभेदेन फलविभागः ? अतः कार्यशेषतया सिद्धस्यापि कार्यवाक्येषु तात्पर्यभूमित्वात् व्युत्पत्तेः कार्यपरत्वनिर्बन्धो निर्निबन्धनः ॥७२॥ **इति सर्वशब्दानां कार्यपरत्वभङ्गः** ॥

298. **कोऽसौ पाञ्चाल इत्याद्यनुभवतु वचस्सिद्धतात्पर्ययोगं**
शास्त्रं कार्यैकशेषं गमयति निखिलं सिद्धमित्यर्धरम्यम् ।
यत्र ज्ञानं पुमर्थस्तदवधिवचनं तत्र बाधोऽपि नास्मि-
न्नातो नाट्यादिनीतिर्निधिवचननयादन्यथा स्याद्विरोधः ॥ ७३ ॥

इत्थं कार्य एव व्युत्पत्तिरिति नियमाङ्गीकारेण कार्यशेषतया सिद्धेऽपि तात्पर्यमुक्तम् । इदानीं सिद्ध एव प्राधान्येन तात्पर्यं संभवति ; कोऽसौ पाञ्चाल इत्यादिषु तथा दृष्टेरिति वदन्तं सिद्धपरवादिनं तत्पक्षानुवादपूर्वकं **प्राभाकरं** प्रतिक्षिपति—**कोऽसावि**ति ॥ अयमस्य भावः—लौकिकवाक्यं सिद्धपरमस्तु, वैदिकवाक्यं सर्वमपि कार्यपरमेव ; सिद्धं तु कार्यशेषतया वदतीति । तद्दूषयति—**अर्धरम्य**मिति । कानिचित्सिद्धपराणि कानिचित्कार्यपराणीति विभागस्य दर्शनादर्धरम्यत्वमुच्यते । पुरुषार्थपर्यवसायित्वं हि वाक्यस्य प्रामाण्ये तन्त्रम् ; तच्च तव गृहे निधिरस्तीत्यादौ प्रतिपत्तिमात्रेण ; ज्योतिष्टोमादिवाक्येषु स्वर्गादिफलप्रतीत्या । अतो ब्रह्मज्ञाने स्वरूपेण पुरुषार्थत्वान्न पुरुषार्थान्तरापेक्षा । तर्हि

बालोपच्छन्दनादिवाक्यवदर्थतथात्वं न स्यादिति चेत्; न स्यात्, बाधाभावेन स्वतःप्रामाण्यस्यैव न्यायप्राप्तत्वात्। अत एव न नाट्यादिनीतिः। नाट्यादावर्थानुकारमात्रेण प्रीतिः। नात्रानुकारप्रतीत्या प्रीतिः; अपि तु स्वगृहे निहितनिधिसद्भावप्रतीत्या। इत्थं बाधविधुरेष्वर्थतत्त्वेषु प्रामाण्यानङ्गीकारे कार्यवाक्येऽपि प्रामाण्यं न स्यादिति कण्ठगतजीवितमेव वेदप्रामाण्यमिति भावः॥ ७३॥ **इति सिद्धस्वरूपादिपरवाक्यानां विधिशेषत्वमन्तरेण प्रामाण्यनिरूपणम्॥**

299. **कस्मैचिज्ज्ञापयैतत्त्वमिति परकृतां वीक्ष्य चेष्टां तदन्य-**
स्तस्मै ब्रूते ततस्तद्भ्रमकमिह वचो वेत्ति चेष्टाविदन्यः।
तत्तद्वाच्येषु शब्दैर्हितविदभिहितैरङ्गुलीयोगपूर्वं
जानन्नन्यत्र तत्तत्स्वहितजनकृतिं शिक्षणार्थामवैति॥ ७४॥

इदानीमाद्यव्युत्पत्तिः प्रकारत्रयेण सिद्धार्थेऽपि कर्तुं शक्येति वक्तुमारभते—**कस्मैचिदिति**॥ एषा किल काचित्प्रक्रिया—पुत्रस्ते जात इति देवदत्ताय ज्ञापयेति केनचिच्चेष्टया चोद्यमानः कश्चित् गत्वा तस्मै देवदत्ताय तं वक्ति; तेन सह गतः कश्चिदन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञस्तद्वाक्यं श्रुत्वा व्युत्पद्यते एतद्वाक्यं पुत्रजन्मरूपार्थप्रतिपादकमिति। तदिदमाह—**ततस्तदिति**। प्रकारान्तरेण प्रतिपदव्युत्पत्तिनिरूपणेन सिद्धे व्युत्पत्तिं दर्शयति—**तदिति।** तत्तच्छब्दवाच्येषु शिशुपशुपक्षिमृगादिष्वम्बातातमातुलादिभिर्हितविद्भिरभिहितैश्शशिपश्वादिशब्दैस्साकमङ्गुलीनिर्देशपूर्वकं जानन्—प्रतिपद्यमानस्तत्तत्स्वहितप्रवृत्तिमन्यत्रापि शिक्षणार्थां—व्युत्पादनार्थामवैति। अयमत्र क्रमः—शिक्षको जनः कञ्चित्कालमङ्गुलीनिर्देशपूर्वकं तेषुतेष्वर्थेषु तत्तच्छब्दान् प्रयुङ्क्ते; पश्चादङ्गुलीनिर्देशमन्तरेण वदति। व्युत्पित्सुस्तच्छृणोति, चेष्टापरिज्ञानवत्त्वाद्व्युत्पादकानां प्रवृत्तिं व्युत्पादनार्थां जानाति; ततश्चेष्टामन्तरेणापि शब्दमात्रादेव स्वप्रतिपत्तिं दृष्ट्वा शब्दस्य बोधकत्वशक्तिं जानाति। अयं शब्द इममर्थं बोधयति, शब्दार्थयोस्संबन्धान्तरं न दृश्यते; संकेतयिता चान्यो न दृष्टः; परिशेषाद् बोध्यबोधकभावेनैवायं शब्द इममर्थं बोधयतीति व्युत्पद्यते॥ ७४॥

300. **कश्चित् कस्यापि पुंसस्सुतजनिमिह तत्प्रीतिकृत्त्वं च जानन्**
तज्जन्मोक्तिप्रहृष्टे पितरि सुतजनेर्वेत्ति तद्वाच्यभावम्।
शक्यं तद्धर्षहेतुस्स इति नियमनं सन्निधानादियुक्ते-
रासीदस्तु प्रसूत्याद्यनियतिकथनं कार्यवाक्येऽपि शक्यम्॥ ७५॥

अयं चान्यः प्रकारः—देवदत्तस्य पुत्रे जाते कश्चिद्गत्वा पुत्रस्ते जात इति वदति। तत्पश्यन् बालकस्तन्मुखविकासेन तस्यानुकूलबुद्धिं जानन्नेतद्वाक्यं सन्निहितानुकूलरूपपुत्रजन्मप्रतिपादकमिति व्युत्पद्यते। तदिदमाह—**कश्चिदिति**॥ अयमत्रान्वयः—कस्यापि पुंसस्सुतजनिं—पुत्रजननं तस्य च प्रीतिकृत्त्वं—प्रीतिहेतुत्वं च जानन् तज्जन्मवाक्यप्रहृष्टे पितरि सुतजनेः—पुत्रजननस्य तद्वाच्यभावं—शब्दवाच्यभावम् वेत्ति—जानाति। बहुष्वपि हर्षहेतुषु सत्सु पुत्रजननमेव हर्षहेतुरिति विशेषनियमनं सन्निधानादिलिङ्गैश्शक्यम्। आसीदस्तु बहुषु प्रीतिहेतुषु सुखप्रसूत्याद्यनियतिकथनं कार्यव्युत्पत्तावपि शक्यते वक्तुम्—तत्राप्यवान्तरबहुव्यापारसंभवादनियतिर्वक्तुं शक्या॥ ७५॥ **इति सिद्धार्थेऽप्याद्यव्युत्पत्त्युपपत्तिः॥**

301. **शब्दस्यैतस्य वाच्यस्त्वयमिति च तथा वाचकोऽसावमुष्ये-**
त्येवं शिक्ष्येत पश्चात् कतिपयवचसां पूर्वनिर्ज्ञातशक्तिः।

इत्थं व्युत्पन्नतत्तत्सहपठितिवशाद्वाचकान् वेत्ति कांश्चि-
द्ये लोके ते हि वेदे समधिकमिह यत्तु तत्रैव वेद्यम् ॥ ७६ ॥

इत्थं सिद्धार्थे प्रथमां व्युत्पत्तिमभिधाय द्वितीयामपि व्युत्पत्तिं तत्रैव वदति—**शब्दस्येति** ॥ अस्य शब्दस्याय-मर्थो वाच्यः, अस्यार्थस्यायं शब्दो वाचक इति हि काव्यादिशिक्षाप्रकारः । लोकव्यवहारोऽप्येवमेव ज्ञापयति । इमां व्युत्पत्तिं पूर्वार्धेन दर्शयित्वा व्युत्पत्त्यन्तरमुत्तरार्धेन दर्शयति—**इत्थमिति** । अयमर्थः—प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति वाक्यं श्रुत्वा प्रभिन्नेत्यादिशब्दानां पूर्वव्युत्पन्नत्वाद्व्युत्पन्नपदसहपठनसामर्थ्यात् पूर्वमव्युत्पन्नं मधुकरपदमौचि-त्यादिना भ्रमरपरतया व्युत्पद्यत इति कांश्चिद्भ्रमरादिशब्दान् । तर्हि लौकिकशब्दानामेवं व्युत्पत्तिरस्तु, न वैदिकानामि-त्याशङ्क्याह—**य** इति । * य एव लौकिकास्त एव वैदिका इति हि लोकवेदाधिकरणन्याय इति भावः । कथं तर्हि वैदिकप्रयोगेषु वैषम्यम्? अत आह—**समधिकमिति**। यल्लौकिकशब्दाद्वैदिकशब्देषु समधिकं वैषम्यं तत् प्रातिशाख्यादि-व्याकरणविशेषावगम्यमित्यर्थः । अतः कार्ये व्युत्पत्तिसिद्धेः व्युत्पत्त्यादिभिर्बहुभिर्लोकव्यवहारसहितैरभिधानपठितै-र्व्याकरणप्रक्रियादिभिः प्रातिशाख्यादिभिरसाधारणहेतुभिस्सिद्धे वा कार्ये वा सर्वत्रापि व्युत्पत्तिस्समानस्वभावेति नैकत्र व्युत्पत्तिनियमः कार्य इत्यर्थः ॥ ७६ ॥ **इति सिद्धार्थे द्वितीयादिव्युत्पत्तिप्रकारः ॥**

302. व्युत्पाद्यं नाप्रतीतं प्रसजति विदिते नैरपेक्ष्यं श्रुतीना-
मिन्द्राद्यर्थे पदानामिति दुरधिगमा नामतेत्यप्ययुक्तम् ।
अप्रत्यक्षेषु सिंहप्रभृतिषु वचनैः कैश्चिदारण्यकोक्तैः
व्युत्पद्यन्ते हि पौराः स्वयमपि च वदन्त्येवमत्रापि वार्ता ॥ ७७ ॥

अस्तु प्रत्यक्षेषु पदार्थेषु एतादृशी व्युत्पत्तिः । अप्रत्यक्षेष्विन्द्रादिषु सिद्धेषु व्युत्पत्तिर्न युज्यत इत्याशङ्कते—**व्युत्पाद्यमिति** ॥ किमप्रतीते व्युत्पत्तिरुत प्रतीते? अप्रतीतं तावद्व्युत्पाद्यं न प्रसजति—न भवतीत्यर्थः । प्रतीते व्युत्पाद्ये प्रतीतत्वादेवाप्राप्तार्थप्रत्यायकश्रुतिनैरपेक्ष्यप्रसङ्ग इति । इत्थं सतीन्द्राद्यर्थे पदानां नामता दुरधिगमेति । एतद-युक्तमित्याह—**इत्यपीति** । अयुक्तिमेवोपपादयति—**अप्रत्यक्षेष्विति** । सिंहादिष्वागमाद्व्युत्पत्तिर्नास्ति; अपि तूपमानात् । अत एवोक्तमुपमानवादिभिः—* सादृश्यस्यानिमित्तत्वान्निमित्तस्याप्रतीतितः । समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥ इति चेत्; दुरुक्तं तु तत्, तादृशस्योपमानस्यैवाभावात्; अन्यथा वैदिकेन्द्रादिशब्दानां नित्याव्युत्पत्तिप्रसङ्गात् नित्यादृष्टत्वादि-न्द्रादिजातेः । कथं तर्ह्यप्रत्यक्षे गवयत्वे गवयशब्दव्युत्पत्तिः? कथं वा प्रत्यक्षत्वप्रसङ्गविधुरेन्द्रादिसामान्ये? तत्र वक्त्रभि-प्रायमाश्रित्य व्युत्पद्यते । अयं खलु वक्तुरभिप्रायः—सहस्राक्षत्वाद्युपलक्षिता काचिज्जातिरिन्द्रशब्दार्थ इति । तदन्यत्रापि समानम्; गोसादृश्योपलक्षिता काचिज्जातिर्गवयशब्दार्थ इति । किं च वक्त्रभिप्रायानङ्गीकारे प्रत्यक्षेऽपि घटादौ व्युत्पत्तिर्न स्यात् । तथा हि । कश्चित्को घट इति पृच्छति । व्युत्पादकः पुनः अयं घट इति व्यक्तिविशेषं दर्शयति; व्युत्पित्सुश्च तावता व्युत्पद्यते । तत्रैकस्यां व्यक्तौ व्युत्पन्नस्य व्यक्त्यन्तरे घटप्रतीतिर्न स्यात् । वक्त्रभिप्राय एव तत्र शरणम् । एतज्जातीयो घट इति वक्तुरभिप्रायः । तेन तज्जातीये व्युत्पद्यते तदभिप्रायाभिज्ञो व्युत्पित्सुरिति । एवं तर्कसहकृतेन वक्त्रभिप्रायपरिशोधनेन गवयत्वादौ गवयादिशब्दं व्युत्पद्यते व्युत्पित्सुः; किमिह निरर्थकोपमानकल्पनेनेति । न केवलं

सिंहादिशब्दव्युत्पत्तिः, व्यवहारोऽपि दृश्यत इत्याह—**स्वयमिति**। दृष्टान्तदृष्टमर्थं पक्षे योजयति—**एवमिति**। वार्ता—प्रवृत्तिः ॥ ७७ ॥ **इति अप्रत्यक्षपदार्थव्युत्पत्तिप्रकारः ॥**

303. **व्यक्तिः शब्दैर्न बोध्या यदि न खलु भवेदन्वितज्ञप्तिसिद्धि-**
स्तच्छक्तिर्व्यक्तिमात्रे न च भवति यतः स्वोपलम्भादिबाधः।
धर्मो धर्मी च नैकं किमपि न च तयोर्भिन्नयोरप्यभेद-
स्तस्मात्तां तद्विशिष्टामभिदधति पदान्यन्यथा गत्यभावात् ॥ ७८ ॥

यदि जातिवाचकत्वं शब्दस्य तर्हि विशिष्टविषयत्वं न स्यात् इत्याशङ्कते—**व्यक्तिरिति** ॥ परिहरति—**न खल्विति**। व्यक्तिविषयत्वाभावे कथमन्वितज्ञप्तिसिद्धिः, अन्वयस्य व्यक्तिनिष्ठत्वात्? यदि व्यक्तिमात्रे शक्तिः, तच्च न भवति, उपलम्भादिबाधात्। व्यक्तिमात्रे शब्दशक्तावनुवृत्तव्यवहारादिबाध इत्यर्थः। तर्हि धर्मो धर्मी चैकम्, अथवा भिन्नाभिन्नमित्याशङ्क्य पक्षद्वयमपि क्रमेण प्रतिक्षिपति—**धर्मेति, न चेति** च। अतो जातिविशिष्टा व्यक्तिरेव शब्दार्थ इति निगमयति—**तस्मादिति**। तदेवोपपादयति—**अन्यथा गत्यभावादिति**। अयमर्थः—केचिच्छब्दा जातिमात्रवाचकाः जातिस्सामान्यमित्यादयः। केचिद्व्यक्तिवाचकाः व्यक्तिस्स्वरूपमित्यादयः। अपरे पुनर्जातिविशिष्टव्यक्तिवाचकाः गौरश्व इत्यादयः। तत्र पूर्वकोटिद्वयविलक्षणतृतीयकोटिवाचकाश्शब्दा जातिविशिष्टव्यक्तिवाचिन इति ॥ ७८ ॥ **इति आकृतिशब्दानां विशिष्टवाचित्वम् ॥**

304. **जातिं व्यक्त्या विहीनां स्पृशति न धिषणा तेन जातौ प्रवृत्ता**
शक्तिर्व्यक्तिं स्पृशेच्चेत् स्थित इह वचसां तद्विशिष्टावगाहः।
जातेर्बोधः स्वहेतोः स्थितिरपि हि भवेत्क्वापि गोत्वोक्तिनीत्या
शब्दात्तत्पारतन्त्र्यं स्फुरति यदि पराबोधने तन्न शक्यम् ॥ ७९ ॥

कौमारिलास्त्वेवं प्राहुः—जातिवाचिनश्शब्दा व्यक्तिं लक्षयन्तीति। तदयुक्तमित्याह—**जातिमिति** ॥ व्यक्ति-शून्यां जातिं कदाचिदपि न स्पृशति धिषणा। तेन जातौ प्रवृत्ता शब्दशक्तिर्व्यक्तिमपि स्पृशतीति वक्तव्यम्। तथा चेद्वचसां जातिविशिष्टव्यक्त्यवगाहनं स्थितमेव। तथा च शक्तिर्विशिष्ट इति भवतैवोक्तं भवति। तदेव विवृणोति—**जातेर्बोध** इति। जातेः प्रतिपत्तिः स्वकारणात्, अवस्थानं च कुत्राप्याधारविशेषे। तत्र दृष्टान्तमाह—**गोत्वेति**। यथा गोत्वशब्दे गोर्भावो गोत्वमिति गोशब्दप्रतिपत्तिमन्तरेण प्रतिपत्तिर्न भवति, गोशब्दमन्तरेण भावविषयस्य त्वप्रत्ययस्या-नुत्पत्तिः, एवं गोत्वस्य प्रत्ययस्थिती तदाधारभूत[गो]स्वरूपसापेक्षे इत्यर्थः। अस्तु गोत्वस्य पारतन्त्र्यस्फुरणम्, ततः किं शब्दशक्तेरित्यत आह—**शब्दादिति**। शब्दाद्गोत्वस्य व्यक्तिपारतन्त्र्यं यदि स्फुरति, तदा परस्य व्यक्तिद्रव्यस्याबोधने जातेस्तत्पारतन्त्र्यं शब्देन बोधयितुं न शक्यम्। अतो गवादिशब्दशक्तिर्व्यक्तिपर्यन्तेति ॥ ७९ ॥ **इति विशिष्ट-वाचिनां विशेषणमात्रे शक्तिनिष्कर्षानुपपत्तिः ॥**

305. **जातौ शक्तिर्लघुत्वात् भवति च वचसां भाषणं जातिमात्रे**
भेदो निष्कर्षकेभ्यस्त्विह परमजहल्लक्षणाया निरूढिः।

इत्युक्तं कैश्चिदेवं यदि भवति तदोपाधिशब्देऽपि नीति-
र्मन्दं वैषम्यमात्रं भवतु च नियतिः प्रत्ययैर्लक्षणायाः ॥ ८० ॥

उक्तमपि दूषणं सम्यगजानानः पूर्वपक्षी लघुत्वावलम्बनेन लक्षणापक्षं पुनर्द्रढयति—**जाता**विति ॥ अयमर्थः—जातावेव शक्त्यङ्गीकारे शब्दस्य शक्तिलाघवं भवति; अतो वचसां भाषणम्—अभिधानं जातिमात्रे । तर्हि गोत्वशब्दात् गोशब्दस्य जातिवाचित्वे को भेदः? तत्राह—**भेद** इति । गोत्वशब्दो गोत्वजातिमेव प्राधान्येनाह ; गोशब्दस्त्वनिष्कर्षकत्वादजहल्लक्षणानिरूढ्या गोत्ववत् तदाधारभूतां गामपि प्रकाशयति । अयमेव निष्कर्षकानिष्कर्षकभेदः । इमं पक्षमनुवदति—**इत्युक्तं कैश्चि**दिति । एतत्प्रतिबन्द्या दूषयति—**एव**मिति । तर्हि उपाधिशब्देऽपीयं नीतिरनुसन्धेया; तत्राप्युपाधावेव शब्दशक्तिः उपाधिमति निरूढलक्षणेति । तदेतदाह—**तदे**ति । गवादिशब्दस्तु जातिशब्दः, अन्यस्तूपाधिशब्द इयि वैषम्यं मन्दमेव ; प्रयोजकं न्यायसाम्ये वैषम्यमात्रस्याप्रयोजकत्वात् । अत उपाधिशब्दवज्जातिशब्दस्यापि धर्मिपर्यन्ताभिधानमपरित्याज्यम् । कथं तर्हि गङ्गायां घोष इत्यादिषु लोके लाक्षणिकव्यवहारनियमः? तत्राह—**भव**त्विति । प्रतीतिरेव हि सर्वत्र शरणम् ; प्रतीतिश्च व्युत्पत्त्यधीना ; व्युत्पत्तिश्च व्युत्पादकपारम्पर्यादेव नियता; व्युत्पादकाश्च गोशब्दं गोत्वाधारद्रव्यविषयतया व्युत्पादयन्ति ; गोत्वशब्दं पुनर्भावविषयतया । अतो निष्कर्षकानिष्कर्षकनिर्णयसिद्धिरिति ॥ ८० ॥ **इति व्यक्तिलक्षणापक्षभङ्गः॥**

306. मत्वर्थीयानुशिष्टिर्गुणवचनगणे वैभवात्स्यादसौत्री
शक्तिस्तत्रापि तत्तद्गुणवति नियता जातिशब्दाविशेषात् ।
निष्कृष्यैषां प्रयोगे क्वचिदगतितया द्रव्य[शक्ति]वृत्तिर्निरुद्धा
शक्तिस्साम्ये विभक्तेस्तदवधिररुणाधिक्रियायामभाषि ॥ ८१ ॥

एवं जातिशब्दवत् गुणशब्दस्यापि द्रव्यपर्यन्ताभिधानम् । कथं तर्हि गुणवाचिशब्दे मत्वर्थीयप्रत्ययः शुक्लवान्मधुरवानित्यादि? तत्राह—**मत्वर्थीये**ति ॥ द्रव्यपर्यन्ताभिधानशक्तिमत्सु गुणवचनेषु मत्वर्थीयाभिधानं वैभवादेव ; न पुनर्मत्वर्थीयप्रत्ययावश्यंभावात् । असौत्री—तथा सूत्रकारोपदेशाभावादित्यर्थः । यत्र शुक्लवान्मधुरवानिति मत्वर्थीयव्यवहारः, तत्रापि शब्दशक्तिर्धर्मिपर्यन्ता, जातिशब्दाविशेषात्; जातिशब्दवत् गुणवाचिनोऽपि तस्य धर्मिपर्यन्ताभिधानशक्तेरपि विद्यमानत्वात् । द्वयी हि प्रवृत्तिश्शुक्लादिशब्दानां लोकव्यवहारानुरोधेन कदाचित् गुणमात्रपरत्वं शुक्लो गुण इति; कदाचिद्गुणिपर्यन्ताभिधानं शुक्लः पट इति । एषां शुक्लादिशब्दानां निष्कृष्य प्रयोगे द्रव्यपर्यन्ताभिधानशक्तिर्निरुध्यते । तदा मत्वर्थीयप्रत्ययय़ोगः स्यात् । विभक्तेस्साम्ये—समानाधिकरणप्रयोगे पटः शुक्ल इत्यादौ द्रव्यपर्यन्ताभिधानं शारीरकशास्त्रनिर्णीतारुणाधिकरणन्यायेन **भाष्यकारै**रेवाभाषीत्यर्थः । अत एव * गुणो शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति असौ त्रिलिङ्गनियमोऽप्युपपद्यते ॥ ८१ ॥ **इति गुणवचनशब्दानां द्रव्यपर्यन्ताभिधायित्वम् ॥**

307. जीवं देवादिशब्दो वदति तदपृथक्सिद्धभावाभिधाना-
न्निष्कर्षाभावयुक्ताद् बहुरिह च दृढो लोकवेदप्रयोगः ।
आत्मासंबन्धकाले स्थितिरनवगता देवमर्त्यादिमूर्ते-
र्जीवात्मानुप्रवेशाज्जगति विभुरपि व्याकरोन्नामरूपे ॥ ८२ ॥

एवं जातिगुणवाचिनोर्द्रव्यपर्यन्तत्वमुक्तम् । इदानीं द्रव्यवाचिनां देवादिशब्दानामात्मपर्यन्तत्वमुच्यते—जीवमिति ॥ देवादिशब्दो जीवं वदति ; जीवापृथक्सिद्धदेवादिशरीररूपभावाभिधानान्निष्कर्षकविवक्षाविधुरत्वात् । अत्र किं प्रमाणमित्यत्राह—**बहुरि**ति । सर्वत्रापि शब्दार्थनिर्णये विशिष्टप्रयोग एव शरणम् । अस्ति च देवादिशब्दानामात्मपर्यन्ताभिधाने लोकप्रयोगः ; देवो मनुष्यः पशुर्मृग इत्यादि । तथा वेदप्रयोगोऽपि—* चत्वारः पञ्चदशरात्रा देवत्वं गच्छन्तीति ; * वाचिकैः पक्षिमृगतामित्यादिः । अत्रापृथक्सिद्धविशेषणत्वमेव व्यवहारनियमे तन्त्रम् । अस्ति चापृथक्सिद्धत्वं शरीरिणा शरीरस्य ; तदिदमाह—**आत्मासंबन्धकाले देवमनुष्यादिमूर्तेः स्थितिरनवगते**ति । न हि मृतस्य शरीरं क्षणमपि तत्संस्थानसंस्थितमवतिष्ठते । न केवलं लोकप्रसिद्धिः, * जीवात्मानमनुप्रविश्य नामरूपे व्याकरोदीश्वर इति हि वेदप्रसिद्धिः । अतोऽचिच्छरीरको जीवः, अचिज्जीवशरीरक ईश्वर इति चेतनाचेतनशब्दानां भगवत्पर्यन्ताभिधानं युक्तमिति भावः ॥ ८२ ॥ **इति देवादिशब्दानां शरीरिपर्यन्तत्वम्** ॥

308. **संस्थानैक्याद्यभावे बहुषु निरुपधिर्देहशब्दस्य रूढि-**
र्लोकाम्नायप्रयोगानुगतमिह ततो लक्ष्म निष्कर्षणीयम् ।
अव्याप्तत्वादिदुःस्थं परमतपठितं लक्षणं तत्र तस्मा-
द्यद्वीतुल्याश्रयं यद्वपुरिदमपृथक्सिद्धिमद्द्रव्यमस्य ॥ ८३ ॥

अत्र देवादिशब्दानां सर्वशरीरित्वेनावस्थितपरमात्मपर्यन्तत्वमुक्त्वा भगवतस्सर्वशरीरित्वसिद्ध्यर्थं शरीरलक्षणं लक्षयति—**संस्थाने**ति ॥ अयमत्र भावः—संस्थानैक्यं जात्यैक्यं कारणैक्यं कार्यैक्यमित्यादिनियामकविशेषाभावेऽपि देवमनुष्यपशु[मृग]पक्षिसरीसृपवृक्षगुल्मलतादिषु शरीरशब्दस्य रूढिरुपलभ्यते । अत्र च लोकाम्नायप्रसिद्ध्यनुगुणं लक्षणमिह निष्कर्षणीयम् । इदं तु सर्वसाधारणन्यायप्रदर्शनम् । अत्र *चेष्टेन्द्रियार्थाश्रयश्शरीरमिति परमतपठितं लक्षणमव्याप्त्यादिदोषदुष्टम् । तथा हि—प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया चेष्टा । यदाहुः—* चेष्टा हिताहितप्राप्तिपरिहारार्थः स्पन्द इति । इदं च लक्षणमीश्वरशरीरतया श्रुतिप्रमितेषु कालादिषु नास्तीत्यव्याप्तिः । तथा प्रतिक्षणपरिणामिषु निद्राणकुम्भकर्णादिशरीरेष्वव्याप्तिस्सुप्रसिद्धा । कुम्भकर्णशरीरे जागरावस्थायां चेष्टाऽस्ति चेत् किमनेन, शरीरान्तरमेव तत् ; अन्यथाऽऽहारपरिपाकविशेषेण प्रतिक्षणपरिणामकथनस्य भावत्कस्योद्भ्रान्तजल्पितत्वप्रसङ्गात् । चेष्टाश्रयसजातीयत्वं शरीरत्वमिति चेत्, केयं जातिः ? शरीरत्वमेवेति चेन्न ; शरीरत्वजातेरभावात् ; अन्यथा त्वदुक्तजातिसङ्करप्रसङ्गात् । न हि शरीरत्वस्य पृथिवीत्ववत् परापरभावो निरूपयितुं शक्यते । शरीरत्वव्यतिरिक्ता काऽपि जातिरिति चेत् ; साऽपि सङ्करदोषेण परास्यते, तुल्यन्यायत्वात् । तर्हि जातिं मुक्त्वा चेष्टाश्रयसालक्षण्यं शरीरलक्षणमिति वदाम इति चेत् ; किं तत्सालक्षण्यम् ? शरीरलक्षणलक्षितत्वमिति चेन्न ; शरीरलक्षणस्यैव निरूप्यमाणत्वात् । न ह्यद्यापि शरीरलक्षणं निरूपितं, येनैतत्परिग्रहान्निद्राणशरीरस्य शरीरत्वमुपपाद्येत । यदा कदाचिच्चेष्टाश्रयत्वं शरीरलक्षणमिति वचनमत्यन्तजघन्यमेव ; निद्राणशरीरस्य कदाचिदपि चेष्टाश्रयत्वाभावात् । चेष्टाश्रयत्वार्हत्वमिति चेत्, तदपि न ; नित्यानुपलब्धचेष्टस्य निद्राणशरीरस्य चेष्टाश्रयत्वार्हताया अभावात् । अथापि शरीरजातीयत्वादस्त्यर्हतेति चेन्न ; जातेर्निरस्तत्वात् ; अद्यापि शरीरशब्दार्थानिरूपणेन तज्जातीयत्वस्य वक्तुमेवाशक्यत्वात् । किंच शरीरावयवानां चेष्टाश्रयत्वेन शरीरत्वप्रसङ्गः । अत एवान्त्यावयवीति विशेषयाम इति चेन्न ; शरीरोपष्टम्भकेषु भूतान्तरेष्वपि प्रसङ्गात् । तेषामन्त्यावयवित्वं नास्तीति चेन्न ;

तैरारभ्यस्यावयव्यन्तरस्यादर्शनात्। कालान्तरे भविष्यतीति चेत् तर्हि शरीरारभ्यमप्यवयव्यन्तरं कालान्तरे भविष्यतीति तत्राप्यन्त्यावयवित्वं न स्यात्। तर्ह्युपष्टम्भकानां चेष्टाश्रयत्वमेव नास्तीति चेत्, शरीरस्यापि तर्हि चेष्टाश्रयत्वं न स्यात्। न ह्युपष्टम्भकमन्तरेण शरीरमपि चेष्टते। किंच प्रयत्नवदीश्वरसंयोगासमवायिकारणेषु भूकम्पादिषु पृथिव्यादीनामीश्वर-शरीरत्वं भवतैवाङ्गीकृतं स्यात्। तत्रादृष्टवदात्मसंयोगोऽसमवायिकारणम्, अदृष्टवांश्च जीवः। अतो नेश्वरसंयोगासम-वायिकारणकत्वमिति चेत्; को ब्रवीति नियमम्? ईश्वरसंयोगस्यापि कारणत्वात्, असमवायिकारणलक्षणोपेतत्वात्। तल्लक्षणलक्षितत्वेऽपि तत्कारणत्वाभावे जीवसंयोगोऽप्यसमवायिकारणं न स्यात्। इत्थं भोगाश्रयत्वमपि दुष्टम्, पूर्वोक्त-दूषणकलापदूषितत्वात्। इन्द्रियाश्रयत्वमपि शोधयामः। अत्राश्रयत्वं समवायिकारणत्वं चेदिन्द्रियावयवेषु व्यभिचारः। वस्त्वन्तरसमवायिकारणत्वेऽन्त्यावयवित्वमपि व्याहन्येत। संयोगित्वमात्रं चेत्, पूर्वोक्तदूषणकलापान्न मुच्यते। किंच इन्द्रियान्तरसंबन्धनियते त्वगिन्द्रिये व्यभिचारः; तथा त्वगिन्द्रियसंबन्धिनियतेष्विन्द्रियान्तरेष्वपि व्यभिचारः। उत्पा-टितस्याक्ष्णस्त्वगिन्द्रियसंबन्धनियमो नास्तीति चेन्न; उत्पाटनावस्थायामेवाक्ष्णः स्वावयवसंक्षोभेण विनष्टत्वेनाक्ष्णस्सद्भावा-भावात् केवलं गोलकमात्रमुपलभ्यते। एवं त्वगिन्द्रियोपष्टम्भकेष्वपि व्यभिचारो वाच्यः। शरीरमेव त्वगिन्द्रियोप-ष्टम्भकमिति चेत्; तर्हि शरीरोपष्टम्भकेषु व्यभिचारस्तदवस्थ एव। ईश्वरशरीरतया श्रुतिशतप्रसिद्धेषु पृथिव्यादिष्वेत-ल्लक्षणमस्ति चेत्, अविवाद एव; प्रपञ्चवाचिनां शब्दानां परब्रह्मपरत्वेऽपि विरोधाभावात्। नास्तीति चेत्, श्रुति-विरुद्धत्वादलक्षणमेव। श्रुतिरेव गौणीति चेत् किममूलमेव? अथवा केनचित्प्रमाणेन? अमूलं चेत् शब्दार्थसंबन्ध-नियमव्यवहारस्यासंबन्धत्वप्रसङ्गः। केनचित्प्रमाणेनेति चेत्, किं तत्प्रमाणम्? श्रुतिप्रयोग इति चेत्, स पुनरस्मदीय एव; विश्वशरीरत्वस्य श्रुतिशतसिद्धत्वात्। अस्मत्कल्पितलक्षणविरोधात् श्रुतेर्गौणत्वं कल्पयाम इति चेन्न; परस्पराश्रयात्; युष्मल्लक्षणस्य लक्षणत्वे श्रुतेर्गौणत्वम्; तद्गौणत्वे च भवदुक्तलक्षणस्य लक्षणत्वमिति। एवमनेकविधदोषदुष्टत्वात् पर-कल्पितलक्षणप्रहाणेन सर्वप्रयोगानुगुणं शरीरलक्षणं वाच्यमित्याह—**अव्याप्ते**ति। किं तल्लक्षणमित्यत्राह—**तस्मा**दिति। तथा हि *यस्य चेतनस्य यद्द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुं च शक्यमिति लक्षणद्वयमुक्त्वा, *तच्छेषतैकस्वरूपं चेति तृतीयमपि लक्षणमाहु**र्भाष्यकाराः**। अत्र यस्येति प्रतिसंबन्धिनियमनिर्देशादन्यशरीरस्यान्यं प्रति शरीरत्वं निर-स्यते। चेतनस्येति चैतन्यविशिष्टतया प्रतिसंबन्धिनिर्देशात् धर्मभूतज्ञानस्य शरीरत्वं निरस्यते। नहि ज्ञानं ज्ञानविशिष्ट-स्याधेयविधेयशेषभूतम्। द्रव्यमिति गुणक्रिययोर्निरासः। सर्वात्मनेति दण्डकुण्डलादीनां गर्भदासादीनां च निरासः; तेषां कदाचिदेवाधेयत्वाद्विधेयत्वात्। शक्यमिति योग्यतामात्रकथनेन रुग्णशरीरेऽव्याप्तिपरिहारः। रुग्णस्यापि शरीरस्य धारणादियोग्यताऽस्ति रोगानुबन्धाद्धारणादिकं प्रतिबध्यते; रोगनिवृत्तौ तदेव योग्यत्वं निष्प्रतिद्वन्द्वमवतिष्ठत इति भावः। इत्येषा दिक्॥ ८३॥ **इति शरीरलक्षणम्**॥

309. शब्दैस्तन्वंशरूपप्रभृतिभिरखिलः स्थाप्यते विश्वमूर्ते-
रित्थंभावः प्रपञ्चस्तदनवगमतस्तत्पृथक्सिद्धमोहः।
श्रोत्राद्यैराश्रयेभ्यः स्फुरति खलु पृथक्च्छब्दगन्धादिधर्मो
जीवात्मन्यप्यदृश्ये वपुरपि हि दृशा गृह्यतेऽनन्यनिष्ठम्॥ ८४॥

इत्थं शरीरलक्षणमुक्त्वा विश्वस्येश्वरशरीरत्वेन तदपृथक्सिद्धस्य तच्छरीरत्वप्रतिष्ठापनार्थं तदपृथक्सिद्धिमाह—**शब्दै**रिति ॥ *तत्सर्वं वै हरेस्तनुः, *ममैवांशो जीवलोके, *रूपान्तरं तद्विज कालसंज्ञम्, *विष्णुशक्तिः परा प्रोक्ता, *यदम्बुवैष्णवः कायः, *यस्यात्मा शरीरमित्यादिभिर्विश्वमूर्तेर्विष्णोरित्थंभावः—अपृथक्सिद्धविशेषणं प्रपञ्च इति स्मृतिश्रुत्योरभिधीयते; यद्येवमित्थंभावः प्रपञ्चः, कथं तर्हि पृथक्सिद्धिरिति? अत्रोत्तरम्—**तदनवगमत** इति। ईश्वरस्य विशेष्यभूतस्यावगमाभावाद्विशेषणभूतस्य प्रपञ्चस्य पृथक्सिद्धत्वव्यामोहमात्रं पामराणाम्, विदुषां तु परमर्षीणामपृथक्सिद्धत्वेनैव सर्वदा प्रतीतिव्यवहारौ। अमुष्मिन्नर्थे लोकसिद्धं दृष्टान्तमाह—**श्रोत्राद्यै**रिति। आश्रयग्रहणानर्हैः श्रोत्राद्यैर्यथा शब्दादिकं पृथगेव गृह्यते, एवमीश्वरग्रहणानर्हैरल्पज्ञानां प्रमाणैरीश्वरात् प्रपञ्चस्य पृथक्त्वेन ग्रहणं युक्तमित्यर्थः। उक्तमर्थमुदाहरणान्तरेणापि द्रढयति—**जीवात्मनी**ति। मनोग्राह्ये जीवात्मनि सति चक्षुषा गृह्यमाणं शरीरं न जीवविशेषणत्वेन गृह्यते; जीवस्य चक्षुर्ग्राह्यत्वाभावात्। एवं प्रपञ्चोऽपि पामरबुद्धिभिर्नेश्वरविशेषणत्वेन गृह्यते। नैतावता श्रुतिस्मृत्यादिप्रसिद्धमीश्वरापृथक्सिद्धत्वं न सिध्यतीति ॥ ८४ ॥ **इति विश्वस्येश्वरापृथक्सिद्धत्वम् ॥**

310. **निष्कर्षाकूतहानौ विमतिपदपदान्यन्तरात्मानमेकं**
तन्मूर्तेर्वाचकत्वादभिदधति यथा रामकृष्णादिशब्दाः।
सर्वेषामाप्तमुख्यैरगणि च वचसां शाश्वतेऽस्मिन् प्रतिष्ठा
पाकैस्तस्याप्रतीतेर्जगति तदितरैः स्याच्च भङ्क्त्वा प्रयोगः ॥ ८५ ॥

जगतः परमात्मापृथक्सिद्धिमुक्त्वा तद्वाचिनां पदानां निष्कर्षाभिप्रायाभावे परमात्मपर्यन्तत्वमाह—**निष्कर्षे**ति ॥ विप्रतिपन्नानि प्रपञ्चवाचकानि पदानि परमात्मवाचकानि; निष्कर्षकेतरत्वे सति तन्मूर्तिवाचकत्वात्। ये निष्कर्षकेतरत्वे सति भगवन्मूर्तिवाचकास्ते भगवद्वाचकाः यथा रामकृष्णादिशब्दा इति विशेषतो व्याप्तिः। सामान्यतोऽपि ये निष्कर्षकेतरत्वे सति यन्मूर्तिवाचकास्ते तद्वाचकाः यथा देवमनुष्यादिशब्दा इति। इत्थमनुमानम्; आगमोऽप्यस्तीत्याह—**सर्वेषा**मिति। आप्तमुख्यैर्महर्षिभिः सर्वेषां वचसां शाश्वते—भगवति प्रतिष्ठा—पर्यवसानमगणि। *वचसां वाच्यमुत्तमम्, *नताः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती इत्यादीनि प्रमाणानि सहस्रशस्सन्ति; *वेदैश्च सर्वैरहमेव वेद्य इति स्ववचनमपि। किमनेन स्मृत्युपदेशेन; श्रुतिरेव तावच्छरणं, *सर्वे वेदा यत्रैकं भवन्तीत्यादिका बहुशः प्रवर्तते? कथं तर्हि बालिशानां भगवत्पर्यन्तप्रतीतिः सर्वेष्वपि शब्देषु न जायते? अत्रोत्तरम्—**पाकै**रिति। तस्याप्रतीतेः—भगवत्पर्यन्तत्वाप्रतीतेः, विशेषणमात्रे प्रयोगः। तदितरैः—विद्वद्भिरपि विशेषणमात्रे क्वचित्क्वचिद्भङ्क्त्वा प्रयोगः। विशिष्टवाचिनश्शब्दस्य विशेषणमात्रे विभज्य प्रयोग इत्यर्थः ॥ ८५ ॥ **इति जगद्वाचिनां शब्दानां परमात्मपर्यन्तत्वम् ॥**

311. **व्युत्पत्तिर्वाचकानां स्थिरचरविषये लोकतो नेश्वरादा-**
वव्युत्पन्नार्थवृत्तिस्त्वधिपतिनयतः स्यादमुख्येति चेन्न।
व्युत्पत्तेः पूरणं हि श्रुतिशिरसि कृतं नोपरोधः कथंचि-
द्देहित्वं चाधिपत्यात् समधिकमिह खल्वक्षपादप्रणीतात् ॥ ८६ ॥

यदि ब्रह्मणस्सर्वशब्दवाच्यत्वं, तर्हि लोकव्युत्पत्तिविरोधः स्यात्; घटपटादिशब्दानां घटापटादिष्वेव लोके व्युत्पत्तिर्न पुनरीश्वरे; अतः कथं व्युत्पत्तिविरोधस्सोढव्य इत्याक्षिपति—**व्युत्पत्ति**रिति ॥ कथं तर्हीश्वरे जगद्वाचिनां

शब्दानां प्रयोग इत्यत्राह—**अव्युत्पन्नेति**। यथा राजा राष्ट्रमित्यत्राधिपत्यनिबन्धनं सामानाधिकरण्यम्, एवं जगद्वाचिनामीश्वरे प्रयोगोऽप्याधिपत्यनिबन्धन इत्यर्थः। अत्रोत्तरम्—**नेति**। अयमत्र भावः—प्रथमव्युत्पत्तेरपूर्णायाः पूरणमेव वेदान्ते क्रियते; न पुनः प्रथमव्युत्पत्तिबाधः। वेदान्तश्रवणेन हि व्युत्पत्तिः पूर्यते। कर्मकाण्डश्रवणेन देहमात्रपरतया पूर्वं व्युत्पन्नस्य देवादिशब्दस्य देहव्यतिरिक्तात्मपरतया व्युत्पत्तिः पूर्यते; एवमत्रापि। तदिदमाह—**नोपरोध** इति। नन्वीश्वरस्य जगत्कर्तृत्वमक्षपादेनाप्यभिधीयते किमधिकं देहित्वं भवताऽभिधीयते इत्याशङ्कयाह—**देहित्वमिति**। अयमत्र भावः—यद्यक्षपादोऽपीश्वरस्याधातृत्वविधातृत्वशेषित्वनियमेन शरीरित्वं शरीरवाचिशब्दानां शरीरिपर्यन्तत्वमाह, तमपि वयमनुमन्यामहे। यदि नाह, तमेवानेनोपपादनेन प्रतिक्षिपामः। स खलु केवलमाधिपत्यम**क्षपादः** प्राह; वयं तु विश्वदेहित्वमीश्वरस्य विश्ववाचिशब्दवाच्यत्वं चेति विभागः॥ ८६॥ **इति ब्रह्मणः सर्वशब्दवाच्यत्वे व्युत्पत्तिविरोधपरिहारः॥**

312. **न ह्यक्षैः केऽपि वर्णाभ्यधिकमिह विदुर्वाचकं सावधानाः**
शब्दादर्थं प्रतीमस्त्विति च जनवचो नैकमन्यद्व्यनक्ति।
सामग्र्यैक्यादिनीत्या भवति मतिरियं तादृशे वर्णसंघे
संभेदे वा पदानामिति न तदधिकः कोऽपि शब्दोऽपरोक्षः॥ ८७॥

एवं सर्वशब्दवाच्यत्वं ब्रह्मण उपपाद्य शब्दस्वरूपमेव शोधयति। तत्र स्फोटवादिन आहुः—* वर्णानां नानात्वात् ते न वाचकाः शब्दादर्थं प्रतीम इति ह्येकत्वेनैव शब्दप्रतीतिः। अतो वर्णातिरिक्तः पदस्फोटः पदार्थप्रत्यायकः। एवं पदातिरिक्तो वाक्यस्फोटो वाक्यार्थप्रत्यायकः। न च वर्णसमुदायविवक्षया पदसमुदायविवक्षया वा वर्णानां पदानां च एकत्वं संभवति; देशतः कालतो वा तेषामेकत्वासंभवात्। न तावत्ताल्वादिव्यापारोच्चारितानां देशत एकत्वं संभवति। एककर्णशष्कुलीदेशसंबन्धादेकत्वमिति चेत्, तर्हि सर्ववर्णानामेकपदत्वप्रसङ्गः। न च शब्दानामैककाल्यम्, वाचः क्रमवर्तित्वेन क्रमेणैव तदभिधानात्। अतः पदस्फोटो वाक्यस्फोटश्चैकत्वेनोपलभ्यमानः पदार्थं वाक्यार्थं च बोधयतीति। अत्रोत्तरम्—एकार्थप्रतिपादकत्वेन व्याकरणादिव्युत्पन्ना एकबुद्ध्युपग्रहेण संघातभावमापन्ना वर्णा एव पदम्। एवमेकार्थप्रतिपादनरूपकार्यावच्छिन्नानि पदार्थप्रतिपादकानि पदान्येव वाक्यम्। अत्रैक्यमेकबुद्ध्यवस्थितानां संघातभावविषयम्; अतो न विरोधः; पदतत्संघातव्यतिरिक्तस्फोटयोरनुपलम्भात् ऐक्यप्रतीतेरन्यथासिद्धत्वात्। एवं बुद्धिसंगृहीतानां वर्णानां पदानामर्थप्रत्यायकत्वानङ्गीकारे स्फोटाभिव्यञ्जकत्वमपि न स्यात्; तत्रापि किमेकैकस्याभिव्यञ्जकत्वमुत समुदायस्येति वक्तुं शक्यत्वात्। अस्मदुक्तप्रक्रियया समाधाय स्फोटाभिव्यञ्जकत्वाङ्गीकारे किमनेन स्फोटेनादृष्टचरेण? अर्थस्यैव तथा प्रतिपत्तिरस्त्विति। तदेतत्सर्वमभिप्रेत्याह—**न हीति**॥ किं प्रत्यक्षात् स्फोट उपलभ्यते? तत्तावन्नास्ति; प्रत्यक्षाभावात्। नाप्यनुपपत्त्येत्याह—**शब्दादिति**। एकत्वं संघातविषयमित्युक्तम्। तदेव दृष्टान्तेन विवृणोति—**सामग्रीति**। न हि सामग्रीव्यतिरेकेण कार्यकारणमिति किंचित्कल्प्यते; तद्वदत्र वर्णपदसंघातव्यतिरेकेण पदवाक्यस्फोटाभिधानविषयत्वेन किंचिन्न कल्पनीयमित्यर्थः। अतो वर्णपदातिरिक्तस्फोटो न प्रत्यक्षगम्य इत्याह— **नेति**॥८७॥ **इति स्फोटप्रत्यक्षत्वभङ्गः॥**

313. **यादृग्भिः स्फोटधीस्ते भवति भवतु तैरर्थधीरेव वर्णैः**
वर्णैपूक्तो विकल्पस्समगतिरुभयोर्यौगपद्यक्रमादिः।

वाक्यस्फोटेऽपि तुल्यं तदिदमिह पदैरक्षरैर्वाऽवगम्ये
स्फोटे तद्बुद्धिबोध्ये सति च न घटते तत्तदध्यासक्लृप्तिः ॥ ८८ ॥

स्फोटप्रत्यक्षत्वं निरस्य स्फोटक्लृप्तिवादं प्रतिबन्द्या विशदं निरस्यति—**यादृग्भिरिति** ॥ यादृग्भिर्वर्णैस्ते स्फोटधीर्भवति तैरर्थधीरेव भवतु । वर्णेषूक्तो विकल्पः स्फोटाभिव्यक्तावपि समगतिः । उभयोः—वादिप्रतिवादिनोरित्यर्थः । यद्वा पक्षप्रतिपक्षयोः । पदस्फोटोक्तं दूषणं वाक्यस्फोटेऽपि तुल्यमित्याह—**वाक्येति** । किंच पदैरक्षरैर्वा वाक्यस्फोटः पदस्फोटश्चाभिव्यज्यत इति भवदीया प्रक्रिया । एवं च वर्णपदाभिव्यङ्ग्ये स्फोटे तस्मिंश्च स्फोटबुद्धिबोध्ये सति स्फोटे विश्वस्यापि शब्दविशेषस्याध्यास इति भवदीया क्लृप्तिरसमञ्जसैव । तदिदमाह—**न घटते** इति । स्फुटदृष्टे स्फोटे कथं वर्णाध्यासक्लृप्तिरित्यर्थः । स्फोटोऽपि क्लृप्तिमात्रमिति चेत्; कुत्र क्लृप्तिः? शब्दब्रह्मणीति चेत् वर्णातिरेकेण किं तच्छब्दब्रह्म? वर्णानामेव श्रोत्रग्राह्यत्वेन शब्दत्वात् स्फोटस्य चानुपलम्भनिरस्तत्वादिति ॥ ८८ ॥ **इति स्फोटक्लृप्तिभङ्गः ॥**

314. **शब्दो ब्रह्मेति यत्तन्मुनिभिरभिदधे स ह्यविच्छेद इष्टः**
सूक्ष्माकारस्तु सोऽर्थं न गमयति यतस्सत्तया नैष हेतुः ।
स्फोटस्त्वं वर्णजुष्टस्त्विति यदभिहितं भारते साऽपि शक्तिः
वर्णानां स्यात्तयाऽर्थः स्फुट इति घटते स्फोटशब्दोऽपि तस्याम् ॥ ८९ ॥

आगमिकस्फोटादिशब्दनिर्वाहमाह—**शब्द** इति ॥ तर्हि शब्दब्रह्मेति तत्रतत्र मुनिभिरभिधीयते, तत्किमित्यत्राह—**स हीति** । अविच्छेदः—ऋग्वेदादिरूपं शब्दमात्रम्, यदि वा शब्दस्य सूक्ष्माकारः, शब्दोत्पत्त्यवस्थाविशेषः; स चार्थावगमको न भवति; शब्दस्य सत्तयाऽर्थावबोधकत्वाभावात्, तादृशावस्थापन्नस्य शब्दस्यानुपलम्भविषयत्वात् । तदिदं सर्वमाह—**सूक्ष्माकार** इति । तर्हि *स्फोटस्त्वं वर्णजुष्ट इति **भारतोक्तं** कथमिति चेत्; इत्थम्—अर्थस्फोटकत्वात् प्रकाशकत्वाद्वर्णानां शक्तिरेव स्फोट इत्यभिधीयते । अतो वर्णानामुत्पत्त्यवस्थाग्रहविशिष्टाचिद्द्रव्यविशेषव्यतिरेकेण शब्दब्रह्मेति किंचिन्नास्ति । अर्थावबोधकशब्दशक्तिव्यतिरेकेण स्फोटशब्दवाच्योऽपि नास्तीत्यर्थः ॥ ८९ ॥ **इति आगमिकस्फोटादिशब्दनिर्वाहः ॥**

315. **यत्प्रत्येकादिकल्पे गमकविषययोरप्रतीत्यादिदोषात्**
बौद्धाश्शब्दाश्च बुद्धिं कतिचिदभिदधुर्वाक्यवाक्यार्थरूपाम् ।
नैतद्ग्राह्येन बाह्यो विदित इति मतेर्बाधकोक्तेश्च साम्या-
द्वाक्यादावैक्यबुद्धेस्त्वनुकथितनयादन्यथासिद्धितश्च ॥ ९० ॥

चिन्मात्रविवर्तवत् शब्दब्रह्मविवर्तत्वेन विश्वमपि वदन्तं शाब्दिकं प्रतिक्षिप्य प्रतिभैव वाक्यवाक्यार्थभावेन दृश्यते । न प्रतिभातिरिक्तं किंचिदिति वदन्तौ **बौद्धशाब्दिकाभासौ** प्रतिक्षिपति—**यदिति** ॥ तत्र पूर्वार्धेनानुवदति, उत्तरार्धेन परिहारं वदतीति विभागः । अयमत्र भावः—प्रत्येकं वा शब्दवाच्यमर्थः, सर्वो वा? यदि प्रत्येकमर्थः व्यभिचारः स्यात् । सर्वस्याप्यर्थत्वे पुनरानन्त्यम् । एवं प्रत्येकं वा वाचकत्वं शब्दस्य सामस्त्येन वेति विकल्प्य दूषणं वाच्यम् । तथा च गमकविषययोरप्रतीतिर्विरुद्धप्रतीतिर्वा भवेदिति दोषात् बौद्धाश्शाब्दाश्च केचिद् बुद्धिमेव वाक्य-

वाक्यार्थभावेनारोपितामाहुः । एतद्दूषयति—**नैतदिति** । कुत इत्यत आह—**बाह्येनेति** । बाह्येन शब्देन बाह्योऽर्थो विदित इति प्रतीतेः; प्रत्येकादिविकल्पेन दोषोक्तेश्च साम्यात् । वाक्यवाक्यार्थयोः प्रतिभारूपत्वेऽपि किं व्यवस्थितप्रतिभारूपत्वमुताव्यवस्थितप्रतिभारूपत्वम्? अव्यवस्थितरूपत्वे लोकव्यवहारविरोधः; व्यवस्थितरूपत्वे सैव व्यवस्था शब्दार्थयोरप्रतिभारूपत्वे स्यादिति भावः । कथं तर्हि वाक्यपदवाक्यार्थपदार्थादिष्वैक्यबुद्धिरिति चोद्यं पूर्वोक्तन्यायेन समुदायविषयत्वेन परिहृतमित्याह—**वाक्यादाविति** ॥ ९० ॥ **इति प्रतिभावाक्यवाक्यार्थत्वभङ्गः** ॥

316. **आचष्टे प्रत्ययश्च प्रकृतिरपि मिथः श्लिष्टमित्यभ्युपेतं**
स्पष्टं दण्डयादिशब्देष्वपि तदितरथा धीविरोधप्रसङ्गात् ।
अन्योन्यस्मारितार्थान्वितमभिदधति स्वार्थमेवं पदानि
स्यान्नातश्चक्रकादिर्न च पुनरभिधा नापि वाक्यस्य भेदः ॥ ९१ ॥

वाक्यानामर्थवत्त्वे सिद्धे तेषामन्विताभिधायित्वं पदप्रतिबन्द्या समर्थयते—**आचष्ट** इति ॥ द्विविधं हि वाक्यार्थप्रक्रियाभेदमाहुः तत्तत्तन्त्रनिष्ठाः, अन्विताभिधानमभिहितान्वय इति । तत्र पदैरभिहिताः पदार्था वाक्यार्थं बोधयन्तीत्यभिहितान्वयः । *पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् । न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥ इत्यन्विताभिधानम् । अयमत्र श्लोकार्थः । पदानि तावच्छ्रूयन्ते । श्रुतानि च व्युत्पत्त्यनुसारेण पदार्थस्वरूपाणि परस्परानन्वितानि स्मारयन्ति । स्मृतेषु च पदार्थेष्वाकाङ्क्षादिपरामर्शः । तत्रैव न्यायप्रवृत्तिः, न्यायप्रवृत्त्या च वचनव्यक्तिविशेषाभिव्यक्तिस्संपाद्यते । ततस्सम्यङ्न्यायानुगृहीतानि पदानि नानापदार्थविशिष्टैकप्रधानपदार्थात्मकं वाक्यार्थमभिदधतीति । अभिहितान्वयवादिनस्त्वेवमभ्यदधुः—पदैः पदार्थाः पृथक्पृथगभिधीयन्ते । तच्चाभिधानं विशेषव्यक्त्यभावात् स्मारकान्न विशिष्यते; *पदमभ्यधिकाभावात् स्मारकान्न विशिष्यते इति वचनात् । ते चाभिहिताः पदार्था योग्यत्वेन परामृश्यमानाः स्वयमेव विशेषसंसर्गात्मकं वाक्यार्थमवबोधयन्ति । न तत्र पदव्यापारः; अर्थैरेवार्थविशेषसिद्धेः । यथा कविभिरालोच्यमानाः पदार्था एव वाक्यार्थरूपमर्थविशेषं संसर्गात्मकमवबोधयन्ति, पश्चादेव शब्दरचना प्रतिपन्नार्थानुरोधेन; एवमत्राप्यर्था एवार्थविशेषमवबोधयन्तीति । अत्रान्विताभिधानवाद्याह—यथा पदे प्रकृतिप्रत्ययौ सहैवार्थं विशिष्टरूपमभिधत्तः, तथैव वाक्येऽपि सर्वे शब्दाः सहैवार्थं विशिष्टमभिदधति । तदिदमाह—**आचष्ट** इति ॥ तदिदं मत्वर्थीयप्रत्ययसहितेषु दण्डयादिशब्देष्वपि समानमिति दर्शयति—**स्पष्टमिति** । उक्तार्थेऽनुग्राहकं तर्कमाह—**इतरथेति** । उपलम्भविरोधप्रसङ्ग एव हि सर्वेष्वपि तर्केषु सारतमः; यथा पदानि प्रकृतिप्रत्ययविभागेन विभक्तान्यपि विशिष्टमेकं पदार्थं वदन्ति ; एवं पदान्यपि परस्परस्मारितार्थविशिष्टमेकमर्थं वदन्ति । अयमर्थः—कार्यपरं चेद्वाक्यं संहतान्येतानि पदानि कारकविशिष्टक्रियामभिदधति । सिद्धपरत्वेऽपि समानाधिकरणवाक्यं नीलमुत्पलमितिवन्नानाविशेषणविशिष्टमेकं विशेष्यं सिद्धमेवाभिदधाति । वैयधिकरण्येऽपि व्यधिकरणविशेषणविशिष्टं सिद्धमसिद्धं वा विशेष्यमाचष्टे—काष्ठैः स्थाल्यामोदनं पचतीति; काष्ठैः स्थाल्यामोदनः पक्व इति वा । अत्रायं सारतमोऽर्थः—योग्येतरान्वितस्वार्थाभिधायीनि सर्वाण्यपि पदानि । तत्रतत्र कारकपदानि क्रियान्वितस्वार्थाभिधायीनि । क्रियापदं तु कारकान्वितस्वार्थाभिधायकम् । एवं सिद्धपरत्वेऽपि विशेष्यपदं विशेषणान्वितस्वार्थाभिधायकम्; विशेषणपदं च विशेष्यान्वितस्वार्थाभिधायकम् । सर्वमेतदन्विताभिधानान्न मुच्यते; गुणप्रधानभावेनैव पदार्थानां प्रतीतेरेकवाक्यत्वं न विरुध्यते इति । एवमभिधानाङ्गीकारे परवाद्युक्तास्सर्वे दोषा निरस्ता

इत्याह—**स्यादिति**। पदैरर्थप्रतीतिः; अनन्तरमाकाङ्क्षादिपरामर्शः; पश्चात्पदैरर्थाभिधानम्; ततोऽर्थप्रतीतिरिति चक्रकम्। आकाङ्क्षादिपरामर्शादर्थाभिधानमर्थाभिधानानन्तरमाकाङ्क्षादिपरामर्श इत्यन्योन्याश्रयः। उभयमपि नास्ति; प्रथममर्थाभिधानाभावात् स्मरणमात्रत्वात्प्रथमं प्रत्येकमर्थानाम्। अत एव न द्विरभिधानप्रसङ्गः। विशेषणानां नानात्वेऽपि सर्वेषामपि पदानां विशिष्टार्थैक्यपरत्वेन वाक्यभेदप्रसङ्गोऽपि नास्ति ॥ ९१ ॥ **इति अन्विताभिधानम्** ॥

317. **स्वार्थे शब्दस्स चासावपि मिलितमतौ व्यापृतावित्यनेकाः**
कल्प्यास्ते शक्तयः स्युः कथमपि न भवेत्तादृशी शक्तिरेका।
अर्थेषु स्मारितेषु प्रथममथ च तद्योग्यतादौ विमृष्टे
शब्दैरेवान्विते धीर्मम भवति तव स्वार्थबोधव्यपेतैः ॥ ९२ ॥

इत्थमन्विताभिधानं साधयित्वा स एवान्विताभिधानवादी परैरभिहितमभिहितान्वयवादं दूषयति—**स्वार्थ** इति ॥ पदानां स्वार्थबोधनशक्तिः, पदार्थानां संसर्गबोधनशक्तिः, पदानामेव पदार्थेषु संसर्गबोधनशक्त्याधानशक्तिरिति शक्तित्रयं कल्प्यमभिहितान्वयवादिनः। **स चासाविति**—शब्दश्चार्थश्चेत्यर्थः। मिलितमतौ शब्दा अपि व्याप्रियन्त इति वक्तव्यमभिहितान्वयवादिना; अर्थे संसर्गबोधनशक्त्याधानशक्तेश्शब्दनिष्ठत्वादिति भावः। नन्वेकैव शक्तिः अर्थप्रतिपादनं संसर्गप्रतिपादनं च तद्द्वारा करोति, तन्न; तत्तच्छक्तीनां नियतविषयत्वात्। तदिदमाह—**कथमपी**ति। अस्माकं पुनरेकैव शक्तिर्योग्येतरान्वितं स्वार्थमभिदधातीति लाघवम्। प्रथमं स्मरणं, न तत्राभिधानव्यापारः; अथ च परामर्शः, तत्रापि न शब्दव्यापारः, केवलं विशिष्ट एवार्थे शब्दव्यापारः; अत एव शाब्दत्वं वाक्यार्थज्ञानस्यास्मत्पक्षे। युष्मत्पक्षे तु पदार्थप्रतिपादनद्वारेण कथंचिदेव शाब्दत्वम्। अतो जघन्यस्त्वत्पक्ष इत्याह—**शब्दैरेवे**ति ॥ ९२ ॥ **इति अभिहितान्वयवादभङ्गः** ॥

318. **संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानिचिद्भाष्यवाक्या-**
न्याद्यव्युत्पत्तिरुक्ता प्रतिपदमिह च क्वापि नान्यस्य हानिः।
इत्थं मत्वा सयूथ्याः कतिचिदभिहितान्योन्यसंसर्गमीषु-
स्तत्तत्स्वारस्यलोकप्रतिपदनुगमात्तच्च नाधिक्षिपामः ॥ ९३ ॥

इत्थमन्विताभिधानमु[क्तम्।] क्त्वा अभिहितान्वयपक्षेऽपि नास्माकं काचित्क्षतिरित्याह—**संसर्ग**मिति ॥ संसर्गमेव वाक्यवेद्यं कानिचिद्भाष्यवाक्यान्यभिदधति। तदनुकूलं चाम्बातातमातुलादिभिर्बालानां प्रतिपदव्युत्पत्त्यभिधानं भाष्यकारस्य। तदेतदाह—**आद्येति**। एतत्पक्षस्वीकारे नान्यस्य प्रधानार्थस्य हानिः। तदिदमाह—**इह चे**ति। यत्तु शक्तित्रयकल्पनागौरवमभिहितं, तदपि नास्ति; पदानामेव पदार्थाभिधानशक्तेः स्वीकारात्। अर्थानां संसर्गबोधनसामर्थ्यं स्वाभाव्यमेव; शब्दाभिधानमन्तरेणापि प्रतीतानामर्थानां संसर्गबोधनसामर्थ्यस्य लोके दृष्टत्वात्। अन्यथा कथमिव कवयः परामृश्यमानैः पदार्थैर्वाक्यार्थं प्रतिपद्य स्वयमेव वाक्यं रचयेयुः? शाब्दत्वं च शब्दान्वयव्यतिरेकाभ्यामेव युज्यते; वाक्यार्थस्याव्यवधाने त्वनादरः; अतोऽभिहितान्वय एव स्यादिति केचिदाचार्याः। तदेतदाह—**इत्थ**मिति। एतदङ्गीकरोति—**तत्त**दिति। तत्तद्भाष्यस्वारस्याल्लोके बालकानां व्युत्पत्तिसमये पदार्थप्रतिपत्तिपूर्वकं वाक्यार्थप्रतिपत्तिस्वारस्यानुगमादमुमपि पक्षं नाधिक्षिपाम इति। अयमत्र भावः—यद्यप्यन्विताभिधानं, तथाऽपि निर्विशेषब्रह्मवादिनो न वेदवेद्यत्वं निर्विशेषस्य

सिध्येत् । यद्यभिहितान्वयस्तथाऽपि तथा; अन्वितस्यान्वयस्य वा भेदगर्भत्वात् । अतो **गुरुकुमारिलपरिगृहीतं** पक्षद्वयमप्याश्रित्य परपक्षवादिनं प्रतिक्षिपामः, नास्माकं क्वापि निर्बन्ध इति । प्रधानार्थविरोधे हि प्रतिक्षेप्यत्वनिर्बन्धः ॥ ९३ ॥ **इति अभिहितान्वयपक्षः ॥**

319. **द्वारे भिन्ने समानाधिकरणवचसामैक्यतात्पर्यसिद्धेः**
भेदाभेदस्थितानामिदमनुगुणमित्यार्हतादेर्दुराशा ।
वस्तुस्थित्यैकरूप्ये वचनमितरथा बोधयत्स्यान्न मानं
तन्मानत्वाद्द्विधैकं स्थितमिति च न सद्भेद एवोपपत्तेः ॥ ९४ ॥

इत्थं वाक्यस्याभिधानप्रकारभेदमुक्त्वा समानाधिकरणवाक्यानां भेदाभेदपरत्वं प्रतिक्षिपति—**द्वार** इति ॥ इत्थं खल्वार्हतादीनामालापः—यत्र समवायमिच्छन्ति समवायवादिनः, तत्र भेदाभेदमेव वयमन्विच्छामः । स च भेदाभेदात्मा धर्मविशेषस्सामानाधिकरण्येनैव सिद्धः, भेदे सति मत्वर्थीयदर्शनात् सामानाधिकरण्यस्य; दण्डी कुण्डली गोमानश्ववानिति । अतो मत्वर्थीयनिरपेक्षसामानाधिकरण्यं भेदाभेदमेवोपपादयति । अत्यन्तभेदे सामानाधिकरण्यानुपपत्तेः, घटः पट इतिवत्; अत्यन्ताभेदे च सामानाधिकरण्यं न संभवति, घटो घट इतिवत् । यत्र भेदाभेदौ तत्रैव सामानाधिकरण्यम्, नीलमुत्पलमिति । अतो नीलत्वोत्पलत्वादीनां द्रव्यात्मना भवत्यैक्यम्, पर्यायात्मना भेदः । पर्यायशब्देन धर्मा उच्यन्ते । अतस्सामानाधिकरण्यं भेदाभेदानुगुणमिति । तदेतदनुभाष्य दूषयति—**आर्हतादेर्दुराशे**ति । *भिन्नप्रवृत्तिनिमित्तानां शब्दानामेक[त्र]स्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति प्रवृत्तिनिमित्तभेदेनैकार्थनिष्ठत्वलक्षणत्वात्सामानाधिकरण्यस्य, तेनैव सामानाधिकरण्येन भेदाभेदसिद्धिरिति वचनं विरुद्धभाषणत्वात् दुराशामूलमेव । यदि भेदाभेदं बोधयेत् सामानाधिकरण्यम्, प्रमाणविरुद्धार्थप्रतिपादकत्वात्प्रमाणमेव न स्यादित्याह—**वस्त्विति** । नह्यतीतमस्तीति बोधयितुमेव शक्नोति वचनम् । वचनबलाद्वस्तुस्थितिमप्यन्यथयाम इति चेत्, तन्नेत्याह—**तन्मानत्वाद्द्विधैकं स्थितमिति च न सदि**ति । कुत इत्यत आह—**भेद** इति । भेदपक्ष एव सामानाधिकरण्यस्योपपत्तेर्भवत्पक्षविरुद्धं सामानाधिकरण्यमित्यर्थः । किंच सामानाधिकरण्यस्यानेकान्तपरत्वे भेदाभेदसिद्धिः, तत्सिद्धौ सामानाधिकरण्यस्यानेकान्तनिष्ठत्वमित्यन्योन्याश्रय इति भावः ॥ ९४ ॥ **इति सामानाधिकरण्ये भेदाभेदप्रसङ्गपरिहारः ॥**

320. **ऐकाधार्याद्विगीतं तदिदमिति नयाल्लक्षयेन्निर्विशेषं**
मैवं बाधातिचारस्ववचनहतिभिः स्वोक्तदृष्टान्तदौस्थ्यात् ।
तत्तेदन्ताविरोधो वचसि न हि भवेत्तादृशाध्यक्षनीत्या
नो चेत् स्याद्वस्समस्तं क्षणिकमिह पुनर्देशभेदः क्रमात् स्यात् ॥ ९५ ॥

मा भूद्भेदाभेदपरं सामानाधिकरण्यम्; अन्यथाऽप्यनुमानबलान्निर्विशेषोपलक्षकमस्त्वित्याह । तथा हि—तत्त्वमित्यादिसामानाधिकरण्यं निर्विशेषोपलक्षकम्, सामानाधिकरण्यात्मकत्वात्; सोऽयं देवदत्त इत्यादिसामानधिकरण्यवदिति । तदेतदनुभाषते—**ऐकाधार्या**दिति ॥ दूषयति—**मैवमिति** । कुत इत्यत आह—**बाधे**ति । तत्त्वमिति विशेषणद्वयविशिष्टविषयतयोपलब्धस्य निर्विशेषपरत्वे स्फुट एव बाधः । अतिचारोऽपि नीलमुत्पलं दण्डी कुण्डलीत्यादौ सविशेषपरत्वात् । स्ववचनहतिः—तदिदमिति सामानाधिकरण्यमिति च भेदव्यवहारं कुर्वाणस्य निर्विशेषपरत्वकथनं स्ववचनविरुद्धमेव ।

स्वोक्ते च सोऽयं देवदत्त इत्यत्र निर्विशेषपरत्वदृष्टान्तेऽपि दौःस्थ्यमेव; सोऽयमिति सामानाधिकरण्यस्य तत्तेदन्ताविशिष्ट-वस्तुपरत्वात्। ननु तत्तेदन्तावैशिष्ट्यमेकस्य कथमुच्यते? तत्तेदन्तयोः परस्परविरुद्धत्वादिति ; तन्न ; विरोधाभावात्। यदि तत्तेदन्तयोरेकत्र विरोधः, तर्हि सोऽयं देवदत्त इति प्रत्यक्षोपलम्भविरोधः स्यात्। तदिदमाह—**तत्तेदन्ते**ति। तर्हि प्रत्यक्षेऽपि वचनवद्विरुद्धमेव स्यादित्याशङ्क्याह—**नो चे**दिति। एकस्य कालद्वयसंबन्धानङ्गीकारे क्षणभङ्गवाद एव प्रसज्येत। अतो न कालविरोधः। देशद्वयसंबन्धविरोधस्तु कालभेदेन परिहृत इत्याह—**इहेति**। प्रत्यभिज्ञायां देश-भेदः कालभेदादेव परिहृत इत्यर्थः। अयमत्र निर्णयः—कालद्वयमेकस्याविरुद्धम् ; अक्षणिकत्वाङ्गीकारात्। स्वप्राग-भावस्वप्रध्वंसकालौ स्वस्य विरुद्धौ। स्वकालस्तु सर्वोऽपि स्वकालत्वादेव स्वस्याविरुद्धः। स्वकालांशौ च तदेतत्कालौ स्वस्याविरुद्धावेव। तत्कालस्तत्काले वस्तुनि संबध्यते ; एतत्कालोऽप्येतत्काले। कालस्य स्वपरनिर्वाहकत्वेन कालान्तरा-नपेक्षणान्नानवस्थादोषः, नाप्यात्माश्रयदोषः। अन्यथा स्थिरवादानङ्गीकारेण क्षणभङ्गप्रसङ्गादिति ॥ ९५ ॥ **इति निर्विशेषोपलक्षणसामानाधिकरण्यभङ्गः ॥**

321. **सत्याद्युक्तिः प्रकृष्टद्युतिरुडुपतिरित्यादिवद्वस्तुमात्रं**
ब्रूते लक्ष्मोक्तिभावादिति यदि न तथा स्वोक्तिबाधादिदोषात्।
रोधस्सद्वाक्यभावाद्भवति च कथितोदाहृतिस्साध्यहीना
प्रश्नोक्तेश्चाविशिष्टं न विषय इति नापृष्टजल्पोपहासः ॥ ९६ ॥

उक्तमर्थमसहमानो मृषावादी प्रत्यवतिष्ठते—सत्यादिवाक्यमखण्डपरम् लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इति-वाक्यवत्। न चैतद्वाक्यं स्वरूपपरं न भवतीति वक्तुं शक्यते ; स्वरूपस्यैव प्रकृष्टत्वात्। कश्चन्द्र इति यदेव पृष्टं तदेव प्रतिवक्तव्यम्। अन्यथा * आम्रान् पृष्टः कोविदारानाचष्ट इति न्यायस्स्यादिति। तदेतदनुवदति—**सत्ये**त्यादिना **यदी**त्यन्तेन ॥ दूषयति—**ने**ति। तत्र हेतुमाह—**स्वोक्ती**ति। लक्ष्मोक्तिभावादिति वदसि, वस्तुमात्रं ब्रूत इति च ; पर-स्परविरुद्धमेतत् ; असाधारणधर्मो लक्षणम्, तद्वाचिनः कथं निर्विशेषवाचित्वमिति। एवं स्वाचार्यादिवचनबाधः श्रुतिबाध इत्यादिकमादिशब्दार्थः। सत्यादिवाक्यं सविशेषं वक्ति सद्वाक्यत्वादित्यादिभिः प्रतिरोधश्चानुमानस्य, बाधो वा ; तेषा-मेवानुमानानां तर्कानुग्रहणेन प्राबल्यादिति भावः। तदिदमाह—**रोध** इति। दृष्टान्तोऽपि साध्यविकल इत्याह—**भवति चे**ति। प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्य सविशेषपरत्वात्, अन्यथा लक्षणसंबन्धाभावेन चन्द्रप्रतीतिः सिध्येत्। अपृष्टोत्तरत्वचोद्यस्य किमुत्तरम्? अभाव एवोत्तरम् ; न ह्यपृष्टस्यैवोत्तरं दीयते। प्रष्टा खलु सामान्यतश्चन्द्रशब्दार्थं प्रतिपद्य तद्विशेषप्रतिपत्त्यर्थं चन्द्रस्यासाधारणलक्षणमप्राक्षीत् ; वक्ता च तदसाधारणलक्षणं प्राहेति न कश्चिद्विरोधः। अतः प्रश्नोऽपि सविशेषविषय एव, उत्तरमपि तथेति ॥ ९६ ॥

322. **एकत्रार्थे समानाधिकरणवचसां वृत्तिरुक्ता ततोऽत्र**
स्थाप्ये तत्तन्निमित्ते प्रसजति हि भिदा धर्मिणोऽपीति चेन्न।
नेतव्यं लक्ष्मवाक्यं प्रतिपदनुगुणं साऽत्र सिद्धा विशिष्टे
व्युत्पत्तेस्तादृशत्वाद्भवति तु विहतेः क्वापि भिन्नं विशेष्यम् ॥ ९७ ॥

अत्र चोदयति—**एकत्रेति**। एकस्मिन्नर्थे समानाधिकरणपदानां प्रवृत्तिरुक्ता तर्हि विशेषणभेदाद् विशेष्यभेदोऽवर्जनीयः; तत्तन्निमित्ते तत्तद्विशेषणे खण्डत्वादिवदिति भावः। [एवं] विशेषणभेदाद्विशेष्यभेदमाशङ्क्य तदेव प्रतिक्षिपति—**नेति**। तदुपपादयति—**नेतव्यमिति**। प्रतीत्यनुगुणं हि सर्वं वाक्यं प्रतिपादयति। लक्षणवाक्येऽपि प्रतीतिर्विशिष्ट एव; अन्यथा लक्षणानुपपत्तेः। व्युत्पत्तिरपि तथैव, *भिन्नप्रवृत्तीत्यादिना समानाधिकरणपदानां विशिष्ट[पर]वाचित्वस्यैव निर्णयात्। यथैव व्युत्पत्तिस्तथैवार्थं[व वाक्यं] प्रतिपादयति। तथैव श्रोतॄणां प्रतीत्युत्पत्तिः। व्युत्पत्तिश्च यथादर्शनम्। दर्शनं चानेकेषां विशेषणानामेकवस्तुनिष्ठत्वेन। अतो यत्र नीलमुत्पलमित्यादौ विशेषणमेकवस्तुनिष्ठत्वेन तत्र तथैवाङ्गीकर्तव्यम्। यत्र पुनः खण्डो मुण्ड इत्यादौ विरुद्धानां विशेषणानां भिन्नवस्तुनिष्ठत्वेन तत्र तथैवाङ्गीकर्तव्यमिति विभागः। तदिदमाह—**भवतीति**। क्वापि—खण्डो मुण्ड इत्यादौ ॥ ९७ ॥

323. **नानाधर्मप्रणाड्या बहुभिरपि पदैर्धर्मिणोऽत्रैक्यसिद्धौ**
नान्योन्याधारतैक्ये प्रसजत उचितज्ञापनैकप्रवृत्तेः।
बोध्ये सर्वैर्विशिष्टे न च वचनभिदा तच्च सूत्रादिसिद्धं
तात्पर्यं च स्वरूपे क्वचिदपि न भवेन्निर्निमित्तेऽनुपाख्ये ॥ ९८ ॥

नन्वनेकधर्मविशिष्टैकार्थाभिधाने किं क्रमेणाभिधानम्? युगपद्वा? क्रमेणाभिधाने पूर्वविशेषणविशिष्टे वस्तुनि उत्तरविशेषणाभावात् विशेषणानां च पाठे क्रमनियमाभावादन्योन्यसमवायप्रसङ्गः। युगपदभिधाने पुनरन्योन्यैक्यप्रसङ्गः; विशेषणानामपि विशिष्ट[प्रातिपदि]प्रतिपादकगतसमानविभक्तेर्विशेष्यवद्विशेषणेऽप्यैक्यप्रतिपादनावश्यंभावात्। न हि विशेषणं मुक्त्वा विशिष्टमिति किंचित् प्रतिप[ा]द्यत इत्याशङ्क्य परिहरति—**नानाधर्मे**त्यादिना **प्रसजत** इत्यन्तेन ॥ अयमत्र भावः—अन्योन्यसमवायैक्ययोः प्रसञ्जनमव्युत्पन्नानां वादः। सामानाधिकरण्यलक्षणानवधारणेनैव ह्येवमुच्यते। भिन्नानामर्थानाम् एकत्र धर्मिणि वृत्तिरर्थसामानाधिकरण्यम्। भिन्नप्रवृत्तिनिमित्तानां शब्दानाम् एकस्मिन्नर्थे वृत्तिः—प्रवृत्तिः; पर्यवसानं शब्दसामानाधिकरण्यमित्युक्तम्। तथा च क्रमाभिधाने युगपदभिधाने च नान्योन्यसमवायप्रसङ्गः। नाप्यन्योन्यैक्यप्रसङ्गः। कुत इत्यत आह—**उचितेति**। आकाङ्क्षासन्निधियोग्यतापरामर्शपूर्वकमेव शब्दार्थं प्रतिपद्यन्ते श्रोतारः तथा च योग्यमेव परामृश्यते नायोग्यं, न ह्यग्निना सिञ्चेदिति अग्निसेकयोः कार्यकारणभावं परामृशन्ति। यथैव परामृश्यन्ते तथैव प्रतिपादयन्ति पदानि। नहि विशेषणानामन्योन्यसमवायो योग्यकोटिमाटीकते। तथाऽन्योन्यैक्यमपि तेनोचितज्ञापनैकप्रवृत्तं वाक्यमनेकविशेषणविशिष्टमेकमाश्रयं प्रतिपादयति। तत्र च परामर्शदशायामेव प्राप्ताप्राप्तविभागसिद्ध्यर्थं पौर्वापर्यपरिकल्पनं विभागः। वाक्यार्थप्रतिपादनावस्थायामेकबुद्धिसमावेशेन सहितानि पदानि विशेषणविशेष्यभावेन युगपदेव विशिष्टमर्थं प्रतिपादयन्ति; अन्यथा सामानाधिकरण्यलक्षणमेव संभज्येतेति भावः। तर्हि विशेषणभेदाङ्गीकारे कथमेकवचनप्रवृत्तिरिति मन्दस्य चोद्यमाशङ्क्य परिहरति—**बोध्य** इति। तदुपपादयति—**तदिति**। सामानाधिकरण्यप्रतिपादकसूत्रभाष्यवाक्यादिसिद्धत्वादनवद्येयमास्माकी प्रक्रिया। शब्दादर्थप्रतिपत्तिर्माभूत्; तात्पर्यादेव निर्विशेषसिद्धिरित्याशङ्क्याह—**तात्पर्यमिति**। तात्पर्यमपि शब्दानां वृत्तिरेव। तच्च प्रतिपत्त्यर्हे वस्तुनि; न तु तदनर्हे। प्रतिपत्त्यर्हं च सविशेषमेव; अतो निर्विशेषे नाभिधा, नापि लक्षणा, नच गौणी वृत्तिः, नापि तात्पर्यमिति शब्दाविषयत्वमेव निर्विशेषशब्दस्तु यदि प्रामाणिकस्तदा केनचिद्विशेषणेन विशिष्टस्य विशेषणान्तरनिवारणार्थः; निर्विशेषं नगरमितिवत्

न हि नगरस्य यो गजरथतुरगादिसंबन्धः, सोऽपि निषिध्यते निर्विशेषशब्देन। अपि त्वतिपातग्रहदाहाद्युपघात एव। एवं ब्रह्मणि निर्विशेषशब्दः। यद्यप्रामाणिकप्रयुक्तोऽयं निर्विशेषशब्दः, किमस्यार्थवत्त्वगवेषणेन, नैरर्थक्यस्यैव तादृश-वचनदूषणत्वात्? न ह्यप्रामाणिकवचनमनर्थकमित्यस्माकं काचिद्धानिरिति ॥ ९८ ॥

324. **बोध्यं चेन्निर्विशेषं बहुभिरपि पदैरेकतोऽन्यद्वृथा स्या-**
दन्यव्यावृत्तिभेदात् फलमभिदधतः स्यादखण्डत्वहानिः।
व्यावृत्तिश्चेत्स्वरूपं भ्रम इह न भवेद्भासमाने तु तस्मिं-
स्तस्मात् स्वार्थेषु मुक्तेष्वखिलपदगता लक्षणैवात्र लाभः ॥ ९९ ॥

इदानीं निर्विशेषबोध्यत्वं प्रकारान्तरेणापि [विकल्प्य] दूषयति—**बोध्यमि**ति ॥ यदि बहुभिरपि सत्यज्ञानादिपदै-रेकं निर्विशेषं बोध्यम्, एकमेव पदमर्थवत्; अन्यत् सर्वं वृथैव स्यात्। ननु विधिरूपार्थपराणि सत्यज्ञानादिपदानि मा भूवन्, किंतु निषेधपराणीति यदि वदसि, तदाऽप्यखण्डवाक्यार्थभङ्गः; व्यावृत्तिरूपैरेव विशेषणैर्ब्रह्मणस्सखण्ड-त्वात्; तर्हि व्यावृत्तिर्ब्रह्मस्वरूपमेव। तथा च व्यावृत्तिभेदेनार्थवत्त्वं व्यावृत्तीनां स्वरूपत्वादैक्यं चोपपन्नमिति चेत्, तच्च न; स्वरूपभूताया व्यावृत्तेर्नित्यस्वयंप्रकाशत्वेन प्रपञ्चभ्रमो न स्यात्। तदिदमाह—**भ्रम** इति। कथं तर्हि शौक्ल्यादीनां स्वरूपमेव भेदः? इत्थम्—शौक्ल्यादीनां स्वरूपप्रतिभासे काष्र्ण्याद्यध्यासाभावात्। शौक्ल्यादयो हि स्वपरनिर्वाहकधर्माः। तेषां प्रतिभासे च न काष्र्ण्याद्यध्यासः। अतो युक्तं स्वस्यैव भेदत्वं शौक्ल्यादिषु। ब्रह्म तु न धर्मः; नापि च ब्रह्म-प्रतिभासे प्रपञ्चाध्यासनिवृत्तिः। अतः कथं व्यावृत्तिरूपत्वं ब्रह्मणः? तदयमर्थः—ब्रह्मस्वरूपस्यैव व्यावृत्तिरूपत्वे **प्राभाकर-**स्यैव शिष्योऽसि। तथा च स्वरूपभेदखण्डनबिभीषिकाभङ्गः; धर्मस्य कस्यचिद्व्यावृत्तिरूपत्वे **कणभक्षाक्षपादा**दिमतमवल-म्बसे; तथा च धर्मभेदवादखण्डनगर्वो निर्वापित इति दुर्वैतण्डिकतां मुञ्चसीति कथमखण्डवाक्यार्थ इति। यान्यत्र वक्तव्यान्यन्यानि दूषणानि **भाष्य** एव विस्तरेणानुसन्धेयानीत्यस्माभिरुपरम्यते ॥ ९९ ॥ **इति अखण्डवाक्यार्थभङ्गः ॥**

325. **बाधार्थं यत्समानाधिकरणवचनं नाविशिष्टं वदेत्त-**
त्त्रैकोऽध्यासयोग्याकृति वदति परो भेदयुक्तं तु शब्दः।
निर्दिष्टे वस्तुमात्रे भवतु कथमिहारोपितं बाधनीयं
भ्रान्तिर्भेदाप्रतीतौ विरमतु च कथं हेतुपौष्कल्ययुक्ता ॥ १०० ॥

नन्वस्मत्पक्षे बाधार्थसामानाधिकरण्याङ्गीकारान्न विशिष्टविषयत्वसिद्धिः। यथा चोरः स्थाणुरिति, तथैव *पुरुष एवेदं सर्वम्, *तत्त्वमसीत्यादिकमिति; तदेतदप्यसमञ्जसमित्याह—**बाधार्थ**मिति ॥ यदिदं बाधार्थं सामानाधिकरण्य-मित्युच्येत तद्विशिष्टमेव वदति। तत्कथमित्यत्राह—**तत्रेति**। बाधार्थे सामानाधिकरण्येऽप्येकश्शब्दोऽध्यासयोग्या-कृति वस्तु वदति, यश्चोरत्वेन प्रतिपन्न इति। परस्तु शब्दो भेदयुक्तं वस्तु वदति स्थाणुरिति। तथा च य एतावन्तं कालं चोरत्वेन प्रतिपन्नः स स्थाणुरिति चोरप्रतीतिविषयत्वं स्थाणुत्वं चैकवस्तुनिष्ठमेव प्रतीयते; तथा च सविशेषविषयत्व-मेव। चोरत्वस्थाणुत्वयोः परस्परविरुद्धत्वात्, चोरत्वबाधेन बाधार्थमित्युच्यते; यदि स्थाणुत्वमपि मिथ्या कथं चोरत्वं बाध्येत? अतो विरुद्धधर्मसद्भावस्तद्विरोधिधर्मबाधाङ्गम्। न हि शुक्तित्वसद्भावमन्तरेण रजतत्वं बाध्यते। तदिदमाह—**पर** इति। ननु वस्तुमात्रप्रतीतिरेव बाधकमस्तु, किमनेन तदतिरिक्तेन धर्मेणेति मा वोचः; वस्तुप्रतीतेरध्यासावस्था-

यामपि सद्भावादित्याह—**निर्दिष्ट** इति । बाधाभावे भ्रान्तिर्नित्यमेवानुवर्तेत; बाधश्च भेदग्रहणमन्तरेण नोपपद्यत इत्याह—**भ्रान्तिरि**ति । हेतुपौष्कल्ययुक्ता—भेदाप्रतीतिरेव भ्रान्तेर्हेतुपौष्कल्यम्; तथा च कथं भ्रान्तिर्विरमेत्? अयमर्थः—यथा चोरत्वस्य स्थाणुत्वं बाधकम्, एवं तत्तत्पदार्थगतासाधारणधर्मदर्शनमेव प्रपञ्चबाधहेतुः । अन्यथा बाध्यबाधकभाव एव न स्यादिति ॥ १०० ॥ **इति बाधार्थसामानाधिकरण्यस्यापि विशिष्टार्थत्वम् ॥**

326. **मानं बाधाद्यभावान्निगम इतरवद्वक्तृदोषस्तु नास्मिन्**
बाधोऽप्यस्यानुमाद्यैरपि न हि सुवचस्तद्बलेनैव बाध्यैः ।
संदिग्धा नात्र बुद्धिर्न च न समुदिता तेन विज्ञानसिद्धा-
वुत्सर्गाज्ञानमेतन्मतिकलुषजयः स्याच्च मीमांसयैव ॥ १०१ ॥

अत्र कश्चिदाह—मा भून्निर्विशेषपरत्वं वाक्यस्य; अथापि वेदप्रामाण्यमेव नास्तीति । तं प्रतिब्रूते—**मानमि**ति ॥ वेदः प्रमाणं कारणदोषबाधकप्रत्ययविधुरत्वे सति वाक्यत्वात्संप्रतिपन्नवाक्यवत् । न चायं विशेषणासिद्धो हेतुरित्याह—**वक्तृदोष** इति । वक्त्रभावादेव वक्तृदोषो नास्ति; बाधकप्रत्ययोऽपि न तावदनुमानेन, अनुमानस्यैवागमबाधितत्वेना-प्रमाणत्वादित्याह—**बाधोऽपी**ति । आगमेन चेद्बाधः, स चागमो वेदश्चेद्वेदप्रामाण्याङ्गीकारः । स्मृत्यादिकं चेद्वेदमूलत्वान्न वेदबाधकम् । वेदविरुद्धस्मृतिः पुनर्वेदानुकूलस्मृतिविरोधादप्रमाणमिति **शारीरकस्मृत्यधिकरणे** स्थापितम् । लौकिकं चेद्वाक्यं बाधकं तस्यालौकिकविषये प्रवृत्त्यभावादबाधकत्वमेवेति भावः । तर्हि वेदवाक्यजनितस्य ज्ञानस्य बाधित-त्वाभावेऽपि संदिग्धत्वादप्रमाणत्वमुपवर्णयाम इति चेत्, तन्न; असंदेहरूपत्वात् ज्ञानस्येत्याह—**संदिग्धे**ति । [नच] ज्ञानमेव वेदवाक्यान्न जायत इत्यनुत्पत्तिलक्षणाप्रामाण्यमपि नेत्याह—**न चे**ति । अतो विज्ञानस्य सद्भावे सति प्रामाण्यस्य स्वतस्त्वाद्वेदवाक्यमुत्सर्गात्सामान्यात् प्रमाणमेव । अप्रामाण्यशङ्कानिराकरणं मीमांसया सिध्यतीत्याह—**मति-कलुषे**ति ॥ १०१ ॥ **इति वेदप्रामाण्यम् ॥**

327. **मानं वेदोऽपि वक्तुर्गुणत इति परं न्यायवित्साधयिष्यन्**
सामान्याद् बुद्धिहेतोः प्रमितिमधिकतस्साधयत्यन्यनीत्या ।
कार्यत्वं भेदकं स त्विह वदतु कथं धीविशेषत्वहेतौ
सिद्धेऽसिद्धेऽपि नित्यप्रमितिमति विभौ निष्फलत्वादमुष्य ॥ १०२ ॥

इत्थं किल परतःप्रामाण्यवादिनो वदन्ति—वक्तुर्गुणत एव मानं वेद इति । तस्यायमनुमानाभिप्रायः—प्रमा ज्ञान-हेत्वतिरिक्तहेत्वधीना कार्यत्वे सति तद्विशेषत्वादप्रमावदिति सामान्याद्बुद्धिहेतोः । अधिकतः—अधिकेनाप्तोक्तत्वेन हेतुना । अन्यनीत्या—अप्रमादृष्टान्तेन; यथा अप्रामाण्यमनाप्तोक्तत्वेनाधिकेन हेतुना जायते, एवं प्रामाण्यमप्याप्तोक्तत्वेनाधिकेन हेतुना भवतीत्यर्थः । अत्रोत्तरम्—**कार्यत्वमि**ति । धीविशेषत्वहेतौ—तद्विशेषत्वादित्यस्मिन् हेतौ । कार्यत्वम्—भेदकं विशेषणम् । स तु—स वादी; कथं वदतु—वक्तुमशक्यमित्यर्थः । तदेवोपपादयति—**सिद्धेऽसिद्धेऽपी**ति । यदि नित्य-प्रमितिमानीश्वरस्सिद्धः, तदा स्वतःप्रामाण्यमेव सिद्धं भवति; ईश्वरप्रमितेर्नित्यत्वेन प्रामाण्यकारणाभावात् । तथा चेश्वर-प्रमितेः पक्षकोटिनिवेशो कार्यत्वे सतीति विशेषणमसिद्धम् । पक्षकोटिनिवेशाभावे क्वचित् स्वतःप्रामाण्यमेव सिध्यति ।

नित्यप्रमितिमत ईश्वरस्यासिद्धावपि कार्यत्वे सतीति विशेषणं व्यर्थं व्यवच्छेद्याभावादित्यर्थः ॥ १०२ ॥ **इति परतः-प्रामाण्योत्पत्त्यनुमानभङ्गः** ॥

328. **संवित्तीनां यथावस्थितनिजविषयोल्लेख औत्सर्गिकः स्या-**
द्वह्न्यादेर्दाहकत्वप्रभृतिवदुपधेरन्यथात्वं भ्रमांशे ।
नित्यज्ञानप्रमात्वं वदसि च निरुपाध्येव निर्हेतुकत्वा-
द्दोषाभावात् प्रमा चेच्छ्रुतिरपि जयिनी दोषदूरोज्झिता नः ॥ १०३ ॥

इत्थं वेदप्रामाण्यमुपपाद्य तत्प्रसङ्गागतं बुद्धीनां स्वतःप्रामाण्यमाह—**संवित्तीना**मिति ॥ अयमर्थः—ज्ञानानां यथावस्थितार्थप्रकाशकत्वं सामान्यमेव; भ्रान्तस्यापि ज्ञानस्य धर्मिण्यभ्रान्तत्वात् । अतो वह्न्यादेर्दाहकत्ववत् ज्ञानानां प्रामाण्यं स्वाभाविकमेव । उपधेः—मणिमन्त्रवद्दोषोपाधिवशादप्रमाणत्वं भ्रमांशे । किंच भवानपि नित्यस्येश्वरज्ञानस्य कारणाभावेन निरुपाधिकमेव प्रमात्वमाचष्ट इत्याह—**नित्ये**ति । ईश्वरज्ञाने दोषाभाव एव प्रमात्वनियामक इति चेत्; तच्छ्रुतावपि तुल्यमित्याह—**श्रुतिरपी**ति । यथा नित्यमीश्वरज्ञानं कारणदोषाभावात् प्रमाणम्; एवं वेदवाक्यमपि कारणदोषाभावात् प्रमाणम् ; तद्वाक्यजनितं ज्ञानमपि निर्दोषवाक्यजनितत्वात् प्रमैवेति । इत्थं च स्वतःप्रामाण्यं निर्वहति । घटोऽस्तीति ज्ञानमुत्पद्यते । तत्र विषयास्तित्वमेव प्रामाण्यम् । तत्तु तेनैव ज्ञानेन प्रतीयते । अतः स्वतःप्रामाण्यं प्रतीयते । यत्र पुनः शुक्तौ रजतज्ञानमुत्पद्यते तत्रापि रजतमस्तीति रजतास्तित्वमेव प्रतीयते; न पुनर्नास्तित्वं तेनैव ज्ञानेन प्रतीयते । अतो विषयास्तित्वं स्वेन, नास्तित्वं बाधकेन प्रतीयत इति स्वतः प्रामाण्यप्रतीतिः, अप्रामाण्यप्रतीतिः परत इति विभागः । शेषं विस्तरभयान्न लिख्यते ॥ १०३ ॥

329. **सर्वं साक्षात्करोति स्वत उपधिगणैरुज्झितस्संप्रसादः**
प्रामाण्यं तत्र नोपाध्युपनतमिति तत्तुल्यताऽन्यत्र युक्ता ।
आत्मस्वात्मांशयोश्च क्वचिदपि न भवेद् भ्रान्तिरंशान्तरेऽपि
स्यादेषा न स्वरूपे क्वचन परमसौ द्विप्रकारे प्रकारे ॥ १०४ ॥

किंच स्वतःप्रामाण्यं श्रुत्यर्थानुधाविना दुस्त्यजमिति दर्शयति—**सर्वमिति** ॥ * सर्वं ह पश्यः पश्यतीत्यादिश्रुतिः उपधिगणैरुज्झितः—मुक्तः संप्रसादः—जीवः सर्वं साक्षात्करोतीति वदति । तत्र प्रामाण्यमुपाधिकृतं परप्रयुक्तमिति वक्तुं न शक्यते; स्वाभाविकत्वात्तज्ज्ञानस्य । अतोऽन्यत्रापि तत्तुल्यता युक्ता—स्वाभाविकत्वमेव युक्तमिति भावः । किंच भ्रान्त्यभ्रान्तिविभागाभावेन सर्वेष्वपि ज्ञानेषु आत्मस्वात्मांशयोः क्वचिदपि भ्रान्तिर्न भवति; अतः स्वाभाव्यमेव प्रामाण्यस्य समुचितम् । अंशान्तरेऽपि—विषयांशेऽपि । एषा—भ्रान्तिः स्वरूपे क्वचन न स्यात्, सर्वं ज्ञानं धर्मिण्यभ्रान्तमिति वचनात्; तथा च विषयेऽपि स्वरूपांशे सर्वज्ञानसाधारण्यात् प्रामाण्यस्य स्वाभाविकत्वमेव युक्तमित्यर्थः । तर्हि कुत्र भ्रान्तिरित्यत आह—**परमि**ति । असौ—भ्रान्तिः । द्विप्रकारे प्रकारे—द्विप्रकारे स्वरूपनिरूपकधर्मे निरूपितस्वरूपविशेषकधर्मे चेत्यर्थः । इदं रजतमित्यत्र स्वरूपनिरूपकधर्मवैपरीत्यम् । पीतश्शङ्ख इत्यत्र निरूपितस्वरूपविशेषकधर्मवैपरीत्यमिति विभागः ॥ १०४ ॥ **इति बुद्धीनां स्वतःप्रामाण्यम्** ॥

330· भ्रान्तिज्ञानेऽपि सत्यं किमपि तव मतेऽप्यस्त्यधिष्ठानपूर्वं
सत्यैकालम्बि चैकं समयिभिरखिलैर्दुस्त्यजं स्वार्थसिद्ध्यै ।
बुद्धेस्तत्पक्षपातः स्वयमपि कथितस्सौगतैरेव कैश्चित्
स्वात्मांशे सत्यता च स्वत इति तदसौ वैदिकोक्ते वृथेर्ष्या ॥ १०५ ॥

अत्र **सौगतः** पुनरप्रामाण्यमेव स्वाभाविकमित्याह ; तन्न युज्यत इति वदति—**भ्रान्तिज्ञानेऽपी**ति ॥ अप्रामाण्यस्वाभाविकत्ववादिनोऽपि तव मते भ्रान्तिज्ञानेऽप्यधिष्ठानांशे प्रामाण्यस्य स्वाभाविकत्वं वाच्यम् ; अन्यथा निरधिष्ठानभ्रमप्रसङ्गात् । किंच *प्रमाणात्प्रमेयसिद्धिः, *युक्तियुक्तं वचो ग्राह्यमित्यादिकं वचनं सर्वैरपि वादिभिः स्वसिद्धान्तसिद्ध्यै सत्यैकालम्बि भवतीति दुस्त्यजम् ; सत्यैकालम्बि—सत्यमात्रावलम्बि । अन्यथा व्याघातात् । अतः स्वतःप्रामाण्यं सिद्धमिति भावः । किंच कैश्चित् सौगतैरेव बुद्धेः प्रामाण्यपक्षपातः स्वयमेवोक्तः ; निर्विकल्पकस्य वासनोपप्लवाभावेन स्वभावत एव प्रामाण्यात्सविकल्पकस्यापि स्वयंप्रकाशस्य स्वात्मांशे प्रामाण्यस्यावर्जनीयत्वात् । विषयांश एव हि विकल्पस्यावस्तुनिर्भासत्वम्, असंवादः, वासनोपप्लवदूषितत्वं चेति भावः । तदिदमाह—**स्वात्मांशे सत्यता चे**ति । एवं प्रामाण्यस्वाभाविकत्वे स्वस्याप्यवर्जनीये सति वैदिकोक्ते स्वतःप्रामाण्ये वृथैवेर्ष्या अवैदिकस्येति ॥ १०५ ॥

331· अप्रामाण्यं स्वभावो गुणत इतरदित्यत्र न ह्यस्ति हेतु-
र्नाभावो हेत्वपेक्षस्त्विति च न नियमादन्यथाऽतिप्रसङ्गात् ।
किंचाभावोऽपि भावान्तरमिति मथने स्वेष्टभङ्गश्च भावी
मुक्तौ शुद्धां हि बुद्धिं वदसि न यदि सा विभ्रमः स्यान्न वा स्यात् ॥ १०६ ॥

यदि प्रामाण्यं स्वभावः अप्रामाण्यमपि स्वभाव एव किंन स्यात्? अथवा स्यादप्रामाण्यमेव स्वभावः ; प्रामाण्यं तु गुणतः, अतः प्रामाण्यमेवौपाधिकमिति । एतदनूद्य परिहरति—**अप्रामाण्य**मिति ॥ न ह्यस्ति हेतुः—प्रामाण्यस्वभावत्वे सार्वत्रिकत्वं हेतुः, अप्रामाण्यस्य पुनरसार्वत्रिकत्वात् किंशुकाद्युपाधिकारुण्यन्यायेनौपाधिकतामेवाश्रयते ; अतोऽप्रामाण्यस्य स्वाभाविकत्वे हेतुर्नास्तीत्यर्थः । नन्वभावः शून्यात्मकत्वाद्धेतुनिरपेक्षः ; अप्रामाण्यं चाभावत्वाद्धेतुं नापेक्षते । तदेतदनुभाष्य परिहरति—**नाभाव** इति । कुत इत्यत्राह—**नियमाद्**िति । मुद्गरादिप्रहारघटादिध्वंसयोः पौर्वापर्यनियमेनाभावस्य हेतुनैरपेक्ष्यं न घटत इत्यर्थः । विपर्यये बाधमाह—**अन्यथे**ति । अन्वयव्यतिरेके सत्यप्यभावस्य कारणानपेक्षत्वे भावस्यापि कारणानपेक्षत्वं स्यादित्यर्थः । इत्थमभावस्य भावादतिरिक्तत्वपक्षाङ्गीकारेण दूषणमभिधाय भावान्तराभाववादेनापि दूषणमाह—**किंचेति** । गोत्वाभावोऽश्वत्वादिः, शौक्ल्याभावो नैल्यादिरिति हि भावान्तराभावः ; तथा चाभावस्य भावान्तररूपत्वे तस्याभावत्वाभावात्, अप्रामाण्यमभावत्वात् स्वाभाविकमित्यसिद्धो हेतुः । तदयमर्थः—यदभावो भावो वा यस्य स्वरूपानुबन्धि तत्स्वाभाविकम् ; यदुपाध्यन्तरसापेक्षं तदौपाधिकम् ; प्रामाण्यं च ज्ञानस्य स्वभावानुबन्धि ; धर्मिस्वरूपे संशयविपर्ययोरप्यभ्रान्तत्वात् । तथाऽस्तित्वभास्वरोर्ध्वत्वादिसाधर्म्येऽपि प्रामाण्यं दुरपह्नवम् । केवलं धर्ममात्रे वैपरीत्यं सन्देहो वा ; अतः प्रामाण्यं स्वतः, अप्रामाण्यं परत इति सिद्धम् ॥ १०६ ॥ **इति अप्रामाण्यस्वाभाविकत्वभङ्गः** ॥

332· मानत्वामानते द्वे स्वत इति वदतस्सांख्यसिद्धान्तिनस्ते
व्यक्तिद्वैतं तयोश्चेत् प्रतिनियततयोपाधिभेदोऽभ्युपेत्यः ।

व्यक्त्यैक्ये व्याहतिः स्यादथ निजविषयेष्वंशतस्ते तथाऽपि
स्याद्धीस्सर्वा तथेति स्वपरसमययोर्द्वेषरागौ जुषस्व ॥ १०७ ॥

प्रामाण्यमप्रामाण्यंच स्वत इति **सांख्याः** । तन्मतमनूद्य दूषयति—**मानत्वामानते** इति ॥ मानत्वामानत्वे द्वे अपि स्वत एव भवत इति वदतस्ते सांख्यस्य तयोर्मानत्वामानत्वयोर्व्यक्तिद्वैविध्यं चेत्—भिन्नाधिकरणवृत्तित्वं चेत् । उपाधिभेदोऽङ्गीकार्यः । कारणदोषात् क्वचिदप्रामाण्यम्, कारणगुणात् क्वचित्प्रामाण्यमिति । तथा च नैयायिकानामयं सिद्धान्तः—एकस्यामेव व्यक्तौ प्रामाण्यमप्रामाण्यं चेत् स्वाभाविकमभ्युपैषि ; तदा व्याघातः । न ह्येकमेव विज्ञानमेकविषये स्वत एव प्रमाणमप्रमाणं चेत्यनुन्मत्तो ब्रवीति । तर्हि स्वविषयेष्वंशभेदेन प्रामाण्यमप्रामाण्यं चेत्; ते प्रामाण्याप्रामाण्ये । ते इति द्विवचनम् । एवं तर्हि स्वसिद्धान्तजन्यज्ञानमपि प्रमाणाप्रमाणात्मकम्, परसिद्धान्तजन्यज्ञानमपि प्रमाणाप्रमाणात्मकं कृत्वा स्वसिद्धान्तेऽपि द्वेषम्, परसिद्धान्तेऽपि रागं भजस्वेति परिहासेनोत्तरम् ॥ १०७ ॥ **इति सांख्यपक्षनिरासः ॥**

333. **ज्ञानं मानं स्वतश्चेत्कथमिव विशयः कस्यचित्क्वापि भावी**
मीमांसा चानपेक्ष्येत्यसदुपधिकृताकारशङ्कोपपत्तेः ।
नेत्रालोकादिनीतेर्भवति च निगमोऽप्यत्र मीसांसयाऽर्थी
हेतूनां साध्यसिद्धौ सहकृदनुविधिर्हेतुभावं न हन्ति ॥ १०८ ॥

अत्र चोदयति—**ज्ञानमिति** ॥ ज्ञानं स्वत एव प्रमाणं चेत्तर्हि कस्यचित्कुत्रचित् प्रमाणमप्रमाणं वेति संशयो न स्यात्, तथा च मीमांसाऽनपेक्ष्या स्यात्; इतीमां शङ्कां निराकरोति—**असदिति** । अत्र हेतुमाह—**उपधीति** । प्रामाण्यस्य स्वाभाविकत्वेऽप्युपाधिकृताप्रामाण्यशङ्कायास्सद्भावात्तन्निराकरणार्थं मीमांसाऽपेक्षणीया स्यादिति भावः । दृष्टं चैतत्स्वत एव रूपादिविषये प्रमाणभूतस्यापि नेत्रस्यालोकादिसहकारिसाहित्यापेक्षणम् । तदिदमाह—**नेत्रेति** । यथा नेत्रमालोकमपेक्षते, एवं निगमोऽप्यर्थतत्त्वावधारणे मीमांसयाऽर्थी—मीमांसासापेक्ष इत्यर्थः । न केवलं प्रमाणानामेव सहकारिसापेक्षत्वम्, अपि तु सर्वेषामपि कारणानाम् । इदं च सापेक्षत्वं कारणानां कारणत्वं न व्याहन्तीत्याह—**हेतूनामिति** ॥ १०८ ॥ **इति स्वतःप्रामाण्यविरोधितर्कनिरासः ॥**

334. **सर्वज्ञस्य प्रमाया न खलु न विषयः स्यात्स्वकीयं प्रमात्वं**
निर्बाधा धीः प्रमेति प्रमितिरपि निजं गाहते मानभावम् ।
मानेऽर्थः स्वात्मनैव स्फुरति न च परं भाति शङ्कानिरासे
भ्रान्त्या स्वार्थान्यथात्वं स्वयमनवगतं बाधकैर्वेद्यतेऽतः ॥ १०९ ॥

उभयवादिसंप्रतिपन्नदृष्टान्तोपादानेन स्वतःप्रामाण्यज्ञप्तिमुपपादयति—**सर्वज्ञस्येति** ॥ पूर्वं प्रामाण्यस्वरूपस्य ज्ञानेषु स्वतस्त्वमुक्तम् । इदानीं प्रमाज्ञप्तेरपि स्वतस्त्वमुच्यत इति विभागः । ज्ञानस्य स्वप्रामाण्यं स्वत एव गृह्यत इति दृष्टमित्याह—**सर्वज्ञस्येति** । ईश्वरज्ञानं सर्वविषयत्वात् स्वगतमपि प्रामाण्यं गृह्णाति ; अन्यथा सर्वविषयत्वमेव न स्यात् । न केवलमीश्वरज्ञानमीदृशम्, अस्मदीयमपि ज्ञानं तथेत्याह—**निर्बाधेति** । प्रमितिः—लक्षणप्रमितिः स्वकीयमपि प्रमितित्वं गृह्णाति । अन्यथा सर्वानुवृत्तलक्षणग्रहणमेव न स्यादिति भावः । अस्त्वेवम् ; तथाऽपि कथं प्रामाण्यं स्वतो गृह्यते ? कथं वा अप्रामाण्यं परतो गृह्यते ? इत्याशङ्क्य क्रमादुभयत्रोपपत्तिमाह—**मान** इति । प्रमाणज्ञाने घटोऽस्तीति सद्भाव-

विशिष्ट एव घटः प्रतीयते, स एवार्थसद्भावो घटज्ञानस्य प्रामाण्यम्। अतः स्वतो गृह्यते प्रामाण्यम्। नन्वप्रामाण्यशङ्कानिरासकैस्संवादकारणगुणार्थक्रियाज्ञानैः किं क्रियते ? तदेव पूर्वप्रतिपन्नं प्रामाण्यं प्रतिष्ठाप्यते। न हि संवादादिज्ञानेषु घटसद्भावातिरेकेण ज्ञाप्यमस्ति। अतः स्वतःप्रतिपन्नमेवार्थतथात्वं तैरपि पुनर्गृह्यत इति प्रामाण्यग्रहणस्य स्वतस्त्वमेव। तदिदमाह—**न चेति**। भ्रान्तिज्ञानेष्वप्रामाण्यं परत एव ज्ञाप्यत इत्याह—**भ्रान्त्येति**। अर्थान्यथात्वमेव ज्ञानस्याप्रामाण्यम्; तदन्यैरेव बाधकैरवबुध्यते। न हि रजतज्ञानं रजत[ज्ञान]स्यान्यथात्वमावेदयति। अपि तु कारणदोषादिज्ञानं ज्ञानविषयस्यान्यथात्वं बोधयति। अतोऽप्रामाण्यस्य परतस्त्वमिति विभागः। अत्र वक्तव्यं सर्वमवशिष्टं स्वयमेव भाव्यमन्तेवासिभिः॥ १०९॥ **इति स्वतःप्रामाण्यज्ञप्तिप्रकारः**॥

335. **दृष्टं मान्थालभोगिप्रभृतिषु करणस्थानभेदादिचित्रं**
तादृग्द्वीपान्तरादौ श्रुतमपि न मृषा वेदसिद्धे तथा नः।
यत्रानाप्तोक्तताधीर्न भवति विहतिर्नापि संभावनायाः
किं व्याप्त्याऽत्रोपचारो विहतिमति भवेन्नैव तद्व्याप्तिदौःस्थ्ये॥ ११०॥

अस्तु स्वतःप्रामाण्यं प्रमाणस्य, अथापि वेदेष्वद्भुतोक्तीनां न याथात्म्यमित्याशङ्क्य परिहरति—**दृष्टमिति**॥ नहि वेद एवाद्भुतदृष्टिः, लोकेऽपि। अद्भुतं नाम अन्यत्रादृष्टस्यापि क्वाचित्कदर्शनम्। दृश्यते हि मान्थालव्यालादीनामन्धकारेऽपि रूपदर्शनम्, मान्थालानामाहारनिर्हारकरणयोरेकस्थानवर्तित्वम्, व्यालानां चक्षुःश्रवस्त्वम्, पक्षिषु च केषुचिदङ्गाराहारत्वम्, ईक्षणध्यानसंस्पर्शैर्मत्स्यकूर्मविहङ्गानां पुत्रपोषणम्, नालिकेरद्वीपवासिनामपक्वान्नेनैव देहधारणम्। तदिदमाह—**तादृगिति**। दृष्टान्तदृष्टं दार्ष्टान्तिके योजयति—**वेदसिद्ध** इति। लोकेऽप्यद्भुतार्था[र्थः ?]ङ्गीकारः प्रमाणसिद्धत्वादङ्गीक्रियते, किं पुनर्वेद इत्यर्थः। तर्हि सर्वमप्यघटितं वेदसिद्धमित्यङ्गीकार्यम् ? नेत्याह—**यत्रेति**। अयमत्र नियमः—यत्रानाप्तोक्तत्वज्ञानं नास्ति, प्रतीतेश्च न व्याघातः, तत्र दृष्टान्ताभावेऽपि सोऽर्थोऽङ्गीकार्यः। तदेतदाह—**किं व्याप्त्येति**। किं दृष्टान्तदर्शनेनेत्यर्थः। उपचारस्तर्हि कुत्रेत्याशङ्क्याह—**उपचार** इति। व्याघाते सत्युपचारः; नैव तत् उपचरणम्। व्याप्तिदौःस्थ्ये—दृष्टान्तदौःस्थ्ये। अपूर्वार्थस्य प्रमाणेन दर्शने पूर्वदर्शनविरूपता न दोषायेत्यर्थः। * देवकीजठरे वासः स्वोदरे विश्वदर्शनमित्यादिकं विश्वरूपस्य भगवतो योयुज्यत इत्यर्थः॥ ११०॥ **इति वेदेष्वद्भुतोक्तियाथात्म्यम्**॥

336. **वाक्यत्वात् कर्तृमत्यः श्रुतय इति यदि ब्रूहि बाधं विपक्षे**
श्रुत्या स्मृत्या च बाध्या त्वदनुमितिरियं कर्तुरत्रास्मृतेश्च।
त्वं तावत्तिष्ठ लोकैर्नहि पुरुषगुणप्रत्ययात्तद्गृहीति-
स्सन्तश्चापह्नुवीरंस्तमिह न मुनयस्सत्यनिष्ठाः कृतज्ञाः॥ १११॥

एवं वेदानां स्वाभाविकं प्रामाण्यमुपपाद्य तेषामाप्तोक्तत्वेन प्रामाण्यमुपपादयतां पक्षप्रतिक्षेपार्थं वाक्यत्वात् कर्तृमत्त्वं वेदानामित्यादिकमनुमानं दूषयितुमारभते—**वाक्यत्वादिति**॥ तथा हि—वेदवाक्यानि सकर्तृकाणि वाक्यत्वादित्य[द्य]नुमाने यदि विपक्षे बाधकतर्कोऽस्ति, स वक्तव्यः। न चेदनुग्राहकतर्काभावादप्रयोजकोऽयं हेतुः। वक्त्रभावे वाक्यत्वं हीयत इति चेत्, तन्न; स्वतन्त्रवक्त्रभावेऽपि प्रवक्तृपारम्पर्यमात्रेण वाक्यत्वस्यान्यथासिद्धत्वात्। यथा स[कर्तृ]वक्तृकाणामपि वाक्यानामुच्चारयितृपूर्वपुरुषताल्वोष्ठादिव्यापारपूर्वकत्वमेव हि वाक्यत्वे तन्त्रम्। आदौ कस्य-

चित्पुरुषस्य स्वातन्त्र्यमङ्गमिति चेन्न ; तस्य कादाचित्कसन्दर्भसाजात्य एव नियामकता । यथा भवतां ज्ञानानामनित्यत्वेन कारणगुणपूर्वकत्वेनैव प्रमात्वे सत्यपीश्वरज्ञानस्य नित्यत्वेन तादृशगुणपूर्वकत्वाभावः, एवमागन्तुकसंदर्भस्य स्वतन्त्रपुरुषपूर्वकत्वेऽपि नित्यसन्दर्भसाजात्यस्य स्वतन्त्रपुरुषपूर्वकत्वं न स्यात् । तथा च वाक्यत्वमन्यथासिद्धत्वान्न स्वतन्त्रपुरुषपूर्वकत्वं साधयति । सर्वं वाक्यमनित्यमेव वाक्यत्वादिति चेत्तन्न ; सिद्धसाधनत्वात् । तत्र चोच्चार्यमाणवाक्यस्यानित्यत्वात्, तादृशवाक्यपारम्पर्यस्य च नित्यत्वे बाधकाभावात् ; तावन्मात्रेणैव अस्माकं वेदनित्यत्वसिद्धेः । न ह्येकरूपवाक्यप्रवाहानादित्वातिरेकेण वेदवाक्यानामनादित्वं प्रतिपद्यामहे । न ह्येकरूपब्रह्माण्डप्रवाहस्यानादित्वे को नाम विप्रतिपद्यते ? सावयवत्वाद्ब्रह्माण्डस्य सादित्वे साध्यमाने तज्जातीयब्रह्माण्डस्य पूर्वं सद्भावो न निषिध्यते । एवं प्रत्येकं वाक्यस्य सवक्तृकत्वेऽपि प्रवाहस्यानादित्वे न कश्चिद्विरोधः । किंचेदमनुमानं *वाचा विरूपनित्यया, *नामरूपं च भूतानामित्यादिश्रुतिस्मृतिविरोधात् कालात्ययापदिष्टम् । तदिदमाह—**श्रुत्येति** । स्मर्तव्यत्वे सति कर्तृस्मरणाभावाच्च कर्तृशून्यो वेदः । न च जीर्णकूपारामादिषु व्यभिचारः, उपदेशपारम्पर्ये स्मर्तव्यत्वे च सत्यस्मरणस्य कर्त्रभावनियतत्वात् । मया स्मृतः कर्ता, तत्प्रत्ययाद्वेदप्रामाण्यमिति चेत्तन्न, आग्रहगृहीतस्य भवतो वाक्ये प्रामाण्याभावादित्याह—**त्वं ताव**दिति । न हि मन्वादीनां वेदपरिग्रहः पुरुषगुणप्रत्ययेनेत्याह—**न हीति** । प्रत्युत वेदस्याकर्तृकत्वमेव परमर्षयः प्रवदन्ति । ननु सर्ववेदकर्तरि भगवति विद्यमानेऽपि मन्वादयस्तदनुविधायिनश्च वेदवक्तारमपलपन्तीति, तन्न ; तेषां तदपलापे प्रयोजनाभावात् । न हि सत्यनिष्ठास्तादृशा महात्मानस्तमपि भगवन्तमपलपन्तीति संभवतीत्याह—**सन्तश्चेति** ॥ १११ ॥

337. **आदौ वेदैक्यवादस्त्वविभजनवशात्तावता नान्यसृष्टि-**
स्सर्वेषामेकवेदान्वयमपि जगदुः कालभेदप्रतिष्ठम् ।
तत्तच्छाखाविभागः प्रवचननियता काठकाद्या समाख्या
द्रष्टा मन्त्रादिकर्ता परिहृत इह चानित्ययोगः प्रवाहैः ॥ ११२ ॥

नन्वादिकाले वेदैक्यं श्रुतम्, अतस्तदातदा नानावेदसृष्टिरित्याशङ्क्य परिहरति—**आदा**विति ॥ तत्र हेतुमाह—**अविभजने**ति । तस्मिन्काले सर्वेषां वेदानामेकवेदान्वयकथनं कथम् ? तदपि युज्यते कालभेदनियतत्वात् । तदिदमाह—**कालेति** । अत एव पश्चाच्छाखाविभागकथनमपि कालभेदादेवेत्याह—**तद्व**दिति । एवं काठकादिसमाख्याऽपि प्रवचनानुबन्धित्वान्न वेदसृष्टिहेतुरित्याह—**प्रवचने**ति । एवं वेदद्रष्टृत्वान्मन्त्रादिकर्तृत्वं च व्याख्येयमित्याह—**द्रष्टेति** । कथं तर्हि नित्यस्य वेदस्यानित्यैर्योग इत्यत्राह—**अनित्ये**ति । अयमर्थः—वेदवाक्यसन्दर्भसाजात्यमनादित्वेन नियतम् ; सर्वमप्यनित्यं पदार्थजातं साजात्येन नित्येन वेदेन संबध्यते, स्फ्यकपालपुरोडाशादीनामपि साजात्येनानादित्वात् ॥ ११२ ॥

338. **भेदो मन्वन्तरादौ भवति च नियतोऽनादिसिद्धे तदंशे**
पुंसूक्तादौ श्रुतीनां जनिवचनमपि प्राग्वदाविष्कृतौ स्यात् ।
आज्ञारूपत्वमासां न च गलति विभो[रेकरूपा]रैक्यरूप्याभिसन्धे-
र्योऽसौ देवः प्रमाणं स च न शिथिलयेच्छक्तिमन्तं क्रमं तम् ॥ ११३ ॥

कथं तर्हि *प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयत इत्याशङ्क्य परिहरति—**भेद** इति ॥ अनादिसिद्धानां वेदांशानामनन्तत्वात् कस्मिंश्चिन्मन्वन्तरे कश्चिद्वेदांशः प्रवर्तत इत्यर्थः । कथं तर्हि पुंसूक्तादौ *ऋचस्सामानि जज्ञिरे

इत्यादिवचनम्? तच्च प्रादुर्भावमात्रपरमित्याह—**पुंस्त्वे**ति। अन्यथा * यो वै वेदांश्च प्रहिणोति तस्मै इत्यादिवचनशत-विरोधात्। कथं तर्हि नित्यानां वेदानामीश्वराज्ञारूपत्वम्? आज्ञावाक्यस्य तदातदाऽन्यथाकरणसंभवादित्याशङ्क्य परि-हरति—**आज्ञे**ति। हेतुमाह—**विभो**रिति। प्रतिकल्पमेकरूपाभिसन्धिरीश्वर एकरूपमेवाज्ञावाक्यं वदति। एतदेव वेदस्य नित्यत्वम्, यदेकरूप्येण सर्वेष्वपि कल्पेपूच्चार्यमाणत्वम्; ईश्वराभिसन्धिविशेषद्योतनत्वादाज्ञारूपत्वमपि न विहन्यत इत्यर्थः। नन्वीश्वरः स्वतन्त्रत्वाद्वेदान् प्रतिकल्पमन्यथयतु? नान्यथयति; अन्यथाकरणे प्रमाणाभावात्, * यथापूर्व-मकल्पयदिति यथापूर्वकल्पने प्रमाणसंभवाच्च। अतस्तत्तत्क्रमविशेषविशिष्टतया तत्तत्कार्यकारणशक्तं मन्त्रार्थवादविधिरूपं वेदराशिं नेश्वरश्शिथिलयेदिति ॥ ११३ ॥ **इति वेदनित्यत्वम्** ॥

339. **प्रेक्षावन्तो महान्तः परिजगृहुरिमं सार्थमङ्गैरनन्तं**
नेत्थं बाह्यागमानां प्रसृतिरनुपधेस्तद्गृहीतेरभावात्।
दृश्यन्ते गत्यभावो नियतिषु लघिमा वञ्चनं तर्कमोहो
वृत्तिस्वास्थ्यादि चैषामुपधिरधिगमे वैपरीत्यं तु वेदे ॥ ११४ ॥

ननु महाजनपरिग्रहाद्वेदप्रामाण्यं प्रतिपद्यन्ते वेदवादिनः। स च परिग्रहो बाह्यागमेष्वपि तुल्य इत्याशङ्क्य वैषम्यमाह—**प्रेक्षावन्त** इति। अयमर्थः—बहुजनपरिगृहीतत्वं न महाजनपरिग्रहः; अपि तूत्कृष्टजनपरिग्रहः। स तु वेदेष्वेवेति भावः। कथमन्येषामागमानामनुत्कृष्टजनपरिग्रह इत्यत्राह—**नेति**। प्रसृतिः—मर्यादा। तत्परिग्रहप्रकारपरि-शोधने वैषम्यमवगम्यत इत्यर्थः। कथमित्यत्राह—**अनुपधे**रिति। द्विविधो हि परिग्रहः। आस्तिक्यनिबन्धनः कश्चित्; अल्पाल्पप्रयोजनाभिलाषादपरः। तत्र वेदपरिग्रहः पूर्वकोटौ निविशते; बाह्यागमपरिग्रहस्सोपाधिक इत्यर्थः। उपाधिस्तु दृष्टमेव प्रयोजनम्। उपाधीनेव परिगणयति—**दृश्यन्त** इति। अनन्यगतिकत्वम्, कर्तव्याकर्तव्यनियमेषु लाघवम्, परैर्वञ्चनम्, कुतर्काभ्यासव्यामोहः, वृत्तिस्वास्थ्यम्—अशनाच्छादनादिसौकर्यम्। एतादृशमन्यदपि बाह्यागमपरिग्रहे निदानम्। एतद्वैपरीत्यं वेदपरिग्रहे दृष्टमिति न बाह्यपरिग्रहस्य वेदपरिग्रहेण तुल्यत्वमिति भावः। इदमेव न्यायविद्भिरपि * हेतुदर्शनादर्शनाभ्यां विवेकादिरुच्यते ॥ ११४ ॥

340. **नित्यैरस्पृष्टदोषैर्भवति च निगमैः पौरुषेयेषु बाधः**
पाषण्डत्वप्रथैषां जगति न च मृषा पक्षपातप्रहाणे।
अन्योन्यं चैषु बाधः प्रसजति कृतकेष्वाप्तिमोहादिसाम्यात्
संवादोऽशेषु तुल्यः परमिह कुहनासिद्धयेऽन्यप्रवेशः ॥ ११५ ॥

किंचैवं प्रमाणत्वेन प्रतिपन्नवेदवाक्याद्बाह्यानां बाधस्थापनमप्रामाण्यहेतुरित्याह—**नित्यै**रिति ॥ अतस्तेषां पाषण्ड-त्वप्रसिद्धिरप्यप्रामाण्यनिमित्तं भवतीत्याह—**पाषण्डत्वे**ति। न चैतावदेव, **बौद्धचार्वाकार्हतसांख्यादीनां** परस्परबाधो-ऽप्यप्रामाण्यहेतुरित्याह—**अन्योन्य**मिति। तत्रैकश्चेदाप्तः, अपरोऽप्याप्तः, मूढश्चेन्मूढ इत्याह—**आप्ती**ति। क्वचिद्वेद-संवादात् कुत्रचित्प्रामाण्यमिति चेत् तुल्यमित्याह—**संवाद** इति। अतस्सिद्धान्तान्तरप्रवेशः कुहनासिद्धये—परवञ्चनादि-सिद्धय इति न बाह्यसिद्धान्तैर्वेदागमस्य तुल्यत्वप्रसङ्ग इत्यर्थः ॥ ११५ ॥ **इति वेदस्य बाह्यागमेभ्यो वैषम्यम्** ॥

341. **संवादे मानवादेः श्रुतिभिरविरले संग्रहे तत्समाने**
ताभिश्चाप्तत्वसिद्धौ स्वकथित उचितस्तस्य तन्मूलभावः ।
नाक्षं लिङ्गं नरोक्तिर्भ्रम इह घटते विप्रलिप्साऽपि मूलं
नाज्ञाते भावनाऽपि श्रुतिविषयतया भाति योगे तु धर्मः ॥ ११६ ॥

इत्थं वेदस्य प्रामाण्यमुपपाद्य स्मृतीतिहासादेर्वेदमूलत्वेन प्रामाण्यमुपपादयति—**संवाद** इति ॥ अयमर्थः—मानवादेः—मन्वादिग्रन्थस्य । श्रुतिभिस्संवादे अविरले—सार्वत्रिके । संग्रहे—परिग्रहे । तत्समाने—श्रुतिभिस्समाने । स्मर्तॄणां मन्वादीनाम् । ताभिः—*यद्वै किंच मनुरवददित्यादिभिश्श्रुतिभिरेव । आप्तत्वसिद्धौ ; स्वकथितः—स्मृतिभिरेव कथितः । तस्य—मानवादेस्तन्मूलभावः । उचितः—प्राप्तः । स्मर्तार एव वेदमूलत्वं स्मृतीनामाहुरित्यर्थः । श्रुतेरेव स्मृतिमूलत्वमुक्त्वा तदन्येषां तन्मूलत्वं निषेधति—**नेति** । न तावदिन्द्रियं स्मृत्यादिमूलं संभवति ; तस्यालौकिकार्थत्वात्, तद्विषये लौकिकस्य प्रत्यक्षस्याप्रवृत्तेः । न चानुमानं तत्र प्रवर्तते ; अन्वयव्यतिरेकस्य प्रत्यक्षमूलत्वेन प्रत्यक्षस्य निवृत्तावनुमानस्यापि निवृत्तेः । न च लौकिकं वाक्यं तन्मूलम् ; तस्य प्रत्यक्षानुमानमूलत्वेन तन्निवृत्तावसंभवात् । न च भ्रम एव मूलम् ; महाजनपरिग्रहासंभवात् । तत एव न विप्रलिप्साऽपि मूलम् । तर्हि भावनैव मूलमिति चेत् तदपि नेत्याह—**नाज्ञात** इति । तथा च चक्रकमित्यर्थः । ज्ञाते भावना, भावनया च स्मृतिः, स्मृत्या ज्ञानमिति । श्रुत्या ज्ञाने पुनरस्मत्पक्षः । प्रत्यक्षादिभिः स्मृतिविषयज्ञानमत्रैव प्रतिक्षिप्तम् । कथं तर्हि महर्षीणां प्रत्यक्षेण धर्मदर्शनम् ? इत्थम्—श्रुत्या धर्मं प्रतिपद्य स्वयमनुष्ठातारो धर्मप्रभावात् प्रभावविशेषमासाद्य पश्चात् *चोदनालक्षणोऽर्थो धर्म इति श्रुतिविषयत्वेन धर्मान् साक्षात्कुर्वन्ति । नैतावता स्मृतीनां श्रुतिमूलत्वभङ्गः ; तैरपि योगिभिर्योगदशायां श्रुतिप्रमाणगम्यत्वेनैव धर्माणामुपलम्भात् । अतो वेदमूलत्वं स्मृत्यादेरुपपन्नमिति ॥ ११६ ॥ **इति स्मृतीतिहासादेर्वेदमूलत्वम् ॥**

342. **या मूलं त्वष्टकादेरियमपि मनुजैः क्वाप्यधीता श्रुतित्वात्**
सा चेन्नित्यानुमेया प्रसजति न कथं तादृशाध्यक्षक्लृप्तिः ।
सर्वस्मिन् पूर्वपूर्वस्मृतिरपि निगमोपज्ञमित्याचरिष्णौ
नित्यादृश्ये च मूले नियतमिह भवेदन्धसन्ताननीतिः ॥ ११७ ॥

इत्थं वेदमूलत्वं स्मृतीनामुपपाद्य अष्टकाद्याचारादेः **प्राभाकरोक्तं** नित्यानुमेयवेदमूलत्वं प्रतिक्षिपति—**या मूलमिति** ॥ इदमत्रानुमानम्—अष्टकाद्याचारमूलभूता श्रुतिरन्यत्र क्वचिदधीता श्रुतित्वात् प्रत्यक्षश्रुतिवदिति । नित्यानुमेया सा श्रुतिरिति चेन्न ; श्रुतित्वे नित्यानुमेयत्वव्याघातात् । ताल्वादिव्यापारैः क्वचिदुच्चार्यमाणो वर्णसंघातविशेष एव हि श्रुतिः । तस्य कथं नित्यानुमेयत्वम् ? उच्चारणदशायां वक्तृश्रोत्रोरुपलम्भात् । यदि च नित्यानुमेया श्रुतिर्मूलभूता स्मृतीनां, तर्हि तादृशं नित्यानुमेयं प्रत्यक्षमपि तन्मूलतया किं न कल्प्यते ? प्रमाणाभावादिति चेत्तुल्यम् । स्मृतिरेव मूलसद्भावे प्रमाणमिति चेत् सत्यम् । सा हि स्मृतिर्मूलमेवानुमापयति न पुनर्नित्यानुमेयत्वमपि । मूलभूतस्य वेदस्य मूलान्तराभावादिति चेन्न ; विप्रकीर्णैव श्रुतिरस्तु मूलम् ; किमनया नित्यानुमेयया श्रुत्या ? किंच सर्वेऽपि पूर्वपूर्वस्मृतिमेव प्रमाणीकृत्याचरन्ति । न कश्चिदपि वेदं दृष्टवानिति हि नित्यानुमेयत्वं वेदस्य । तथा च सर्वेषामेव परप्रत्ययमात्रशरणत्वात्

सकलस्यापि मूलभूतप्रमाणादृष्टेरन्धपारम्पर्यवदप्रमाणमूल एव स्मृतिपरिग्रह इति प्रसज्येत । अतो नित्यानुमेयवेदमूलत्वं स्मृतीनामप्रामाण्यकारणमिति ॥ ११७ ॥ इति **अष्टकादेर्नित्यानुमेयश्रुतिमूलत्वभङ्गः** ॥

343. शाखोच्छेदस्त्विदानीमिह यदि स मतस्सर्वतश्चेदसिद्धि-
व्यासागस्त्यप्रधानैर्भवति च मुनिभिर्भूषिताऽद्यापि भूमिः ।
उच्छिन्ना सा यथैवाचरितुरविदिता तत्तदाचारमूलं
तद्वत्सा विप्रकीर्णा क्रमसमधिगमः कालवद्देशतोऽपि ॥ ११८ ॥

मा भून्नित्यानुमेयवेदमूलत्वम्; उच्छिन्नशाखामूलत्वं स्मृतीनामिति तार्किकाः । तान् प्रत्याह—**शाखोच्छेद** इति ॥ अयमर्थः—किं शाखोच्छेदं प्रत्यक्षेण साधयति? तत्र प्रत्यक्षमभावादेव निरस्तम् । काव्याद्युच्छेददर्शनाद्वेदोच्छेदमपि वदाम इति चेत्तन्न; न ह्यन्योच्छेद एवान्योच्छेदः । अस्तु वा अन्योच्छेदादन्योच्छेदः; अथापि केनापि हेतुना वेदोच्छेदमनुमिमीषे । स पुनरुच्छेदः किमिदानीमेतस्मिन्नेव देशे उत देशान्तरेऽपि? पूर्वत्र सिद्धसाधनम्, एतद्देशे तत्प्रवृत्त्यभावात्; उत्तरत्र कालात्ययापदेशः, व्यासागस्त्यादेरद्यापि तत्रतत्र विद्यमानत्वात् । असिद्धिः—बाध इत्यर्थः । तर्हि विप्रकीर्णा श्रुतिः कथमत्रत्याचारमूलमिति चेत्, कथं वोच्छिन्ना श्रुतिरत्रत्याधुनिकाचारमूलमिति भवानेव पश्यतु । आचरितुरविदिताऽपि तत्पूर्वविदितत्वात् तदाचारमूलमिति चेत्, तुल्यमत्रत्यैरविदिताऽपि देशान्तरस्थैर्विदिता श्रुतिस्तदुपदेशपारम्पर्यादत्रत्याचारमूलमिति । तदिदमाह—**क्रमेति** । यथा कालक्रमागतप्रवक्तृपारम्पर्यादधिगमः, एवं देशक्रमागतप्रवक्तृपारम्पर्यादस्माकमप्यधिगम इति ॥ ११८ ॥ इति **शिष्टाचारादेरत्यन्तोच्छिन्नशाखामूलत्वभङ्गः** ॥

344. दृष्टे वेदैर्विरोधे स्मृतिपरिहरणं सूत्रभाष्यादिसिद्धं
तद्वन्नीतिः पुराणप्रभृतिषु भविनां संभवाद्विभ्रमादेः ।
स्यादन्योन्यं विरोधे त्विह बलनियतिस्सात्त्विकत्वादिभेदा-
न्मात्स्यादौ दर्शितं तच्छ्रुतिहतिरहितैस्तत्परैरेव वाक्यैः ॥ ११९ ॥

स्मृतेर्वेदमूलत्वेन श्रुतिविरोधे सत्यप्रामण्यमुक्तम् । तत्पुराणादीनामपि समानमित्याह—**दृष्ट** इति ॥ तत्र हेतुमाह—**भविना**मिति । पुरुषाणां भ्रमविप्रलम्भादिसंभवो हि वेदात् स्मृतीनां दौर्बल्ये हेतुः । स च हेतुः पुराणादिष्वपि समान इत्यर्थः । अस्तु श्रुत्या विरोधे पुराणादीनां दौर्बल्यम्; अन्योन्यविरोधे कथमित्यत्राह—**स्या**दिति । सात्त्विकत्वादिभेदस्य बलाबलहेतुत्वे प्रमाणमाह—**मात्स्यादा**विति । उक्तं हि **मात्स्ये**—* अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते । राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥ संकीर्णेषु सरस्वत्याः पितॄणां च निगद्यते । सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ॥ तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥ इति । श्रुतिविरोधरहितैस्तात्पर्यवद्भिर्वाक्यैः प्रतिपन्नत्वादयमर्थस्सर्वैरपि वादिभिरनतिलङ्घनीय इत्यर्थः । अतः श्रुत्यविरोधिनां सात्त्विकानामेव पुराणानामुपादेयत्वम्; न पुनः श्रुतिविरोधिनां राजसानां तामसानां च पुराणानामुपादेयत्वम् । तेषां संसारवर्धनाय भगवत्प्रवर्तितैः पितामहादिभिः प्रवर्तितत्वान्न सात्त्विकपरिग्राह्यत्वमिति भावः ॥ ११९ ॥ इति **पुराणादिबलाबलविभागः** ॥

345. भागे वेदाविरुद्धे पशुपतिकपिलाद्यागमास्स्युः प्रमाणं
मोहाद्यर्थं तु शेषं मुनिभिरभिहितं यत्र मज्जन्ति डिम्भाः ।

भूयस्यर्थे प्रधाने विहतिमति सतां संशयश्च क्वचित्स्यात्
श्रुत्या बाधं न रुन्धे श्रुतिसहपठितिर्हेत्वहन्तव्यता च ॥ १२० ॥

तर्हि पुराणादिवद्वेदाविरुद्धांशे **पशुपतिकपिलाद्युक्तीनां** प्रामाण्यमस्तु; कथं तर्कपादे तेषां प्रतिक्षेप इत्याशङ्कते—**भाग** इति ॥ वेदविरुद्धांशस्योपयोगं पूर्वपक्ष्यभिप्रायेणाह—**मोहाद्यर्थ**मिति । असुरमोहनार्थं तत्र वेदविरुद्धांशाभिधानम् । अतः पुराणादिवत् **कापिला**दिकमपि परिग्राह्यमिति । यत्र मज्जन्ति डिम्भाः—येष्वभिधानेषु बालिशा मुह्यन्तीत्यर्थः । परिहरति—**भूयसी**ति । न हि पुराणादिषु प्रधानार्थविरोधो भूयान् । श्रुत्युक्तमेवानुसरन्ति सत्त्वोत्तराणि पुराणादीनि । तामसानि पुनरप्रमाणान्येव । कापिलपाशुपता**दिषु** श्रुतिविरोधभूयस्त्वात् सत्त्वोत्तरस्मृतिपुराणादितुल्यत्वं नाङ्गीकुर्महे; विरुद्धस्मृतिपुराणादितुल्यत्वे का नो हानिरिति, वेदविरुद्धांशस्य भूयस्त्वात्क्वचित् सत्त्वोत्तरांशसद्भावेऽपि न सार्वत्रिकविश्वासास्पदत्वमिति भावः । संशयश्च क्वचित्स्यात्—बह्वर्थविरोधे सति संशय एव स्यादित्यर्थः । कथं तर्हि * सांख्यं योगः पञ्चरात्रमिति वेदैस्सह कथनम्? कथं वा हेतुबाध्यत्वं पञ्चानां नास्तीति? अत आह—**श्रुत्येति ।** श्रुतिविरोधे पुनर्बाध्यत्वमेव; नहि साधर्म्यमात्रेण वैधर्म्यं निवार्यत इति भावः ॥ १२० ॥ **इति पाशुपतादेर्वेदविरुद्धव्यामिश्रत्वम् ॥**

346. **निर्दोषाम्नायमौलिश्रुतनिखिलजगन्मूलसर्वज्ञमूले**
हेतुर्व्यूढे चतुर्धा क्वचिदपि न भवेद्विभ्रमः पञ्चरात्रे ।
युक्ता भक्तानुकम्पागरिमसमुदिते विप्रलिप्साऽपि नास्मिन्
वेदाच्छैष्ठ्योक्तिरर्थस्थितिविशदतया भूमविद्यादिवच्च ॥ १२१ ॥

अस्तु तर्हि **श्रीपाञ्चरात्रस्यापि पाशुपतादि**तुल्यत्वमित्याशङ्कमानं प्रतिक्षिपति—**निर्दोषेति ॥** तत्र कर्तृवैषम्यं प्रामाण्ये हेतुमाह—**निर्दोषे**ति । अयमर्थः—* सांख्यं योगः पञ्चरात्रमिति सहपठितिनिमित्तसाम्यभ्रमं मन्दानां निवारयितुं भगवता **बादरायणेनैव** * सांख्यस्य वक्ता कपिल इत्यादिना सांख्यादीनां संभावितभ्रमकपिलादिकर्तृकत्वेनाप्रामाण्यमभिधाय * पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम् । इति भगवदभिहितत्वेन प्रामाण्यमेव प्रतिष्ठापितमिति । अथापि तन्त्रमन्त्रादिसिद्धान्तभेदेन वा ज्ञानादिकाण्डभेदेन वा वासुदेवादिचातुरात्म्यप्रतिपादनभेदेन वा विभक्ते तस्मिन् शास्त्रे सार्वत्रिकाप्रामाण्याभावेऽपि क्वाचित्कमप्रामाण्यं स्यादित्याशङ्क्याह—**हेतुर्व्यूढ** इति । अत्र कुत्रापि वेदविरोधाभावात् कर्तृसामान्याच्चाप्रामाण्यशङ्का न जायत इत्यर्थः । मा भूद्विभ्रमः, विप्रलिप्सा भगवतस्स्यात्, दृष्टा हि भगवतोऽपि विप्रलिप्सा * त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारयेत्यादौ, * क्षिपाम्यजस्रमशुभानित्यादौ च । अत्राह—**युक्तेति** । द्विविधा खलु भगवतः प्रवृत्तिः; असुरमोहनार्थम् आश्रितसंरक्षणार्थं च । पञ्चरात्रे सत्त्वोत्तरजनसंरक्षणार्थमेव प्रवृत्तिः । अत एव सत्त्वोत्तरा**श्शाण्डिल्यादय** एव तच्छास्त्रप्रवक्तारः । अतो नास्मिन् शास्त्रे विप्रलिप्साऽपि कारणम् । तर्हि *साङ्गेषु वेदेषु निष्ठामलभमानः **शाण्डिल्यः** पञ्चरात्रतन्त्रमधीतवानिति वेदाच्छ्रैष्ठ्यवचनं पञ्चरात्रस्य वेदविरोधख्यापकं न कथमित्यत्राह—**वेदा**दिति । द्विधा ह्यत्र गतिः—इतिहासपुराणवदर्थवैशद्यादित्येका; **शाण्डिल्यस्य** पञ्चरात्रशास्त्राभ्यासपर्यन्तं वेदवाक्यादर्थप्रतिपत्तिर्विशदा नाभूदित्यपरा । तदेव दृष्टान्तेनाह—**भूमविद्ये**ति । यथा भूमविद्योपक्रमे भूमविद्याप्रशंसार्थम्

*ऋग्वेदं भगवोऽध्येमीत्यादिना कृत्स्नस्यापि वेदस्य अनादरेण ज्ञानहेतुत्वाभावमुक्त्वा भूमविद्याया एव ज्ञानहेतुत्वं स्वीक्रियते, नैतावता भूमव्यतिरिक्तविद्यानिन्दा; अपि तु भूमविद्याप्रशंसैव । तद्वदत्रापीति ॥ १२१ ॥

347. **जीवोत्पत्त्यादिवादो निगमवदिह तन्नित्यतोक्तेश्च साम्या-**
ज्जीवाद्याख्यानिरूढिस्त्वभिमतिभिदया स्याच्च संकर्षणादौ ।
मन्वादेश्चोपजीव्यं हिततममिदमित्यादिकं भारतोक्तं
तत्क्वाप्यैक्यं विकल्पः क्वचिदभिमतवत्ताद्दृशाम्नायभेदात् ॥ १२२ ॥

तर्हि *वासुदेवात् संकर्षणो नाम जीवो जायत इत्यादिना पञ्चरात्रे जीवोत्पत्त्यादिकं वेदविरुद्धमभिधीयत इत्याशङ्क्य परिहरति—जीवेति । निगमवत्—यथा निगम एव *इमानि भूतानि जायन्त इत्यादिना जीवोत्पत्त्यादिकमभिधीयते । तद्वत् *नित्यो नित्यानामित्यादिना जीवनित्यत्वादिकमपि निगमे निगद्यत इति चेत्तुल्यम् । अत्रापि *अचेतना परार्था च नित्या सततविक्रियेत्यादिना प्रकृतेरपि नित्यत्वमभिधीयते; किं पुनर्जीवस्य नित्यत्वम्; अनित्यत्वं च प्रकारभेदेन घटत इत्यर्थः । द्रव्यस्वरूपनित्यत्वान्नित्यत्वमचेतनस्य; स्वरूपे नामान्तरभजनार्हावस्थान्तरयोगादनित्यत्वम्; जीवस्यापि स्वरूपनित्यत्वेऽपि नानादेहपरिग्रहात्, ज्ञानसंकोचविकासयोगमात्राच्चानित्यत्वमिति । किंच *वासुदेवात्संकर्षणो नाम जीवो जायत इत्यादिवचनं जीवाद्यभिमानिसंकर्षणाद्याविर्भावपरम् । अतो न विरोध इत्याह—**जीवाद्याख्ये**ति । **मन्वादे**रिति । *इदं श्रेय इत्यादिना ऋग्यजुस्सामभिर्जुष्टमिदं पञ्चरात्रं मन्वादेरप्युपजीव्यमित्युक्तं **महाभारते** । *सात्त्वतं विधिमास्थाय गीतस्संकर्षणेन यः इत्यादिना च ब्राह्मणादीनां सर्वेषामुपजीव्यत्वं च तत्रतत्रोक्तम् । तत्क्काप्यैक्यम्—अविरुद्धतयैव संप्रतिपन्नस्थले; आपाततो विरुद्धतया प्रतिपन्ने स्थले ग्रहणाग्रहणवद्विकल्प एव । तदिदमाह—**अभिमतव**दिति । तत्रोभयत्रापि *गृह्णाति न गृह्णाति चेति वेदवाक्यमस्तीति चेत्; अत्राप्यस्ति; अत्रापि पञ्चरात्रमूलभूताया मूलश्रुतेरधीयमानत्वादिति तुल्यम् । सा मूलश्रुतिः प्रचुरं नाधीयत इति चेत् किं कुर्मः? अध्येतॄणामेव परिमितत्वेनायं दोषः यथोपनिषदामिति । एतच्चा**गमप्रामाण्ये भाष्यादौ** च विस्तरेणानुसन्धेयम् ॥ १२२ ॥ **इति श्रीपाञ्चरात्रप्रामाण्यम्** ॥

348. **सर्वे सर्वज्ञबुद्धेर्ननु विषयतया नित्यसिद्धाः कृतान्ता-**
स्तस्मात्तेन प्रवर्त्ये सति समयगणे कस्यचित्को विशेषः ।
मैवं तत्त्वे विकल्पत्यजि विहतिमतामेकशेषत्वमाना-
त्तन्निष्ठा स्यात् कनिष्ठा नमति न विदुषोऽनामिकादिः परस्मै ॥ १२३ ॥

अत्र सिद्धान्तान्तरप्रतिबन्दिमाह—**सर्वे** इति ॥ सिद्धान्तान्तरमीश्वरबुद्धेर्नित्यमेव विषयः । तस्मादीश्वरप्रवर्त्ये सर्वस्मिन्नपि सिद्धान्ते सति कस्यचित् पञ्चरात्रस्य को विशेषः? अत्रोत्तरम्—**मैव**मिति । परस्परविरुद्धतत्त्वप्रतिपादकेषु ग्रन्थेषु सर्वत्र प्रामाण्यं दुरुपपादम् । अतः क्वचित्प्रामाण्ये पञ्चरात्रस्यैव प्रामाण्यं भगवत्प्रोक्तत्वात् **शाण्डिल्यादि**सत्त्वोत्तराधिकारिपरिग्रहात्, वेदविरोधाभावात्, अन्यस्मादपि शतशः प्रतिपादितादैषम्यात् सिध्यति । ईश्वरस्य सर्वज्ञत्वेन तद्बुद्धिस्थत्वं वेदानां बुद्धागमादीनामपि समानम्; नैतावतातत्र साम्यम्; तद्वदत्रापीति भावः । अयमर्थः—अप्रमाणत्वेन तन्त्रान्तराणीश्वरबुद्धिस्थानि, प्रमाणत्वेन पञ्चरात्रमिति । अयं च न्यायो वेदबाह्यागमयोरपि समान इति ॥ १२३ ॥ **इति परसिद्धान्तप्रतिबन्दिनिस्तारः** ॥

349. अर्थे पूर्वानुभूते सहमितसदृशख्यात्यदृष्टप्रभेदै-
स्संस्कारानुग्रहे या परिणमति मतिस्सा स्मृतिस्त्रिप्रकारा ।
याथार्थ्येऽपि स्वपूर्वानुभवमनुसरेद्बाह्यशून्या न चैषा
हेतुश्चार्थक्रियादेः स्मृतिवदनुभवोऽप्यस्ति नष्टादिकेषु ॥ १२४ ॥

एवं प्रामाण्यप्रक्रियामुपपाद्य स्मृतेरयाथार्थ्यवादिनं प्रतिक्षेप्तुं स्मृत्युत्पत्तिप्रकारनाह—**अर्थ** इति ॥ पूर्वानुभूतेऽर्थे सहदृ[ष्टि]ष्टसदृशदृष्टयदृष्टभेदैः संस्कारानुग्रहे—संस्कारोद्बोधे । या परिणमति मतिस्सा स्मृतिः । सा च स्वकारण-वैविध्यात् त्रिप्रकारा । अथवा स्वकारणभूतप्रमितिभ्रान्तिसंशयानुरोधेन स्वयमपि तादृग्रूपा सती त्रिप्रकारा । अत्र कश्चि-दाह—सर्वाऽपि स्मृतिरयथार्थेति । तमुत्तरश्लोके निराकर्तुं स्मृतेः पूर्वानुभवानुसरणमाह—**याथार्थ्येऽपीति** । यथा स्मृति-रयाथार्थ्येऽपि पूर्वानुभवमनुसरेत्, तथा याथार्थ्येऽपीत्यपिशब्दार्थः । अर्थशून्या स्मृतिः कथं यथार्थेत्याशङ्क्य परिहरति—**बाह्यशून्येति** । स्मर्तव्यस्यापि स्वकाले सत्त्वादित्यर्थः । अर्थक्रियादिहेतुत्वाच्च स्मृतिर्यथार्थेत्याह—**हेतुश्चेति** । ननु स्मृति-र्नष्टविषया; नष्टं चासदेव; कथं याथार्थ्यं स्मृतेरित्याशङ्क्य प्रतिबन्द्या परिहरति—**स्मृतिवदिति** । अतीतानागतानुमाना-गमयोगिप्रत्यक्षेषु नष्टविषयत्वेऽपि याथार्थ्यं भवानेवाङ्गीकरोतीत्यर्थः ॥ १२४ ॥ **इति स्मृतिहेतुविभागादि** ॥

350. पूर्वं श्यामत्वमात्राद्भवति न हि मितिः पाकरक्तेऽपि तद्धी-
स्तत्ताभानं तथा चेत् प्रसजति तदिदं प्रत्यभिज्ञादिकेऽपि ।
याथार्थ्यं पारतन्त्र्यान्न च गलति न चेदभ्युपेतातिवृत्ति-
र्वेदे मानैस्सहोक्ता स्मृतिरपि विफला त्वक्षपादाद्यनुक्तिः ॥ १२५ ॥

उक्तमपि स्मृतियाथार्थ्यं प्रतिवाद्युक्तहेतुप्रतिक्षेपेण स्वाभिमतप्रमाणविशेषेण चोपपादयति—**पूर्वमिति** ॥ इत्थं किल परवादी स्वमतमाह—नहि पाकरक्ते श्यामतामतिर्यथार्था । इत्थं निवृत्तपूर्वावस्थे वस्तुनि तत्तामुल्लिखन्ती स्मृतिरयथार्थेति । अयं पुनरपरामर्शवादः । न हि स्मृतिर्निवृत्तामपि पूर्वावस्थां वर्तमानत्वेनोल्लिखति, तथा चेदिदमित्येवोल्लिखेत् । अपि तु निवृत्तत्वेनैव; अन्यथा तत्तोल्लेखाभावप्रसङ्गात् । पाकरक्ते तु श्यामताप्रत्ययो निवृत्त[स्यैव]स्यापि श्यामत्वस्य वर्त-मानत्वेनोल्लिखति । अतो विषमो दृष्टान्तः । उक्तमर्थं प्रतिबन्द्योपपादयति—**तत्तेति** । तथा चेत्—वर्तमानत्वेन तत्तायाः स्मृतौ भानं चेत् । प्रत्यभिज्ञायामपि तादृगेव भानमिति तत्राप्ययाथार्थ्यप्रसङ्गः । आदिशब्देनानुवादो गृह्यते; तत्रापि यत्तच्छब्दप्रयोगभूयस्त्वात् । तर्हि पारतन्त्र्यात्स्मृतेरयाथार्थ्यं वदाम इति चेत्, तच्च नेत्याह—**याथार्थ्यमिति** । उक्तार्था-नङ्गीकारे दोषमाह—**न चेदिति** । अभ्युपेतातिवृत्तिः—स्वाभ्युपेतव्याघात इत्यर्थः । न हि प्रत्यक्षपारतन्त्र्यादनुमान-मयथार्थम् । नाप्यनुमानपारतन्त्र्यादागमः । नच संस्कारपारतन्त्र्यात् प्रत्यभिज्ञानम् । अन्यदप्येतादृशमुदाहर्तव्यम् । इत्थं स्मृतेर्याथार्थ्यं युक्तिभिरुपपाद्य तत्र प्रमाणमपि वक्ति—**वेद** इति । *स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयमिति वाक्ये स्मृतिः प्रथममेव प्रमाणत्वेनोपादीयते । कथं तर्हि स्मृतेरक्षपादो न प्रामाण्यमाचष्टे तत्राह—**विफलेति** । न ह्यक्षपादः कणादः कपिल इत्यादयः प्रामाणिकत्वेन परिग्राह्याः । युक्तियुक्तं तु गृह्णीमः; न पुनस्तद्वाक्यगौरवादित्यर्थः ॥ १२५ ॥ **इति स्मृतियाथार्थ्योपपत्तिः** ॥

351. जातः पूर्वानुभूत्या स्मृतिमुपजनयेत्क्वापि संस्कार एव
प्राग्दृष्टव्यक्तिमात्रप्रतिनियतिमती कीदृशादन्वयात्स्यात् ।
मैवं कार्ये त्वबाध्ये ननु तदनुगुणः कल्प्यते हेतुयोग-
स्तज्ज्ञानोत्पाद्यभावस्स इति च विदितः किं तदन्येन नाम्ना ॥ १२६ ॥

अस्तु स्मृतिः, भवतु च यथार्था । तथाऽपि पूर्वानुभूतविषयमात्रत्वे किं नियामकमित्याशङ्कते—**जात** इति ॥ पूर्वानुभूत्या जातस्संस्कारः क्वापि स्मृतिं जनयेदेव । अथापि सैषा स्मृतिर्दृष्टव्यक्तिमात्रविषयेति कीदृशादन्वयात्—संबन्धात् स्यादिति । अत्रोत्तरम्—**मैवमि**ति । उक्तं हि बहुशः कार्ये निर्बाधेनैव प्रमाणेन स्फुटदृष्टे तदनुगुणो हेतुयोगः कल्प्यत इति । अस्माभिरवगन्तव्यो हेतुरित्यत्राह—**तज्ज्ञानोत्पाद्यभावस्स इति च विदित** इति । या स्मृतिर्येन ज्ञानेनोत्पद्यते तद्विषयमेव सा गृह्णातीति नियमः । **किं तदन्येने**ति—हेतुहेतुमद्भावनाम्नि जाग्रति किमन्येन विशेष-नाम्नेत्यर्थः ॥ १२६ ॥ इति **स्मृतेरनुभूतव्यक्तिनियतविषयत्वम्** ॥

352. **तुल्यातुल्यान्तरे धीः स्मृतिरियमिव गौस्सेति बोधोऽनुमानं
यत्तुल्यो यस्य चैतत्सम इति निजयोर्हस्तयोर्व्याप्तिसिद्धेः ।
चिह्नोन्नीते निमित्ते पदमपि विदितं शक्तमाप्तातिदेशे
व्युत्पत्तिर्लक्षणैः स्वैः क्वचिदपि न भवेदन्यथाऽतीन्द्रियेषु ॥ १२७ ॥**

इत्थं स्मृतेः प्रामाण्यमुपपाद्य परोक्तोपमानानां स्मृत्याद्यव्यतिरेकमाह—**तुल्यादि**ति ॥ अत्रैवमाहुरुपमानप्रक्रियां केचित्—तुल्यं दृष्ट्वा तत्तुल्यस्य देशान्तरस्थस्य प्रतीतिरुपमानमिति । तत्र विकल्पयामः किं स्वरूपप्रतीतिरुत सादृश्यप्रतीति-रिति । पूर्वत्र सा धीः स्मृतिरित्याह—**स्मृति**रिति । उत्तरत्र सादृश्यप्रतिपत्तिरनुमानमित्याह—**इयमिवे**ति । अनेन सदृशी मदीया गौरिति बोधोऽनुमानमेव । इयमिव—इयं गवयव्यक्तिरिवेत्यर्थः । अत्र कथं व्याप्तिग्रह इत्यत आह—**यत्तुल्य** इति । अयमत्रानुमानक्रमः—गौर्गवयसदृशः गवयस्थसादृश्यप्रतियोगित्वात्, यो यद्गतसादृश्यप्रतियोगी स तत्सदृशः, यथा वामहस्तो दक्षिणहस्तेनेति । अस्तु तर्ह्यन्यदेवोपमानलक्षणं, श्रुतातिदेशवाक्यस्य संज्ञिनि प्रत्यक्षप्रत्यभिज्ञानमुपमानम्; संज्ञासंज्ञिसंबन्धप्रमितिरुपमितिरिति । स च संबन्ध एव उपमानप्रमाणावगम्यः । अतिदेशवाक्यं च त्रिप्रकारम्; गोसदृशो गवय इति साधर्म्योपमाने, गवादिवद्द्विशफो न भवत्यश्व इति वैधर्म्योपमाने, दीर्घग्रीवः प्रलम्बोष्ठः कठोर[:]कण्टकाशी पशुः क्रमेलक इति धर्ममात्रोपमान इति । तदिदमुपमानमाप्तोदेशान्नातिरिच्यत इत्याह—**चिह्नोन्नीत** इति । यथाऽयं गौरिति व्यक्तिविशेषे गोशब्दव्युत्पादनेऽपि वक्त्रभिप्रायमालोच्य न्यायानुसारात् सार्वत्रिकीं गोशब्दव्युत्पत्तिं प्रतिपद्यन्ते बालाः । नहि यावदुक्तमेव गृह्णन्ति निरूपणधुरन्धराः प्रेक्षावन्तः । एवमेवातिदेशवाक्येऽपि प्रेक्षावन्तो न्यायपर्यालोचनेन गोसादृश्यादिचिह्नोन्नीते गवयत्वादौ श्रोतारो व्युत्पद्यन्ते; अतिदेशवाक्यश्रवणकाले गवयत्वादेरप्रत्यक्षत्वात् । यदि शब्दतो व्युत्पत्तिं प्रतिक्षिपति कश्चित् पश्चादुपमानं चापेक्षते; स कथं तैस्तैर्लक्षणैरिन्द्रोपेन्द्रादिशब्दानां व्युत्पत्तिकोटि-माटीकेत? अव्युत्पन्नो वा कथं वैदिकवाक्यार्थान् प्रतिपद्येत? अप्रतिपन्नवाक्यार्थः कथंतरामनुतिष्ठेत्? अननुष्ठानः कथं-तमां पुरुषार्थमाप्नुयात्? इति सर्वमपि दुर्वचम् । अतस्तत्तल्लक्षणोपदेशादेव प्रजापतिपशुपतिसुरपतिप्रभृतीनां स्वरूपेषु तत्तदनुबन्धेष्वर्थान्तरेष्वपि व्युत्पत्तिरिति सर्वमवदातम् ॥ १२७ ॥ इति **उपमानान्तर्भावः** ॥

353. अर्थापत्तिः परोक्ता न पृथगनुमितेर्व्याप्तिबोधादिसाम्या-
द्व्याप्यानामयुक्तिर्न हि भवति न चाव्यापकाः स्थापकाः स्युः ।
जीवन् क्वापीति बोधो न गृह इति मतिं निश्चितां नोपरुन्धे
नातस्तच्छान्तये सा न यदि सममिदं सम्मते चानुमाने ॥ १२८ ॥

एवमुपमानस्यागमान्तर्भावमुक्त्वा तद्वदेवार्थापत्तेरनुमानान्तर्भावमाह—**अर्थापत्तिरिति** ॥ व्याप्तिज्ञानादिसाम्यात् परोक्तार्थापत्तिर्नानुमानात् पृथग् भवति । आदिशब्दात् पक्षधर्मत्वमप्याह । जीवन् देवदत्तो बहिरस्ति, विद्यमानत्वे सति गृहे असत्त्वादिति देवदत्तनिष्ठतया हि हेतुरभिधीयते । अत्र व्याप्तिम् *अनियाम्यस्य नायुक्तिरित्युक्तप्रकारेण विशदयति—**अव्याप्यानामिति** । जीवनवत्त्वे सति यो यत्र नास्ति स ततोऽन्यत्रास्तीति हि व्याप्तिप्रकारः । तमेवानुस्मृत्यानुपपद्यमानदर्शनादुपपादकभूतार्थान्तरकल्पनमर्थापत्तिरित्यभिधीयते, अनुपपद्यमानं व्याप्यं, व्यापकमन्तरेण व्याप्यस्यानवस्थानात् । तदिदमाह—**अव्याप्यानामयुक्तिर्न हि भवतीति** । उपपादकाश्च नाव्यापकाः । तदप्याह—**न चाव्यापकाः स्थापकाः स्युरिति** । अनेन *अनियाम्यस्येत्यादिश्लोके पूर्वार्धं विवृतम् । अनियाम्यस्य—अव्याप्यस्य नायुक्तिः—नानुपपद्यमानता ; *नानियन्तोपपादकः—नाव्यापक उपपादक इत्यर्थः । तथा च व्याप्तिरेव नामान्तरेणानुपपत्तिरित्युच्यते ऽर्थापत्तिवादिभिः । ननु प्रमाणद्वयविरोधपरिहारोऽर्थापत्तिकार्यं, तदर्थमर्थापत्तिरिति किमपि प्रमाणमन्वेषणीयम् । जीवनप्रमाणं तावद्देशसामान्यसंबन्धाद् गृहेऽपि देवदत्तसद्भावमावेदयति, प्रतिक्षिपति च प्रत्यक्षमिति प्रमाणद्वयविरोधः । मैवम् ; द्वयोरपि प्रमाणत्वे कथं विरोधः ? विरोधे वा कथं प्रामाण्यम् ? तदिदमुक्तम्—*न मानयोर्विरोधेऽस्तीति । तदेवाचष्टे—**जीवन् क्वापीति बोधो न गृह इति मतिं निश्चितां नोपरुन्धे** इति । अतः परस्परविरोधाभावाद्विरोधशान्तये असावर्थापत्तिर्नाङ्गीकरणीयेत्याह—**नात** इति । इत्थमनङ्गीकारे धूमानुमानेऽप्यर्थापत्तित्वं कल्पयितुं शक्यत इत्याह—**न यदीति** । अयमर्थः पूर्वोक्तसंवादश्लोकान्तिमपादेनोच्यते *प्रसिद्धे चाप्यसौ समः इति ॥ १२८ ॥ **इति अर्थापत्त्यन्तर्भावः** ॥

354. तत्तद्भावैरभावव्यवहृतिनियतो मानमन्यत् किमर्थं
स्मर्तव्यस्मृत्यभावात् परमनुमिमते प्रातरश्वाद्यभावम् ।
स्यादक्षाद्भावधीवद्विमतिविषयधीरन्वयादेस्समत्वात्
भावग्राहिण्यभावं तदुचितसहकार्यागमे बोधयन्ति ॥ १२९ ॥

मा भूदर्थापत्तिः ; अभाव इति किमपि प्रमाणमन्यदेव परिगृह्यतामित्याशङ्क्य परिहरति—**तत्तदिति** ॥ भावान्तराभावस्य प्रसाधितत्वात्, भावेषु च भावस्यैव प्रमाणत्वात् अभावप्रमाणापेक्षा नास्तीति । यत्तु प्रातर्गजाद्यभावप्रतिपत्त्यर्थं प्रमाणान्तरमपेक्षन्ते, तदनुभाष्य परिहरति—**स्मर्तव्येति** । प्रातर्गजाद्यभावः स्मर्तव्यस्य स्मरणाभावादनुमीयते । इदमिहानुमानं—विप्रतिपन्नः प्रदेशः प्रातर्गजवत्तया मयाऽननुभूतः, स्मर्तव्यत्वे सति तद्वत्तया इदानीमस्मर्यमाणत्वादिति । तथा च स्मरणाभावादनुभवाभावः अनुभवाभावाच्च विषयाभाव इति प्रातर्गजाद्यभावसिद्ध्यर्थं न प्रामाणान्तरमन्वेषणीयम् । अभावस्य प्रत्यक्षगम्यत्वे सर्वाविगीतमनुमानमप्याह—**स्यादक्षादिति** । अभावज्ञानमिन्द्रियजन्यम्, इन्द्रियान्वयव्यतिरेकानुविधायित्वादित्यनुमानम् । ननु भावग्राहिप्रमाणस्य कथमभावग्राहित्वमित्याशङ्क्य परिहरति—**भावग्राहिणीति** । एकस्यापि कारणस्य सहकारिभेदेन नानाकारणत्ववद् बोधकस्यापि सहकारिभेदेन नानार्थबोधकत्वं योयुज्यत इति भावः ॥ १२९ ॥ **इति अभावप्रमाणान्तर्भावः** ॥

355.　ऐतिह्यं वृद्धवाक्यं बहुदिवसगतं यच्चनिर्द्धार्यमूलं
मानं वेदागमस्तत्तदितरदपि च स्यात्तदाभास एव ।
लक्षादिभ्यश्शतादिप्रमितिरनुमितिर्व्याप्यतादेरबाधा-
च्चेष्टालिप्यादि लिङ्गं शितमतिभिरतश्शिष्टमप्येवमूह्यम् ॥ १३० ॥

एवमैतिह्यस्याप्यागमेऽन्तर्भावः प्रामाण्ये ; प्रामाण्याभावे तु प्रमाणाभासत्वमित्याह—ऐतिह्यमिति । मानं वेदागमः ; तदितरत्—अमानं चेदाभास एवेत्यर्थः । तदिदमाहुः * जगति बहु न तथ्यं नित्यमैतिह्ययुक्तं भवति तु यदि सत्यं नागमाद्भिद्यते तत् ॥ इति । लक्षादिभ्यश्शतादिज्ञानं पुनरनुमानमेवेत्याह—**लक्षादिभ्य** इति । तत्र हेतुमाह—**व्याप्यतादे**रिति । विप्रतिपन्नं लक्षं शतवत् लक्षत्वादित्यनुमानम् । एतदप्याहुः पूर्वपठितस्यार्थस्य पूर्वार्धेन * इह भवति शतादौ संभवाद्यासहस्रे मतिरवियुतिभावात् साऽनुमानादभिन्ना । इति । एवं चेष्टया पुरुषाभिप्रायविशेषानुमानम्, सङ्केतविशेषयुक्तया लिप्या लिङ्गभूतया वर्णविशेषबोधनम्, अन्यच्चैतादृशं सर्वं साङ्केतिकं शितमतिभिः—बुद्धिमद्भिः अनुमानविशेषतया भाव्यम् ॥ १३० ॥ **इति ऐतिह्यसंभवाद्यन्तर्भावः ॥**

356.　**मानत्रित्वे तु मन्वाद्यनुमतिविषये तत्र यत्कैश्चिदाप्तै-
राधिक्यं क्वाप्यधीतं तदपि सुघटितं गोबलीवर्दनीत्या ।
उक्तार्थोदाहृतिर्वा भवतु बहुमुखी शिष्यमेधामहिम्ने
सर्वे च स्वेष्टतन्त्रेष्वनुकथनशतं निर्वहन्त्येवमूहैः ॥ १३१ ॥**

ननु * आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना । यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ इति प्रत्यक्षादिभेदेन प्रमाणत्रित्वे मन्वादीनामभिमते कैश्चिदाप्तैराधिक्यमप्यभिधीयते ; तत्कथमिति चोद्यमनुभाषते—**मानत्रित्व** इति ॥ तत्परिहरति—**तदपी**ति । अधिककथनं तात्पर्यविशेषेण गोबलीवर्दन्यायेनाविरुद्धमित्यर्थः । अथवा उक्तस्यवार्थस्य शिष्यमेधामहिम्ने बहुमुखमुदाहरणं तद्भवत्वित्याह—**उक्ते**ति । अयं निर्वाहः सर्वेष्वपि शास्त्रेषु पौनरुक्त्यपरिहारे साधारण इत्याचष्टे—**सर्वे** चेति ॥ १३१ ॥ **इति अधिकप्रमाणपरिगणननिर्वाहः ॥**

357.　**प्रत्यक्षादित्रिकं यत्पृथगभिदधता भाष्यकारेण शेषं
नैव क्षिप्तं न चोपस्कृतमिह न ततः स्यात्तदाधिक्यसिद्धिः ।
रीतिः सर्वोदितानामियमिति हि तथोदासि सङ्ख्याविवादे
तेनान्वारुह्य तत्तत्समधिकगणना स्वीकृता नस्सयूथ्यैः ॥ १३२ ॥**

कथं तर्हि **भाष्यकारैः** प्रमाणत्रयमभिधाय शिष्टं प्रमाणं न प्रतिक्षिप्तम् ? तस्मादाधिक्यमिति कश्चिन्मनुते । तस्योत्तरम्—**प्रत्यक्षादी**ति । **न चोपस्कृतमिहे**ति—क्षेपाभाववदुपस्काराभावादाधिक्यं न सिध्यतीत्यर्थः । अत एव सगुणविषयत्वेन प्रमाणत्रयमुपन्यस्य सर्वोदितानां प्रमाणानामियमेव हि रीतिरिति **भाष्यकारै**रुदासि । अतोऽस्मत्सयूथ्यानामाधिक्यकथनमन्वारुह्य वादो न पुनः स्वपक्ष इति संप्रदायनिर्णयः ॥ १३२ ॥ **इति प्रमाणसंख्यानियमसंप्रदायः ॥**

358.　**मानं सर्वोपजीव्या प्रथममिह भवेदक्षजन्या मनीषा
तन्मूला चानुमा स्यात्तदुभयजनितस्त्वागमो द्विप्रकारः ।**

मूलं न क्वापि बाध्यं क्वचिदधिकबलैर्मूलजातीयबाधः
स्यादेतैः कर्ममालाघटितभवघटीयन्त्रजभ्रान्तिशान्तिः ॥ १३३ ॥

इत्थं प्रमाणत्रयं विविच्य तद्विवेकप्रयोजनमाह—**मान**मिति ॥ अनुमानागमयोरपि मूलत्वात् सर्वोपजीव्यं प्रत्यक्षमेव प्रथमम् । तन्मूलमनुमानं ततः । तदुभयनियतस्त्वागमः पश्चान्निश्चीयते । स चागमो द्विप्रकारः—दृष्टार्थोऽदृष्टार्थश्चेति । दृष्टार्थः कारीर्यादिप्रतिपादकः ; अदृष्टार्थः स्वर्गादिसाधनप्रतिपादकः । अथवा द्विप्रकारः—प्रवृत्तिधर्मप्रतिपादको भागो निवृत्तिधर्मप्रतिपादको भाग इति । अत्राहुर्**मृषावादिनः**—उपजीव्यमपि प्रत्यक्षमुपजीवकेन बाध्यते, एवमनुमानेनापि; तत्प्रतिक्षिपति—**मूलं न क्वापि बाध्य**मिति । स्वमूलबाधे स्वस्यैव बाधेन व्याघातादित्यर्थः । कथं तर्हि प्रत्यक्षोपजीविना ज्वालाभेदानुमानेन प्रत्यक्षोपमर्द इत्याशङ्क्याह—**क्वचि**दिति । अयमर्थः—अधिकबलैर्विजातीयैः प्रमाणैर्मूलजातीयस्यैव बाधः क्रियते ; न पुनः स्वमूलस्यैव । न हि ज्वालाभेदानुमानं ज्वालैक्यप्रत्यक्षमुपजीवति ; अपि तु वर्तितैलादिसामस्त्यप्रत्यक्षम् । इयं खलु तत्रानुमानप्रक्रिया—विप्रतिपन्ना प्रदीपसामग्री स्वानन्तरभाविप्रदीपवती, प्रदीपसामग्रीत्वात् प्रथमप्रदीपसामग्रीवत् । विप्रतिपन्नः प्रदीपसामग्रीनाशः स्वानन्तरभाविप्रदीपनाशवान् प्रदीपसामग्रीनाशत्वात् चरमप्रदीपसामग्रीनाशवदिति । तत्र यत्प्रत्यक्षमनुमानेनोपजीव्यते न तद्बाध्यते ; यत्तु बाध्यते न तदुपजीव्यत इति विवेकः । अतस्तैः प्रमाणैर्निपुणं निरूपितैः कर्ममालाघटितभवघटीयन्त्रजभ्रान्तेरज्ञानस्य शान्तिरित्यर्थः । अयमत्र बाध्यबाधकभावनिर्णयः—द्वयोः प्रमाणयोर्विरोधे यत् संभाव्यमानान्यथासिद्धि तद्बाध्यम्, अनन्यथासिद्धमितरद् बाधकमिति । सावकाशत्वनिरवकाशत्वाभ्याम् अन्यथासिद्ध्यनन्यथासिद्धिविवेकः । सावकाशत्वं च क्वचिदप्रमाणकोटिनिवेशात्, इदं रजतमित्यादौ । क्वचिद्विषयान्तरलाभात् *न हिंस्यात् सर्वाभूतानीत्यादौ । निरवकाशत्वं तु तदुभयाभावेन सिध्यति नेदं रजतं, *पशुमालभेतेत्यत्र । अप्रमाणकोटिनिवेशश्च कारणदोषाद् बाधकप्रत्ययाच्च भवति । उभयं च यत्र नास्ति तत्प्रमाणमेव । अतः प्रपञ्चग्राहिणः प्रत्यक्षस्य काचकामलादिकारणदोषाभावात् काल्पनिकबाधस्य बुद्ध्यादिकल्पितबाधेन मृषावादिपक्षस्याप्युन्मूलनहेतुत्वान्निर्दोषमेव प्रत्यक्षादिकमवतिष्ठत इति निर्मूलोऽयं मृषावादिवादः ॥ १३३ ॥

359. **सर्वं संदिग्धसत्त्वं क्षणिकमगुणकं नित्यमाकस्मिकं वा**
बुद्धिः कृत्स्ना न मानं निखिलमपि ततः स्यान्मृषा धीतरद्वा ।
प्रख्योपाख्यादवीयः किमपि नियतिमन्नामरूपं च नेत्या-
द्युद्वेलापार्थजल्पानपहसितुमसौ वर्णितो मानभेदः ॥ १३४ ॥

न केवलं मृषादिवादिवादस्यैकस्यैवोन्मूलनार्थं प्रत्यक्षादिप्रमाणत्रयपरिशोधनम्; सर्वेषामपि तद्बोत्रनिष्ठानां दुर्वादिनामुन्मूलनायेत्याह—**सर्व**मिति ॥ सर्वं सन्दिग्धसत्त्वमिति **विश्वखण्डकः** ; क्षणिकमिति **वैभाषिकसौत्रान्तिकयोगाचाराः** । अगुणकमित्यपि त एव; अथवा **मृषावाद्यपि** । नित्यमिति **सांख्याः** अवस्थानामप्यनागन्तुकत्वात् । आकस्मिकमिति **चार्वाकाः** । बुद्धिः कृत्स्ना न मानमिति स एव **खण्डकः** । निखिलमपि ततः स्यान्मृषेति तद्गुरुर्**माध्यमिकः** । धीतरद्वे[त्यद्वैतवादी]ति **चेतनावादी** । प्रख्योपाख्यादवीयः किमपीति स एव **माध्यमिकः** । प्रख्या—बुद्धिः उपाख्या—व्यवहारः । तच्छिष्यसंप्रदायपालिनोऽन्येऽपि । नियतिमन्नामरूपं च **नेत्यनेकान्तवादिनः**, इत्याद्युद्वेलसप्तभङ्ग्यादिनानाजल्पानपहसितुमसौ प्रमाणभेदो वर्णितः ॥ १३४ ॥ **इति प्रमाणविवेकप्रयोजनम्** ॥

360. प्रज्ञाव्युत्पत्तिपाकव्यवहरणफलश्रेणिनिश्रेणिकाया-
मारूढा निष्प्रकम्पा प्रमितिगुणकरालम्बनात्मत्परीक्षा ।
मिथ्यालीकादिशापैरपि न न भवति प्राप्तविस्रम्भसौधा
तत्साह्याद्वाह्यपाटच्चरमुषितमिदं सद्धनं प्रत्यनैष्म ॥ १३५ ॥

इत्थं प्रमाणैरर्थपरीक्षणं कृत्वा प्रकृतमर्थं निगमयति—प्रज्ञेति ॥ अत्र प्रज्ञाव्युत्पत्त्यादिर्निश्रेणिका, तस्यामारूढा परीक्षा कथं निष्प्रकम्पा? प्रमितिगुणकरालम्बनात् । इयं परीक्षा फलप्राप्तिविस्रम्भसौधमधिरुह्य मृषावादिप्रभृतिभिरभिहितै-र्मिथ्यालीकादिशापैर्न न भवति । तेषां व्यवहारः शापमात्रमेव, न युक्तियुक्तमित्यर्थः । सुरक्षितस्थलेऽवस्थिता तेषां वचनैरनर्थकैर्न भवति । सुरक्षितपरीक्षासाह्याद्वेदबाह्यपाटच्चरापहृतं तत्त्वज्ञानरूपं सद्धनं प्रत्यनैष्मेत्यर्थः ॥ १३५ ॥
इति परीक्षाफलविशेषः ॥

॥ इति श्रीसर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे बुद्धिसरः चतुर्थः ॥ ४ ॥

॥ अथ अद्रव्यसरः पञ्चमः ॥ ५ ॥

361. तत्तद्द्रव्येषु दृष्टं नियतिमदपृथक्सिद्धमद्रव्यजातं
तद्वद्विश्वं परस्य व्यवधिनियमनान्न स्वरूपेऽस्य दोषः ।
इत्थं निर्धार्य भाव्ये भगवति विविधोदाहृतिव्यक्तिसिद्ध्यै
निर्बाधान् द्रव्यधर्मान्निरनुगतिगलद्दुर्नयान्निर्णयामः ॥ १ ॥

इत्थं द्रव्यवर्गं विचार्य अद्रव्यं विचारयिष्यंस्तद्विचारस्य प्रधानप्रयोजनमाह—तत्तदिति ॥ तेषुतेषु द्रव्येषु दृष्टं नियतिमत्—यस्य द्रव्यस्य यदुचितं तत्तत्रैव नियतमित्यर्थः । तच्च तत्रतत्रापृथक्सिद्धमद्रव्यजातम् । तद्वदेव विश्वमपि परस्यापृथक्सिद्धम् । एवं च सति विशेषणगतानां विकारदीनां व्यवधिनियमनात्—तत्तद्द्रव्यव्यवधानेन भगवद्विशेषणत्वात् न स्वरूपे भगवतो दोषः—न विकारादिसंबन्ध इत्यर्थः । इत्थं निर्धार्य भाव्ये—ध्यातव्ये भगवति विविधोदाहरणव्यक्ति-सिद्ध्यै निर्बाधान्—प्रामाणिकान् बाधकप्रमाणविधुरांश्च द्रव्यधर्मान् । निरनुगतिगलद्दुर्नयान् अनुगतिः—व्याप्तिः ; निरनु-गतिः—अव्याप्तिः ; व्याप्त्यभावेन स्वयमेव गलद्दुर्नयान्निर्णयामः ॥ १ ॥ **इति अद्रव्यविचारप्रधानप्रयोजनम् ॥**

362. व्याख्यातं द्रव्यषट्कं व्यतिभिदुरमथाद्रव्यचिन्ताऽस्य सत्ता-
धीभेदादेः पुरोक्ता निजगदुरनुपादानतां तस्य लक्ष्म ।
द्रव्यादत्यन्तभिन्नं त्विदमनुपधिकं तद्विशिंष्यात् स्वभावात्
दृष्टे न ह्यस्त्ययुक्तं न कथमितरथा विश्वतत्त्वापलापः ॥ २ ॥

इत्थं द्रव्यषट्के व्याख्याते तदनुबन्ध्यद्रव्यप्रमाणादिकमुच्यत इत्याह—व्याख्यातमिति ॥ द्रव्यषट्कं—चिद-चिदीश्वरधर्मभूतज्ञानकालनित्यविभूतिरूपम् । व्यतिभिदुरं—परस्परलक्षणासङ्करेण भिन्नस्वभावम् । अथाद्रव्यचिन्ता प्रवर्तते । अस्याद्रव्यस्य सत्ता बुद्धिभेदादेः प्रागेवोक्ता । तस्य चाद्रव्यस्यानुपादानत्वं लक्षणं निजगदुः—अवस्थावद् द्रव्यम्, तद्व्यतिरिक्तमद्रव्यम् । आगन्तुरपृथक्सिद्धधर्मोऽवस्थेति प्रागेवोक्तम् । इदं चाद्रव्यं द्रव्यादत्यन्तभिन्नम्, न पुनः

कौमारिलजैनादिवद् भिन्नाभिन्नम् । इदं चानुपधिकं समवायादिसंबन्धाभावेन स्वभावादेव तत्—द्रव्यं विशिंष्यात् । यथा समवायः स्वयं संबन्धान्तराभावेऽपि स्वभावादेव तावेव संबन्धिनौ संघटयति नान्यौ, नापि स्वयंसंबद्धः । एवमेव द्रव्याद्रव्ये स्वभावादेव विशिष्टव्यवहारमातन्वाते ; अपर्यनुयोज्यत्वाद्वस्तुस्वभावानाम्, स्वभावो नाम प्रामाणिकं रूपम् । अपृथक्सिद्धविशेषणत्वेनोपलभ्यन्ते द्रव्यं प्रत्यद्रव्याणि । अन्यथा भवताऽपि कथमवश्यमेकमपराश्रितमेवावतिष्ठत इत्यादिकमुद्धुष्यते । अयमर्थः—भवता ययोरयुतसिद्ध्या समवायः कल्प्यते तयोरयुतसिद्धिरेव संबन्धः, न पुनस्तत्कल्पनीयः समवायः; कल्पनागौरवात्, स्वाभाविकापृथक्सिद्धिव्यतिरेकेण समवायस्यानुपलम्भात् । अतः स्वभावादेव द्रव्याद्रव्ययोरुपश्लेषः । न हि दृष्टेऽनुपपन्नं नाम । दृष्टापलापे विश्वमपि लोलुप्येत । दृष्टमित्येव दृष्टं तावद्गृह्यते । अनुमेयमपि दृष्टसजातीयत्वेन । तत्रापि विशेषतोदृष्टं दृष्टमेव । सामान्यतोदृष्टमपि सामान्याकारेण दृष्टमेव । अतो दृष्टानुरोधित्वमनुमानस्यापि । आगमोऽपि व्युत्पत्त्यादिसमये दृष्टमपेक्षते । इत्थं साधनसमये दृष्टानतिलङ्घनमुक्तम् । एवं दूषणसमयेऽपि दूषणमप्यभिधीयमानं दृष्टानुरोधि चेद्भवत्येव दूषणम् । न चेद्दूषणमेव न भवति । व्याघातो हि सर्वदूषणानां सीमाभूमिः । स च दृष्टविरुद्धाभिधानेन ख्याप्यते । अतीतमस्ति, सर्वं मिथ्या, माता मे वन्ध्या, यावज्जीवमहं मौनीत्यादिषु व्याघातवचनं दृष्टविरोधोत्पादनमेव । अतो दर्शनानुरोधानङ्गीकारे सर्वापलापप्रसङ्गः ॥२॥ **इति अद्रव्यप्रमाणादि ॥**

363. **अद्रव्यं द्रव्यसिद्धौ तदुपहिततया तच्च लक्ष्येत तस्मा-**
देकासिद्धौ द्वयं नेत्यपि न सदुभयान्योन्यवैशिष्ट्यदृष्टेः ।
आधारे द्रव्यशब्दस्तदधिकरणकेनाश्रये त्वन्यदित्थं
व्युत्पत्तिर्विश्वहृद्या न तदपलपति स्वर्गकर्णीसुतोऽपि ॥ ३ ॥

अत्र कश्चिद्विश्वापलापवादी द्रव्याद्रव्यविभागमप्यपलपति—**अद्रव्यमिति** ॥ द्रव्यसिद्धावेव अद्रव्यसिद्धिः; अद्रव्यस्य द्रव्यप्रतियोगित्वेन तदसिद्धावसिद्धेः । तथा द्रव्यमप्यद्रव्यसिद्धिपूर्वकमेव । अवस्थावद्द्रव्यमिति हि द्रव्यं लक्ष्यते । अवस्था चाद्रव्यमेव । तथा चान्योन्यसापेक्षत्वाद् द्रव्यमद्रव्यं च द्वयमपि न सिध्यतीति । तदेतदनुभाषितं सर्वापलापहेतुत्वादसदिति दूषयति—**न सदिति** । अयमभिसन्धिः—किं द्रव्याद्रव्ययोरुपलम्भानुपपत्तिरन्योन्यापेक्षयोच्यते, उत व्यवहारानुपपत्तिः? उभयमपि नास्ति; एकस्मिन्नेव क्षणे विशेषणविशेष्ययोरेकज्ञानग्रहणयोग्ययोर्विशेषणविशेष्यभावेनोपलम्भात् । तदिदमाह—**उभायान्योन्यवैशिष्ट्यदृष्टेरिति** । एवं व्यवहारेऽपि नान्योन्याश्रयः । व्युत्पत्त्यायत्तो हि व्यवहारः, व्युत्पत्तिश्च द्रव्याद्रव्यशब्दयोर्विशेषणविशेष्यविषययोर्युगपदेव, उपलभ्यमानयोराधाराधेययोरनयोरनुक्रमाद् द्रव्याद्रव्यशब्दौ वाचकाविति । आधाराधेयौ च युगपदुपलभ्येते; तच्छब्दौ च युगपदेव व्युत्पद्येते । अतो द्रव्याद्रव्यशब्दयोर्व्युत्पत्तौ व्यवहारे तत्प्रतिपत्तौ च परस्परपौर्वापर्याभावान्न विरोधः । तदिदमाह—**आधार** इति । अनाश्रये—स्वयमाश्रयव्यतिरिक्त इत्यर्थः । इयमेव हि व्युत्पत्तिः पामराणामपि व्यवहारे निदानम् । बालाः खलु विशेषणविशेष्यभावेन वस्तुस्वरूपं युगपदुपलभन्ते । अनादौ च संसारे पूर्वपूर्वव्यवहारैर्युगपदेव शिक्ष्यन्ते । अन्यथा कथमिव तेषां व्यवहारनियमः प्रवृत्तिनियमो वा? न चान्योन्याश्रयादिविभीषिकेयं लोकव्यवहारनियमं निरोद्धुं शक्नोति । एवं व्यवहारादेव व्युत्पन्नाः पश्चाद्वाक्येनापि व्युत्पाद्यन्ते । अतो लोकदृष्टेयं व्युत्पत्तिरित्याह—**व्युत्पत्तिरिति** । न चात्यन्ताव्युत्पन्नाश्शास्त्रैर्व्युत्पाद्यन्ते । अपि तु लोकेनैव व्युत्पन्नाः व्युत्पत्तिविशेषपरिपूरणाय शास्त्रेष्वधिकुर्वते । अतो लोकदृष्टविशेषणविशेष्यादिविभागानुसारेण द्रव्याद्रव्यादिविभागपरिकल्पनं न्याय्यम् । अन्यथा सर्वापलापवादिनस्स्वव्याघातादिदोषोपघातेन वादित्व-

मेव भज्येतेति । न हि वादिनः प्रमाणप्रमेयविभागं वाच्यवाचकविभागं वा वादिप्रतिवादिविभागं वा परिहृत्य वादिनो भवन्ति; न च प्रमाणनिरूपणे प्रमेयनिरूपणं प्रमेयनिरूपणे प्रमाणनिरूपणमित्यादिकं प्रलप्य वा प्रतिपद्य वा तूष्णीमासते । अतः सर्वेऽपि भेदाः सेनावनतारामण्डलादिविभागदर्शनन्यायेन युगपदुपलभ्यन्ते, युगपच्च व्यवह्रियन्ते । केवलं वाचः क्रमवृत्तित्वाद्भावाभावाधाराधेयवाच्यवाचकादिव्यवहारेषु क्रमोपलम्भः । अभावो हि क्वचिद् भावपूर्वकोपलम्भेऽपि योग्यदशायां युगपदेवोपलभ्यते । यथा घटसद्भावासद्भावविशिष्टभूतलयोर्युगपदिन्द्रियसन्निकर्षे केवलं घटाभावोल्लेखनं घटोल्लेखनानन्तरीयकमित्यविनाभावात्प्रतियोगिग्रहणसध्रीची प्रतीतिः न पुनः प्रतियोगिग्रहणस्य पूर्वभावित्वनिर्बन्धः । एवं चौपाधिकसंबन्धानां विशेषणविशेष्यभावप्रमाणप्रमेयभाववाच्यवाचकभावादीनां निर्वाहाभावेऽप्यन्ततो दूष्यदूषणभावमपि निर्वोढुं न शक्नोति दुर्वैतण्डिकः । अतो लक्ष्यलक्षणादिखण्डनचण्डचण्डमारुतो व्याघातशेषफणिमुखसहस्रेण परिपीतो जाठरदहनेन भस्मीभवतीति सर्वमवदातम् । स्वर्गकर्णीसुतोऽपि—अत्रत्या लुण्टाकाः **शून्यवादि**प्रभृतयः, अतोऽपि विशिष्टो यद्यस्ति स्वर्गवासी सोऽपीति भावः ॥ ३ ॥

364. **सामान्यात्मा विशेषाकृतिरपि यदि न स्वीकृतो धर्मवर्गः**
स्यातां न भ्रान्तिबाधौ न किमपि कथकास्साधयेयुः स्वसाध्यम् ।
यस्मिन् बाधानवस्थे क्वचन न खलु तं नीतिरन्यत्र दृष्टे
नो चेन्निश्शेषकुक्षिम्भरिरुपनिपतन् दुस्तरश्शून्यपक्षः ॥ ४ ॥

धर्मधर्मिभावानङ्गीकारे सकललोकव्यवहारविरोध इत्यद्रव्यवर्गस्य सर्वैर्दुरपह्नवत्वं द्रढयति—**सामान्यात्मे**ति ॥ यदि सामान्यात्मा विशेषाकृतिश्च न स्वीकृतो धर्मवर्गस्सामान्याभावाद्भ्रान्त्यभावः; विशेषाभावाद्बाधाभावः । तदुभयाभावे कथका वादिनः स्वसाध्यमपि न साधयेयुः । एक एव धूमवत्त्वादिको हेतुः पक्षसपक्षयोस्सामान्यम्; विपक्षाच्च विशेषः । इत्थं साधर्म्यवैधर्म्यात्मानस्सर्वे धर्माः, तानेवावलम्ब्य साध्यसाधनभावो बाध्यबाधकभावश्च प्रवर्तते । अन्यथा मौनमेव शरणं वादिनामिति भावः । ननु यथा द्वितीयसत्ताभेदादिपरिक्लृप्त्यभावेऽपि व्यवहारनिर्वाहः, एवं प्रथमसत्ताभेदादिपरित्यागेऽपि व्यवहारनिर्वाहः स्यात्; तथा च सर्वधर्मोच्छेद इति कश्चिदाह । तं प्रतिक्षिपति—**यस्मिन्निति** । अयमर्थः—द्वितीयसत्ताभेदादिक्लृप्तावनुपलम्भस्तावद्बाधकः, अनवस्था च । तन्नीतिरन्यत्र दृष्टे—प्रत्यक्षदृष्टे प्रथमसत्ताभेदादौ न भवति; अनुपलम्भबाधाभावात्, अनवस्थाप्रसञ्जकत्वाभावाच्च । सजातीयापेक्षायामेवानवस्था न तूपलब्धस्य प्रथमस्यापि स्वीकारे । अतः प्रथमधर्मोपलापः कर्तुं न शक्यत इत्यर्थः । यस्मिन्क्वचन द्वितीयसत्तादौ बाधानवस्थे भवतः, न तन्नीतिरन्यत्र दृष्टे प्रमाणप्रतिपन्ने प्रथमसत्तादावपीति शब्दयोजना । इत्थं प्रथमस्यापि धर्मस्यानङ्गीकारेण सर्वधर्माणां सांवृतत्वकल्पने धर्म्यपलापोऽपि तेनैव सांवृतत्वेन कल्पयितुं शक्यत इति शून्यवाद एव परिशिष्येतेत्याह—**नो चे**दिति ॥ ४ ॥

365. **चादीनां वृत्तियोग्यं यदुत पदविदोऽसत्त्वमद्रव्यमाहु-**
र्नैतावत्तन्मृषात्वं गमयति न च तद्बाधकं किंचिदस्ति ।
तात्पर्यं चान्यदत्र स्फुटविदितमतस्तत्र सत्त्वेतरत्वा-
दन्यः कश्चिन्नजर्थः परमिह निपुणैर्द्योतकत्वादि चिन्त्यम् ॥ ५ ॥

ननु सत्त्वं द्रव्यमसत्त्वमद्रव्यमिति पदविद्भिरभिहितत्वाददद्रव्याणां मृषात्वमिति यदि कश्चिन्मनुते तदमनूद्य प्रतिक्षिपति—**चादीनामिति** ॥ कुत इत्यत आह—**न च त**दिति । बाध एव ह्यसत्त्वे कारणम्; न च चाद्यर्थानां समुच्चयादीनां बाधोऽस्ति । तदभावेऽपि तन्मिथ्यात्वे सर्वपदार्थानां मिथ्यात्वं स्यादिति भावः । कस्तर्हि पदविदां वाक्याभिप्राय इत्यत्राह—**तात्पर्य**मिति । किं तत्तात्पर्यमित्यत्र सामान्येन तात्पर्यार्थमाह—**अत** इति । प्रमाणबलात् सत्त्वेतरत्वादन्यत्रैव तात्पर्यमिति सामान्यतो निर्णीतमित्यर्थः । तात्पर्यविशेषं प्रकाशयति—**परमिहे**ति । द्योतकत्वादि चिन्त्यम्—चादीनां द्योतकत्वमन्येषां वाचकत्वम्; यत् द्योत्यं तस्य विशेषणसंबन्धानर्हत्वम्; यद्वाच्यं तस्य विशेषणसंबन्धार्हत्वमित्यादिविभागो यथाप्रमाणं चिन्तनीयः । अतोऽसत्त्वशब्दकथनमात्राददद्रव्याणां मिथ्यात्वप्रसङ्गाभाव इत्यर्थः ॥ ५ ॥

366. **आहुर्द्रव्येषु धर्मान् कतिचन गुणपर्यायवैषम्यभिन्नान्**
पर्यायाणां गुणत्वे स्थितवति सहजागन्तुतामात्रमेतत् ।
मिथ्याभूतान् विकारानभिदधति परे सत्यरूपान् स्वभावान्
तानेकद्व्यादिरूपानभिदधतु कथं निर्गुणानां क्षणानाम् ॥ ६ ॥

अत्र **क्षपणका** गुणपर्यायभेदेन गुणानेव विभजन्ते; तन्न युक्तमित्याह—**आहु**रिति ॥ **सहजागन्तुतामात्रमेत**दिति । सहजा धर्मा गुणा इत्युच्यन्ते, आगन्तवः पर्याया इति **क्षपणक**परिभाषा । गुणत्वे तुल्ये किमनेन विशेषकथनेनेत्यर्थः । **बौद्धास्तु** केचित् सर्वानप्यवस्थाभेदान् गुणशब्दाभिधेयान्मिथ्याभूतानभिदधति । तेष्वेवापरे सत्यभूतान् स्वभावांस्तांश्चैकद्व्यादिरूपान्—रूपरसगन्धस्पर्शस्वभावा पृथिवी, रूपरसस्पर्शस्वभावं जलम्, रूपस्पर्शस्वभावं तेजः, स्पर्शस्वभावो वायुरिति । एतत्सर्वं निर्गुणानां न घटत इत्याह—**अभिदधत्वि**ति । आरोपो हि सगुणेष्वेव; तिरोहितातिरोहितस्वरूपसापेक्षत्वात् । रूपरसादीनां स्वभावमात्रत्वे धर्मधर्मिणोर्भिन्नेन्द्रियग्राह्यत्वविरोधात्, भिन्नेन्द्रियग्राह्याणां रूपरसादीनां बहूनां स्वभावानामेकवस्त्वात्मकत्वे बहुविरोधसंकलनाच्च सगुणत्वमेव न्याय्यमिति द्रव्याद्रव्यविभागोऽनतिलङ्घनीय इत्यर्थः ॥

367. **बाह्येऽर्थे बौद्धतोकाः किल जननजराभङ्गरूपान् विकारा-**
नाद्यन्तौ चित्तचैत्तेष्वपि जगदुरमी तत्स्वरूपं न वा स्युः ।
पूर्वस्मिन्नक्रमः स्यादुपरि तु न कथं तस्य धर्मास्त एते
तन्मिथ्यात्वे तु नित्यं निखिलमपि भवेत्तुच्छमेवान्यदा स्यात् ॥ ७ ॥

बाह्यार्थ इति ॥ अत्र केचित् बौद्धाभासा बाह्यार्थेषु जननजराभङ्गरूपान् विकारानाहुः । चित्तचैत्तेषु जननभङ्गावेव द्वौ विकारौ । तत्र विकल्पनीयम्—एतद्विकारजातं वस्तुनः स्वरूपं, धर्मो वा? तत्र पूर्वस्मिन् पक्षे जननादीनां क्रम एव न स्यात् । न हि स्वरूपं क्रमेण भवति; स्वरूपत्वव्याघातात् । उत्तरत्र धर्मधर्मिभावं स्वयमेव वदसीत्याह—**उपरी**ति । तर्हि जननादयो मिथ्येति चेन्नेत्याह—**तन्मिथ्यात्व** इति । जननादीनां मिथ्यात्वे तस्य वस्तुनो नित्यत्वमेव स्यात्; यदि वा तुच्छत्वमिति । यथाऽऽहुः—* नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् । अपेक्षातो हि भावानां कादाचित्कत्वसंभवः ॥ इति । अत्राहेतोरित्युपलक्षणम्; अजननस्येत्यर्थः, हेतोरपि जनन एवोपयोगात् । अन्यथा जननादीनां मिथ्यात्वे सत्येकदा नित्यत्वम्; अन्यदा तुच्छत्वमेवेत्यर्थः । स्यादेव न स्यादेव वा नतु कदाचित्स्यादिति ह्याहुः ॥ ७ ॥

इति अद्रव्यवर्गस्य सर्वैर्दुरपह्नवत्वम् ॥

368. आदावैक्येन बुद्धिर्द्वयमपि मिलितं गृह्णती व्यक्तिजात्यो-
भेदाभेदाविरोधं दिशति यदि न तत्तद्विशिष्टैक्यबुद्धेः ।
इत्थंत्वेदंत्वशून्यं न हि किमपि कदाऽप्यर्भकोऽपि प्रतीया-
त्तद्वैशिष्ट्यप्रतीतिर्निरुपधिरपृथक्सिद्धिमात्रेण सिध्येत् ॥ ८ ॥

एवमद्वयं साधयित्वा द्रव्याद्रव्ययोर्भेदाभेदवादस्याप्रामाणिकत्वमाह—**आदाविति** ॥ प्रथमपिण्डग्रहणेषु भेदेनाप्रत्ययात्, मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यात्, सहोपलम्भनियमात्, एकशब्दानुविद्धप्रत्ययाच्च भेदाभेदं समर्थयन्ते । तत्र भेदाभेदयोः किं प्रत्यक्षगम्यत्वमुतानुमानगम्यत्वमिति विकल्प्य प्रत्यक्षगम्यत्वपक्षमनुवदति, गौरयमित्यैक्येन बुद्धिरुत्पद्यमाना मिलितामेव जातिं व्यक्तिं च गृह्णती भेदाभेदयोर्विरोधमुपशमयतीति । तन्निराचष्टे—**न तदिति** । तत्र हेतुमाह—**तद्विशिष्टेति** । तद्विवृणोति—**इत्थंत्वेति** । इदमित्थमिति हि सर्वा प्रतीतिरुपजायते । तत्रेदमंशो धर्मी इत्थमंशो धर्मः । **अर्भकेऽपीति** । बालिशादपि बालिशो भवानित्यर्थः । कथं तर्ह्यत्यन्तभिन्नयोर्धर्मधर्मिणोर्वैशिष्ट्यप्रतीतिः? समवायाङ्गीकारे चापसिद्धान्तप्रसङ्गादित्याशङ्क्याह—**तदिति** । तत्—तस्मात् । निरुपधिः उपाधित्वेन स्वीकृतसमवायाभावेऽपि स्वाभाविकापृथक्सिद्धिमात्रेण वैशिष्ट्यप्रतीतिः सिध्येदिति ॥ ८ ॥ **इति प्रत्यक्षभेदाभेदभङ्गः ॥**

**369. व्यक्त्या जातेरभेदं यदि वदसि पृथक्सिद्ध्यभावादिलिङ्गै-
र्भेदाभावोऽक्षबाध्यस्तव च न हि मतो नान्यथाऽत्रास्य युक्तिः ।
धर्म्यैक्यादेकवाक्यान्न तु भवति ततो धर्मधर्म्यैक्यबुद्धि-
स्तद्बोधश्चाप्युपाधिर्न स इह भवता दृश्य इत्यभ्युपेते ॥ ९ ॥**

लिङ्गादपि भेदाभेदवादो न सिध्यतीति वक्तुं परोक्तानुमानान्यनुवदति—**व्यक्त्येति** ॥ पृथक्सिद्ध्यभावादिलिङ्गैः—सहोपलम्भनियमादिलिङ्गैः । धर्मधर्मिणोरभेदः कालात्ययापदिष्ट इत्याह—**भेदाभाव** इति । तवाप्ययं दोषोऽभिमत इत्याह—**तव चेति** । अन्यथा सहोपलब्धिनियमयुक्तिरेव न स्यादित्याह—**नान्यथेति** । साहित्यं भेद एव नियतम्, अभेदगन्धमपि न सहत इति भावः । कथं तर्हि मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यमित्याशङ्क्य सामानाधिकरण्यलक्षणानुरोधे[न]नैव परिहरति—**धर्म्यैक्यादिति** । न पुनस्सामानाधिकरण्यात् धर्मधर्मिणोरैक्यबुद्धिरित्याह—**न तु भवतीति** । यत्र पुनरैक्यं तत्र तद्बुद्धिरेव उपाधिः; न स इह—बुद्धिरूपोपाधिर्नास्तीत्यर्थः । नन्वदृश्यविषये बुद्धिमन्तरेणाप्यर्थोऽस्ति, तत्कथं बुद्ध्यभावादर्थाभाव इत्याशङ्क्याह—**भवता दृश्य इत्यभ्युपेत** इति । दृश्यत्वेनैव हि भवता धर्मधर्मिणावुभावपि परिगृह्येते । तथा च धर्मधर्मिणोरैक्यमपि यद्यस्ति योग्यत्वादुपलभ्येत; न चोपलभ्यते, तस्मान्नास्ति । एतेनैवैकशब्दानुविद्धप्रत्ययोऽपि निरस्तः; एको दण्डीतिवत् एकशब्दस्य विशिष्टविषयत्वादिति ॥ ९ ॥ **इति अनुमेयभेदाभेदभङ्गः ॥**

370. सत्त्वान्नैकान्तमाहुर्विमतमितरवत् केऽपि तद्धीविरुद्धं
न ह्यत्राकारभेदात् परिहृतिरनवस्थानदोषप्रसङ्गात् ।
स्वव्यापारोक्तिचर्यासमयनियतयोऽप्येवमेवाकुलाः स्यु-
र्दृष्टान्तेऽपि ह्युपाधिद्वयवति नियतस्थौल्यसौक्ष्म्यादियोगः ॥ १० ॥

अत्रानेकान्तवादी प्रत्यवतिष्ठते—**सत्त्वादि**ति ॥ सर्वमनेकान्तं सत्त्वात् घटाकाशमहाकाशवदिति । तत्प्रतीति-विरुद्धमित्याह—**तद्धीविरुद्ध**मिति । सामान्याकारेणाभेदः व्यक्त्याकारेण भेद इति विरोधं परिहराम इत्याशङ्क्य निराकरोति—**नहीति** । कुत इत्यत आह—**अनवस्थाने**ति । व्यक्तीनामभेदनिर्वाहार्थं जातिः परिगृह्यते । जातिव्यक्त्योरत्यन्त-विरुद्धस्वभावयोरभेदनिर्वाहार्थं धर्मान्तरस्वीकारेऽनवस्था। अस्वीकारे विरुद्धाकारेण प्रतिभासमानयोः कथमभेदः? उक्तार्थ-बाधकाननिष्टप्रसङ्गानाह—**स्वव्यापारे**ति । सर्वत्रानेकान्तवादे व्यापारनियमो व्यवहारनियमस्सिद्धान्तनियम इत्यादयस्सर्वे नियमा व्याकुलीभवेयुः । आकाशेऽपि घटकरकाद्यवच्छेदकभेदेनैव स्थूलसूक्ष्मादिव्यवहारः । तत्रोपाधीनां भिन्नत्वमेव, उपाधिमतः पुनरभिन्नत्वमेव ; केवलमुपाधिगतो भेद उपाधिमत्पर्यन्तमुपाधिद्वारेण व्यवह्रियत इति न विरोधः ॥ १० ॥

371. **सिद्धे वस्तुन्यशेषैः स्वमतमुभयधा वर्ण्यते तत्रतत्र**
स्यादर्थस्यैकरूप्ये कथमिदमिति चेत्तन्न भिन्नाशयोक्तेः ।
मन्तव्या वैभवोक्तिः क्वचिदनभिमते संशयोक्तिः क्वचिद्वा
भाग[द्वन्द्वा]द्वैतान्नृसिंहप्रभृतिषु घटते चित्रसंस्थानयोगः ॥ ११ ॥

कथं तर्ह्यनेकान्ताभावे सर्वैरपि वादिभिरेकस्मिन् सिद्धान्ते पक्षद्वयोपवर्णनं क्रियते? यथा स्मृतेर्याथार्थ्यमयाथार्थ्यं चेति न्यायवादिनः । एवं तेषुतेषु सिद्धान्तेषु मतभेदोपवर्णनं दृष्टम् । यथा भवन्त एवान्विताभिधानमभिहितान्वयं चाभिदधत इत्याशङ्कते—**सिद्ध** इत्यादिना ॥ परिहरति—**तन्नेति** । तत्र हेतुमाह—**भिन्नाशयोक्तेरि**ति । तत्तच्छास्त्रप्रवक्तॄणामाशयभेदेन पक्षभेदोपवर्णनं न्याय्यमित्यर्थः । अस्मिन्नर्थे परिहारान्तरमप्याह—**मन्तव्ये**ति । एकस्यैव वक्तुः क्वचिद्वैभवोक्तिः, क्वचित् परमार्थोक्तिरिति । तृतीयमपि परिहारमाह—**संशयोक्तिरि**ति । अर्थानवधारणेन वादिभिस्संभावितकोटिद्वयोपादानमिति । अतो नानेकान्तवादप्रसङ्गः । कथं तर्हि नृसिंहादिरूपेषु विरुद्धाकार इति चेत् अंशभेदादविरोध इत्याह—**भाग[द्वन्द्व]द्वैतादि**ति ॥ ११ ॥ इति **अनेकान्तानुमानभङ्गः** ॥

372. **स्यादस्ति स्याच्च नास्ति द्वितयमनुभयं स्यात्त्रिभिश्चान्तिमं त्रि-**
स्सैषोक्ता सप्तभङ्गी जिनसमयजडैर्द्रव्यपर्यायवर्गे ।
इष्टां सार्वत्रिकीं तां स्वपरमतकथातत्फलादौ विवक्षन्
कक्षीकुर्वीत धूतः कथकपरिषदा कां दिशं कान्दिशीकः ॥ १२ ॥

इत्थमनेकान्तवादप्रतिक्षेपमसहमानोऽनेकान्तवादी सप्तभङ्गीं पुरस्कुरुते । *स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादस्ति नास्ति विलक्षणम्, अस्ति स्यादस्ति नास्ति विलक्षणम्, नास्ति स्यादस्ति नास्ति विलक्षणम्, अस्ति च नास्ति स्यादस्ति नास्ति विलक्षणमिति सप्तभङ्ग्या संवलितमेव विश्वमिति । द्रव्यं हि वस्तुस्वरूपम् । पर्यायश्चागन्तुकधर्मः । द्रव्यपर्यायात्मना सदसद्रूपे च जगति सर्वमपि रूपमन्वयव्यतिरेकाभ्यां संघटत इति । तदिदमनुभाषते—**स्यादस्तीति** ॥ **स्यात्त्रिभिश्चान्तिमं त्रिरि**ति । अन्तिमम्—अनुभयं त्रिभिः—स्यादस्तीत्यादिभिस्त्रिभिः प्रत्येकमन्वितमित्यर्थः । अस्ति नास्ति विलक्षणं प्रत्येकं स्यादस्तीत्यादिभिस्त्रिभिरन्वितमिति पक्षत्रयम् । पूर्वं चत्वारः पक्षाः । अतस्सप्तभङ्गी । सैषा सप्तभङ्गी द्रव्यपर्यायवर्गेऽनेकान्तवादिभिरुक्ता । **जिनसमयजडै**रिति । अस्यार्थस्य उपक्षेप एव वक्तॄणां जाड्यं प्रकटयतीत्यर्थः । अत्रोत्तरमाह—**इष्टामि**ति । अनियतार्थोपपादनस्वभावामेनां सप्तभङ्गीं विवक्षन् परस्परविरुद्ध-

भाषणेन विद्वद्भिर्निष्कासितः शुष्कतर्कवादी कान्दिशीकः--भयद्रुतः कां दिशं कक्षीकुर्वीत--न कांचिदपि दिशं प्राप्नुया दित्यर्थः । अनियतवादिनां हि स्वपक्ष एव परपक्षः ; दूषणमेव भूषणम् ; विजय एव पराजयः ; व्यवहार एव मौन मिति सर्वो व्याघातस्संपनीपद्येतेति भावः ॥ १२ ॥ **इति सप्तभङ्गीभङ्गः ॥**

373. **भेदे वस्तुस्वरूपे भ्रम इह न भवेद्धर्मपक्षेऽनवस्था**
स्याद्वाऽन्योन्याश्रयादिस्तदयमनृत इत्युक्तिबाधादिदुःस्थम् ।
धर्मः क्वापि स्वरूपं क्वचिदिति च यथादृष्टि नोक्तप्रसङ्गौ
यदृच्छया यत्र यस्याध्यसनपरिहृतिस्सोऽस्य तस्मात्तु भेदः ॥ १३ ॥

इत्थं भेदाभेदवादे निरस्ते भेदोऽपि तद्वदेव निरस्यतामिति वदतः परपक्षवादिनः पक्षमनुवदति--**भेद** इति । तन्निराकरोति--**उक्ती**ति ; अयमत्र पूर्वपक्षसिद्धान्तयोरनुक्रमः--किं भेदो वस्तुनः स्वरूपम्? अथवा धर्मः? यदि स्वरूपम्, स्वरूपभूते भेदे गृहीते सत्यध्यासो न स्यात् । अथ न गृह्यते, तथाऽप्यध्यासो न स्यात् ; धर्मिग्रहणमन्त रेणाध्यासाभावात् । तथा च स्वरूपभूतभेदस्य ग्रहणाग्रहणयोरध्यासाभाव इति स्वरूपभेदवादनिरासः । किंच स्वरूप स्यैव भेदत्वे स्वरूपं भेद इति व्यवह्रियेत, न पुनर्भिन्नमिति ; स्वरूपस्य प्रतियोगिनिरपेक्षत्वात्, भेदस्य तत्सापेक्ष त्वाच्च । विरुद्धधर्माध्यासोऽपि स्वरूपभेदवादमपाकरोति । नापि धर्मो भेदः ; तस्य धर्मिप्रतियोगिभ्यामभेदे व्याघातः धर्मधर्मिभावादेर्भेदनिष्ठत्वात् । भेदे पुनरात्मनैव भेदाङ्गीकारे तावदात्माश्रयः । द्वितीयभेदमङ्गीकृत्य परस्परभेदकत्व कथने परस्पराश्रयः । तृतीयादिभेदमङ्गीकृत्य परिवर्तने चक्रकम् ; उत्तरोत्तरमपि धावने अनवस्था । उत्तरोत्तरभेदान पूर्वपूर्वभेदेभ्यो भेदानङ्गीकारे द्वितीयादीनां भेदानां प्रथमभेदाद्व्यतिरेकाभावेन तदङ्गीकारानङ्गीकारयोरविशेष इति धर्म भेदोऽपि दुर्वचः । किंच किं धर्मिप्रतियोगिग्रहणपूर्वको भेदग्रहः, उत स्वतन्त्रः? यदि स्वतन्त्रः ; भेदग्रहणमेव तद स्यात्, कस्य कस्मात् भेद इति । यदि धर्मिप्रतियोगिग्रहणपूर्वकः, तत्रापि विकल्पयामः, किं धर्मिप्रतियोगिनौ परस्पर विलक्षणत्वेन गृह्यमाणौ तथा भवतः? उताविलक्षणत्वेन? यद्यविलक्षणत्वेन, घटाद्घटो भिन्न इत्येव स्यात् । न च तदु क्तम् । विलक्षणत्वेन चेदन्योन्याश्रयकुक्षिनिक्षेपणेन निर्दह्यते भेदवादः ; भेदे गृहीते सति धर्म्यादिग्रहणम्, तद्ग्रहणे सति भेदग्रहणमिति । अत्रोत्तरम्--**उक्तिबाधादिदुःस्थ**मिति । अयमत्र भावः--यस्तु भेदस्स्वरूपं धर्मो वेति विकल्पयति स पुनस्तृतीयकोट्यङ्गीकारेण विकल्पयति? किं वा तदनङ्गीकारेण विकल्पयति? यद्यङ्गीकारेण अयावत्संभवी तावद विकल्पयतीति न्यूनं नाम निग्रहस्थानम् । संभवन्ति च स्वरूपधर्मव्यतिरिक्तास्सहस्रमप्यर्थाः ; न हि घटस्य स्वरूपं नापि धर्मः पटकुड्यकुसूलादयः । तृतीयकोटितयाऽपि भेदं वदन्ति भेदवादिनः ; ज्ञानाभावसंबन्धानां विषयप्रतियोगिसंबन्धि भिरेव व्यावृत्तव्यवहारात्, तेषामपि भेदलक्षणलक्षितत्वस्य भवद्भिरप्यङ्गीकार्यत्वात् । यदि तृतीयकोट्यनङ्गीकारेण वैयर्थ्या द्विकल्पयति, तथाऽपि तर्काभासोऽयं प्रसङ्गः ; स्वरूपं चेदेवं स्यात् ; न चैवम्, तस्मान्न स्वरूपम् । धर्मश्चेदेवं स्यात् न चैवम्, तस्मान्न धर्म इति परस्परविरुद्धयोस्तर्कयोर्विपर्यये पर्यवसानं यद्यस्ति तदा मिथो विरोधात्तर्काभासत्वम् । यदि नास्ति तथाऽपि तर्काभासत्वम् ; विपर्यये पर्यवसानाभावेनाङ्गशून्यत्वात् । उभयोरपि तृतीयकोटौ पर्यवसानमस्त्विति चेत्, अहो नु भवानास्मोक्तमेव प्रसरति! तृतीयकोट्यसद्भावेन हि भवानालपति । यदि कोट्यन्तरमस्ति, अस्माकमपि तद्रूपेणोपतिष्ठतां भेदः । अतो न भेदतत्त्वापलापः । तथा च न विवक्षितार्थसिद्धिः । स्वरूपं चेदध्यासानुपपत्तिः स्यादि

भवतां मूलशैथिल्यम्, अनृतजडपरिच्छिन्नव्यावृत्तीनां ब्रह्मस्वरूपत्वेऽपि भवद्भिरेव प्रपञ्चाध्यासाङ्गीकारात्। व्यावृत्तीनां धर्मत्वे भवतैव धर्मभेदवादोऽङ्गीकृत इति धर्मभेदवादप्रतिक्षेपकाणां तर्काभासानामङ्गान्यतमवैकल्यं भवतैव प्रतिपादितं स्यात्। आस्तामयं तर्काभासप्रसङ्गः; प्रतिबन्द्याऽपि दूषयामः। अभेदः स्वरूपं, धर्मो वा? धर्मश्चेदनवस्था, स्वरूपातिरिक्तस्य धर्मस्याभेदत्वव्याघातश्च। आत्माश्रयान्योन्याश्रयचक्रकाश्रयाद्यभिधानमस्माभिरप्यत्राभिधातुं शक्येत। स्वरूपं चेदभेदः; अभेदो ब्रह्मेति स्यात्, न पुनरभिन्नं ब्रह्मेति। किंचाभेद[रूपस्य नित्यस्वभावत्वेन]स्वरूपस्य नित्यस्वप्रकाशत्वेन भेदप्रपञ्चाध्यासो न स्यात्। स्वरूपान्तरमभेद इति चेद्भेदवादमेवोद्गिरसि। किंच स्वस्य रूपं स्वरूपमिति यदि वदसि, सोऽपि च भेद एवावसीयते। स्वमेव रूपमिति वचने स्वरूपातिरिक्ताभेदानभिधानादध्यासानुपपत्तिस्तदवस्थैव। अतो भेदवदभेदस्यापि त्वदुक्तेनैव दूषणकलापेन दुर्निरूपत्वात्स्वरूपधर्मयोर्भेदत्वानुपपत्तिरिति रिक्तं वचः। कस्तर्हि भेदः? अनृतजडपरिच्छिन्नव्यावृत्तीनां स्वरूपत्वे स्वरूपभेदवादमङ्गीकृत्य मूकीभव; धर्मत्वे पुनर्धर्मभेदवादमङ्गीकुर्वन् निर्वैरमेव संचर। अथापि कथं भेदस्य भेदाभावे स्वरूपसिद्धिरिति चेत्, स्वस्य स्वयमेव भेदः, स्वपरनिर्वाहकत्वात्; यो हि यत्र यदध्यासविरोधी स तस्माद्भेदः। तथा च स्वाश्रये पटादावध्यासविरोधी शौक्ल्यादिधर्म एव स्वस्मिन्नपि कार्ष्ण्याद्यध्यासविरोधित्वात्स्वस्यापि स्वयमेव भेदः। तथा च धर्मिप्रतियोगिभ्यामपि शौक्ल्यादेः स्वरूपमेव भेदः; स्वरूपस्यैव स्वात्मनि तत्तदध्यासविरोधित्वात्। यत्पुनरुक्तम्—भेदग्रहणस्य धर्मिप्रतियोगिग्रहणपूर्वकत्वात्परस्पराश्रय इति, तदपि चानिरूपकाणामाघोषणम्। घटपटौ हि गृह्यमाणौ युगपदेव घटत्वपटत्वाश्रयावेव गृह्येते। तावेव धर्मौ भेदौ, इतरेतराध्यासविरोधित्वात्। स्वस्मिन्नपि तत्तदध्यासविरोधित्वात् स्वात्मनोरपि भेदस्तावेव। अतो नान्योन्याश्रयणशङ्काऽप्यङ्कुरति। कथं तर्हि प्रतियोगिनिरपेक्षाणां धर्माणां भेदत्वमिति चेत्; इत्थम्—यदा शुक्लत्वकृष्णत्वादयः स्वरूपेण प्रतीतिविषयाः परस्पराध्यासं व्यावर्तयन्ति, तदा शुक्लत्वकृष्णत्वादय इति व्यवह्रियन्ते। कुर्वन्ति चाध्यासनिवृत्तिं तेनैव स्वरूपेण। यदा पुनरध्यासनिवर्तकत्वरूपधर्मान्तरवैशिष्ट्येन व्यवह्रियन्ते, तदा भेदा इत्युच्यन्ते। तेन तेषामेव धर्माणां [वस्तु]स्वरूपेण व्यवह्रियमाणानां न प्रतियोगिसापेक्षत्वम्; अध्यासनिवर्तकत्वरूपधर्मान्तरवैशिष्ट्येन व्यवह्रियमाणानां प्रतियोगिसापेक्षत्वमिति न कश्चिद्विरोधः। यथा घटे दण्डादीनां व्याप्रियमाणानां दण्डादिव्यवहारे न प्रतियोग्यपेक्षा, घटकारणत्वव्यवहारे प्रतियोग्यपेक्षेति। एतेन ग्राहकानुपपत्तिप्रलापोऽपि दूरोत्सारितः; जात्यादीनामेव भेदत्वात्, तेषां वस्तुना सह युगपदेव ग्रहणेन स्वरूपभेदयोर्ग्रहणपौर्वापर्याभावात्। अतः प्रत्यक्षमेव युगपदुभयं गृह्णाति। अतो भेदस्य न विकल्पग्राह्यत्वम्। तदिदं सर्वमभिप्रेत्याह—**धर्मः क्वापी**ति। घटादीनां धर्मो भेदः स्वरूपम्। क्वचित् भेदे पुनः स्वरूपमेव भेदः। यथादृष्टि—यथादर्शनमित्यर्थः। तेन नोक्तप्रसङ्गौ—न स्वरूपभेददूषणम्, नापि धर्मभेददूषणम्। उक्तस्यार्थस्योपपत्त्यर्थं भेदलक्षणमेव परिशोधयति। यस्य दृष्ट्या यत्र यदध्यासनिवृत्तिः स तस्य तस्मात् भेद इति। अतः शौक्ल्यादिरसाधारणो धर्म एव भेदः। अतस्तदतिरिक्तभेदकल्पनमल्पबुद्धीनां कल्पनागौरवहेतुत्वादनादरणीयमेवेति भावः। तदयं संक्षेपः—भेदप्रतीत्यपलापे तवापसिद्धान्तः, प्रतीत्यभावे कथं बाधार्थं प्रयतसे? तत्कारणापलापे भेदप्रतीतेः कार्यत्वमेव परिपन्थि; न ह्यकारणं कार्यमुत्पद्यते। कारणनिरूपणापलापे कार्यविशेष एव कारणविशेषं निरूपयति; तत्तत्कार्यविशेषसमुचितत्वेनैव कारणविशेषस्य प्रतीतेः। भेदप्रतीतेर्विषयापलापे भेदप्रतीतिर्निर्विषयेति व्याघातः; प्रतीतेस्सविषयत्वनियमात्। न हि निर्विषयं ज्ञानमिति जाघटीति। विपरीतज्ञानमपि सविषयमेव; अपि तु बाधितविषयमिति विशेषः। अतो भेदज्ञानस्य विषयबाधोपपादनमेव तवावशिष्यते। तत्र प्रत्यक्षेण बाधोपपादने सर्वस्यापि

प्रत्यक्षस्य सविशेषविषयत्वान्न बाधकत्वम् । अनुमानं चेत्सुतरां सविशेषविषयमेव; पक्षहेतुदृष्टान्तसाध्यतज्ज्ञानादिबहुभेद-संवलितत्वात् । आगमोऽपि पदपदार्थवाक्यवाक्यार्थादिभेदगर्भः । एवं तर्कोऽपि व्याप्याङ्गीकारे व्यापकानिष्टप्रसञ्जनम्, व्याप्यव्यापकभावश्च भेदात्मक एव, अङ्गपञ्चकोपेतत्वाच्च । अतो भेदखण्डनप्रसङ्ग एव भेदमुपपादयति । एतेन प्रत्यक्षं धर्मिग्राहि ? उत भेदग्राहि ? उतोभयग्राहि ? स्वरूपग्राहित्वेऽस्मत्पक्ष एव । भेदग्राहित्वे धर्मिप्रतियोगिसापेक्षस्य भेदग्रहणस्य तद्ग्रहणमन्तरेण ग्रहणं न स्यात् । उभयग्राहित्वेऽपि युगपदुभयग्राहि वा, क्रमेण वा ? युगपद्ग्रहणं न संभवति; सापेक्ष-निरपेक्षयोर्यौगपद्यायोगात् । क्रमेणोभयग्राहित्वेऽपि भेदपूर्वकं धर्मिग्रहणं न संभवति ; सापेक्षस्य पूर्वभावित्वायोगात् । धर्मिग्रहणस्य पूर्वभावित्वे तस्मिन्नेव क्षणे प्रत्यक्षस्य नष्टत्वात् न तद्भेदग्राहकम् । न च प्रत्यक्षान्तरं भेदग्राहकम् ; पर-स्परवार्तानभिज्ञत्वात् । अतो भ्रान्तिरेवाप्रत्यक्षं चापि भेदं गृह्णातीति दत्तोत्तरम् ॥ १३ ॥ **इति भेददूषणनिस्तारः ॥**

374. **भेदो गृह्येत बुद्ध्याऽधिकरणमवधिं चेति न ह्यक्रमोऽस्मिन्**
प्रत्यक्षस्य क्रमोऽपि क्षणभिदुरतया नेति तुल्यं भ्रमेऽपि ।
अक्षान्धादिव्यवस्थाक्षतिरपि युगपद्योग्यधर्मैर्ग्रहोऽत-
स्तद्युक्ते भिन्नशब्दः कथिततदुपधिज्ञप्त्यपेक्षः क्रमात्स्यात् ॥ १४ ॥

भेदग्रहणे पूर्वोक्तां ग्राहकानुपपत्तिं प्रतिबन्द्या दूषयति—**भेद** इति ॥ धर्मिभेदयोस्सापेक्षत्वनिरपेक्षत्वाभ्यां युग-पद्ग्रहणमनुपपन्नम् ; प्रत्यक्षज्ञानस्य क्षणिकत्वात् । क्रमग्रहणं च न जाघटीति ; परस्परवार्तानभिज्ञत्वात् । प्रत्यक्षान्तरेण ग्रहणमपि न स्यादिति ह्युक्तम् । एतत्काल्पनिकभेदपक्षेऽपि तुल्यम् ; कल्पनायामप्यधिकरणप्रतियोगिसापेक्षत्वस्याव-श्यंभावित्वात्, धर्मिज्ञानक्षणिकत्वस्य तुल्यत्वात्, कल्पनारूपभेदग्रहणेऽपि परस्परवार्तानभिज्ञत्वस्यानिवारणात् । न हि कल्पनाऽपि धर्मिप्रतियोगिनावन्तरेण भेदं गृह्णाति । नापि धर्मिज्ञानवार्तामभिजानाति ; तस्य तस्मात् भिन्नत्वात् । अतः काल्पनिकभेदज्ञानस्य संघटने पारमार्थिकमपि भेदज्ञानं तेनैव न्यायेन संघटेत । तस्यासंघटने काल्पनिकमपि भेदज्ञानं न संघटेतेति वीवधघटन्यायः । तर्हि काल्पनिकमपि भेदज्ञानं मा भूदिति चेत्, तर्हि लोकव्यवहारोच्छेद-प्रसङ्गः, कृत्स्नवेदान्तानारम्भप्रसङ्गश्च । भेदप्रतिभासनिरासायैव हि सर्वे वेदान्ता आरभ्यन्त इति ब्रूषे । तदिदमाह—**तुल्यं भ्रमेऽपीति** । किंच भेदस्य प्रत्यक्षत्वाभावे सतीन्द्रियव्यवस्था न स्यात् । रूपादिग्रहणमिन्द्रियकृत्यम् ; विषय-भेदव्यवस्थयैव हि चक्षुरादिव्यवस्थामाहुः । एवमन्धादिव्यवस्थाऽपि न स्यात् । तत्तद्विषयभेदग्राहकेन्द्रियभेदविनाशादेव ह्यन्धादिव्यवस्था । तदिदमाह—**अक्षान्धादी**ति । अतो युगपदेव तत्तद्विशेषणभेदविशिष्टवस्तुग्रहणमिन्द्रियकृत्यम् । ते च विशिष्टा युगपदेव सन्निधाने युगपदेव गृह्यन्ते, यथा सेनावनतारामण्डलादिज्ञान इत्युक्तम् । तथा च परस्परासंकीर्ण-नानाधर्मविशिष्टाः पदार्था युगपदेव गृह्यन्ते । घटः पटः शुक्लं कृष्णं चलं निश्चलमित्यादि । तत्र घटत्वपटत्वशुक्लत्व-कृष्णत्वादयः स्वरूपेण गृह्यमाणाः परस्पराध्यासं व्यावर्तयन्ति । तच्च व्यावर्तनं तत्तद्धर्मस्वरूपग्रहणकृत्यम् । तेनैव कृत्येन विशेष्यमाणास्त एव धर्माः प्रतियोग्यपेक्षया भेदा इति व्यवह्रियन्त इति प्रागुक्तमेवार्थं प्रतिपत्तॄणां बुद्धिसौकर्याय प्रकटयति--**तद्युक्त** इति । भेदव्यवहारेऽपि युगपद्व्यवहारे न पौर्वापर्यापेक्षा ; यथा पञ्चाप्यङ्गुलयः परस्परं भिन्ना इति । यत्र पुनः क्रमव्यवहारस्तत्र वाचः क्रमवृत्तित्वादस्तु वाङ्मात्रे पौर्वापर्यम्, अङ्गुष्ठात् कनिष्ठा भिन्नेति । अत्रापि प्रतिपत्ति-पौर्वापर्यं न निर्बध्नीमः । अतो न भेदप्रत्यक्षत्वानुपपत्तिः ॥ १४ ॥ **इति भेदप्रत्यक्षत्वानुपपत्तिनिरासः ॥**

375. **अद्रव्ये नैकरूपे ह्यगणिषत गुणाः सत्त्वमुख्या द्विधाऽऽद्यं**
शुद्धं तन्नित्यभूतौ त्रितयमिह चतुर्विंशतौ व्याप्तितः स्यात् ।
पञ्चान्ये शब्दपूर्वा अपि परिगणिता भूतवर्गेष्वथान्य-
स्संख्यानादिश्च भेदः परिणमति यथासंभवं द्रव्यवर्गे ॥ १५ ॥

एवं भेदतत्त्वं प्रसाध्य प्रामाणिकत्वेनाभिमतान् गुणभेदान् यथाप्रमाणं विभज्य दर्शयति—**अद्रव्य** इति ॥ तस्मिन्नद्रव्यवर्गे सत्त्वं रजस्तम इति प्रधानभूता गुणाः । सत्त्वं च द्विविधम्—शुद्धसत्त्वं मिश्रसत्त्वं चेति । शुद्धसत्त्वं नित्यविभूतौ । तदिदमाह—**शुद्धं तन्नित्यभूता**विति । **त्रितय**मिति । मिश्रसत्त्वं रजस्तमसी चेति त्रितयम् । इदं चतुर्विंशतितत्त्वे सर्वत्रापि स्यादित्याह—**व्याप्तितः स्या**दिति । एवं शब्दादयः पञ्च गुणाः आकाशादिपञ्चभूतेषु उत्तरोत्तरमाधिक्येन दृश्यन्त इत्याह—**पञ्चेति** । संख्यादिरन्यो गुणवर्गो यथाप्रमाणमुपलभ्यमानो न्यूनाधिकभावेन तत्रतत्रावतिष्ठत इति दर्शयति—**अथान्य** इति । **यथासंभव**मिति । प्रमाणगतिरेव पदार्थपरिकल्पनायां शरणं न पुनर्**वैशेषिकादीनां** सांकेतिकस्संव्यवहार इत्यर्थः ॥ १५ ॥ **इति अद्रव्यावान्तरविभागादि ॥**

376. **स्थित्युत्पत्त्यन्तलीलाविधिषु भगवताऽधिष्ठिताः शास्त्रवेद्या-**
स्सत्त्वाद्याः स्थूलसूक्ष्मप्रकृतिगतगुणा हेतुभूतास्सुखादेः ।
साम्ये तेषां त्रयाणां सदृशपरिणतिः स्यादिहान्यान्यथात्वे
क्लृप्ताऽन्यैर्द्रव्यतैषां श्रुतिपथविहता कुत्रचित्तूपचारः ॥ १६ ॥

स्थितीति ॥ पूर्वोक्तानां सत्त्वरजस्तमसां स्थित्युत्पत्तिलयेषु विशेषेण भगवताऽधिष्ठितत्वं तेषुतेषु शास्त्रेषूच्यते । ते च स्थूलसूक्ष्मप्रकृतिगतास्सुखदुःखमोहानां हेतवो भवन्तीति च शास्त्रसिद्धम् । तेषां च साम्ये प्रलयावस्थायां सदृशपरिणतिः, वैषम्ये सृष्ट्यवस्थायां विसदृशपरिणतिश्च शास्त्रैकसमधिगम्या । अन्या—विसदृशपरिणतिः । अन्यथात्वे—वैषम्ये । **सांख्याः** पुनरेषां द्रव्याभेदेन द्रव्यत्वमाहुः । तत् गुणत्वप्रतिपादकश्रुतिस्मृतीतिहासादिविरुद्धम् । प्रमाणेषु च क्वचिद्यदस्ति द्रव्याभेदव्यवहारः, स पुनरौपचारिकः । व्यक्तमन्यत् ॥ १६ ॥ **इति सत्त्वरजस्तमसामुपयोगादि अद्रव्यता च ॥**

377. **बुद्धित्वादिः प्रधाने समपरिणतिरित्येवमागन्तुधर्माः**
द्रव्येष्वन्येषु चान्ये कतिचन कथिताः केचिदध्यक्षसिद्धाः ।
आनन्त्यादर्थमान्द्याद् दुरवगमतया सूक्ष्मवैषम्यभेदै-
रैकैकश्येन चिन्तामिह जहति बुधा निश्चितापेक्षितार्थाः ॥ १७ ॥

प्रधाने बुद्धित्वादीन् कतिचन प्रकारानुक्त्वा, प्रकारान्तराण्यपि अनन्तत्वान्न परिगण्यन्ते, अथापि प्रामाणिकत्वात् प्रधाने कार्यकारणरूपे परिगृह्यन्ते इति दर्शयति—**बुद्धीति** ॥ प्रधाने बुद्धित्वादयो धर्माः सृष्ट्यवस्थायां विषमरूपाः ; प्रलयावस्थायां समपरिणतयः । एवमन्येष्वपि द्रव्येषु कतिचिद्धर्माः शास्त्रसिद्धाः, कतिचिच्च प्रत्यक्षसिद्धाः । अतोऽनुमानशरणानां साधनबाधनयोरत्रानवकाशः । न हि नरशिरःपवित्रत्वाद्यनुमानं शास्त्रप्र[वृत्ति]तिपत्तिशैलीमुल्लिलङ्घयिषति । तर्हि सर्वेऽपि धर्माः प्रत्येकं प्रतिपाद्या इत्याशङ्क्य परिहरति—**आनन्त्या**दिति । अद्रव्यावान्तरभेदानामानन्त्यात् विविच्य

प्रतिपादने पुनरर्थमान्द्यात् सूक्ष्मवैषम्यभेदैर्दुरवगमत्वाच्च, निश्चितापेक्षितार्थाः मर्नापिणः, एकैकद्वयेन चिन्तामिह जहति— न तावता तेषां प्रकारभेदानामप्रामाणिकत्वमित्यर्थः ॥ १७ ॥ **इति विचित्रावस्थानन्त्यम् ॥**

378. **शब्दाद्यास्तत्तदक्षप्रतिनियतिजुषस्सर्वतन्त्रप्रसिद्धा-**
स्तैरेकद्व्यादिसंख्यैर्युपवनहुतभुग्वारिभूम्यस्समेताः ।
पञ्चीकारादिनैषां विनिमितगुणता व्योमनैल्यादिबोधे
तद्योगात्तत्र तत्तद्गुणजनिरिति चेन्नान्यथाऽत्रोपपत्तेः ॥ १८ ॥

अनन्तरं शब्दादीनां ग्राहकनियममाधारनियमं चोक्त्वा भूतान्तरे तत्तद्गुणप्रतिभासस्योपाधिनियमं चाह—**शब्दाद्या** इति ॥ शब्दादीनां श्रोत्रादिग्राह्यत्वनियमस्सर्वतन्त्रसिद्धः । शब्दादीनामाकाशादिषु उत्तरोत्तरगुणाधिक्यं शास्त्रप्रसिद्ध-मुपलम्भसिद्धं च । गुणविनिमयस्तु पञ्चीकरणादिभिरेव स्यात् । तत्रोदाहरणमाह—**व्योमेति** । गगनतले नैल्यादि-प्रतिभासः पञ्चीकृतपृथिव्यादिसंबन्धेनैव स्यात् । एवमुष्णं जलं सुरभिस्समीर इत्यादिषु संसर्गविशेषाद् गुणान्तरप्रतिभासः स्वयमेवोहनीयः । भूतान्तरसंसर्गात् भूतान्तरे तत्तद्गुणोत्पत्तिकल्पनं कल्पनागौरवान्न योयुज्यते । अतो रक्तं नभः धूम्रा दिश इत्यादयो व्यवहारा औपाधिका इति । [पटमलिनिमवत् यथा पटस्य मालिन्याभावेऽपि शङ्खस्य पीतिमाभावेऽपि मलिनः पटः, पीतश्शङ्खः, उष्णं जलमित्यादि] ॥ १८ ॥ **इति शब्दादिगुणभेदग्राहकाधारनियमः ॥**

379. **कस्तूरीचम्पकादौ समविषमतया सम्मतस्सौरभादि-**
स्तद्वच्छब्दादयोऽमी त्रिगुणतदधिकद्रव्यनिष्ठा गुणाः स्युः ।
निष्कृष्टे शास्त्रदृष्ट्या न कथमपि मिथस्संकरश्शङ्कनीयः
स्वाच्छन्द्याच्छङ्कमानः स्वमिव सुरगुरुं किं न शङ्केत मुग्धम् ॥ १९ ॥

लीलाविभूतिवन्नित्यविभूतावपि शब्दादिसंभवं तस्य च सर्वातिशाय्युत्कर्षशालित्वं चोपपादयति—**कस्तूरीति** ॥ यथा कस्तूरीचम्पकप्रभृतिषु गन्धसाम्ये सत्यपि सौरभविशेषस्तत्रतत्रोपलभ्यते, एवं त्रिगुणे शुद्धसत्त्वे च शब्दादिसद्भावे-ऽपि धर्मिग्राहकप्रमाणसिद्धं वैषम्यमनतिलङ्घनीयमेव । न हि वीणावेणुप्रभृतीनामैकरूप्येण स्वरनियमः; सुखविशेषहेतु-त्वं चान्यथाऽन्यथोपलभ्यते । एतत् सर्वं प्राकृतेष्वेव । अप्राकृते पुनर्विभूत्यन्तरे श्रुतिस्मृतीतिहासपुराणप्रसिद्धाः प्रकार-विशेषाः तत्तदनुभवाधीनानन्दविशेषाश्चापलपितुं न शक्यन्त इति भावः । तदधिकद्रव्यं—त्रिगुणद्रव्याधिकं नित्यविभूति-द्रव्यम् । **निष्कृष्ट** इत्यादि । शास्त्रदृष्ट्या निर्णीते वैषम्ये सामान्यधर्ममात्रात् संकरो न शङ्कनीयः । अन्यथा सर्वत्राति-शङ्कायां निर्मूलशङ्कायास्सुलभत्वात् । स्वयमिव सुरगुरुरपि मूढ इत्येव शङ्क्येत । अतो विलक्षणस्वरूपे शुद्धसत्त्वद्रव्ये विलक्षणाः शब्दादय इति न संकटं किंचित् ॥ १९ ॥ **इति विभूतिद्वयेऽपि शब्दादिसंभवः ॥**

380. **शब्दो नैकेषु युक्त्याऽप्युचित इह पुनः पारिशेष्यं तु मन्दं**
वायुश्शब्दस्वभावश्श्रुतिशिरसि यतः स्मर्यते च स्वरात्मा ।
गन्धालोकादिनीतिं यदिह निजगदुर्यामुनाद्यास्ततोऽपि
स्पष्टो भेर्यादिनिष्ठोऽयमिति गतिवचो गन्धवत्तद्वि[शेषे]शिष्टे ॥ २० ॥

अत्र केचित् शब्दस्याकाशमात्राश्रितत्वमाहुः । तन्नेति प्रतिपादयति—**शब्द** इति ॥ **युक्त्याऽप्युचित** इति । युक्तिरन्वयव्यतिरेकोपलम्भः । पृथिवीजलादावपि शब्दान्वयव्यतिरेकोपलम्भो हि दृश्यते । तेन शब्दः क्वचिदाश्रित इति सामान्येनाधिकरणोपलम्भेऽपि स्वविवक्षिताकाशमात्रपरिशेषो न स्यात्; तादृशस्य परिशेषस्यानियतत्वात् । यथा युक्त्याभासेन द्रव्यान्तरनिषेधः, एवमाकाशनिषेधस्यापि केनापि तादृशेन युक्त्याभासेन कर्तुं शक्यत्वात् । तदिदमाह—**इहेति** । युक्त्यापीत्यऽपिशब्देन प्रत्यक्षादिकमपि प्रमाणयति; मेघो गर्जति, शङ्खो नदति, भेरी ध्वनतीत्यादिलोकोपलम्भात् । अस्तु वाऽयमानुमानिकोपलम्भः । अथापि भेर्यादिनिष्ठ एवायमुपलभ्यत इति न केवलमाकाशैकनिष्ठत्वम् । अपि च श्रुतिरेव शब्दस्य भूतान्तरनिष्ठत्वमुपपादयति । अध्ययनोपक्रमपरिपाठ्ये *शन्नो मित्र इत्यस्मिन्मन्त्रे *नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि इति वायोरेव वेदात्मना परिणतिरुपलभ्यते । तत्तु वायोश्शब्दाधारत्वमन्तरेण न संजाघटीति । एवं *तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेद इत्यादिकमपि भाव्यम् । स्मर्यते च स्वरात्मा—स्वररूपेण वायुरेव स्मर्यते, *वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः । अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥ इति । एवं नाभिदेशादेव निर्गतस्य वायोस्ताल्वादिस्थानसंबन्धेन तत्तच्छब्दपरिणतिहेतुत्वं स्मृत्यादिप्रसिद्धं स्वयमेवानुसन्धेयम् । उपलम्भस्तु पञ्चभूतसाधारणत्वान्नाकाशस्यैव शब्दाश्रयत्वमुपपादयितुं शक्नोति । तर्कोऽपि तादृशः । अनुमानमप्यव्यवस्थितमिति प्रागेवोक्तम् । शब्दस्यापि गन्धवदालोकवच्च स्वाश्रयानुवर्तित्वमशेषदेशव्यापित्वं च लोकदृष्ट्या **श्रीयामुनाचार्यादिभिरुपपादितम्** । ततः शब्दस्य भेर्यादिनिष्ठत्वमुपपादितं भवति । कथं तर्हि शब्दस्य गतिव्यवहारः भेरीध्वनिरुज्जृम्भते, अध्ययनशब्दश्च सर्वतः प्रवर्तत इति? अयमपि पूर्वोक्तेनैव दृष्टान्तेन संघटते; गन्धाद्याश्रयद्रव्यप्रसरणवत् शब्दाश्रयद्रव्यस्यापि सर्वतः प्रसरणात् । यथा परपक्षे निमित्तकारणभूतवायोः प्रसरणेन सर्वतश्शब्दोपलम्भः; एवं तत्तद्द्रव्यप्रसरणेन तत्तद्द्रव्यनिष्ठशब्दोपलम्भस्यापि संभव इति । आकाशनिष्ठत्वं तु शब्दस्य भूतान्तर्गतत्वेनास्माभिरप्यनुमन्यते ॥ २० ॥ **इति शब्दस्य सर्वभूताश्रितत्वम्** ॥

381. **सत्यान् सत्यापयन्तः कतिचन चतुरः स्पर्शरूपादिधातून्**
शब्दं स्वार्हाक्षसिद्धं चतुरधिकरणं प्राहुरेभ्यो न भिन्नम् ।
किं तद्भेदाप्रतीतेः प्रबलविहतितस्संमतैक्यप्रमातः
स्वाच्छन्द्यादेशनाया विभवत इति वा वीक्ष्य शिष्टा विजह्युः ॥ २१ ॥

अत्र केचिद्रूपादिकं चतुष्टयमस्ति । शब्दस्तु तच्चतुष्टय एव वर्तते । स च श्रोत्रगम्यः; तथाऽपि तेभ्यो न भिद्यत इत्याहुः । तदिदमनुभाषते—**सत्यानिति** ॥ अत्र धातुशब्दः परसिद्धान्तप्रयोगप्रसिद्धमनुवदति । अतिरोहितमन्यत् । अनुभाषितमर्थं विकल्प्य दूषयति—**किं तदिति** । किं चतुर्भ्यो धातुभ्यो व्यतिरिक्तपदार्थभेदाप्रतीतेः, किं वा प्रबलव्याघातदर्शनात्, यद्वा चतुर्भिरुपरितनानामैक्यप्रतीतेः, यदि वा स्वाच्छन्द्यात्, केवलसुगतगुरूपदेशाद्वा, तादृशं मतं स्वीक्रियते? तत्सर्वमसिद्ध्यादिदोषदूषितत्वाच्चतुर्भ्यो धातुभ्यो व्यतिरिक्तार्थप्रहाणे हेतुर्न भवतीत्यर्थः ॥ २१ ॥ **इति सौगतोक्तशब्दक्लृप्तिभङ्गः** ॥

382. **शब्दोऽवस्थाविशेषः श्रुतिभिरभिहितस्तेन नैष स्वनिष्ठो**
व्योमादेश्चाविभुत्वात् क्वचिदपि न तु तत्सन्निधिस्तद्विदूरे ।

साक्षादक्षाप्तिसाक्षात्कृत इति घटवद् द्रव्यमित्यप्यसारं
साध्यात् प्राग्घेत्वसिद्धेर्न हि परमतवन्नाभसं श्रोत्रमत्र ॥ २२ ॥

अत्र केचिदाहुः—शब्दस्य गुणत्वमेव नास्ति, अपि तु द्रव्यत्वमेव ; यथाऽऽहुः—* वर्णात्मकाश्च ये शब्दा नित्यास्सर्वगतास्तथा । पृथग्द्रव्यतया ते तु न गुणाः कस्यचिन्मताः ॥ इति । एतत्तु वाग्वाद्यवस्थाविशेषरूपशब्दप्रतिपादकश्रुतीतिहासपुराणादिविरुद्धत्वादनादर्तव्यमित्याह—**शब्द** इति ॥ नैष स्वनिष्ठः—स्वतन्त्रं द्रव्यं न भवतीत्यर्थः । अस्य च शब्दस्य स्वाधारभूतव्योमादेरविभुत्वात् व्योमादिरहिते देशे पुनरसन्निधानं न दोषायेत्याह—**व्योमादे**रिति । परमाकाशे तु प्राकृताकाशाभावेऽपि शब्दसद्भावो युज्यत इति प्रागेवोक्तम् । तर्हि शब्दो द्रव्यं साक्षादिन्द्रियसंबन्धेन गृह्यमाणत्वात् घटवदित्यनुमानं प्रयुञ्ज्महे इति चेत्, तदप्यसारमित्याह—**साक्षादि**ति । कुत इत्यत्राह—**साध्यादि**ति । अयमर्थः—शब्दस्य द्रव्यत्वे सिद्धे साक्षादिन्द्रियसंबन्धेन साक्षात्कारसिद्धिः ; तत्सिद्धौ तत्सिद्धिरितीतरेतराश्रयत्वम् । अथापि द्रव्यत्वसिद्धिमन्तरेण साक्षादिन्द्रियसंबन्धस्सिध्यति, श्रोत्रस्याकाशत्वात् शब्दस्याकाशगुणत्वादिति चेत्; अत्र केचिदाहुः—* हेतुसिद्ध्या साध्यसिद्धिर्व्याहन्यत इति । तथा हि—शब्दस्याकाशगुणत्वाङ्गीकारेण साक्षादिन्द्रियसंबन्धस्सिध्यति । तथा च हेतुरेवायं साध्यं व्याहन्तीति । तदिदं सर्वमभिप्रेत्याह—**साध्यादि**ति । हेत्वसिद्धिमुपपादयति—**न हीति** । अस्मत्पक्षे श्रोत्रस्याकाशत्वायोगात् **नैयायिकादि**मतवत्साक्षादिन्द्रियसंबन्धप्रसङ्गोऽपि नास्तीत्यर्थः ॥ २२ ॥ **इति शब्दद्रव्यत्वभङ्गः ॥**

383. **वर्णानां सध्वनीनामभिदधति हरिद्वाससः पुद्गलत्वं**
नाक्षादेस्सिद्धमेतन्न च तदभिमते शब्दितः शब्दशब्दः ।
सूक्ष्मद्रव्ये हि धर्मः श्रुतिविषयदशालक्षणो दुस्त्यजस्तै-
स्तस्मान्नासत्समीक्षामतिपतितुममी शक्नुयुस्तद्वदन्ये ॥ २३ ॥

सध्वनीनां वर्णानां पुद्गलरूपत्वमाहुः **क्षपणकाः**, तदिदमनुवदति—**वर्णाना**मिति ॥ हरिद्वाससः—नग्नाटाः । दूषयति—**नाक्षादे**रिति । अयमर्थः—न तावत्प्रत्यक्षादिप्रमाणसिद्धत्वादयमर्थोऽवगम्यते । नापि लोकव्यवहारानुरोधेन । उभयमपि नास्ति । तदाह—**न चे**ति । तदभिमते पुद्गले न शब्दशब्दः शब्दितः—न व्युत्पन्नः ; पुद्गलेषु शब्दशब्दस्य व्याकरणाभिधानपाठलोकव्यवहारशिष्टप्रयोगेष्वन्यतमस्याप्यभावात्, उपजीव्यानुमानाभावात्, तदनुग्राहकतर्काभावाच्चेत्यर्थः ॥ २३ ॥ **इति शब्दपुद्गलत्वभङ्गः ॥**

384. **वर्णे स्थैर्यं विरुद्धान्वयविरहवति प्रत्यभिज्ञा नियच्छे-**
त्तैव्र्यादिव्यञ्जकस्थं भ्रमवशघटितं तत्र कल्प्येत दिग्वत् ।
एकाक्षग्राह्यसंवित्प्रतिनियतिरपि ह्यञ्जनादाविव स्या-
द्व्यक्त्या स्यात् कार्यताधीर्यदि न निगदितो नैगमैरस्य नाशः ॥ २४ ॥

वर्णात्मकशब्दस्वरूपनित्यत्वमाहुः **कौमारिलाः** । तदिदमाह—**वर्णे** इति ॥ पूर्वं द्रव्यत्वं निराकृतम् ; इदानीं नित्यत्वमिति विभागान्न पौनरुक्त्यम् । ननु तीव्रमन्दादिभेदेन विरुद्धधर्मग्रस्तत्वात्कथमस्मिन्नित्यत्वमित्याशङ्क्याह—**विरुद्धान्वये**ति । तीव्रमन्दादिभावो व्यञ्जकस्य एव ; न पुनः शब्दस्य इत्याह—**तैव्र्यादी**ति । कथं तर्हि शब्दे तैव्र्यादि-

प्रत्यय इत्यत्राह—**भ्रमवशघटित**मिति । तत्र दृष्टान्तं दर्शयति—**दिग्व**दिति । यथा नित्यविभुशब्दवादिनां पूर्वशब्दोऽपरशब्द इति दिक्प्रत्ययः काल्पनिकः, एवं तीव्रादिप्रत्ययोऽपीति । अनेनैव दृष्टन्तोपादानेन दिक्प्रत्ययस्यापि शब्दे काल्पनिकत्वं स्थापितं भवति । अथवा अनित्याविभुशब्दवादिनामपि शब्दे दिक्प्रत्ययः काल्पनिक एव । भेर्याद्युपाधीनामेव तत्तद्दिक्संबन्धः, उपाधिसंबद्धाकाशनिष्ठतामात्रेण शब्दे दिक्संबन्धव्यवहारः । ननु कथं *समानेन्द्रियग्राह्याणां समानदेशस्थानामित्यादिना प्रतिनियतव्यञ्जकाभिव्यङ्ग्यत्वं प्रतिषिद्धं शब्दानाम् ? अतस्ताल्वादिव्यापारोत्पाद्यत्वं शब्दस्येति । तन्न ; अञ्जनादिभिर्व्यभिचारात् । दृष्टं खलु प्रतिनियताञ्जनाभिव्यङ्ग्यत्वं पिशाचादौ निहितनिध्यादौ च ; तद्वदिहापि ताल्वादिव्यापाराणामकारणत्वेऽपि न दोषः । तदिदमाह—**अञ्जनादाविवे**ति । कथं तर्हि *कविः काव्यं निर्ममे, *प्रोवाच ब्रह्मविद्यामिति शब्दे कार्यत्वप्रतिपत्तिरित्यत आह—**व्यक्त्ये**ति । इत्थमङ्गीकारे श्रुतिविरोधमाह—**यदि ने**ति । श्रुतिस्मृतीतिहासपुराणेषु शब्दस्य विनाश एव सर्वत्र प्रतिपाद्यत इत्यर्थः । **नैगमैः**—निगमसंश्रयैर्वचनैश्शब्दनाशो निगदितः ॥ २४ ॥

385. **ध्वन्यात्मा वायुभेदः श्रुतिविषयतयाऽपाठि तौतातिताद्यैः**
तद्वत् पञ्चाशदेते समकरणतया वर्णिताः किं न वर्णाः ।
तैव्रयादिर्वर्णधर्मो नियत इति यथादर्शनं स्थापनीयं
स्पर्शादौ चैवमिष्टं तदिह न सुलभा द्रव्यता नित्यता च ॥ २५ ॥

किंच ये शब्दस्य द्रव्यत्वं नित्यत्वं च वर्णयन्ति तैरेव **तौतातिताद्यैः—कौमारिलाद्यैः** ध्वन्यात्मा वायुभेद एव श्रुतिविषयतयाऽपाठि । एवमेव पञ्चाशदेते वर्णाः किं न वर्णिताः ? समकरणतया—समानेन्द्रियग्राह्यतया समानताल्वादिव्यापारजन्यतया च । तेषामेव वर्णानां वायुभेदानां स्वाभाविक एव तीव्रादिभावः ; न पुनरौपाधिकः । यथादर्शनं व्यवस्थापनीयम्—यथा दुरालभास्पर्शस्य दुःखहेतुत्वं दहनस्पर्शस्य दाहहेतुत्वम् । तस्मात् ध्वन्यात्मकशब्दवत् वर्णात्मकोऽपि शब्दो वाय्ववस्थाभेद इति स्वीकारे को विशेषः ? अवस्था चागन्तुरपृथक्सिद्धो धर्म इत्युक्तम् । अतो द्रव्यत्वं नित्यत्वं च वर्णानामिति वर्णितमेतदप्रामाणिकमिति वर्णयामः । विस्तरस्त्वन्यत्रानुसन्धेयः ॥ २५ ॥ **इति वर्णानित्यत्वम् ॥**

386. **शब्दानित्यत्वतोऽपि श्रुतिषु न विलयः स्यात् क्रमव्यक्तिनीत्या**
तन्नित्यत्वे च काव्यादिकमपि न कथं नित्यमित्यभ्युपैषि ।
तस्मान्नित्यैकरूपक्रमनियमवशान्नित्यभावः श्रुतीना-
मीशोऽप्यध्यापको नः पर[मि]मतिचकितैर्वर्णनित्यत्वमुक्तम् ॥ २६ ॥

कथं तर्हि वर्णानित्यत्वे वेदनित्यत्वं सिध्यतीत्यत्यन्तभीतस्यात्यास्तिक्यनिमित्तचोद्यं परिहरति—**शब्दे**ति ॥ शब्दानित्यत्वेऽपि श्रुतिषु न विलयः स्यात्—यथा शब्दानां नित्यत्वेऽपि नित्यविभूनां तेषां देशतः कालतो वा कश्चित् क्रमो नास्ति, क्रमविशेषविशिष्टस्यैव शब्दस्य पदत्वं वाक्यत्वं चानुवर्ण्यते ; स पुनः क्रमः कीदृग्रूप इति चिन्तने शब्दानां क्रमाभिव्यक्तिमात्रमेव ; अभिव्यक्तिश्चोपलम्भसामग्रीसान्निध्यं वा, तदधीनोपलम्भो वा ; तदनुक्रमोऽपि तत्कालपरम्परासंपातः ; सर्वमेतदनित्यमेव ; एवं च यथा क्रमाभिव्यक्त्या वेदनित्यत्वं भवद्भिरभिव्यक्तिनियममात्रेणाङ्गीक्रियते ; एवं क्रमविशेषविशिष्टशब्दोत्पत्तिपारम्पर्यमेवोच्चारणक्रमनियमः ; तेनैव वेदनित्यत्वमस्माकं सिध्यति । वर्णनित्यत्वमप्रयोजक-

मेव ; वर्णानामवेदत्वात् । वाक्यसङ्घातविशेषो हि वेदः ; पदसङ्घातविशेषो वाक्यम् ; पदं च वर्णसङ्घातविशेषः ; सर्व-मेतदनित्यमेव ; वाक्यानां सजातीयत्वमात्रं त्ववशिष्यते, तदेव नित्यत्वमिति । अन्यथा वर्णानां नित्यत्वमात्रेण काव्या-दिकमपि नित्यमिति कथं नाभ्युपैषीत्याह—**तन्नित्यत्वे** चेति । कथं तर्हि वेदनित्यत्वमित्यत्र नित्यत्वे प्रयोजकं निगम-यति—**तस्मादि**ति । इदं खलु वेदानां नित्यत्वं यन्नित्यैकरूपक्रमविशेषोच्चार्यमाणत्वम् । स पुनः क्रमो निपुणं निरूप-यतामुच्चारणमात्रनिष्ठ एवेति । एतेनाध्यापकानां पूर्वपूर्वाध्यापकाध्ययनानुक्रमानुसरणमेव वेदनित्यत्वमिति सिद्धे सति, ईश्वरोऽपि पूर्वकल्पानुसरणं स्वसंकल्पसिद्धं स्वयमप्यनुसरतीति, वेदेऽपि पूर्वकल्पोच्चारणानुसरणमनुवर्तयतीति वेदनित्यत्व-सिद्धिः । वर्णनित्यत्ववादिभिस्तु तदनित्यत्वे वेदानित्यत्वभ्रान्त्या तद्भ्रान्तिनिबन्धनभीत्या वा वर्णनित्यत्वमुक्तमिति न तानप्यधिक्षिपामः ॥ २६ ॥ **इति वर्णानित्यत्वेऽपि वेदनित्यत्वप्रकारः ॥**

387. **नैवोष्णौ नापि शीतौ क्षितिसततगती तत्र तोयादियोगात्**
शीतत्वादिप्रतीतिस्तदुपधिकतया तत्रतत्रैव दृष्टेः ।
आयुर्वेदे तुषारो मरुदिति कथनं त्वद्भिराप्यायिकाभि-
र्वृद्धिह्रासौ समाधैर्भवत इति परं तच्चिकित्सानियत्यै ॥ २७ ॥

एवं शब्दं निरूप्य स्पर्शे विशेषान् निरूपयति—**नैवे**ति ॥ यथोपलम्भमनुष्णाशीतस्पर्शौ पृथिवीवायू, तत्र तोयादियोगात् शीतत्वादिप्रतीतिः, शीतं स्थलं शीतो वायुरित्यादि । तत्र हेतुमाह—**तदुपधिकतये**ति । दर्शनं हि सर्वत्र व्यवस्थापकम्, उष्णा भूरुष्णं जलमित्यादिष्वातपाद्युपाधिवशादेव तत्रतत्रौष्ण्यादेर्दर्शनात् । कथं तर्हि आयुर्वेदे *तुषारो मरुदित्युच्यते ? तुषारः शीत इत्यर्थः ; तत्तु आप्यायिकाभिरद्भिरेव । कथं वा तर्हि वृद्धिह्रासौ समाधैर्भवत इति तुल्य-गुणयोगेन विरूपाणामपि तत्रैवायुर्वेदे साम्यादिकमुच्यते ? तत्पुनश्चिकित्सानियमार्थम् । अयमत्र भावः—अस्य धातोरनेन हेतुनाऽभिवृद्धिः, अनेन च परिक्षय इत्यादि शास्त्रसिद्धं दृष्टं च । सर्वेषां धातूनां यथोचितं चिकित्सा अनादिसिद्धा । शास्त्रेण तत्रतत्र चिकित्साविशेषनियमसिद्ध्यर्थं तानितानि रूपाणि कल्पितान्यकल्पितानि व्यवह्रियन्त इति, नैतावता पदार्थतत्त्वनियमसिद्धिरिति ॥ २७ ॥ **इति अनुष्णाशीतस्पर्शाधारनियमः ॥**

388. **स्यादुष्णः कृष्णवर्त्मा सलिलमपि तथा शीतमस्तु प्रकृत्या**
स्पर्शोऽन्योऽप्यत्र दृष्टस्स तु भवतु रुमाक्षिप्तलावण्यवच्चेत् ।
मैवं संसृष्टवस्तूपधिनियततया तद्विवेकस्य युक्तेः
प्रायश्शीतो भवेतिप्रभृतिकमपि तदाहकत्वादिरोधात् ॥ २८ ॥

एवं शीतोष्णभूतनियमोऽपि यथोपलम्भं द्रष्टव्य इति दर्शयति—**स्यादि**ति ॥ उष्णः कृष्णवर्त्मा, तथैव जलमपि शीतमित्युपलभ्यते प्रकृत्या । अत्र कश्चिदाह—अन्योऽपि स्पर्शो दहने सलिले च कदाचिदुपलभ्यते । स तु रुमाक्षिप्त-काष्ठादिलवणत्वन्यायेन तस्यैव परिणतिविशेष इति । तदिदमाह—**स्पर्श** इति । तन्निराकरोति—**मैव**मिति । रुमाक्षिप्तकाष्ठा-देर्लवणत्वपरिणतिः प्रत्यक्षसिद्धगुणवैषम्यनियमेन युक्ता । अत्र त्वग्न्यादिसंसर्ग एव जलादेरौष्ण्यं तथा सलिलसंसर्ग एव भूतान्तरे शैत्यमित्युपाधिसंसर्गो दृश्यत इति विशेषः । इदमेव स्फोरयति—**संसृष्टे**ति । कथं तर्हि *शीतो भव हनूमत

इति वह्नेरपि शीतत्वमित्याशङ्क्याह—**प्राय** इति। अयमत्र भावः—न पुनर्वह्नेश्शीतत्वं जायते; अपि तु सीतासंकल्पविशेषेण दाहकत्वमेवोपरुध्यत इति ॥ २८ ॥ **इति शीतोष्णभ्रमनियमः ॥**

389. **पीता भूः श्वेतमम्भो हुतवहपवनौ रक्तधूम्रौ तथा द्यौ-**
र्नीलेति क्वापि शिष्टं तदिह न नियतां वर्णसत्तां ब्रवीति।
ध्यानार्थं मन्त्रवर्णेष्विव कथितमिदं व्योमवातौ ह्यरूपौ
पीतैकान्त्यं भुवोऽक्षश्रुतिहतमथ तत्प्राचुरी साऽस्तु मा वा ॥ २९ ॥

एवं रूपमपि परिशोधयति—**पीतेति** ॥ अत्र कश्चिदचूचुदत्। पीता भूमिः श्वेतमम्भः वह्निपवनौ रक्तधूम्रौ द्यौर्नीलेति मन्त्रशास्त्रे वर्णविशेषो विविच्यते; तच्च शास्त्रं नाग्रहनिबन्धनम्; अतस्तदनुसारेण नियता वर्णसिद्धिरनुसरणीयेति। तदिदं निराचष्टे—**तदिहेति**। कथमित्यत आह—**ध्यानार्थमिति**। केवलं ध्यानार्थमेव तत्तद्वर्णकथनं तेषुतेषु भूतेषु। तत्र दृष्टान्तमाह—**मन्त्रवर्णेष्विवेति**। अत्रैव हेतुमाह—**व्योमेति**। अरूपावेव ह्याकाशवायू रूपवत्तयाऽत्र निर्दिश्येते। किंच अनेकरूपयुक्ताया भुवः पीतैकान्त्यवचनं प्रत्यक्षविहतं श्रुतिविहतं च; श्रूयते हि * यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति। तर्हि प्राचुर्यविशेषात्तत्तद्वर्णक्लृप्तिरिति चेत्; साऽप्यस्तु मा वा; नास्माकं काचिद्धानिरित्याह—**प्राचुरीति** ॥ २९ ॥ **इति भूतपञ्चकवर्णोक्तिनिर्वाहः ॥**

390. **कृष्णामाम्नासिषुः क्ष्मां तदिह न विरहं वक्ति रूपान्तराणां**
प्रत्यक्षादेर्विरोधात्पचनविषमितं स्पर्शगन्धादि चास्याः।
पाथस्तेजोविशेषे स्फुरति वसुमती भागतो वर्णभेदो
न ह्यम्भः क्वापि दृष्टं विपरिणतगुणं पाकसंस्कारतोऽपि ॥ ३० ॥

तर्हि कथं श्रुत्या पृथिव्याः कृष्णत्वनियम इत्याशङ्क्य परिहरति—**कृष्णामिति** ॥ * यत्कृष्णं तदन्नस्येति श्रुतिर्न पृथिव्या रूपान्तरविरहं वक्ति, प्रत्यक्षादिविरोधात्; उपलभ्यते हि रूपान्तरमपि पृथिव्याम्। एवं पाकभेदविषमितः स्पर्शगन्धादिनियमोऽप्यङ्गीकार्य इति दर्शयति—**वचनविषमितमिति**। क्वचित्तु कलुषजलादौ पलालवह्न्यादौ च पृथिवीसंसर्गविशेषात् वर्णभेदो दृश्यते; सोऽपि संसर्गविशेषकृत इति यथोपलम्भमङ्गीकार्य इत्याह—**पाथ** इति। अम्भसि पुनः पाके सत्यपि गुणविपरिणतिर्न क्वाप्युपलभ्यत इति युक्तमैकरूप्यमेव तत्राभिधातुमिति। दृष्टप्रक्रियामात्रानुसरणेन सर्वमेतदुपपादितमिति दर्शयति—**न ह्यम्भ** इति ॥ ३० ॥ **इति पाकजापाकजरूपादिविभागः ॥**

391. **आरब्धं रूपभेदैरवयवनियतैश्चित्रमन्यत्तु रूपं**
काणादाः कल्पयन्तः क्व तदिति कथयन्त्वंशतस्तद्विकल्पे।
नांशेष्वेतत्तदिष्टं न च तदभिहितः कश्चिदंशीति तूक्तं
स्वाधारव्यापकत्वं सुगममिह तथा स्पर्शगन्धादिचैत्र्यम् ॥ ३१ ॥

एवमुक्तेषु शुक्लकृष्णादिषु [रूपादिषु] चित्रमिति किमपि रूपा[द्य]न्तरमस्तीति केचिन्मन्यन्ते। तदनुभाषते—**आरब्धमिति** ॥ तद्विकल्पयति—**क्वेति**। अवयवरूपादिभिरारब्धं चित्ररूपं क्व वर्तते? अंशेषु वा, अंशवति वा? वि-

कल्पितमर्थं दूषयति—**नांशेष्विति**। अंशेषु चित्ररूपं वर्तत इति काणादानामेव नेष्टम्; तेषां प्रागेव रूपवत्त्वात्, तस्य च रूपस्यानिवृत्तेः। तस्मादवयविनि चित्रं रूपादि वर्तत इति वक्तव्यम्। तदपि नेत्याह—**न चेति**। अवयविभङ्गस्य प्रागेव कृतत्वादित्यर्थः। कथं तर्ह्यंशनिष्ठानां रूपभेदानां स्वाधारभूतपटव्यापकत्वमिति चेत्; तदस्माकमेव सुगमम्, पटस्याभावात्; अंशनिष्ठानां रूपभेदानां तत्तदंशव्यापकत्वाच्च। उक्तमर्थं स्पर्शादावपि तुल्यमिति निगमयति—**तथेति**। यथा चित्रं रूपं तथैव चित्रस्स्पर्शः चित्रो रसः चित्रो गन्ध इति व्यवहारोऽपीति। तत्तदंशे वैचित्रीभेदान्नापूर्वरूपादिक्लृप्तिरिति सर्वमप्यर्थं समुच्चित्य निगमितवान्॥ ३१॥ **इति अतिरिक्तचित्ररूपादिभङ्गः**॥

392. **स्नेहः प्रत्यक्षसिद्धो यदुपधिरुदके स्निग्धधीस्सद्रवत्वा-**
त्तोयत्वाच्चातिरिक्तः क्वचिदिह यदसौ भाति ताभ्यां विनाऽपि।
सौवर्णादिद्रवाणां न च भवति यतः पांसुसंग्राहकत्वं
पर्यायानुक्तिरस्मिन् भवति विषमता चेति केचिद् गृणन्ति॥ ३२॥

अत्र केचित् स्नेहाख्यगुणान्तरमस्तीत्याहुः। अपरे पुनस्तद्रूपादावन्तर्भावयन्ति। उभयमपि पक्षमनुक्रमादुपपादयति; उभयोरपि पक्षयोरेकदेशिमतत्वेन स्वीकारात्। तत्र प्रथमपक्षे प्रत्यक्षं प्रमाणयति—**स्नेह** इति॥ **यदुपधिरुदके स्निग्धधीरिति**—उदके स्निग्धधीर्यद्गुणोपाधिकेत्यर्थः। नन्वसौ स्नेहो द्रवत्वात्तोयत्वाच्च नातिरिक्त इति कश्चित्। तन्नेत्याह—**अतिरिक्त** इति। तत्र हेतुमाह—**क्वचिदिति**। असौ—स्नेहः। क्वचित्—पृथिव्याम्। ताभ्यां—द्रवत्वतोयत्वाभ्यां विनाऽपि प्रतिभातीति यतः, अतः द्रवत्वतोयत्वाभ्यामतिरिच्यते स्नेह इत्यर्थः। अयं चात्र हेतुः—द्रवत्वमेव स्नेहश्चेत् सौवर्णादिद्रवाणां पांसुसंग्राहकत्वं स्यात्। न च तत् दृश्यते। अतो द्रवत्वादतिरिक्तः स्नेहः। तदिदमाह—**सौवर्णादीति**। अपि च पर्यायानुक्तिरपि द्रवत्वस्नेहयोर्भेदं साधयति; यत्रयत्र स्निग्धत्वं तत्र सर्वत्र द्रवत्वमिति व्यवहाराभावात्। यथा मणिकृपाणदर्पणादौ सुवर्णे च स्नेहाभावस्य द्रवत्वस्य च भवतैवोक्तत्वात्। **विषमता चेति** द्रवत्ववैषम्ये स्नेहवैषम्यं नास्ति; स्नेहवैषम्ये द्रवत्ववैषम्यं चास्तीति केषांचित् पक्षः॥ ३२॥ **इति स्नेहाख्यगुणान्तरसद्भावपक्षः**॥

393. **अन्ये स्नेहं तु रूपं किमपि निजगदुः स्निग्धवर्णोक्त्यबाधात्**
दृष्टत्वात् दुस्त्यजं तद्भवति खलु भिदा काऽपि गन्धादिकेऽपि।
अप्त्वादेः पांसुसङ्गस्सुगममिदमयस्कान्तजात्यादिनीत्या
न ह्यन्यत्तत्र क्लृप्तं न च न दृढमितं पार्थिवे पिच्छिलत्वम्॥ ३३॥

अन्ये पुनरन्यथा आहुरित्याह—**अन्य** इति॥ इत्थं किल ते मन्यन्ते—स्निग्धवर्णोक्त्यबाधात् स्नेहाख्यं रूपं किमप्यधिगच्छाम इति। तदेवोपपादयति—**दृष्टत्वादिति**। अथापि रूपसामान्यात् स्नेहाख्यरूपविशेषे वैषम्यं दृश्यत इत्याशङ्क्य तत् प्रतिबन्द्या निराकरोति—**भवतीति**। दृष्टं खलु गन्धादिष्वपि तत्तद्धर्मिग्राहकप्रमाणसिद्धं वैषम्यम्। न हि कस्तूरीकरीषादिष्वेकरूपो गन्धः; न च दुरालभाशतपत्रादिष्वेकरूपः स्पर्शः। एवं रसादिष्वपि द्रष्टव्यम्। कथं तर्हि स्नेहमन्तरेण पांसुसंग्रह इत्यत्राह—**अप्त्वादेरिति**। अप्त्वं स्नेहश्च समानाधिकरणमिति हि भवता प्रतिपाद्यते। तथा च सत्यप्त्वमेव स्नेहकार्यपांसुसंग्रहे नियामकमस्तु। कथं जातिरेव गुणविशेषमन्तरेण कार्यविशेषनियामिकेत्यत्र दृष्टान्तमाह—**अयस्कान्तजात्यादिनीत्येति**। अयस्कान्तजातिविशेष एवायस्संग्रहणे निमित्तम्; न ह्यन्या तत्र कारणक्लृप्तिः।

एवमत्रापि तोयत्वजात्यतिरिक्तस्नेहरूपगुणक्लृप्तिर्न युक्तेत्यर्थः । किंच स्नेहो जलैकनियत इति स्नेहवादिभिरभिधीयते । अथापि पार्थिवे पिच्छिलत्वं दृश्यते । अतस्तत्तद्वस्तुनियतरूपविशेषाद्यतिरेकेण स्नेहो नाम कश्चिन्नास्तीत्यपरेषां पक्षः ॥३३॥ **इति स्नेहस्य रूपविशेषान्तर्भावपक्षः ॥**

394. **मासृण्यादिप्रभेदोपहितगुरुतयाऽबादिनिम्नाभिमुख्यं**
माषव्रीह्यादिराशौ भवति च पतने तादृशं तारतम्यम् ।
किंचादृष्टान्यक्लृप्तिर्ज्वलनपवनयोर्न क्रियायां तथाऽस्मि-
न्नित्येकेऽन्ये तु दृष्ट्वा गुणमधिकमुशन्त्यादिमस्यन्दहेतुम् ॥ ३४ ॥

एवं द्रवत्वेऽपि पक्षभेदावाह—**मासृण्यादी**ति ॥ मासृण्यादिप्रभेदावच्छिन्नगुरुत्वमेवाबादीनां निम्नाभिमुख्ये कारणम्, न पुनर्द्रवत्वं नाम कश्चिद्गुणः । इदं च पतने तारतम्यं माषव्रीह्यादिराशौ दृष्टमिति यथादर्शनमेवानुसरामः । न हि माषादिराशौ पतनाद्यर्थं गुणान्तरं परिकल्प्यते भवद्भिः । किंचाग्नेरूर्ध्वज्वलनं वायोस्तिर्यग्[गमन]पवनमित्यत्रा-दृष्टातिरेकेण गुणान्तरं भवद्भिर्न कल्प्यते । एवं सलिलस्यापि निम्नाभिमुख्येन सरणमित्यत्रादृष्टव्यतिरेकेण न गुणान्तरं कल्पनीयम् । तदिदमाह—**किंचे**ति । दृष्टान्तदृष्टं पक्षे योजयति—**तथे**ति । एवमेकदेशिनां पक्षं परिसमाप्यान्येषां पक्षमनुवदति—**अन्ये** त्विति ॥ ३४ ॥ **इति द्रवत्वान्तर्भावबहिर्भावपक्षौ ॥**

395. **तोये दृष्टं स्वभावाद् घृतकनकमुखे पाकजन्यं द्रवत्वं**
तैलादौ नैव पाकानुगम इति भवेत्तादृशांशक्लृप्तिः ।
भस्मीभावाद्यनर्हे यदुत कणभुजा सूत्रितं तैजसत्वं
हैमादिश्लिष्टभौमावयवनयविदामित्थमेतन्न हृद्यम् ॥ ३५ ॥

उक्तस्य द्रवत्वस्य स्वाभाविकास्वाभाविकादिविभागं दर्शयति—**तोय** इति ॥ स्वभावादेव तोये द्रवत्वं दृष्टम्; घृतकनकमुखे पाकजन्यं द्रवत्वं दृष्टम्; उभयमपि तथैवाङ्गीकर्तव्यम् । तैलादौ पाकानुगमो न दृष्ट इति तादृशांश-क्लृप्तिः । एवं दृष्टप्रक्रियामुक्त्वा कणभुगभिमतमर्थान्तरमनूद्य दूषयति—**भस्मीभावादी**ति । अत्यन्तानलसंयोगेऽनु-च्छिद्यमानद्रवत्वेन हेमादीनां तैजसत्वमुक्तं **कणभुजा** । तद्धेमादिश्लिष्टभौमावयवे व्यभिचारात् दुःस्थमेव । तुल्यं खलु हेम्ना तच्छिलष्टभौमावयवानामत्यन्ताग्निसंयोगेऽपि भस्मीभावानर्हत्वम्; अथापि यथा तेषां भौमत्वं तद्वद्धेम्नोऽपि तैजसत्वमेव साधयितुं न शक्यत इत्यर्थः । अन्यत् सर्वं **न्यायपरिशुद्धौ** विस्तरेणोक्तमस्माभिरिति नेह प्रतन्यते ॥ ३५॥ **इति सांसिद्धिकपाकजद्रवत्वाधारनियमादिः ॥**

396. **पातस्तुल्योऽम्बुभूम्योः पवनदहनयोस्तिर्यगूर्ध्वप्रवृत्त्या**
पाते भेदात् पलादिप्रतिनियतिरपि ह्यंशवैषम्यतः स्यात् ।
भागानां तारतम्याज्जलशिखिमरुतां स्यन्दनादे[र्भिदेष्टा]र्विशेष-
स्तस्मात् सर्वोऽप्यदृष्टादिह भवतु न चेत् स्याद् गुणोऽन्योऽनलादौ ॥ ३६ ॥

गुरुत्वाख्यस्य गुणस्यानुमानगम्यत्वं प्रतिबन्द्या प्रतिक्षिपति—**पात** इति ॥ * अग्नेरूर्ध्वज्वलनम् इत्यादिना पवन-दहनयोस्तिर्यक्प्रवृत्तिरूर्ध्वप्रवृत्तिश्च यथाकेवलमदृष्टात्परिकल्प्यते ; एवमम्बुभूम्योरपि पातः केवलमदृष्टादेवास्तु, किमनेन

कल्पितेन गुरुत्वेन, तत्कल्पने गौरवात्? कथं तर्हि गुरुत्वाभावे मानवेलायां द्विपलादिव्यवहारः पातभेदात् परिकल्प्येत? तदपि चांशवैषम्याद्योयुज्यत इत्याह—**पाते भेदा**दिति। पञ्चपणनिक्षेपाद्दशपणनिक्षेपे हि पातवैषम्यं दृश्यते; तत्तदाधिक्यमन्तरेण न भवति। निष्कनिक्षेपेऽप्यंशाधिक्यमस्त्येव; निष्कार्धनिक्षेपात्, अन्यथा गुरुत्वाधिक्यस्याप्ययोगात्। तथा च तेनैवांशवैषम्येण पातभेदः। तथा च किमजागलस्तनवदप्रयोजकेन गुरुत्वाधिक्येन? दृष्टा च भूतान्तरेषु गुणान्तरकल्पनामन्तरेणांशाधिक्यादेव कार्यभिदा; यथा—अग्नेरूर्ध्वज्वलनादौ। जाज्वल्यते हि वह्निरंशाधिक्ये; तदभावे केवलं ज्वलति। एवं पोपवीति च मरुत् अंशाधिक्ये, तदभावे केवलं पवते। एवं जलमप्यंशाधिक्ये क्रियासमभिहारेण स्यन्दते, तदभावे स्यन्दत एव। तस्मात् सर्वोऽप्यदृष्टादेव भवतु; अन्यथा अग्न्यादावपि गुणान्तरं कल्प्यं स्यादित्याह—**न चे**दिति। न ह्यग्न्यादावूर्ध्वज्वलनादिकारणं भवद्भिः कल्प्यते; अतो गुरुत्वस्यानुमानिकत्वमनुमानवार्तानभिज्ञतानिबन्धनमिति ॥ ३६ ॥ **इति गुरुत्वाख्यगुणानुमानभङ्गः ॥**

397. **त्वक्संवेद्यं गुरुत्वं कतिचिदभिदधुस्तत्तु तेषां गुरुत्वं**
नोर्ध्वं स्पृष्ट्वा प्रतीमस्तदिह परधृते नाप्यधस्तात्स्पृशन्तः।
न ह्यन्यालम्बितोऽर्थो भवति लघुतरः स्पर्शनं नोपरुद्धं
तेनाक्रान्तौ प्रणुत्तिक्रम इति गुरुणा तर्कितस्तोलनाद्यैः ॥ ३७ ॥

तर्हि गुरुत्वस्य प्रत्यक्षत्वमस्त्विति वदन्तमपि प्रतिक्षिपति—**त्वक्संवेद्य**मिति ॥ त्वचा गुरुत्वं संवेद्यत इति ये ह्यभिदधुः तत्तु तेषां गुरुत्वमित्यधिक्षेपवादः। तत्र हेतुमाह—**नोर्ध्व**मिति। यदि गुरुत्वं त्वचा गृह्येत, रुचकादिष्वधःस्पर्शवदूर्ध्वस्पर्शेऽपि गुरुत्वं प्रतीयेत। न च तथा प्रतीमः। किंचाधस्तादपि स्पर्शनेन क्वचित् गुरुत्वं न प्रतीयते। न हि परधृते वस्तुन्यधस्तादपि स्पृशन्तो गुरुत्वं प्रतियन्ति। नन्वन्यालम्बिते लघुत्वमेव तदा जातमिति वक्तुं न शक्यते; अन्यस्य प्रयासेन धारणाभावप्रसङ्गात्। अस्तु गुरुत्वमनुवर्तत इति; अथाऽप्यन्यालम्बिते स्प्रष्टुः स्पर्शनमुपरुद्धमिति च वक्तुं न शक्यमित्याह—**स्पर्शन**मिति। स्पर्शनेन्द्रियोपरोधे गुणान्तरोपलम्भस्याप्यभावप्रसङ्गादित्यर्थः। कथं तर्हि लोके गौरवतारतम्यं हस्तेन परीक्ष्यत इत्यत्राह—**तेनेति**। गुरुणा द्रव्येण हस्ताद्याक्रान्तौ प्रणोदनक्रमविशेषस्य उपलब्धत्वात् हस्ततोलनाद्यैः प्रणोदनक्रमस्तर्कित इत्यर्थः। यदि गुरुत्वमस्ति, तदा गुरुत्वनिमित्तकः प्रणोदनक्रमः। यदि वा गुरुत्वं नास्ति, तदा गुरुत्वाश्रयत्वेन परिकल्पितद्रव्याधिक्यनिबन्धनः प्रणोदनक्रमः; सर्वथा गुरुत्वप्रत्यक्षत्वं नास्तीति भावः ॥३७॥ **इति गुरुत्वप्रत्यक्षत्वभङ्गः ॥**

398. **क्षित्यादौ सांख्यदृष्ट्या यदि किमपि तम[ः]स्कार्यमिष्टं गुरुत्वं**
तद्वत् कल्प्येत वह्निप्रभृतिषु न कथं सत्त्वकार्यं लघुत्वम्।
यादृग्भूताद् गुणात्तद्वदसि च पतनं तादृशादस्तु तस्मात्
क्लृप्तिस्त्वन्यस्य गुर्वी भवतु तदधिकं काममाप्तोपदेशात् ॥ ३८ ॥

इत्थमनुमानगम्यत्वं प्रत्यक्षगम्यत्वं च गुरुत्वस्य प्रतिक्षिप्तम्। एवं तर्हि गुरुत्वमेव प्रतिक्षिप्तं भवति; तथा चागमविरोधः। **सांख्यास्तु** *गुरुवरणकमेव तम इति तमःकार्यत्वेन गुरुत्वमुपपादयन्ति। यत्सांख्योक्तं न तत्सर्वमपि प्रतिक्षिप्यते; अनुकूलमविरुद्धं चाङ्गीक्रियते वेदवादिभिरिति। एतत्प्रतिबन्द्या निराकर्तुमनुवदति—**क्षित्यादा**विति ॥ तदेव

प्रतिबन्द्या प्रतिक्षिपति—तद्वदिति । यदि सांख्योक्तमिति गुरुत्वं स्वीक्रियेत, तर्हि * सत्त्वं लघु प्रकाशकमिति तैरेवोक्तं सत्त्वकार्यं लघुत्वमपि वह्न्यादौ स्वीक्रियेत । न च तथा स्वीकृतमिति भावः । किंच पतनानुपपत्त्या हि गुरुत्वं कल्प्यते प्रकृतिपरिणामविशेषे पृथिव्यादौ । तच्च गुरुत्वं यादृग्भूतात्तमसो भवतीति वदसि । तादृशादेव तस्मात् तमसः पतनमस्तु, किमनेन मध्ये परिकल्पितेन गुरुत्वेनेत्याह—**यादृग्भूतादिति** । अन्यथा लघुत्वमपि परिकल्प्येतेति प्रतिबन्द्यनुवर्तते; तस्मादधिकस्य गुरुत्वस्य परिक्लृप्तिर्लघुत्वक्लृप्तिवत् गुर्वी । अथापि तेषुतेषु शास्त्रेषु माषसर्षपादीनामन्येषामपि पर्वत-परमाण्वादीनां गौरवतारतम्यव्यवहारो दृश्यत इति चेत्, तर्हि आगमिकमेव गुरुत्वमङ्गीकुर्महे । अतो नास्माकं क्वचिद्वि-रोधः । अविरोधमेवाह—**काम**मिति । आगमप्रामाण्यावलम्बनेन अतिरिक्तगुरुत्वाङ्गीकारे[ऽपि] नास्माकं काचित् क्षतिः । तस्याप्यागमस्य पूर्वोक्तप्रक्रियया विषयभेदाङ्गीकारेऽपि नास्माकं प्रधानार्थविरोधः ॥ ३८॥ **इत्यागमिकगुरुत्वनिर्वाहः॥**

399. **एकद्व्यादिप्रतीतिव्यवहृतिविषयो यो गुणस्सा तु संख्या**
क्वाप्यैक्यं नित्यसिद्धं क्वचिदवयवगैर्जन्यते तत्तदैक्यैः ॥
द्वित्रित्वाद्यं त्वनेकावगतिसहकृतैकैकनिष्ठैक्यजन्यं
तत्तत्पुंमात्रदृश्यं क्षणिकमिति कथा काऽपि कौतस्कुतानाम् ॥ ३९ ॥

अथ संख्यायाः परिशोधनार्थं प्रागेव संख्याविषयां प्रक्रियामनुवदति—**एकेति** ॥ एकद्व्यादिप्रतीतिव्यवहारविषयो यो गुणस्सा संख्या । सा पुनः क्वापि—परमाण्वादौ नित्यसिद्धा, क्वचित्—द्व्यणुकत्र्यणुकादौ तत्तत्कारणगतैरैक्यैर्जन्यते । द्वित्वत्रित्वादिकं तु अनेकावगतिसहकृतैकैकनिष्ठैक्यजन्यम् । तादृशी चावगतिरपेक्षाबुद्धिरित्यभिधीयते । सा चापेक्षा-बुद्धिः तत्तत्पुरुषमात्रनिष्ठेति तज्जन्यं द्वित्वत्रित्वादिकं तत्तत्पुरुषैरेव दृश्यते; तत्कालमात्रभावित्वात् । तच्च क्षणिकमिति **कौतस्कुतानां तार्किकाणां**—कथा; काऽपि श्रूयत इति शेषः ॥ ३९ ॥ **इति कणादोक्तसंख्याप्रक्रिया ॥**

400. **तत्र द्वित्वाद्यपेक्षामतिविषयभिदामात्रमेवास्त्वभीष्टं**
द्वित्वाद्युत्पत्तिमूलं यदभिलपसि तद्व्याहतेरस्तु मूलम् ।
द्वित्वादिप्रागभावैर्ध्रुवमिह हि विना धीविशेषोऽभ्युपेयः
तन्मूलं निर्गुणानां विगणनमपि च स्थापनीयं गुणानाम् ॥ ४० ॥

अनूदितेऽर्थे द्वित्वादिकं निराकरोति—**तत्रेति** ॥ यादृशादपेक्षाबुद्धिविषयात् द्वित्वाद्युत्पत्तिं वदसि तादृशापेक्षा-बुद्धिविषयवस्तुविशेषोपलम्भ एव द्वित्वादिव्यवहारमातनोतु; किमनेन द्वित्वादिकल्पनेन? तदिदमाह—**द्वित्वाद्युत्प-त्तिमूल**मिति । अयं भावः—न ह्यपेक्षाबुद्धिर्निर्विषया; अज्ञानत्वप्रसङ्गात् । नापि प्रकृतानुपयोगिवस्तुविषया, प्रकृतासंगति-प्रसङ्गात् । तथा सविषयत्वे प्रकृतसंगतविषयत्वे च सिद्धे कोऽयं विषयविशेष इति निरूपणीयमित्यवशिष्यते । स पुन-र्विषयविशेष एव द्वित्वादिस्थाने निविश्य द्वित्वादिव्यवहारमातनोत्विति । तर्हि द्वित्वादिप्रागभाव एव विशेषः, स एव द्वित्वाद्युत्पत्तौ मूलम्; स चाभावत्वादेव भावमपेक्षते । न हि द्वित्वादिकमन्तरेण द्वित्वादिप्रागभावो व[क्तुमपि]क्तुं, शक्यत इति चेत् तदपि मन्दम्; प्रागभावस्यानादित्वेन द्वित्वादेरनादित्वप्रसङ्गात् । तर्ह्यनेकावगतिसहकृतैकैकनिष्ठैक्यप्रतीतिरपेक्षा-बुद्धिरिति विशेषयाम इति चेत्तर्हिप्रागभावातिरिक्तो विषयविशेषो भवद्भिरेवाभ्युपेय इति, तदेव द्वित्वादिकमस्त्विति पुन-रायानम् । तदिदमाह—**धीविशेषोऽभ्युपेय** इति । अभ्युपेयते च भवद्भिरप्ययमर्थो गुणादीनां गणनाविशेष इति प्रति-

बन्दीं पुरस्कुरुते—तन्मूलमिति। नहि गुणादीनां द्वित्वादिकं भवद्भिरभ्युपगम्यते; गुणानां गुणाभावात्। नच द्रव्यगतेन संख्याविशेषेण गुणानां संख्यैकार्थसमवायेन द्वित्वत्रित्वादिव्यवहार इति वाच्यम्; विरुद्धत्वात् संख्यायाः। नव द्रव्याणि, चतुर्विंशतिर्गुणाः, पञ्च कर्माणि, द्वे सामान्ये इत्यादिर्हि भवद्व्यवहारः। ते च परस्परविरुद्धाः कथं गुणेषु संघटेरन्? अथापि द्रव्यावान्तरेषु घटपटादिषु चतुर्विंशतित्वमप्यस्ति; तदेव गुणेषु व्यवह्रियते; पञ्चत्वमपि कुत्रचिदङ्गुलिप्रभृतिषु। तत् कर्मस्विति नियमोऽस्त्विति चेन्न; अनियमात्। नहि चतुर्विंशतित्वमेव गुणेषु व्यवहर्तव्यम्, पञ्चत्वमेव कर्मस्विति नियामकमस्ति; संख्याया अभावात्। अथापि बहुलक्षणविशेषपरिगृहीतेषु गुणेषु चतुर्विंशतित्वव्यवहारः, कतिपयलक्षणपरिगृहीतेषु पञ्चत्वव्यवहार इति [मावोचः] चेन्न; लक्षणबहुत्वस्य लक्षणाल्पत्वस्य च तत्तदपेक्षाबुद्धिविषयत्वव्यतिरेकेण निरूपयितुमशक्यत्वात्; अन्यथा मुख्यसंख्याङ्गीकारप्रसङ्गात्। एवंच सति तत्तदपेक्षाबुद्धिविषयतारतम्यमात्रेण त्रिचतुरादिव्यवहारो गुणादिष्विव द्रव्येष्वपीत्यभ्युपेत्य इति निर्णयः ॥ ४० ॥ **इति परोक्तद्वित्वादिनिरासः ॥**

401. **कैवल्यं नैकसंख्यापरविरहतया नापि मुख्यान्यभावौ**
सङ्घातैक्यं तु राशिक्रममवयवि तु प्राङ्निरस्तं ततोऽन्यत्।
तेनासङ्घातरूपे क्वचन निरुपधिः स्यादसावेकसंख्या
स्वाधारैकायुरेषा परमुपचरिता सेयमद्रव्यवर्गे ॥ ४१ ॥

एवं द्वित्वादिसंख्यां निरस्य एकत्वसंख्यां स्वरूपतः परिशोधयति—**कैवल्यमिति** ॥ * मुख्यान्यकेवलेष्वेकमिति बहुषु विषयेषु एकशब्दं प्रयुञ्जते प्रयोक्तारः। तत्र कैवल्यं नैकत्वसंख्या; परविरहरूपत्वात् कैवल्यस्य। न ह्येकत्वसंख्या वस्त्वन्तरवैधुर्यरूपतया प्रतीयते; एकमिति भावत्वेनैव प्रतीयमानत्वात्। नापि मुख्यत्वमेकत्वसंख्या; अमुख्येष्वप्येकव्यवहारदर्शनात्। नाप्यन्यभाव एकत्वम्; स्वस्मिन्नप्येकव्यवहारात्। अतो मुख्यत्वमन्यत्वमसहायत्वं चापहायान्यदेव किंचिदेकत्वम्। तच्च नावयविनि वर्तते; अवयविन एवाभावात्। संघातैक्यं तु राशिवदौपचारिकमेव। तदिदमाह—**संघातैक्य**मित्यादिना, **ततोऽन्य**दित्यन्तेन। असंघातरूपे परमाण्वादौ निरुपाधिरसावेकत्वसंख्या स्वीक्रियते। एषा चैकत्वसंख्या स्वाधारैकायुः—यावद्द्रव्यभाविनीत्यर्थः। अद्रव्येषु कथमेकत्वसंख्येति चेत्तत्राह—**पर**मिति। द्विविधो ह्येकत्वव्यवहारो मुख्य औपचारिक इति। परमाण्वादौ मुख्यः; संघातरूपे पुनरवयव्यादौ औपचारिकः; औपाधिकत्वात्तद्व्यवहारस्य। एवमद्रव्येष्वेकव्यवहार औपचारिकः; अन्यथा अनवस्थादिदोषप्रसङ्गादिति। अयमत्र निर्णयः—द्वित्वादिकं नास्त्येव; अपेक्षाबुद्धिविषयतामात्रेण प्रतीतिव्यवहारयोरन्यथासिद्धत्वात्। एकत्वं तु विद्यते, तत्पुनर्यत्र बाधोऽस्ति गुणादौ, तत्र त्वौपचारिक इति ॥ ४१ ॥ **इति एकत्वसंख्यास्वरूपाश्रयादिनिरूपणम् ॥**

402. **ऐक्यं स्वाभेदमाहुः कतिचन न भिदाऽस्त्येकमेवेति दृष्टे-**
र्भेदादृष्टचैक्यमोहस्तदिति च वचनं तत्रतत्राभ्युपेतम्।
अन्ये त्वेतत्स्वसत्त्वं विदुरितरसमुच्चित्यवस्थानुवृत्तं
तत्पक्षेऽपि स्वरूपादधिकमिदमिह द्वित्वमोहादिसिद्धेः ॥ ४२ ॥

इत्थमेकत्वं प्रसाध्य तस्य मतभेदेन स्वरूपमेव विविच्य दर्शयति—**ऐक्य**मिति ॥ आचार्याः केचित् स्वाभेदमेवैक्यमाहुः। तत्र हेतुमाह—**न भिदाऽस्त्येकमेवेति दृष्टे**रिति। अयं भावः—ऐक्यविवरणे प्रवृत्ता निर्णेतारो भेदाभाव-

रूपतयैव ह्यैक्यं विवृण्वन्तीति । व्यवहारान्तरमप्यत्रानुकूलमित्याह—**भेदेति** । ऐक्यभ्रमो भेदादर्शनादभूदिति भ्रान्तिविषये व्यवहरन्ति व्यवहर्तारः; तच्चैक्यस्य भेदाभावरूपत्वानुकूलं तत्रतत्राभ्युपेतमितीदृशो व्यवहारो भूयान् । स च व्यवहारस्सर्वैरप्यभ्युपेयः । अतो भेदाभाव एवैक्यमिति केचिदाचार्या निरणैषुः । अन्ये तु स्वसत्त्वमेवैक्यम्; इतरसद्भावेऽपि तद्वर्तते; तच्च स्वसत्त्वं स्वरूपादधिकमेव; अन्यथा स्वरूपे प्रकाशमाने द्वित्वादिमोहानुपपत्तेः । एकत्वे तिरोहिते हि द्वित्वादिव्यामोहः; द्वौ चन्द्रमसावित्यत्र स्वरूपं प्रकाशते; एकत्वं तिरोहितमिति वाच्यम् । तथा चैक्यस्य भेदाभावरूपत्वे[ऽपि] स्वसत्त्वरूपत्वेऽपि स्वरूपादतिरेकः स्वीकार्यः; अन्यथा द्वित्वादिव्यामोहायोगादिति ॥ ४२ ॥ **इति एकत्वविषयमतभेदः ॥**

403. **अन्यत् गृह्णात्यभिज्ञा तदिदमिति पुनः प्रत्यभिज्ञाऽन्यदैक्यं**
कालक्षेत्रादिभेदग्रहजनितभिदाभ्रान्तिशान्तिस्ततः स्यात् ।
मोहस्तत्रैकताधीर्ज्वलन इव भवेत् प्रत्यभिज्ञा त्वतश्चेत्
स्वव्याघातोऽनुमाया भ्रम इह निखिला स्यादभिज्ञाऽपि तद्वत् ॥ ४३ ॥

अतःपरम् अभिज्ञाप्रत्यभिज्ञाविषययोरेकत्वयोर्वैषम्यमाह—**अन्य**दिति ॥ इदमिति ग्रहणं तावदभिज्ञा; सा खल्वेकदेशकालवर्तिनः स्वस्मिन्नैक्यं गृह्णाति; तदिदमिति पुनः प्रत्यभिज्ञा देशकालभेदप्रसक्तभेदविरो[ध्यन्यदैक्यं]ध्यैक्यं गृह्णाति । अतो विषयभेदाद् भेदभ्रान्तिशान्तिः स्यात् । ननु विप्रतिपन्ना प्रत्यभिज्ञा भ्रान्तिः प्रत्यभिज्ञात्वात् प्रदीपप्रत्यभिज्ञावदिति प्रत्यभिज्ञायास्सार्वत्रिकं भ्रान्तित्वमाशङ्कते—**मोह** इति । परिहरति—**स्वव्याघात** इति । तथा च अयमिति ह्यनुमानं प्रवर्तते । तत्रापि प्रतिसन्धानरूपत्वेन स्वव्याघातः प्रसज्यत इति भावः । बाधाबाधविवेकाभावेन प्रत्यभिज्ञामात्रतया सर्वत्रापि भ्रान्तित्वसाधने शुक्तिरजताभिज्ञावत् स्वलक्षणाभिज्ञायामपि भ्रान्तित्वं साधयितुं शक्यत इत्याह—**भ्रम** इहेति ॥ ४३ ॥ **इति अभिज्ञाप्रत्यभिज्ञाविषयैकत्वविशेषसत्यत्वम् ॥**

404. **अद्रव्येऽप्यस्ति संख्याव्यवहृतिबलतस्सा ततोऽन्या गुणादे-**
र्मैवं संख्यासु संख्याव्यवहृतिवदियं स्याच्चिहोपाधिसाम्यात् ।
नो चेत्प्राप्ताऽनवस्थाव्यवहृतिनियतिस्थापनं तुल्यचर्चं
तस्मात् काणादक्लृप्तिर्गुरुमतकथकैर्युक्तमत्रापि सोढुम् ॥ ४४ ॥

वैशेषिकोक्तसंख्यातो व्यतिरिक्तसंख्यावादिनं **प्राभाकरं** प्रतिबन्द्या प्रतिक्षेप्तुमारभते—**अद्रव्य** इति ॥ इत्थं किल तेषामाशयः—संख्याव्यवहृतिरद्रव्येऽप्यस्ति । अतो व्यवहारबलात् सा संख्या पुनरद्रव्याद् गुणादेरन्येति । तत् दूषयति—**मैव**मिति । तत्र प्रतिबन्दीमाह—संख्यास्विति । अद्रव्यत्वे समानेऽपि संख्यासु संख्याव्यवहारो भवद्भिरप्यङ्गीकार्यः । द्रव्यत्ववैधुर्यं ह्यद्रव्यत्वम्; तत्तु संख्यायामपि समानम् । तथा च संख्यायां संख्याव्यवहारवत् अन्येष्वप्यद्रव्येषु संख्याव्यवहार औपाधिकः स्यादेवेति । तत्र हेतुमाह—**उपाधिसाम्या**दिति । स्वाभाविकसंख्याङ्गीकारे पुनरनवस्थेत्याह—**नो चे**दिति । गुणादाविव संख्यायामपि संख्याव्यवहारो मुख्यः स्यादिति भावः । संख्यायाममुख्यसंख्याव्यवहृतिनियमस्थापनं चेत्, तद्गुणादावपि तुल्यचर्चमित्याह—**व्यवहृतिनियतिस्थापन**मिति । उक्तमर्थं निगमयति—

तस्मादिति । काणादक्लृप्तिमङ्गीकुर्वाणस्य **प्राभाकरस्य** संख्यायामपि तत्क्लृप्तिरङ्गीकार्येत्यर्थः ॥ ४४ ॥ **इति प्राभाकरोक्तसंख्यानिरासः** ॥

405. देशाधिक्यादिसिद्धावुपधिभिरिह तद्युक्तसंयोगभेदात्
देशव्याप्तिप्रभेदः परिमितिरिति चेन्नोपधीनां मितत्वात् ।
देशैस्तन्न्यूनतादौ प्रसजति हि मिथस्संश्रयस्तत्स्वतस्सा
मन्तव्या क्वापि राशिप्रभृतिषु तु परं देशसंबन्धभेदः ॥ ४५ ॥

अत्र कश्चिदाह—गुणेषु संख्याव्यवहारवत् द्रव्येष्वपि परिमाणव्यवहारोऽप्युपाधिभेदादेव स्यात्; न पुनः स्वाभाविकं परिमाणमिति । तदाह—**देशाधिक्यादी**ति ॥ उपाधिभिर्मणिकघटकरकादिभिराकाशदेशाधिक्यादिसिद्धौ तत्तदुपाधियुक्ताकाशदेशसंयोगतारतम्यात्तत्तदन्तर्गतानां द्रव्याणां तत्तद्देशव्याप्तिप्रभेद एव परिमाणम्, न पुनः परिमाणमिति गुणान्तरमिति चेत्, तन्न; उपाधीनामेव मणिकादीनां स्वभावतः परिमितत्वात् । अतः स्वाभाविकं परिमाणम् उपाधिष्विवान्यत्राप्यङ्गीकरणीयमित्यर्थः । ननु देशैरेवोपाधीनां परिमाणमस्त्विति यदि वदसि, तर्हि परस्पराश्रयः; आकाशादिदेशैरुपाधिद्रव्यपरिमाणम्, उपाधिभिश्चाकाशादिदेशपरिमाणमिति । उक्तमर्थं निगमयति—**तदि**ति । स्वतः क्वापि सा परिमितिर्मन्तव्या । क्वापीत्यसंघातरूपद्रव्यमुच्यते । संघातरूपेषु राशिप्रभृतिषु देशसंबन्धविशेषमात्रमेव परिमाणव्यवहारकारणमित्याह—**राशी**ति । नहि क्वचिदौपचारिकत्वे सर्वत्राप्यौपचारिकत्वमित्यर्थः ॥ ४५ ॥ **इति परिमाणसिद्धिः** ॥

406. बौद्धास्तुच्छामणूनामभिदधति परिच्छित्तिमाकाशधातुं
वस्तुस्थित्या परिच्छित्त्यभवनवशतस्स्यादमीशां विभुत्वम् ।
अन्यत्रासत्त्वरूपा परिमितिरिति हि स्थापितं सा मृषा चेत्
प्राप्तं सर्वत्र सत्त्वं प्रथमसरगता सर्यतां व्योम्नि युक्तिः ॥ ४६ ॥

अत्र बौद्धपरिकल्पितां तुच्छरूपां परिमितिं दूषयति—**बौद्धा** इति ॥ **बौद्धाः** खल्वाकाशधातुरूपत्वादाकाशस्य च तुच्छत्वादणूनां परिमितिं तुच्छरूपामभिदधति । आकाशपरिवृतत्वमेवाणूनां परिमितिः; आकाशं चाभावरूपतया तुच्छमेव । अत्रोत्तरम्—**वस्तुस्थित्ये**ति । एवं तर्ह्यणूनां परमार्थतः परिच्छित्त्यभाववशात् विभुत्वमेव स्यादित्यर्थः । न हि परस्परविरोधे कोट्यन्तरमस्ति; द्रव्यस्य सतः परिमाणावश्यंभावात् । उक्तमर्थं विवृणोति—**अन्यत्रे**ति । बौद्धपक्षे हि एकत्र देशेऽवस्थितस्य देशान्तरासत्त्वमेव हि परिमाणम् । सा चेन्मृषा परिमितिस्तर्हि देशान्तरेऽपि सत्त्वं स्यात् । तर्हि कथमाकाशादौ परिमितत्वमपरिमितत्वं [वे] चेत्यादिचोद्यं प्रथमसर एव परिहृतमुपाधिभेदादिति; तदत्रापि सर्यतामित्यर्थः ॥ ४६ ॥ **इति सौगतोक्ततुच्छपरिमितिनिरासः** ॥

407. स्थूलाणुह्रस्वदीर्घेतरदुपनिषदि स्थापितं ब्रह्म तस्मिन्
सर्वोत्कृष्टं महत्त्वं श्रुतमपि तदिह स्थूलतान्या निषिद्धा ।
अन्ये त्वाहुर्विभूनामपरिमितवचःप्रत्ययान्नित्यभावं
भावैकात्मन्यभावे परिमितिविरहोऽप्यत्र भावान्तरं स्यात् ॥ ४७ ॥

ननु सर्वपरिमाणनिषेधो ब्रह्मणि दृश्यते *अस्थूलमनण्वह्रस्वमिति । तत्कथं विरुद्धपरिमाणनिषेधसमुच्चय इति कश्चिच्चोदयति—**स्थूलेति** ॥ तत्र परिहारमाह—**तस्मिन्निति** । सर्वोत्कृष्टं महत्त्वं ब्रह्मणि श्रुतम् । विहितव्यतिरिक्तविषयो निषेध इति न्यायसिद्धम् । तेन ब्रह्मणि अस्थूलता पर्वतादितुल्यपरिमाणराहित्यमेव, न पुनस्सर्वव्यापित्वरूपपरिमाणराहित्यम्; विषयभेदेन व्यवस्थासिद्धौ विरुद्धार्थकल्पनायोगादिति । विभुत्वरूपं परिमाणं भावरूपमेवाङ्गीकृत्य केचिदाचार्याः प्राहुः । अन्ये पुनर्विभूनामपरिमितवचोविषयत्वात् परिमाणाभावमेव विभुत्वं प्रतिपादयन्ति, सर्वव्यापिनः परस्य ब्रह्मणः परिमितौ मानाभावादिति । अभावरूपपदार्थाङ्गीकारेणायं निर्वाहः । भावान्तराभाववादे तु परितो मानविरहोऽपि भावात्मक एवेत्याह—**भावेति** । भावैकात्मन्यभावेऽपि भावरूपतया स्वीकृते सतीत्यर्थः ॥ ४७ ॥

408. **नात्यन्ताणोर्महत्ताऽस्त्यवयविनि हते मध्यमं क्वास्तु मानं**
तद्धेतुष्वेव तद्धीरपि तव घटते लाघवोत्कण्ठितस्य ।
एवं त्यक्ते महत्त्वे परममहदपि त्याज्यमेवेति चेन्न
त्यागाभावात्तदिष्टादधिकमनधिकं वाऽस्तु न क्वापि दोषः ॥ ४८ ॥

ननु तव मते महत्त्वमेव न संजाघटीतीति [कश्चित्] चोदयति—**नात्यन्तेति** ॥ अत्यन्ताणोर्जीवस्य न तावन्महत्ताऽस्ति; अवयविवादानङ्गीकारात्; त्र्यणुकाद्यभावेन मध्यमपरिमाणरूपं महत्त्वमपि भवतां नास्ति । तदिदमाह—**अवयविनीति** । घटादिषु महत्त्वप्रतीतिश्च लाघवोत्कण्ठितस्य तव पक्षे पटघटादिहेतुषु तन्तुकपालादिसंघातेष्वेव घटते । एवं मध्यममहत्त्वे त्यक्ते परममहत्त्वमपि भवतः परित्याज्यं स्यात् । परमशब्दव्यवच्छेद्याभावेन विशेषप्रतीतेरभावादिति चेत्, अनूदितमर्थं दूषयति—**नेति** । तत्र हेतुमाह—**त्यागाभावादिति** । तदेवोपपादयति—**तदिति** । तत्—महत्त्वं परेष्टान्महत्त्वपरिमाणादधिकं वाऽस्तु; अनधिकम्—तदेव वा परिमाणम् । सर्वथा तावन्न परित्यज्यते परिमाणरूपं वस्तुतत्त्वमिति न क्वाप्यस्माकं दोष इत्यर्थः ॥ ४८ ॥ **इति परममहत्त्वनिरूपणम् ॥**

409. **द्रव्यं कृत्स्नं स्वभावात् परिमितिरहितं व्यापकैकत्वयुक्तेः**
रौपाधिक्यंशक्लृप्तिर्घटगगननयात्स्यादवस्था ह्युपाधिः ।
स्वाभावैर्वेष्टितत्वं घटत इह घटाद्याकृतौ द्रव्यधर्मे
पार्श्वोक्तिस्तावता स्यादिति न सदवधेरन्यथाऽप्यत्र सिद्धेः ॥ ४९ ॥

अत्र कश्चिदाह—न द्रव्येष्वणुमहदादिप्रक्रियाभेदेन परिमाणं स्वाभाविकमस्ति, अपि त्ववस्थाभेद एव तत्सर्वमिति । तदेतदनुवदति—**द्रव्यमिति** ॥ तत्र हेतुमाह—**व्यापकैकत्वयुक्तेरिति** । एकैव सर्वव्यापिका प्रकृतिरिति ह्युच्यते—* अचेतना परार्था चेत्यादिभिर्वचनैः । युक्तियुक्तं चैतत्; एकस्यैव नानावस्थायोगेन नानात्वे लाघवात् । अंशक्लृप्तिस्तु कथमिति चेत्तत्राह—**औपाधिकीति** । तत्र दृष्टान्तं कथयति—**घटेति** । यथाऽऽकाशे घटाद्युपाधिभेदादंशक्लृप्तिरित्यर्थः । तत्र घटादिरेवोपाधिः । इह पुनः कोऽयमुपाधिरिति चेत्, तत्राह—**अवस्था ह्युपाधिरिति** । सैवावस्था तत्रतत्र परिणता नानात्वव्यवहारे निदानमित्यर्थः । तर्हि परिमितद्रव्याभावे घटादिषु स्वाभाववेष्टितत्वं कथमित्याशङ्क्य परिहरति—**स्वाभावैरिति** । घटादीति स्वाभाववेष्टितं किमपि द्रव्यान्तरं न पश्यामः । अपि तु प्रकृतौ परिणता घटाद्याकृतिरेव स्वाभाववेष्टिता प्रतिभाति । अनेनैव न्यायेन घटादौ पार्श्वोक्तिरपि संघटत इति वदति—**पार्श्वोक्तिरिति** ।

घटाद्याकृतावेव परितः पार्श्वोक्तिव्यवहारः । अतः परिमाणं नाम किमपि द्रव्ये न परिकल्प्यमिति । तन्निषेधति—न सदिति । तत्र हेतुमाह—अवधेरिति । उपलब्धिरेव हि सर्वत्र प्रमाणम् । परिमितत्वरूपेण उपलभ्यमानेषु घटपटादिषु न ह्यवधिसापेक्षं तत्तत्परिमाणमुपलभ्यते । तत्सापेक्षत्वे पुनः, अवधेरपि निरपेक्षपरिमाणशालित्वमकामेनापि स्वीकर्तव्यमिति भावः ॥ ४९ ॥

410. अव्यक्ते स्यादणुत्वप्रभृतिपरिणतिः स्तम्भकुम्भादिनीत्या
नाणुत्वं पूर्वसिद्धं नरमृगरचनाद्यप्यवस्थाक्रमेण ।
इत्युक्तं सांख्यशैवप्रभृतिसमयिभिस्तत्तथैवास्तु मा वा
नित्याणौ जीवतत्त्वे न कथमपि भवेदण्वस्थाप्रसूतिः ॥ ५० ॥

इत्थं सामान्येन परिमाणं प्रसाध्य स्वाभाविकमात्मनोऽणुत्वं प्रसाधयितुं विशेषतोऽप्यणुपरिमाणं शोधयति—**अव्यक्त** इति ॥ अणुत्वप्रभृतयो हि धर्माः प्रकृतिद्रव्य एव परिणामभेदादुच्यन्ते, यथा स्तम्भत्वकुम्भत्वादयः; अतोऽनादिसिद्धमणुत्वं नाम किंचिन्नास्ति । यथा एकस्यैव प्रदेशभेदेन नरमृगादिविरुद्धधर्मरचना । अथवा एकस्यैव क्रमेण पूर्वं नररूपेणावस्थितस्य पश्चान्मृगरूपेणावस्थानम् । एवं कालभेदेनाणुत्वेनावस्थितस्यैकस्यैव महत्त्वम्; महत्त्वेनावस्थितस्याणुत्वम् । इत्थं **सांख्यशैव**प्रभृतिभिरुक्तम् । एतद्युक्तमयुक्तं वाऽस्तु; उभयथाऽपि नास्माकं क्षतिः; यदि कारणावस्थायां महती प्रकृतिः कार्यावस्थायां कालभेदेन परिणतिवशादणुत्वं भजति; यदि वा कारणवस्थायां त्रसरेणुसंघातरूपेणावस्थिता प्रकृतिरनुपलभ्यमानस्वरूपभेदा कार्यावस्थायां कालभेदाधीनभागोपलम्भेन त्रसरेण्वादिरूपेणोपलभ्यत इति; उभयथाऽपीश्वरकारणत्वादिरूपप्रधानार्थविरोधाभावादुच्यमानस्य चार्थस्यानुपपत्तिविशेषस्फोरणाभावात्तत्र न विप्रतिपद्यामहे । अयमत्र विशेषः—प्राकृतपरमाणौ यथातथा वाऽस्त्वणुपरिमाणम्, जीवतत्त्वे न कथमपि भवेदण्ववस्थाया उत्पत्तिः, जीवस्यानाद्यनन्तत्वेनैव प्रमाणसिद्धत्वादित्याह—**न कथमपीति** ॥ ५० ॥ **इति अवस्थामात्रपरिमाणवादभङ्गः** ॥

411. चर्चा तुल्यैव भिन्नं पृथगितरदिति प्रत्यये तत्पृथक्त्वं
भेदाख्यो नीलपीतप्रभृतिरभिमतः किं मुधाऽन्यस्य क्लृप्तिः ।
नाप्यज्ञातावधीनां पृथगिदमिति धीर्नापि भिन्नादिवाचां
साकं क्वापि प्रयोगो न च पृथगिति धीर्द्रव्य एवेति सिद्धम् ॥ ५१ ॥

इत्थं परिमाणं संशोध्य पृथक्त्वमपि शोधयति—**चर्चेति** । व्यवहार एव खल्वर्थतत्त्वविभागे निदानम्; यद्भिन्नमिति व्यवह्रियते, तदेव पृथगिति; यत्पृथगिति तदेवेतरदिति च व्यवह्रियते । अत एषां शब्दानां पर्यायत्वात् भेदातिरेकेण पृथक्त्वं नाम न कश्चिद्धर्मः कल्पनीयः । किंच भेदश्च नीलपीतादिरसाधारणो धर्म एवाभिमतः । तथा च पृथग्व्यवहारस्यान्यथासिद्धत्वे किं मुधाऽन्यस्य पृथक्त्वस्य परिक्लृप्त्या ? ननु पृथक्त्वं भावरूपं प्रतियोगिनिरपेक्षम्, भेदस्तु प्रतियोगिसापेक्ष इति वैषम्यमाशङ्क्य परिहरति—**नापीति** । न ह्यवधिपरिज्ञानाभावे सतीदमस्मात् पृथगिति व्यवहरन्ति । यदि पृथक्त्वमसाधारणधर्मरूपाद्भेदादन्यत्, तर्हि तद्वाचकशब्दस्य भेदवाचकशब्देन सामानाधिकरण्यं प्रसज्येत । न च तथोपलभ्यते; न हि पृथगित्युक्त्वा भिन्नमिति वदन्ति; भिन्नमिति चोक्त्वा पृथगिति वा । तदिदमाह—**नापीति** । न च पृथगिति धीर्द्रव्य एव नियता; गुणादीनामपि पृथक्त्वेनोपलम्भात् । अतः परस्परव्यावर्तका-

साधारणधर्म एव सर्ववस्तूनां पृथक्त्वम्; तदेव लक्षणम्; स एव भेद इति सर्वमवदातम् ॥५१॥ इति **पृथक्त्वाख्य-गुणान्तरक्लृप्तिभङ्गः** ॥

412. **तन्त्वादीनां पटादिव्यवहृतिनियता दृश्यते काऽप्यवस्था**
सा चेद् द्रव्यस्वरूपं भवति विफलता कारकव्यापृतीनाम् ।
तत्रासंयुक्तबुद्धिः कथमिव च भवेत् स्थैर्यवादस्थितानां
नैरन्तर्यं च भावो मम तदघटितं मध्यमेवान्तरं च ॥ ५२ ॥

संयोगस्यान्तरालाभावत्ववादिनं **बौद्धं** निराकर्तुं तस्यानन्यथासिद्धप्रमाणप्रतिपन्नत्वेन स्वीकर्तव्यत्वमाह—**तन्त्वादीना**मिति ॥ पटादिव्यवहृतिनियता—तन्त्वादीनामवस्थैव पट इति **वेदान्तिनः** । येऽपि चावस्थाव्यतिरेकेण द्रव्यान्तरं स्वीकुर्वन्ति, तेषामप्यसमवायिकारणावस्थाविशेषत्वेन स पुनः स्वीकार्यः । तथा च संयोगस्सिद्धः । साऽवस्था द्रव्य-स्वरूपमेवेति चेत्, [तर्हि] कारकव्यापाराणां विफलता च स्यात् । किंचापूर्वसंयु[क्तावस्थास्वीकाराभावे सति]क्तत्वरूपा-वस्थानङ्गीकारे विभक्तेषु तन्तुषु असंयुक्तत्वबुद्धिः कथं स्यात्, स्थिरवादिनां संयुक्ततन्तुस्वरूपस्यानपायात्? प्रतिक्षणं तन्तव उत्पद्यन्त इति चेत्; निरस्त एव क्षणभङ्गवाद इत्यभिप्रायेणाह—**स्थैर्यवादस्थिताना**मिति । ननु नैरन्तर्यं संयोगः; स चान्तरालाभावः । अभावश्च शून्यमेवेति चेत्तन्न; अभावस्यापि भाववदशून्यत्वात् । निषेधकप्रमाणगोचरो ह्यभावः; स कथं शून्यतामनुभवति? किंच भावान्तराभाववादिनामस्माकं पक्षे नैरन्तर्यमपि भाव एव । किं तर्ह्यन्तरम्? तदपि भाव एव । द्वयोरपि पदार्थयोर्मध्यमेव नन्वन्तरमित्युच्यते । अतोऽन्तरालमन्तरालाभावरूपतया भवत्परिकल्पितसंयोगोऽपि भावरूप एवेति न शून्यगन्धावकाशः ॥ ५२ ॥ इति **संयोगसिद्धिः** ॥

413. **सर्वं द्रव्यं सभागं न यदि कथमुपाध्यन्वयो भागतः स्यात्**
कात्स्न्र्येनोपाधियोगे कथमणुविभुनोस्सूक्ष्मतादीति जैनाः ।
सामग्रीशक्तिभेदप्रजनितविविधोपाधियोगस्वभावा-
दौपाधिक्यंशक्लृप्तिः कथमिव न भवेद् द्विष्ठसंबन्धदृष्टेः ॥ ५३ ॥

एवं संयोगस्य सिद्धिमुक्त्वा तस्य संयोगस्य वस्तुन्येकदेशवर्तित्वसामर्थ्यात् सर्वस्यापि द्रव्यस्य सांशत्वं वदतो **जैनस्य** पक्षमनूद्य प्रमाणानुरोधेन परिहरति—**सर्व**मिति ॥ इत्थं किल ते मन्यन्ते—परमाण्वादि सर्वमपि द्रव्यं सभाग-मेव; पदार्थान्तरसंयोगस्य पार्श्वषट्कमन्तरेणानुपपत्तेः । यदि पार्श्वपरिक्लृप्तिरुपाधित इति वदन्ति, तच्च न; निरवयव-द्रव्यस्य उपाधिसंयोगेऽप्यनधिकारात् । मध्यस्थस्य हि परमाणोः परितःस्थितषडुपाधिसंसर्गोऽपि षड्भिरेव पार्श्वैरुपपद्यते । अन्यथा कथमुपाधिसंसर्गस्तत्रतत्रेत्यौपाधिकोऽपि पार्श्वनियमः सिध्येत्? तर्हि निरवयवस्य कात्स्न्र्येनोपाधिसंसर्गं वदाम इति चेत्, तर्हि परमाण्वाकाशयोः परस्परसंसर्गे परमाणुरपि विभुः स्यात्; आकाशो वा परमाणुः स्यात् । तदिदमाह—**कात्स्न्र्येने**ति । इत्थमनूदितं पक्षं प्रमाणानुरोधेन परिहरति—**सामग्री**ति । अयमर्थः—दृश्यते तावत्संयोगः; स च क्वाचित्कतया उपलभ्यते । स यदि संसर्गः प्रदेश एव न वस्तुनीत्यभिधीयेत, तथा सति तस्यापि प्रदेशस्य प्रदेशान्तर-परिक्लृप्त्या कस्मिंश्चिदपि वस्तुनि संबन्धो न स्यादेव । दृश्यमानस्य च संबन्धस्याधारतया परिदृष्टमेव वस्तु परिग्राह्यम् । तत्तु निरवयवं चेत् औपाधिकांशभेदक्लृप्त्या निर्वाह्यम् । ननु तादृशस्योपाधिसंबन्धेऽप्यनधिकार इत्युक्तमिति चेत् द्विष्ठ-

संबन्धदृष्टिबलादुपाधिसंबन्धस्य स्वपरनिर्वाहकत्वेन निर्वाहः कल्प्यः । तदिदमाह—**औपाधिकी**ति । एवं च सत्यणुरपि स्वधर्मिग्राहकबलादणुत्वेनैव सिद्धः ; विभुरपि विभुत्वेन ; [उभयमपि निरवयवम् । अथापि तत्तद्धर्मिग्राहकप्रमाणबला-द्विभुत्वाणुत्वयोः प्रतिनियतिः ।] द्वयोरपि निरवयवत्वम्, औपाधिकांशक्लृप्तिश्चेति सङ्गतमेतत् ॥ ५३ ॥ **इति निर-वयवेष्वेकदेशसंयोगप्रकारः ॥**

414. नैरन्तर्यं विभूनामपि भवति ततोऽन्योन्ययोगोऽपि योग्यः
केचित्तं हेत्वभावाज्जहति विहतिकृन्नित्यधीकल्पने तत् ।
स्याद्वा तत्सिद्ध्यसिद्ध्योरनुमितिरपटुर्बाधहानेर्विपक्षे
शास्त्रैरन्यद्विभुः स्यात् परधृतमपृथक्सिद्धिरेवं ततोऽस्य ॥ ५४ ॥

अस्तु संयोगः ; अथापि विभूनां परस्परसंयोगो नास्तीति **काणादादयः** । त[ां]न्निषेधति—**नैरन्तर्य**मिति ॥ निरन्तराणां हि पदार्थानामन्योन्यसं[सर्ग]योग उपलभ्यते ; विभूनामपि नैरन्तर्यमस्ति ; अतोऽन्योन्यसंयोगयोग्यताऽस्ति । तदेतदाह—**तत** इति । केचित्तु हेत्वभावात् संयोगं जहति ; अन्यतरकर्मोभयकर्म वा संयोगो वा संयोगस्य हेतुः, त्रितयमपि विभुषु न घटत इति । तत्र दूषणमाह—**विहतिकृ**दिति । ईश्वरज्ञानादीनां कारणाभावादभाव इति पर-वादिभिरुक्ते कार्यभूतस्य ज्ञानादेः कारणापेक्षा न नित्यज्ञानादेरिति **काणादादयः** परिहरन्ति । तुल्यमेतदजसंयोग-कल्पनेऽपि । अनित्यसंयोगस्यैव कारणाभावादभावो वक्तुं शक्यते । नित्यस्य तु कारणसापेक्षत्वाभावेन तदभावात् अभावो वक्तुं न शक्यत इति । इमामेव प्रतिबन्दीमभिप्रेत्याह—**नित्यधी**ति । तर्ह्यजसंयोगसाधने [किमनुमानम्] किं मानम् ? उक्तमेव नैरन्तर्यम् । परोक्तमन्वारुह्यापि परिहरति—**स्याद्वे**ति । अजसंयोगसाधने तावदनुमानं शक्तमशक्तं वा भवतु ; विपक्षे बाधकाभावात् । शास्त्रं पुनः * सर्वाधारं धाम विष्णुसंज्ञमित्यादिकं परस्य ब्रह्मणः कृत्स्नप्रपञ्चाधारत्वमावेदयति । तदाधारत्वं च तदपृथगवस्थानमेव । अतो विभूनामपि परमात्मसंबन्धस्य शास्त्रप्रमितत्वात् बाधकाभावाच्च युक्त एवायमज-संयोगः इति ॥ ५४ ॥ **इति अजसंयोगनिरूपणम् ॥**

415. संयोगाद्विश्वसृष्टिः प्रकृतिपुरुषयोस्तादृशैस्तद्विशेषैः
ब्रह्मादिस्तम्बनिष्ठा जगति विषमता यन्त्रभेदादयश्च ।
अक्षाणामर्थयोगाद्विविधमतिरबाद्यन्वयादङ्कुरादिः
शुद्धाशुद्धादियोगान्नियतमपि फलं न्यायतत्त्वेऽन्यघोषः ॥ ५५ ॥

संयोगस्य सार्वत्रिकोपजीवनेन सर्वैरनपोद्यत्वं दर्शयति—**संयोगा**दिति ॥ प्रकृतिपुरुषयोस्संयोगाद्विश्वसृष्टिः, तादृशै-रेव संयोगविशेषैर्ब्रह्मादिस्तम्बपर्यन्तं जगद्वैषम्यम् । आलानयन्त्रादयः सुप्रसिद्धास्संयोगरूपाः । अक्षाणामर्थसंयोगाद्विविधा मतिर्दृश्यते । अबाद्यन्वयाद् बीजादिकमङ्कुरति । शुद्धाशुद्धात्मकाभ्यां कपिलानरास्थिसंस्पर्शाभ्यां नियतमपि फलमनुशो-श्रूयामहे । अतस्संयोगविशेषास्सर्वत्रोपलभ्यन्ते इति **न्यायतत्त्वे** संयोगस्य घोष इति ॥ ५५ ॥ **इति संयोग-वैचित्र्यप्रदर्शनम् ॥**

416. संयुक्ते द्रव्ययुग्मे सति समुपनतो यस्तु संयोगनाशः
संग्राह्योऽयं विभागव्यवहृतिविषयस्सोऽपि तद्धेतुतस्स्यात् ।

त्वन्निर्दिष्टे विभागे गतवति च सतोः स्याद्विभक्तप्रतीतिः
भूयस्संयोगसिद्धौ कथमिति तु यथा त्वद्विभागान्तरादौ ॥ ५६ ॥

विभागस्य संयोगनाशादर्थान्तरत्वं प्रतिक्षिपति—**संयुक्त** इति। पूर्वं परस्परसंयुक्ते द्रव्यद्वये विद्यमाने सति समुपनतो यः संयोगनाशस्स एव विभागव्यवहारविषय इति संग्राह्यः। तर्हि संयोगविनाशकत्वेन विभागं स्वीकुर्म इति चेत्, तन्न; संयोगविनाशस्य विभागकारणत्वेन कल्पितात्कर्मण एव सिद्धिः स्यात्। तदिदमाह—**सोऽपि तद्धेतुत** इति। ननु विभागस्य संयोगनाशरूपत्वे संयोगनाशस्यानन्त्यात् भूयस्संयोगसिद्धावपि विभक्तप्रतीतिः स्यादेवेति चेत्, तर्हि त्वन्निर्दिष्टे विभागे तस्मिन्नेव क्षणे गतवति विभागप्रध्वंसमात्रमेव सतोर्द्रव्ययोरनुवर्तते। तेनैव तत्र विभक्तव्यवहारानुवृत्तौ भूयस्संयोगेऽपि तवापि विभक्तव्यवहारः स्यादिति प्रतिबन्दीमाह—**त्वन्निर्दिष्ट** इति। पृच्छति—**कथ**मिति। उत्तरम्—**यथे**ति। यथा त्वद्विभागान्तरे सति पूर्वविभागप्रध्वंसानुवृत्त्या विभक्तप्रतीतिः, एवं मध्ये संयोगकालेऽपि विभक्तप्रतीतिः स्यात्। ननु तत्र उत्तरविभागात् विभक्तप्रतीतिः; मध्ये संयोगकाले तत्प्रागभावात् विभक्तप्रतीतिर्नास्तीति चेत्, एवं तर्हि मध्यगतसंयोगस्य विभक्तप्रतीतिपरिपन्थित्वात् तस्मिन् काले विभक्तप्रतीतिर्नास्ति, । भूयः संयोगप्रध्वंसकाले तस्यैव संयोगस्य प्रध्वंसेन तस्मिन्नेव काले विभक्तप्रतीतिरस्तीति ममापि समानमिति भावः ॥ ५६ ॥ **इति परोक्तविभागभङ्गः ॥**

417. कोऽसौ संयोगनाशस्तव मत इति चेत् सोऽयमन्यत्र योग-
स्तस्य प्राचा विरोधात् स तु मिषति तथाऽऽलोचितस्त[स्य]द्विनाशः ॥
अज्ञातप्राच्ययोगः परमभिमनुते स्वेन रूपेण चैनं
सर्वोऽप्येवं ह्यभावः स्फुटमिह न पुनः कश्चिदन्योऽस्ति दृष्टः ॥ ५७ ॥

एवं संयोगनाशस्य विभागत्वं समर्थ्य संयोगनाशस्य स्वरूपं चोद्यपूर्वकं शोधयति—**कोऽसा**विति ॥ सोऽयमन्यत्र योगः—उत्तरदेशसंयोग एव पूर्वदेशसंयोगस्य विनाशः। तत्र हेतुमाह—**तस्ये**ति। अयमर्थः—उत्तरदेशसंयोगस्य पूर्वदेशसंयोगेन विरोधात्। स तु—स एवोत्तरदेशसंयोग एव। तथाऽऽलोचितः—पूर्वदेशसंयोगविरुद्धत्वेनालोचितः। तद्विनाशो मिषति—पूर्वदेशसंयोगनाश इति परिस्फुरति। कथं तर्ह्युत्तरदेशसंयोग इति भावरूपेण प्रतिपत्तिरित्यत्राह—**अज्ञाते**ति। द्विविधा हि उत्तरदेशसंयोगस्य प्रतीतिः; ज्ञातपूर्वदेशसंयोगस्य तद्विरुद्धत्वेन काचित्, स्वरूपेण चापरा। तत्र ये स्वरूपेण प्रतिपद्यन्ते ते भावरूपेणाभिमन्यन्ते; ये पुनः पूर्वदेशसंयोगविरुद्धत्वेन प्रतिपद्यन्ते ते त्वभावरूपेणेति विभागः। उक्तमर्थं सार्वत्रिकत्वेनोपपादयति—**सर्व** इति। भावान्तराभाववादिनां सर्वोऽप्यभावो न भावान्तरादतिरिच्यत इति भावः। एवं सर्वत्रापि भावस्यापलापे कुत्रापि भावो न स्यादित्याशङ्क्याह—**स्फुट**मिति। यत्र स्फुटदृष्टो भवति भावरूपः पदार्थः, तत्र तथैव स्वीकार्यम्। यत्र पुनरितराभावतया निर्वोढुं शक्यते तत्र तथैव निर्वाह्यः। सर्वेऽपि वादिन इत्थमेव खलु भावाभावविवेकं परिकल्पयन्तीति भावः ॥ ५७ ॥ **इति संयोगनाशस्वरूपशोधनम् ॥**

418. स्पन्दावृत्त्यादिभेदात् परमपरमिति प्रत्ययौ तत्तदर्थे
कालाधिक्यादिमात्रान्न खलु समधिकं शक्नुयातां विधातुम्।
दृष्टिर्नान्यस्य क्लृप्तिर्भवति गुरुतरातिप्रसङ्गोऽन्यथा स्यात्
किं न स्यातां गुणाद्यैः परतदितरते पूर्वभावादि चान्यत् ॥ ५८ ॥

अत परत्वापरत्वे प्रमाणाभावाद् दूषयति--**स्पन्देति** ॥ न तावत् परत्वापरत्वे वस्तुनः स्वरूपकृते, परापर-व्यतिरेकाभावप्रसङ्गात्। अतो बुद्धिकृते इत्येव हि भवद्भिस्सिद्धान्तितम्। सा च बुद्धिरपेक्षाबुद्धिरित्यभिधीयते। सा बुद्धिर्न निर्विषया; बुद्धेर्निर्विषयत्वायोगात्। नापि सामान्येन यत्किंचिद्विषया; सर्वासामपि बुद्धीनामपेक्षाबुद्धित्वप्रसङ्गात्, परत्वापरत्वयोरन्योन्यवैषम्याभावप्रसङ्गाच्च। अतो विषयविशेषविशेषितेयं बुद्धिः परत्वापरत्वे जनयतीति स्वीकर्तव्यम्। तथैव च भवद्भिरपि स्वीक्रियते। तथा चापेक्षाबुद्धिविषयरूपत्वमन्तरेणाधिकपरत्वापरत्वयोरदर्शनात्, अनपेक्षितकल्पने गौरवाच्च, अपेक्षाबुद्धिविषयभाव एव परत्वापरत्वे स्त इति तात्पर्यार्थः। पदार्थस्तु--स्पन्दावृत्त्यादिभेदात्--कालकृतपरत्वापरत्वे सूर्य-परिवृत्त्यादिभेदेन कालविक्रियादिमात्रात् परमपरमिति प्रत्ययौ स्तः। दिक्कृतपरत्वापरत्वे संयुक्तसंयोगाल्पीयस्त्वभूयस्त्व-मात्रात् परत्वापरत्वबुद्धी भवतः। इत्थमन्यथासिद्धौ बुद्धिव्यवहारौ समधिकपरत्वापरत्वे विधातुं न शक्नुयाताम्। तदिद-माह--**न खल्विति**। दृष्टत्वादधिकं परिगृह्णीम इति चेत्, नेत्याह--**दृष्टिर्नान्यस्येति**। न हि किंचित् परत्वमपरत्वं वा पूर्वोक्तादन्यदुपलभामहे; कल्पनं तु गुरुत्वहतम्। अनपेक्षितकल्पनमतिप्रसङ्गदुःस्थं च। किंच गुणादि[भिरपि]ष्वपि परत्वापरत्वव्यवहारो दृश्यते, यथाऽऽभिजात्येन परः, विद्यया परः, वृत्तेन पर इत्यादि। नैतावता तत्र परत्वादि कल्प्यते। किंच कालेन पूर्वः, पश्चाद्भावी, वर्तत इति, देशेनापि प्राग्भावी पश्चाद्भावीत्यादिव्यवहारभेदास्सहस्रशोऽपि दृश्यन्ते। न च तत्र गुणभेदा भवद्भिरपि कल्प्यन्ते। केवलं देशकालविशेषसंबन्धमात्रेण व्यवहारविशेषाः प्रतीयन्त इति हि भवन्तोऽपि वदन्ति। तदन्यत्रापि न दण्डवारितम्। किंच दिक्कालावुपाधीकृत्यापेक्षाबुद्धिः प्रवर्तते इति हि भवत्सिद्धान्तः। तदपि न जाघटीति; दिक्कालयोः परत्वापरत्वपरिणतेः प्रागेवोपलब्धत्वे पश्चादनुमानवैयर्थ्यात्, अनुपलब्धत्वे तु अपेक्षाबुद्धे-रेव सुघुतिप्रसङ्गात्। इत्येषा दिक् ॥ ५८ ॥ **इति बुद्धिजन्यपरत्वापरत्वाख्यगुणान्तरक्लृप्तिभङ्गः** ॥

419. **द्रव्यं प्राग् बुद्धिरुक्ता परमिह विषयैस्सङ्गभादिर्निरूप्य-**
स्संयोगं भाष्यकाराः प्रथममकथयन्न्यायतत्त्वानुसारात्।
तत्संयोगे समेऽपि स्फुरति न निखिलं तेन योग्यत्वमन्यत्
ग्राह्यं संबन्धसाम्ये नियतविषयता दृश्यते हीन्द्रियेषु ॥ ५९ ॥

अथ बुद्धिविषयचिन्ता प्रवर्तते। बुद्धेर्गुणत्ववादिनं प्रत्याह--**द्रव्यमिति** ॥ बुद्धिसरे बुद्धेर्द्रव्यत्वमुक्तम्; परमिह विषयैस्संबन्धादिर्निरूप्यते। तत्र **भाष्यकारा न्यायतत्त्वानुसारात्** बुद्धेर्विषयैस्सह संबन्धं संयोगमकथयन्। तर्हि सर्वैरपि संयोगात्सर्वं भासेतेति न वाच्यम्। बुद्धेस्संयोगे समेऽपि निखिलं न स्फुरति। तत्र हेतुमाह--**योग्यत्वमन्यद्ग्राह्य-मिति**। संबद्धमपि योग्यमेव बुद्ध्या गृह्यत इत्यर्थः। तत्र दृष्टान्तमाह--**संबन्धेति**। संबन्धसाम्ये सत्यपि नियतविष-यता दृश्यते तद्वदिहेति। इन्द्रियार्थसन्निकर्षे तुल्येऽपि चक्षुषा रूपमेव गृह्यते न पुनः स्पर्शः; स्पर्शनेन स्पर्शः न रूपम्। कुत एतत्? योग्यत्वस्य नियतत्वात्। एवं सर्वेषां बुद्धिसंबन्धे सत्यपि सहकारियोग्यतादिनियमादेकमेव गृह्यते, नान्यदिति नियमो नानुपपन्न इति ॥ ५९ ॥ **इति विषयविषयिभावनिरूपणम्** ॥

420. **नित्यं नित्यादिबुद्धिर्निखिलविषयिणी तद्वदेव स्वभावः**
शास्त्रैः क्षेत्रज्ञबुद्धेरपि समधिगतः कर्मभिस्तन्निरोधः।

संकोचोल्लासयोश्च प्रतिनियतिरिह स्यादुपाधिप्रभेदा-
न्निश्शेषोपाधिमोक्षे निखिलविषयतामश्नुवीत स्वभावात् ॥ ६० ॥

इत्थं विषयविषयिभावं निरूप्य तद्वैषम्ये निदानमाह—**नित्यमिति** ॥ नित्यादिबुद्धिर्निखिलविषयिणी । तद्वदेव स्वभावः * यथा न क्रियते ज्योत्स्नेत्यादिशास्त्रैः क्षेत्रज्ञबुद्धेरपि समधिगतः । [अपि तु] कर्मभिस्तन्निरोधः; तेन सङ्कोचोल्लासयोः प्रतिनियतिरिहोपाधिभेदात् स्यात्, निश्शेषोपाधिमोक्षे सैव बुद्धिर्निखिलविषयतामश्नुवीत । अत्रोपाधिः कर्म; स च निरूपणे भगवन्निग्रह एव । अतो भगवानेव निग्रहानुग्रहाभ्यां बुद्धेः संकोचविकासौ करोति ॥ ६० ॥ **इति विषयविषयिभाववैषम्यम् ॥**

421. **मुक्तानां धीः क्रमाच्चेत् प्रसरति न कदाऽप्यन्तमेषाऽधिगच्छेत्**
संक्षिप्तायाश्च दूरान्तिकपरिपतने यौगपद्यं न शक्यम् ।
संयोगो भूतभा[वि]व्यैष्वपि न हि घटते तद्धि यस्सांप्रतिक्या
इत्याद्यैर्न क्षतिः स्यात् श्रुतिमुखविदिते योग्यतावैभवेऽस्याः ॥ ६१ ॥

मुक्तानां धीविकासानुपपत्तिं विकल्पाभासेन वदतां श्रुतिविरोधं वक्तुं तदुक्तिमनुवदति—**मुक्तानामिति** ॥ इत्थं किल तेषामाशयः—मुक्तानां धीः क्रमाच्चेत्प्रसरति; न कदाऽपि देशस्यान्तमेषाऽधिगच्छेत्; आनन्त्याद्देशस्य । नापि युगपद् गच्छेद्; न हि संक्षिप्ताया धियो युगपद् दूरान्तिकपरिपतनं युक्तं वक्तुम् । अयमेको दोषः; अन्योऽपि सांप्रतिक्या भूतभाविधियो भूतभाविभ्यां संयोगो न घटते; संबन्धान्तरं [नालभ्यते] नोपलभ्यते । अतो मुक्तानां सार्वज्ञ्यं न स्यादिति । तन्निराचष्टे—**श्रुतीति** । श्रुतिमुखविदिते योग्यतावैभवे अस्याः—धियः तत्कर्मसु न क्षतिः स्यादित्यर्थः । अयमर्थः—मुख्यासंभवे गौणग्रहस्साधारणः । तथा च संयोगसंभवे स एव ग्राह्यः, तदभावे[ऽपि] विषयविषयिभावस्तत्स्थानापन्नः स्वीकार्य इति । धर्मभूतज्ञानस्य क्रमयौगपद्याभ्यां प्रसरणानुपपत्तिरुदयगिरिशिखरस्थदिवाकरकरप्रसरणवदुन्मीलितचक्षुषो ब्रह्माण्डोदरवर्तिसकलवस्तुग्रहणवदित्यादिभिः प्रागेव परिहृता । भगवतः प्रभावातिशयेन युगपदेव धर्मभूतज्ञानस्य विश्वविषयत्वप्राप्तौ को विरोधः? ॥ ६१ ॥ **इति विषयविषयिसंयोगचोद्यपरिहारः ॥**

422. **वेगस्याचिन्त्यरूपो रविशशिनयनाद्यंशुवर्गेषु भूमा**
भागानन्त्येऽप्यणूनामतिपतनमतो ह्याहुरन्योन्यमेके ।
इत्थं सर्वैरबाध्यां गतिमनुवदतां मुक्तबुद्धेर्विकासे
युज्यन्ते यौगपद्यप्रभृतय इति तु श्रद्दधीध्वं श्रुतार्थाः ॥ ६२ ॥

किंच त्वदङ्गीकृतदृष्टान्तेन[ापि] मुक्तबुद्धेर्व्याप्तिरुपपद्यते इत्याह **वेगस्येति** ॥ उक्तं हि भवता रविशशिनयनाद्यंशुवर्गेषु वेगस्याचिन्त्यरूपो भूमेति । अत एव काकबाणादिः क्रमेण देशान्तरं गच्छति, रविकरोऽह्नायैव; तद्युगपदतिलङ्घनमन्तरेण नोपपद्यते । इत्थमेव जैनैरप्यङ्गीकृतमित्याह—**भागानन्त्य** इति । परमाणवोऽनेकावयवास्तत्पक्षे; अथाप्यन्योन्यमतिक्रामन्ति परमाणवः । तदेतदनन्तानामंशानां युगपदतिलङ्घनमन्तरेण नोपपद्यते । इत्थं सर्वैरबाध्यां गतिमनुसरतामस्माकं मुक्तबुद्धेर्विकासे यौगपद्यप्रभृतयो युज्यन्त इति । श्रुतार्थाः—श्रुत्यर्थपर्यालोचनवन्तो मनीषिणः श्रद्धीध्वम् ॥ ६२ ॥ **इति मुक्तबुद्धिव्याप्त्युपपत्तिः ॥**

423· यत्सूक्ष्मं विप्रकृष्टं व्यवहितमपि तद् गृह्णती योगिबुद्धि-
भूयिष्ठादृष्टलब्धातिशयकरणवृत्त्यानुगुण्येन सिद्धा ।
नष्टादिष्वक्षतो धीः कथमिति यदि न प्रत्यभिज्ञादिनीते-
श्चित्रास्संबन्धभेदाः करणविषययोस्तत्रतत्राभ्युपेताः ॥ ६३ ॥

अस्त्वेवम्, तथाऽपि योगिबुद्धेर्नष्टादिविषयत्वं नोपपद्यत इति वदतः पक्षं दूषयितुं तन्मतमनुवदति—**यत्सूक्ष्मम्** इति ॥ सूक्ष्मव्यवहितविप्रकृष्टानर्थान् गृह्णती योगिबुद्धिः भूयिष्ठादृष्टलब्धातिशयकरणवृत्त्यानुगुण्येन सिध्यतु सूक्ष्मादीनां वर्तमानत्वात् । संबन्धोऽपि यथाकथंचिदुपपद्यते । नष्टादिष्वक्षतः—इन्द्रियात् धीः कथं भवतीति चेत्तन्निराकरोति—**नेति** । हेतुमाह—**प्रत्यभिज्ञादिनीते**रिति । यथा प्रत्यभिज्ञा नष्टामपि प्रागवस्थां गृह्णाति । ननु संस्कार एव तत्र कथंचित् संबन्धत्वेन कल्प्यत इति चेत् एवं तर्हि योगिनामप्यतीतादिग्रहणे अदृष्टमेव संबन्धत्वेन कल्प्यतामित्याह—**चित्रा** इति । ईदृशसंबन्धभेदास्त्वयाऽप्यङ्गीकार्या इत्याभिप्रायिकोऽर्थः । तदिदमाह—**तत्रतत्राभ्युपेता** इति ॥ ६३ ॥ **इति योगिबुद्धेरतीतादिविषयत्वोपपत्तिः** ॥

424· नित्याया एव बुद्धेस्स्वयमभिदधतः केचिदद्रव्यभावं
संबन्धं धर्मतोऽस्याः कृतकमकथयन् भूषणन्यायसक्ताः ।
स्वाभीष्टद्रव्यलक्ष्मस्मृतिविरहकृतं नूनमेषां तदेतत्
सौत्रं तल्लक्षणं तैरनुमतमिह च स्याद्धि कार्याश्रयत्वम् ॥ ६४ ॥

नित्याया इति ॥ **भूषणमता**नुसारिणो नित्याया एव बुद्धेरद्रव्यत्वमभिदधत एव; विषयविषयिभावमस्याः कृतकमकथयन्, मुक्तावस्थायां नित्यानन्दाविर्भाववचनात् । आविर्भावो हि नित्येन ज्ञानेन तस्मिन् काले तस्यैवानन्दस्य संबन्धः । स च संबन्धः प्रागभावात् तस्मिन् काले सत्त्वाच्च कार्य एव, तथा च सति स्वाभीष्टद्रव्यलक्षणप्रस्मरणमेषामेतादृशव्यवहारनिदानम् । तदिदमाह—**स्वाभीष्टे**ति । समवायिकारणं द्रव्यमिति द्रव्यलक्षणं तैरनुमतम् । समवायिकारणत्वं च कार्याश्रयत्वमिति चानुमतम् । इह च विषयविषयिभावस्य कार्यत्वे तदाश्रयत्वाद्विज्ञानानन्दयोर्द्रव्यत्वमेव स्यादिति भावः ॥ ६४ ॥ **इति अद्रव्यपक्षे नित्यधीविषयत्वस्य कार्यत्वानुपपत्तिः** ॥

425· प्राकट्यं नाम धर्मं कतिचन विषये बुद्धिसंबन्धजन्यं
मन्यन्ते तन्न दृष्टं व्यवहरणविधावानुगुण्यं तु भानम् ।
क्वापि स्वाभाविकं स्यात् क्वचन भवति धीगोचरत्वात्मकं तत्
भातीत्यादिप्रयोगः स्वदत इति नयात्तत्र कर्मत्वगर्भः ॥ ६५ ॥

बुद्धिरूपप्रकाशातिरेकेण विषयगतं प्राकट्यं नाम धर्मं केचिदूचिरे । तदनुवदति—**प्राकट्य**मिति ॥ तन्निराकरोति—**तन्नेति** । कथं तर्हि विषयभानमित्यत्राह—**व्यवहरणे**ति । व्यवहारयोग्यत्वमेव भानमित्यर्थः । तच्च व्यवहारयोग्यत्वं क्वापि—स्वयंप्रकाशे वस्तुनि स्वाभाविकं स्यात् । क्वचन—परप्रकाशे वस्तुनि धीगोचरत्वात्मकं तद्भवति । ननु धीरेव भानं चेत् कथं तर्हि भातीत्यादिरर्थसामानाधिकरण्येन व्यवहार इत्यत्र प्रतिबन्द्या उत्तरमाह—**स्वदत** इति । यथा

देवदत्तास्वादकर्मभूतस्यापि मोदकस्य, देवदत्ताय स्वदते मोदक इति कर्मत्वगर्भः कर्तृ[त्व]व्यवहारः, एवमत्रापि भातीति व्यवहारः ॥ ६५ ॥

426. **इष्टद्विष्टप्रनष्टादिषु च परगतैः कथ्यतेऽन्यद्विशिष्टं**
ज्ञातत्वोक्तावपीत्थं व्यवहृतिनियमास्तावतैवोपपन्नाः ।
प्राकट्येऽसन् गुणादिष्वपि कथमधिकं भूतभव्येषु च स्यात्
कर्मत्वं तु क्रियार्थे सति फल इति च प्रायिकव्याप्तिहानेः ॥ ६६ ॥

इष्टेति ॥ किंच इष्टद्विष्टप्रनष्टादिषु व्यवहारेषु पुरुषादिनिष्ठैरेव इच्छादिभिर्विशिष्टो विषयः कथ्यते । इत्थं ज्ञातो घटः प्रकटो घट इत्याद्युक्तावपि व्यवहारनियमाः तावतैव—आत्मनिष्ठज्ञानेनैव उपपन्नाः । अन्यथा प्राकट्ये गुणादिष्वपि भूतभव्येषु च ज्ञातत्वादिव्यवहारसिद्ध्यर्थं प्राकट्यं कल्प्यं स्यात् । न च तद्युज्यते । ननु क्रियाफलशालित्वं कर्मत्वम् । तत् प्राकट्याभावे कथं स्यादित्याशङ्क्य निराकरोति—**कर्मत्व**मिति । प्रायिकमिदं लक्षणम्; न तु व्याप्तम् । गमन-क्रियायाः फलं ग्रामप्राप्तिः; न च प्राप्तेरपि प्राप्त्यन्तरमुपलभ्यते ॥ ६६ ॥

427. **आधत्ते धीः क्रियात्वात् किमपि गमनवत् कर्मणीत्यप्य[सारं]युक्तं**
दत्तानेकोत्तरत्वान्न च फलमधिकं भाति हानादिमात्रात् ।
हेतुर्धात्वर्थता चेदतिचरणमथ स्पन्दता स्यादसिद्धि-
र्धीस्वारस्यानृशंस्यादनुमतमधिकं कैश्चिदस्मत्सयूथ्यैः ॥ ६७ ॥

तर्ह्यनुमानात् प्राकट्यं साधयाम इति वदतः पक्षमनुवदति—**आधत्त** इति ॥ ज्ञानं स्वकर्मणि किंचित् करोति, क्रियात्वाद् गमनक्रियावदित्यप्ययुक्तम् । **दत्तेति** । इष्टद्विष्टादिषु व्यभिचारादेरित्यर्थः । तद्विवृणोति—**न चेति** । हानो-पादानादिबुद्धिव्यतिरेकेण विषयगतं फलं नोपलभ्यत इत्यर्थः । किंच क्रियात्वादिति हेतुर्धात्वर्थतामात्रं चेदतिचारः । न हि सर्वेषामपि धात्वर्थानामुत्तरोत्तरधात्वर्थाः फलम्; अनवस्थानात् । परिस्पन्दनरूपत्वाङ्गीकारे असिद्धिरेव स्यात् । तदिदमाह—**असिद्धिरिति** । इत्थं प्राकट्यं स्वमतेन निराकृत्य एकदेशिमतेन तदङ्गीकारमप्यनुवदति—**धीस्वारस्येति** । कैश्चिदित्युक्तिस्तदनङ्गीकारं द्योतयति ॥ ६७ ॥ **इति प्राकट्याख्यधर्मान्तरक्लृप्तिभङ्गः** ॥

428. **इच्छाद्वेषप्रयत्नाः सुखमितरदपि ज्ञानतो नातिरिक्ता**
या धीस्तद्धेतुरिष्टा न तदधिकतया कल्पने कोऽपि लाभः ।
पर्यायत्वं विशेषे न तु भवति यथा प्रत्यभिज्ञादिभेदे
नो चेदीर्ष्याभ्यसूयाभयधृतिकरुणाद्यन्यदन्यच्च कल्प्यम् ॥ ६८ ॥

इच्छाद्वेषादीनां ज्ञानादतिरिक्तत्वमाहुरन्ये । तद्दूषयति—**इच्छेति** ॥ तत्र कल्पनालाघवं प्रमाणमाह—**या धीरिति** । इच्छादिहेतुभूतानुकूलादिविषया बुद्धिरेव इच्छादिव्यवहारमातनोति; तदतिरिक्तकल्पने न कोऽपि लाभः; गौरवदोष एव लभ्यते । तर्हि ज्ञानेच्छादीनां पर्यायत्वं स्यादित्याशङ्क्य परिहरति—**पर्यायत्वमिति** । यथा ज्ञानत्वाविशेषेऽपि प्रत्य-भिज्ञास्मृत्यनुमित्यनुभवादिभेदे न पर्यायत्वम्; तद्वदिहापीति । नो चेत् ईर्ष्याभ्यसूयाभयधृतिकरुणाशान्तितुष्ट्यादि-

ग्रहणामपि विषयत्वामार्थमर्थान्तरं कल्प्यमित्यनियतिरेव स्यात् ॥ ६८ ॥ **इति इच्छादीनां बुद्धिविशेषाति-रिक्तत्वभङ्गः ॥**

429. चेतःस्रोतस्स्रुतीनां चिदवधिकतया चैत्तसङ्केतभाजां
रागद्वेषादिकानामभिदधतु कथं भावमस्थेमभावाः ।
एतेषां हेतुसाध्यक्रमनियतिमतां सर्वचित्साक्षिकाणां
कथ्येतातथ्यभावे कथमिव कथकद्वन्द्वयुद्धावतारः ॥ ६९ ॥

अत्र **बौद्धास्तु** चित्तचैत्तरूपेण द्वेधा विभागं वर्णयन्ति । तत्र चित्तमिति विज्ञानसन्ततिरुच्यते; चैत्तमिति चित्तानुबन्धिकं रागद्वेषादिकम् । तदेषां न संघटत इत्याह—**चेत इति** ॥ विज्ञानस्रोतोविशेषाणां चिदवधिकतया—विज्ञानमात्रवर्तित्वेन चैत्तादिव्यवहारभाजां रागद्वेषादीनाम् अस्थेमभावाः—क्षणिकत्ववादिनः कथं सद्भावमभिदधतु ? विज्ञानस्योत्पन्नापवर्गत्वेन चैत्तरूपावस्थान्तरभाक्त्वं न संघटत इत्यर्थः । तर्हि चैत्तानां सद्भाव एव नास्तीति वदाम इति चेत्; तच्च नोपपद्यत इत्याह—**एतेषामिति** । हेतुसाध्यक्रमनियतिमतां—कार्यकारणभावो हि बौद्धानां सत्त्वे नियामकम् । अतश्चैत्तानामपि कार्यकारणभावदर्शनादङ्गीकार्यं सत्त्वम् । सर्वचित्साक्षिकाणां—प्रत्यक्षेण सर्वैरुपलभ्यमानानामित्यर्थः । न हि सर्वज्ञेनाप्युपलब्धानां चैत्तानामबाधितानां [कथमपि च] मिथ्यात्वं वक्तुं शक्यते । तेषां रागादीनामतथ्यभावे कथमिव कथकद्वन्द्वयुद्धावतारः कथ्येत ? वादाधिकार एव न स्यादिति स्वप्रवृत्तिविरोधः ॥ ६९ ॥ **इति रागद्वेषादि-मिथ्यात्वमतभङ्गः ॥**

430. तत्रेच्छैव द्विधोक्ता विषयनियमतो रागविद्वेषनाम्ना
पूर्वस्तीव्रस्तु कामः पर इह भजते तादृशः क्रोधसंज्ञाम् ।
एकैवेच्छा सिसृक्षा भगवत उदिता संजिहीर्षेति चान्यै-
स्तद्वल्लोके न किं स्यादधिकमिह तु चेत्कल्प्यतेऽतिप्रसक्तिः ॥ ७० ॥

रागद्वेषयोरिच्छाभेदत्वमाह—**तत्रेति** ॥ अनुकूलविषयोपादानेच्छा रागः, प्रतिकूलविषयजिहासा द्वेषः । अतो विषयभेदेनैव नियतिसिद्धौ गुणभेदो न कल्प्यः । तावेव रागद्वेषौ तीव्रभावमासाद्य कामक्रोधाविति व्यपदिश्येते । अत्र प्रतिबन्दीमाह—**एकेति** । यथा न्यायदर्शने ज्ञानचिकीर्षाप्रयत्नवत ईश्वरस्येच्छैव चिकीर्षा संजिहीर्षा रिरक्षिषेत्यादिव्यप-देशभागिनी विषयभेदेन, एवं लोकेऽपीच्छाया एव विषयभेदेन व्यवहारो भवतु; अन्यथाऽतिप्रसक्तिरित्याह—**अधिक-मिति** । बुभुक्षापिपासाजिहीर्षेत्यादिकं सहस्रमपि कल्पनीयं स्यादित्यर्थः ॥ ७० ॥ **इति द्वेषस्यापीच्छाविशेषत्वम् ॥**

431. इच्छातः कार्यसिद्धौ किमिह यतनमित्यन्तरा कल्प्यतेऽन्य-
त्तन्मोघत्वोपलब्धेरिति यदि यतने कल्पितेऽप्येतदेवम् ।
नैवं व्यावर्तमानादनुगतमधिकं वर्ण्यते मानविद्भि-
र्वाञ्छन्तोऽपि ह्ययत्ना वयमिह पवनस्पन्दनेन्दूदयादौ ॥ ७१ ॥

अत्र कश्चिदाह—यदीच्छातिरिक्तद्वेषपरित्यागः, तर्हीच्छैव प्रयत्नोऽपि भवतु; किमनेन प्रयत्नेनेति । तदिदमाह—**इच्छात इति** ॥ इच्छायाः कदाचिद्व्याघातोपलब्धेर्यत्नः कल्प्यत इति चेत्, यत्ने कल्पितेऽपि व्याघातोपलब्धिस्तुल्या;

नैतावता गुणान्तरं कल्प्यत इति भावः । तदेतन्निराकरोति—नैवमिति । व्यावर्तमानादनुवर्तमानमधिकमिति हि विद्वद्भिर्वर्ण्यते न्यायः । तथा चात्र वाञ्छन्तोऽपि केचिदयत्ना एव वर्तन्ते । यथा चन्द्रोदयमभिवाञ्छन्ति न पुनस्तत्र यतन्ते । तस्मादनुदवर्तमानाया इच्छाया व्यावर्तमानो यत्नो बुद्ध्यवस्थाभेदत्वेऽपि विजातीयावस्थान्तरमिति भावः ॥ ७१ ॥ इति इच्छामात्रातिरिक्तप्रयत्नावस्थासिद्धिः ॥

432. प्राणस्पन्दस्सुषुप्तिप्रभृतिषु घटते तादृशादृष्टमात्रात्
यत्त्वं यत्ने निदानं वदसि भव[तु]ति तल्लाघवात् प्राणवृत्तौ ।
धीवृत्तिश्चैव यत्नः स्थित इति स कथं काष्ठकल्पे सुषुप्ते
नो चेद् वाह्यानलादेर्ज्वलनमपि ततः कल्प्यतां न त्वदृष्टात् ॥ ७२ ॥

अत्र केचिद्बुद्धिपूर्वकप्रयत्नातिरेकेण जीवनपूर्वकं प्रयत्नान्तरं कल्पयन्ति । तन्न संघटत इत्याह--प्राणेति ॥ सुषुप्त्याद्यवस्थासु प्राणस्पन्दहेतुत्वेन स प्रयत्नः परिकल्प्यते । स एव प्राणस्पन्दस्तावददृष्टमात्रादेव भवतु । भवताऽपि चैतन्न परिहार्यम् ; प्रयत्नस्यैव निदानतया तत्राऽदृष्टमेव हि भवान् वदति ; तदेवादृष्टं लाघवात् प्राणप्रवृत्तौ [निदानं भवतु] कारणं भवेत् । ततो गौरवभिया तत्र प्रयत्नो न कल्प्यः । किंच प्रयत्नोऽपि बुद्धिविशेषतया निर्णीतः । तथा च काष्ठकल्पे सुषुप्ते प्रयत्नो व्याहन्यते । इत्थमनङ्गीकारे तवाग्नेरुर्ध्वज्वलनमित्यादिकमपि प्रयत्नादेव कल्प्यं स्यात् ; न पुनरदृष्टादित्याह—नो चेदिति ॥ ७२ ॥ इति जीवनपूर्वकप्रयत्ननिरासः ॥

433. स्याद् दुःखाभावमात्रं सुखमभिदधतो वैपरीत्यप्रसक्तिः
स्वापादौ दुःखसिद्धिर्न यदि सुखमपि ह्यत्र नैवास्ति तादृक् ।
शीतोष्णातीतनीतेर्द्वितयसमधिकावस्थितिर्दुस्त्यजाऽत-
स्तत्तच्छब्दप्रयोगेष्वनियतिरुचितैस्संघटेतोपचारैः ॥ ७३ ॥

अत्र कश्चिच्चोदयति--एवं यत्नापलापे सुखमप्यलपितुं शक्यत इति । दुःखाभावमात्रमेव सुखं स्यादिति वदन्तं प्रतिबन्द्या निराकरोति—स्यादिति ॥ दुःखाभावमात्रस्यैव सुखत्वे सुखाभावमात्रस्यापि दुःखत्वं स्यादित्यर्थः । स्वापादौ सुखाभावेऽपि दुःखसिद्धिर्नास्तीति चेत् तर्हि तत्र दुःखाभावेऽपि सुखसिद्धिर्नास्तीति तुल्यम् । अतः स्वापे सुखदुःखाभावावुभावपि वर्तेते ; अतस्तदतिरिक्तं सुखमपि दुःख[मपि]वत् कल्पनीयमिति भावः । दृष्टं च लोके शीतोष्णातिरिक्तानुष्णाशीतकल्पनम् । एवं सुखदुःखरूपद्वितयावस्थाविरहितसुषुप्त्यवस्था दुस्त्यजेत्याह—शीतेति । तर्हि भारावतरणादिषु सुखशब्दः कथम् ? सुखोपभोगाभावमात्रे दुःखशब्दो वा कथं प्रयुज्यते ? इत्यत आह—तत्तदिति । औपचारिकाः प्रयोगास्सहस्रशोऽपि सन्तु ; न हि शब्दप्रयोगमात्रादुपचारसहादर्थतत्त्वं निश्चाययितुं शक्यत इति भावः ॥ ७३ ॥ इति सुखदुःखोदासीनरूपावस्थात्रयसिद्धिः ॥

434. भेदस्त्रेधा मतीनां ह्युपधिनियमितैरानुकूल्यादिधर्मै-
स्तस्यैवात्यन्तहानेर्निरुपधिकसुखस्तादृशो धीविकासः ।
निस्सीमब्रह्मतत्त्वानुभवभवमहाह्लाददुग्धार्णवेऽस्मिन्
निश्शेषैश्वर्यजीवानुभवरसभरो बिन्दुभावोपलभ्यः ॥ ७४ ॥

एवमौपाधिकानां दुःखमिश्राणामनुकूलविज्ञानानामत्यन्तहानेर्निरुपाधिकसुखरूपो मुक्त्यवस्थायां यो वृद्धिविकासस्तस्मिंस्तादृशानन्दरूपावस्थाविशेषे चतुर्मुखैश्वर्यपर्यन्तस्यैश्वर्यस्य जीवानुभवस्य चात्यन्ताल्पीयस्त्वमेवेति दुग्धार्णवतद्बिन्दुदृष्टान्तेनोपवर्णयति—**भेद** इति ॥ अक्षरार्थः स्वयमेव भाव्यः ॥७४॥ **इति निरुपाधिकानन्दरूपवृद्धयवस्थाविशेषः** ॥

435. **संसारे नास्ति किञ्चित् सुखमिति कतिचित्तद्धटेतोपचारा-**
न्नो चेद्व्युत्पत्तिहीनं सुखपदमधिकं तत्सुखं नाभिदध्यात् ।
तस्माद् दुःखोत्तरत्वप्रभृतिभिरिह तद्दुःखमित्युक्तमाप्तैः
क्ष्वेलोपश्लेपदुष्टे मधुनि विषमिति व्याहृतिः किं न दृष्टा ॥ ७५ ॥

केचित्तु संसारेषु सुखमेव नास्तीत्याहुः; तदौपचारिकमित्याह—**संसार** इति ॥ अन्यथा सुखपदव्युत्पत्तिरेव न स्यात् । तथा चालौकिकमपि सुखं सुखशब्दो नाभिदध्यादित्याह—**नो चे**दिति । कथं तर्ह्याप्तैस्संसारस्य दुःखरूपत्वमुच्यत इत्याशङ्क्य परिहरति—**तस्मा**दिति । दुःखोत्तरत्वाद् दुःखत्वमभिधीयत इति परिहारः । तत्र दृष्टान्तमाह—**क्ष्वेले**ति ॥ ७५ ॥ **इति सांसारिकसुखस्य दुःखत्वोक्तिनिर्वाहः** ॥

436. **धर्मोऽधर्मश्च तत्तत्फलकरणतया शास्त्रसिद्धं क्रियादि-**
द्वारं त्वेतस्य कालान्तरनियतफले स्यादिहादृष्टमन्यत् ।
आहुस्तत् केचिदन्तःकरणपरिणतिं वासनां चेतसोऽन्ये
पुंधर्मं केचिदेके विभु किमपि परे पुद्गलांस्तत्सयूथ्याः ॥ ७६ ॥

अथ धर्माधर्मलक्षणं तत्साध्यादृष्टस्वरूपं च विभज्य दर्शयति—**धर्म** इति ॥ *चोदनालक्षणोऽर्थो धर्म इति शास्त्रैकसमधिगम्यं श्रेयस्साधनं धर्म इत्युच्यते; स तु क्रियादिरेव; द्रव्यक्रियागुणादीनां धर्मत्वं स्थापयिष्यते इत्याद्यभिधानात् । चिरध्वस्तस्यापि कर्मणः कालान्तरभाविफलानुगुणं किमपि द्वारमन्यददृष्टमुपादेयम् । तच्चान्तःकरणपरिणतिरिति **साङ्ख्याः** प्राहुः । चेतसो वासनेति **सौगताः** । पुंधर्म इति **न्यायवादिनः** । विभुरूपं किमपि तत्त्वान्तरमिति **जैनैकदेशिनः** । पुद्गलरूपमिति **तत्सयूथ्याः** । एतस्य सर्वस्य कल्पनामात्रसिद्धत्वात् तत्तत्कर्माचरणपरिणतेश्वरबुद्धिविशेष एवादृष्टमिति तत्त्वविदां संप्रदाय इति हृदयम् ॥ ७६ ॥ **इति धर्माधर्मलक्षणतत्साध्यादृष्टस्वरूपमतभेदाः** ॥

437. **तुल्ये सेवादिहेतौ फलभिदुरतया साध्यते चेददृष्टं**
हेतोस्सूक्ष्मोऽस्तु भेदो न खलु समुचिता धर्मिणोऽन्यस्य क्लृप्तिः ।
व्याख्यातं यत्तु बाह्यैर्विषयसमफलप्रापकत्वं क्रियाणां
तत्स्वतेऽतिप्रसक्तिं तदिह न निगमादन्यतोऽदृष्टसिद्धिः ॥ ७७ ॥

अस्त्वदृष्टं यत्किंचिदेव, तत् *सेवाध्ययनतुल्यत्वे दृष्टा हि फलभिन्नतेत्युक्तप्रकारेण फलभेदात्परिकल्प्यते, न पुनरागमैकसमधिगम्यमिति केचिदाहुः । तदिदमनुवदति—**तुल्य** इति ॥ तत्रान्यथासिद्धिमाह—**हेतो**रिति । दृष्टेष्वपि कारणेषु यत्किंचिद्वैषम्यात् फलभेदोऽस्तु । किमनेनादृष्टेन? अन्यथा कल्पनागौरवादनौचित्यमेवेत्याह—**न खल्वि**ति । अतिरिक्तादृष्टकल्पनायामदृष्टं कल्प्यम्, तस्य च भेदः कल्प्यः; तथा च गौरवम् । अस्माकं तु दृष्टेष्वेव कारणेषु

भेद एव कल्प्यः। अतो लाघवमिति भावः। तस्मादागमैकसमधिगम्यमदृष्टमित्याकूतम्। अत्र केचित् यादृशो विषयस्सुखरूपो दुःखरूपो वा, तादृशमेव फलं क्रियाया जायत इति [वदन्ति]। तदिदमतिप्रसक्तिमेव सूते। विषयस्य सुखात्मकत्वे सुखात्मकं फलमिति न नियमः; पापरूपसुखेन दुःखरूपफलस्य प्राप्तेः। एवं दुःखात्मकत्वे दुःखं फलमिति न नियमः; दुःखरूपपुत्रशिष्यादिशिक्षणादिना सुखस्यैव सिद्धेः। अतश्शास्त्रादेवादृष्टसिद्धिः, न पुनस्स्वकपोलकल्पितादनुमानादित्याह—**तदिहे**ति ॥ ७७ ॥ **इति अदृष्टस्यागमैकसिद्धत्वम्** ॥

438. **निस्संकोचान्निषेधात् क्वचन फलतयाऽनूदितांहस्तु हिंसा**
रुन्धे सामान्यमङ्गे विधिरनुमितिरप्यत्र बाधादिदुःस्था।
स्वल्पो दोषो विमृष्टे सुपरिहर इह क्रत्वनुग्राहके स्या-
दित्युक्तं सांख्यसक्तैः पशुहितवचनान्नेति शारीरकोक्तम् ॥ ७८ ॥

एवमदृष्टस्यागमैकसमधिगम्यत्वे सिद्धे विधिनिषेधव्यापारपरिशोधनेन श्येनाग्नीषोमीयवैषम्यमाह—**निस्सङ्कोचा**दिति ॥ अयमर्थः—श्येनेऽपि हिंसा दृश्यते अग्नीषोमीयपश्वालम्भनेऽपि। प्राणवियोजनफलो व्यापारो हिंसाशब्देनाभिलप्यते। तदुभयत्रापि समानम्। अथापि श्येने हिंसा न विहिता; अपि तु रागप्राप्ता। यदि हिंस्याच्छ्येनेन हिंस्यादिति हि तत्र विधिक्रमः; न पुनः हिंस्यादेवेति। तथा च तत्र हिंसाया रागप्राप्तत्वात् *न हिंस्यादिति निषेधवचनं तत्र निस्सङ्कोचम्। तेन फलतयाऽनूदिता हिंसा तत्र निषिध्यते, न पुनः श्येनः; *श्येनस्तत्रासिवत् पृथगिति पृथङ्निर्देशात् विहितत्वाच्च। तदिदमाह—**अंहस्तु हिंसे**ति। [सा] रागप्राप्ता हिंसा शास्त्रनिषिद्धत्वात् पापमित्यर्थः। अग्नीषोमीयपश्वालम्भने तु प्राणवियोजनफलव्यापाररूपत्वेन हिंसात्वे सत्यपि, *न हिंस्यादिति सामान्यम् *आलभेतेति विशेषविधिरुपरुन्धे। विशेषविधिप्राप्ते सामान्य[स्य]निषेधस्य रागप्राप्तमात्रविषयतया सावकाशस्य दुर्बलत्वात्। अथापि अग्नीषोमीयहिंसा अधर्म्या हिंसात्वाद् ब्राह्मणहिंसावदित्यनुमितिरागमबाधसोपाधिकत्वाभ्यां दुःस्थेत्याह—**अनुमिति**रिति। अत्र **साङ्ख्या** एवं मन्यन्ते—अग्नीषोमीयपश्वालम्भनविधिरालम्भनस्य क्रतूपकारमाह। *न हिंस्यादिति तु वाक्यं हिंसाशब्दस्यासङ्कुचित[विषय]वृत्तित्वेन अग्नीषोमीयहिंसामपि गृह्णाति। तथा च अस्या अपि हिंसायाः किंचित् पापहेतुत्वमस्ति; तच्च वैदिकत्वात् सुपरिहरमिति। तत्रैवं **शारीरकशास्त्रे** परिहार उक्तः—*अग्नीषोमीयपश्वालम्भनस्य परदुःखोत्पादकत्वे सत्यपि हिंसाशब्दवाच्यत्वं नास्तीति। न हि व्रणादिशान्त्यर्थं दाहच्छेदादिकारिषु वैद्याम्बष्ठादिषु हिंसकत्वमस्ति। न च पुत्रशिक्षादिकारिषु पित्रादिषु तर्जनादिभिर्हिंसकत्वमुच्यते। अशास्त्रीयकर्मणा परदुःखाधानकारिणामेव हिंसकत्वम्। अत्र पुनश्शास्त्रीयकर्मानुरोधेन प्राणवियोजनेऽपि न हिंसकत्वम्; अपि तु रक्षकत्वमेव, पापफलपरिणतिरूपपशुशरीरविच्छेदेन पशोरेव निरतिशयसुखभोगानुरूपविशिष्टशरीरग्रहणहेतुत्वात्। तदिदं सर्वमभिप्रेत्याह—**पशुहितवचना**दिति। *न वा उ वे तन्म्रियसे नरिष्यसि देवाँ इदेषि पथिभिस्सुगेभिरिति मन्त्रवर्णेन पशोर्विशिष्टदेशप्राप्तिरुच्यते। अयमत्र विभागः—अग्नीषोमीयपश्वालम्भनस्य हिंसात्वमभ्युपगम्य *आलभेतेति विधिबलात् *न हिंस्यादिति निषेधस्य सङ्कोचमाहुः केचित्। अपरे पुनः श्रुतिस्मृतिबलाद्धिंसात्वमेव नाभ्युपगच्छन्ति; अल्पीयसा दुःखेन अधिकसुखप्राप्तिहेतोरहिंसात्वात्, *न म्रियसे नरिष्यसीति तथैव श्रुतत्वाच्चेति ॥ ७८ ॥ **इति श्येनाग्नीषोमीयादिवैषम्यम्** ॥

439. सिध्येद्वा विश्ववृत्तेरनितरफलतास्थापनाद्यैरदृष्टं
तत्सत्ताज्ञप्तिमात्रात्तदुचितनियतानुष्ठितिर्नैव सिध्येत् ।
तस्माच्चर्याविशेषे श्रुतिरिह शरणं स्वर्गमोक्षादिहेतौ
सैवादृष्टस्वरूपं प्रथयतु बहुधा तत्तदुक्ताद्विविक्तम् ॥ ७९ ॥

इत्थं श्रुतिरेवादृष्टनियमे शरणमिति निर्णीतम् । अन्वारुह्याप्याह—**सिध्येदिति** ॥ *विफला विश्ववृत्तिर्नो इत्यादिना हेतुकलापेन अदृष्टसामान्यं सिध्यतु; तथाऽपि तत्सद्भावज्ञानमात्रान्नियतानुष्ठानं न सिध्येत् । तदिदमाह—**तत्सत्ते**ति । स्वर्गस्वाराज्याद्यनन्तफलविशेषहेतुकर्मानुष्ठानविशेषसिद्धिर्नानुमानादिति । तस्मादनुष्ठानविशेषे स्वर्गमोक्षादिहेतौ तदङ्गकलापप्रकारविशेषे च श्रुतिरेव शरणम् । सैव श्रुतिरदृष्टस्वरूपमपि प्रथयतु । तत्तदुक्ताद्विविक्तम्—*अन्तःकरणवृत्तिर्वेत्याद्युक्ताद्विविक्तम् ईश्वरसङ्कल्परूपमदृष्टं श्रुतिरेव प्रथयत्वित्यर्थः ॥ ७९ ॥ **इति अदृष्टमात्रस्यान्यतस्सिद्धावपि श्रुत्या तद्विशेषनिष्कर्षसिद्धिः ॥**

440. शक्तिर्यागादिकस्य स्वफलवितरणे संभवे वा फलस्य
स्थाप्या मध्ये तयोरित्यबहुमतिपदं सत्तु तौतातिती वाक् ।
शक्ताभावे हि शक्तिर्न भवति शमितो धर्मधर्म्यैक्यजल्प-
स्तद्द्वारे शक्तिशब्दो यदि भवतु परं क्लृप्तिमस्य क्षिपामः ॥ ८० ॥

अथ *अन्तःकरणवृत्तिर्वेत्यादिभिः परमतमनूद्य फले प्रवृत्तयागशक्तिः स्वोत्पत्तौ प्रवृत्तफलशक्तिर्वा अदृष्टपदवाच्यमिति ह्युक्तं **कौमारिलैः**, तदयुक्तमित्याह—**शक्तिरि**त्यादिना **वागि**त्यन्तेन पूर्वार्धेन ॥ तस्मिन् पक्षे व्याघातमाह—**शक्ताभाव** इति । यागो नष्टस्तस्य शक्तिरनुवर्तत इति व्याहतम् । फलं भावि तस्यापि शक्तिः प्रागेवास्तीति च व्याहतम् । ननु धर्मधर्मिणोरैक्यात् शक्तिसद्भावे शक्तस्यापि सद्भावोऽस्तीत्यतो न व्याघात इत्याशङ्क्य परिहरति—**शमित** इति । धर्मधर्मिणोरैक्यं भेदाभेदनिराकरणादेव निरस्तम् । तर्हि द्वारमात्रे शक्तिशब्दं प्रयुञ्ज्महे इति चेत्, भवत्वयमौपचारिकः प्रयोगः; नैतावताऽस्माकं कश्चिद्विरोधः । अपि तु **भाट्टोक्ता**मदृष्टक्लृप्तिं **प्राभाकरोक्ता**मदृष्टवाच्यत्वक्लृप्तिं च प्रतिक्षिपामः । तदिदमाह—**परमिति** ॥ ८० ॥ **इति क्रियादिशक्तिमात्ररूपादृष्टक्लृप्तिनिरासः ॥**

441. द्वारं तत्तत्फलाप्तेः श्रुतिभिरवधृतौ देवताप्रीतिकोपौ
व्याचख्ये देवपूजा यजनमिति न तन्न श्रुतं वाक्यविद्भिः ।
आम्नातेऽपेक्षितेऽर्थे न च नयनिपुणैरश्रुतं कल्पनीयं
नो चेत्स्याद्दत्ततोयाञ्जलिरिह भवतां रात्रिसत्रादिनीतिः ॥ ८१ ॥

अदृष्टस्य देवताप्रीत्यादिरूपत्वं पूर्वोपक्षिप्तं समर्थयते—**द्वारमिति** ॥ *स एवैनं भूतिं गमयति, *स एनं प्रीतः प्रीणाति, *एष एव साधु कर्म कारयति तम्, *क्षिपाम्यजस्रमशुभानित्यादिभिः प्रमाणशतैः ईश्वरप्रीतिकोपाभ्यां धर्माधर्मफलप्राप्तिरवगम्यते । किंच *यज देवपूजायामिति यजतेर्देवतापूजनवाचित्वं विद्वद्भिरवगम्यते । पूजनं च प्रीतिहेतुभूतस्सेवाविशेष इति सुप्रसिद्धम् । अतो यज्ञाद्याराधितो भगवान् फलं ददातीति वैदिकसिद्धान्तः । न चात्रापेक्षितेऽर्थे साक्षादीश्वरसङ्कल्पात्मनि द्वारे श्रुत्यैव प्रतिपन्ने निरर्थकमेवादृष्टरूपं किञ्चित् कल्पनीयम् । विध्यपेक्षितस्यार्थवादादिप्रति-

पन्नस्यार्थस्य स्वीकार एव हि न्याय्य इति मीमांसकमर्यादा । तदिदमाह—**आम्नात** इति । एवमनङ्गीकारे दोषमाह—**नो चेदि**ति । **रात्रिसत्रन्याये** हि *प्रतितिष्ठन्ति ह वा एते य एता रात्रीरुपयन्तीत्यर्थवादप्रतिपन्ना प्रतिष्ठा फलतयाऽङ्गीक्रियते । *स्वर्गकामो यजेतेत्यादौ स्वर्गस्वरूपे विधिवाक्यप्रतिपन्नेऽपि स्वरूपविशेषपरिशोधनं *दुःखेन यन्न संभिन्नमिति अर्थवादवाक्येन क्रियते । तच्च विध्यपेक्षितत्वादनुमन्यते विधिनाऽपि । एवं तेषुतेषुष्वधिकरणेषु विध्यपेक्षितार्थप्रतिपत्तिरर्थवादादिभिरिति **मीमांसकनिर्णयः** । अतः श्रुता देवताप्रीतिरेव द्वारभूतमदृष्टमिति शिष्टालापः ॥ ८१ ॥ **इति अदृष्टस्य देवताप्रीत्यादिरूपत्वम्** ॥

442. **आराध्यादिप्रकाशः स्फुटमुपकुरुते मन्त्रसाध्यो विधीनां**
प्राशस्त्यादिप्रतीतिर्न च भवति मृषावर्णनैरर्थवादैः ।
सत्येऽप्याकाङ्क्षितेऽर्थे तदुभयगमिते वाक्यभेदादि न स्या-
ल्लोकेऽप्येवं हि दृष्टं तदनुगतिमुचां सर्वशास्त्रप्रकोपः ॥ ८२ ॥

मन्त्रार्थवादयोराराध्यादिप्रकाशपरत्वेऽपि न वाक्यभेद इत्याह—**आराध्यादी**ति ॥ आराध्यादिप्रकाशो मन्त्रसाध्यो विधीनामुपकुरुते; तेन विध्युपकारकत्वान्नैकवाक्यताभङ्गः । एवमर्थवादसाध्या प्राशस्त्यादिप्रतीतिरप्यर्थस्य मिथ्यात्वे विध्युपकाराय न कल्पते । अतोऽर्थवादप्रतिपन्नार्थतथात्वं प्राशस्त्यमेव दृढीकरोति । तदिदमाह—**प्राशस्त्यादी**ति । न ह्यसौ चतुर्वेदाभिज्ञः मयोच्यमानं मिथ्येत्युक्तौ प्राशस्त्यं प्रतीयते । अतो विध्यपेक्षितार्थद्वये मन्त्रार्थवादाभ्यां याथातथ्येन प्रतिपन्ने न वाक्यभेदशङ्का स्यात् । तदेतदाह—**सत्येऽपी**ति । न चैतद्वेदमात्रनियतम्; लोकेऽपीयमेव गतिरित्याह—**लोकेऽपी**ति । सप्तद्वीपाधिपतिर्महीपतिश्चतुर्दशविद्यास्थानविद् ब्राह्मण इत्यादिलोकव्यवहारः स्वार्थ[प्रामाण्य]मेव पुरस्कुरुते । अन्यथा तत्तदाधिक्यप्रतिपादकानां श्रुतिस्मृतीतिहासपुराणानां साकल्येनाप्रामाण्यप्रसङ्ग इत्याह—**तदनुगतिमुचा**मिति ॥ ८२ ॥ इति **मन्त्रादेर्विवक्षितार्थत्वविरोधपरिहारः** ॥

443. **बुद्धिर्मन्त्रार्थवादैर्भवति दृढतरा देवतातद्गुणादौ**
बाधश्चातीन्द्रियेऽक्षैर्न हि भवति धियां मानता च स्वतो नः ।
दुःखासंभिन्नदेशादिकमिव फलदा देवता तत्रतत्र
प्राप्या च श्रूयतेऽतः कथय कथमियं शब्दमात्रादिरूपा ॥ ८३ ॥

इत्थं प्रमाणप्रतिपन्ने देवतास्वरूपे सति किमिति तत्तच्छब्दमात्रात्मिका देवताऽभिधीयते किम्पचानैरित्याह—**बुद्धिरि**ति ॥ अयमत्र विकल्पः—किं मन्त्रादिभिः प्रतीतिरेव नोत्पद्यते ? उत सा संशयात्मिका ? किं वा अवधारणात्मिकाऽपि बाध्यते ? अबाधिताऽपि [बौद्ध]बाध्यवत् स्वतोऽप्रमाणरूपिणीति स्वीक्रियते ? तत्राद्यं परिहरति—**बुद्धिर्मन्त्रार्थवादैर्भवतीति** । द्वितीयमप्यपाकरोति—**दृढतरा देवतातद्गुणादा**विति । तृतीयं च निराचष्टे—**बाधश्चातीन्द्रियेऽक्षैर्न हि भवति धिया**मिति । अयं विकल्पः—मन्त्रार्थवादप्रतिपन्नानामलौकिकानामर्थानां किमिन्द्रियैर्बाधः ? किं वा अनुमानेन ? न तावदिन्द्रियेण; अलौकिकेऽर्थे खल्विन्द्रियाणां विधिनिषेधयोस्सामर्थ्यमेव नास्ति । नाप्यनुमानेन, आगमविरुद्धस्यानुमानस्य[स्याद्]दुष्टत्वात् । अबाधितस्यापि स्वत एवाप्रामाण्यमिति चतुर्थः पक्षोऽवशिष्यते; स तु बौद्धानामेव । तदिदमाह—**धियां मानता च स्वतो न** इति । तर्हि देवताप्रीत्यादौ श्रुतिरेव नास्तीति पञ्चमं पक्षं परिकल्पयाम इति

न्नेत्, तद्दृष्टापलापरूपत्वादनुपपन्नमित्याह—**दुःखेति** । यथा स्वर्गादिश्रुतिः प्रत्यक्षा एवं देवतादिश्रुतिरपि प्रत्यक्षैव श्रूयते । अतः कथमियं शब्दमात्रात्मिका देवतेति कथयसि त्वमिति परपक्षवादिनमाक्षिपति—**कथयेति** ॥ ८३॥ **इति देवतानां तत्तच्छब्दमात्रादिव्यतिरेकः ॥**

444. **प्राचीनेन्द्राद्यपाये दिशतु कृतफलं को नु कल्पान्तरादा-**
वन्ये तत्तत्पदस्था न तदुपजनकाः प्रागनाराधितत्वात् ।
मैवं यस्य श्रुतिश्च स्मृतिरपि नियतादेशरूपे स एक-
स्सर्वाराध्यान्तरात्मा न हि गलितपदो नापि सुप्तस्तदाऽपि ॥ ८४ ॥

ननु कर्मणां देवताराधनरूपत्वे कल्पान्ते पूर्वकल्पाराधिता देवता भ्रष्टाधिकाराः । कल्पान्तरे पुनरन्ये तत्तत्पदस्था देवताविशेषाः पूर्वकल्पेऽनाराधितत्वात् पूर्वकल्पकृतकर्मफलजनका न भवन्ति । अतः कथमुत्तरकल्पे पूर्वकल्पकृतकर्मफलप्राप्तिरिति चोदयति—**प्राचीनेति** ॥ उक्तमिदं निराकरोति—**मैवमिति** । *श्रुतिः स्मृतिर्ममैवाज्ञेति यस्य श्रुतिश्च स्मृतिश्च नियतादेशरूपे प्रमाणसिद्धे, स एकस्सर्वकर्मसमाराध्यः पूर्वोत्तरकल्पवर्तिसकलदेवतान्तर्यामी न हि गलितपदो भवति; नापि सुप्तवत् किमपि न जानाति । तेन पूर्वोत्तरकल्पवर्तिनोरधिकारिणोरधिपतिरन्तर्यामी च भगवानेव सर्वं फलं प्रदापयति । यथा पूर्वोत्तराधिकारिणोरधिपतिर्महाराजस्तत्तद्देशवर्तिनां तत्तत्फलप्रदानेन परिपोषक इति लोकदृष्टमेतत् ॥ ८४ ॥ **इति कर्मणां कल्पान्तरेष्वपि फलसिद्धिद्वारविशेषः ॥**

445. **अस्त्वेवं कर्मवर्गे स्वयमिह फलदो हव्यकव्यैकभोक्ता**
तन्निघ्नैस्तैः किमन्तर्गडुभिरिति च न स्वोक्तिबाधप्रसक्तेः ।
कर्माराध्यत्वमेषां दिशति फलमसौ पूर्वमाराधितस्तैः
श्रद्धेयाः श्राद्धभोक्तृद्विजवदत इमे निर्जरास्तस्य देहाः ॥ ८५ ॥

तर्हि सर्वाधिपतिस्स एव भगवान् सकलफलप्रदो भवतु ; हव्यकव्यैकभोक्तृत्वात् ; मध्ये तन्निघ्नैस्तैः किमन्तर्गडुभिरिति, एतत्स्वोक्तिबाधदुःस्थमित्याह—**अस्त्वेवमिति** ॥ देवतामुखेन भगवत्समाराधनं हव्यभोक्तृत्वम् । तदेव पितृमुखेन चेत् कव्यभोक्तृत्वमिति शास्त्रप्रसिद्धिः । अतो देवपितृप्रहाणवचनमसङ्गतम् । किंच कर्मभिराराधितो भगवान् सकलमपि फलं ददातीति शास्त्रनिर्णयः । तथा च पूर्वस्मिन् कल्पे तैस्तैरधिकारिभिः कर्मविशेषसमाराधितो भगवान् उत्तरस्मिन् कल्पे तेषा[मपि]मेव कर्माराध्यत्वेन देवतात्वं पितृत्वं च ददाति । तथा च तत्तद्देवतामुखेन भगवत एवाराधनीयत्वम्, तेषामपि च भगवद्विशेषणभूतानां कर्माराध्यत्वमिति न विरोधः । तदिदमाह—**कर्माराध्यत्वमिति** । ननु देवतानामाराध्यत्वे कथं भगवदाराधनत्वम्? तदाराधने वा कथं देवताराधनत्वमिति? तदेतद् दृष्टान्तेनोपपादयति—**श्रद्धेया** इति । यथा श्राद्धे निमन्त्रितब्राह्मणभोजने पितृदेवतयोः प्रीतिः, सैव प्रीतिः फलदायिनी, एवमाराध्यदेवतान्तर्यामी भगवान् प्रीतः फलं प्रयच्छति । अत इमे निर्जरास्तस्य देहा इति श्रुतिसिद्धमित्यर्थः ॥ ८५ ॥ **इति देवतान्तरप्रीतेरपि भगवत्प्रीत्यर्थत्वम् ॥**

446. **विश्वेशाकूतभेदव्यवहितफलदे वैधघण्टापथेऽस्मिन्**
संस्काराणां गतार्था सरणिरपि तथा मन्त्रणप्रोक्षणाद्यैः ।

राजेच्छोपात्तभोग्यप्रभृतिनियमवत्तत्र कार्यान्तरादि-
स्सत्त्वादीनां गुणानां विपरिणतिभिदां तत्फलं केचिदूचुः ॥ ८६ ॥

एवं प्रधानकर्मसु द्वारभूतां देवताप्रीतिं प्रसाध्य संस्कारकर्मस्वपि स एव देवतासंकल्पविशेषो द्वारत्वेन स्वीकार्य इति वदति—**विश्वेशेति** ॥ यथा यज्ञाद्याराधितः स्वसङ्कल्पेनैव फलं प्रयच्छति भगवान्, एवं मन्त्रणप्रोक्षणादिभिरपि संस्कारकर्मभिराराधितस्तत्तत्संस्कार्यानुबन्धिफलकरणेन तानितानि कर्माणि सगुणयतीति । कथं तर्हि तत्तत्संस्कार्यवस्तुनि नियमेनोत्तरकर्मानुष्ठानं स्यात्? न ह्यप्रोक्षितात्प्रोक्षिते कश्चिदतिशयो भवत्पक्षेऽस्ति; ईश्वरबुद्धिविशेषमन्तरेण व्रीह्यादिषु विशेषास्वीकारादित्याशङ्क्याह—**राजेच्छेति** । यथा राजेच्छया अस्येदं वाहनमायुधं वस्त्रमाभरणमित्यादिनियमकारिण्या परिगृहीतानां तेषां पदार्थानां तन्नियमानुरोधेनैव उत्तरोत्तरमारोहणादिकर्मसूपयोगनियमः, एवं तत्तत्प्रोक्षणादिकर्मविषयीकृतानामेव तेषामुपयोगो भगवदायत्त इति न विरोधः; सहकारिवशादेव सर्वं संपत्स्यत इति हि न्यायवित्संप्रदायः । इत्थं स्वपक्षमभिधाय सयूथ्यानां पक्षमप्याह—**सत्त्वादीना**मिति । प्रोक्षणादिकर्मभिर्व्रीह्यादिषु सत्त्वादिगुणपरिणतिभेदं केचिदूचुरिति, गुणपरिणतिभेदातिरेकेण प्रोक्षणादिना आधेयशक्तिर्न कल्प्येत्यर्थः । वैभवादयं पक्ष उक्तः; प्राक्तन एव पक्षः प्रामाणिक इति भावः ॥ ८६ ॥ **इति शास्त्रीयसंस्काराणां देवताप्रीत्यर्थत्वम् ॥**

447. **कृष्यादौ मर्दनादावपि च न हि परप्रीतिमूला फलाप्ति-**
स्तद्वत् स्याच्छास्त्रसिद्धेष्विति न सदफलं ह्यत्र दृष्टान्तमात्रम् ।
दृष्टौ चाज्ञानुवृत्तिप्रभृतिषु फलदौ शासितुः प्रीतिकोपौ
शिष्टौ चातस्समीची तदुपगतिरिह त्यक्तिरिष्टेऽपि वांशे ॥ ८७ ॥

ननु कृष्यादौ मर्दनादौ च परप्रीत्या फलावाप्तिर्न दृश्यते, तद्वच्छास्त्रसिद्धेष्वपि स्वशक्त्यैव फलप्राप्तिरुचितेत्याशङ्क्य निराकरोति—**कृष्यादा**वित्यादिना **न सदि**त्यन्तेन ॥ केवलं हि दृष्टान्तमात्रं प्रामाणिकार्थप्रतिक्षेपकं न भवति; अन्यथाऽतिप्रसङ्गादित्याह—**अफल**मिति । अत्र प्रतिदृष्टान्तोऽप्यस्तीत्याह—**दृष्टा**विति । लोके च राज्ञामाज्ञानुवृत्तिप्रभृतिषु प्रीतिकोपौ दृष्टौ; इष्टौ च तौ फलदाविति सर्वेषाम् । एवं शास्त्रदृष्टत्वात्तावेव प्रीतिकोपौ फलदौ भवतः । अतस्तदुपगतिरेव भवतोऽपि समीची । एवं प्रमाणदृष्टान्ताभ्यां प्रतिपन्नस्यार्थस्य परित्यागे सर्वस्यापि प्रामाणिकत्वेन दृष्टस्यार्थस्य परित्यागः स्यादित्याह—**त्यक्ति**रिति ॥ ८७ ॥ **इति कर्मणां स्वयं फलदत्वौचित्यभङ्गः ॥**

448. **प्रध्वस्तं कर्म कालान्तरभवितृफलासाधकं तल्लिङादे-**
र्वाच्योऽर्थः स्थायि कार्यं न यदि कथमिवान्वेतु कामी नियोज्यः ।
तच्चापूर्वं प्रधानं फलजनकमपि स्यान्नियोज्यप्रसिद्ध्यै
नित्ये नैष्फल्यमस्येत्यभिदधुरपरे तेऽपि निर्धूतकल्पाः ॥ ८८ ॥

एवं कल्प्यापूर्वपक्षं निराकृत्य वाच्यापूर्वपक्षेऽपि **प्राभाकरोक्ते** दूषणं तुल्यमित्यतिदिशति—**प्रध्वस्त**मिति ॥ इत्थं किल वाच्यापूर्ववादिनामाशयः—चिरध्वस्तं किल कर्म कालान्तरभावि फलसाधनं न भवति । तल्लिङादेर्वाच्योऽर्थः कालान्तरभाविफलसाधकं स्थायिकार्यमपूर्वं भवितुमर्हति । इत्थं न यदि स्वर्गकामी नियोज्यः कथमस्मिन्वाक्येऽन्वयमर्हति? अन्विताभिधानं हि वाक्यकृत्यम्; न खल्वनन्वितमर्थं कदाचिदपि वाक्यमभिधत्ते । तच्चापूर्वं स्वप्राधानम्; न

पुनः कौमारिलकल्पनायामिव द्वारमात्रम्। तच्च भृत्यपोषणन्यायेन नियोज्यप्रसिद्ध्यै फलजनकमपि स्यात्। राजा हि स्वकार्यनिर्वाहाय भृत्यान् पोषयति। एवमपूर्वमपि स्वप्रसिद्ध्यै स्वर्गादिकं नियोज्यफलं प्रयच्छति। न च वाच्यं कामाधिकारे अपूर्वमस्तु, नित्ये फलाभावादपूर्वं मा भूदिति; एकत्र निर्णीतस्य शास्त्रार्थस्यान्यत्राप्यविशेषात्। कामाधिकारे लिङ्वाच्यतया स्वप्राधान्येनापूर्वे निर्णीते नित्ये फलाभावेऽपि तदेवापूर्वं लिङ्वाच्यं स्यात्। अन्यथा लिङो वैयर्थ्यं स्यात्; अर्थान्तरकल्पनेनानुवृत्तार्थाभावेन वैरूप्यं स्यादिति। अस्मिन्मते विशेषेण दूष्याभावादेतेऽपि पूर्वोक्तेन कल्पेन निर्धूता इत्याह—त इति। तुल्यं खल्वेतेषां श्रुतदेवताप्रीत्यादि[भा]हानं कल्पनागौरवं चेति भावः॥ ८८॥

इति वाच्यापूर्वपक्षेऽपि कल्प्यापूर्वपक्षोक्तदूषणातिदेशः॥

449. **कृत्युद्देश्यं सुखादि स्वत इह न परं स्यादनन्यार्थवेद्यं**
क्लृप्तिश्चान्यस्य हेतोरपि च परिहृतं तत्परत्वं श्रुतीनाम्।
नित्ये चापूर्वतोऽन्यत् फलमनघगिरस्सस्मरुर्दुस्त्यजं त-
न्नो चेत् स्वस्मिन्नियोगायुतमपि निपुणान्नैव शक्तं नियोक्तुम्॥ ८९॥

एवं परोक्तं वाच्यापूर्वं निरस्य तत्प्राधान्यवचनमपि निराचष्टे—**कृत्युद्देश्य**मिति॥ *कृतिसाध्यं प्रधानं यत् तत्कार्यमभिधीयते इति यत्प्राधान्यमुच्यते **प्रभाकर**मतानुवर्तिभिः, तत्सुखादेरिति दर्शयति—**सुखादि स्वत** इति। अतोऽपूर्वस्यानन्यार्थवेद्यत्वं न स्यादित्याह—**न परं स्यादनन्यार्थवेद्य**मिति। तदेवोपपादयति—**क्लृप्तिश्चे**ति। कालान्तरभाविस्वर्गानुकूलतयैव ह्यपूर्वं परिकल्प्यते वाच्यापूर्ववादिभिरपि। ननु कार्य एव वाक्यानां प्रामाण्यमुक्तम्? अस्माभिरपि तत्परिहृतमित्याह—**अपि चे**ति। किंच नित्ये कर्मणि निष्फलत्वं त्वयाऽभिधीयते; तच्चायुक्तम्, अपूर्वव्यतिरेकेणाकरणे प्रत्यवायपरिहारोत्तरकर्माधिकारादिकं फलमनघगिरः—मुनयः खलु सस्मरुः; तच्च भवताऽपि दुस्त्यजमित्याह—**दुस्त्यजं त**दिति। एवमनङ्गीकारे नित्ये कर्मणि नियोगस्य नियोगत्वमेव बंभज्येत, स्वयं प्रवर्तकत्वाभावादिति दर्शयति—**नो चे**दिति। स्वयमसुखात्मकस्य नियोगस्य सुखादिहेतुभावेनैव प्रवर्तकत्वं संघटते। तद्धेतुत्वाभावे सहस्रमपि नियोगाः प्रवर्तयितुं न शक्नुवन्तीत्यर्थः॥ ८९॥ **इति अपूर्वप्राधान्यभङ्गः॥**

450. **व्युत्पत्तिश्चेल्लिङादेः स्वयमवगमिते स्यान्मिथस्संश्रयादि-**
र्नान्यैरत्रानुभूतिः स्मृतिरपि न च वस्तद्द्वयान्यो विमर्शः।
अर्थापत्त्या मिते चेन्न गुरुमतमिदं मन्यसे तत्तथा चेत्
कल्प्येत द्वारमात्रं तदिति न खलु तद्वाच्यभावादिकल्प्यम्॥ ९०॥

एवं प्राधान्यं निरस्यापूर्वे लिङादेर्व्युत्पत्तिमपि निराकरोति—**व्युत्पत्ति**रिति॥ अयमत्र विकल्पः—किमज्ञातेऽपूर्वे लिङादेर्व्युत्पत्तिः, उत ज्ञाते? न तावदज्ञाते; व्याघातात्। ज्ञाते चेत् किं लिङैव ज्ञाते उतान्यज्ञाते? नाद्यः, अन्योन्याश्रयात्; तदिदमाह—**मिथःसंश्रयादि**रिति। ज्ञाते च व्युत्पत्तिः, व्युत्पन्ने चाभिधानम्, अभिधानाच्च ज्ञानमिति चक्रकमादिपदार्थः। अन्यैर्ज्ञातत्वे किमन्यदनुभूतिः, स्मृतिर्वा? न तावदनुभूतिः; प्रमाणान्तरागोचरत्वादपूर्वस्येत्याह—**नान्यैरत्रानुभूति**रिति। अनुभूतिपरतन्त्रत्वात् स्मृतिरपि नास्तीत्याह—**स्मृतिरपी**ति। तर्हि विमर्शज्ञानेन सिध्यतीति चेत्, तच्च नेत्याह—**न चे**ति। अनुभूतिस्मृतिव्यतिरेकेण विमर्शस्य उपपादयितुमशक्यत्वादित्यर्थः। तर्हि अर्थापत्त्या

प्रमितमिति पक्षान्तरमनुवदति—**अर्थापत्त्ये**ति । तन्निराकरोति—**न गुरुमतमिद**मिति । कल्प्यापूर्ववादिनः **कौमारिला** एव । तर्हि तन्मतमेवानुसराम इति पराभिप्रायमनुवदति—**मन्यस** इति । निराचष्टे—**कल्प्येते**ति । **कुमारिलमतानुसारे** कल्प्यापूर्वमेव स्वीकृतं स्यात् । तथा च वाच्यापूर्वसमर्थनाहङ्कारवादो भज्येतेति भावः ॥ ९० ॥ **इति अपूर्वविषय-लिङादिव्युत्पत्त्यनुपपत्तिः ॥**

451. **देवप्रीत्यादिकं वा विदितमिह विधिप्रत्ययस्यास्तु वाच्यं**
नात्रान्योन्याश्रयो न श्रुतपरिहरणं नापि क्लृप्तिर्गरिष्ठा ।
प्राधान्यं स्याच्च किञ्चिन्नृपभजननयात् सिद्धमेतच्च शास्त्रै-
रित्थं त्वर्थाविरोधेऽप्यतिगरिमभयान्नेष्यते शब्दशक्तिः ॥ ९१ ॥

यागादिगतं कार्यत्वमेव लिङ्वाच्यम्; तच्चेष्टस्य कृत्यधीनात्मलाभत्वमित्यादिकं **वेदार्थसंग्रहादौ** विस्तरेण व्याख्यातम् । तदतिरिक्तार्थवाच्यत्वकल्पनायामपि देवताप्रीत्यादिव्यतिरेकेण नान्यस्य कस्यचिदप्रामाणिकस्यापूर्वादिपदवाच्यस्य लिङ्वाच्यत्वं कल्पनीयमित्याह—**देवे**ति ॥ अस्त्वित्यन्वारुह्यवादत्वं द्योतयति—अतिरिक्तार्थवाच्यत्वेऽपि देव[ता]प्रीत्यादिकमेव वाच्यमस्त्वित्यर्थः । अस्मिन् पक्षे प्रागुक्ता दोषा न सन्तीत्याह—**नात्रे**ति । तान् गणयति—अन्योन्याश्रयः श्रुतहानमश्रुतकल्पनेति । किंच राजसेवान्यायेन राजप्रीतिप्राधान्यवदीश्वरप्रीतिप्राधान्यं चास्मिन् पक्षे वक्तुं शक्यत इत्याह—**प्राधान्य**मिति । न चैतत् केवलयुक्तिसिद्धम्; शास्त्रेणापि सिद्धमिति नियमयति—**सिद्धमेतच्च शास्त्रै**रिति । अतः *आप्तस्य हितकामस्य नियोगं केचिदूचिरे इत्युक्तप्रकारेण ईश्वरनियोगादिकस्य विधित्वे तस्य च लिङ्वाच्यत्वेऽपि नास्माकं कश्चिद्विरोधः । अथापि लिङ्वाच्यत्वे गौरवभयादिष्टस्य कृत्यधीनात्मलाभातिरेकेणार्थान्तरे शब्दशक्तिर्नेष्यत इति निगमयति—**इत्थ**मिति ॥ ९१ ॥ **इति अपूर्वस्य लिङादिवाच्यत्वेऽपि देवताप्रीत्याद्यनतिरेकः ॥**

452. **स्वव्यापारं विशेष्ये स्वयमभिदधते नैव शब्दाः कदाचित्**
श्रुत्वा लिङ्व्यापृतिं वा कुत इह यतनं स्वोपयोगाद्यबोधे ।
तस्मादास्माकतत्तद्यतनकृदभिधा स्वस्य वाच्या लिङादे-
रित्युक्तिं बह्ववद्याममनिषत बुधास्त्रस्तरीमात्ररूपाम् ॥ ९२ ॥

उक्तार्थस्थेम्ने **कौमारिलोक्तां** शब्दभावनाया लिङ्वाच्यतामुन्मूलयति—**स्वव्यापार**मिति ॥ लिङ्व्यापारः—शब्दभावना । तामेवाभिदधाति लिङ्प्रत्ययः, लिङ्व्यापारप्रतिपत्तिरेव पुरुषं प्रवर्तयतीति भावनावाक्यार्थवादिनः । अत्रोभयमपि न संघटते । न खलु शब्दाः कदाचिदपि स्वव्यापारं स्वयमेवाभिदधते । अभिधेयानुबन्धिनी खल्वभिधा; अभिधेयाश्च घटादयः । एवं लिङभिधानमप्यभिधेयार्थानुबन्धित्वान्न स्वात्मानं विषयीकरोति । इत्थं लिङ्व्यापारस्वरूपप्रतीतिः प्रवृत्तिं न करोति । नहि लिङ्व्यापार इति बुध्वा कश्चित् प्रयतते; स्वोपयोगादिबोध एव हि सर्वत्र प्रवर्तकः । इत्थमर्थतत्त्वं निष्कृष्य परोक्तप्रक्रिया परिहासमात्रपदमित्याह—**तस्मा**दिति । आस्माकतत्तद्यतनकृत्—अस्मदीयतत्तद्यागादिप्रयत्नरूपार्थभावनामुत्पादयति केवलं लिङभिधा । शब्दभावना शब्दाभिधेया स्वस्य लिङादेर्वाच्येत्युक्तिं बह्ववद्यां—श्रुतहानाश्रुतकल्पनानैरर्थक्यादिबहुदोषदुष्टां बुधास्त्रस्तरीमात्ररूपाममनिषत । त्रस्तरी—परिहासः ॥ ९२ ॥ **इति शब्द-भावनाया लिङादिवाच्यत्वभङ्गः ॥**

453. न स्यात् पुंसः प्रवृत्त्यै विदितमपि गिरा स्वेष्टहेतुत्वमात्रं
दुस्साधादावयोगादथ सहकुरुते साध्यतैकार्थयोगः ।
इत्थं शक्तिर्द्वये स्याद्गरिमहतमिदं किञ्चिदत्रार्थतश्चे-
दिष्टोपायत्वमर्थादुचितमिह ततः खण्डिता मण्डनोक्तिः ॥ ९३ ॥

तर्हि मा भूच्छब्दभावना लिङर्थः, इष्टसाधनत्वमेवास्त्विति **मण्डनः** । तत्पक्षमपि प्रतिक्षिपति—**न स्यादि**ति ॥ गिरा विदितमपि हीष्टसाधनत्वं पुरुषाणां प्रवृत्त्यै न भवत्येव । तत्र हेतुमाह—**दुस्साधादावयोगा**दिति । न हि दुस्साधादाविष्टसाधनत्वं प्रतिपन्नमपि पुरुषं प्रवर्तयति । तर्हि न केवलमिष्टसाधनत्वमस्तु प्रवृत्तिकारणम्; तस्य सहकुरुतां साध्यत्वमित्याशङ्कते—**अथे**ति । अत्रोत्तरम्—**इत्थ**मिति । इष्टसाधनत्वं साध्यत्वं चोभयमपि शब्दार्थ इति परिकल्पने गौरवं स्यादित्यर्थः । अत्र शङ्कते—**किंचि**दिति । गौरवपरिहारार्थमिष्टसाधनत्वसाध्यत्वयोरन्यतरस्यार्थत्वं स्यादिति भावः । तर्हीष्टसाधनत्वमेवार्थं कार्यत्वं पुनश्शाब्दमेव स्यादिति नेष्टसाधनत्वस्य शाब्दत्वसिद्धिरित्याह—**इष्टोपायत्व**मिति । अन्तरङ्गं खलु प्रवृत्तेरिष्टोपायत्वात् कार्यत्वम् । अयमिष्टोपायः अतः कार्यमिति कार्यबुद्ध्यैव प्रवर्तन्ते पुरुषा इति लोकसिद्धमेतत् । अतः खण्डिता **मण्डनोक्तिः** ॥ ९३ ॥ **इति लिङादेरिष्टसाधनतार्थत्वभङ्गः ॥**

454. धात्वर्थस्यैव रूपं किमपि हि कथयन्त्यत्र सर्वे लकाराः
कर्तृव्यापारसाध्यं त्वभिदधति विधिप्रत्ययास्तल्लिङाद्याः ।
वैघट्यं द्वारसिद्धिः प्रशमयति तथा सन्ति लोकोक्तिभेदा-
स्सिद्धं शब्दानुशिष्ट्या त्विदमुचितमिति स्थापितं भाष्यकारैः ॥ ९४ ॥

स्वपक्षे लिङाद्यर्थं निष्कृष्याचष्टे—**धात्वर्थस्ये**ति ॥ द्वयं खलु शब्दार्थनिर्णयकारणं विशिष्टप्रयोगो व्याकरणं चेति । उभयमप्यस्मत्पक्षानुकूलम् । लडादयो लकारास्सर्वेऽपि धात्वर्थस्यैव वर्तमानत्वभूतत्वादिकं किमपि रूपमभिदधति । एवं लिङादयोऽपि धात्वर्थस्यैव यागादेः कर्तृव्यापारसाध्यत्वमभिदधतीति समुचितमेतत् । ननु कथं कालान्तरभाविस्वर्गकामस्य चिरध्वस्तो यागः काम्यफलसाधनमिति शङ्काऽवशिष्यते । तदपि देवताप्रीत्यादिद्वारसिद्धिः प्रशमयतीत्याह—**वैघट्य**मिति । अयं चार्थो राजसेवादौ लोकोक्तिसंवादवानित्याह—**तथे**ति । अयमर्थो न लोकप्रसिद्धिमात्रपरिग्राह्यः, व्याकरणानुकूलत्वाद्विशेषेण परिग्राह्य इति **भाष्य**संमतिमाचष्टे—**सिद्ध**मिति ॥ ९४ ॥

455. इष्टस्वर्गादिकस्य त्वितरदपि यदा साध्यमुक्तं तदाऽर्थात्
सिद्धं तत्साधनत्वं सुगममिह तदाऽनर्थकत्वं निषेध्ये ।
नित्यत्वेनोपदिष्टेष्वकरणमपि तत्तुल्यमेवार्थलब्धं
सामान्यात् प्राप्तमेतत् फलनियतिरपि व्यज्यते तत्तदुक्त्या ॥ ९५ ॥

ननु स्वर्गकामस्य यागादिस्साध्यतया विधीयत इति हि भवतोच्यते । यागादेरिष्टसाधनत्वं साक्षान्नोच्यते । कथं तर्हि यागादेरिष्टसाधनत्वसिद्धिः ? कथं वा पुनरपगोरणादेरनिष्टसाधनत्वसिद्धिः ? इत्याशङ्क्य परिहरति—**इष्टे**ति ॥ अर्थात्सिद्धं तत्साधनत्वं, शाब्दं कार्यत्वमार्थमिष्टसाधनत्वम् । एवमपगोरणादावपि शाब्दमकार्यत्वमार्थं निषिध्यमानस्यानिष्टसाधनत्वमिति विभागः । एवमकृत्यकरणेऽनर्थकृत्त्वमुक्तम् । तथा कृत्याकरणेऽप्यनर्थकृत्त्वप्रतिपत्तिरार्थतुल्येत्याह—

नित्यत्वेति । नित्यस्य कर्तव्यत्वं शाब्दं नित्याकरणस्यानर्थक्तत्वमार्थमित्यत्रापि विभागः । एतत्सर्वं सामान्येनार्थतत्त्व-वर्णनम् । इदमेतत्फलं ददाति; एतस्य चानुष्ठाने सति अयमर्थः इत्यादिर्विशेषस्तत्तच्छास्त्रोक्त्याऽवगन्तव्य इति दर्श-यति—**फलनियतिरि**ति ॥ ९५ ॥ **इति लिङाद्यर्थनिष्कर्षः** ॥

456. **सन्ति ह्यन्ये लिङर्थाः कथयितृपुरुषाकूतभेदास्तथाऽत्रा-**
प्याप्तस्याहुर्नियोगं हितमभिलषितं केऽपि भाष्याशयस्थम् ।
शास्त्राज्ञाचोदनात्वं श्रुतिषु विधिपदैरन्वितत्वं नञोऽपि
स्वादेशे चावधूते भवति समुचितः प्रत्यवायः स्वतन्त्रात् ॥ ९६ ॥

इष्टस्य कृत्यधीनाऽमलाभत्वमिति स्वपक्षे लिङ्वाच्यत्वं दर्शयित्वा स्वपक्षनिष्ठानामेव केषांचिदीश्वरनियोगरूप-विधिपक्षं विविच्य दर्शयति—**सन्ति ही**ति ॥ * विधिनिमन्त्रणेत्यादौ विधिः प्रेषणमित्यादयः कथयितृपुरुषाभिप्रायभेदा लिङर्थत्वेन प्रतिपादिताः । तथाऽत्राप्याप्तस्य हितकामस्य नियोग एव विधिरिति **भाष्यकारा**भिप्राय इति केचिन्मन्यन्ते । तच्च वयं न प्रतिक्षिपामः; * श्रुतिस्मृती ममैवाज्ञेति, * शास्ता विष्णुरशेषस्येति भगवदाज्ञारूपत्वं चोदनाया युज्यते । अ[त्र]तः श्रुतिषु विधिपदैरन्वितत्वं शासितुराज्ञा चोदनारूपत्वमेव । नञोऽपि—नञ्प्रयोगाच्च भगवदाज्ञायामवधूतायां स्वतन्त्रात्—भगवतस्समुचितः प्रत्यवायो भवतीत्युच्यते; तदिदमाह—**नञोऽपी**ति ॥ ९६ ॥ **इति वक्तृनियोगस्य लिङादिवाच्यत्वपक्षः** ॥

457. **षाड्गुण्यस्यैव कुक्षौ गुणगण इतरः श्रीसखस्येव विश्वं**
षट्स्वन्ये ज्ञानशक्त्योर्विततय इति च व्यक्तमुक्तं हि तज्ज्ञैः ।
निस्सीमानन्दभावस्थिरचरचिदचिच्छासनप्रेरणाद्या
ऐशानज्ञानधर्माः कतिचन नियताः केचिदागन्तवश्च ॥ ९७ ॥

एवं विश्वनियन्तुरीश्वरस्य, * तवानन्तगुणस्यापि षडेव प्रथमे गुणाः । यैस्त्वयैव जगत्कुक्षावन्येऽप्यन्तर्निवे-शिताः ॥ इत्युक्तक्रमेण षाड्गुण्यस्यैवावान्तरभेदास्सर्वे गुणा इत्याह—**षाड्गुण्यस्ये**ति ॥ तस्य चेश्वरस्य केचिद्गुणा नि-स्सीमानन्दादयो ज्ञानावस्थाभेदा नियता नित्यसिद्धाः; केचित्तदातदा संकल्पविशेषादयश्च [इतरैरागन्तुत्वेनावधृता] आगन्तव इति विभागोऽस्तीत्याह—**निस्सीमे**ति ॥ ९७ ॥ **इति षाड्गुण्यनिरूपणम्** ॥

458. **हेतोः कार्योपयुक्तं यदिह भवति तच्छक्तिशब्दाभिलप्यं**
तच्चामुष्य स्वधर्मस्तदितरदपि वाऽपेक्षितत्वाविशेषात् ।
विश्वं तद्विष्णुशक्तिर्मुनिभिरभिदधे तत्रतत्रोपयोगा-
दन्या सर्वाद्भुतैकोदधिरगणि न सा तत्स्वरूपादिमात्रम् ॥ ९८ ॥

एवं गुणानां विभागमुक्त्वा शक्तेः स्वरूपं शोधयति—**हेतोरि**ति ॥ कारणस्य कार्योपयोगी सहकारिकलापः शक्तिरित्युच्यते । तच्च स्वधर्मो वा भवतु, अन्यद्वा यत्किञ्चित्; अपेक्षितत्वाविशेषात् शक्तिरित्यभिधीयते । तदिद-माह—**हेतोरि**ति । इत्थं सामान्येन शक्तिशब्दार्थं प्रसाध्य * विष्णुशक्तिः परा प्रोक्तेत्यादिभिर्मुनिवचनैरभिहितामपि शक्तिमेव तल्लक्षणानुरोधेन व्याचष्टे—**विश्वं तदि**ति ॥ * समस्ताः शक्तयश्चैता नृप यत्र प्रतिष्ठिताः । तद्विश्वरूपवैरूप्यं

रूपमन्यद्धरेर्महत् ॥ इति या मूर्तिस्सर्वाद्भुतैकोदधिरगणि साऽपि स्वरूपविशेषणत्वात् शक्तिशब्दवाच्यतामर्हति ; न पुनस्सा स्वरूपमात्रम् । तस्मिन्नेव विग्रहे अस्त्रभूषणादिरूपेण समस्ताः शक्तयस्समाश्रिताः ; तद्विग्रहविशिष्टो भगवान् सर्वाधार इत्यर्थः ॥ ९८ ॥ **इति शक्तिशब्दार्थनिष्कर्षः ॥**

459. **यद्भ्रंशान्मन्त्ररुद्धो न दहति दहनश्शक्तिरेषाऽस्तु सोऽयं**
हेतुर्मन्त्राद्यभावस्स च गत इति तद्धेत्वभावाददाहः ।
शक्तेर्नाशे किमस्याः पुनरिह जनकं वृत्तिरोधस्तु युक्तो
वह्नेरित्यादिघोषो विरमति विदिते शब्दतश्शक्तितत्त्वे ॥ ९९ ॥

स्वरूपसहकारिव्यतिरिक्तशक्तेर्यद्धोषितं दूषणं न्यायवादिभिः, तदानुमानिकशक्तिकल्पने भवतु, *शक्तयस्सर्वभावानामित्याद्यागमसिद्धे शक्तितत्त्वे न दूषणमित्याह—**यद्भ्रंशा**दिति ॥ इत्थं किल शक्तिदूषणप्रक्रिया—यस्य प्रतिबन्धाभावस्य भ्रंशान्मन्त्ररुद्धो दहनो न दहति स एव प्रतिबन्धाभावः शक्तिरस्तु । स च प्रतिबन्धाभावो हेतुरेव ; प्रतिबन्धाभावविशिष्टस्य वह्नेर्दाहकत्वात् । तथा च मणिमन्त्रादिप्रतिबन्धे सति सामग्रीवैकल्यात् कार्याभावः, न तु तदतिरिक्तशक्त्युपरोधात् ; तत्कल्पनायां गौरवात् । तदिदमाह—**तद्धेत्वभावाददाह** इति । किंचातिरिक्तशक्तिकल्पनायां प्रतिबन्धकेन तन्नाशे पुनरुत्तम्भकावस्थायां किं तस्या जनकमिति वाच्यम् । उत्तम्भकमिति चेत्, अनियतहेतुकत्वप्रसङ्गः । उत्तम्भकसत्त्वेऽपि शक्तिर्न जन्यते चेत्, पुन[र्दा]र्दहनकार्यं न स्यात् । तदिदं सर्वमभिप्रेत्याह—**शक्तेर्नाश** इति । तर्हि प्रतिबन्धकेन शक्तिर्न नश्यति किं तूपरुध्यत इति चेत्, तर्हि वह्निरेवोपरुध्यताम् ; किमनेन [शक्तिकल्पनेन] गुरुतरेणेत्याह—**वृत्तिरोधस्तु युक्तो वह्ने**रिति । अयं दूषणवादः शब्देतरप्रमाणगम्यायां शक्तौ [युक्तः] ; शक्तितत्त्वे शब्दगम्ये सति न युक्त इत्याह—**इत्यादिघोष** इति ॥ ९९ ॥ **इति शक्तिदूषणपरिहारः ॥**

460. **शब्दादिष्वस्ति शक्तिर्यदि कथमिव न द्रव्यतैषां गुणित्वे**
सा चेन्नास्त्येषु कार्यं किमपि कथमितः स्यादितीदं न युक्तम् ।
शक्तिश्शक्ता न वेति स्वयमवमृशतः स्वोक्तदोषप्रसङ्गे
निस्तारश्चेत्स्वभावात् फणिमरणमिह प्रस्तुते किं प्रवृत्तम् ॥ १०० ॥

अत्र शक्तिमद्द्रव्येषु स्वरूपरूपामुपपादयति—**शब्दादिष्वि**ति ॥ इयमत्र पूर्वपक्षप्रक्रिया—शब्दादिषु शक्तिर्यद्यस्ति, कथमिव तेषामद्रव्यता, शक्त्याश्रयत्वेन तेषां गुणित्वात् ? यदि शब्दादीनां शक्त्याश्रयता नास्ति, तर्हि शब्दादिभिः कार्यं किमपि कथं स्यादिति । तदयुक्तमित्याह—**इदं ने**ति । तदेतद्विवृणोति—**शक्तिरि**ति । अयमत्र विकल्पः—किं शक्तितत्त्वमेव द्रव्येष्व[प्य]पलपसि ? अथवा शब्दादीनामद्रव्याणां शक्तिर्नास्तीति ? पूर्वत्र क्वचिदपि कार्यसिद्धिर्न स्यादिति व्याघातः । तथा च भवताऽप्यङ्गीकार्या शक्तिः । तथा च सा शक्तिर्यथा शक्त्यन्तरमन्तरेणापि कार्योपयोगिनी, एवं शब्दादयोऽपि स्वगतशक्तिमन्तरेणापि स्वरूपसहकारिभ्यामेव कार्यं कुर्वते, अन्यथाऽनवस्थाप्रसङ्गादिति । **फणिमरणमिहे**त्यादि । यथा शक्तेश्शक्त्यन्तराभावः, स तु शब्दादावपि तुल्य इत्यर्थः ॥ १०० ॥ **इति अद्रव्याणां स्वरूपशक्तिमत्त्वम् ॥**

461. **बाह्याक्षादेरवृत्तौ चिरविदितमपि स्मर्यते येन सोऽयं**
संस्कारस्तुल्यदृष्टिप्रभृतिसहकृतश्चेतसस्साह्यकारी ।

नासौ पूर्वानुभूतिः कथमुपकुरुतां सा पुरैव प्रनष्टा
तुल्यादेर्नापि दृष्टिः कथमनवगते सा स्मृतिं नैव कुर्यात् ॥ १०१ ॥

इत्थमद्रव्येषु स्वरूपातिरिक्तां शक्तिं निराकृत्य स्मृतिहेतुसंस्कारं स्वरूपाद्यतिरिक्तं साधयितुमुपक्रमते—**बाह्येति** ॥ स्मृतिज्ञानस्य तावदिन्द्रियार्थसन्निकर्षादिकं न साधनम्; तदभावेऽपि चिरविदितमपि येन स्मर्यते स एव हि संस्कार इत्युच्यते। स च तुल्यदर्शनादिसहकृतश्चित्तस्य सहकारी भवति, यथाऽऽहुः—* सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः इति। अयं चागन्तुकधर्मः पूर्वानुभूतिरेवेति न वक्तुं शक्यते; तस्याः पुरैव नष्टत्वेनोत्तरकालानुपकारकत्वात्। तदिदमाह—**कथमुपकुरुता**मिति। तर्हि तुल्यदर्शनादिकमेवाधुनिकसंस्कारोऽस्त्विति च वक्तुं न शक्यते; अनवगतेऽप्यर्थे स्मृतिप्रसङ्गात्। न हि पूर्वानुभवजनितसंस्कारमन्तरेण सदृशदर्शनादिकं कदाचिदपि स्मृतिं कुरुते ॥ १०१ ॥

462. **यज्जन्यां संस्क्रियां यत् किमपि नियमतो बोधयिष्यत्यदृष्टं**
तत्तद्वेद्यावलम्बिस्मृतिमुपजनयेत् संमतं च द्वयोस्तत्।
न ह्यन्यद् दृश्यतेऽत्र क्वचन तदधिके कल्पिते गौरवं स्या-
दित्युत्प्रेक्षा न युक्ता न हि परजनिते क्वापि तत्संस्क्रियोक्तिः ॥ १०२ ॥

तर्हि यज्जन्या संस्क्रिया युष्मत्पक्षे येन सदृशदर्शनादिना नियमेनानुबोध्यते तदेव सदृशदर्शनादिकं तद्वेद्यालम्बिनीमेव स्मृतिमुपजनयेदित्याह—**यज्जन्या**मिति ॥ तथा चाननुभूते स्मृतिप्रसङ्गो नास्ति; संमतं च द्वयोरपि वादिनोस्सदृशदर्शनादि। तदिदमाह—**संमतं** च **द्वयोस्त**दिति। न च दृष्टत्वादधिकस्संस्कारोऽङ्गीक्रियत इत्याह—**न ही**ति। अधिककल्पनायां गौरवमपि प्रसञ्जयति—**तदधिक** इति। तदेतद् दूषयति—**उत्प्रेक्षा न युक्ते**ति। तदुपपादयति—**न ही**ति। लोक एव हि व्यवहारे निदानम्। लोके हि तत्तत्क्रियाजन्यातिशयविशेष एव संस्कारव्यवहारः प्रवर्तते; न पुनर्यस्मिन्कस्मिंश्चित् सहकारिमात्रे। तेन सदृशदर्शनादिमात्रे संस्कार इत्ययं लोकव्यवहारविरुद्ध इत्यर्थः। न च पूर्वानुभवप्रध्वंसमात्रमेव संस्कार इति वाच्यम्; तस्य परपक्षे नित्यत्वेन संस्कारप्रमोषाभावप्रसङ्गात्, अस्मत्पक्षे ध्वंसस्य भावरूपत्वेन पर्यायेण भावस्यैवाभिधानाच्चेति ॥ १०२ ॥ **इति स्मृतिहेतुसंस्कारनिरूपणम् ॥**

463. **बुद्धेरर्थेषु पूर्वप्रसरणजनितस्तेषु भूयोऽवगाहे**
संस्कारः कारणं तन्मतिगत उचितस्सोऽत्र धीद्रव्यपक्षे।
आत्माधारस्य तद्धीप्रसरजनकताक्लृप्तिरौचित्यहीना
धीनिष्ठेनैव तेन ह्युचितमविकृतेरात्मनः कुण्ठतादिः ॥ १०३ ॥

इत्थं संस्कारसद्भावमुपपाद्य तस्य बुद्धिनिष्ठत्वमुपपादयति—**बुद्धेरि**ति ॥ द्रव्यं हि बुद्धिस्स्वार्थेषु प्रसरतीत्यस्मत्सिद्धान्तः। तेन बुद्धेः पूर्वप्रसरणजनितो भूयो ग्रहणकारणं संस्कार इति सिद्धम्। तथा च तस्य बुद्धिनिष्ठत्वमेव समुचितम्। तदिदमाह—**मतिगत उचितस्सोऽत्र धीद्रव्यपक्ष** इति। आत्माधारत्वं संस्कारस्य किं न स्यादिति परिचोद्यात्मनिष्ठस्य संस्कारस्य धीविकासहेतुत्वेऽनौचित्यमाह—**आत्मे**ति। धीनिष्ठेनैव तेन—संस्कारेण आत्मनः कुण्ठत्वमकुण्ठत्वं च वक्तुमुचितम्, अविकारत्वादात्मन इत्याह—**धीनिष्ठेनैवे**ति। अयमर्थः—आत्मा निर्विकारः; सविकारं च

धर्मभूतज्ञानम्; तच्चात्मनो नित्यासाधारणधर्मः। तेन धर्मभूतज्ञानगतास्सर्वे विकाराः ज्ञानद्वारा ज्ञानाश्रयात्मपर्यन्तं व्यवह्रियन्त इति ॥ १०३ ॥ इति **अनुभवजन्यसंस्कारस्य बुद्धिनिष्ठत्वम्** ॥

464. **शीघ्रं यातीति कर्मातिशयसमधिको दृश्यते कुत्र वेग-**
स्तद्भेदैर्वेगभेदं कथयसि च समस्तीव्रमन्दक्रमादिः।
तत्कर्मत्वाद्विगीते प्रथमवदुचिता तद्गुणोत्पन्नता चेत्
बाधो नास्मिन्विपक्षे गुणपरिषदि वा कर्म सत्तत्त्वतः स्यात् ॥ १०४ ॥

ये तु वेगस्य कर्मातिरिक्तत्वं साधयन्ति, तन्मतं प्रतिक्षिपति—**शीघ्र**मिति ॥ शीघ्रं यातीति कर्मातिशयविशेषादितरो वेगः कुत्रापि न दृश्यते। भवानपि कर्मभेदैर्वेगभेदं कथयति। तथा च यादृशकर्मभेदात् वेगभेदः परिकल्प्यते स एव कर्मभेदो वेग इत्युच्यताम्, तीव्रमन्दादिभेदस्य कर्मण्यपि समानत्वादित्याह—**समस्तीव्रमन्दक्रमादि**रिति। तर्ह्यधिकं वेगमनुमानेन साधयामः—शरादिगतं द्वितीयादिकर्म शरगुणोत्पन्नम् तत्कर्मत्वात् तन्निष्ठप्रथमकर्मवदिति। कर्म हि प्राथमिकं, यथा संयोगादुत्पद्यते, एवं द्वितीयादिकर्मणां शरगुणोत्पन्नत्वे तद्गुणो वेगस्सिध्यतीति चेत्, तदिदं निराकरोति—**बाधो नास्मिन्विपक्ष** इति। कर्मणः कारणमात्रमेवापेक्षितम्; तत्तु कारणं गुण एवेति न निर्बन्धे कारणमस्ति; शब्दाच्छब्दान्तरवत् पूर्वकर्मणाऽप्युत्तरकर्मोत्पत्तौ विरोधाभावात्। कल्पनालाघवमत्रानुग्राहकम्। अथवा द्रव्यान्यत्वेन कर्मापि गुणपरिषदि निक्षिप्यताम्। तथा च कर्म तद्गुणोत्पन्नमिति साध्यनिर्देशे सिद्धसाध्यता च वक्तुं शक्येतेत्याह—**गुणपरिषदि वे**ति ॥ १०४ ॥ इति **कर्मातिशयातिरिक्तवेगक्लृप्तिभङ्गः** ॥

465. **शाखाकोदण्डचर्मप्रभृतिषु सति चाकर्षणादौ कुतश्चिद्**
भूयः स्वस्थानयानं भवति स तु गुणः स्यात् स्थितस्थापकश्चेत्।
मैवं संस्थानभेदस्स भवतु नियतो यद्विशिष्टे त्वसौ
तेन द्रौत्यं विलम्बो विरतिरपि परावर्तने जाघटीति ॥ १०५ ॥

वेगातिरिक्तं स्थितस्थापकाभिधानं संस्कारमपि कल्पयन्त्यल्पबुद्धयः। तन्नेति वक्तुमनुवदति—**शाखे**ति ॥ शाखा-कोदण्डचर्मप्रभृतिष्वाकर्षणादौ सति कुतश्चित्कारणविशेषाद्भूयः स्वस्थानावस्थानं भवति। स तु कारणविशेषः स्थितस्थापक इति चेत्, मैवम्; नियतस्संस्थानविशेष एव स भवतु—स्थितस्थापको भवतु, यत्संस्थानविशिष्टे वस्तुन्यसौ—स्थितस्थापको भवद्भिः कल्प्यते। स्थितस्थापकविशेषाभावे परावर्तने द्रौत्यविलम्बादिकं कथमिति चेत्—तत्तत्स्थितस्थापकविशेषनियाम-केन तत्तत्संस्थानविशेषेणैव तज्जाघटीतीत्याह—**तेने**ति ॥ १०५ ॥ इति **संस्थानविशेषातिरिक्तस्थितस्थापकभङ्गः** ॥

§**466.** **प्राग्देशप्रापकोऽसौ किमिति नियमितो मेदिनीमात्रनिष्ठ-**
स्तोयाग्न्यादावदृष्टेरिति यदि न पृथिव्येकदेशेऽप्यदृष्टेः।

---

§ अत्र **नृसिंहराजीयम्**—त्यक्तश्लोको व्याख्यायते। **वैशेषिका** ऊचुः—स्थितस्थापकसंस्कारः पृथ्वीमात्रगत इति। तत्र नियामकाभावान्न नियम इति दूषयति—**प्राग्देशे**ति ॥ प्राग्देशप्रापकः—स्थितस्थापको मेदिनीमात्रनिष्ठ इति किमिति नियमितः? नन्वदर्शनान्नियमनमिति शङ्कते—**तोयाग्न्यादा**विति। तर्हि दर्शनाभावः पृथिव्यामपीति चोदयति—**पृथि-**

भूम्यंशे दृश्यते तत्फलमिति यदि नाबादिभेदेऽपि साम्यात्
भूपष्टम्भादिभेदादिदमिति च विपर्यासकल्पेऽप्यपायात् ॥ १०६ ॥

467. **केचिद्देशान्तराप्तेर्जनिमभिदधते कर्म या कर्मजेष्टा**
नेत्येकेऽम्भःप्रवाहस्थिरवपुषि झषे तत्प्रतीतेरभावात् ।
खादौ स्रोतःप्रदेशान्तरयुतिरुदके खादिदेशान्तराप्ति-
स्तुल्या तल्लौल्यदृष्टिः पयसि तदधिकं कर्म नालम्बते चेत् ॥ १०७ ॥

अथ कर्मस्वरूपं निरूप्यते—**केचिदि**ति ॥ केचिद्देशान्तरप्राप्तेरुत्पत्तिमेव कर्माभिदधते, न पुनस्तदतिरिक्तं कर्म । या खलु देशान्तरप्राप्तिः कर्मजन्येति परेषामिष्टा, न पुनस्तदतिरिक्तं कर्मोपलभ्यत इति भावः । लाघवं चात्र कारणम् । एके तदेतन्नेत्याहुः । तत्र हेतुमप्याहुः—**अम्भ** इति । न हि जलप्रवाहस्थिरवपुषि मत्स्ये सन्ततं समागच्छत्प्रवाह-संबन्धेऽपि कर्मप्रतीतिः; तेन जल एव कर्म प्रत्यक्षमुपलभ्यत इति भावः । किंच आगच्छति प्रवाहे गगनप्रवाहयोः परस्परसंबन्धाविशेषेण देशान्तरप्राप्तिस्तुल्या । अथापि लौल्यदृष्टिः पयसि, न पुनर्गगने चलत्वदृष्टिः । तस्मादुभयसं-बन्धाधिकं कर्मा[व]लम्बते लौल्यादृष्टिः; तेन देशान्तरप्राप्तेरधिकं कर्मेति भावः ॥ १०७ ॥ **इति कर्मनिरूपणम् ॥**

468. **कर्मत्वान्नाक्षयोग्यं विमतमिति यदि व्याप्तिशून्यं तदेत-**
द्योग्यत्वेऽपि ह्यदृष्टिस्सहकृदपगमादर्यमादिक्रियाणाम् ।
नो चेत्कर्मैव न स्यात् फलमपि हि भवेत्कर्महेतोस्त्वदिष्टात्
द्विष्ठत्वाद्वा फलस्य द्वितयमपि भवेत्कर्मवत्सर्वदा वः ॥ १०८ ॥

कर्मेति ॥ अत्र केचिदाहुस्सर्वेषामपि कर्मणां नित्यानुमेयत्वम् । देशान्तरप्राप्त्या ह्यनुमीयते कर्मेति; प्रयुञ्जते चैतदनुमानं—विप्रतिपन्नं कर्माप्रत्यक्षम् कर्मत्वात् परमाणुकर्मवदिति । तत्रोत्तरं—**व्याप्तिशून्य**मिति । कर्मणो नित्या-प्रत्यक्षत्वे न कुत्राप्यनुमानस्य व्याप्तिस्सिध्येदिति भावः । तर्हि सूर्यगमनादेरपि प्रत्यक्षत्वं स्यादित्यत्राह—**योग्यत्वेऽपि ही**ति । न हि योग्यास्सर्वेऽपि सहकार्यभावेऽपि गृह्यन्ते । व्यवहितविप्रकृष्टादीनामपि ग्रहणप्रसङ्गात् । सूर्यगमनादिकं तु दूरत्वान्न गृह्यत इति लोकप्रसिद्धमेतत् । कर्मणः प्रत्यक्षत्वं विपक्षे बाधकेनोपपादयति—**नो चे**दिति । यदि कर्म न प्रत्यक्षं तर्हि कर्मस्वरूपमेव न स्यात्; कर्मफलभूताया देशान्तरप्राप्तेरेव कर्मव्यवहारसिद्धेः । देशान्तरप्राप्तिरेव कथमिति चेत्त-त्राह—**फलमपि हि भवेत्कर्महेतो**रिति । त्वदिष्टात् कर्मकारणादेव देशान्तरप्राप्तिरस्तु; किमन्तर्गड्डुना कर्मणेति भावः । किंच मल्लयोर्मेषयोर्वा परस्परसंयोगस्य उभयकर्मजत्वात् तद्दृष्टान्तेन स्थाणुश्येनसंयोगस्याप्युभयकर्मजन्यत्वं स्यात् । प्रत्यक्ष-विरोधस्तत्रेति चेत्, हन्त! तर्हि कर्मणः प्रत्यक्षत्वं भवतैवाभिहितमिति व्याघातमजानानस्य किमुत्तरं देयम्? ॥ १०८ ॥
इति सर्वकर्मणां नित्यानुमेयत्वभङ्गः ॥

469. **केचित्कर्मादिरूपं जगदुरसमवाय्याह्वयं हेतुभेदं**
किं तैरेवं निमित्ताश्रयमिह जनकं नानिमित्तं विभक्तम् ।

व्येकदेश इति । पाषाणादावदर्शनादिति भावः । ननु कोदण्डादौ क्वचिद्दर्शनात् पृथिव्यामेवेति न व्यवस्थासिद्धिः ॥ १०६ ॥ **इति अतिरिक्तस्थितस्थापकसद्भावेऽपि पृथिवीमात्रनिष्ठत्वनिरासः ॥**

तत्प्रत्यासत्तिमात्रं व्यभिचरति यदि स्वावक्लृप्तेऽपि तुल्यं
युक्त्या नैयत्यमत्रेत्यपि सममथवा स्वस्ति वः स्वैरवाग्भ्यः ॥ १०९ ॥

एवं कर्मप्रत्यक्षत्वमुक्त्वा कर्मादिष्वसमवायित्वेन व्यवहारभेदं प्रतिक्षिपति—**केचिदिति** ॥ इत्थं किल **वैशेषिकाणां** साङ्केतिको व्यवहारः—समवायिकारणं किंचित् । असमवायिकारणं चान्यत्; तच्च समवायिकारणप्रत्यासन्नम् । अपरं पुनरीश्वरकालादिकं निमित्तमिति । तत्प्रतिबन्द्या निराकरोति—**किं तैरिति** । यदि समवायिकारणप्रत्यासन्नमसमवायिकारणमिति कल्प्यते, तर्हि निमित्तकारणप्रत्यासन्नमनिमित्तकारणमिति चतुर्थं कारणं किमिति न कल्प्यते? अथ निमित्तकारणप्रत्यासत्तिमात्रमकारणेष्वपि विद्यमानत्वाद्व्यभिचारदुःस्थमिति चेत्; समवायिकारणप्रत्यासत्तिमात्रमपि व्यभिचारदुःस्थमित्याह—**स्वावक्लृप्तेऽपि तुल्यमिति** । न हि समवायिकारणप्रत्यासन्नानां सर्वेषामपि धर्माणामसमवायिकारणत्वं भवद्भिरुच्यते । **युक्त्या नैयत्यमत्रेत्यपि सममिति** । न वयमनवधृतसामर्थ्यानामसमवायित्वं वदामः, अपि त्ववधृतसामर्थ्यानामिति युक्त्या विशेषयाम इति चेत्; तर्हि वयमप्यनवधृतसामर्थ्यानामनिमित्तकारणत्वं न वदामः, अपि त्ववधृतसामर्थ्यानामिति समस्समाधिः । अतोऽसमवायिकारणवदनिमित्तकारणमिति चतुर्थोऽपि कल्पः कल्प्यताम् । तथा च भवतां स्वैरवाग्भ्यः स्वस्तीति साधिक्षेपमाक्षिपति—**अथवेति** ॥ १०९ ॥ **इति असमवायिकारणविभागक्लृप्त्यनौचित्यम्** ॥

470. कर्मोत्क्षेपादिभेदात् कतिचिदकथयन् पञ्चधा तच्च मन्दं
दिग्भेदात्तस्य भेदे दशविधमपि तत्कल्पनं सांप्रतं स्यात् ।
यत्किञ्चिद्भेदकाच्चेदनवधिकभिदा कर्महेतुध्रुवाच्चे-
दव्याप्तिर्बुद्धितश्चेदियमितरसमा संकरस्त्वत्र सह्यः ॥ ११० ॥

एवमसमवायिकारणत्वेनावस्थितकर्मप्रसङ्गे परेषां कर्मभेदक्लृप्तिरप्यसमञ्जसेत्याह—**कर्मेति** ॥ उत्क्षेपणादिभेदात् पञ्चविधत्वे तत्तद्दिग्भेदाद् दशविधत्वमपि किं न स्यात्? यत्किञ्चिद्भेदकात्पञ्चविधत्वं वदाम इति चेत्, यत्किंचिच्छब्दस्यानेकार्थत्वादनवधिकभेदः प्रसज्येत । कर्महेतुध्रौव्यात् भेद इति चेत्, तत्राप्यव्याप्तिरेव दूषणम् । न ह्येकत्र हेतुस्सर्वत्रान्वेति । केवलमुत्क्षेपणादिबुद्धिमात्रेण भेदश्चेत्, तर्हि इतरेष्वपि भ्रमणरेचनादिषु बुद्धिभेदोऽस्तीति तत्रापि नानात्वं प्रसज्येत । किंच बुद्धिभेदोऽपि न नियतः । गमनागमननिष्क्रमणप्रवेशनादिषु सङ्करस्यापि दृष्टत्वात् । अतस्तत्तदुपाधिभेदादानन्त्यमेव कर्मणो न तु पञ्चत्व[नियमः]मिति ॥ ११० ॥ **इति कर्मावान्तरभेदनिरूपणम्** ॥

471. मृत्स्वर्णादिप्रसूते भवति हि घटधीर्नान्यदन्यद् घटत्वं
नैकं बाध्यं समत्वात्तदिह परिहृतिः कुत्रचित्क्वापि योगः ।
पारापर्यं विरोधः परिहरणसमावेशनं चास्त्युपाधौ
तुल्यं चातिप्रसङ्गादिकमिति न यथादृष्टभङ्गः क्वचित्स्यात् ॥ १११ ॥

पूर्वस्मिन् ग्रन्थे सङ्करस्त्वत्र सह्य इति [जाति] सङ्करप्रसङ्गे न विरोध इत्युक्तम् । तदेव समर्थयते—**मृत्स्वर्णादीति** ॥ समाविष्टानां जातीनां परापरभावः, परस्परपरिहारेण वर्तमानानां विरुद्धानां जातीनां न समावेश इति केषांचित् सङ्केतो न्यायवादिनाम् । तेन सुवर्णादिघटादौ घटत्वमेव नास्तीति तेषामाशयः । तन्नोपपद्यते; अनुवृत्तधीरेव हि सर्वत्र जातिसद्भावे प्रमाणम् । तथा च यथा मृद्घटे घटधीरस्ति, एवं सुवर्णघटेऽपि घटधीरस्ति; तथा च मृत्स्व-

घटत्वयोः परापरभावानुपपत्तिः; सुवर्णस्य तैजसत्वेन भवद्भिः स्वीकारात्। ननु मृद्घटेऽन्यत् घटत्वं सुवर्णघटेऽन्यत् घटत्वमिति; तद्भवदङ्गीकृतानुवृत्तप्रतीतिविरुद्धमित्याह—**नान्यदन्यद्घटत्व**मिति। अस्तु तर्ह्येकं घटत्वं बाध्यताम्; तच्च न सङ्घटत इत्याह—**नैक**मिति। तत्र हेतुमाह—**समत्वा**दिति। यदि पार्थिवघटत्वं बाध्यं भवतामपसिद्धान्तः। यदि सुवर्णघटत्वं तच्च न, समत्वात्—यथा पार्थिवघटे घटत्वबुद्धिव्यवहारौ, एवं सुवर्णघटेऽपि घटत्वबुद्धिव्यवहारयोस्समत्वादित्यर्थः। पार्थिवघटस्य प्रचुरत्वान्मुख्यं घटत्वमिति चेत्, भारतवर्षव्यतिरिक्ते वर्षान्तरे सुवर्णघटस्यैव प्रचुरत्वात्तत्रैव मुख्यत्वं स्यादिति समस्समाधिः। तथा च पार्थिवत्वघटत्वयोः कुत्रचित् सुवर्णघटादौ परस्परपरिहृतिः कुत्रचित् मृद्घटादौ योग इति यथोपलम्भं स्वीकारान्न काचिदनुपपत्तिः। तर्हि गोत्वाश्वत्वयोरपि समावेशप्रसङ्ग इति चेन्न; उपलम्भस्यैव नियामकत्वात्। इयं खलु मर्यादा—केषांचित् पारापर्यं सत्त्वघटत्वादीनाम्, केषांचिद्विरोधः गोत्वाश्वत्वादीनाम्, केषांचित् परिहरणं समावेशनं च पृथिवीत्वघटत्वादीनाम्। यद्येवमप्यतिप्रसङ्गादिव्यवहारस्तदुपाधावपि तुल्यमिति प्रतिबन्द्या निराचष्टे—**उपाधा**विति। दृष्टत्वादुपाधौ न दोष इति चेत्, तज्जातावपि तुल्यमित्याह—**न यथादृष्टभङ्गः क्वचित्स्या**दिति। यथोपाधौ दृष्टत्वात् संकरः स्वीक्रियते, तथा जातावपि संकरः स्वीकार्य इत्यर्थः॥ १११॥ **इति परापरजातिसमावेशसंभवः॥**

472. जातिः प्राणप्रदात्री गुण इह तदनुप्राणिते भेद[कः]कं स्या-
 दित्याहुः केऽपि नेत्थं नियतिरुभयथाऽप्यर्थदृष्टेर्निशादौ।
 तेनान्वेष्टव्यभेदप्रतिनियतिमता केनचिन्निरूप्यं
 प्राप्ता यादृच्छिकीषु प्रमितिषु [तु] च यथादर्शनं तद्व्यवस्था॥ ११२॥

अत्र केचिज्जातिगुणयोरेवं वैषम्यमाहुः—या वस्तुनः प्राणप्रदात्री—प्रथमं प्रतीयते सा जातिः। गुणस्तु तदनुप्राणिते वस्तुनि भेद[कः]कं—विशेषको धर्म इति पश्चात् प्रतीयत इति। तदेतदनुपपन्नमित्याह—**नेत्थं नियति**रिति। तत्र हेतुमाह—**निशादावुभयथाऽप्यर्थदृष्टे**रिति। कदाचित् प्रथममेव जातिः प्रतीयते पश्चात्तद्गुणाः। कदाचित् पुनरन्धकारादौ सामान्यत एव शौक्ल्यादिगुणविशिष्टं वस्तु प्रतीयते, पश्चात्तद्विशेषो जातिरिति। तेनान्वेष्टव्यस्य पदार्थस्य पृथिव्यादेः प्रतिनियतिमता केनचिदसाधारणेन धर्मेण गन्धवत्त्वादिना निरूप्यं यत्पृथिवीत्वादिकं तत्सामान्यम्। ततश्च यादृच्छिकीषु प्रमितिषु विशेषविषयासु सामान्यविषयासु च यथादर्शनं पौर्वापर्यव्यवस्था भवति; तेन गवादिशब्दवाच्येषु प्रवृत्तिनिमित्तत्वेनोपादीयमानं गोत्वादिकं सामान्यमिति भावः॥ ११२॥ **इति स्वरूपनिरूपकादिविमर्शः॥**

473. भिन्नेष्वेकावमर्शो न तु निरुपधिकस्तेषु चैक्यं विरुद्धं
 ज्ञानाकारोऽपि बाह्यो न हि भवति न चासिद्धमारोपणीयम्।
 तस्माद् गोत्वादिबुद्धिव्यवहृतिविषयः कोऽपि सत्योऽनुवृत्त-
 स्तस्य त्यागेऽनुमादेः क्षतिरिति कणभुक्तन्त्रभक्ता गृणन्ति॥ ११३॥

वैशेषिकोक्तजातिपरिक्लृप्तिप्रक्रियां तन्मतपरिज्ञानाय शिष्याणामनुवदति—**भिन्नेष्वि**ति॥ इत्थं किल जातिं साधयन्ति—भिन्नेषु घटादिषु एकावमर्शो न निष्कारणः। तेन सामान्यमङ्गीकार्यम्। न च तेषु स्वरूपैक्यमस्ति विरुद्धत्वादित्याह—**तेषु चैक्यं विरुद्ध**मिति। ज्ञानाकार एव सामान्यमिति चेत्, बाह्यत्वेन प्रतिभासनात् तन्न युज्यत

इत्याह—**ज्ञानाकारोऽपि बाह्यो न हि भवतीति**। बाह्यं समारोपितं सामान्यमिति चेत्, तदपि न युज्यत इत्याह—**न चासिद्धमारोपणीयमिति**। अन्यत्र सिद्धं ह्यन्यत्रारोप्यम्। सामान्यस्य क्वचिदप्यसिद्धत्वात् आरोपणमपि न युज्यत इति भावः। तस्मात् गोत्वादिबुद्धिव्यवहृतिविषयः कोऽपि सत्योऽर्थो गवादिष्वनुवृत्तः। तस्य त्यागेऽनुमानादेः क्षतिः—व्याप्तिग्रहणाभावादनुमानं न स्यात्। आदिशब्देन सङ्केतग्रहणाभावादागमोऽपि न स्यादिति भावः। कणभुक्तन्त्रभक्ता गृणन्तीति पर[मत]पक्षप्रस्थानोपन्यासतां द्योतयति ॥ ११३ ॥ **इति परोक्तजात्यनुवादः ॥**

474. **मध्ये यद्यस्ति जातिर्मतिविहतमथो नास्ति भिन्ना भवेत् सा**
तस्मादन्यत्र वृत्तिर्न च सकलमतिः क्वापि कृत्स्नांशवृत्त्योः।
धर्मिध्वंसे तु धर्मस्थितिरपि न भवेन्नात्र गत्यादि च स्या-
दित्याद्यैर्बाह्यजल्पैरनितरगतिका संविदक्षोभणीया ॥ ११४ ॥

अत्र **सौगता** जातिं खण्डयन्तीत्यनूद्य तत्पक्षं प्रतिक्षिपति—**मध्य** इति ॥ इत्थं किल तेषां जातिखण्डनपरिपाटी—व्यक्तिद्वयमध्ये जातिर्यद्यस्ति मतिविहतम्—उपलम्भविरुद्धमित्यर्थः। अथ मध्ये नास्ति, भिन्ना सा जातिर्भवेत्। किंच कार्त्स्न्येन वा जातिर्वर्तते? एकदेशेन वा? आद्येऽन्यत्र व्यक्त्यन्तरे वृत्तिरेव न स्यात्। अंशेनोभयत्र वर्तते चेत्तत्र-तत्रोभयत्रापि सकलमतिर्न स्यात्—कार्त्स्न्येन जातिप्रत्ययो न स्यादित्यर्थः। किंच धर्मिरूपव्यक्तिध्वंसे धर्मरूपजाति-स्थितिर्न संघटते। ननु पूर्वगोव्यक्तिस्थाया जातेरुत्तरगोव्यक्तौ अद्रव्यत्वेन गमनेन संगतिर्न स्यात्। न च तत्रोत्पत्ति-स्संभवति; नित्यत्वेन जातेरङ्गीकारादित्याद्यैर्बाह्यजल्पैरनितरगतिका स्वारसिकबाधविधुरा जातिसंविदक्षोभणीयेत्यर्थः। *न याति न च तत्रासीदित्याद्युक्तिः प्रत्यक्षविरुद्धत्वाददूषणमिति भावः ॥ ११४ ॥ **इति सौगतोक्तजातिखण्डनपरिहारः ॥**

475. **अन्यापोहस्तु गोत्वप्रभृतिरिति तु नेदंतया तत्प्रतीते-**
रन्योन्यापोहबुद्ध्या नियतिरिति मिथस्संश्रयस्तत्प्रतीतौ।
विध्याक्षेपक्षमत्वाद्विषमसमतया बुद्धिनैयत्यसिद्धे-
श्शब्दार्थत्वादपोहो विमतिपदमिति व्याप्तिभङ्गादिदुःस्थम् ॥ ११५ ॥

इत्थं न्यायविदां जातिसमर्थनप्रकारमुक्त्वा सौगतोक्तमपोहरूपसामान्यं दूषयति—**अन्यापोह** इति ॥ अगोत्व-व्यावृत्तिर्गोत्वमनश्वत्वव्यावृत्तिरश्वत्वमिति नेदं युज्यते; इदंतया विधिरूपेणैव सामान्यप्रतीतेः। अन्योन्यापोहबुद्धिप्रतीतौ त्वन्योन्याश्रयप्रसङ्ग इत्याह—**अन्योन्ये**ति। गोत्वप्रतीतिसापेक्षमगोत्वमगोत्वप्रतीतिसापेक्षं गोत्वमित्यर्थः। कथं तर्हि गौरेव गौरिति बुद्धिनैयत्यम्? इत्थम्—गोत्वविरुद्धमश्वत्वं विधिरूपमेव गोत्वमाक्षिपति। एवं गोव्यतिरिक्तभावत्वमगोत्वमाक्षिपति। तत्र पूर्वं न्यूनत्वाद्विषमतया, उत्तरं सर्वभाववर्तित्वात्समतया; तेन गोत्वविरुद्धधर्मयोगादेव गौरेव गौरिति बुद्धिनियमसिद्धि-रित्यर्थः। तेन भावरूपविरुद्धधर्मसिद्धौ व्यवहारनियमार्थमपोहो न कल्प्य इत्यर्थः। ननु सर्वश्शब्दार्थोऽपोहात्मकः शब्दा-र्थत्वात् अघटशब्दार्थवदित्यनुमानं व्याप्तिशून्यत्वादिदुःस्थमित्याह—**शब्दार्थ**त्वादिति। नहि स्वलक्षणशब्दोऽपोहपर इति प्रतिबन्ध्यभिप्रायेण परिहारः ॥ ११५ ॥ **इति अपोहसामान्यवादभङ्गः ॥**

476. **युज्येतोपाधितश्चेदनुगतधिषणा तत्र नेष्टाऽन्यक्लृप्ति-**
स्तस्मात् संघातवर्गेष्ववयवरचनाभेदतोऽन्यन्न सिध्येत्।

सौसादृश्यात्तु जातिव्यवहृतिनियमस्तेन नातिप्रसक्ति-
र्नो चेन्मूर्तत्वमुख्यैस्त्वदभिमतिनयाद्व्यज्यतां जातिरन्या ॥ ११६ ॥

एवमपोहसामान्यं निरस्यासाधारणधर्मातिरिक्तं **वैशेषिका**द्युक्तं सामान्यं निराकरोति—**युज्येते**ति ॥ अनुवृत्तप्रत्यय-निर्वाहार्थं खलु सामान्यम्; साऽनुगतधिषणोपाधितश्चेत्तत्रान्यस्य सामान्यस्य क्लृप्तिर्नेष्टा । तस्मात् संघातवर्गेषु अवयव-रचनाभेदतोऽन्यत्—सामान्यं न सिध्येत् । संघातः—अवयविद्रव्यम् । सादृश्याज्जातिव्यवहारे न पुनरतिप्रसक्तिः, सौसा-दृश्यस्य विवक्षितत्वादित्याह—**सौसादृश्या**दिति । सौसादृश्यम्—अत्यन्तसादृश्यम् । एवमनङ्गीकारे सर्वत्रापि जातिसिद्धि-रित्यतिप्रसङ्गलक्षणं दूषणमाह—**नो चे**दिति । सौसादृश्यातिरिक्तजातिस्वीकारे गवादिशब्दवन्मूर्तादिशब्देष्वपि मूर्तत्वा-द्यभिव्यङ्ग्यजातिस्वीकारः स्यादिति भावः ॥ ११६ ॥ **इति संस्थानविशेषातिरिक्तगोत्वादिजातिभङ्गः ॥**

477. **जातेर्यद्व्यञ्जकं ते तदपि यदि मतं जातितस्संगृहीतं**
साऽपि व्यङ्ग्यान्यतस्स्यात्तदुपरि च भवेज्जातिसंस्थानमाला ।
स्वेनैव व्यञ्जकस्याप्यनुगतिरिति चेत्तर्हि जातिः किमर्था
व्यावृत्तानां स्वभावाद्यदि तदनुगतव्यञ्जकत्वं जितस्त्वम् ॥ ११७ ॥

अस्तु वा परिकल्पिता जातिः, तस्या व्यञ्जकत्वेन परि [कल्पितं] गृहीतं नोपपद्यत इत्याह—**जाते**रिति ॥ जाते-र्व्यञ्जकं यत्तदपि यदि जातितस्संगृहीतं—जात्यन्तरेण परिगृहीतम्, यदि वा न परिगृहीतम्? अपरिगृहीतत्वे तस्यानुवृत्त्य-भावात्परिगृहीतत्वमेव वाच्यम् । तथा च साऽपि जातिर्व्यञ्जकान्तरेण व्यङ्ग्या स्यात्; तच्च व्यञ्जकं जातिपरिगृहीतं भवेत्; साऽपि व्यञ्जकान्तरमपेक्षत इति जातिसंस्थानमाला स्यात्—जातितद्व्यञ्जकानवस्था स्यादित्यर्थः । अनवस्थापरिहारार्थं **स्वेनैव** व्यञ्जकस्य धर्मस्यानुगतिरिति चेत् तर्हि जातिः किमर्था? तेनैव स्वतोऽनुगतेन धर्मेण जातिकार्यनिर्वाहात् । तर्हि व्यावृत्ता एव धर्मा अनुगतां जातिं व्यञ्जयन्तीति चेत्, एवं तर्हि त एव व्यावृत्ता धर्मा अनुगतबुद्धिव्यवहारयोर्नि-र्वाहका भवन्तु, वस्तुस्वाभाव्यात्; तथा च निरर्थिकां जातिं कल्पयंस्त्वं विजितो भवसि । अयमत्र निर्णयः—यत्र जातिस्तत्र साक्षात्सामान्यमनुवृत्तव्यवहारहेतुः । यत्र पुनरुपाधिस्तत्र गुणक्रियादिनिष्ठं व्यवहितं सामान्यमनुवृत्तप्रतीतिहेतु-रिति हि न्यायविद्रहस्यम् । तथा च सति यत्सामान्यव्यवहितं तदुपाधिरूपगुणक्रियानिष्ठं स्वयमप्रतिपन्नं जातिप्रति-पत्तिहेतुर्न भवति । प्रतिपन्नं चेत् तत्प्रतिपत्तौ उपाध्यन्तरप्रतिपत्तिरवश्यंभाविनी । स चोपाधिर्जातिपरिगृहीतः । सा च जातिरुपाध्यन्तरप्रतिपत्तिमूलस्वप्रतिपत्तिरिति व्यवस्थितैवानवस्थितिः ॥ ११७ ॥ **इति परोक्तजातिव्यञ्जकानुपपत्तिः ॥**

478. **व्यावृत्तैर्व्यक्तिवन्न व्यवहृतिनियमस्साध्यता नानुवृत्तौ**
तद्धर्मस्यानुवृत्तौ मदभिमतमिह स्वीक्रियेतेति चेन्न ।
केचित्संस्थानभेदाः क्वचन खलु मिथो भान्ति सादृश्यरूपा-
स्तस्मादन्योन्यजैकस्मृतिविषयतया तच्चदेकावमर्शः ॥ ११८ ॥

व्यावृत्तैरिति ॥ अत्र कश्चिच्चोदयति—किं व्यावृत्तैरनुवृत्तैर्वा गवाद्यनुवृत्तव्यवहारनियमः? न तावद्व्यावृत्तैः, व्यक्तिवत्; न हि व्यक्तयोऽनुवृत्तव्यवहारं कुर्वन्ति । एवं व्यावृत्ता धर्मा नानुवृत्तव्यवहारनियमं कर्तुमर्हन्ति । अनु-वृत्तैर्धर्मैर्व्यवहारनियमश्चेत्, तदानीं साध्यत्वमेव नास्ति; अनुवृत्तनियामकधर्मस्वीकारात् । तदिदमाह—**साध्यता नानु-**

वृत्ताविति । ननु व्यावृत्ता एव धर्माः स्वयमनुवृत्तधर्मान्तरेण परिगृहीता गवादिव्यवहारमनुवृत्तं निर्वहन्तु । तन्न; प्रथममेव मदभिमतोऽनुवृत्तधर्मः स्वीक्रियेत, मध्ये किमेभिर्व्यावृत्तैः परिकल्पितैरिति चेत्तन्न; केचिद्धि संस्थानभेदाः क्वचन खलु मिथस्सादृश्यरूपा भान्ति । यैर्भवदीयं सामान्यमभिव्यज्यते त एव सौसादृश्यव्यवहारविषयभूतास्सामान्यव्यवहारं निर्वहन्तु । तस्मात्तेषां सर्वेषामन्योन्यसापेक्षैकस्मृतिविषयतया तत्तदेकावमर्शः—तत्तज्जातीयत्वावमर्श इत्यर्थः । अन्यथा भवतामपि जात्यभिव्यञ्जकोपाधिरूपसौसादृश्यनिरूपणाशक्तेर्जातिरप्युत्सीदेदिति हृदयम् ॥ ११८ ॥ **इति संस्थानजात्यनुपपत्तिपरिहारः ॥**

479. **सादृश्यस्यानुवृत्तौ भवति परमता जातिरेवान्यथा चे-**
त्तन्मूला नानुवृत्तव्यवहृतिरुचितेत्येतदप्यात्तसारम् ।
एकैकस्थं तु तैस्तैर्निरुपधिनियतैस्सप्रतिद्वन्द्विकं स्यात्
धर्माभावप्रतीतिप्रभृतिनियमवद्दुस्त्यजेयं व्यवस्था ॥ ११९ ॥

ननु कथं व्यावृत्तानां संस्थानानां नियतसादृश्यरूपत्वमित्यादिचोद्यमनूद्य परिहरति—**सादृश्यस्येति** ॥ इयमत्र चोद्यप्रक्रिया—किं सादृश्यमनुवृत्तं भवति तदा पराभिप्रेता सैव जातिः स्यात् । अन्यथा—अननुवृत्तं चेत्, तन्मूला—अननुवृत्तसादृश्यमूला अनुवृत्तव्यवहृतिर्नोचिता स्यात् । एतन्निराकरोति—**एतदिति** । तत्कथमित्यत्राह—**एकैकस्थमिति** । यद्यप्येकैकस्थं सास्नादिधर्मस्वरूपम्, तथाऽपि तत् निरुपधिनियतैः—स्वभावतो नियतैः तैस्तैः—सास्नादिभिरन्यनिष्ठैस्सप्रतिद्वन्द्विकं स्यात् । इदमेवान्योन्य[स]प्रतिद्वन्द्विकं रूपं सादृश्यशब्दवाच्यमभिधीयते । ननु कथं नियामकाभावे तेनैव धर्मेण स धर्मस्सप्रतिद्वन्द्विक इति नियमः स्यात्? स्वभावादेवेति ब्रूमः । स्वभावो हि नाम प्रामाणिकं स्वरूपमेव । यद्यथा प्रतीयते तत्तथैव स्वीक्रियत इति हि न्यायसंप्रदायः । तथा च सास्नादीनामेवान्योन्यसप्रतिद्वन्द्विकत्वम्; न पुनः केसरादीनाम् । केसरादीनां चाश्वादिषु अन्योन्यप्रतिद्वन्द्विकत्वमुपलब्धिनियमादेव स्वीकार्यम् । इत्थमुपलब्धिनियमानङ्गीकारेऽतिप्रसङ्गः । भवद्भिरप्ययं नियमोऽङ्गीकार्य इत्याह—**धर्माभावप्रतीतिप्रभृतिनियमवद्दुस्त्यजेयं व्यवस्थेति** । अग्नेरेवौष्ण्यं जलस्यैव शैत्यमित्यादिकमुपलम्भनियममन्तरेण नोपाध्यन्तरमपेक्षते । एवं घटाभावोऽपि घटप्रतियोगिक एव पटाभावस्तु पटप्रतियोगिक इत्युपलम्भादेव निषेध्यनिषेधकनियमः स्वीक्रियते । किंच घटव्यक्तीनामेव घटत्वजात्यभिव्यञ्जकत्वं न पुनर्घटपटव्यक्तीनाम्; नापि पटव्यक्तीनामिति नियतमेव दृष्टम् । एवमेकैकस्य सास्नादिधर्माः परस्परसप्रतिद्वन्द्विभावनियमेन सौसादृश्यशब्दार्थतां भजन्त इति निरवद्यम् ॥ ११९ ॥ **इति व्यावृत्तानां संस्थानानां सादृश्यरूपत्वम् ॥**

480. **सादृश्यं शक्तिसंख्याप्रभृति च कतिचिद्भिन्नमूचुर्गुणादेः**
स्यादत्रातिप्रसक्तिः प्रतिगुणमगुणीकारलिङ्गोपलब्धेः ।
साधर्म्यात् संग्रहश्चेत् सममिदमुभयोर्येनकेनापि यद्वा
किं दन्तादन्ति कृत्वा फलमिह बलिभुग्दन्तचिन्तान्तरेऽस्मिन् ॥ १२० ॥

अत्र केचित् शक्तिसंख्यासादृश्यादिकं गुणादेर्विभक्तमाहुः । तन्मतमनूद्य दूषयति—**सादृश्यमिति** ॥ तत्र हेतुमाह—**स्यादत्रातिप्रसक्तिरिति** । अतिप्रसक्तिं विवृणोति—**प्रतिगुणमिति** । यत्किंचिद्वैषम्यात् सादृश्यादीनां गुणादे-

विभागाङ्गीकारे सर्वेषामपि गुणानां प्रतिगुणमाकारभेदोपलब्धेर्गुणव्यतिरेककल्पनाप्रसङ्ग इत्यर्थः । उक्तप्रतिबन्द्याः परिहारमाशङ्कते—**साधर्म्या**दिति । गुणत्वनियामकसाधर्म्याद्गुणत्वेन संग्रहश्चेत्तदन्यत्रापि सममित्याह—**सममिदमुभयो**रिति । येनकेनापीत्यनादरः, भवत्कल्पितेनैव धर्मेणान्यत्रापि गुणत्वं वक्तुं शक्यत इत्यर्थः । अथवा सादृश्यादीनां पृथक्त्वापृथक्त्वचिन्तनं जीवपरमात्मयाथात्म्यज्ञानपरे त्रय्यन्तसिद्धान्ते काकदन्तपरीक्षावदनपेक्षणीयमित्याह—**यद्वे**ति ॥ १२० ॥ **इति सादृश्यादिपदार्थान्तरक्लृप्तिभङ्गः ॥**

481. **गन्धादौ सन्निवेशो न हि भवति न च द्रव्यभेदे निरंशे**
तस्माज्जात्याऽनुवृत्तव्यवहृतिरिति चेदुक्ततुल्योत्तरं तत् ।
तत्तद्वस्तुस्वभावाद् घटत इह मिथस्सप्रतिद्वन्द्विकत्वं
तज्जात्याधारतादेरपि तव नियतिस्तत्र न ह्यन्यतः स्यात् ॥ १२१ ॥

अत्र कश्चिच्चोदयति—**गन्धे**ति ॥ सौसादृश्यं जातिरिति भवद्भिरुक्तम्; स पुनस्संस्थानभेद इति चाभ्यधायि । तन्नोपपद्यते, गन्धादौ संस्थानभेदाभावात् । न चात्मादौ निरंशे संस्थानभेदोऽस्ति । अवयवरचनाविशेषो हि संस्थानम् । तस्माज्जात्यैवानुवृत्तव्यवहारस्सर्वत्र संघटत इति चोद्यमनूद्योत्तरं वदति—**उक्ततुल्योत्तरं** तदिति । कथमुक्ततुल्योत्तरत्वमित्यत्राह—**तत्त**दिति । तत्तद्वस्तुस्वभावनियम एव सर्वत्र नियामकः । तेन स्वभावतः सप्रतिद्वन्द्विकत्वेन प्रमाणसिद्धं तत्तद्वस्त्वेव तत्तदनुवृत्तव्यवहारहेतुभावमनुभवति । एवं वस्तुस्वभावनियमानङ्गीकारे तत्तज्जात्याधारभावो भवन्मते तेषामेव गुणानां कथं स्यादिति चोद्ये स्वभावनियम एव भवताऽपि वाच्यः; अन्यतश्चेदनवस्थादिदोषदुष्टत्वात् । तेन ससंस्थानेषु वस्तुषु संस्थानभेद एव व्यवहारनियामकः, गुणादिषु तत्तदसाधारणलक्षणमेव तत्तद्व्यवहारनियामकम्; तच्च भवताऽपि स्वीक्रियते । अन्यथा तत्तल्लक्षणाभावे तत्तज्जातिनियमो न स्यात् । तथा च तत्तल्लक्षणं भवता यथा कल्प्यते तथैवास्माभिरप्यङ्गीक्रियत इति न कश्चिद्दोषः ॥ १२१ ॥ **इति निरवयवेष्वनुवृत्तव्यवहारनिर्वाहः ॥**

482. **सत्तासामान्यमेके त्रिषु परिजगृहुः केऽपि जातावपीदं**
प्रख्यादीनां समत्वात्कथय न किमिदं सर्वनिष्ठं गृहीतम् ।
किञ्च प्रामणिकत्वप्रभृतिसमधिकं सत्त्वमन्यन्न दृष्टं
तद्ब्रह्मेत्याश्रितं यैर्ध्रुवमपलपितं तत्तु तैर्धर्मतोक्तेः ॥ १२२ ॥

एवं सामान्येन सामान्यं विचार्य सत्तासामान्यं विशेषतो निरूपयति—**सत्ते**ति ॥ द्रव्यगुणकर्मसु सत्तेति प्रसिद्धमिदम् । अपरे पुनरेवं मन्यन्ते जातावपीति । तत्र हेतुमाह—**प्रख्यादीना**मिति । प्रतीतिव्यवहारौ हि सर्वत्र जातिकल्पने प्रमाणम् । जातावपि सत्प्रतीतिस्समाना चेत् किमिति तत्रापि सत्ता न कल्प्यत इति भावः । तदिदमाह—**न किमिदं सर्वनिष्ठं गृहीत**मिति । सत्त्वं सर्वनिष्ठं किं न गृह्यत इत्यर्थः । गोत्वं सदश्वत्वं सदिति हि ग्रहणप्रवृत्तिः । किंच परमर्यादया सत्त्वमन्यदङ्गीकृत्योक्तम् । तत्त्वतो निरूपणे प्रामाणिकत्वाद्यतिरेकेण सत्त्वमन्यन्नास्ति । तच्च प्रामाणिकत्वादिकं प्रामाणिकमेव; स्वपरनिर्वाहकसमाधेरात्माश्रयादिदोषाप्रसङ्गात् । तस्मात्सत्त्वेऽपि न कश्चिद्दोषः; सत्त्वमस्तीत्यौपाधिकधर्माणां यावदुपाधिवृत्तेस्सर्वन्यायवित्संमतत्वात् । अत्राद्वैतवादिनस्सत्त्वं ब्रह्मैवेति संगिरन्ते; तदपरामर्शवचनमेव । सत्त्वं हि धर्म एव, न पुनर्धर्मि । तथा च ब्रह्मणोऽपि धर्मत्वाङ्गीकारे धर्म्यन्तरं कल्प्यम् । एवं च सति

वस्त्वन्तरारोपितत्वेन ब्रह्मणोऽपि मिथ्यात्वं प्रसज्यत इति भावः । ध्रुवमपलपितं तनु तैरिति । तैः—मृषावादिभिर्ब्रह्मैवापलपितं सत्त्वस्य ब्रह्मत्वोक्तेः ॥ १२२ ॥ इति सत्ताजातिनिरूपणम् ॥

483. यज्जातीयं सदा यद्यदवधिगुणकं यत्र न ह्यन्यदीदृक्
दृष्टैरित्थं विशेषैर्जगति विषमतां वक्ति वैशेषिकोऽपि ।
नित्येष्वत्यन्ततुल्येष्वपि नियतदशाभेदयोगोऽस्ति शास्त्रात्
प्राच्योपाध्यादयो वा विदुरतिभिदुरान् योगिवर्यादयस्तान् ॥ १२३ ॥

एवं सामान्यं निरूप्य वैशेषिकोक्तं विशेषमनर्थकत्वेन दूषयति—**यज्जातीय**मिति ॥ लोके हि देशकालादिविशेषाद्वस्तूनां विशेषो दृश्यते । यज्जातीयमिति जातिः ; यदेति कालः ; यदिति स्वाभाविको वस्तुविशेषः ; यदवधिगुणकमिति गुणविशेषः ; यत्रेति देशविशेषः । यद्वस्त्वेतादृशगुणविशिष्टं तद्व्यतिरिक्तवस्तु न हीदृक् । अन्यद्वस्त्वन्यदेशकालादिविशिष्टम् ; अन्यच्चान्यदेशकालादिविशिष्टमिति परस्परविभागः । इत्थं दृष्टैरेव विशेषैर्जगति **वैशेषिको**ऽपि विषमतां वक्ति । तथा च नित्येष्व[प्य]त्यन्ततुल्येष्वपि नियतावस्थायोगश्शास्त्रप्रमाणकानामध्यात्मविदामस्ति ; ईश्वरपरतन्त्रस्य जगत्सृष्ट्यादिकृत्यस्य नित्यानुवृत्तत्वात् ; मुक्तानामपि * जक्षत्क्रीडन् रममाण इत्यादिव्यापारपारम्पर्यस्यानुवृत्तेः । किञ्चामुक्तदशाभाविभिः प्राच्यैरेव धर्मविशेषैरुपलक्षणतयाऽवस्थितैर्मुक्तानामपि भेदो ज्ञातुं शक्यते । तदिदमाह—**प्राच्योपाध्यादयो वे**ति । अस्तूपाधिभेदः ; कैरयं भेदो ज्ञायत इत्याशङ्क्याह—**विदुरतिभिदुरान् योगिवर्यादयस्ता**निति । तान्—उपाधीन् परस्परभिदुरान् योगिप्रभृतयो विदुः—जानन्तीति न दृष्टत्वानुपपत्तिः ॥ १२३ ॥

484. मुक्तास्त्वत्पक्षक्लृप्ता न हि निगम[दृशां] विदां तादृशाण्वादयो वा
येषामन्योन्यभेदी गजतुरगनयात्कल्प्यतेऽन्यो विशेषः ।
जात्यैक्याद्वः पृथक्त्वैरिह न यदि फलं स्याद्विशेषैः कथं तत्
तेषामप्यस्त्युपाधिस्सम इति न भिदाऽस्त्यत्र संरम्भमात्रात् ॥ १२४ ॥

मुक्ता इति ॥ किंच समानजातीयत्वादिविशेषणविशिष्टाः परमाणवो मुक्तात्मानश्च परस्परव्यावर्तकधर्मवन्तः द्रव्यत्वाद्घटादिवदिति हि विशेषं साधयन्ति **वैशेषिका**दयः । तत्तद्वस्तुनिष्ठैरेव पृथक्त्वैस्सिद्धसाधनम् । ननु पृथक्त्वानि पृथक्त्वजात्या क्रोडीकृतत्वेन परस्परमैक्यमापन्नानि इतरेतरव्यावर्तनं वस्तूनां न कुर्वन्तीति चेत्, तदिदमनुवदति—**जात्यैक्या**दिति । तदेतत्प्रतिबन्द्या दूषयति—**स्याद्विशेषैः कथं** तदिति । पृथक्त्वैर्व्यावर्तनाभावे वस्तूनां विशेषैरपि व्यावर्तनं न स्यात्, तेषामप्येकोपाधिक्रोडीकृतत्वेन व्यावर्तनशक्तेर्भग्नत्वात् । तदिदमाह—**तेषा**मिति । विशेषस्य विशेषलक्षणरूपैकोपाधिक्रोडीकृतत्वेऽपि विशेषकत्वं यदि न भज्येत, पृथक्त्वस्यापि पृथक्त्वजातिक्रोडीकृतत्वेऽपि विशेषकत्वं न भ्रश्येदिति प्रतिबन्दीपर्यवसानम् ॥ १२४ ॥

485. नास्मद्दृश्या विशेषाः प्रणिहितमनसां तद्धियां क्वोपयोग-
स्तत्तद्वस्तुप्रकाशस्सुलभ इह पुनर्भिन्नधीरस्तु मा वा ।
वि[श्व]श्वं स्रष्टुर्विशिष्टप्रमितिमिह न ते कुर्वते नित्यसिद्धां
तस्मात्तत्सिद्ध्यसिध्योर्न फलमनुमया नागमोऽप्यत्र तादृक् ॥ १२५ ॥

किंच कल्प्यमानस्य विशेषस्य न कुत्राप्युपयोग इत्याह—**नास्मदिति** ॥ न तावदस्माकं विशेषा उपकुर्वते ; तेषामस्मद्दृश्यत्वाभावात् । प्रणिहितमनसामुपकुर्वत इति चेत्, तेषामपि क्वोपयोगः—न क्वाप्युपयोग इत्यर्थः । तदेव विवृणोति—**तत्तदिति** । योगिनां सर्वज्ञत्वेन सर्ववस्तुप्रकाशोऽस्त्येव । तथा च सति तेषु पदार्थेषु भिन्नधीरस्तु मा वा । अयं भावः—तेषां पदार्थानामन्योन्याभावविशिष्टत्वेन भवत्कल्पितैनैव भिन्नधीसद्भावे किं विशेषकल्पनेन ? अथवा भवत्कल्पितैरेव पृथक्त्वैर्भेदधीरस्तु । अतो विशेषकल्पनं प्रणिहितमनसां कुत्रोपयुज्यते ? **मा वेत्यनादरव्यवहारो** विशेषतिरस्कारायैव ; न पुनः पृथक्त्वनिमित्तभेदधीतिरस्काराय । तर्हि विश्वस्रष्टुरीश्वरस्य विशेषैस्तत्तद्वस्तुषु विशिष्टधीरित्याशङ्क्य तदपि न युज्यत इत्याह—**वि[श्व]श्वं स्रष्टुरिति** । ईश्वरस्य तत्तद्विशिष्टबुद्धेर्नित्यत्वेन न तामपि बुद्धिं विशेषाः कुर्वत इत्यर्थः । तस्मादनुमानेन विशेषसिद्ध्यसिद्ध्योर्न किंचित्फलम् । मा भूदनुमानम्, आगमोऽस्त्विति चेत्, तन्नेत्याह—**नेति** । न हि विशेषसिद्धौ कश्चिदागमो दृश्यते ; यदि दृश्यते स पुनर्जातिगुणादिभेदमेव दर्शयतीति न भवदभिमतविशेषसिद्धौ मानमित्याह—**तादृगिति** ॥ १२५ ॥ इति **वैशेषिकक्लृप्तविशेषभङ्गः** ॥

486. **बन्धं नाध्यक्षयामस्समधिकमपृथक्सिद्धयोस्तत्स्वरूपात्**
कल्प्ये तस्यातिरेके तदुपरि च तथेत्यप्रकम्प्याऽनवस्था ।
ताभ्यामेष स्वभावाद्घटित इति कृता भक्तिरस्त्वेतयोस्ते
नो चेत् ज्ञानादिकानां विषयविषयिताद्यापतेदन्यदेवम् ॥ १२६ ॥

एवं विशेषं दूषयित्वा समवायमपि दूषयति—**बन्धमिति** ॥ अपृथक्सिद्धयोस्समवायाख्यं स्वरूपादधिकं कल्प्यमानं संबन्धं न प्रत्यक्षयामः । अतः प्रत्यक्षात्समवायसिद्धिरिति दूरापास्तम् । विशिष्टव्यवहारानुपपत्त्या समवायस्य स्वरूपात् व्यतिरेके कल्प्ये, समवायविशिष्टव्यवहारानुपपत्त्या पुनरपि समवायान्तरं कल्प्यमित्यनवस्था स्यात् । अनवस्थापरिहारार्थं ताभ्यां गुणगुण्यादिभ्यामेष समवायः स्वभावात् घटत इति यदि भक्तिर्भवता क्रियते, कृता सा भक्तिर्गुणगुणिनोरेवास्तु । अयमर्थः—गुणगुणिनौ अवयवावयविनौ जातिव्यक्ती परस्परं स्वभावादेव संबध्येते इति । तदिदमाह—**ताभ्यामित्यादिना त** इत्यन्तेन । नो चेत्—एवमनङ्गीकारे ज्ञानार्थयोरपि विषयविषयिभावादिकं स्वभावातिरेकेण समवायवदन्यदेव संबन्धान्तरं स्यात् । तदिदमाह—**आपतेदन्यदेवेति** ॥ १२६ ॥

487. **संबन्धे सर्वतुल्ये प्रसजति गुणजात्यादिसङ्कीर्णभावः**
तत्तद्द्वन्द्वस्वभावादनियतिशमने निष्फलाऽन्यस्य क्लृप्तिः ।
त्यक्ते तत्तद्विशेषे स्वयमुभयसमे चात्र संबन्धरूपे
नानासंबन्धपक्षेऽप्ययमधिकरणाधेयभेदः कथं स्यात् ॥ १२७ ॥

किंच संबन्धे गुणगुण्यादिसर्वपदार्थसाधारणे सति गोरेव गोत्वेन संबन्धः, अश्वस्यैवाश्वत्वेन संबन्ध इति नियमो न स्यात् ; अपि तु गुणजात्यादिसङ्करः स्यात् । तदिदमाह—**संबन्ध** इति । गोत्वमेव गवा संबध्यते पृथिव्यैव गन्ध इति तत्तत्प्रतियोगिरूपवस्तुद्वयस्वभावादनियतिश्शाम्यतीत्याशङ्क्य परिहरति—**तत्तदिति** । निष्फलाऽन्यस्य क्लृप्तिः—गोत्वादितत्तद्वस्तुस्वभावादेवान्योन्यनियमे मध्ये समवायक्लृप्तिर्निष्फलेत्यर्थः । तत्र च तत्तद्विशेषे त्यक्ते—तत्तद्वस्तुगतस्वभावविशेषे परित्यक्ते, संबन्धस्वरूपे अधिकरणाधिकर्तव्ययोर्द्वयोरपि समाने सति, इदमधिकरणमिदमाधेयमिति भेदः

कथं स्यादित्याह—**त्यक्त** इति । अयं भावः—संबन्धस्साधारणः; तत्रैकमधिकरणम्, इतरच्चाधेयम्; तत्राधिकरणाधिकर्तव्ययोः स्वभावादेव इदमधिकरणमिदमधिकर्तव्यमिति नियमः । स्वभावविशेषपरित्यागे अधिकरणमेवाधेयं स्यात्, आधेयमेवाधिकरणं स्यात्; संबन्धस्योभयतुल्यत्वात् । तस्मात् समवायाङ्गीकारवादिनाऽपि संबन्धिनोः स्वभावविशेषः स्वीकार्यः । तथा च मध्ये समवायकल्पतिर्निरर्थिका । एतद्दूषणं नानासंबन्धपक्षेऽपि तुल्यमित्याह—**नानेति** । अतः स्वभावादेव गुणगुण्यादिसंबन्धः, समवायस्तु निरर्थक इत्यर्थः ॥ १२७ ॥ **इति समवायभङ्गः ॥**

488. **धर्मो धर्मी द्वयं वा कृतकमभिमतं यत्र संबन्धमत्र**
प्राहुः कार्यं स्वभावात्तदुभयघटितं केऽपि दत्तोत्तरं तत् ।
सिद्धेऽसिद्धे समं वा तदुदय इति तु प्रेक्ष्य पक्षत्रयेऽपि
प्रागुक्तेभ्योऽतिरिक्तान् प्रणिहितमनसः पश्यत प्रत्यवायान् ॥ १२८ ॥

समवायस्य क्वचिदनित्यत्ववादिनं प्राभाकरं प्रतिक्षिपति—**धर्म** इति ॥ यत्र धर्मो वा धर्मी वा उभयं वा कृतकमभिमतम्, तत्र समवायं कार्यं प्राहुः **प्राभाकराः** । तं च स्वभावादेव तदुभयघटितं प्राहुः । तच्च दत्तोत्तरमित्याह—**दत्तोत्तरं तदि**ति । कथं दत्तोत्तरमित्युत्तरं विवृणोति—**सिद्ध** इति । सिद्धे वा वस्तुनि घटते समवायोत्पत्तिः? असिद्धे वा? समं वा? न तावत् सिद्धे, समवायमन्तरेण घटसिद्धेरभावात् । नाप्यसिद्धे; असिद्धमाश्रित्य समवायोत्पत्तेरयोगात् । नापि समम्; समवायतदाश्रययोर्युगपदुत्पत्त्ययोगात् । पूर्वसिद्धे हि घटादौ रूपादेरुत्पत्तिः । इत्थं प्रागुक्तेभ्यो दूषणेभ्योऽतिरिक्तानेतान् प्रत्यवायान्—दूषणभेदान्, प्रणिहितमनसः—अवहितमनसः पश्यतेति पदानामन्वयः ॥ १२८ ॥
इति अनित्यसमवायपक्षविशेषदूषणम् ॥

489. **सोऽभावो यः स्वभावं नियमयति दशादेशकालादिभेदो**
नैवं सर्वाश्रितानां त्यजनमनितरस्थाप्यधीप्रापितत्वात् ।
तत्तत्प्रत्यर्थिभावस्फुरणसहकृतो नञ्प्रयोगक्षमोऽसौ
नाभावानामभावं त्वमपि कलयसे भावभेदादितोऽन्यम् ॥ १२९ ॥

एवं भावनिरूपणानन्तरमभावमपि निरूपयति—**स** इति ॥ परे खलु भावातिरिक्तमभावं कल्पयन्ति; तन्नेत्याह—**य** इति । यस्स्वभावं नियमयति देशकालादिभेदो भवत्पक्षे, स एवाभावव्यवहारं नियमयतु; अतिरिक्ताभावकल्पने गौरवम्, अनुपलब्धत्वादनपेक्षितत्वाच्च । एवं तर्हि सर्वाश्रितानां रूपादीनामपि त्यजनं प्रसज्यत इति चेत्, तन्नेत्याह—**नैव**मिति । तत्र हेतुमाह—**अनितरे**ति । अनन्यथासिद्धबुद्धिसिद्धत्वेन रूपादीनां त्यागप्रसङ्गो नास्ति । अभावस्य तु भावविशेषैरेवान्यथासिद्धत्वेन त्यागस्समुचित इति भावः । तर्ह्यभावाभावे कथं नञ्प्रयोग इत्यत्राह—**तत्तदि**ति । तत्तत्प्रतियोगिभावस्फुरणसहकृतो देशकालादिभेद एव स्वभावात् नञ्प्रयोगमपि सहते । अभावस्यापि नञ्प्रयोगसहत्वे स्वभाव एव नियामकः । एवं देशकालादिनियमेऽपि विभाव्यम् । ननु भावस्य कथमभावत्वमित्याशङ्क्याभावानामभावं त्वमपि भावमेवाङ्गीकरोषीत्याह—**नाभावाना**मिति । अयं भावः—यथा भावाभावयोः परस्परप्रतिक्षेपात्मकत्वेनान्योन्याभावरूपत्वमपि भवान् वदति, एवं भावानामेव परस्परप्रतिक्षेपात्मकत्वेनान्योन्याभावरूपत्वं वयमपि वदामः । अतिरिक्ताभाववादिना

त्वया तदुपष्टम्भकत्वेन देशकालादिनियतोऽभावो विरुद्धस्वभाव एव स्वीक्रियते, स एव भावोऽस्तु अभावव्यवहार-विषयः ; किमतिरिक्तेनाभावेन कल्पनागौरवपराहतेनेति ॥ १२९ ॥

490. **प्रध्वंसप्रागभावो द्वितनुरभिमतः प्रागभावात्ययश्च**
प्रागूर्ध्वानाद्यनन्तप्रतिनियतदशासन्ततिः स्यात्तथा नः ।
क्लृप्तेऽन्यस्मिन्नभावे परमपि च [पु] पराभावपारम्परीत-
स्संपद्येतानवस्था स्वत उपरमणं दृष्ट एवास्त्वभीष्टे ॥ १३० ॥

एवमभावसामान्यं निरूप्य प्राक्प्रध्वंसाभावयोर्विशेषमाह—**प्रध्वंसे**ति ॥ भवत्सिद्धान्ते प्रध्वंसप्रागभावो नाम घटतत्प्रागभावरूपो द्वितनुरभिमतः । एवं घटप्रागभावध्वंसश्च घटतत्प्रध्वंसरूपो द्वितनुः । एवमेवास्मत्सिद्धान्तेऽप्यनादि-प्रागवस्थापरम्पराप्रागभावो घटस्य, अनन्त उत्तरावस्थासन्तानः प्रध्वंसः स्यात् । तथा च पूर्वोत्तरावस्थासन्ततिव्यतिरेकेण न प्राक्प्रध्वंसाभावौ कल्प्यौ । एवमनङ्गीकारेण प्रध्वंसप्रागभावे क्लृप्ते प्रागभावप्रध्वंसे च क्लृप्ते सत्युत्तरोत्तराभाव-पारम्पर्यादनवस्था संपद्येत । यदि कुत्रचित् स्वत एवोपरमणमनवस्थायास्तर्ह्यादित एवोपरमणं भवत्वित्याह—**दृष्ट एवा-स्त्वभीष्ट** इति । पूर्वोत्तरावस्थाद्वयं दृष्टं भवतश्चाभीष्टम्, तत्रैवोपरमणमस्त्वनवस्थायाः । अयमर्थः—पूर्वावस्थापरम्परा-प्रागभावः, उत्तरावस्थापरम्परा प्रध्वंस इति दृष्टानुसारपरिकल्पने न कश्चिद्दोषः । पूर्वभावव्यतिरेकेण प्रध्वंसस्य प्रागभाव-परिकल्पने तथोत्तरभावव्यतिरेकेण प्रागभावस्य प्रध्वंसकल्पने सत्यनवस्थादौःस्थ्यमिति ॥ १३० ॥

491. **द्रव्येष्वेव ह्यवस्थाक्रमत उपनता जन्मभङ्गादिरूपा**
नावस्थानामवस्थान्वय इति न भवेत् कार्यतादीति चेन्न ।
ता एवान्योन्यवैरव्यतिभिदुरतयाऽन्योन्यनाशादिरूपा-
श्चिन्त्यो जन्मादिषट्कव्यवहृतिविषयस्तत्तदर्थे यथार्हम् ॥ १३१ ॥

अत्र चोदयति—**द्रव्येष्वि**ति ॥ द्रव्याणामवस्थान्तरप्राप्त्या जन्मादिरुपपद्यते, अवस्थानां पुनरवस्थान्तरप्राप्त्य-भावान्न भवेत् कार्यत्वादीति चेत्, तन्निराकरोति—**नेति** । तदेव विवृणोति—**ता** इति । अन्योन्यवैरव्यतिभिदुरतया—अन्योन्यविरोधयुक्ततया, ता एवावस्था अन्योन्यनाशादिरूपा भवन्ति । अयमर्थः—द्रव्यस्यावस्थान्तरप्राप्तिर्विनाशः, अवस्थायाश्च तदेवावस्थान्तरं विनाशशब्दवाच्यतां प्राप्नोति, पूर्वावस्थापेक्षया विरुद्धस्वभावत्वात् । एवं षड्विधविकारेष्वपि परस्परविरोधस्वाभाव्याज्जन्मादिव्यवहारविषयः संचिन्त्य इत्याह—**चिन्त्य** इति । **यथार्ह**मिति—यथोचितं कल्प्यमित्यर्थः ॥ १३१ ॥ **इति भावातिरिक्ताभावभङ्गः ॥**

492. **नाभावः कारणानां कथमपि विषयो निःस्वभावत्वयुक्तेः**
नाशोऽप्यस्यानपेक्ष्यः स्वयमसत इति प्रागभावादि नित्यम् ।
स्वाभावग्रस्तमेतन्निखिलमपि जगन्निःस्वभावं ततः स्यात्
मैवं भावान्तरात्मन्यधिकवपुषि वा तत्स्वभावत्वदृष्टेः ॥ १३२ ॥

अत्र कश्चिद्ब्राह्ममतानुसारेणाभावानां निःस्वभावत्वमाह । तन्मतमनूद्य दूषयति—**नाभाव** इत्यादिना **मैवमि**त्य-न्तेन ॥ अयमत्र पूर्वपक्षिणो भावः—अभावः कारणानां विषयो न भवति निःस्वभावत्वात् । अतः कार्यमेवाभावो न

भवति। अस्य चाभावस्य नाशोऽप्यनपेक्ष्यः—असाध्यः ; स्वयमसत्त्वात्, न ह्यसतः पुनरसत्त्वमपेक्ष्यते। तस्मादकार्यत्वादनाश्यत्वाच्च प्रागभावादि नित्यमेव। एवं चाभावस्य नित्यत्वे विश्वस्य स्वाभावग्रस्तत्वाद् विश्वमपि जगन्निःस्वभावमेव स्यात्; ततश्च शून्यमेव विश्वमिति। तन्निराकरोति—**मैवमिति**। तत्र हेतुमाह—**भावान्तरात्मनीति** [?] भावान्तरात्मनि, अधिकवपुषि वा अधिकरूपे वाऽभावे तत्स्वभावस्य प्रामाणिकत्वात् कार्यकारणभावादिसर्वस्वभावनियमेन भवदुक्तदोषशङ्काऽपि नाङ्कुरतीति भावः ॥ १३२ ॥ **इति अभावस्य निःस्वभावत्वभङ्गः** ॥

493. **एतावन्तः पदार्था न तु पर इति तत्सिद्ध्यसिद्ध्योरयुक्तं**
मैवं योऽस्त्येष सिद्धान्न पर इति वचस्येष दोषो न तु स्यात्।
सत्येव स्यात्तवापि ह्यधिकमनधिकं वेति शङ्कावकाशो
नैवं चेन्नैव शङ्का न च परिहरणं भित्तिलाभे हि चित्रम् ॥ १३३ ॥

एवमर्थतत्त्वं सर्वमुपपाद्य पदार्थेयत्तावचनं न युज्यत इति वदतः परवादिनो मतं दूषणायानुवदति—**एतावन्त** इति ॥ एतावन्त एव पदार्था न पर इति परेषां सिद्धावसिद्धौ च न युक्तम्; सिद्धौ तावद्व्याघातादेव न युक्तम्; सिद्धस्य निषेद्धुमशक्यत्वात्। असिद्धौ च प्रतियोग्यभावान्न युक्तमिति भावः। अनूदितमेतन्निराकरोति—**मैवमिति**। निराकरणप्रकारं विवृणोति—**य** इति। यः प्रमाणेन लोके सिध्यति स एतस्मान्न पर इति सामान्यतः प्रमाणसिद्धे वस्तुनि भेदे निषिध्यमाने सति तन्निषेधकवचस्येष भवदुक्तो दोषो न स्यात्। अयमर्थः—सामान्यतः प्रतिपन्ने वस्तुनि प्राङ्निरूपितादर्थादर्थान्तरत्वं प्रतिषिध्यत इति। एवमनङ्गीकारे तवापि ह्यधिकशङ्काया नावकाश इत्याह—**सत्येवेति**। प्रतिपन्ने वस्तुनि खलु भवताऽपि पूर्वोक्तादधिकमनधिकं वेति शङ्काऽपि कर्तुं शक्यते। नैवं चेत् एवमनङ्गीकारे नैव शङ्का—भवताऽधिकत्वं नाशङ्क्यते। न च परिहरणं—नास्माभिराशङ्कितोऽर्थः परिह्रियते। तत्र दृष्टान्तमाह—**भित्तिलाभ** इति। अयमर्थः—शङ्कायां सत्यामेवोत्तरं दातुमुचितमिति। अत्रेदं तात्पर्यम्—अधिकमर्थं केनाप्यवगम्याधिकत्वमाशङ्कनीयम्। भवता आशङ्कितं चेत्तत्रोत्तरं दास्यामः; नाशङ्कितं चेदस्माभिरपि सुखेनास्थीयत इति ॥ १३३ ॥ **इति पदार्थेयत्तावधारणोपपत्तिः** ॥

494. **इत्थं श्रीवेङ्कटेशः श्रुतममत जगन्मूलकन्दं मुकुन्दं**
विस्तारो यस्य विश्वं मुनिभिरभिदधे विस्तरो वाङ्मयं च।
यन्नास्मिन् क्वापि नैतत् क्षममिह कुहकैरिन्द्रजालं न तैस्तै-
रेकं तत्सर्वसिद्ध्यै कलयत हृदये तत्त्वमुक्ताकलापम् ॥ १३४ ॥

इत्थं निर्मितस्य प्रबन्धस्य वक्तृवैलक्षण्यं, संप्रदायवैलक्षण्यं विषयवैलक्षण्यं च तावदाह—**इत्थमिति** ॥ श्रीवेङ्कटेश इति वक्तृवैलक्षण्यम्। श्रुतममतेति सत्संप्रदायसिद्धत्वम्। जगन्मूलकन्दं मुकुन्दमिति विषयवैलक्षण्यम्। एतदभिधानं प्रबन्धस्योपादेयतमत्वप्रतिष्ठापनाय। यस्य भगवतो विस्तारोऽपि विश्वं विस्तरो वाङ्मयं चेति सर्वमपि वक्तव्यं संगृहीतमिति द्योतयति। तदेव वदति—**यन्नास्मिन् क्वापि नैतदिति**। अनेन * यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचिदिति वचनं स्मारयति। इह—अस्मिन् प्रबन्धे। तैस्तैः कुहकैर्वादिभिरिन्द्रजालं न क्षममिति प्रबन्धस्याधृष्यत्वमाह। इत्थंभूतं तत्त्वमुक्ताकलापं मङ्गलतमत्वात् हृदये कलयतेति शिष्याणां पुरुषार्थसाधनोपदेशः ॥ १३४ ॥

495. **निश्शेषां वस्तुवृत्तिं निपुणमिह मया न्यस्यता क्वापि कोणे**
यत्रोदासि द्विधा वा समगणि गहने सम्मते सन्मतीनाम् ।
निष्क्रष्टुं कश्चिदन्यः प्रभुरिह भगवल्लक्ष्मणाचार्यमुद्रा-
मक्षुद्राचार्यशिक्षाशतगुणितमतेरप्रमत्तान्न मत्तः ॥ १३५ ॥

निःशेषामिति ॥ अस्मिन् प्रबन्धे निश्शेषां वस्तुवृत्तिं निपुणं न्यस्यता—स्थापयता मया क्वापि कोणे—आभासेऽर्थे यत्रोदासि, गहनेऽर्थे यत्र द्विधा वा समगणि—विकल्पेनाभाणि; तत्र च सन्मतीनां—विदुषां संमत एव, न पुनः स्वकपोलकल्पित[त्व]मात्रेण । तत्र भगवल्लक्ष्मणाचार्यमुद्रां निष्क्रष्टुमक्षुद्राचार्यशिक्षाशतगुणितमतेरप्रमत्तान्मत्तोऽन्यः कश्चिन्न प्रभुरित्यन्वयः । अनेन मदुक्तानुसारेणैवान्तेवासिभिरवशिष्टं निष्क्रष्टव्यं न पुनस्तद्विरोधेनेति भावः ॥ १३५ ॥

496. **दृष्टेऽपह्नुत्यभावादनुमितिविषये लाघवस्यानुरोधा-**
च्छास्त्रेणैवावसेये विहतिविरहिते नास्तिकत्वप्रहाणात् ।
नाथोपज्ञं प्रवृत्तं बहुभिरुपचितं यामुनेयप्रबन्धै-
स्त्रातं सम्यग्यतीन्द्रैरिदमखिलतमःकर्शनं दर्शनं नः ॥ १३६ ॥

दृष्ट इति ॥ एतस्य सिद्धान्तस्य दृष्टेऽपह्नुत्यभावात्, प्रत्यक्षसिद्धेऽर्थे मृषावादिप्रभृतिवदपह्नवाभावात्, अनुमितिविषये लाघवस्यानुरोधात्, वैशेषिकादिवदनपेक्षितकल्पनाभावात्, शास्त्रेणैवावसेये प्रमाणबाधविरहिते नास्तिकत्वप्रहाणात्—निरीश्वरमीमांसकवदीश्वरापह्नवप्रभृत्यनर्थकार्थप्रहाणात् । नाथोपज्ञं प्रवृत्तं—**नाथमुनि**मारभ्य प्रवृत्तम् । बहुभिर्यामुनेयप्रबन्धैरुपचितम् । **यतीन्द्रै**स्सम्यगेव भाष्यादिप्रबन्धपञ्चकनिर्माणेन परित्रातमिदमेव दर्शनमखिलतमःकर्शनमिति स्वदर्शनस्य सूर्योदयवदशेषार्थप्रकाशकत्वं दर्शयति—**दृष्ट** इत्यादिना ॥ १३६ ॥

497. **हृद्या हृत्पद्मसिंहासनरसिकहयग्रीवहेषोर्मिघोष-**
क्षिप्तप्रत्यर्थिदृप्तिर्जयति बहुगुणा पङ्क्तिरस्मद्गुरूणाम् ।
दिक्सौधाबद्धजैत्रध्वजपटपवनस्फातिनिर्धूततत्त-
त्सिद्धान्तस्तोमतूलस्तबकविगमनव्यक्तसद्वर्तनीका ॥ १३७ ॥

एतद्दर्शनप्रवर्तकाचार्यप्रशंसया स्वभक्तिमेवोत्तम्भयन् परपक्षप्रवर्तकानां परागपटलवदाभासत्वमेवाह—**हृद्ये**ति ॥ अक्षरार्थो व्यक्तः ॥ १३७ ॥

498. **अध्यक्षं यच्छ्रुतं वा लघु भवति तदित्यादिमो वादिमोह-**
स्तत्त्वोदर्का न तर्कास्तदिह जगति किं मेधया साधयामः ।
तिष्ठत्वेतल्लघिष्ठाः कतिचन दधतो मानसे मानसेतुं
हंहो सभ्यानसभ्यस्थपुटमुखपुटा दुर्जना निर्जयन्ति ॥ १३८ ॥

अध्यक्षमिति ॥ इत्थं सर्वोत्तरे दर्शने विद्यमानेऽप्याभासवादिनः प्रत्यक्षागमप्रमितयोरर्थयोर्लघुत्वमेव प्रतिपद्यन्ते । अयमादिमो वादिमोहः; प्रत्यक्षागमयोरेव प्राबल्यात्, तद्विरुद्धस्य चानुमानस्यात्यन्तदौर्बल्यात् । यदि वा तर्कमेव परि-

शोधयामः—न तत्त्वोदर्कास्तर्काः—केवलं दन्तादन्तिप्रयासमात्रशेषाः ; तर्काणामप्रतिष्ठितत्वात् । अत्र तर्कशब्दोऽनुमानं तदनुग्राहकं तर्कमपि संगृह्णाति । एवंभूते जगति किं मेधया साधयाम इति निर्वेदवचनम् ; अथवाऽधिक्षेपवादः । इममेवाधिक्षेपवादमुत्तरोत्तरमुद्दीपयति—तिष्ठत्वेतदिति । लघिष्ठाः कतिचन मानसे—मनसि अभिमानस्य सेतुं—परां काष्ठां वहन्तो दुर्जनाः स्वयमसभ्यस्थपुटमुखपुटास्सभ्यान्निर्जयन्ति । किमुक्तं भवति—स्वयं भषणमात्रेणैव भाषमाणा इव जल्पन्तीत्यर्थः । हंहो इति विषादपूर्वाधिक्षेपे ॥ १३८ ॥इति वक्तृवैलक्षण्यादिनिरूपणम् ॥

499. स्यादित्थं शिक्षितार्थो य इह यतिपतिच्छात्रहस्ताग्रनृत्य-
न्नाराचन्यासरेखासहचरितमतिस्सर्वतन्त्रस्वतन्त्रः ।
शुष्कोपन्यासशिक्षापटिमकटुरट[द्भाण्ड]द्वैरिविद्वत्करोटी-
कुट्टाकक्रीडमष्टापदकटकमसौ वामपादे बिभर्तु ॥ १३९ ॥

इत्थमनेन प्रबन्धेन शिक्षितार्थस्सर्वेष्वपि तन्त्रेषु स्वातन्त्र्यं तन्त्रयन् प्रतिभटविद्वत्करोटीकुट्टाकक्रीडाक्षममष्टापदकटकं वामपादे बिभर्त्विति प्रकृतस्य प्रबन्धस्य वैतण्डिकविजयहेतुत्वेनातिशयमाह—**स्यादित्थमिति** ॥ पदार्थः स्पष्टः ॥ १३९ ॥ इति एतत्प्रबन्धाध्ययनफलनिरूपणम् ॥

500. गाथा ताथागतानां गलति गमनिका कापिली कापि लीना
क्षीणा काणादवाणी द्रुहिणहरगिरस्सौरभं नारभन्ते ।
क्षामा कौमारिलोक्तिर्जगति गुरुमतं गौरवाद् दूरवान्तं
का शङ्का शङ्करादेर्भजति यतिपतौ भद्रवेदीं त्रिवेदीम् ॥ १४० ॥

सर्वमङ्गलसिद्ध्यर्थं प्रबन्धसमाप्तौ सकलाचार्यदेशिकं श्रीमद्रामानुजाचार्यं प्रतिभटसकलसिद्धान्तध्वान्तनिरासकत्वेन प्रस्तौति, स्तौति च—**गाथेति** ॥ १४० ॥ इति आचार्यस्तुतिः ॥

॥ इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सर्वार्थसिद्धिसमेते तत्त्वमुक्ताकलापे अद्रव्यसरः पञ्चमः ॥

॥ समाप्तश्चायं निबन्धः ॥

श्रीमद्वेदान्तदेशिकग्रन्थमालायां

॥ वेदान्तविभागः समाप्तः ॥